श्रीविद्यार्णवतन्त्रम्

श्रीविद्यारण्ययतिविरचितम्

II



प्राच्य प्रकाशन, वाराणसी

श्रीविद्यार्णवतन्त्रम्

प्राच्य प्रकाशन

VARANASI TANTRIKA TEXTS SERIES No. 4

Shrividyarnava Tantra

by
SHRI VIDYARANYA YATI
Uttarardha (Part II)

First Edition Edited by
RAM CHANDRA KAK
and
HARABHATTA SHASTRI

Present Edition Edited by
Ram Kumar Rai

PRACHYA PRAKASHAN
VARANASI-221002

Edition : 2006

PRACHYA PRAKASHAN
Post Box No. 2037
C. 21/3 C, Maldahiya, (Behind H.H.I.)
Varanasi-221002 (India)

© **Premchand Mahtab Rai Shodha Sansthan**
Lamhi, (P.O. Via - Sarnath)
Varanasi-221007

No part of this Book may be translated or reproduced in any form, by Print, Photoprint, microfilm or any other means without written premission from the Publishers.

Price : 300.00

Published by : **LUV KUMAR RAI, KUSH KUMAR RAI**
for Prachya Prakashan
C. 21/3 C, Maldahiya, (Behind H.H.I.)
Varanasi-221002 (India)

श्रीविद्यार्णवोत्तरभागे विषयानुक्रमणिका

अष्टाविंशे श्वासे ।

अष्टाक्षरहृषीकेशमन्त्रः सप्रयोगः ३७७ । मन्त्रान्तरम्, श्रीधरमन्त्रः, अच्युतादिमन्त्रविधिः ३७८ । तत्प्रयोगविधिः, नृसिंहमन्त्रोद्धारः, दशधा न्यासः ३७९ । यजनविधिः सप्रयोगः ३८० । काम्यप्रयोगे ध्यानभेदः ३८२ । होमद्रव्यविनियोगः ३८३ । यन्त्ररचनाप्रकारः ३८४ । एकाक्षरमन्त्रविधिः ३८५ । षडक्षरमन्त्रविधानम्, तत्प्रयोगः ३८६ । यन्त्रमन्त्रान्तरवर्णनम्, लक्ष्मीनृसिंहविधानं सप्रयोगम् ३८७ । मन्त्रान्तराणां विधिः ३८८ । वीरनृसिंहः सुदर्शननृसिंहः, सप्रयोगः ३८९ । तद्यन्त्रोद्धारः, षडर्णराममन्त्रः, तत्प्रभावकथनम् ३९१ । एकार्णादिमालामन्त्रान्तानां विधानम् ३९२ । सीतालक्ष्मणमन्त्रः, पूजाविधिः ३९५ । तत्प्रयोगः ३९६ । काम्यप्रयोगविधानम् ३९७ । यन्त्रोद्धारप्रकारः ३९८ । रामानुस्मृतिः, हनुमन्मन्त्रप्रभाव ४०० । तन्मन्त्रमालामन्त्रविधानम्, विनियोगविधिः ४०१ । यन्त्रोद्धारवर्णनम्, हनुमत्स्तुतिः ४०२ । गोपालमन्त्रः, मन्त्रार्थकथनम्, न्यासनिरूपणम्, वृन्दावनान्तःस्थ-साङ्गश्रीगोपालध्यानम् ४०३ । पीठार्चनक्रमः ४०६ । पूजाप्रयोगः ४०७ । श्रीकृष्णमन्त्रः ४०९ । मन्त्रार्थनिरूपणम्, तत्प्रयोगः ४१० । उक्तमन्त्रस्य त्रिकालार्चाविधानम् ४११ । रासगोष्ठीलक्षणम् ४१२ । अर्चान्ते तर्पणविधिः ४१३ । गोपालयन्त्रोद्धारः, मन्त्रान्तरवर्णनम्, काम्यकर्मसु विनियोगविधानम् ४१४ । यन्त्रराजोद्धारनिर्णयः, गोपालगायत्री, दशार्णमन्त्रः, यन्त्रान्तरोद्धारः ४१८ । श्लोकमन्त्रवर्णनम्, यन्त्रान्तरनिरूपणम् ४१९ । मुकुन्दमन्त्रविधानम्, बालकृष्णमन्त्रः, अन्नप्रदमन्त्रः ४२१ । मन्त्रान्तरविधिः ४२२ ।

एकोनत्रिंशे श्वासे ।

श्रीकान्तमन्त्रः, श्रीकान्तसाङ्गध्यानम्, तत्पूजाप्रकारः ४२३ । मारमालामन्त्रः ४२४ । पूजाप्रयोगः ४२५ । यजनविधिः, पूजायन्त्रविधिः, मन्त्रान्तराणां विधानम् ४२६ । वसुपुत्रदकृष्णमन्त्रविधिः, वागैश्वर्यप्रदमन्त्रः ४२७ । नन्दपुत्रमन्त्रवर्णनम्, रुक्मिणीवल्लभमन्त्रः ४२८ । लीलादण्डमहाविष्णुमन्त्रविधिः, गोवल्लभहरिमन्त्रविधानम् ४२९ । गोविन्दमन्त्रः सप्रयोगः ४३० । पञ्चाब्दबालकृष्णमन्त्रस्य प्रयोगः, सिद्धगोपालमन्त्रः ४३१ । एकादिदशार्णान्तमन्त्राः, बालगोपालमन्त्रविधिः, मन्त्रान्तरवचनम् ४३२ । यन्त्रोद्धारः, मन्त्रान्तरविधानम्, सम्मोहनगोपालमन्त्र! ४३३ । तस्य साङ्गध्याननिरूपणम् ४३४ । तत्पूजाप्रयोगः ४३५ । यजनादिनिर्णयः ४३६ । सन्तानगोपालविधिः सप्रयोगः, पूजायन्त्ररचना, निगडच्छेदनमन्त्रः ४३७ । सम्मोहनकृष्णैकाक्षरमन्त्रविधानम्, तत्प्रयोगः ४३८ । काममन्त्रार्चाक्रमः ४३९ । तदर्चाप्रयोगः ४४० । तद्यन्त्राणामुद्धारः, प्रणवमन्त्रः सप्रयोगविधिः ४४१ । कार्तवीर्यमन्त्रोद्धारः ४४२ । तदर्चाविधानम् ४४३ । तत्प्रयोगः ४४४ । यन्त्रोद्धारनिरूपणम्, कार्तवीर्यमन्त्रदशविधभेदनिरूपणम् ४४५ । तन्मन्त्राणां षट्कर्मप्रयोगकथनम् ४४६ । मन्त्रान्तरविधिः, यन्त्ररचनाप्रकारः, महावीर्यमनुविधानम् ४४८ । ध्यानभेदवर्णनम्, यन्त्रोद्धारस्तन्माहात्म्यम्, एतद्यन्त्ररचनाप्रकारः ४४९ । आनुष्टुभध्यानविधिः, आनुष्टुभयन्त्रोद्धारः ४५० । तद्गायत्रीमहिमा, यन्त्रान्तरविधानम् ४५१ । मालामन्त्रः, मालामन्त्रदेवताध्यानं सविधिकम् ४५२ । दीपदानविधानम् ४५३ । दीपदानप्रयोगः, सौरमन्त्रमहिमवर्णनम् ४५४ । अष्टार्णसौरमन्त्र ४५५ । तदर्चाविधानम्, पूजाप्रयोगः ४५६ । अर्घ्यदानविधिः, यन्त्रोद्धारप्रकारः ४५७ । मन्त्रान्तरविधानम् ४५८ । भुवनाधीशामन्त्रः सप्रयोगः ४५९ । त्र्यक्षरार्णविधानं सप्रयोगम् ४६० । पुत्रेष्टिविधिः ४६१ । संग्रामविजयमन्त्रः, अजपामन्त्रविधिः सप्रयोगः ४६४ ।

मार्तण्डभैरवमन्त्रः, तदर्चाविधानं सप्रयोगम् ४६५ । तद्यन्त्रचक्रवर्णनम्, महासौरमनुः ४६६ । चन्द्रमन्त्रः तदर्चाविधिः सप्रयोगः ४६७ । विद्यामनुः, यन्त्ररचनाप्रकारः, भौमादिग्रहाणां मन्त्राः ४६८ । अग्निमन्त्रविधिः सप्रयोगः, मन्त्रान्तरविधानम् ४६९ । काम्यप्रयोगः ४७१ ।

त्रिंशे श्वासे ।

शैवपञ्चाक्षरमन्त्रोद्धारप्रकारः, तत्पूजाविधानम्, मण्डलपूजाक्रमः ४७३ । पूजाप्रयोगः, मन्त्रविनियोगविधिः ४७४ । उक्तमन्त्रस्य प्रत्यक्षरं स्थानवर्णस्वरादिवर्णनम् ४७८ । उमापतिमन्त्रविधानम्, पूजाप्रयोगः, प्रासादमन्त्रविधानम् ४७९ । तदर्चा-प्रयोगः, अष्टाक्षरमन्त्रविधिः ४८० । दक्षिणामूर्तिमन्त्रविधानम् ४८१ । साङ्गध्यानकथनम् ४८२ । पीठकल्पनम्, पूजाप्रयोगः, काम्यप्रयोगः ४८३ । मन्त्रान्तरोद्धारः, तदर्चाविधानं सप्रयोगम् ४८४ । काम्यप्रयोगविधिः, दक्षिणामूर्तेर्यन्त्रम् ४८५ । नवाक्षरमन्त्रविधानम् ४८६ । मृत्युञ्जयमन्त्रः सप्रयोगः, काम्यप्रयोगविधिः, मृत्युञ्जययन्त्रम् ४८७ । अघोरास्त्रमन्त्रविधानम्, तत्प्रयोगः, काम्यविनियोगः ४८९ । तद्यन्त्रोद्धारः ४९० । पाशुपतास्त्रमन्त्रविधिः, नीलकण्ठमन्त्रविधिः ४९१ । काम्यकर्मविनियोगः ४९२ । तन्मन्त्रान्तरकथनम्, चिन्तामणिमन्त्रः, तद्विधानं सप्रयोगम् ४९३ । मन्त्रान्तरं तत्काम्यप्रयोगः ४९४ । तुम्बुरुरुद्रमन्त्रः, तदर्चाविधानम्, पूजाप्रयोगः ४९७ । काम्यसाधनम्, यन्त्ररचनाप्रकारः, क्षेत्रपालमन्त्रः ४९८ । तदर्चाविधिः, प्रयोगः, वटुकभैरवमन्त्रः ४९९ । तदर्चाविधानम्, एकादशधा न्यासः ५०० । प्रेतबीजोद्धारन्यासः सिंहबीजम्, क्वाणबीजम्, मन्याबीजम्, महाश्रीबीजम्, प्राणबीजम्, घण्टाबीजम्, ख्यातिबीजम्, मूलबीजम्, भ्रामरीबीजम् ५०१ । आकूतबीजम्, कालबीजम्, विद्याबीजम्, शृङ्खलान्यासः, महापराख्यबीजम् ५०२ । मातृकान्यासः, महासरस्वतीबीजम्, ध्यानाद्यर्चा ५०३ । पूजाप्रयोगः ५०४ । वीरसाधनविधानम् ५०६ । तत्प्रयोगः ५०८ । काम्यसाधनम्, राजस–तामस–ध्यानवर्णनम् ५१० । काम्यप्रयोगान्तरसाधनम्, मृत्युञ्जयविधिः ५११ । राजसबलिविधानम्, गजाश्वादिरक्षाप्रयोगः ५१३ । वटुकयन्त्ररचना, तन्मन्त्रान्तरविधिः ५१४ । पूजाप्रयोगः ५१५ । चण्डेश्वरमन्त्रविधिः, तत्प्रयोगः, काम्यविधानम्, तस्य स्तोत्रम् ५१६ ।

एकत्रिंशे श्वासे ।

त्र्यम्बकमन्त्राभिधानम्, मन्त्रनिरुक्तिः, मन्त्रार्थयोजना, मन्त्रविधानम् ५१९ । पूजाप्रयोगः ५२० । होमद्रव्याणि, न्यासविधिः, एतन्न्यासप्रयोगः ५२१ । महामृत्युञ्जयमन्त्रोद्धारः, तद्विधानम्, तत्पूजाप्रयोगः ५२२ । मृत्युञ्जयध्यानम् ५२५ । लिङ्गमुद्राविधिः, पूजाविधानम् ५२६ । प्रयोगविध्यन्तरम् ५२७ । होमविधिः, काम्यप्रयोगः ५२९ । गायत्रीविधानम् ५३० । तत्प्रयोगः ५३१ । उत्पत्तिन्यासः, स्थितिन्यासः ५३२ । लयन्यासः, चम्पकन्यासः ५३३ । गायत्रीमन्त्रार्थः, व्याहृत्यर्थः, गायत्रीशिरसोऽर्थः, तुरीयपादार्थः, तद्विधानम् ५३४ । प्रत्यक्षरतत्त्वशक्तिध्यानानि ५३५ । तन्मुद्रानामानि, गायत्रीहृदयम् ५३६ । गायत्रीकवचम् ५३७ । गायत्रीपूजाविधिः ५३८ । तद्यन्त्रविधानम् ५३९ । पात्रस्थापनलक्षणम्, अर्घ्यादिद्रव्याणि, करशुद्धिः, आवरणपूजाविधिः ५४० । काम्यप्रयोगः ५४१ । कादिमतरीत्या, मन्त्रपारायणक्रमः ५४२ । ललितायाः स्वरूपभेदसमुत्थयन्त्राणामुपदेशः ५४७ । अभिषेकनित्यपूजादौ चक्रमानम्, रत्नाद्यधिकरणे स्वेच्छामानम्, स्थितिसंहारात्मकमध्यचक्रद्वयोपदेशः, सृष्टिचक्रनिर्माणोपदेशः, तस्य सद्गुरुप्रसाद-लभ्यत्वम्, प्रोक्तप्रकारमन्तरेण चक्रनिर्माणेऽनर्थविशेषः, उक्तप्रकारचक्रपूजने फलम्, चतुर्दशारादिचक्रस्य मानम्, चक्रतत्पूजाफलोपदेशः, अमृतघटाख्ययन्त्रप्रयोगफलम्, ऊर्मिकादिषु सर्वरक्षाविधानम्, यन्त्रस्य तडागादिषु स्थापनादि ५४८ । सिद्धवज्रयन्त्रनिर्माणादि, कोष्ठवज्रयन्त्रनिर्माणादि, उक्तयन्त्राणां फलानि, वज्रलिङ्गयन्त्रनिर्माणविधिः, मेरुलिङ्गयन्त्रनिर्माणादि, ५४९ । महालिङ्गयन्त्रविधानम्, योनिचक्रनिर्माणादिकम्, वज्रवज्रयन्त्रनिर्माणादि, विषमसमादिकोष्ठेषु यथेष्टाङ्कलेखनेन यन्त्राणामानन्त्यम्, नित्यास्वरूपपरिवारन्यासजपतर्पणहोमाभिषेकोपचारादीनां वासनाः,

५५० । ललिताविद्याया अक्षरवाच्यार्थकथनम्, पिण्डादिमालान्तानां मन्त्राणां त्रैविध्यम्, त्र्यक्षरादिनवाक्षरावधि मन्त्रजातस्य अक्षरसंदर्भजनितसंख्याक्रमः, तेषां प्रस्तारक्रमः ५५१ । मन्त्राणां निर्माणप्रकारः, मन्त्राणां क्रूरसौम्यमिश्रत्वम्, मन्त्रतदुपासकानां त्रैविध्यमर्थालोचनतत्फलं च, मन्त्रविद्यादीनां सकारणं वैरम्, मन्त्रतद्देवतानामुपासकदोषैर्वैरीकरणादि ५५२ । गुरुमन्त्रदेवतानां सम्यक् भजनक्रमः, मन्त्रविद्यादीनां वर्णौषधि–गुलिकाविनियोगः, ५५३ ।

द्वात्रिंशे श्वासे ।

महागणपतेरेकाक्षरमन्त्रः, तदर्चाविधिः ५५४ । अर्चापीठनिरूपणम्, अष्टमातृध्यानानि, दिक्पालानां ध्यानानि, पूजाप्रयोगः ५५५ । काम्यहोमविधानम् ५५६ । एकार्णमन्त्रान्तरविधिः, विरिगणेशमन्त्रः ५५७ । तदर्चाविधिः सप्रयोगः ५५८ । लक्ष्मीगणेशमन्त्रः, तत्पूजाविधिः, पूजाप्रयोगः ५५९ । काम्यप्रयोगः त्र्यक्षरशक्तिगणेश–मन्त्रः, तत्पूजाप्रयोगः, काम्यप्रयोगः, चतुर्वर्णशक्तिगणेशः ५६० । तत्प्रयोगः काम्यकर्महोमः, क्षिप्रप्रसादनविनायकः, तदर्चाविधिः सप्रयोगः, काम्यहोमविधानम्, चतुरर्णहेरम्बमन्त्रः ५६१ । तदर्चना सप्रयोगा हेरम्बयन्त्रोद्धारः ५६२ । सुब्रह्मण्यगणेशमन्त्रः, तदर्चा सप्रयोगा ५६३ । महागणेशमन्त्रः, तत्पूजाविधानम् ५६४ । तस्य प्रयोगः, काम्यकर्मप्रयोगः ५६६ । भूमिबीजोद्धारः, महागणपतेर्यन्त्रवर्णनम् ५७२ । यन्त्रविनियोगः, गणेशयन्त्रान्तराणि ५७३ । सम्वादसूक्तम् ५७४ । कामनाभेदेन ध्यानभेदः, काम्यतर्पणविधिः ५७५ । आयुधमन्त्रेषु विशेषः, तर्पणप्रयोगः ५७६ । तस्य प्रकारान्तरम् ५७७ । द्रव्यविशेषैस्तर्पणे फलविशेषः, त्रैलोक्यमोहनगणपतिः ५७९ । तदर्चाविधिः सप्रयोगः, शक्तिगणेशः, तदर्चा–सप्रयोगा, काम्यहोमविधिः, भोगगणेशमन्त्रः ५८० । तदर्चाविधानम् हरिद्रागणेशप्रभावः, हरिद्रागणेशमन्त्रः, तन्मन्त्रग्रहणप्रकारः, तस्य ध्यानार्चनादि ५८१ । स्तम्भनयन्त्रं तद्विनियोगः ५८२ । आकर्षणयन्त्रं सविनियोगम्, वश्ययन्त्रसाधनादि ५८३ । उच्चाटनयन्त्रसाधनादि ५८५ । विद्वेषणयन्त्रसाधनादि ५८६ । मारणयन्त्रसाधनादि, वक्रतुण्डमन्त्रः ५८७ । तस्य ध्यानार्चादिप्रयोगः, काम्यहोमविधानम् ५८८ । तन्मन्त्रान्तरम्, आथर्वणिकमन्त्रः ५८९ । गणेशगायत्री, उच्छिष्टगणेशविधानम्, काम्यसाधनम्, वश्यप्रयोगः, उच्चाटनप्रयोगः ५९० । मारणप्रयोगः, तन्मन्त्रान्तराणि, बलिमन्त्रः, ध्यानविशेषः, काम्यसाधनविधिः ५९१ । तस्य मन्त्रान्तराणि, ध्यानार्चनादिकाम्यप्रयोग, तन्मन्त्रान्तरम्, ५९२ । मञ्जुघोषमन्त्रः, श्रुतिधरीविद्या, सार्वज्ञविद्या ५९३ । यन्त्रोद्धारः सविनियोगः, ध्यानार्चनादिविधिः, तन्महामन्त्रोद्धारः ५९४ । तत्साधनविधानम् मञ्जुघोषमन्त्रान्तरंससाधनम् ५९५ । चरणायुधमन्त्रः, तस्य ध्यनार्चनादिविधिः ५९६ । प्रयोगः काम्यसाधनप्रकारः, शास्तृमन्त्रः ५९७ । तद्ध्यानार्चादिप्रयोगः, शास्तृगायत्री, वैवस्वतमन्त्रः सध्यानः, चित्रगुप्तमन्त्रः सध्यानादिकः ५९८ । आसुरीमन्त्रः, तस्य ध्यानार्चनादिविधिः, कुबेरस्य मन्त्रद्वयं साध्यानादि ५९९ । विश्वावसुरमन्त्रः साध्यानार्चनादिकः, शताक्षरमन्त्रः सप्रयोगः ६०० । काम्यसाधनविधिः ६०१ ।

त्रयस्त्रिंशे श्वासे ।

शताक्षरमन्त्रोद्धारः, तस्य धारणविधि ६०३ । वरुणऋग्मन्त्रविधानम्, तस्य ध्यानार्चादि सप्रयोगम्, काम्यसाधनविधिः, ऋणमोचनयन्त्ररचनाप्रकारः ६०४ । ज्वरोन्मादादिनाशनयन्त्रम्, कृत्याभिभवयन्त्रम्, ग्रहोन्मादादिनाशनयन्त्रम् ६०५ । सर्वसमृद्धिप्रदयन्त्रम्, बलनिसूदनयन्त्रम्, तस्ययन्त्रान्तरम्, यन्त्रधारणक्रमः सप्रयोगः ६०७ । ग्रहपीडाप्रशमनयन्त्रम् ६०८ । ग्रहाणां वेदोक्ता मन्त्राः, सूर्यस्यार्चाध्यानादिविधिः, ६०९ । चन्द्रभौमयोः०, बुधबृहस्पत्योः० ६१० । शुक्रशनैश्चरयोः० ६११ । राहुकेत्वोः०, सूर्यमन्त्रप्रयोगः ६१२ । सूर्यस्तोत्रम्, चन्द्रमन्त्रप्रयोगः ६१३ । चन्द्रस्तोत्रम्, भौममन्त्रप्रयोगः, भौमस्तोत्रम्, ६१४ । बुधमन्त्रप्रयोगः, बुधस्तोत्रम्, बृहस्पतिमन्त्रप्रयोगः ६१५ । बृहस्पतिस्तोत्रम्, शुक्रमन्त्रप्रयोगः, शुक्रस्तोत्रम्, शनिमन्त्रप्रयोगः,

६१६। शनिस्तोत्रम्, राहुमन्त्रप्रयोगः, राहुस्तोत्रम् ६१७। केतुमन्त्रप्रयोगः, केतुस्तोत्रम्, नवग्रहाणांसाधारण-स्तोत्रम् ६१८। मङ्गलकल्पः, मङ्गलमन्त्रोद्धारः, अर्चाध्यानविधिः, यन्त्ररचनाप्रकारः, तदर्चनादिविधानम्, ६१९। यन्त्रान्तरं तदर्चाप्रयोगः ६२०। मङ्गलप्रार्थना, ऋणमोचनस्तोत्रम् ६२१। मङ्गलव्रतकथा, भौमव्रतोद्यापनम् ६२२। ऋग्विधानम् ६२३। यजुर्विधानम् ६२७। सामविधानम् ६३०। अथर्वविधानम्, मृत्युञ्जयप्रयोगविशेषः ६३१। पार्थिवपूजाविशेषविधानम् ६३२। लिङ्गस्तवः, भयनाशनमन्त्रः ६३३। आपद्विनाशनमन्त्राः, बालरक्षायन्त्रम्, कुबेरयन्त्रम्, वन्दीमोक्षः, भूरिविजयमन्त्रः, रत्नधारामन्त्रः, कुबेरमन्त्रहोमप्रकारः, विस्फोटकहरणम्, पञ्चमुखहनुमन्मन्त्रध्यानम्, तन्मन्त्राः, तन्मन्त्रान्तराणि ६३४। द्वादशार्णविद्योद्धारः, तदर्चाध्यानादि, वानरेयामुद्रा, काम्यप्रयोगविधिः, ६४०।

चतुस्त्रिंशे श्वासे।

हनुमत्पूजायन्त्रम्, धारणयन्त्रविधिः ६४३। प्रतिमायन्त्रविधानम्, द्वादशार्णविद्याप्रयोगः ६४४। हनुमन्मालामन्त्रः, तत्प्रयोगविधिः ६४५। मन्त्रान्तरम्, मालामन्त्रः ६४६। तदर्चाप्रयोगादिविधिः, रक्षायन्त्रोद्धारः, अष्टाक्षरमन्त्रः, गन्धाष्टकम्, ज्वरादिनाशनमन्त्रः ६४७। अग्निचक्रपरिज्ञानम् वह्निस्थितिः ६४८। अरिमन्त्रपरित्यागविधिः, गुरोरभावे दीक्षाविधिः ६४९। मुद्रालक्षणानि, शैवागमे षडङ्गमुद्राविशेषः ६५०। आवहनादिमुद्राः, शक्तिमुद्राः, खेचरीप्रभावः ६५१। गणेशमुद्राः, शाक्तेयमुद्राः, गायत्रीमुद्राः ६५२। वैष्णवमुद्राः ६५३। सौरमुद्रे, शैवमुद्राः, आसनादिमुद्राः ६५४। पञ्चवायुमुद्राः, वैश्वानर-नाराच-संहार-सृणिकालकर्णिका-विस्मय-नादबिन्दुमुद्राः, स्वस्तिकाद्यासनलक्षणम् ६५५। षडन्वयशांभवरश्मिपूजाक्रमः, आभ्यन्तरस्नानम्, प्रातरादिसंध्योपासनम् ६५६। संध्यालोपे प्रायश्चित्तम्, सौत्रकण्टकीध्यानम्, तन्मन्त्रः, चतुरन्वयिना सौरपूजा-विधिः ६५७। शांभवपूजाप्रयोगः ६५९। न्यासजालविधानम् ६६०। परेश्वरध्यानम् तदर्चनाक्रमः, निर्वाण-विद्या, कामधेनुचरणविद्या, निष्कलपादविद्या, सकलपादविद्या, शुक्लरक्तमिश्राम्बाचरणविद्या ६६१। गुरुक्रमो-मूलमन्त्राश्च, सृष्टिक्रमेण मानसरश्मिपूजा ६६२। रश्म्यावरणध्यानम् परेश्वरकूटध्यानादि, गुप्ततमस्तोत्रम्, सामान्यार्घ्यविधिः, नवात्ममण्डलोद्धारप्रकारः ६६३। मण्डलार्चनक्रमः ६६४। तिरस्करिण्या अर्चाध्याना-दिकम्, विच्चेश्वरकूटध्यानादि ६६६। नाभसरश्मिपूजा, रश्मिध्यानम् ६६७। हंसेश्वरकूटध्यानम, वायव्यरश्मि-पूजा, संवर्तकेश्वरक्रमः ६६८। संवर्तकेश्वरन्यासः, तैजसरश्मिपूजा, रश्मीनां ध्यानम् ६६९। द्वीपेश्वरकूट-ध्यानम्, जलरश्मिपूजा ६७०। रश्मीनां ध्यानम्, पार्थिवक्रमे न्यासः, नवात्मेश्वरकूटध्यानम्, तस्य शक्तिध्यानम्, पार्थिवरश्मिपूजा, रश्मीनां ध्यानम्, आयुधपूजा ६७१। षडन्वयार्चनविधिः, संहारक्रमतोऽर्चनक्रमः ६७२। वेदोक्तशांभवचरणमन्त्रः, नवदुर्गाविधानम् ६७३। चरितत्रयस्य विनियोगादिविधिः, काम्यकर्मसाधनप्रकारः ६७४। उत्कीलनक्रमः, कामंणे साध्यकथनं तत्कर्मारम्भकालश्च, एकावृत्त्यादिपाठानां फलानि, ६७५। प्रयोग-विधिः चरित्राणां पृथक् २ फलानि ६७६।

पञ्चत्रिंशे श्वासे।

नित्यानां मातृकादीनां च प्राणात्मता, एकस्य वायोर्वृत्तिभेदात् संज्ञाभेदः, उद्भवदेश-तत्त्वोदयः, श्वासाना-मुदयादिविशेषैः, चन्द्रसूर्याद्यात्मकत्वम्, चन्द्रादीनां सामान्यफलं तेषु कर्तव्यानि ६७७। शिष्यमन्त्रोपदेशकालः, श्वासानां कालात्मकत्वम्, प्राणोदयनिरूपणम्, वामदक्षिणोभयप्रवाहकाले बलाधिक्यम्, श्वासानां वासना-व्याप्तिः, योगसिद्धस्य लक्षणम् ६७८। काम्यविधौ पूर्णमण्डलशक्तिनामानि ६७९। पञ्चधा वर्णशक्तयः षट्-कर्मसु काः पूज्याः, ६८०। षट्शांभवरश्मिपूजाक्रमः, नाडीचक्रस्वरूपम्, अष्टाविंशन्मर्मस्थानानि, दशवायु नामकर्माणि ६८१। योगनिर्वचनम्, तदङ्गानि तत्प्रत्युहाः, आसनप्राणायामभेदनिरूपणम्, योगसिद्ध-

लक्षणम्, प्रत्याहारधारणास्वरूपम्, धारणासिद्धिफलानि, आकाशगमनादिसिद्ध्युपायः, स्वेच्छोत्क्रान्तेरुपायः, परकायप्रवेशनादि ६८२। योगसिद्धलक्षणानि, आसन्नमृत्युचिह्नानि, देवीमाहात्म्यस्य पूज्यशक्तयः ६८३। माहात्म्यपाठप्रमाणं तत्फलं च, षोडशनित्यानां लोकात्मकत्वम्, नित्यायाः कालविग्रहत्वम्, महानित्याया अपरिच्छिन्नकालात्मकत्वं अन्यासां तदवयवभूतकालात्मकत्वं च, लोकरूपं तन्मानं च कालचक्रपरिवृत्तिकारणादि, कालचक्रे सप्तग्रहलोकस्थितिः, नित्यनां मेरुद्वीपादिषोडशविधदेशेषु परिवृत्तिक्रमः, नित्यानां कालचक्रमयत्वादि, देशकालतिथिप्राप्तनित्यापूजनादि ६८५। सप्तद्वीपनामादि, कालचक्रे ग्रहाणां स्थितिकारणम्, नित्यालोकावस्थानपूजाध्यानादिकम्, नित्यालोकमानादिकम्, पञ्चधा षोडशी विद्या, रमादिषोडशीविद्याशक्तयः ६८६। परादिषोडशीविद्याशक्तयः, कामादिषोडशीविद्याशक्तयः, वागादिषोडशीशक्तयः ६८७। शक्त्यादिषोडशीशक्तयः, ६८८। सूक्ष्महोमविधानम्, सूक्ष्महोमस्य प्राणाग्निहोत्रविद्यया व्याप्तिः, सूक्ष्महोमस्वरूपप्रकारादि, प्राणाग्निहोत्रमन्त्रादिकम्, शक्तिशिवयोस्तेजस्त्रयात्मकत्वादि, कुण्डलिनीस्वरूपम्, जीवन्मुक्तलक्षणम् ६८९। ज्ञानरहितस्यापि भक्तितः सिद्धिः, नित्याभक्तिवैभवम्, ब्रह्मादीनां नित्याप्रेरितत्वम्, सिद्धानामेव परहोमयोग्यता, नित्याभक्तलक्षणम्, परहोमस्वरूपम्, स्थूलसूक्ष्महोमयोः परहोमेन तादात्म्यम्, दारिद्र्यध्वंसिनी पूजा, तदावरणशक्तयः, ६९०। पूजाफलम्, स्थितिक्रमपूजा, वारक्रमेण षट्सु चक्रेषु पूजा ६९१। शक्तिकूटोपासनाफलप्रकारः, पूजाक्रमः, वाग्भवकामराजोपासनाफलप्रकारः, त्रिकोणमध्ये ललितायजनम्, परमार्थस्वरूपादिप्रकाशे देवीप्रश्नाः, पृष्टार्थकथनपीठिकापुरःसरं तदुपकरत्वम् ६९२। देवीकृतप्रश्नानां उत्तरकथनम्, परमार्थतः स्वरूपोपदेशः, तत्स्वरूपप्रकाशोपायः, प्रपञ्चप्रकाशकारणादि, प्राणिनां पुण्यपापात्मकत्वं जन्मकारणं च, मुक्तिशब्दार्थः तद्धेतुश्च, संसृतिशब्दार्थः, मुक्तौ हेतुः तत्प्रकारश्च, संसृतेः परमकारणम्, ज्ञातृज्ञानादीनां तत्त्वात्मकत्वम्, बुद्धेः सप्ताधिकशतगुणभेदाः, इन्द्रियाणां स्वरूपम्, धीचितोः पार्थक्यम्, प्राणानां जीवस्य च स्वरूपम्, कालस्वरूपं तद्भेदाश्च, ग्रहाणां स्वरूपादिकथनम्, द्वादशविधप्रश्नाः ६९३। जन्ममरणकारणम्, कालपरमात्मनोः स्थितिः, मुक्तानामनावृत्तिः नेतरेषाम्, भूतानां स्थितिप्रकारः, जीवानामागतिकथनम्, सिद्धानां मरणं निद्रया समम्, साध्यसाधकसिद्धानां मरणे सुगतित्वज्ञापककालः, बुद्धेर्वैविध्यकारणप्रश्नोत्तरम्, गुरुमुखादेव आत्मज्ञानम्, आत्मवतामेव सप्तचत्वारिंशल्लक्षणानि, आत्मवतां समाचारः ६९४। जीवन्मुक्तानां ललितापूजाक्रमः, तन्त्रार्थवेदिनः फलम्, यन्त्रलेखने प्राग्विधिः, यन्त्रलेखनक्रमः ६९५। तद्गायत्री, यन्त्रलेखनानन्तरविधिः, वश्यकरयन्त्राणां विरचनक्रमः, दिव्यस्तम्भनयन्त्रविधिः, मोहनयन्त्रक्रमः, मृत्युञ्जयाख्ययन्त्ररचना ६९६। विवादजयदयन्त्रम्, धनिकवशीकरणयन्त्रम्, दुष्टवश्ययन्त्रम्, मानजयप्रदयन्त्रम्, यावज्जीववशप्रदयन्त्रम्, वशयन्त्रान्तरविधिः, भृत्यदुष्टप्रभुवशंकरे यन्त्रे, स्त्रीणां भर्तृवशीकरणयन्त्राणि ६९७। आकर्षणयन्त्रयोर्विधिः, वादिनः स्तम्भनयन्त्रम्, अग्नेर्निवर्तनयन्त्रम्, विद्वेषणमारणोच्चाटयन्त्राणि उपसर्गादिदोषग्रहभूतादिज्वर-सर्पभीतिमोचन-बन्धमोक्षदयन्त्रविधिः ६९८। यन्त्राणां भेदाः, रक्षावश्ययन्त्रे, मृत्युंजय-ज्वरघ्न-भुजङ्गहारियन्त्राणि, ६९९। धूमावतीमनुः, शत्रूच्चाट-भूतादिवैरि-विद्वेषणयन्त्राणि, घर्मटिकाविद्या, प्रेतराजयन्त्रम्, यममन्त्र-अष्टाक्षर-द्वादशाक्षर-मन्त्रा निग्रहाख्ययन्त्रम् तद्विधिः ७००। कालीयममन्त्री, उच्चाटनवश्यविद्वेषणस्तम्भनादियन्त्राणि, गारुडयन्त्रम् ७०१। गारुडमन्त्रः, संजीवन-पिण्डयन्त्रतत्फलम्, वश्यकरं संजीवनाख्यं च यन्त्रम्, ज्वरघ्नादियन्त्राणि ७०२। जृम्भादिविद्याष्टकम, वाक्स्तम्भनादियन्त्राणि ७०३। लेखनद्रव्याणि, यन्त्रधारणनिषेधः, शक्तिकूटवर्णोद्भवानां खण्डानां यन्त्राणां च संख्या तत्फलानि, विषमसमकोष्ठेषु विद्याकूटलेखनात् यन्त्राणामानन्त्यम् ७०४। नवकोष्ठयन्त्रे अङ्कयोजने पदसंख्या आद्यवर्णादियन्त्राणां संख्या, षोडशकोष्ठयन्त्रविधिः, अङ्कर्धनाविधिः, अङ्कमेलने यन्त्रकल्पनादि, आद्यवर्णजानि खण्डानि, ७०५। द्वितीयादिवर्णजानि खण्डानि, पञ्चमवर्णजानिखण्डानि, श्रीविद्यापद्धतौ प्रातः कृत्यम्, गुरुध्यानप्रार्थनादि

अजपासंकल्पः ७०६ । हंसरूपध्यानमजपानिवेदनं च, भूगुरुप्रार्थनापूर्वं मन्त्रस्नानविधिः, विभूतिधारण-विधानम् ७०७ । संध्यावन्दनम्, गायत्रीमन्त्रः, प्रातरादिसंध्यासु ध्यानानि, तर्पणविधिः विशेषाचमनं च, श्रीचक्रावरणदेवतातर्पणक्रमः ७०८ । मातृकाम्भोजे आधारशक्तिपूजादि, दीपनाथपूजाक्रमः, गुर्वादिवन्दन—भूतापसारणादि, गणेश—पञ्चमी—दुर्गाविघ्नशरभाघोरसुदर्शनविद्याः ७०९ । भूतशुद्धिप्रकारः, पापपुरुषध्यानं तत्संदहनम्, भूतोत्पत्तिः प्राणप्रतिष्ठा च ७१० । प्राणशक्तिध्यानम्, अन्तर्बहिर्मातृकान्यासः ७११ । दशधा मातृकाः, कलामातृकान्यासः, श्रीकण्ठादिमातृकान्यासः ७१२ । केशवादिमातृकान्यासः, ७१३ । लज्जाबीजादि-मातृकान्यासः, रमाबीजादिमातृकान्यासः, कामबीजादिमातृकान्यासः, त्रिशक्तिमातृकान्यासः, प्रपञ्चयाग-मातृकान्यासः, बालामातृकान्यासः ७१४ । श्रीविद्यामातृकान्यासः, परामातृकान्यासः, कामरतिन्यासः, अष्टात्रिंशत्कलान्यासः ७१५ ।

षट्त्रिंशे श्वासे ।

मालिनीन्यासः ७१७ । लिङ्गन्यासः, करशुद्धिन्यासः, नवासनन्यासः, परान्यासः, पश्यन्तीन्यासः, मध्यमान्यन्यासः ७१८ । वैखरीन्यासः, कामकलान्यासः, कलालिकान्यासः ७१९ । कामकलासोमकलान्यासः, योगपीठन्यासः, चतुष्पीठन्यासः ७२० । पञ्चप्रेतासनषडासनन्यासः चतुरासनन्यासः, षोढान्यासे गणेशन्यासः, ७२१ । ग्रहनक्षत्रन्यासः ७२२ । योगिनीन्यासः ७२४ । राशिपीठन्यासः, श्रीचक्रे संहारक्रमतः प्रथमावरण-न्यासः ७२५ । द्वितीयावरणन्यासः, तृतीयावरणन्यासः, चतुर्थावरणन्यासः, पञ्चमावरणन्यासः ७२६ । षष्टावरणन्यासः, सप्तमावरणन्यासः, अष्टमावरणन्यासः, नवमावरणन्यासः, सृष्टिक्रमन्यासः, स्थितिश्रीचक्रे विद्यान्यासः ७२७ । कूटन्यासः, अक्षरन्यासः, नवयोनिन्यासः, शृङ्खलान्यासः, नवचक्रन्यासः, अष्टाष्टकन्यासः ७२८ । वशिन्याद्यष्टकन्यासः, भूषणन्यासः, षडङ्गन्यासः, तत्त्वचतुष्टयन्यासः, अमठन्यासः, ऊर्ध्वाम्नायन्यास-क्रमः, ऊर्ध्वाम्नायमन्त्राः ७३० । महाषोढान्यासे गुरुपादुकान्यासः, पञ्चवक्त्रन्यासः, मूर्तिषडङ्गन्यासः, महाषोढा-न्यासध्यानम्, प्रपञ्चन्यासः ७३१ । भुवनन्यासः, मूर्तिन्यासः, मन्त्रन्यासः ७३२ । दैवतन्यासः, मातृकान्यासः, ७३३ । विश्रान्तिचरणन्यासः, प्रकाशचरणन्यासः, पञ्चाम्बान्यासः, नवाकाशनाथ—पूज्यनवनाथ-स्वपारम्पर्य-न्यासः, षोडषमूलविद्यान्यासः ७३४ । षडाधारविद्यान्यासः, मुद्रादशकम्, संघट्टमुद्रालक्षणम्, पराप्रासाद-ध्यानादिकम्, ७३५ । मण्डपार्चनविधिः ७३६ । अर्घ्यस्थापनक्रमः, पूजोपकरणशुद्धिपूर्वमात्मपूजनम् ७३७ । पादुकास्मरणम् ७३९ । ऊर्ध्वाम्नायक्रमे चरणविद्याः, नवनाथाः, षोडशमूलविद्याः ७४० । शुक्लरक्तचरणविद्ये, मिश्रचरणविद्या, पीठपूजाविधिः, मूर्तौ आवाहनादिपरमीकरणपूर्वं देवशुद्धिः ७४१ । महात्रिपुरसुन्दरी-ध्यानम् ७४२ । आन्तरयजनविधिः, बहिर्यागध्यानान्तरम्, आसनाद्युपचारपूजा, तिथिनित्याद्यर्चनक्रमः ७४३ । नवावरणपूजाविधानम् ७४४ । समयदेवतार्चनम् ७४६ । मूलदेव्यै धूपदीपनैवेद्यादि-आरात्रिकदानम्, विद्याजपार्थं, मन्त्रन्यासः ७४७ । चतुराम्नायपूजाक्रमः, षड्दर्शनार्चनक्रमः, सिद्धान्तविद्याभिरर्चनविधिः, देवताभिवन्दने—पञ्चमुद्राः, देवतोद्वासनादिशेषविधि ७४८ । उपस्थानसहस्राक्षरी ७४९ । प्रस्तारसहस्राक्षरी ७५० । आवरणसहस्राक्षरी, अन्त्ययागविधि ७५१ । निष्कलब्रह्मविद्या ७५२ । निष्कलसंपुटिता ब्रह्मविद्या, अन्त्ये-ष्टिकर्तुः कृत्यानि, दीपिनी ज्वालामालिनीविद्या, ७५३ । भयक्षिणीमन्त्रः, योजनिकानन्तरं शेषकर्तव्यतां ७५४ ।

अथ

श्रीविद्यार्णवतन्त्रम्

॥ श्रीविद्यारण्ययतिविरचितम् ॥

अष्टाविंशः श्वासः

अथ हृषीकेशमन्त्रः । सारसंग्रहे—

अथोच्यते हृषीकेशमनुः सर्वार्थसाधकः । कामं ततो हृषीकेशा वायुर्नत्यन्त ईरितः ॥ १ ॥
अष्टाक्षरो मनुः प्रोक्तो हृषीकेशस्य शोभनः । ऋषिर्ब्रह्मा समुद्दिष्टोऽनुष्टुप् छन्द उदीरितम् ॥ २ ॥
देवता च हृषीकेशः सुरासुरनमस्कृतः । षडदीर्घयुक्तमारेण षडङ्गानि प्रकल्पयेत् ॥ ३ ॥

कामं कामबीजं, हृषीकेशा स्वरूपं, वायुर्यकारः, नत्यन्तोः नमोन्तः । तथा—

शङ्खचक्रगदापद्मधारिणं संस्मरेद्विभुम् । गरुडोपरि संविष्टं शुभ्रवर्णं सुभूषणम् ॥ ४ ॥

पूर्ववदायुधध्यानम् ।

ततः पूर्वोदिते पीठे मन्त्री देवं समर्चयेत् । कर्णिकायां समावाह्य हृषीकेशं समाहितः ॥ ५ ॥
अङ्गानि च ततः पश्चात् पूजयेदुक्तमार्गतः । वक्षःस्थले दक्षभागे श्रीवत्सायेति पूजयेत् ॥ ६ ॥
वामे च कौस्तुभायेति ग्रीवायां पूजयेत् ततः । नमोन्तवनमालायै मुकुन्दायेति संयजेत् ॥ ७ ॥
मूर्तौ च कर्णिकायां तु पक्षिराजाय वै नमः । नमः पङ्कजनाभाय गरुडोपरि पूजयेत् ॥ ८ ॥
ततोऽष्टदलपद्मे तु वक्ष्यमाणान् प्रपूजयेत् । पुरुषोत्तमको लक्ष्मीनिवासस्तदनन्तरम् ॥ ९ ॥
सकलाद्यो जगन्नाथो जगत्क्षोभणकस्तथा । सर्वस्त्रीहृदयं पश्चान्मनोन्मादक एव च ॥ १० ॥
सम्यक् (तद्वत्) त्रिभुवनाद्यश्च सर्वसौभाग्यदस्तथा । सर्वकामप्रदः पश्चाच्चतुर्थ्यन्तान् नमोन्तकान् ॥ ११ ॥
तत उत्सङ्गगां देवीं पूजयेत् श्रीं श्रियै नमः । ततश्च परितो देवान् पूजयेन्मन्त्रवित्तमः ॥ १२ ॥
लोकेशांश्च ततो बाह्ये वज्रादीनि ततो बहिः ।.......................... ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीहृषीकेशाय देवतायै नमः इति विन्यस्य, प्रागवद्विनियोगमुक्त्वा क्लां हृदयाय नमः इत्यादिषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गपूजान्ते देवस्य वक्षसि दक्षभागे श्रीवत्साय नमः । वामभागे कौस्तुभाय नमः । ग्रीवायां वनमालायै नमः । देवमूर्तौ मुकुन्दाय नमः । कर्णिकायां पक्षिराजाय नमः । तदुपरि पङ्कजनाभाय नमः । अष्टदलेषु पुरुषोत्तमाय नमः । लक्ष्मीनिवासाय० । सकलजगन्नाथाय० । जगत्क्षोभणाय० । सर्वस्त्रीहृदयमनोन्मादनाय० । त्रिभुवनमनोन्मादकाय० । सर्वसौभाग्यदाय० । सर्वकामप्रदाय० ।

इति देवाग्रादिप्रादक्षिण्ये संपूज्य, देवस्य वामोत्सङ्गे श्रीं श्रियै नमः । देवस्य परितः सर्वदेवताभ्यो नमः । इति संपूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति ॥ तथा—

वर्णलक्षं जपेन्मन्त्रं तद्दशांशं हुनेद् बुधः । आज्याक्तैः कमलैः फुल्लैः शोभनैर्मन्त्रवित्तमः ॥ १३ ॥
तर्पणं स्वाभिषेकं च कुर्याद् ब्राह्मणभोजनम् । एवं सिद्धमनुः सम्यक् साधयेदिष्टमात्मनः ॥ १४ ॥
सम्मोहिनी प्रसूनैश्च तर्पणं सर्वकामदम् । तथा पूर्वमनुः सोऽपि हृषीकेशस्य सिद्धिदः ॥ १५ ॥

(सम्मोहिनी विजया)

स्थाने हृषीकेश इति ऋषिरर्जुन ईरितः । छन्दोऽनुष्टुव देवता च हृषीकेशः समीरितः ॥ १६ ॥
अङ्गानि मारबीजेन ध्यानपूजादि पूर्ववत् । .... ॥

इति । सारसंग्रहे—

रमारुद्धं मारबीजं श्रीधराय ततो वदेत् । त्रैलोक्यमोहनायेति नत्यन्तः षोडशाक्षरः ॥ १ ॥

मारबीजं कामबीजं, तद्रमाबीजेन रुद्धं व्याप्तं, तेन श्रींक्लींश्रीं इति । नत्यन्तो नमोन्तः । तथा—

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छन्द ईरितम् । देवता श्रीधरः प्रोक्तः सर्वदेवौघवन्दितः ॥ २ ॥
श्रीबीजेन षडङ्गानि कुर्याद् दीर्घयुजा सुधीः । .... ॥

दुग्धाब्धौ सकलर्तुसेवितवने द्वीपे च कल्पद्रुमं
तस्याधः कमलोरुपीठविलसत्पक्षीन्द्ररम्यासने ।
बिभ्राणं करपङ्कजैररिदरौ सम्यग्गदामम्बुजं
स्वर्णाभं मुकुटोल्लसन्मणिरुचा दीप्तं भजे श्रीधरम् ॥ ३ ॥

जपपूजादिकं सर्वमस्य पूर्ववदाचरेत् । पूर्ववत् हृषीकेशवत् ।
लक्षमेकं जपेन्मन्त्रं तद्दशांशं हुनेद् घृतैः । तर्पणादि ततः कुर्यात् पूर्ववत् साधकोत्तमः ॥ ४ ॥
ततः सिद्धे मनौ मन्त्री काम्यकर्म समाचरेत् । सुगन्धैः श्वेतपुष्पैश्च होमो लक्ष्मीकरः शुभः ॥ ५ ॥
श्रीकराद्युदितान् योगान् विदध्यात् तत्र साधकः । ध्यानपूजाजपाद्यैर्यो भजते श्रीधरं नरः ॥ ६ ॥
पुत्रपौत्रैश्वर्यकीर्तीः प्राप्नोत्यखिलसम्पदः । अपुत्रः परमं विष्णोर्धाम संविशते पुनः ॥ ७ ॥

इति ॥ तथा—

अच्युतानन्दगोविन्द-पदं ङेन्तं समुच्चरेत् । हृदन्तोऽयं मनुःप्रोक्तो रुद्रसंख्याक्षरः पुनः ॥ १ ॥
अथवैते त्रयो मन्त्राः प्रोच्यन्ते सर्वकामदाः । अच्युताय नमो ह्येकोऽनन्ताय नम इत्यपि ॥ २ ॥
गोविन्दाय नमः प्रोक्तस्तृतीयो देशिकोत्तमैः । समुदायैकमन्त्रस्य ऋषिः शौनक ईरितः ॥ ३ ॥
विराट् छन्दो देवता च परमात्मा हरिः स्मृतः । षडङ्गविधिरुक्तो हि द्विरुक्तैर्मन्त्रनामभिः ॥ ४ ॥
मन्त्रत्रितयपक्षे तु देवता छन्द इत्युभे । पूर्वोक्ते च मुनिः प्रोक्तः सम्यक् पराशरस्तथा ॥ ५ ॥
व्यासश्च नारदश्चैव मन्त्रवर्णैः षडङ्गकम् । शङ्खचक्रधरं देवं चतुर्बाहुं किरीटिनम् ॥ ६ ॥
सर्वायुधैरुपेतं तं गरुडोपरि संस्थितम् । सनकादिमुनीन्द्रैस्तु सर्वदेवैरुपासितम् ॥ ७ ॥
श्रीभूमिसहितं देवमुद्यदादित्यसंनिभम् । प्रातरुद्यत्सहस्रांशुमण्डलोपमकुण्डलम् ॥ ८ ॥
सर्वलोकस्य रक्षार्थमनन्तं नित्यमेव हि । अभयं वरदं देवं धारयन्तं मुदान्वितम् ॥ ९ ॥
पूर्वोदिते यजेत् पीठे वैष्णवे तूक्तवर्त्मना । देवमावाह्य मन्त्राङ्गैः प्रथमावृतिरिष्यते ॥ १० ॥
चक्राद्यैश्च द्वितीया स्यात् तृतीया सनकादिभिः । सनकः स्यात् ततस्तद्वत् सनन्दनसनातनौ ॥ ११ ॥
सनत्कुमारश्च पराशरो व्यासश्च नारदः । शौनकोऽष्टम एवं स्याच्चतुर्थी लोकपालकैः ॥ १२ ॥
तदायुधैः पञ्चमी स्यादेवं पूजा समीरिता । .... ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शौनकाय ऋषये नमः । मुखे विराजे छन्दसे नमः । हृदि हरये परमात्मने देवतायै नमः इति विन्यस्य, विनियोगमुक्त्वा, ॐअच्युताय हृदयाय नमः । ॐअनन्ताय शिरसे० । ॐगोविन्दाय शिखा० । ॐअच्युताय कवचाय० । ॐअनन्ताय नेत्र० । ॐगोविन्दाय अस्त्रा० । इति करषडङ्गन्यासं कृत्वा ध्यानाद्यङ्गार्चान्ते अष्टदलेषु प्रागुक्तचक्राद्यायुधाष्टकं सम्पूज्य, द्वितीयाष्टदले—सनकाय नमः । सनन्दनाय० । सनातनाय० । सनत्कुमाराय० । पराशराय० । व्यासाय० । नारदाय० । शौनकाय० । इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति । तथा—

लक्षमेकं जपेन्मन्त्रं तद्दशांशं हुनेद् घृतैः । तर्पणं स्वाभिषेकं च कुर्याद् ब्राह्मणभोजनम् ॥ १३ ॥
एवं कृतवतस्तस्य रोगनाशो भविष्यति । कन्यार्थी लाजहोमेन लक्ष्म्यर्थी बिल्वहोमतः ॥ १४ ॥
वस्त्रार्थी पुष्पहोमेन ह्यारोग्यार्थी तिलैर्हुतैः । तत्तत्फलमवाप्नोति मन्त्रविन्नात्र संशयः ॥ १५ ॥
रविवारे जले स्थित्वा नाभिमात्रे जपेद् बुधः । अष्टोत्तरसहस्रं तु ज्वरनाशो भविष्यति ॥ १६ ॥
विवाहार्थी जपेन्मासं शशिमण्डलमण्डनम् । देवं ध्यायेल्लभेत् कन्यां शोभनां च कुटुम्बिनीम् ॥ १७ ॥
जपहोमार्चनाभिर्यो भजेन्मन्त्रं समाहितः । भुक्त्वेह सकलान् भोगान् याति विष्णोः परं पदम् ॥ १८ ॥

इति ॥ अथ नृसिंहमन्त्रः । सारसंग्रहे—

अथ वक्ष्ये समासेन नरसिंहमनोः शुभम् । विधानं सजपध्यानं पूजाहोमादिभेदतः ॥ १ ॥
संसारार्तिप्रशमनं दुःखदारिद्र्यनाशनम् । सर्वरोगहरं मृत्युनाशनं मोक्षदायकम् ॥ २ ॥
विष्णुः शार्ङ्गी वह्निबिन्दुयुतो नीरं त्रिमूर्तियुक् । वह्निबिन्दुयुतः कालो व्योम दीर्घयुतं जलम् ॥ ३ ॥
सनेत्रं देशिकैः प्रोक्तं तदन्ते कर्णबिन्दुयुक् । शान्तो ढान्तनिविष्टश्च चतृतीयो जलान्वितः ॥ ४ ॥
मासं बिन्दुयुतं प्रोक्तं तद्वत् णान्तं (सर्वं) च पूतना । सद्ययुक्ता सकर्णोऽथ कालःकान्तः सबिन्दुयुक् ॥ ५ ॥
त्रिविक्रमयुता दीर्घा भृगुः नेत्रेन्दुसंयुतः । व्योम बिन्दुयुतं नाभिस्त्रिमूर्तिः श्वेत एव च ॥ ६ ॥
ढान्तोः बिन्दुयुतो नाभिस्ततृतीयरविन्दुयुक् । कालस्त्रिविक्रमयुतः पूतना वालिकर्णयुक् ॥ ७ ॥
त्रिविक्रमयुतः सूर्यः शुद्धि कर्णयबिन्दुयुक् । दीर्घा कालोऽनन्तयुतो रविर्वायुसमन्वितः ॥ ८ ॥
व्योम बिन्दुयुतं प्रोक्तो मन्त्रो द्वात्रिंशदक्षरः । वेदादिमायापुटितं केचिदाहुर्मनीषिणः ॥ ९ ॥

इति । विष्णुः उ । शार्ङ्गी ग, वह्निः र, बिन्दुः अं, ताभ्यां युक्तस्तेन ग्रं । नीर व, त्रिमूर्तिः ई, तेन वी । वह्निः र, बिन्दुः अ, तेन रं । कालो म । व्योम ह, दीर्घः आ, तेन हा । जलं व, सनेत्रं इयुतं, तेन वि । शान्तः ष, ढान्तो ण, कर्ण उ, बिन्दुः अं, तैः ष्णुं । चतृतीयो ज, जलं व, तेन ज्व । मासं ल, बिन्दुः अं, तेन लं । णान्तं त, तद्वत् बिन्दुमत्तेन तं । सर्वं स्वरूपं । पूतना त, सद्य ओ, तेन तो । कालो म, कर्ण उ, तेन मु । (कान्तः) ख, बिन्दुरनुस्वारस्तेन खं । त्रिविक्रम ऋ, तद्युता दीर्घा न तेन नृ । भृगुः स, नेत्रे इ, इन्दुरनुस्वारस्तेन सिं । व्योम ह, बिन्दुयुतं तेन हं । नाभिः भ, त्रिमूर्तिः ई, तेन भी । श्वेतः ष । ढान्तो ण, बिन्दुः अं, तेन णं । नाभिः भ । ततृतीयं द, रस्वरूपं, बिन्दुः अं, तेन द्रं । कालो म, त्रिविक्रम ऋ, तेन मृ । पूतना त, वाली य, कर्ण उ, तेन त्यु । त्रिविक्रमः ऋ, सूर्यः म, तेन मृ । शुद्धिः त, कर्ण उ, य स्वरूपं, बिन्दुः अं, तेन त्युं । दीर्घा न । कालो म, अनन्त आ, तेन मा । रविः म, वायुः य, तेन म्य । व्योम ह, बिन्दुः अं, तेन हं इति । स्पष्टं तु—"उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् । नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥" इति ॥ तथा—

ब्रह्मा ऋषिः समुद्दिष्टोऽनुष्टुप् छन्द उदाहृतम् । देवता नरसिंहोऽथ सुरासुरनमस्कृतः ॥ १० ॥
वेदैश्चतुर्भिर्वसुभिः षड्भिः षडभिश्च वेदकैः । षडङ्गमुक्तं मन्त्रार्णैः केचित् षड्दीर्घमायया ॥ ११ ॥

सहितैरङ्गमिच्छन्ति परे पञ्चाङ्गमूचिरे। पादैः सर्वेण मन्त्रेण वर्णन्यासमथाचरेत् ॥ १२ ॥

पञ्चाङ्गं तु श्रुतिसंमतम्। तथा वेदे चाथर्वणीये नृसिंहतापनीये—"तस्य हि पञ्चाङ्गानि भवन्ति। चत्वारः पादाश्चत्वार्यङ्गानि भवन्ति सप्रणवं सर्वमेव भवतीति" इति। तथा—

शीर्षे ऽलिके नेत्रयुग्मे आस्यदोष्पादसन्धिषु। अग्रयुक्तेषु कण्ठे च हृदि नाभौ च पार्श्वके ॥ १३ ॥
पृष्ठे ककुदि विन्यस्येत् क्रमान्मन्त्रार्णकान् सुधीः। नृसिंहसांनिध्यकरो न्यासो दशविधस्त्विह ॥ १४ ॥
सम्प्रोच्यते तत्र पूर्वमंगुलीन्यास उच्यते। दशांगुलीनां प्रत्येकं पर्वांगां त्रितयेषु च ॥ १५ ॥
त्रिंशद्वर्णान् क्रमान्न्यस्य शिष्टौ द्वौ तलयोर्न्यसेत्। द्वितीयमक्षरन्यासं देहे कुर्याद्विचक्षणः ॥ १६ ॥
ब्रह्मरन्ध्रे च शिरसि भाले भ्रूमध्यके ततः। नयने नयनाधश्च कपोले कर्णमूलयोः ॥ १७ ॥
दन्तपंक्त्योश्च चिबुके उत्तरोष्ठेऽधरोष्ठके। कण्ठे नाभौ भुजे दक्षे वामे च हृदये तनौ ॥ १८ ॥
अन्यं दक्षे करतले वामे चापि कटौ तथा। मेढ्रे चोरौ तथा जानुजङ्घागुल्फेषु मन्त्रवित् ॥ १९ ॥
पादांगुलीषु च ततो बाह्वोरंगुलिषु क्रमात्। पर्वसंधिषु सद्रोमकूपेषु क्रमतो न्यसेत् ॥ २० ॥
रक्तास्थिमज्जासु तथा न्यसेद्वर्णान् क्रमात् सुधीः। तृतीयो वर्णविन्यासः प्रोच्यते सर्वकामदः ॥ २१ ॥
पादे गुल्फे च जङ्घायां जान्वोरूरौ तथा कटौ। नाभौ हृदि न्यसेद् बाह्वोः कण्ठे च चिबुके तत ॥ २२ ॥
दन्ते चोष्ठे कपोले च कर्णास्ये च तथा नसि। नेत्रे च मूर्धनि तथा मन्त्री वर्णान् समाहितः ॥ २३ ॥
चतुर्थोऽयं पदन्यास उच्यते भुक्तिमुक्तिदः। शिखायां मूर्ध्नि नासायां नेत्रे श्रोत्रे तथा मुखे ॥ २४ ॥
हृदि नाभौ कटौ जान्वोः पादयोः क्रमतो न्यसेत्। चतुरक्षरसंज्ञोऽयं न्यासः पञ्चम उच्यते ॥ २५ ॥
नासाग्रे नयने श्रोत्रे नाभौ हृदि च मूर्धनि। बाह्वोश्चरणयोर्न्यस्येच्चतुर्णक्रमाद् बुधः ॥ २६ ॥
षष्ठः पादैश्च विन्यासो मन्त्रविद्भिः प्रकीर्तितः। मूर्ध्नि वक्षसि नाभौ च सर्वाङ्गे क्रमतो न्यसेत् ॥ २७ ॥
(सप्तमः स्यादथ न्यासो मूर्द्धादि-हृदयावधि। पादादि-हृदयान्तं च न्यस्येदर्धद्वयं मनोः ॥ २८ ॥
उग्रादिरष्टमो न्यासो विद्वद्भिर्गदितः शुभः। उग्राद्युग्रादि च पुनः पदानीह नमाम्यहम् ॥ २९ ॥
इत्यन्तकानि नवसु स्थानेषु क्रमतो न्यसेत्) मुखे शिरसि नासायां चक्षुषोः श्रोत्रयोस्तथा ॥ ३० ॥
के शिखास्थानके तद्वद् हृदि नाभौ ततो न्यसेत्। कट्यादि-पादपर्यन्तं क्रमात् न्यस्येत् यथाविधि ॥३१॥
वीराख्यो नवमो न्यासः प्रोच्यते सर्वकामदः। वीरादिकानि पूर्वोक्तपदानि नव विन्यसेत् ॥ ३२ ॥
नमाम्यहं-पदान्तानि पूर्वोक्तस्थान एव च। नृसिंहाख्यश्च दशमः प्रोच्यते न्यास उत्तमः ॥ ३३ ॥
नृसिंहपदपूर्वाणि पदान्युग्रादिकानि च। स्थानेषूक्तेषु विन्यस्य नवसु क्रमशः सुधीः ॥ ३४ ॥
मूलाधारे षडङ्गानि विन्यसेन्मन्त्रवित्तमः। मूलाधारात् तथा नाभौ न्यस्येद्वर्णत्रयं बुधः ॥ ३५ ॥
नाभेर्हृदयपर्यन्तं न्यस्येत् वर्णचतुष्टयम्। हृदो भ्रूमध्यपर्यन्तं न्यस्येद् वर्णचतुष्टयम् ॥ ३६ ॥
वर्णद्वयं पादयुगे शिष्टं वर्णद्वयं न्यसेत्। मूर्धादि-पादपर्यन्तं चिन्तयेन्नृहरिं विभुम् ॥ ३७ ॥

नृसिंहं भजे जानुविन्यस्तबाहुं त्रिनेत्रं भुजप्रोल्लसच्चक्रशङ्खम्।
कृशानूपमज्योतिषा ग्रस्तदैत्यं शिरःशोभिदंष्ट्रासुदीप्तद्विजिह्वम् ॥ ३८ ॥

इति ध्यानम्। दक्षवामयोश्चक्रशङ्खौ।

यजेत् पूर्वोदिते पीठे वैष्णवे प्रोक्तवर्त्मना। मूलेन मूर्तिं संकल्प्य देवमावाह्य मन्त्रवित् ॥ ३९ ॥
तस्यां मूर्तौ विधानेन नृसिंहं पूजयेत् ततः। वामाङ्के नृहरेः पूज्या लक्ष्मीर्भूषण भूषिता ॥ ४० ॥
वामे पद्मधरा दक्षबाहुना नृहरिं विभुम्। अश्लिष्यन्ती शान्तमूर्तिस्ततोऽङ्गानि प्रपूजयेत् ॥ ४१ ॥
पूजयेद् दिक्षु पक्षीन्द्रं तथा शर्वमनन्तकम्। भवं कमलजं च त्रिदिक्षु च यजेच्छ्रियम् ॥ ४२ ॥
ह्रियं तुष्टिं च पुष्टिं च द्वितीयावृतिरीरिता। ततोऽष्टभिर्नृसिंहैश्च तृतीयावृतिरिष्यते ॥ ४३ ॥

शङ्खिनं चक्रिणं स्वर्णवर्णं श्यामलवाससम् । नृसिंहं स्तम्भनायेति दले प्राच्यां प्रपूजयेत् ॥ ४४ ॥
धृताम्बुजगदाशङ्खचक्रं वश्यक्रियाक्षमम् । सिन्दूरारुणमाग्नेये पूजयेद् दक्षिणे ततः ॥ ४५ ॥
आन्त्रमालां शङ्खचक्रे गदां खड्गं च विभ्रतम् । भिन्नदैत्यहृदं कृष्णं त्रिनेत्रं मारणक्षमम् ॥ ४६ ॥
विद्वेषोच्चाटनकरं नीलोत्पलसमप्रभम् । शङ्खचक्रगदालोहदण्डं निर्ऋतिजे दले ॥ ४७ ॥
प्रतीच्यां शङ्खचक्रासिपाशान्वितकराम्बुजम् । शक्तियुक्तं जपापुष्पनिभमाकर्षणक्षमम् ॥ ४८ ॥
वायवीये तु शवलं शङ्खचक्रे गदाभये । बिभ्राणं पुष्टिदं नेत्रत्रितयालंकृताननम् ॥ ४९ ॥
उदग्दले नृसिंहं तं पाञ्चजन्यं सुदर्शनम् । गदानिधिं च बिभ्राणं लक्ष्म्या युक्तं निधिप्रदम् ॥५०॥
विद्यामूर्तिमुदक्पूर्वे क्षीराभं पीतवाससम् । पाशांकुशधरोद्बाहुशङ्खचक्रधरं विभुम् ॥ ५१ ॥
हृत्सरोरुहमध्यस्थं चन्द्रपुञ्जसुनिर्मलम् । लक्ष्म्या युक्तं नारसिंहं पूजयेत् साधकः सदा ॥ ५२ ॥
चक्रं खड्गं महापद्मं मुसलं देवदक्षिणे । शङ्खं खेटं गदां शार्ङ्गं पूजयेद् देववामतः ॥ ५३ ॥
एभिश्चतुर्थावृतिः स्याल्लक्ष्म्यादिभिरनन्तरम् । लक्ष्मीं दक्षिणतस्तुष्टिं वामे तत्रैव कौस्तुभम् ॥ ५४ ॥
श्रीवत्सं दक्षिणे मध्ये वनमालां च पूजयेत् । पीताम्बरं ब्रह्मसूत्रं नाभिपद्मं किरीटकम् ॥ ५५ ॥
भूषणानि च सर्वाणि पुरोभागे प्रपूजयेत् । षष्ठी श्रद्धादिभिः प्रोक्ता श्रद्धा मेधा च कामिका ॥५६॥
भीमा मा चैव सभया चकान्द्री (?) दीप्तिरष्टमी । लोकेशैः सप्तमी प्रोक्ता वज्राद्यैरष्टमी मता ॥ ५७ ॥
एवं सम्पूज्य विधिवत् साधकोऽभीष्टमाप्नुयात् । .... ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीनृसिंहाय देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा. उग्रं वीरं हृदयाय नमः । महाविष्णुं शिरसे० । ज्वलन्तं सर्वतोमुखं शिखा० । नृसिंहं भीषणं कवचाय० । भद्रं मृत्युमृत्युं नेत्रत्रयाय० । नमाम्यहं अस्त्राय० इति करषडङ्गन्यासं कृत्वा, ॐ उं नमः शिरसि । एवं ग्रं ललाटे । वीं दक्षनेत्रे । रं वामनेत्रे । मं मुखे । हां दक्षदोर्मूले । विं कूर्परे । ष्णुं मणिबन्धे । ज्वं अंगुलिमूले । लं अग्रे । तं वामदोर्मूले । सं कूर्परे । वँ मणिबन्धे । तों अंगुलिमूले । मुं अग्रे । खं दक्षोरुमूले । नृं जानुनि । सिं गुल्फे । हं अंगुलिमूले । भीं अग्रे । षं वामोरुमूले । णं जानुनि । भं गुल्फे । द्रं अंगुलिमूले । मृं अग्रे । त्युं कण्ठे । मृं हृदि । त्युं नाभौ । नं दक्षपार्श्वे । मां वामे । म्यं पृष्ठे । हं ककुदि (१) दक्षकरांगुष्ठमूलादिपर्वत्रये उंग्रंवीं० । तर्जनीपर्वत्रये रंमंहां० । मध्यमापर्वत्रये विंष्णुंज्वं० । अनामापर्वत्रये लंतंसं० । कनिष्ठापर्वत्रये वँतोंमुं० । वामकनिष्ठापर्वत्रये खंनृंसिं । अनामापर्वत्रये हंभींषं० । मध्यमापर्वत्रये णंभंद्रं० । तर्जनीपर्वत्रये मृंत्युंमृं० । तदंगुष्ठपर्वत्रये त्युंनंमां० । दक्षकरतले म्यं० । वामे हं० ॥ (२) ब्रह्मरन्ध्रे उंनमः । शिरसि ग्रं० । भाले वीं० । भ्रूमध्ये रं० । नेत्रयोः मं० । नेत्राधः हां० । कपोलयोः विं० । कर्णमूलयोः ष्णुं० । दन्तपंक्त्योः ज्वं० । चिबुके लं० । उत्तरोष्ठे तं० । अधरोष्ठे सं० । कण्ठे वँ० । नाभौ तों० । दक्षभुजे मुं० । वामे खं० । हृदये नृं० । सर्वाङ्गे सिं० । दक्षकरतले हं० । वामे भीं० । कटौ षं० । लिङ्गे णं० । ऊर्वोः भं० । जानुनोः द्रं० । जङ्घयोः मृं० । गुल्फयोः त्युं० । पादांगुलीषु मृं० । करांगुलीषु त्युं० । सर्वाङ्गरोमकूपेषु नं० । रक्ते मां० । अस्थिन म्यं० । मज्जासु हं० ॥ (३) दक्षपादे उंनमः । वामे ग्रं० । दक्षगुल्फे वीं० । वामे रं । दक्षजङ्घायां मं० । वामजङ्घायां हां० । दक्षजानुनि विं० । वामे ष्णुं० । दक्षोरौ ज्वं । वामे लं० । दक्षकटौ तं० । वामे सं० । नाभौ वँ० । हृदि तों० । दक्षकरे मुं० । वामे खं० । कण्ठे नृं० । चिबुके सिं० । ऊर्ध्वदन्तेषु हं० । अधोदन्तेषु भीं० । ओष्ठे षं० । अधरोष्ठे णं० । दक्षकपोले भं० । वामे द्रं० । दक्षकर्णे मृं० । वामे त्युं० । मुखे मृं० । दक्षनसि त्युं० । वामे नं० । दक्षनेत्रे मां० । वामे म्यं० । मूर्ध्नि हंनमः ॥ (४) उग्रंनमः शिखायां । वीरं मूर्ध्नि । महाविष्णुं नासायां । ज्वलन्तं नेत्रयोः । सर्वतोमुखं श्रोत्रयोः । नृसिंहं मुखे । भीषणं हृदि । भद्रं नाभौ । मृत्युमृत्युं कटौ ।

नमामि जानुनोः। अहं पादयोः ॥ (५) उग्रंवीरं नमः नासाग्रे। महाविष्णु नेत्रयोः। ज्वलन्तं स श्रोत्रयोः। र्वंतोमुखं नाभौ। नृसिंहं भीं हृदि। षणं भद्रं मूर्ध्नि। मृत्युमृत्युं बाह्वोः। नमाम्यहं पादयोः ॥ (६) ॐउग्रंवीरं महाविष्णुं नमो मूर्ध्नि। ज्वलन्तं सर्वतोमुखं नमो वक्षसि। नृसिंहं भीषणं भद्रं नमो नाभौ। मृत्युमृत्युं नमाम्यहं नमः सर्वाङ्गे ॥ (७) मूर्धादि उग्रंवीरमित्यादि पूर्वार्धं नाभ्यन्तं न्यस्येत्। नाभ्यादिपादान्तं नृसिंह-मित्युत्तरार्धे न्यसेत् ॥ (८) उग्रमुग्रं नमाम्यहं नमो मुखे। उग्रं वीरं नमाम्यहं नमः शिरसि। उग्रं महाविष्णुं नमाम्यहं नमो नासायां। उग्रं ज्वलन्तं नमाम्यहं नमश्चक्षुषोः। उग्रं सर्वतो मुखं नमाम्यहं नमः श्रोत्रयोः। उग्रं नृसिंहं नमाम्यहं नमो ब्रह्मरन्ध्रे। उग्रं भीषणं नमाम्यहं नमो हृदि। उग्रं भद्रं नमाम्यहं नमो नाभौ। उग्रं मृत्युमृत्युं नमाम्यहं नमः कट्यादिपादद्वयाग्रान्तम् ॥ (९) वीरमुग्रं नमाम्यहं नमो मुखे। वीरं वीरं नमाम्यहं नमः शिरसि। वीरं महाविष्णुं नमो नासायां। वीरं ज्वलन्तं नमाम्यहं नमश्चक्षुषोः। वीरं सर्वतो मुखं नमाम्यहं नमः श्रोत्रयोः। वीरं नृसिंहं नमाम्यहं नमो ब्रह्मरन्ध्रे। वीरं भीषणं नमाम्यहं नमो हृदये। वीरं भद्रं नमाम्यहं नमो नाभौ। वीरं मृत्युमृत्युं नमाम्यहं नमः कट्यादिपादान्तं ॥ (१०) नृसिंहमुग्रं नमाम्यहं नमः मुखे। नृसिंहं वीरं नमाम्यहं नमः शिरसि। नृसिंहं महाविष्णुं नमो नासायां। नृसिंहं ज्वलन्तं नमाम्यहं नमः चक्षुषोः। नृसिंहं सर्वतो मुखं नमाम्यहं नमः श्रोत्रयोः। नृसिंहं नृसिंहं नमाम्यहं नमः ब्रह्मरन्ध्रे। नृसिंहं भीषणं नमाम्यहं नमो हृदये। नृसिंहं भद्रं नमाम्यहं नमो नाभौ। नृसिंहं मृत्युमृत्युं नमाम्यहं नमः कट्यादिपादान्तं ॥ ततो मूलषडङ्गानि विन्यस्य ध्यानादिपुष्पोपचारान्ते, देवस्य वामाङ्के श्रींलक्ष्म्यै नमः इति लक्ष्मीं सम्पूज्य, ततः प्राग्वत् षडङ्गानि सम्पूज्य दिग्दलेषु देवाग्रादि—पक्षीन्द्राय नमः। शर्वाय०। अनन्ताय०। कमलभवाय०। विदिग्दलेषु—श्रियै नमः। ह्रियै०। तुष्ट्यै०। पुष्ट्यै०। द्वितीयाष्टदले—देवाग्रादि—स्तम्भननृसिंहाय नमः। वश्यनृसिंहाय नमः। मारणनृसिंहाय नमः। विद्वेषोच्चाटननृसिंहाय नमः। आकर्षणनृसिंहाय नमः। तुष्टिदनृसिंहाय नमः। निधिप्रदनृसिंहाय नमः। विद्यामूर्तिनृसिंहाय नमः इति सम्पूज्य, दलाग्रेषु देवस्य दक्षिणस्थेषु——चक्राय नमः। खड्गाय०। पद्माय०। मुसलाय०। वामस्थेषु——शङ्खाय नमः। खेटाय०। गदायै०। शार्ङ्गाय०। इत्युपर्युपरिभावेन सम्पूज्य, पुनर्देवस्यैव दक्षिणे लक्ष्म्यै नमः। वामे तुष्ट्यै०। वामे कौस्तुभाय०। दक्षिणे श्रीवत्साय०। मध्ये वनमालायै०। देवाग्रे ब्रह्मसूत्राय०। पीताम्बराय०। नाभिपद्माय०। किरीटाय०। सर्वभूषणेभ्यो०। तृतीयेऽष्टदले—श्रद्धायै नमः। मेधायै०। कामिकायै०। भीमायै०। मायै०। भवायै०। चक्रास्यै(?) दीप्त्यै०। इति सम्पूज्य लोकेशाचादिसर्वं समापयेदिति ॥ वैखानसपञ्चरात्रे—

अष्टलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रिय। तद्दशांशेन जुहुयाद् घृताक्तहविषाऽनले ॥ १ ॥

एष कृतयुगपरः।

द्वात्रिंशल्लक्षमानेन जपेन्मन्त्रं जितेन्द्रियः। तत्सहस्रं प्रजुहुयाद् कृताक्तहविषा ततः ॥ १ ॥

इति सारसंग्रहात्। अत्र शतांशो होम उक्तः। एष विकल्पः। बाहुल्यादशक्तपरो वा। तथा——

तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा। कुर्यात् संसिद्धमन्त्रस्तु प्रयोगानाचरेत् ततः ॥ १ ॥

काम्यप्रयोगसिद्ध्यर्थं ध्यानभेदोऽत्र कथ्यते। .... ॥

समुद्यत्सहस्रार्कभासं त्रिनेत्रं प्रभाभीषणं वज्रतुल्यं क्षरन्तम्।
कृशानुं ह्यनेकैर्भुजैर्भीषणाङ्गं स्वहस्ताग्रजोद्भिन्नदैत्यं भजे तम् ॥ २ ॥

क्रूरकर्मादिविषये स्मरेद् देवं भयानकम्। विश्वरूपमयं ध्यानं नृहरेः प्रोच्यतेऽधुना ॥ ३ ॥
नृसिंहं तं महाभीमं कालानलसमप्रभम्। अन्त्रमालाधरं रौद्रं कण्ठहारेण शोभितम् ॥ ४ ॥
नागयज्ञोपवीतं च पञ्चाननसुशोभितम्। चन्द्रमौलिं नीलकण्ठं प्रतिवक्त्रं त्रिलोचनम् ॥ ५ ॥
भुजैः परिघसंकाशैर्दशभिः परिशोभितम्। अक्षसूत्रं गदां पद्मं शंख गोक्षीरसन्निभम् ॥ ६ ॥

धनुश्च मुसलं चैव बिभ्राणं चक्रमुत्तमम् । खड्गं च शूलं बाणं च नृहरिं रुद्ररूपिणम् ॥ ७ ॥
इन्द्रगोपकनीलाभं स्वर्णाभं चन्द्रसन्निभम् । पूर्वादि चोत्तरं यावदूर्ध्वास्यं सर्ववर्णकम् ॥ ८ ॥
एवमुग्रं हरिं ध्यायेत् सर्वव्याधिनिवृत्तये । सर्वमृत्युहरं दिव्यं स्मरणात् सर्वसिद्धये ॥ ९ ॥
ध्येयो यदा महत्कर्म तदा षोडशहस्तवान् । नृसिंहः सर्वलोकेशः सर्वाभरणभूषितः ॥ १० ॥
द्वौ विदारणकर्मादौ द्वौ चान्त्रोद्धरणोत्थितौ । शङ्खचक्रधरावन्यावन्यौ बाणधनुर्धरौ ॥ ११ ॥
खड्गखेटधरावन्यौ द्वौ गदापद्मधारिणौ । पाशांकुशधरावन्यौ द्वौ रिपोर्मुकुटार्पितौ ॥ १२ ॥
इति षोडशदोर्दण्डमण्डितं नृहरिं विभुम् । ध्यायेदम्बुदनीलाभमुग्रकर्मण्यनन्यधीः ॥ १३ ॥
ध्येयो महत्तमे कार्ये दशषड्विंशहस्तवान् । नृहरिः सर्वभूषाढ्यः सर्वसिद्धिकरः प्रभुः ॥ १४ ॥
दक्षिणे चक्रखड्गौ च परशुं पाशमेव च । हलं च मुसलाभीती ह्यंकुशं बाहुपङ्क्तिजैः ॥ १५ ॥
पट्टिशं भिन्दिपालं च खेटतोमरमुद्गरान् । वामभागे करैः शङ्खं खड्गं पाशं च शूलकम् ॥ १६ ॥
अग्निं च वरदं शक्तिं कुण्डिकां दधतं परैः । कार्मुकं तर्जनीं मुद्रां गदाडमरुसर्पकान् ॥ १७ ॥
करद्वन्द्वैः क्रमाच्छत्रोर्जानुमस्तकपत्तलम् । ऊर्ध्वीकृताभ्यां हस्ताभ्यामन्त्रमालाधरं हरिम् ॥ १८ ॥
अधःस्थिताभ्यां हस्ताभ्यां हिरण्यकविदारणम् । प्रियङ्करं च भक्तानां दैत्यानां च भयङ्करम् ॥ १९ ॥
नृसिंहं संस्मरेद् दिव्यं महामृत्युभयापहम् ।................................... ॥
अथोच्यते ध्यानमन्यन्मुखरोगहरं परम् । विषरोगहरं मृत्युहरं शत्रुभयापहम् ॥ २० ॥

स्वर्णौघाभे सुपर्णे स्थितमतिसुमुखं कोटिपूर्णेन्दुवर्णं
विद्युन्मालासदृग्भिस्त्रिभिरतिसुदृशं पीतवस्त्रं सुभूषम् ।
हस्तोद्यच्चक्रशङ्खाभयवरमखिलक्ष्वेडरोगापमृत्यून्
स्वैर्ध्वानैर्ध्वंसयन्तं सुरनुतमनिशं संस्मरेच्छ्रीनृसिंहम् ॥ २१ ॥

इति ध्यानम् । तथा—

लक्ष्मीकामस्त्रिमधुरैः सुगन्धैः कुसुमैर्हुनेत् । अयुतं मधुनाज्यैश्च दरिद्रो न भवेत् कुले ॥ २२ ॥
उडुम्बरसमिधोमाद् धान्यसिद्धिर्भवेद् ध्रुवम् । अपूपलक्षहोमेन धनदेन समो भवेत् ॥ २३ ॥
क्रुद्धस्य संनिधौ राज्ञो जपेदष्टोत्तरं शतम् । सद्यो नैर्मल्यमाप्नोति प्रसादं चाधिगच्छति ॥ २४ ॥
कुन्दप्रसूनहोमेन शर्मोदयमवाप्स्यति । मधूकपुष्पहोमेन चेष्टसिद्धिर्भविष्यति ॥ २५ ॥
तुलसीपत्रहोमेन कीर्तिर्भवति नान्यथा । सक्तुहोमेन शालीनां वशीकरणमुत्तमम् ॥ २६ ॥
हरिद्राखण्डहोमेन स्तम्भनं भवति ध्रुवम् । कदलीफलहोमेन सर्वविघ्नः प्रणश्यति ॥ २७ ॥
दधिमध्वाज्यसिक्ताश्च गुडूचीश्चतुरंगुलाः । जुहुयादयुतं योऽसौ शतं जीवति वत्सरान् ॥ २८ ॥
शनैश्चरदिनेऽश्वत्थं स्पृष्ट्वा चाष्टोत्तरं शतम् । जपेज् जित्वा सोऽपमृत्युं शतं वर्षाणि जीवति ॥ २९ ॥
श्रीप्रसूनैः प्रजुहुयात् तत्काष्ठैर्ज्वलितेऽनले । सहस्रमात्रेण ततो लक्ष्मीं प्राप्नोति निश्चितम् ॥ ३० ॥
दूर्वाहोमादरोगी स्याल्लक्ष्मीवान् श्रीफलैस्तथा । अनेन मनुना जप्ता अन्वहं च सिता वचा ॥ ३१ ॥
अशिता प्रातरुत्थाय वाकसिद्धिं सा प्रयच्छति । जले नृसिंहं संपूज्य चन्दनेन च तत्र च ॥ ३२ ॥
अष्टोत्तरशतं नित्यं दूर्वाभिर्जुहुयात् सुधीः । क्षुद्रभूतज्वरास्तस्य नश्यन्त्येवोपसर्गजाः ॥ ३३ ॥
रात्रौ दृष्टे तु दुःस्वप्ने मन्त्री स्नात्वा मनुं जपेत् । सुस्वप्नो जायते तस्य यदि निद्रां न गच्छति ॥ ३४ ॥
कान्तारे व्याघ्रचौरादिसंकुले च मनुं जपेत् । रक्षां करोति भूतेभ्य इतरेभ्योऽपि मन्त्रिणः ॥ ३५ ॥
मनुनानेन संजप्तं तस्य नाशयति क्षणात् । क्ष्वेडग्रहमहारोगान् घोरं वाथाभिचारकम् ॥ ३६ ॥
गदोन्मादमहोत्पातभये पुंसां स्मरेन्मनुम् । तदुद्भवं महादुःखं नाशमेति सुमन्त्रिणाः ॥ ३७ ॥

क्रूरं नृसिंहं संस्मृत्य शत्रुं च मृगशावकम् । कन्धरायां गृहीत्वा तं निक्षिप्तं दिक्षु चिन्तयेत् ॥ ३८ ॥
सबान्धवस्य झटिति ह्युच्चाटो भवति ध्रुवम् । कृत्वा करैश्च युगपत् पातितं हरिणा स्वयम् ॥ ३९ ॥
नखरैर्दार्यमाणं तं संस्मरेन्निशितैः शरैः । अष्टाधिकशतं चामुं जपेन् मनुमनन्यधीः ॥ ४० ॥
मण्डलस्यैष मध्ये स्याद्रिपुर्वैवस्वतातिथिः । कलिद्रुमभवैः काष्ठैः सम्यक्संदीपितेऽनले ॥ ४१ ॥
रिपुसङ्घक्षयकरं नृसिंहं चन्दनादिभिः । समभ्यर्च्य प्रजुहुयाच्छरान् साग्रान् समूलकान् ॥ ४२ ॥
सहस्रमेकं च मनुं भक्षयन् शत्रुमुत्कटम् । जपन् शरान् विनिक्षिप्य शत्रुसेनां विनाशयेत् ॥ ४३ ॥
जुहुयात् सप्तदिवसं ततो राज्ञश्चमूं सुधीः । सुदिने च शुभे लग्ने शत्रुसैन्यजिगीषया ॥ ४४ ॥
प्रस्थापयेत् तां सुदृढां दंसितां बलिभिर्वरैः । तदग्रे चिन्तयेद् देवं नृसिंहं शत्रुसञ्चयम् ॥ ४५ ॥
भक्षयन्तं जपेन्मन्त्री कुर्यादायाति सा चमूः । यावत् तावद्रिपूञ्जित्वा सर्वान् राजश्रिया सह ॥ ४६ ॥
आगच्छेद्भूपतिः शूरः पश्चान्मन्त्रिणामादरात् । तोषयेत् क्षेत्रवसुभिर्वस्त्रालङ्करणैः शुभैः ॥ ४७ ॥
मन्त्रिणो यदि सन्तोषो न भवेद्भूपतेस्तदा । अनर्थः सुमहानेत्र जायते दुःसहो भृशम् ॥ ४८ ॥
तस्माद् गुरुं समभ्यर्चेत् तोषयेन्नत् दूषयेत् ।.... .... ॥
कृशानुगेहयुग्मके विलिख्य तारमध्यगम् । नृसिंहमस्य कोणके सुदर्शनं मनुं तथा ॥ ४९ ॥
स्वशक्तिवेष्टितं बहिस्तथाष्टपत्रपद्मके । वसून्मितार्णवर्णकांश्च मायया बहिर्युतम् ॥ ५० ॥
ततः पतङ्गपत्रके च वासुदेवसन्मनुम् । लिखेत् सुवेष्ट्य मायया च षोडशारके स्वरान् ॥ ५१ ॥
बहिश्च शक्तिवेष्टितं ततो ह्यनुष्टुभापि तत । दले तदर्णसंयुते च शक्तिवेष्टितं बहिः ॥ ५२ ॥

(बहिर्वृत्तमध्ये)

ततः पूर्वभागे लिखेत् कादिवर्गाष्टकं दक्षिणे झादिकान् रुद्रसंख्यान् ।
लिखेत् पश्चिमे नादिकान् द्वादशार्णान् द्वयं पार्श्वयुग्मं लिखेद्यन्त्रमेतत् ॥ ५३ ॥
वरं साधितं होमसंपातपूजाजपाद्यैर्युतं स्वात्मसन्तर्पणैश्च ।
शुभं सच्चतुर्वर्गवाञ्छाफलौघप्रदं नारसिंहं महाचक्रमेतत् ॥ ५४ ॥

इति । अस्यार्थः—आदौ षट्कोणं कृत्वा तन्मध्ये प्रणवोदरे ससाध्यं नृसिंहबीजमालिख्य, षट्कोणेषु सुदर्शनषडक्षरस्यैकैकमक्षरं विलिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तयोरन्तराले निरन्तरं मायाबीजेन संवेष्टय, तद्बहिरष्टपत्रेषु नारायणाष्टाक्षराणि विलिख्य, तद्बहिः प्राग्वन्मायया संवेष्टच, द्वादशदलेषु वासुदेवद्वादशाक्षराणि आलिख्य, बहिर्मायियावेष्टच, तदबहिःषोडशदलेषु षोडश स्वरान् सबिन्दुकान् विलिख्य, बहिःप्राग्वन्माययावेष्टच, तद्बहिर्द्वात्रिंशद्दलेषु मूलमन्त्राणानि विलिख्य, प्राग्वच्छक्तया संवेष्टच, तद्बहिर्वृत्तं कृत्वा तदन्तराले पूर्वभागे कंखंगंघंङंचंछंजं—इत्यष्टवर्णानालिख्य, तद्दक्षिणान्तराले झंञंटंठंडंढंणंतंथंदंधं—इत्येकादशवर्णानालिख्य, तत्पश्चिमान्तराले नंपंफंबंभंमंयंरंलंवंशंषं—इति विलिख्य, तदुत्तरान्तराले संहं—इति विलिख्य, तत्पार्श्वयोर्दक्षे ळं वामे क्षं इति विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ तथा—

प्राक्प्रत्यङ्नवरेखाश्च पञ्च स्युर्दक्षिणोत्तरम् । द्वात्रिंशत्प्रमितान्येवं जायन्ते कोष्ठकानि च ॥ ५५ ॥
तस्याग्निमगता रेखाः फणाकाराश्च कारयेत् । लिखेन्नृसिंहबीजं च द्वात्रिंशत्कोष्ठकेषु च ॥ ५६ ॥
मन्त्रराजं समालिख्य ह्यधो रेखाश्च वर्धयेत् । पुच्छाकाराश्च तास्तत्र साध्यनाम लिखेत् सुधीः ॥ ५७ ॥
संपातयेद् होमशिष्टैः सर्वरोगादिनाशनम् ।

इति अस्यार्थः—तत्र प्राक्प्रत्यक् नव रेखा दक्षिणोत्तरं पञ्च रेखाश्च कृत्वा, ताभिर्द्वात्रिंशत्कोष्ठानि निष्पाद्य, तस्य पूर्वाग्रनवरेखाभिः पञ्च फणान् कृत्वा, तेषु फणेषु नृसिंहबीजं विलिख्य, द्वात्रिंशत्कोष्ठेषु पङ्क्त्याः

कारेणेशानकोष्ठादिक्रमेण मूलमन्त्रस्य द्वात्रिंशद्वर्णानालिख्य, अधोगतनवरेखाः पञ्च पुच्छाकारेण वर्धयित्वा तेषु पुच्छेषु साध्यनाम लिखेत् । एतद्यन्त्रमुक्तफलदं भवति ।। तथा—

अष्टपत्रे कर्णिकायां साध्याख्याकर्मसंयुतम् । नृसिंहबीजं विलिखेदष्टपत्रेषु संलिखेत् ॥ ५८ ॥
चतुर्वर्णप्रमाणेन मन्त्रराजं सुसाधितम् । यन्त्रं क्षुद्रामयघ्नं च सर्वरक्षाकरं परम् ॥ ५९ ॥

इति । अस्यार्थः—अष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं नृसिंहबीजं विलिख्य, अष्टसु दलेषु मन्त्राक्षराणि चत्वारि २ विलिख्य विनियुञ्ज्यात् । एतदुक्तफलदं भवति ॥ तथा—

ससाध्यनिजबीजयुग्वसुदले मनोर्वर्णकांश्चतुष्परिमितांल्लिखेल्लिपिवृतं बहिः कारयेत् ॥ ६० ॥
स्वबीजयुतकोणयुक् क्षितिपुरद्वयेनावृतं रिपुग्रहविषव्रजामयहरं च लक्ष्मीप्रदम् ॥ ६० ॥

इति । अस्यार्थः—अष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं नृसिंहबीजं विलिख्य, तद्दलेषु मूलमन्त्रार्णांश्चतुरश्चतुरो विलिख्य, बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां सबिन्दुकान् मातृकार्णान् विलिख्य, तद्बहिरष्टकोणं कृत्वा तत्कोणेषु नृसिंहबीजं विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति ।

एतद्यन्त्रयुतं सम्यङ्मण्डलं लक्षणान्वितम् । रम्यं नवपदं कृत्वा कलशान् स्थापयेत् सुधीः ॥ ६१ ॥
नव संशोभनांस्तत्र कषायोदकपूरितान् । वस्त्रयुग्मसमायुक्तानावाह्य नृहरिं विभुम् ॥ ६२ ॥
संपूजयेच्चन्दनाद्यैः शान्तकायं मनोरमम् । पूर्वादिषु स्तम्भनादीन् यजेन्मन्त्री समाहितः ॥ ६३ ॥
अष्टाधिकं ततो मन्त्रं सहस्रं प्रजपेत् सुधीः । एवं जलैः साधितैस्तैर्नरं मन्त्रं त्रिरुच्चरन् ॥ ६४ ॥
अभिषिञ्चेन्मृत्युमुखादवश्यं स निवर्तते । ग्रहाभिचारभूतादिभयं नश्यति तत्क्षणात् ॥ ६५ ॥
भोजयेद् देवताबुद्ध्या भूदेवांस्तोषयेदपि । प्राणप्रदात्रे गुरवे वित्तशाठ्यविवर्जितम् ॥ ६६ ॥
स्वकीयार्थानुरूप्येण प्रदद्यात् दक्षिणां नरः । स त्वैहिकीं लभेत् सिद्धिं परत्रापि च मोदते ॥ ६७ ॥

इति । तथा—मन्त्रान्तरम्

वर्णान्त्याग्नी सभुवनौ बिन्दुनादोत्तमाङ्गकौ । नृसिंहबीजमाख्यातं सर्वसिद्धिप्रदायकम् ॥ १ ॥
हृल्लेखासम्पुटं केचित् संगिरन्ते मनुं त्विमम् । .... ।....॥

वर्णान्त्यः क्षकारः, अग्नी रेफः, भुवनं औकारः, बिन्दुरनुस्वारः, नादोऽर्धचन्द्रः, एभिः क्ष्रौं इति नृसिंहबीजं भवति । तथा—

ऋषिरत्रिश्च गायत्री छन्दः श्रीनृहरिः शुभः । देवता दीर्घयुग्बीजेनैवाङ्गं परिकल्पयेत् ॥ २ ॥

क्षांक्षीं इत्यादि षडङ्गकम् ।

ध्यानार्चाजपहोमादि सर्वं पूर्ववदाचरेत् । एकलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः ॥ ३ ॥
तद्दशांशं हुनेत् सम्यग घृताक्तैः पायसैः शुभैः । तर्पयेच्छुद्धसलिलैः कृत्वा चात्माभिषेचनम् ॥ ४ ॥
ब्राह्मणान् सम्यगाराध्य सिद्धमन्त्रः समाचरेत् । मन्त्रराजोदितान् सर्वान् प्रयोगानत्र साधकः ॥ ५ ॥
अष्टाधिकसहस्रेण जप्तैश्च कलशोदकैः । विषार्तमभिषिञ्चेत मुच्यते हि विषेण सः ॥ ६ ॥
मुच्यतेऽन्यैश्च सर्पाद्यैर्लूतामूषकजैरपि । बहुपाद्वृश्चिकोत्थैश्च विषैर्मुक्तो भवेद् ध्रुवम् ॥ ७ ॥
अनेन मनुना जप्तं भस्माष्टोत्तरकं शतम् । शिरोऽक्षिकर्णहृत्कुक्षिकण्ठरोगान् विनाशयेत् ॥ ८ ॥
विसर्पिणीं वमिं हिक्कां ज्वरं चैव विनाशयेत् । मन्त्रौषधाभिचारादिसम्भूतांश्च विकारकान् ॥ ९ ॥
शमयेद्भस्म संजप्तं नात्र कार्या विचारणा । मृत्युस्थाने लिखेन्मत्रं ससाध्यं च दहन्निव ॥ १० ॥
क्रूरेण चक्षुषा मन्त्रं जपेदष्टदिनावधि । अष्टाधिकं सहस्रं च म्रियते रिपुरस्य तु ॥ ११ ॥
वश्यमाकृष्टिविद्वेषमोहोच्चाटादिकानि च । कुर्यादयुतजापेन तत्तदर्हं कर्मणा ॥ १२ ॥

एवमेकाक्षरो मन्त्रः प्रोक्ता सवसमृद्धिदः । ....॥

इति ॥ सारसंग्रहे—मन्त्रान्तरम्

षडक्षस्य मन्त्रस्य विधानमभिधीयते । पाशबीजं शक्तिबीजं स्वबीजांकुशबीजके ॥ १ ॥
कवचास्त्रान्तिकः प्रोक्तः षडर्णो नृहरेर्मनुः । .... ॥

पाशः आं, शक्तिः ह्रीं, स्वबीजं नृसिंहबीजं क्ष्रौं, अंकुशः क्रों, कवचं हुं, अस्त्रं फट् ॥

ऋष्याद्या ब्रह्मपंक्तिश्रीनृसिंहाः सम्प्रकीर्तिताः । मन्त्रार्णैरङ्गषट्कं स्यात् ततो देवं विचिन्तयेत् ॥ २ ॥

पायात् क्रोधप्रदीप्तः स्वविकृतवदनः शोणवर्णश्च नाभे-
रूर्ध्वे चन्द्रौघदीप्तिः रविशशिहुतभुग्नेत्र उग्रोरुदंष्ट्रः ।
हस्ताब्जैश्चक्रशङ्खौ गुणसृणिकुलिशान् सद्गदां दारणाख्यां
बिभ्राणो भीमकायो विविधमणिगणैर्भूषितो वो नृसिंहः ॥ ३ ॥

दक्षाद्यूर्ध्वयोराद्ये । तदाद्यधःस्थयोरन्ये । तदाद्यधःस्थयोरपरे । सर्वाधःस्थाभ्यां दारणामुद्रा । तस्या लक्षणं तु वैखानसपञ्चरात्रे—"मिथः संश्लिष्टसन्मुखयोऽङ्गुलय ऋज्वधोमुखाः । स्वस्थानसरलांगुष्ठा मुद्रैषा दारणाभिधा" ॥ इति ॥

पूर्वोदिते शुभे पीठे मूर्ति मूलेन कल्पयेत् । तस्यां मूर्तौ समावाह्य देवं सर्वोपचारकैः ॥ ४ ॥
सम्पूज्यावरणं पश्चात् क्रमातः परिपूजयेत् । पुराङ्गानि समभ्यर्च्य ह्यायुधानि प्रपूजयेत् ॥ ५ ॥
अरिं शङ्खं गुणं चैव सृणिं च कुलिशं गदाम् । खड्गं खेटं समभ्यर्च्य लोकपालान् बहिर्यजेत् ॥ ६ ॥
वज्रादीनि ततो बाह्ये पूजयेद् गन्धपुष्पकैः । .... ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि—ब्रह्मणे ऋषये नमः । मुखे—पंक्तिच्छन्दसे नमः । हृदये—श्रीनृसिंहाय देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, मूलषडर्णैः षडङ्गानि विन्यस्य ध्यानाद्यङ्गार्चान्तेऽष्टदलेषु—चक्राय नमः । शङ्खाय० । पाशाय० । अंकुशाय० । वज्राय० । गदायै० । खड्गाय० । खेटाय० । इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति । तथा—

वर्णलक्षं जपेन्मन्त्रं केवलेन घृतेन च । जुहुयात् तद्दशांशेन तर्पणादि ततश्चरेत् ॥ ७ ॥
एवं संसिद्धमन्त्रस्तु प्रयोगान् साधयेत् ततः । तत्तत्कल्पोदितान् स्वार्थं परार्थं वाणुवित्तमः ॥ ८ ॥
अपामार्गसमिद्भिश्च प्लुताभिः पञ्चगव्यकैः । जुहुयाच्च सहस्रैकं सप्ताहं भूतशान्तये ॥ ९ ॥
गुडूचीसमिधो दुग्धलोलितास्त्रिसहस्रकम् । चतुर्दिनं प्रजुहुयाज् ज्वरशान्तिर्भविष्यति ॥ १० ॥
रक्तोत्पलैः प्रत्यहं यो मधुरत्रयलोलितैः । (सहस्रसंख्यं जुहुयात् मासेनेष्टमवाप्नुयात् ॥ ११ ॥
मन्त्रं जपेद्वत्सरेण धनधान्यसमृद्धियुक् । प्रफुल्लैररुणाम्भोजैर्मधुरत्रयलोलितैः) ॥ १२ ॥
सहस्रद्वादशमितं लक्ष्मीवाञ्जायते भुवि । सर्वलोकप्रियः साध्यो भवेन्नैवात्र संशयः ॥ १३ ॥
प्रातस्त्रिमधुरोपेतलाजाभिः पक्षमात्रकम् । सहस्रं जुहुयात् कन्यां कन्यार्थी लभतेऽचिरात् ॥ १४ ॥
वरार्थिनी लभेताशु वरं सर्वमनोहरम् । तिलराजी :) त्वपामार्गपायसाज्यैर्हुनेत् सुधी ॥ १५ ॥
स दीर्घायुरवाप्नोति वियुक्तः सकलैर्गदैः । कलत्रपुत्रादियुतो धनधान्यसमन्वितः ॥ १६ ॥

शिखिगेहयुगोदरे लिखेद् भुवनेशीमथ साध्यसंयुताम् ।
विलिखाश्रिषु मूलमन्त्रकं वसुपत्रे स्वरकेसरे चतुः ॥ १७ ॥
मनुराजसदर्णकांल्लिखेल्लिपिसंवीतमथो बहिः पुनः ।
वसुधापुरसंवृतं बहिस्त्वथ चिन्तामणिकोणमञ्जुलम् ॥ १८ ॥
नृहरेरथ यन्त्रमुत्तमं लिखितं भूर्जदले शिरोधृतम् ।

विषरोगरिपुग्रहादिकं भयभूतज्वरमाशु नाशयेत् ॥ १९ ॥

इति । अस्यार्थः--तत्र षट्कोणमध्ये हृल्लेखां ससाध्यामालिख्य, तत्कोणेषु मूलमन्त्रस्य षडक्षराण्यालिख्य, तद्बाह्येऽष्टदलमूलेषु द्वन्द्वशः स्वरानालिख्य, दलेषु मन्त्रराजस्य वर्णांश्चतुरश्चतुरो विलिख्य, तद्बहिर्वृत्तद्वयान्तराले सबिन्दुकान् कादिक्षान्तानालिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु वक्ष्यमाणशैवचिन्तामणिबीजं विलिखेत् । एतदुक्तफलदं भवति ॥ तथा--मन्त्रान्तरम्

तारं नृसिंहबीजं हृद् ङेयुतं भगवत्पदम् । ङेयुतो नरसिंहः स्याज् ज्वालामाली च ङेयुतः ॥ १ ॥
ङेयुक् च दीर्घदंष्ट्रः स्यादग्निनेत्रश्च ङेयुतः । सर्वरक्षोघ्नाय-पदं सर्वभूतविनाशना ॥ २ ॥
य सर्वज्वर च (वि) प्रोक्त्वा नाशनाय दहद्वयम् । पच रक्षयुगं हुंफट् वह्निजायावधिर्मनुः ॥ ३ ॥
सप्त (अष्ट) षष्ट्यक्षरः प्रोक्तो ज्वालामालीति विश्रुतः । ....॥

तारः प्रणवः । नृसिंहबीजं क्ष्रौं । हृन्नमः । वह्निजाया स्वाहा । सुगममन्यत् ।

ऋषिः प्रजापतिश्छन्दो गायत्रं देवता हरिः । नृसिंहरूपी मन्त्रार्णैः षडङ्गानि प्रविन्यसेत् ॥ ४ ॥
त्रयोदशदशस्थाणवष्टादशार्काब्धिभिः क्रमात् । षडङ्गानि मनोः कुर्याज्जातियुक्तानि मन्त्रवित् ॥ ५ ॥

स्थाणवः एकादश । अर्का द्वादश । अब्धयश्चत्वारः । ध्यानम्--

उद्यत्कालानलाभं प्रलयहुतवहोद्दीप्तदंष्ट्रोत्कटास्यं
विद्युद्दामाभिरामप्रचुरघनसटाटोपभीमं त्रिनेत्रम् ।
हस्ताब्जैः शङ्खचक्रे दधतमसिवरं खेटकं श्रीनृसिंहं
वन्दे दैत्यान्तकं तं मुनिसुरनिकरैः स्तूयमानं सदैव ॥ ६ ॥

वामोर्ध्वादितदधोन्तमायुधध्यानम् । असिवरं खड्गश्रेष्ठम् ।

पूर्वोदिते यजेत् पीठे नृहरिं सर्वकामदम् । षडक्षरोक्तविधिना सर्वदेवौघवन्दितम् ॥ ७ ॥

ॐक्ष्रौं नमो भगवते नरसिंहाय हृदयाय नमः । ज्वालामालिने दीप्तदंष्ट्राय शिरः० । अग्निनेत्राय सर्वरक्षोघ्नाय शिखा० । सर्वभूतविनाशनाय सर्वज्वरविनाशनाय कवचाय० । दह २ पच २ रक्ष २ नेत्रत्रयाय० । हुंफट् स्वाहा अस्त्राय० । इति करषडङ्गन्यासः । प्रयोगः सुगमः । तथा--

लक्षमेकं जपेन्मन्त्रं तद्दशांशं हुनेत् ततः । कपिलासर्पिषा वह्नौ तर्पणादि विधाय च ॥ ८ ॥
मन्त्रराजवदेवात्र प्रयोगान् साधयेत्ततः । विशेषतः क्षुद्रभूतज्वरनाशकरः परः ॥ ९ ॥

बहूदितेनात्र च किं जपन् मनुं मनुष्यवर्यो य इहात्तभोगकः ।
स निग्रहानुग्रहशक्तिमान् भवेत् परत्र विष्णोः पदमेति शाश्वतम् ॥ १० ॥

इति ॥ सारसंग्रहे--मन्त्रान्तरम्

अथ लक्ष्मीनृसिंहस्य विधानमभिधीयते । सर्वापत्तारकं दिव्यं सर्वाभीष्टफलप्रदम् ॥ १ ॥
प्रणवः श्रीशक्तिलक्ष्मीबीजानि जयशब्दतः । लक्ष्मीप्रियपदं ङेन्तं नित्यप्रमुदितं वदेत् ॥ २ ॥
चेतसे प्रवदेल्लक्ष्मीश्रितार्धं ङेन्तदेहकम् । रमाशक्तिरमायुग्हृत् स्यात् त्रयस्त्रिंशदर्णकः ॥ ३ ॥
लक्ष्मीनृसिंहमन्त्रोऽयं जपतां सर्वकामदः । .... ॥

प्रणव ॐ । श्रीबीजं श्रीं । शक्तिर्भुवनेश्वरीबीजं । लक्ष्मीः श्रीं । जय स्वरूपं । लक्ष्मीप्रियं ङेन्तं लक्ष्मीप्रियाय । नित्यप्रमुदितचेतसे स्वरूपं । लक्ष्मीश्रितार्धं स्वरूपं । ङेन्तदेहकं देहाय । प्रणवरहितं बीजत्रयं । हृन्नमः । तथा--

ऋषिः प्रजापतिश्छन्दोऽनुष्टुब् लक्ष्मीनृसिंहकः । देवता निजबीजेन षडङ्गानि प्रकल्पयेत् ॥ ४ ॥

निजबीजेन नृसिंहबीजेन ।

पुरस्तात् केशवः पातु चक्री जाम्बूनद प्रभः । पश्चान्नारायणः शङ्खी नीलजीमूतसन्निभः ॥ ५ ॥
इन्दीवरदलश्यामो वामपार्श्वे गधाधरः । गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥ ६ ॥
उत्तरे हलधृग्विष्णु पद्मकिञ्जल्कसन्निभः । आग्नेय्यामरबिन्दाभो मुसली मधुसूदनः ॥ ७ ॥
त्रिविक्रमः खड्गपाणिर्नैर्ऋत्यां ज्वलनप्रभः । वायव्यां वामनो वज्री वरुणादित्यदीप्तिमान् ॥ ८ ॥
ऐशान्यां पुण्डरीकाक्षः श्रीधरः पट्टिशायुधः । विद्युत्प्रभो हृषीकेशो ह्यवाच्यां दिशि मुद्गरी ॥ ९ ॥
हृत्पद्मे पद्मनाभो मे सहस्रार्कसमप्रभः । सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः ॥ १० ॥
इन्द्रगोपकसङ्काशः पाशहस्तोऽपराजितः । सबाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः ॥ ११ ॥
एवं सर्वत्र निच्छिद्रं नामद्वादशपञ्जरम् । प्रविष्टोऽहं न मे किञ्चिद्भयमस्ति कदाचन ॥ १२ ॥
इति न्यासं विधायादौ लक्ष्मीनरहरिं स्मरेत् । ....॥

सर्पेन्द्रभोगनिलयः सुफणातपत्रो विद्युच्छशाङ्करुचिरः परमो नृसिंहः ।
आलिङ्गितश्च रमयावतु दिव्यभूषो हस्तैर्दरारिकमलाभयदान् दधानः ॥ १३ ॥

दक्षाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम् ।

देवमावाह्य पूर्वोक्ते पीठे सम्यक् प्रपूजयेत् । प्रथमाङ्गावृतिः प्रोक्ता द्वितीया शक्तिभिः स्मृता ॥ १४ ॥
भास्वती भास्करी चित्रा द्युतिरुन्मीलनी तथा । रमा कान्तिर्धृतिश्चेति शक्तयोऽष्टौ रमापतेः ॥ १५ ॥
तृतीयावृतिरिन्द्राद्यैश्चतुर्थी च तदायुधैः । ....॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि-प्रजापतये ऋषये नमः । मुखे—अनुष्टुप्छन्दसे नमः । हृदये—श्रीलक्ष्मीनृसिंहाय देवतायै नमः । इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा क्षांक्षीं इत्यादिना करषडङ्गन्यासं विधाय, पूर्वोक्तश्लोकैर्नामद्वादशपञ्जरन्यासं कृत्वा ध्यानाद्यङ्गान्तेऽष्टसु दलेषु—भास्वत्यै नमः । भास्कर्यै० । चित्रायै० । द्युत्यै० । उन्मीलन्यै० । रमायै० । कान्त्यै० । धृत्यै० । इति सम्पूज्य लोकेशाद्यर्चादि प्राग्वत् कुर्यात् । तथा—

षष्ट्युत्तरत्रिलक्षं तु प्रजपेत् तत्सहस्रकम् । मध्वक्तमल्लिकापुष्पैर्जुहुयान्मन्त्रवित्तमः ॥ १६ ॥
अभ्यर्च्य सलिले देवं तर्पयेन्मनुना ततः । अभिषिञ्चेत् स्वमूर्धानं ब्राह्मणान् भोजयेत्ततः ॥ १७ ॥
ततः प्रयोगान् कुर्वीत साधको निजवाञ्छितान् । मल्लिकाकुसुमैर्होमः सर्वकाम्यकरः शुभः ॥ १८ ॥

इति ॥ तथा—मन्त्रान्तरम्

तारो लक्ष्मीनृसिंहः स्यात् ङेन्तः श्रीपूर्वकः परः । मन्त्रो लक्ष्मीनृसिंहस्याष्टार्णोऽयं समुदीरितः ॥ १ ॥

लक्ष्मीनृसिंहो ङेन्तः श्रीपूर्वकः श्रीलक्ष्मीनृसिंहायेति । तथा—

ऋषिः प्रजापतिश्छन्दोऽनुष्टुब् देवो विशारदः । नृसिंहश्च स्वबीजेन दीर्घयुक्तेन मन्त्रवित् ॥ २ ॥
षडङ्गानि मनोरस्य विदध्यात् प्रोक्तवर्त्मना । ध्यानपूजादिकं सर्वं षडक्षरवदीरितम् ॥ ३ ॥
वर्णलक्षं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः । पायसैर्जुहुयान्मन्त्री तर्पणादि ततश्चरेत् ॥ ४ ॥

इति ॥ तथा—मन्त्रान्तरम्

जयशब्दं द्विरुच्चार्य श्रीनृसिंहेति चोच्चरेत् । अष्टार्णो मनुराख्यातो ऋष्याद्यं पूर्ववच्चरेत् ॥ १ ॥

पूर्ववत् पूर्वोक्ताष्टाक्षरवत् । अर्थात्पूजा च षडर्णवत् ॥ तथा—मन्त्रान्तरम्

वदेद्बीजं ङेन्तमत्स्यं बीजं ङेन्तं च कूर्मकम् । बीजं ङेन्तं च वाराहं बीजं ङेन्तं नृसिंहकम् ॥ १ ॥
बीजं ङेन्तं वामनयुक् त्रिर्बीजं ङेन्तरामयुक् । बीजं कृष्णाय बीजं स्यात् कल्किने जययुग्मकम् ॥ २ ॥
शालग्रामाग्निवासिने दिव्यसिंहस्वयम्भुयुक । पुरुषो ङेयुतो हृत्स्वबीजान्त्योऽयं मनुर्मतः ॥ ३ ॥

नृसिंहबीजं मत्स्याय । पुनर्नृसिंहबीजं कूर्माय । इत्यादि त्रिरिति त्रिवारं बीजं रामाय । पुनर्बीजं रामाय । पुनर्बीजं रामायेति हृन्नमः ।

ऋष्याद्या अत्र्यतिच्छन्दोनृसिंहा गदिताः क्रमात् । षडदीर्घयुक्स्वबीजेन षडङ्गानि प्रकल्पयेत् ॥ ४ ॥
मन्त्रराजवदेवास्य ध्यानपूजादिकं भवेत् । अङ्गान्ते चाथ मत्स्यादिकावतारांश्च पूजयेत् ॥ ५ ॥

इति । अथ प्रयोगः—प्रातःकृत्यादिप्राणायमत्रयं विधाय अत्रिऋषये नमः शिरसि । अतिच्छन्दसे छन्दसे नमो मुखे । श्रीनृसिंहाय देवतायै नमः हृदये । इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा क्ष्रांक्ष्रीं इत्यादिना षडङ्गन्यासः । अङ्गपूजानन्तरं ॐमत्स्याय नमः । कूर्माय० । इत्यादिभिः पूजयेत् । तथा—

अयुतं प्रजपेन्मन्त्रं साज्येन हविषा ततः । जुहुयात तद्दशांशेन तर्पणादि ततश्चरेत् ॥ ६ ॥
काम्यकर्माणि चान्यानि मन्त्रराजवदेव हि । (१ अथ वीरनृसिंहस्य मन्त्रः संप्रोच्यतेऽधुना ॥ ७ ॥
प्रणवो हृद्भगवते वीरसिंहाययोर्नृ च । ज्वालामालापिनद्धाङ्गायाग्निनेत्राय सर्वभू ॥ ८ ॥
तविनाशनाय–पदं दहयुग्मं पचद्वयम् । रक्षयुग्मं शक्तियुक्तमस्त्रानलवधूस्तथा ॥ ९ ॥

इति । वीरसिंहाययोर्नृ चेति वीरपदसिंहायपदयोर्मध्ये नृ इत्यर्थः । तेन वीरनृसिंहायेति । एवमग्रेऽपि । शक्तियुग्मं मायाबीजद्वयं । सुगममन्यत् । तथा—

(२) मन्त्रान्तरमथो वच्मि तस्यैवाशु फलप्रदम् । प्रणवो हृद्भगवते वीरसिंहाययोर्नृ च ॥ १ ॥
ङेन्तं ज्वालामालिपदं दीप्तदंष्ट्रं च ङेयुतम् । अग्निनेत्राय सर्वान्ते रक्षोघ्नाय पदं वदेत् ॥ २ ॥
सर्वभूतविनाशान्ते नायान्ते सर्वशब्दतः । ज्वरं विनाशयेति स्याद्धनयुग्मं दहद्वयम् ॥ ३ ॥
पचद्वयं बन्धयुग्मं रक्षयुग्मं वदेत्ततः । वर्मास्त्राग्निवधूर्वीरनृसिंहस्य मनुर्मतः ॥ ४ ॥
(३) अथ मन्त्रान्तरं तस्य वक्ष्यते सर्वकामदम् । अग्निनेत्रायान्तकं तु पूर्वमन्त्र उदाहृतः ॥ ५ ॥
ततो वदेत् सर्वभूतविनाशाय ततो वदेत् । सर्वज्वरविनाश च नाय सर्वं च दोषवि ॥ ६ ॥
नाशनाय हनद्वन्द्वं दहयुक् पचयुग्मकम् । बन्धरक्षयुगं पश्चान्मायाहुंफट् द्विठावधिः ॥ ७ ॥
एतन्मन्त्रत्रयस्यापि विधानं पूर्वमीरितम् । .... ॥

पूर्वमीरितं मन्त्रराजोक्तम् । मन्त्रान्तरम्—

तारं नृसिंहबीजं च महासिंहायोर्नृ च । हृदन्तो दशवर्णः स्यान्नृसिंहमनुरुत्तमः ॥ १ ॥
ऋषिश्च वामदेवाख्यो विराट् छन्द उदाहृतम् । नृसिंहो देवता चास्य सर्वदेवौघवन्दितः ॥ २ ॥
षड्दीर्घयुक्स्वबीजेन षडङ्गन्यासमाचरेत् । ध्यानपूजादिकं सर्वमस्य पूर्ववदाचरेत् ॥ ३ ॥

पूर्ववदिति अष्टाक्षरलक्ष्मीनृसिंहवत् । आदिपदेन पुरश्चरणतद्धोमद्रव्यादिकं गृह्यते । तदा तत्र वर्णलक्षमित्युक्तेरत्रापि वर्णलक्षं प्रोच्यते । मन्त्रान्तरम्—

तारं नृसिंहबीजं हृद् ङेन्तं च भगवत्पदम् । नरसिंहाय मन्त्रोऽयं त्रयोदशभिरक्षरैः ॥ १ ॥
वामदेवो मुनिः प्रोक्तो जगती च्छन्द ईरितम् । देवता नरसिंहोऽत्र स्वबीजेनाङ्गकल्पनम् ॥ २ ॥
ध्यानपूजाजपार्चादि षडक्षरवदीरितम् । तारं सहस्रारपदं ज्वालान्ते वर्तिने पदम् ॥ ३ ॥
नृसिंहबीजं हनयुग् हुंफट् स्वाहान्तिको मनुः । एकोनविंशत्यर्णोऽयं नृहरेश्चक्रसंज्ञकः ॥ ४ ॥

तारः प्रणवः नृसिंहबीजं पूर्वोक्तं । हनयुक् हनहनेति । तथा—

ऋषिर्जयन्त आख्यातश्छन्दो गायत्रमिष्यते । सुदर्शननृसिंहोऽस्य देवता परिकीर्तिता ॥ ५ ॥
चक्रराजाय हृत् प्रोक्तं ज्वालाचक्राय वै शिरः । जगच्चक्राय च शिखा कवचं त्वस्य संमतं ॥ ६ ॥
असुरान्तकचक्राय ह्यस्त्राणुश्च महापरम् । सुदर्शनायेति मनुः पञ्चाङ्गं समुदीरितम् ॥ ७ ॥
चक्रासनस्य मध्यस्थकालाग्निसदृशद्युतिम् । चतुर्भुजं विवृत्तास्यं चतुश्चक्रधरं हरिम् ॥ ८ ॥

कोटिभास्वन्महद्वर्णं त्रिनेत्रं चोग्रविग्रहम् । ध्यायेत् समस्तदुःखौघज्वरभूतविनाशनम् ॥ ९ ॥
पूर्वोक्ते वैष्णवे पीठे पूजयेदुक्तवर्त्मना । अङ्गानि पूजयेद् दिक्षु जयाद्याः पूजयेत्क्रमात् ॥ १० ॥
जया च विजया पश्चादजिता चापराजिता । विदिक्षु पूजयेत्पश्चान्मदनां मोदिनीं तथा ॥ ११ ॥
सहाख्यां सिद्धिसंज्ञां च पुरतः पूजयेत्ततः । कृष्णाभौ सितदंष्ट्रौ तौ (?) द्वितीयावृतिरीरिता ॥ १२ ॥
अङ्गा (इन्द्रा) दिभिस्तृतीया स्याद्वज्रादिभिरनन्तरम् । ···· ···· ···· ···· ॥

इति अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्रणायामत्रयं कृत्वा, शिरसि—जयन्ताय ऋषये नमः । मुखे–गायत्रीछन्दसे नमः । हृदये—श्रीसुदर्शननृसिंहाय देवतायै नमः । इति विन्यस्य, चक्रराजाय हृदयाय नमः । ज्वालाचक्राय शिरसे० । जगच्चक्राय शिखा० । असुरान्तकचक्राय कवचाय० । महासुदर्शनाय अस्त्राय० । इति पञ्चाङ्गमन्त्रान्मूलाभिमृष्टकरांगुलीषु विन्यस्य, नेत्रवर्जं हृदयादिपञ्चाङ्गेषु विन्यस्य ध्यानादिपुष्पोपचारान्तेऽङ्गानि सम्पूज्य, दिग्दलेषु–जयायै नमः । विजयायै० । अजितायै० । अपराजितायै० । विदिग्दलेषु–मदनायै० । मोदिन्यै० । सहायै० । सिद्ध्यै० इति सम्पूज्य, लोकेशाचादि प्राग्वत् कुर्यात् । तथा—

रविलक्षं जपेन्मन्त्रं तद्दशांशं शुभैस्तिलैः । हुनेत् पुष्पैस्तर्पयेच्च चत्वारिंशत्सहस्रकम् ॥ १३ ॥
आज्येन जुहुयान्मन्त्री सहस्रं च नमस्क्रियाम् । तर्पणादि ततः कुर्यात् पूर्वोक्तविधिना सुधीः ॥ १४ ॥
ततः सिद्धमनुर्मन्त्री काम्यकर्माणि साधयेत् । ···· ···· ···· ···· ···· ····

तिलैः पुष्पैः घृतैश्च प्रतिद्रव्यं चत्वारिंशत्सहस्रमित्यर्थः । रविलक्षं द्वादशलक्षम । तथा—

ब्राह्मणो जप्तुमिच्छेत्तु कुशानास्तीर्य भूतले । तस्मिन् देशे समाराध्य सुदर्शननृसिंहकम् । १५ ॥
मन्त्रं सहस्रमावृत्य हुनेद् देवस्य संनिधौ । सहस्रं मूलमन्त्रेण ह्यपामार्गसमिद्वरैः ॥ १६ ॥
तद्भस्मतिलकं कृत्वा निर्गच्छेच्छत्रुसन्निधौ । दासवत्कुरुते शत्रून् स सद्यो नात्र संशयः ॥ १७ ॥
अथ शत्रुमनुस्मृत्य तर्पणं चापि कारयेत् । अयुतं जयमाप्नोति नात्र कार्या विचारणा ॥ १८ ॥
अथोदुम्बरपीठे तु देवदेवं निवेशयेत् । तस्याग्रे वर्तुले कुण्डे होतव्या खादिरी समित् ॥ १९ ॥
अयुतं यो घृताक्तां तु मध्वक्तां वा जितेन्द्रियः । जयमाप्नोति स वादे नित्यं परशुरामवत् ॥ २० ॥
तज्जप्तहाटकं पट्टं रचयित्वा तु चक्रकम् । तेनांगुलीयकं कृत्वा जपहोमादिसाधितम् ॥ २१ ॥
धारयेद्दक्षिणे हस्ते मृत्युं रोगाञ्जयेदरीन् । राज्ञः सकाशात्पूजां च लभते धारयन् सदा ॥ २२ ॥
जलं त्रिसप्तजप्तं तु सर्वोदरगदान्तकम् । पूर्वं नवशिफानिष्कत्रयं लवणसंयुतम् ॥ २३ ॥
स्पृष्ट्वा जप्तं तप्तजले गुल्मशूलादि मासतः । मासमेकं प्रतिदिनं दूर्वाहोमं सहस्रकम् ॥ २४ ॥
कृत्वा संपूजयेद्देवं राजयक्ष्मा । प्रणश्यति । तिलैर्वा मधुना वापि तादृग्होमः प्रमेहनुत् ॥ २५ ॥
नेत्ररोगः सहस्रेण पद्महोमेन नश्यति । त्रिसप्तजप्ततोयेन क्षालनं नेत्ररोगनुत् ॥ २६ ॥
दशधा जप्ततोयेन करकेणैव सेचयेत् । तावत्सुमन्त्रितेनापि नवनीतेन लेपनात् ॥ २७ ॥
सप्ताहं वार्धसप्ताहं नाशयन्ति विसर्पकान् । अपामार्गेण जुहुयान्नित्यमष्टोत्तरं शतम् ॥ २८ ॥
जप्त्वा तावन्नमस्कारं कुर्यान्मासमतन्द्रितः । अपस्मारादिकानन्यान् ग्रहान् सर्वान् विनाशयेत् ॥ २९ ॥
शुद्धाद्भिः पूरितं कुम्भं चन्द्रमण्डलमध्यगम् । सुदर्शननृसिंहं तु सुधाविग्रहधारिणम् ॥ ३० ॥
यथावच्चिन्तयेत् तत्र पूजयेच्चोपचारकैः । जप्त्वा शतं सहस्रं वा दष्टं तेनैव सेचयेत् ॥ ३१ ॥
तथा स्पृशेद्वामहस्ते ह्यम्भःस्पर्शाद्विषं हरेत् । ···· ···· ···· ···· ···· ॥

पद्मं पंक्तिदलं हनद्वययुतं मध्ये ससाध्यं ध्रुवे
मन्त्रार्णान् द्विश आलिखेद्दलमनुप्रान्तेऽन्तिमं तद्बहिः ।
षट्कोणे निजबीजमग्निसदनं ज्वालापरीतं लिखेद्

दीप्तं जापहुतादिसाधितमिदं रक्षाकरं शत्रुहृत् ॥ ३२ ॥

इति । अस्यार्थः—त्रिकोणाभ्यन्तरे षट्कोणे तदन्तर्दशदलकमलं च कृत्वा तत्कर्णिकायां प्रणवमध्ये "अमुकं हन २" इति शत्रुनाम विलिख्य (दलेषु नवसु मन्त्राक्षराणि द्वन्द्वशोऽष्टादश विलिख्य) दशमेदलेऽन्त्यमक्षरं मन्त्रस्य विलिख्य षट्कोणेषु नृसिंहबीजं विलिख्य तद्बहिर्भूपुरत्रयं कुर्यात् । जपहोमपूजादिभिः साधितमेतद्यन्त्रं शत्रुनाशनं रक्षाकरं च भवतीति ॥ अथ श्रीराममन्त्राः । सारसंग्रहे—

अथ राममनून् वक्ष्ये श्रेष्ठान् वैष्णवतन्त्रके । तत्रादौ मन्त्रराजस्तु षडर्णः प्रोच्यतेऽधुना ॥ १ ॥
गाणपत्येषु सौरेषु शाक्तशैवेष्वभीष्टदः । वैष्णवेष्वपि सर्वेषु राममन्त्रः फलाधिकः ॥ २ ॥
गाणपत्यादिमन्त्रेषु कोटिकोटिगुणाधिकाः । मन्त्रास्तेष्वप्यनायासफलदोऽयं षडक्षरः ॥ ३ ॥
षडक्षरोऽयं मन्त्रस्तु सर्वाघौघविनाशनः । मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः ॥ ४ ॥
दैनन्दिनं च दुरितं पक्षमासर्तुवर्षजम् । सर्वं दहति निःशेषमूर्णाचलमिवानलः ॥ ५ ॥
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च । स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ॥ ६ ॥
सर्वाण्यपि शमं यान्ति मन्त्रराजानुकीर्तनात् । ब्राह्मणं क्षत्रियं वैश्यं शूद्रं हत्वापि कल्मषम् ॥ ७ ॥
सञ्चिनोति नरो मोहाद्भूयस्तदपि नाशयेत् । ग्रामारण्यपशुघ्नत्वसञ्चितं दुरितं च यत् ॥ ८ ॥
निःशेषं नाशयत्येव रामात्मा मन्त्रराजकः । मद्यपानेन यत्पापं तदप्याशु विनाशयेत् ॥ ९ ॥
अभक्ष्यभक्षणोत्पन्नं मिथ्याज्ञानसमुद्भवम् । सर्वं विलीयते राममन्त्रस्यास्यैव कीर्तनात् ॥ १० ॥
श्रोत्रियस्वर्णहरणाच्चैनो यदुपगच्छति रत्नादेरपहारेण तदप्याशु विनाशयेत् ॥ ११ ॥
गत्वा तु मातरं मोहादगम्यां वापि योषितम् । उपास्यानेन मन्त्रेण रामं तदपि नाशयेत् ॥ १२ ॥
महापातकयुक्तानां सङ्गत्या सञ्चितं च यत् । नाशयेत् तत्कथालापशयनासनभोजनैः ॥ १३ ॥
पितृमातृवधोत्पन्नं बुद्धिपूर्वमघं च यत् । निःशेषं नाशयत्येव कालत्रयसमुद्भवम् ॥ १४ ॥
तदनुष्ठानमात्रेण सर्वमेव प्रलीयते । यत्प्रयागादितीर्थेषु प्रायश्चित्तादिकैरपि ॥ १५ ॥
नैवापनुद्यते पापं तदप्याशु विनाशयेत् । कृच्छ्रैस्तप्तपराकाद्यैर्नानाचान्द्रायणैरपि ॥ १६ ॥
पापं च नापनोद्यं यत्तदप्याशु विनाशयेत् । आत्मतुल्यसुवर्णादिदानैर्बहुविधैरपि ॥ १७ ॥
किञ्चिदप्यपरिक्षीणं पापं तदपि नाशयेत् । भूतप्रेतपिशाचाद्याः कूष्माण्डग्रहराक्षसाः ॥ १८ ॥
दूरादेव पलायन्ते मन्त्रराजप्रभावतः । मालिन्यमपि साङ्कर्यं यच्च यावच्च दूषणम् ॥ १९ ॥
सर्वं विलयमाप्नोति मन्त्रराजानुकीर्तनात् । अब्रह्मचर्यदोषाश्च नियमातिक्रमोद्भवाः ॥ २० ॥
स्त्रीणां च पुरुषाणां स्वयमुन्त्रेगानेन नाशिताः । शान्तः प्रसन्नो वरदोऽक्रोधनो भक्तवत्सलः ॥ २१ ॥
मन्त्रराजसमो मन्त्रो जगत्स्वपि न विद्यते । सकामानां भुक्तिदोऽयं निष्कामाणां च मुक्तिदः ॥ २२ ॥
नृणामुभयकामानां भुक्तिमुक्तिप्रदायकः । रात्यभीष्टं महीसंस्थो राजते वा महीस्थितः ॥ २३ ॥
अथवा राक्षसा यस्मान्मरणं यान्ति सर्वतः । .... ॥

इत्यादि । अत्रैव षडक्षरमन्त्रप्रभावकथनं सर्वेषामपि राममन्त्राणां साधारणं बोद्धव्यम् । अथात्रैकाक्षरमारभ्य क्रमेण सर्वे मन्त्रा उद्ध्रियन्ते । तत्र श्रीस्कन्दयामले—

वह्निस्थं शयनं विष्णोरर्धचन्द्रविभूषितम् । एकाक्षरो मनुः प्रोक्तो मन्त्रराजसुरद्रुमः ॥ १ ॥

वह्नी रेफः । विष्णोः शयनमनन्तः आ । अर्धचन्द्रेऽनुस्वारस्तेन रां । अस्यार्थस्तत्रैव—

रेफोऽग्निरहमेवोक्तो विष्णुः सोमो म उच्यते । मध्यगस्त्वावयोर्ब्रह्मा रविराकार उच्यते ॥ २ ॥
ज्योतींषि सकलीकृत्य त्रीण्याकाशो विभुः स्वयम् । नादोऽपि धत्ते सन्मात्रं त्वामेव परमेश्वरीम् ॥ ३ ॥

इति । सारसंग्रहे—

मूर्तिपञ्जरनामानं तत्त्वन्यासं च कारयेत् । ब्रह्मा मुनिः स्याद्गायत्रं छन्दो रामोऽस्य देवता ॥ १ ॥
दीर्घार्धेन्दुयुजाङ्गानि कुर्याद् वह्न्यात्मना मनोः (वह्न्यात्मना रेफेण) ।
सरयूतीरमन्दारवेदिकापङ्कजासने । श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम् ॥ २ ॥
वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसंयुतम् । अवेक्षणमात्मानमात्मन्यमिततेजसम् ॥ ३ ॥
शुद्धस्फटिकसङ्काशं केवलं मोक्षकाङ्क्षया । चिन्तयेत्परमात्मानं भानुलक्षं जपेन्मनुम् ॥ ४ ॥

भानुलक्षं द्वादशलक्षम् । तथा—

"वह्निर्नारायणेनाढ्यो जाठरः केवलोऽपि च । एकाक्षरोक्तमृष्यादि स्यादाद्येन षडङ्गकम्" ॥ १ ॥

केवल इत्यनेन दीर्घराहित्यमुक्तं नतु व्यञ्जनमात्रम् । इति । तथा—

तारमायारमानङ्गवाक्स्वबीजैश्च षड्विधः । अक्षरो मन्त्रराजः स्यात् सर्वाभीष्टफलप्रदः ॥ १ ॥

तारः प्रणवः । माया भुवनेश्वरीबीजं । रमा श्रीबीजं । अनङ्गःकामबीजं । वाग्वाणीबीजं । स्वमुक्तरामबीजं । इति तथा—

द्व्यक्षरश्चन्द्रभद्रान्तो द्विविधश्चतुरक्षरः । ऋष्यादि पूर्ववज् ज्ञेयमेतेषां च विचक्षणैः ॥ २ ॥

तथा—"सप्रतिष्ठौ रमौ वायुर्हृत्पश्चार्णो मनुः स्मृतः" । प्रतिष्ठा आ । रमौ रेफमकारौ । वायुर्यकारः । हृन्नमः ।

विश्वामित्रो मुनिः प्रोक्तः पङ्क्तिश्छन्दोऽस्य देवता । रामभद्रो बीजशक्ती प्रथमार्णनती क्रमात् ॥ ३ ॥
भ्रूमध्ये हृदि नाभ्यन्ध्वोः पादयोर्विन्यसेन्मनुम् । षडङ्गं पूर्ववद्वा मन्त्रार्णैर्मनुनास्त्रकम् ॥ ४ ॥
मध्येवनं कल्पतरोर्मूले पुष्पलतासने । लक्ष्मणेन प्रगुणितसव्यांसतूणसायकम् ॥ ५ ॥
अवेक्ष्यमाणं जानक्या कृतव्यजनमीश्वरम् । जटाभारलसच्छीर्षं श्यामं मुनिगणावृतम् ॥ ६ ॥
लक्ष्मणेन धृतच्छत्रमथवा पुष्पकोपरि । दशास्यमथनं शान्तं ससुग्रीवविभीषणम् ॥ ७ ॥
विजयार्थी विशेषेण वर्णलक्षं जपेन्मनुम् । ....

इति । तथा—

स्वकामशक्तिवाग्लक्ष्मीताराद्यः पञ्चवर्णकः । षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः ॥ ८ ॥
पञ्चाशन्मातृकामन्त्रवर्णप्रत्येकपूर्वकः । लक्ष्मीवाङ्मन्मथादिश्च तारादिः स्यादनेकधा ॥ ९ ॥
श्रीमायामन्मथैकैकबीजाद्यान्तगतो मनुः । चतुर्वर्णः स एव स्यात् षड्वर्णो वाञ्छितप्रदः ॥ १० ॥
स्वाहान्तो हुंफडन्तो वा नत्यन्तो वा भवेदयम् । ....॥

च चतुर्वर्णो यः पूर्वमुक्तो रामभद्ररामचन्द्र इत्येवंरूपो द्विविधः । पञ्चाशद्वर्णपूर्वो बीजपूर्वश्च षडक्षरः । तेन श्रीअंरामचन्द्र श्रीआंरामचन्द्रेत्यादि पञ्चाशत् । एवं वाग्बीजादिःपञ्चाशत् । कामबीजादिःपञ्चाशत् । तारादि पञ्चाशत् । इति शतद्वयम् । एवं श्रीअंरामभद्रेत्यादि, तेन चतुःशतम् ॥ अगस्त्योऽपि—(८ अध्या०)

रामित्येकाक्षरो मन्त्रो राम इत्यपरो मनुः । चन्द्रान्तश्चैव भद्रान्तः पुनर्द्वेधा विधियते ॥ १ ॥
पञ्चाशन्मातृकामन्त्रवर्णप्रत्येकपूर्वकम् । लक्ष्मीवाङ्मन्मथादिश्च सर्वत्र प्रणवादिकः ॥ २ ॥

श्रीमायेत्यादिः पूर्वोक्तो यो नमोन्तः षड्विधः स स्वाहान्तः षड्विधः हुंफडन्तः षट्प्रकारः । एवमष्टादश भेदाः । तेनाष्टादशाधिकचतुःशतसंख्यश्चतुरक्षरपञ्चाक्षराभ्यामुत्पन्नाः षडक्षरभेदा इति । तथा—

ब्रह्मा सम्मोहनः शक्तिर्दक्षिणामूर्तिरेव च । अगस्त्यः श्रीशिवः प्रोक्ता मुनयोऽनुक्रमादिमे ॥ ३ ॥
छन्दो गायत्रसंज्ञं च श्रीरामो देवता मता । अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनोः ॥ ४ ॥
छन्दो देव्यादिगायत्री रामभद्रोऽस्य देवता । बीजशक्ती यथापूर्वं षड्वर्णान् विन्यसेन्मनोः ॥ ५ ॥

श्रीबीजयुक्तद्वयधिकशतस्यागतस्त्यऋषिर्विश्वामित्रो वा । कामबीजयुक्तद्वयधिकशतस्य सम्मोहनो विश्वामित्रो वा । एवं वाग्बीजयुक्तस्य दक्षिणामूर्तिर्विश्वामित्रो वा । (एवं तारादेः शिवो विश्वामित्रो वा ।) एतेन स्वबीजयुक्तस्य ब्रह्मैव । मायायुक्तस्य शतद्वयस्य शक्तिरेव । तथा स्वाहान्तानां षण्णां हुंफडन्तानां षण्णां च विश्वामित्र एवेति सम्भूय द्वादशाधिकशतमन्त्राणां स एवेति । तथा--

ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यन्धुषु पादयोः । बीजैः षड्दीर्घयुक्तैर्वा मन्त्रार्णैर्वा षडङ्गकम् ॥ ६ ॥
ध्यायेत् कल्पतरोर्मूले सुवर्णमयमण्डपे । पुष्पकाख्यविमानान्तः सिंहासनपरिच्छदे ॥ ७ ॥
पद्मे वसुदले देवमिन्द्रनीलमणिप्रभम् । वीरासनसमासीनं व्याख्यामुद्रोपशोभितम् ॥ ८ ॥
वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसंयुतम् । सर्वाभरणसंपन्नं वर्णलक्षं जपेन्मनुम् ॥ ९ ॥

वर्णलक्षं षड्लक्षम् । मन्त्रान्तरम्--

रामश्च चन्द्रभद्रान्तो ङेन्तो नतियुतो द्विधा । तारादिसहितः सोऽपि मन्त्रस्त्वष्टाक्षरः स्मृतः ॥ १० ॥

तारादयः षट् प्रागुक्तास्तैः सहितः स द्विविधः सप्ताक्षरस्तेनाष्टाक्षरो द्वादशप्रकारः । "ताराद्यन्तर्गतः सोऽपि नवार्णः स्यादनेकधा" । स सप्तार्ण एव तारादिषण्मध्यगतैरेकैकेन संपुटितः । तेन नवार्णोऽपि द्वादशविधः ।

तारं रामश्चतुर्थ्यन्तः क्रोधास्त्रं वह्निवल्लभा । अष्टार्णोऽयं परो मन्त्रं ऋष्यादि स्यात् षडर्णवत् ॥ ११ ॥

क्रोधः हुं । अस्त्रं फट् । वह्निवल्लभा स्वाहा । मन्त्रान्तरम्--

गुणबीजं वदेन्मायां हृद्रामाय पुनश्च ताम् । शिवोमाराममन्त्रोऽयं बस्वर्णः स्ववसुप्रदः ॥ १२ ॥

गुणबीजं प्रणवः । माया भुवनेशीबीजं । हृन्नमः । तां मायां । स्ववसुप्रदो भुक्तिमुक्तिप्रदः ।

ऋषिः सदाशिवः प्रोक्तो गायत्री छन्द उच्यते । शिवोमारामचन्द्रोऽस्य देवता परिकीर्तिता ॥ १३ ॥
दीर्घया माययाङ्गानि तारपञ्चार्णयुक्तया । ....

ॐनमोरामाय ह्रां हृदयाय नमः । ॐनमोरामाय ह्रीं शिरसे० इत्यादि प्रयोगः । ध्यानम्--

रामं त्रिनेत्रं सोमार्धधारिणं शूलिनं वरम् । भस्मोद्धूलितसर्वाङ्गं कपर्दिनमुपास्महे ॥ १४ ॥
रामाभिरामां सौन्दर्यसीमां सोमावतंसिनीम् । पाशांकुषधनुर्बाणधरां ध्यायेत् त्रिलोचनाम् ॥ १५ ॥
ध्यायन्नेवं वर्णलक्षं जपेत् त्रिमधुराप्लुतैः । बिल्वपत्रैः फलैः पुष्पैस्तिलैर्वा पङ्कजैर्हुनेत् ॥ १६ ॥

दशांशमिति शेषः । मन्त्रान्तरम्--

जानकीवल्लभं ङेन्तं स्वाहान्तश्च हुमादिकः । दशाक्षरोऽयं मन्त्रः स्याद्वसिष्ठोऽस्य मुनिः स्वराट् ॥ १७ ॥
छन्दश्च देवता रामः सीतापाणिपरिग्रहः । आद्यं बीजं द्विठः शक्तिः कामेनाङ्गक्रिया मता ॥ १८ ॥

द्विठः स्वाहाकारः । कामेन षड्दीर्घयुक्तेन । तथा--

शिरोललाटभ्रूमध्यतालुकण्ठेषु हृद्यपि । नाभ्यन्धुजानुपादेषु दशार्णान् विन्यसेन्मनोः ॥ १९ ॥
अयोध्यानगरे रत्नचित्रे सौवर्णमण्डपे । मन्दारपुष्पैराबद्धविताने तोरणाञ्चिते ॥ २० ॥
सिंहासने समारूढं पुष्पकोपरि राघवम् । रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः ॥ २१ ॥
संस्तूयमानं मुनिभिः प्रह्वैश्च परिसेवितम् । सीतालंकृतवामाङ्गं लक्ष्मणेनोपशोभितम् ॥ २२ ॥
श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् । ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधीः ॥ २३ ॥

वर्णलक्षं दशलक्षम् । तथा मन्त्रान्तरम्--

रामं ङेन्तं धनुष्पाणयेऽन्ते स्याद्वह्निसुन्दरी । दशाक्षरोऽयं मन्त्रः स्यान्मुनिर्ब्रह्मा विराट् स्मृतम् ॥ २४ ॥
छन्दोऽस्य देवता प्रोक्तो रामो राक्षसमर्दनः । आद्यो बीजं द्विठः शक्तिस्तेनैवाङ्गानि पूर्ववत् ॥ २५ ॥

आद्यः रां इति । तेनैव कामेन ।

वर्णन्यासं तथा ध्यानं पौरश्चरणिकं विधिम् । दशाक्षरोक्तवत्कुर्याच्चापबाणधरं स्मरेत् ॥ २६ ॥
ॐहृद्भगवते रामचन्द्रभद्रौ च ङेयुतौ । अर्काणों द्विविधो ह्यस्य ऋषिध्यानादि पूर्ववत् ॥ २७ ॥

रामेति स्वरूपम् । पूर्ववत् दशाक्षरवत् । तथा—

श्रीपूर्वं जयमध्यस्थं तद्विधं रामनाम च । त्रयोदशार्णं ऋष्यादि पूर्ववत् सर्वकामदः ॥ २८ ॥

श्रीरामजयरामजयरामजय (१३) ।

पदत्रयैर्द्विरावृत्तैरङ्गं ध्यानं दशार्णवत् । सतारं हृद्भगवते रामो ङेन्तं महा ततः ॥ २६ ॥
पुरुषाय-पदं पश्चात् हृदन्तोष्टादशाक्षरः । विश्वामित्रो मुनिश्छन्दो गायत्रं देवता मनोः ॥ ३० ॥
दशास्यदर्पदलनो रामभद्रः प्रकीर्तितः । तारं बीजं नमः शक्तिः षडङ्गं कल्पयेत्ततः ॥ ३१ ॥
मूलमन्त्रं कोसलेन्द्रं सत्यसन्धमनन्तरम् । रावणान्तकनामानं सर्वलोकहितं तथा ॥ ३२ ॥
स्वादुप्रसन्नवदनं चतुर्थ्या नमसा वदेत् ।.... .... ॥

मूलमन्त्रेण हृत् । कोशलेन्द्राय नमः शिरः । सत्यसन्धाय नमः शिखा । रावणान्तकाय नमः कवचं । सर्वलोकहिताय नमः नेत्रं । स्वादुप्रसन्नवदनाय नमः अस्त्रं । ध्यानम्—

नन्दिग्रामस्योपवने भरतायतनाञ्चिते । रम्ये सुगन्धिपुष्पाढ्यैर्वृक्षवृन्दैश्च शोभिते ॥ ३३ ॥
निशानभेरीपटहशङ्खतूर्यादिनिःस्वने । प्रवृत्तनृत्ये परितो जयमङ्गलभाषिते ॥ ३४ ॥
पाटीरघुसृणोशीरकर्पूरागरुगन्धिते । नानाकुसुमसौरभ्यवाहिगन्धवहाञ्चिते ॥ ३५ ॥
देवगन्धर्वनारीभिर्गायन्तीभिरलंकृते । सिंहासनसमारूढं पुष्पकोपरि राघवम् ॥ ३६ ॥
सौमित्रिसीतासहितं जटामुकुटशोभितम् । चापबाणधरं श्यामं ससुग्रीवविभीषणम् ॥ ३७ ॥
हत्वा रावणमायन्तं कृतत्रैलोक्यरक्षणम् । रामचन्द्रं हृदि ध्यायन् दशलक्षं जपेन्मनुम् ॥ ३८ ॥
(होमपूजाप्रयोगादि सर्वं ज्ञेयं षडर्णवत् ।) तथा—
रामभद्रं महेपूर्वं ष्वासाग्निश्च घुतः परम् । वीरं नृपोत्तमपदं दशास्यान्तक मां ततः ॥ ३६ ॥
ततो रक्ष ततो देहि पश्चाद् दापय मे श्रियम् । .... ॥

अग्नी रेफः । श्लोकरूपो मन्त्रः ।

द्वात्रिंशदक्षरो मन्त्रो विश्वामित्रो मुनिर्मनोः । छन्दोऽनुष्टुब् देवता च रामभद्रः प्रकीर्तितः ॥ ४० ॥
चतुष्करणवेदाब्धिवस्वर्णैरङ्गकल्पना । .... ॥

करणानि चत्वारि । वेदाश्चत्वारः । अब्धयश्चत्वारः वसवोऽष्टौ ॥ रामभद्रहृत् । महेष्वासो शिरः । रघुवीर शिखा । नृपोत्तम कवचं । दशास्यान्तक मां रक्ष नेत्रं । देहि दापय मे श्रियम् अस्त्रम् ।

मूर्ध्नि भाले दृशोः श्रोत्रगण्डयुग्मे सनासिके । आस्यदोःसन्धियुगले स्तनहृन्नाभिमण्डले ॥ ४१ ॥
कट्यां मेढ्रे पार्श्वपादसन्धिष्वर्णान् न्यसेन्मनो । पूर्वोक्तं ध्यानमत्रापि त्रिलक्षं नियतो जपेत् ॥ ४२ ॥

दृशोर्वर्णद्वयं, गण्डयोश्च, द्विवचनयुग्मपदाभ्याम् । दोष्परसन्धयः षोडश ।

पीतं वा चिन्तयेद्रामं धनार्थं यो मनुं जपेत् । सतारं हृद्भगवते चतुर्थ्या रघुनन्दनम् ॥ ४३ ॥
रक्षोघ्नविशदं तद्वन्मधुरेति वदेत्ततः । प्रसन्नवदनं ङेन्तं वदेदमिततेजसे ॥ ४४ ॥
बलरामौ चतुर्थ्यन्तौ विष्णुं ङेन्तं नतिं ततः । प्रोक्तो मालामनुः सप्तचत्वारिंशद्भिरक्षरैः ॥ ४५ ॥

अमिततेजसे इत्यत्र पूर्वपदेन न सन्धिरक्षरसंख्यानुपपत्तेः । तथा—

मुनिः पितामहश्छन्दः स्यादनुष्टुप् च देवता । राज्याभिषिक्तो रामश्च बीजशक्ती यथा पुरा ॥ ४६ ॥

यथा पुरा तारनती । "सप्ततर्तुसप्तदशषड्रुद्रसंख्यैः षडङ्गकम्" । ॐनमो भगवते हृत् । रघुनन्दनाय शिरः । रक्षोघ्नविशदाय शिखा । मधुरप्रसन्नवदनाय कवचं । अमिततेजसे नेत्रं । बलाय रामाय विष्णवे नमोऽस्त्रम् ।

शिरस्याननवृत्ते च भ्रूमध्येऽक्षिद्वयोरपि । श्रोत्रयोर्घ्राणयोश्चैव गण्डयोरोष्ठयोरपि ॥ ४७ ॥
दन्तयोरास्यदेशे च दोष्पत्संध्यग्रकेषु च । कण्ठे हृदि स्तनद्वन्द्वे पार्श्वयो पृष्ठयोस्ततः ॥ ४८ ॥
जठरे नाभ्यधिष्ठाने गुह्ये वर्णान् प्रविन्यसेत् । ध्यानं दशाक्षरप्रोक्तं लक्षमेकं जपेन्मनुम् ॥ ४९ ॥
बिल्वैः प्रसूनैः पत्रैर्वा फलैस्त्रिमधुराप्लुतैः । मधुरत्रययुक्तेन पायसेनाथवाम्बुजैः ॥ ५० ॥
होमं दशांशतः कुर्यात् तथा सर्वत्र तर्पणम् । रमा सीता चतुर्थ्यन्ता स्वाहान्तोऽयं षडक्षरः ॥ ५१ ॥
सीतामन्त्रश्च कथितः स्वतन्त्रोऽङ्गपरोऽपि च । जनकोऽस्य ऋषिश्छन्दो गायत्रं देवता मनोः ॥ ५२ ॥
सीताभगवती प्रोक्ता श्रीबीजं शक्तिरन्त्यकौ । दीर्घस्वरयुजा स्वेन षडङ्गानि प्रकल्पयेत् ॥ ५३ ॥
पूजयेद्वैष्णवे पीठे ध्यायेद्राघवसंयुताम् । स्वर्णाभामम्बुजकरां रामालोकनतत्पराम् ॥ ५४ ॥
वर्णलक्षं जपेन्मन्त्रमिष्टार्थं साधयेत्ततः । रेफपूर्वं समुद्धृत्य सेन्दु लक्षमणसंयुतम् ॥ ५५ ॥
ङेन्तोऽयं लक्ष्मणमनुर्नमसा च समन्वितः । अगस्त्य ऋषिरस्याथ गायत्रं छन्द उच्यते ॥ ५६ ॥
लक्ष्मणो देवता प्रोक्तो लंबीजं शक्तिरस्य हि । नमः स्याद्विनियोगो हि पुरुषार्थचतुष्टये ॥ ५७ ॥

रेफपूर्वं लकारम् । तथा––

द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणम् । धनुर्बाणकरं रामसेवासंसक्तमानसम् ॥ ५८ ॥
पूजा तु वैष्णवे पीठे साङ्गावरणवर्जिता । सप्तलक्षं पुरश्चर्या ततः सिद्धीस्तु साधयेत् ॥ ५९ ॥
भरतस्यैवमेव स्याच्छत्रुघ्नस्याप्ययं विधिः । आदौ वाप्यन्ततो वापि पूजायां राघवस्य तु ॥ ६० ॥
एतेषामपि कर्तव्या भुक्ति मुक्तिमभीप्सुभिः । अङ्गत्वेनोदिता ह्येते प्रधान्येनापि सुन्दरि ॥ ६१ ॥
वदेद् दाशरथायेति विद्महे च पदं ततः । सीतापदं समुधृत्य वल्लभा ततो वदेत् ॥ ६२ ॥
धीमहीत्यपि तन्नोऽथ ततो रामः प्रचोदयात् । एषा स्याद्रामगायत्री भक्तानां भुक्तिमुक्तिदा ॥ ६३ ॥
जन्मप्रभृति यत्पापं दशभिर्याति संक्षयम् । पुराकृतं शतेनैव सहस्रेण जपेन वा ॥ ६४ ॥
पुरश्चरणमस्याश्च चतुर्लक्षजपावधि । यच्च यावच्च पूजादि सर्वं पूर्ववदाचरेत् ॥ ६५ ॥
तारादिरेषा गायत्री मुक्तिमेव प्रयच्छति । (मायादिरपि वैदुष्यं रमादिश्च श्रियं पराम् ॥ ६६ ॥
मदनेनापि संयुक्ता संमोहयति मेदिनीम् । अनयाराधितो रामः सर्वाभीष्टं प्रयच्छति ॥ ६७ ॥)
पूजयेद्वैष्णवे पीठे भूर्ति मूलेन कल्पयेत् । श्रींसीतायै द्विठान्तेन सीतां पार्श्वगतां यजेत् ॥ ६८ ॥

पार्श्वं वामं । "वामभागे" समासीनामिति वचनात् ।

ततो दक्षिणकोणाग्रे सखायं लक्ष्मणं यजेत् । वामपार्श्वे त्रिकोणस्य शार्ङ्गं दक्षिणतः शरान् ॥ ६९ ॥

वामादि किञ्चिदग्रे । 'अग्रपार्श्वद्वये शार्ङ्गशरानङ्गानि तद्बहि''रति सारसंग्रहात् । तथा––

अग्नीशासुरवायव्यमध्ये दिक्षु च पूजयेत् । केसरेषु षडङ्गानि प्रथमावृतिरीरिता ॥ ७० ॥
द्वितीयात्मादिभिः प्रोक्ता चतुर्भिश्च सशक्तिकैः । आत्मा चैवान्तरात्मा च परमात्मा तृतीयकः ॥ ७१ ॥
ज्ञानात्मा चेति दिक्पत्रेष्वाग्नेयादिदलेष्वथ । निवृत्तिं च प्रतिष्ठां च विद्यां शान्तिं यजेत्क्रमात् ॥ ७२ ॥
तृतीया वासुदेवाद्यैर्दलमध्येषु चेरिता । वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ ७३ ॥
श्रीश्च शान्तिस्तथा प्रीतिश्चतुर्थी च रतिः स्मृता । दिग्विदिक्क्रमतः पूज्या गन्धपुष्पादिभिः प्रिये ॥ ७४ ॥
चतुर्थी वायुपुत्राद्यैः पत्राग्रे पूर्वतः क्रमात् । हनुमन्तं ससुग्रीवं भरतं सविभीषणम् ॥ ७५ ॥
लक्ष्मणाङ्गदशत्रुघ्नान् जाम्बवन्तं तदग्रतः । आञ्जनेयं च देवाग्रे वाचयन्तं च पुस्तकम् ॥ ७६ ॥
दक्षान्ययोश्च भरतशत्रुघ्नावात्तचामरौ । धारयन्तं च पाणिभ्यां छत्रं पृष्ठे च लक्ष्मणम् ॥ ७७ ॥
सृष्ट्यादिमन्त्रिणः पूर्वदिक्क्रमेण कृताञ्जलीन् । सृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्धनम् ॥ ७८ ॥
अकोपं धर्मपालाख्यं सुमन्तं च क्रमाद्यजेत् । वसिष्ठं वामदेवं च जाबालिं गौतमं तथा ॥ ७९ ॥

भरद्वाजं कश्यपं च कौशिकं वाल्मिकं तथा । नारदं सनकं चैव सनातनमतः परम् ॥ ८० ॥
सनत्कुमारं च यजेद् द्वादशारे विचक्षणः । नीलं नलं सुषेणं च मैन्दं च शरभं ततः ॥ ८१ ॥
द्विविधं चन्दनगवाक्षौ किरीटं च कुण्डलम् । श्रीवत्सं कौस्तुभं शङ्खं चक्रं गदां च पद्मकम् ॥ ८२ ॥
षोडशाब्जेऽर्चयेत् पूर्वदिक्क्रमेण कृताञ्जलीन् । ध्रुवो ध्वरश्च सोमश्च आपश्चैवानिलोऽनलः ॥ ८३ ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः । वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः ॥ ८४ ॥
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः । भुवनाधीश्वरश्चैव कपाली च दिशांपतिः ॥ ८५ ॥
स्थाणुर्भगश्च भगवान् रुद्राश्चैकादश स्मृताः । वरुणः सूर्यवेदाङ्गौ भानुरिन्द्रो रविस्तथा ॥ ८६ ॥
गभस्तिश्च यमः स्वर्णरेताश्चाथ दिवाकरः । मित्रो विष्णुरिति प्रोक्ता आदित्या द्वादश क्रमात् ॥ ८७ ॥
धातारमन्ते प्रयजेद् द्वात्रिंशदुदिता इमे । ध्रुवाद्यैरष्टमी ज्ञेया द्वात्रिंशद्दलपद्मके ॥ ८८ ॥
इन्द्राद्यैर्भूगृहे बाह्ये नवमावरणं यजेत् । तदस्त्रैर्वज्रशक्त्याद्यैर्दशमावरणं स्मृतम् ॥ ८९ ॥
अङ्गैरात्मादिभिर्वासुदेवाद्यैर्वायुजादिभिः । सृष्ट्यादिभिर्लोकपालैस्तदस्त्रैर्वा यजेत् प्रभुम् ॥ ९० ॥
यद्वाङ्गैर्वायुपुत्राद्यैः सृष्ट्याद्यैश्च दिशाधिपैः । तदस्त्रैश्च यजेद् देवं संक्षेपार्चा समीरिता ॥ ९१ ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, इत्यादि गङ्गामन्त्रजपान्ते ॐनमो भगवते रघुनन्दनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनाय अमिततेजसे बलाय रामाय विष्णवे नमः। इति मन्त्रेणाष्टवारमभिमन्त्र्योक्तविधिना स्नानादिकं कृत्वा, सन्ध्यावन्दनेऽध्यघमर्षणानन्तरं पुनर्जलमादाय "हुंजानकीवल्लभाय स्वाहा" इति मन्त्रेण जलमभिमन्त्र्य, तज्जलं पीत्वाचमनादितर्पणान्तं कृत्वा, प्राणायामादिपूर्वकं "दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात्" इति रामगायत्रीं यथाशक्ति जपित्वा, मूलमन्त्रजपादि परतत्त्वान्तं योगपीठन्यासं कृत्वा, मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदये श्रीरामदेवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुं। रौं नेत्रत्रयाय वौषट्। रः अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, शिरसि रांनमः। भ्रूमध्ये रांनमः। हृदि मांनमः। नाभौ यंनमः। गुह्ये नंनमः। पादयोः मंनमः। इति विन्यस्य, प्रागुक्तमूर्तिपञ्जरन्यासं तत्त्वन्यासं च विधाय, ध्यानादिमानसपूजान्ते सुवर्णादिपट्टे कुंकुमादिना त्रिकोणगर्भमष्टदलपद्मं कृत्वा, तद्बहिः पुनरष्टदलं तद्बहिर्द्वादशदलं तद्बहिः षोडशदलं तद्बहिर्द्वात्रिंशद्दलं तद्बहिश्चतुर्द्वारयुतं चतुरस्रत्रयमिति पूजाचक्रं कृत्वा, पुरतः संस्थाप्यार्घ्यचर्यार्घ्यादिपूजनादिपुष्पोपचारान्ते, देवस्य वामभागे—श्रींसीतायै स्वाहा सीतायै नमः इति सीतां सम्पूज्य, दक्षिणभागे—लं लक्ष्मणाय नमः। इति लक्ष्मणं सम्पूज्य, किंचिद् देवस्य वामाग्रे—शार्ङ्गाय नमः। दक्षिणाग्रे—ॐशरेभ्यो नमः। इति प्राधानार्चा कृत्वा प्राग्वदङ्गानि सम्पूज्य, अष्टदलमूलेषु दिक्षु—ॐआं आत्मने नमः। ॐअं अन्तरात्मने नमः। ॐपं परमात्मने नमः। ॐह्रीं ज्ञानात्मने नमः। कोणेषु—ॐनिवृत्त्यै नमः। प्रतिष्ठायै०। विद्यायै०। शान्त्यै०। ततो दलमध्येषु दिक्षु—ॐवासुदेवाय नमः। सङ्कर्षणाय०। प्रद्युम्नाय०। अनिरुद्धाय०। विदिक्षु—श्रिये नमः। शान्त्यै०। प्रीत्यै०। रत्यै०। द्वितीयाष्टदलाग्रेषु—हनुमते नमः। सुग्रीवाय०। भरताय०। विभीषणाय०। लक्ष्मणाय०। अङ्गदाय०। शत्रुघ्नाय०। जाम्बवते०। अग्रेष्वेव—सृष्टये० नमः। जयन्ताय०। विजयाय०। सुराष्ट्राय०। राष्ट्रवर्धनाय०। अकोपाय०। धर्मपालाय०। सुमन्त्राय०। द्वादशदलेषु—वसिष्ठाय नमः। वामदेवाय०। जावालये०। गौतमाय०। भरद्वाजाय०। कश्यपाय०। कौशिकाय०। वाल्मीकये०। नारदाय०। सनकाय०। सनातनाय०। सनत्कुमाराय०। षोडशदलेषु—नीलाय नमः। नलाय०। सुषेणाय०। मैन्दाय०। शरभाय०। द्विविधाय०। चन्दनाय०। गवाक्षाय०। किरीटाय०। कुण्डलाय०। श्रीवत्साय०। कौस्तुभाय०। शङ्खाय०। चक्राय०। गदायै०। पद्माय०। ततो द्वात्रिंद्दलेषु—ध्रुवाय नमः। ध्वराय०।

सोमाय० । आपाय० । अनिलाय० । अनलाय० । प्रत्यूषाय० । प्रभासाय० । वीरभद्राय । शम्भवे । गिरीशाय० । अजैकपादे० । अहिर्बुध्न्याय० । पिनाकिने० । भुवनाधीश्वराय० । कपालिने० । दिक्पतये० । स्थाणवे० । भगाय० । वरुणाय० । सूर्याय० । वेदाङ्गाय० । भानवे० । इन्द्राय० । रवये० । गभस्तये० । यमाय० । स्वर्णरेतसे० । दिवाकराय० । मित्राय० । विष्णवे० । धात्रे नमः । इति सम्पूज्य लोकेशाद्यादि सर्वं प्राग्वत् कुर्यात । मन्त्रान्तराणां न्यासध्यानादिविशेषः । अर्चनं तु समानमेव ॥ सारसंग्रहे तु द्वात्रिंशद् देवतानां पूजानन्तरम्——

वषट्कारं च पुरतः प्रयजेत् सगुणत्रयम् । ततो मेषादिराशींश्च यजेन्नागाष्टकं ततः ॥ १ ॥
अनन्तो वासुकिः स्थाणुः कार्कोटः पद्म एव च । महापद्मस्तथा शङ्खः कुलिकश्चाष्टमः स्मृताः ॥ २ ॥

इत्यावरणान्तरमुक्तम् । एते चतुर्विंशतिसंख्यकाः द्वात्रिंशद्दलपद्माद्बहिश्चतुर्विंशतिदलपङ्कजेषु पूज्याः । अधिकस्याधिकं फलमिति । तथा——

षट्सहस्रं सहस्रं च त्रिशतं शतमेव वा । प्रत्यहं प्रजपेन्मन्त्री नोचेत्प्राप्नोत्यधोगतिम् ॥ १ ॥

इति । तथा सारसंग्रहे——

षड्लक्षं प्रजपेन्मन्त्रं जुहुयात्तद्दशांशत. । कमलैर्मधुराभ्यक्तैरेधितेऽग्नौ सुपूजिते ॥ १ ॥
तर्पयेत्सलिलैः शुद्धैः शीतलैश्चन्द्रवासितैः । अभिषिक्तः समभ्यर्च्य ब्राह्मणान् भोजनादिभिः ॥ २ ॥

चन्द्रः कर्पूरः ।

गुरुमभ्यर्च्य विभवैस्तोषयेद् भक्तिसंयुतः । तदाज्ञयाथ कुर्वीत प्रयोगान् निजवाञ्छितान् ॥ ३ ॥
धनाय कमलैर्जातीपुष्पैश्चन्दनलोलितैः । जुहुयाद्धनाधिपवन्नीलोत्पलहुतेन च ॥ ४ ॥
वशयेद्विश्वमखिलं बिल्वपुष्पैर्धनाप्तये । (हुतं दीर्घायुषे दूर्वारक्ताब्जैर्धनप्राप्तये) ॥ ५ ॥
आधाय कुण्डे विधिवदग्निं पूर्वोक्तवर्त्मना । तत्र देवं समावाह्य पूजयेदुपचारकैः ॥ ६ ॥
पञ्चभिर्वा षोडशभिः पूजोपकरणैः पृथक् । पलाशाश्वत्थखदिरोदुम्बराम्रद्रुमेन्धनैः ॥ ७ ॥
(अग्निं प्रज्वालयेत् सम्यक् कर्पूरैरथवेन्धनैः) । तत्र सम्पूजयेत् सम्यग् राघवं प्रोक्तवर्त्मना ॥ ८ ॥
लक्षं तदर्धमथवा जपित्वा तद्दशांशतः । तिलैर्वा कमलैर्हुत्वा यद्यदिष्टं तदाप्नुयात् ॥ ९ ॥
बिल्वप्रसूनैरैश्वर्यमेधितेऽग्नौ हुतैर्भवेत् । पलाशकुसुमैर्हुत्वा मेधावी वेदविद् भवेत् ॥ १० ॥
दूर्वाभिश्च गुडूचीभिः प्रत्येकमपि वा हुतैः । निरामयश्च दीर्घायुर्भवत्येव न संशयः ॥ ११ ॥
ध्यात्वाथ मन्मथं रामं सीतामपि रतिं स्मरेत् । सर्ववश्यं प्रयोगेषु जपहोमादिकर्मसु ॥ १२ ॥
रामं नवोढया सार्धं स्मरन्नाराध्य भक्तितः । उपैति सदृशी कन्यां लाजाहोमेन साधकः ॥ १३ ॥
रामं विधिवदाराध्य ज्वलितेऽग्नौ प्रयोगवित् । मधुरत्रययुक्तेन पायसेन हुनेत्सुधीः ॥ १४ ॥
सर्वाधिपत्यं वैदुष्यं भवेदेव न संशयः । तिलैश्च तण्डुलैराज्यैर्हुत्वा लोकस्य पूजनम् ॥ १४ ॥
आराध्य वत्सरं यावत् षट्सहस्रं दिने दिने । जपेच्च जुहुयादग्नौ तद्दशांशं घृतान्धसा ॥ १६ ॥
अयमेवान्नदो लोके सर्वेषामपि जायते । बिल्वप्रसूनैः कुमुदैस्तथा बिल्वदलैरपि ॥ १७ ॥
हुत्वा तु स लभेल्लक्ष्मीरचिरान्मन्त्रसाधक । आराध्य रामं चण्डांशुमण्डले वत्सरात्सुधीः ॥ १८ ॥
उदयाद्यावदस्तं स्याज्जपेन्मन्त्रमनन्यधीः । फलं भवति तस्याशु देवानामपि दुर्लभम् ॥ १९ ॥
वैदुष्येणाधिपत्येन नराणामुत्तमो भवेत् । पूर्णिमायां निशीथिन्यामुदयास्तमयं विधोः ॥ २० ॥
संवत्सरं प्रकुर्वीत जपहोमादिकं बुधः । रात्रौ जपेद्दिवा होमं कुर्यादेवापरेऽहनि ॥ २१ ॥
ब्राह्मणान् भोजयित्वा तु व्रतमेतत्समापयेत् । सोमसूर्यादिकं यस्तु व्रतं कुर्वीत मानवः ॥ २२ ॥
भुक्तिं मुक्तिं च लभते इह लोके परत्र च । रक्तपद्मैश्च बन्धूकैस्तथा रक्तोत्पलैरपि ॥ २३ ॥

अभीष्टलोकवश्यार्थं जुहुयादर्चितेऽनले । राज्यैश्वर्योपभोगार्थं जपेल्लक्षमनन्यधीः २४ ॥
पद्मैर्बिल्वप्रसूनैर्वा दशांशं जुहुयात्सुधीः । समुद्रतीरे गोष्ठे वा लक्षजापी पयोव्रतः ॥ २५ ॥
पायसेनाज्ययुक्तेन हुत्वा विद्यानिधिर्भवेत् । मन्त्रवित् स्वाधिपत्याय शाकाहारो जलान्तरे ॥ २६ ॥
जपेल्लक्षं च जुहुयाद्बिल्वपत्रैर्दशांशतः । तदेव पुनरायाति स्वाधिपत्यं न संशयः ॥ २७ ॥

उपोष्य गङ्गादिजलान्तरस्थो रामं समाराध्य जपेच्च लक्षम् ।
हुत्वा दशांशं कमलैस्तिलैर्वा प्रजाप्रसूनैर्मधुरत्रयाक्तैः ॥ २८ ॥
राजश्रियं विन्दति मन्दभाग्यो ह्यमुष्य राज्यं च सदा स्थिरं स्यात् ।
रामं समाराध्य च यो हुनेच्च राज्यश्रियं विन्दति सेन्दुखण्डैः ॥ २९ ॥

वैशाखे राघवं सूर्ये पश्यन्ननिमिषेक्षणः । निराहारो जपेल्लक्षं मौनी पञ्चाग्निमध्यतः ॥ ३० ॥
दशांशं कमलैर्हुत्वा सर्वभोगो भवेद् ध्रुवम् । माघमासे जले स्थित्वा कन्दमूलफलाशनः ॥ ३१ ॥
जपेल्लक्षं च जुहुयात्पायसेनार्चितेऽनले । दशांशं पुत्रपौत्राद्यैरुपेतः प्राप्नुयाच्छ्रियम् ॥ ३२ ॥
श्रीरामसदृशः पुत्रः पौत्रोऽप्यस्य प्रजायते । बलिष्ठैः शत्रुभिर्मन्त्री परिभूतोऽथ मानवः ॥ ३३ ॥
तदा हनहनेत्युक्त्वा मायान्ते वा रणे यजेत् । ध्यात्वा रघुपतिं क्रुद्धं कालानलमिवापरम् ॥ ३४ ॥
(आकर्णसशराकृष्टकोदण्डभुजमण्डितम् ।) रणाङ्गने रिपूञ्जित्वा तीक्ष्णमार्गणवृष्टिभिः ॥ ३५ ॥
संहरन्तं महावीरमुग्रमैन्द्ररथस्थितम् । लक्ष्मणादिमहावीरैर्युतं हनुमदादिभिः ॥ ३६ ॥
कोटिकोटिमहावीरैः शैलवृक्षकरोद्धतैः । वज्रीकरणहुंकारभोंकारसुमहारवैः ॥ ३७ ॥
नदद्भिरपि धावद्भिः समरेऽरिगणं प्रति । एवं ध्यात्वा निराहारो मारणाय रिपोः पुनः ॥ ३८ ॥
जुहुयाच्छाल्मली पुष्पैर्दशांशं मन्त्रसाधकः । अत्यन्तं तु समृद्धोऽपि न शत्रुरवशिष्यते ॥ ३९ ॥
वैरिणं रावणं ध्यात्वा तथात्मानं रघूद्वहम् । विधाय पूर्ववत् सर्वमनायासेन मारयेत् ॥ ४० ॥
सीताहरणशोकाच्च स्तब्धीभूतमचेतसम् । जपेद्रघुपतिं ध्यायन्निराहारो जले वसन् ॥ ४१ ॥
दशांशं च तिलैर्हुत्वा स्तम्भयेच्छत्रुसंहतिम् । निधाय वायुबीजान्ते तन्नाम भ्रामयेति च ॥ ४२ ॥
जपेन्नक्तं निराहारो जुहुयाच्च तिलैरपि । रामं ध्यात्वा विषण्णं तु सीतान्वेषणकातरम् ॥ ४३ ॥
भ्रामयत्यचिरं साक्षाद्धेमाद्रिमपि वैरिणम् । समुद्रतीरे लङ्कायां हेमप्राकारसन्निधौ ॥ ४४ ॥
सुग्रीवादिभिरन्यैश्च दैवतैर्नारदादिभिः । उपास्यमानं सदसि ध्यात्वा देवं सलक्ष्मणम् ॥ ४५ ॥
विभीषणायागताय ध्यात्वैनं शरणार्थिने । वरदं तं जपेल्लक्षं जुहुयात् पङ्कजैरपि ॥ ४६ ॥
स्वस्थानमानयेच्छीघ्रं राजानमथवा प्रभुम् । निमील्य चक्षुषी स्नेहादुपलभ्य पुनः पुनः ॥ ४७ ॥
प्रमोहयन्तं सहसा विराधान्मारुतिप्रियम् । रामं ध्यात्वा जपेल्लक्षं हुत्वा रक्ताम्बुजैरपि ॥ ४८ ॥
सम्मोहयति वेगेन राजानमपि वा प्रभुम् । तारादिर्मुक्तये ह्येष रमादिर्भुक्तये तथा ॥ ४९ ॥
वाक्सिद्धये च वाग्बीजं प्रणवान्ते नियोजयेत् । मान्मथं सर्ववश्याय वदेत्तत्त्रितयं पुनः ॥ ५० ॥
तारान्ते चैव तन्मन्त्री सर्वार्थं विनियोजयेत् । ··· ···· ···· ···· ···· ॥

इति । स्कन्दयामले—

आदौ विरच्य षट्कोणं तन्मध्ये बीजमालिखेत् । तद्बीजान्तरधः साध्यं साधकाख्यां तदूर्ध्वतः ॥ १ ॥
षष्ठ्या (साध्या)धः साधकः कर्म मध्ये तत्पार्श्वयोः क्रियाम् । रमाबीजं च तस्यान्तस्तत्सर्वं वेष्टयेत्ततः ॥२॥
सम्मुखाभ्यां तु ताराभ्यां कोणेष्वङ्गमनूंल्लिखेत् । षट्कोणपार्श्वयोर्मायाश्रीबीजेऽग्रेषु मन्मथम् ॥ ३ ॥
षट्सन्धिषु च हुंबीजं तत्सर्वं वेष्टयेत्ततः । वाग्भवेन बहिः पद्ममष्टपत्रं सकेसरम् ॥ ४ ॥
केसरेषु स्वरान् वर्णान् पत्रेषु विलिखेत् क्रमात् । पत्राग्रेषु लिखेन्मालामन्त्रवर्णान् ऋतून्मितान् ॥ ५ ॥

पञ्च चान्त्यदले बाह्ये पुनरष्टदलाम्बुजम् । तत्केसरेषु श्रीबीजं दलेष्वष्टाक्षराणि च ॥ ६ ॥
नारायणमनोर्बाह्ये पद्मं द्वादशभिर्दलैः । तत्केसरेषु चत्वारि चत्वारि विलिखेत्क्रमात् ॥ ७ ॥
अकारादिक्षकारान्तान् मातृकार्णान् सबिन्दुकान् । शिष्टानन्ते तद्दलेषु विलिखेत्परमेश्वरि ॥ ८ ॥
वासुदेवमनोर्वर्णान् द्वादशैकैकशः क्रमात् । बहिः षोडशपत्रं च मायाबीजाढ्यकेसरम् ॥ ९ ॥
तत्पत्रेषु च वर्मास्त्रहृदन्तान् द्वादशार्णकान् । विलिख्य तत्सन्धिषु तु वायुपुत्रादिबीजकान् ॥ १० ॥
द्वात्रिंशद्दलसंयुक्तं पद्मंकृत्वाथ तद्बहिः । तन्मूलेषु लिखेच्छक्तिश्रीमारबीजकानि च ॥ ११ ॥
रामानुष्टुभमन्त्रार्णान् नृसिंहानुष्टुभार्णकान् । दलेष्वैकैकशो देवि विलिखेत्तदनन्तरम् ॥ १२ ॥
पत्राग्रेषु च मन्त्रज्ञो वषडित्यक्षरद्वयम् । बहिर्भूपुरमालिख्य वज्राष्टकविराजितम् ॥ १३ ॥
नृसिंहबीजं तद्दिक्षु वाराहं कोणकेषु च । लिखेच्छ्रीरामयन्त्रं हि सर्वयन्त्रोत्तमं प्रिये ॥ १४ ॥
साधितं जपहोमाभ्यां होमसंपातसेकतः । धृतं शिरसि वा बाहावायुरारोग्यदं नृणाम् ॥ १५ ॥
रक्षाकरं महेशानि महदैश्वर्यवर्धनम् । वन्ध्यानामपि नारीणां पुत्रदं सुखदं परम् ॥ १६ ॥
भुक्तिमुक्तिप्रदं चैव गोपनीयं सुरेश्वरि । यस्मै कस्मै न देयं च त्रिषु लोकेषु दुर्लभम् ॥ १७ ॥
किं बहूक्तेन देवेशि सर्वदं नात्र संशयः । .... ॥

इति । अस्यायमर्थः--षट्कोणं कृत्वा, तन्मध्ये श्रीरामबीजं विलिख्य, (तन्मध्ये साध्यनाम विलिख्य) तत्सर्वमन्योन्याभिमुखप्रणवाभ्यां संवेष्ट्य षट्सु कोणेषु षडङ्गमन्त्रानालिख्य, षट्कोणपार्श्वयोर्वामे मायां दक्षिणे श्रीबीजं च विलिख्य, तत्कोणाग्रेषु कामबीजं विलिख्य, षट्कोणसन्धिषु हुंबीजमालिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां वाग्भवबीजानि निरन्तरं (वृत्ता) कारेण विलिख्य, तद्बाह्येऽष्टदलं कृत्वा तत्केसरेषु द्वन्द्वशः (षोडश) स्वरान् विलिख्य, तद्दलेषु कचटतपयशळाख्यानष्टवर्गानालिख्य, तत्पत्राग्रेषु पूर्वोक्तमालामन्त्रवर्णान् षट्षट् समालिख्यान्तिमे पञ्चवर्णानालिख्य, तद्बहिः पुनरष्टदलपद्मं कृत्वा, तत्केसरेषु श्रीबीजं, दलेषु नारायणाष्टाक्षराणि विलिख्य, तद्बहिर्द्वादशदलकमलं कृत्वा, तत्केसरेषु मातृकार्णांश्चतुरश्चतुर आलिख्य, तद्दलेषु वासुदेवद्वादशाक्षराणि एकैकशो विलिख्य, तद्बहिः षोडशदलकेसरेषु मायाबीजं प्रतिकेसरं विलिख्य, दलेषु पूर्वोक्तद्वादशाक्षराणि द्वादशदलेषु विलिख्यावशिष्टदलचतुष्टये "हुं फट् नमः" इति वर्णचतुष्टयं प्रतिदलमेकैकं विलिख्य, तद्दलान्तरालेषु प्रागुक्तहनुमदाद्यष्टकसृष्टचाद्यष्टकयोर्नामाद्यक्षराणि सबिन्दुनि लिखित्वा, तद्बहिर्द्वात्रिंशद्दलेषु पूर्वोक्तश्लोकरूपद्वात्रिंशदक्षररामममन्त्रार्णान् नृसिंहद्वात्रिंशदक्षरवर्णांश्चैकैकशो विलिख्य, तत्केसरेषु प्रतिकेसरं शक्तिश्रीकामबीजानि विलिख्य, पत्राग्रेषु प्रत्यग्रं वषडिति विलिख्य, तद्बहिश्चतुरस्रं वज्राष्टकयुतं कृत्वा तत्र दिक्षु प्रोक्तनृसिंहबीजं, विदिक्षु वाराहबीजं विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥

सारसंग्रहे--

दहनपुरयुगे च कामबीजे विलिखतु साध्यसमन्वितं च बीजम् ।
वृतमिदमणुवर्णकैश्च शिष्टैस्तदनु दशाक्षरमन्त्रवर्णवीतम् ॥ १ ॥
षडपि च हृदयादि मुख्यकोणेषु लिखतु शक्तिरमे च कोणपार्श्वे ।
कवचमनुमथो लिखेत्तदग्रे वसुदलकेसरगान् द्विशः स्वरांश्च ॥ २ ॥
ऋतुपरिमितवर्णकांश्च मालामनुसुभगांश्च तदन्तिमेऽन्तिमांश्च ।
कमुखलिपिवृतं धरापुरस्थं दिशि नृहरेश्च वराहबीजमस्रे ॥ ३ ॥

जपहोमादिना सम्यक्साधितं यन्त्रमुत्तमम् । सर्वेष्टफलदं मोक्षदायकं श्रीकरं परम् ॥ ४ ॥

इति । अस्यार्थः--षट्कोणं विरच्य तन्मध्ये कामबीजोदरे श्रीरामबीजं प्राग्वत् ससाध्यं विलिख्य, अवशिष्टमूलमन्त्रवर्णैरावेष्ट्य, तद्बहिश्च "हुंजानकीवल्लभाय स्वाहा" इति मन्त्रेणावेष्ट्य, षट्कोणेषु प्राग्वत्

षडङ्गमन्त्रानालिख्य, षट्कोणपार्श्वयोर्वामदक्षिणयोः शक्तिबीजं मायाजीजं चैकैकशो विलिख्य, कोणाग्रेषु हुं इत्यालिख्य, बहिरष्टदलकमलं कृत्वा तत्केसरेषु द्वन्द्वशः स्वरानालिख्य, तद्दलेषु प्राग्वन्मालामन्त्रवर्णानालिख्य, बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां कादिक्षान्तवर्णैः सबिन्दुकैरावेष्टय, बहिश्चतुरस्रं कृत्वा तस्य दिक्षु नृसिंहबीजं कोणेषु वराहबीजं च लिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ तथा---

षट्कोणे प्रणवं च साध्यसहितं मूलाणुमश्रिष्वथो
सन्धिष्वङ्गमनूंश्च शक्तिमदनौ षट्कोणपार्श्वे लिखेत् ।
किञ्जल्केषु कला द्विशश्च दलगं मालाणुषड्वर्णकं
चान्त्यं चान्त्यदले दशार्णमनुना कार्यैर्वृतं भूस्थितम् ॥ ५ ॥
दिशि विदिशि नृसिंहवराहकौ लिखतु भूर्जदले कनकोद्भवे ।
राजतेऽथच सुसाधितमुत्तमं विभवकीर्तिरमाविजयप्रदम् ॥ ६ ॥

इति । अस्यार्थः---तत्र षट्कोणं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य, कोणषट्के मूलमन्त्रस्य षडर्णानालिख्य, षट्कोणसन्धिषु षडङ्गमन्त्रानालिख्य, षट्कोणपार्श्वयोः शक्तिबीजं स्ववामे दक्षिणे कामबीजं विलिख्य, बहिरष्टदलकमलं कृत्वा, तत्केसरेषु द्वन्द्वशः स्वरान् दलेषु प्राग्वन्मालामन्त्रवर्णांश्च विलिख्य, तद्वहिर्वृत्तत्रयं कृत्वाभ्यन्तरवीथ्यां दशाक्षरमन्त्रेण पूर्वोक्तेनावेष्टय, बाह्यवीथ्यां कादिक्षान्तवर्णैरावेष्टय, बहिश्चतुरस्रं कृत्वा तस्य दिक्षु नृसिंहबीजं, विदिक्षु वराहबीजं च विलिखेत् । एतद्यन्त्रमुक्तफलदं भवतीति ॥

अथ रामानुस्मृतिः । श्रीब्रह्मोवाच ।

वन्दे रामं जगद्वन्द्यं सुन्दरास्यं शुचिस्मितम् । कन्दर्पकोटिलावण्यं कामितार्थप्रदायकम् ॥ १ ॥
भास्वत्किरीटकटककटिसूत्रोपशोभितम् । विशाललोचनं भ्राजत्तरुणारुणकुण्डलम् ॥ २ ॥
नीलजीमूतसङ्काशं नीलालकवृताननम् । ज्ञानमुद्रालसद्दक्षबाहुं ज्ञानमयं विभुम् ॥ ३ ॥
वामजानुपरिन्यस्तवामाम्बुजकरं हरिम् । वीरासने समासीनं विद्युत्पुञ्जनिभाम्बरम् ॥ ४ ॥
कोटिसूर्यप्रतीकाशं कोमलावयवोज्ज्वलम् । जानकीलक्ष्मणाभ्यां च वामदक्षिशोभितम् ॥ ५ ॥
हनुमद्रविपुत्रादिकपिमुख्यैर्निषेवितम् । दिव्यरत्नसमायुक्तसिंहासनगतं प्रभुम् ॥ ६ ॥
प्रत्यहं प्रातरुत्थाय ध्यात्वैवं राघवं हृदि । एभिः षोडशभिर्नामपदैः स्तुत्वा नमेद्धरिम् ॥ ७ ॥
नमो रामाय शुद्धाय बुद्धाय परमात्मने । विशुद्धज्ञानदेहाय रघुनाथाय ते नमः ॥ ८ ॥
नमो रावणहन्त्रे ते नमो बालिविनाशिने । नमो वैकुण्ठनाथाय नमो विष्णुस्वरूपिणे ॥ ९ ॥
नमो यज्ञस्वरूपाय यज्ञभोक्ते नमोऽस्तु ते । योगिध्येयाय योगाय परमानन्दरूपिणे ॥ १० ॥
शङ्करप्रियमित्राय जानक्याः पतये नमः । य इदं प्रातरुत्थाय भक्तिश्रद्धासमन्वितः ॥ ११ ॥
षोडशैतानि नामानि रामचन्द्रस्य नित्यशः । पठेद्विद्वान् स्मरेन्नाम स एव स्याद्रघूत्तमः ॥ १२ ॥
श्रीरामभक्तिरतुला भवत्येव हि सर्वदा । जगत्पूज्यः सुखं जीवेद् रामभद्रप्रसादतः ॥ १३ ॥
मरणे समनुप्राप्ते श्रीरामः सीतया सह । हृदि संदृश्यते तस्य साक्षात् सौमित्रिणा सह ॥ १४ ॥
नित्यं चापररात्रेषु रामस्येमां समाहितः । मुच्यतेऽनुस्मृतिं जप्त्वा मृत्युदारिद्र्यपातकैः ॥ १५ ॥

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसम्वादे रामानुस्मृतिः सम्पूर्णा ॥ अथ हनुमन्मन्त्राः । सारसंग्रहे---

आञ्जनेयमनुर्लोके भुक्तिमुक्त्येकसाधनम् । प्रकाशितः शङ्करेण लोकानां हितमिच्छता ॥ १ ॥
भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसाः । दृष्ट्वावशाः पलायन्ते मन्त्रानुष्ठानतत्परान् ॥ २ ॥
चतुष्षष्टिं ह्यपस्मारान् षड्विंशतिमतिग्रहान् । शतं शिशुग्रहांस्तद्वत् त्रिषष्टिं ब्रह्मराक्षसान् ॥ ३ ॥
गन्धर्वान् द्वादश तथा भूतान्नानाविधान् ग्रहान् । सप्तधा राजयक्ष्माणं तथा चाष्टविधं ज्वरम् ॥ ४ ॥

चतुर्विंशद्विधं घोरमन्यान् दंशानसंख्यकान् । डाकिनीत्यादिकानन्यान् स्मरणादेव नाशयेत् ॥ ५ ॥
गुटिकां पादलेपं च रसं चैव रसायनम् । खड्गं सदञ्जनं चैव खेचरं पादुकादिकान् ॥ ६ ॥
विद्वेषणं मारणं च वश्यमाकर्षणं तथा । उच्चाटनं मोहनं च सप्तद्वीपाधिपत्यकम् ॥ ७ ॥
विद्याधराणां सर्वेषां चक्रवर्ती न संशयः । (प्रधानश्चाङ्गभूतोऽयं मन्त्रराजो ह्यनुत्तमः ॥ ८ ॥
पूर्वं नमःपदमुक्त्वा ततो भगवते-पदं । आञ्जनेय-पदं ङेन्तं महाबलपदं ततः ॥ ९ ॥
वह्निजायान्त एवायं मन्त्रो हनुमतः परः । सर्वसिद्धिकरः प्रोक्तो मन्त्रश्चाष्टादशाक्षरः ॥ १० ॥
मालाख्योऽपरमन्त्रोऽपि मारुतेः सर्वसिद्धिदः) । प्रणवं पूर्वमुच्चार्य नमो भगवते पदम् ॥ ११ ॥
ङेन्तं प्रस्फुटसंयुक्तं पराक्रमपदं वदेत् । तथाक्रान्तपदोपेतं दिङ्मण्डलमुदीरयेत् ॥ १२ ॥
यशोवितानधवलीकृतजगत्पद वदेत् । त्रितयाय-पदं वज्रदेहरुद्रावतारतः ॥ १३ ॥
सम्बुद्ध्यन्तं पदं लङ्कापुरीदहनमीरयेत् । उदधिलङ्घनं चापि दशग्रीवकृतान्तकम् ॥ १४ ॥
सीताश्वासनशब्दं च ह्यञ्जनागर्भसं-पदम् । भूतान्ते रामलक्ष्म स्यात्णानन्दकरमीरयेत् ॥ १५ ॥
कपिसैन्यप्रा-पदान्ते कारसुग्रीवसा-पदम् । धारणान्ते पर्व-पदं तोत्पाटन-पदं वदेत् ॥ १६ ॥
बालब्रह्म-पदं चारिणे गम्भीर-पदं वदेत् । शब्दसर्वग्रहं प्रोक्त्वा विनाशनमथोच्चरेत् ॥ १७ ॥
सर्वज्वरहरं डाकिनीविध्वंसनमीरयेत् । ततस्तारं समुच्चार्य महामायां त्रिरुच्चरेत् ॥ १८ ॥
एहि सर्वविषं पश्चाद् हर सर्वबलं पदम् । क्षोभयान्ते च मे सर्वकार्याणि साधयद्वयम् ॥ १९ ॥
वर्मास्त्राग्न्यङ्गानन्तोऽयं हनुमन्मन्त्र ईरितः । ऋषिरीश्वर एव स्यादनुष्टुप्छन्द उच्यते ॥ २० ॥
हनुमान् देवता प्रोक्तः सर्वाभीष्टफलप्रदः । नमो भगवते चाञ्जनेयायानेन हृन्मतम् ॥ २१ ॥
रुद्रमूर्तय इत्येवं शिरोमन्त्र उदाहृतः । ङेन्तो वायुसुतश्चायं शिखामन्त्र उदाहृतः ॥ २२ ॥
अग्निगर्भाय च ततः कवचाणुरयं मतः । (रामदूताय च पुनर्नेत्रमन्त्रः समीरितः ॥ २३ ॥
ब्रह्मास्त्रतो निवारान्ते णायेत्यस्त्रमनुर्मतः । एवं षडङ्गं च सुधीः कृत्वा ध्यायेदनन्यधीः) ॥ २४ ॥
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम् । कुण्डलद्वयसंशोभिमुखाम्भोजं स्मरेन्मुहुः ॥ २५ ॥
पूजां तु वैष्णवे पीठे शैवे वा विदधीत वै । आवृतानि विना नित्यं वरिष्ठश्चन्दनादिभिः ॥ २६ ॥
अयुतं च पुरश्चर्यां रामस्याग्रे शिवस्य वा । ....॥

"द्रव्यानुक्तौ घृतं होमे" इति कपिलवचनात् घृतेनैव दशांशो होमः । तर्पणमार्जनादि च ॥ नमो भगवते आञ्जनेयाय हृत् । रुद्रमूर्तये शिरः । वायुसुताय शिखा । अग्निगर्भाय कवचं । रामदूताय नेत्रं । ब्रह्मास्त्र-निवारणाय अस्त्रं । इति करषडङ्गन्यासः । तथा—

जितेन्द्रियस्तु नक्ताशी हनुमद्ध्यानतत्परः । क्षुद्ररोगनिवृत्त्यर्थमष्टोत्तरशतं सुधीः ॥ २७ ॥
जप्त्वा त्रिदिनमेकान्ते तेभ्यो मुच्येत तत्क्षणात् । क्षुद्रभूतप्रशान्त्यर्थं शतमष्टोत्तरं पुनः ॥ २८ ॥
दिनत्रयमथो जप्त्वा भूतानां मुच्यते भयात् । भूतप्रेतपिशाचादिशान्तयेऽष्टोत्तरं शतम् ॥ २९ ॥
जप्त्वैव तत्क्षणान्मुक्तो भवेदेव न संशयः । महारोगादिशान्त्यर्थमष्टोत्तरसहस्रकम् ॥ ३० ॥
जप्त्वा तस्मात् प्रमुच्येत निशीथे नियताशनः । जयाभिकाङ्क्षिणां राज्ञामस्मादन्यो न वर्तते ॥ ३१ ॥
ध्यायेत चाक्षहन्तारमयुतं नियताशनः । जपन्नियतमाश्वेव जयेद् दुर्जयमप्यरिम् ॥ ३२ ॥
सम्यक् च रामसुग्रीवसन्धातारं स्मरन् सुधीः । अयुतेन च विच्छिन्नं सन्धिमाप्नोत्यसंशयम् ॥ ३३ ॥
लङ्काया दाहकं ध्यायञ्जपेदयुतमञ्जसा । शत्रुराष्ट्रं दहेदेव दुग्धाब्धावपि संस्थितम् ॥ ३४ ॥
जयार्थं रिपुसङ्घानामस्मादन्यो न विद्यते । यस्तु गेहे हनूमन्तं सर्वदैव प्रपूजयेत् ॥ ३५ ॥

मन्दिरे मन्त्रिणस्तस्य भवेल्लक्ष्मीरचञ्चला । दीर्घमायुर्भवेदेव सर्वत्र विजयी भवेत् ॥ ३६ ॥

इति ॥ श्रीयन्त्रसारे--

मध्ये तारं स्वरयुगलसत्केसरे चाष्टपत्रे
मन्त्रस्यार्णान् जलनिधिमितान् अन्तरालिख्य कार्णैः ।
वीतं मालामनुवरवृतं भूपुरस्थं हनूम-
द्यन्त्रं चौरग्रहकृमिगदध्वंसि रक्षाकरं च ॥ १ ॥

इति । अस्यार्थः--अष्टदलपद्मं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य, तत्केसरेषु स्वरान् द्विश आलिख्य, दलेषु वक्ष्यमाणहनुमन्मन्त्राणाश्चितुरश्चतुरो विलिख्य, बहिर्वृत्तयोरन्तराले ककारादिक्षकारान्तवर्णैरावेष्टय, बहिः पुनर्वृत्तयोरन्तराले वीथ्यां वक्ष्यमाणहनुमन्मालामन्त्रेण संवेष्टच बहिश्चतुरस्रं कुर्यात् । एतद्यन्त्रमुक्तफलदं भवति । ॐ नमो भगवते पवनात्मजाय राघवप्राणसमाय लक्ष्मणप्राणदात्रे सीतादुःखविनाशनाय रावणदर्पघ्नाय सर्वदुष्टविनाशनाय रिपुचौरव्याघ्रवराहकृमिपतङ्गादिदुष्टसत्त्वविनाशनाय हुंफट् स्वाहा ॥ अयं दलेषु लेख्यो मन्त्रः ॥ अथ हनुमत्स्तुतिः--

नमो हनुमते तुभ्यं नमो मारुतसूनवे । नमः श्रीरामभक्ताय श्यामश्यामाय ते नमः ॥ १ ॥
नमो वानरबीजाय सुग्रीवसख्यकारिणे । लङ्काविदाहनार्थाय हेलासागरतारिणे ॥ २ ॥
सीताशोकविनाशाय राममुद्राधराय च । रावणादिकुलच्छेदकारिणे ते नमो नमः ॥ ३ ॥
मेघनादवरध्वंसकारिणे भयहारिणे । वायुपुत्राय वीराय आकाशोदरगामिने ॥ ४ ॥
वनपालशिरश्छेत्रे लङ्काप्रासादभञ्जिने । ज्वलत्कृशानुवर्णाय दीर्घलाङ्गूलधारिणे ॥ ५ ॥
सौमित्रिजयदात्रे च रामभक्ताय ते नमः । अक्षस्य वधकर्त्रे च ब्रह्मशक्तिनिवारिणे ॥ ६ ॥
संयुगे च महाशक्तिवातक्षेपविनाशिने । रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय नमो नमः ॥ ७ ॥
ऋक्षवानरवीरैकप्राणदात्रे नमो नमः । परसैन्यबलघ्नाय शस्त्रौघघ्नाय ते नमः ॥ ८ ॥
विषघ्नाय द्विष(द् घ्नाय वरघ्नाय नमो नमः । महारिपुभयघ्नाय भक्तत्राणैककारिणे ॥ ९ ॥
परप्रेरितमन्त्राणां यन्त्राणां स्तम्भकारिणे । पयःपाषाणतरणकारणाय नमो नमः ॥ १० ॥
बालार्कमण्डलग्रासकारिणे भयतारिणे । नखायुधाय भीमाय दशायुधधराय च ॥ ११ ॥
रिपुमानविनाशाय रामाज्ञालोकधारिणे । प्रतिग्रामस्थितायाथ रक्षोबलवधार्थिने ॥ १२ ॥
करालशैलशस्त्राय द्रुमशस्त्राय ते नमः । बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च ॥ १३ ॥
पिशङ्गाङ्गाय सर्वाय वज्रदेहाय ते नमः । कौपीनवाससे तुभ्यं रामभक्तिरताय च ॥ १४ ॥
दक्षिणाशाभास्कराय सतां चन्द्रोदयात्मने । कृत्याकृत्यविषघ्नाय सर्वक्लेशहराय च ॥ १५ ॥
स्वाम्याज्ञापार्थसंग्रामसख्ये सज्जयदायिने । भक्तानां दिव्यवादेषु संग्रामे जयदायिने ॥ १६ ॥
किल्किला-बुम्बुका-घोरघोरशब्दकराय च । सर्वोग्रव्याधिसंस्तम्भकारिणे वनचारिणे ॥ १७ ॥
सदा वनफलाहारसंतृप्ताय विशेषतः । महार्णवशिलाबद्धसेतुबन्धाय ते नमः ॥ १८ ॥
वादे विवादे संग्रामे भये घोरे महावने । सिंहव्याघ्रतस्करेषु पठन् स्तोत्रं भयं नहि ॥ १९ ॥
दिव्यभूतभये व्याधौ विषे स्थावरजङ्गमे । राजशत्रुभये चोग्रे तथा ग्रहभयेषु च ॥ २० ॥
जलसर्पमहावृष्टौ दुर्भिक्षे व्रणसंप्लवे । पठन् स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः ॥ २१ ॥
तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठनात् (तः) । एककालं त्रिकालं वा पठन्नित्यमिमं स्तवम् ॥२२॥
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा । विभीषणकृतं स्तोत्रं तार्क्ष्येण समुदीरितम् ॥ २३ ॥
ये पठिष्यन्ति भक्त्या वै सिद्धयस्तत्करे स्थिताः । .... ॥

इति हनुमत्स्तुतिः । अथ गोपालमन्त्रः । श्रीसारसंग्रहे—
श्रीगोपालमनुं वक्ष्ये सर्वसंपत्प्रदायकम् । ग्रहरोगविषारिघ्नं व्याधिदारिद्र्यनाशनम् ॥ १ ॥
पुत्रमित्रकलत्रादिभोगमोक्षफलप्रदम् । विद्याविभवदं नृणां विशिष्टकविताकरम् ॥ २ ॥
समस्तवनिताचित्तराजवश्यकरं परम् । पञ्चान्तकोऽधरान्तान्तो लोहितोऽथ त्रिमूर्तियुक् ॥ ३ ॥
चतुराननमेषौ च खड्गीशश्च ततः परम् । पिनाकीशद्वयं भूयो द्विरण्डेशश्च दीर्घवान् ॥ ४ ॥
वाली चन्द्रसुधादीर्घा नकुलीशश्च कान्तियुक् । मन्त्रो दशाक्षरः प्रोक्तो गोपालस्य महात्मनः ॥ ५ ॥
विष्णुपादाम्बुजद्वन्द्वभक्तिवृद्धिकरः परः । .... ॥

इति । पञ्चान्तको ग, अधरान्तं ओ, अन्ते यस्य स तेन गो । लोहितः पकारः त्रिमूर्ति ई, तेन पी । चतुराननो ज । मेषो न । खड्गीशो व । पिनाकीशद्वयं ल्ल । द्विरण्डेशो भ, दीर्घ आ, तेन भा । वाली य । चन्द्रः स, सुधा व, दीर्घ आ, तेन स्वा नकुलीशो ह, कान्तिः आ, तेन हा । तथा—

गोपायत्यखिलं लोकं गोपयेत्पुरुषं परम् । तेन गोपी समाख्याता प्रकृतिर्मूलकारणम् ॥ ६ ॥
यतोऽपि जायते विश्वं जनशब्देन गद्यते । आश्रयत्वेन वै गोपीजनयोः प्रेरणादयम् ॥ ७ ॥
वल्लभः प्रोच्यते तज्ज्ञैर्नित्यानन्दं महोऽद्भुतम् । स्वाहाशब्देन चात्मानं महसे प्रापयाम्यहम् ॥ ८ ॥
उत्पाद्योत्पादकाधीशो विष्णुर्वै परमात्मना । मन्त्रार्थो विष्णवे तत्त्वं साधकस्य भवेद् ध्रुवम् ॥ ९ ॥
विश्वरक्षणसामर्थ्यसंघातो वा निगद्यते । गोपीजनपदेनास्य स्वात्माभिन्नस्य वल्लभः ॥ १० ॥
प्रभुः प्रिय इति ख्यातं स्वाहार्थः पूर्ववद्भवेत् । गोपाङ्गनाप्रियायास्मै स्वात्मानं च स्वकीयकम् ॥ ११ ॥
जुहोमि सगुणे ब्रह्मणीत्थं मन्त्रनिरुक्तयः । नारदोऽस्य मुनिः प्रोक्तो विराट् छन्द उदीरितम् ॥ १२ ॥
देवता नन्दपुत्रोऽत्र कृष्णो दैत्यविघातकृत् । कलमायाशिरोभिस्तु बीजं मन्त्रस्य कीर्तितम् ॥ १३ ॥
शक्तिः स्वाहा समाख्याता मन्त्रवर्यस्य देशिकैः । धर्मार्थकाममोक्षाप्तौ विनियोगो भवेदिति ॥ १४ ॥
कृष्णः प्रकृतिरित्युक्तो दुर्गाधिष्ठातृदेवता । आचक्रेण विचक्रेण सुचक्रेण ततः परम् ॥ १५ ॥
त्रैलोक्यरक्षणाद्येन चक्रेण तदनन्तरम् । असुरान्तकचक्रेण चतुर्थ्यन्तैस्तु पञ्चभिः ॥ १६ ॥
स्वाहान्तैर्जातिसंयुक्तैः पञ्चाङ्गानि प्रकल्पयेत् । हृदये शीर्षके चैव शिखायां कवचे तथा ॥ १७ ॥
अस्त्रे पार्श्वद्वये कट्यां पृष्ठे मूर्धनि च क्रमात् । मन्त्रार्णान् विन्यसेन्मन्त्री बिन्द्वन्तान् नमसा युतान् ॥१८॥
करयोर्मध्यतः पृष्ठे तयोः पार्श्वे च मन्त्रवित् । प्रणवाद्यं तदन्तं च व्यापयेद्दशवर्णकम् ॥ १९ ॥

(दशवर्णकं समस्तमूलमन्त्रम्)

ध्रुवसम्पुटितैर्वर्णैर्दशभिश्च नमोयुतैः । दशांगुलिषु विन्यस्येत् त्रिपर्वव्याप्तितो बुधः ॥ २० ॥
दक्षिणांगुष्ठमारभ्य वामांगुष्ठावधि न्यसेत् । हस्तगा सृष्टिराख्याता युग्मांगुष्ठादिका स्थितिः ॥ २१ ॥
वामांगुष्ठादिको न्यासो दक्षांगुष्ठावधिर्भवेत् । संहारो मुनिभिः प्रोक्तः करन्यासत्रयं त्विदम् ॥ २२ ॥
करयुगे दशाङ्गं च पञ्चाङ्गं पूर्ववन्न्यसेत् । मन्त्रसम्पुटितैर्वर्णैर्मातृकाया न्यसेत्तत. ॥ २३ ॥
दशतत्त्वानि विन्यस्येन्मन्त्रवर्णैः सह क्रमात् । अनुलोमेन मन्त्रार्णान् संहारे योजयेद् बुधः ॥ २४ ॥
मन्त्रवर्णास्तथा सृष्टौ प्रतिलोमेन योजयेत् । उद्धारः पूर्ववज्ज्ञेयो न्यासं वच्मि तु साम्प्रतम् ॥ २५ ॥
पृथिवीजलतेजांसि वायुराकाशकं तथा । अहंकारो महत्तत्त्वं प्रकृतिः पुरुषः परः ॥ २६ ॥
नामानि दशतत्त्वानां स्थानेष्वेषु प्रविन्यसेत् । पादयुग्मे शिवे वक्षोमुखयोर्मस्तके न्यसेत् ॥ २७ ॥
तत्त्वयुग्मं ततो मध्ये सर्वाङ्गे तत्त्रयं न्यसेत् । तद्विपर्ययतो न्यासो गुप्तस्तत्त्वदशात्मकः ॥ २८ ॥
सर्वगोपालमन्त्रेषु विहितः शीघ्रसिद्धये । मस्तकादि तु पादान्तं कराभ्यां व्यापकं न्यसेत् ॥ २९ ॥
वेदादिपुटितं मन्त्रं त्रिवारं मन्त्रवित्तमः । मस्तके नयने कर्णनासिकाननहृत्सु च ॥ ३० ॥

तुन्दान्धुजानुपादेषु मन्त्रार्णान् विन्यसेत्क्रमात् । सृष्टिन्यासस्त्वयं प्रोक्तः स्थितिन्यासं समाचरेत् ॥ ३१ ॥
हृदयादिमुखान्तोऽसौ सृष्टेस्तु विपरीतकः । संहारः कथितो न्यास एवं न्यासत्रयं भवेत् ॥ ३२ ॥
मूलाधारे ध्वजे नाभौ हृदयेऽथ गले मुखे । अंसयोरूरुयुग्मे च न्यास एकः प्रकीर्तितः ॥ ३३ ॥
स्कन्धदेशे च नाभौ च कुक्षौ हृदि कुचे तथा । पार्श्वयुग्मे च पृष्ठे च श्रोणियुग्मे द्वितीयकः ॥ ३४ ॥
मस्तकाननयोरक्ष्णोः कर्णयोर्नासिकाद्वये । गण्डयोश्च तृतीयः स्याद्दक्षहस्तस्य सन्धिषु ॥ ३५ ॥
तदग्रांगुलिषु प्रोक्तश्चतुर्थो न्यास उत्तमः । इत्थं वामकरे दक्षवामयोः पादयोरपि ॥ ३६ ॥
न्यासत्रयं समाख्यातं मस्तके तदनन्तरम् । तत्पूर्वादिषु दिग्भागेषु सम्पूर्णे शिरस्यथ ॥ ३७ ॥
बाहुयुग्मे सक्थियुग्मेऽथाष्टमः परिकीर्तितः । मस्तके नयने चास्ये कण्ठे हृदि च तुन्दके ॥ ३८ ॥
मूलाधारे च लिङ्गे च जानुनि प्रपदे पुनः । नवमो न्यास आख्यातः कर्णयोर्गण्डयोस्तथा ॥ ३९ ॥
अंसयोः स्तनयोः पार्श्वयोः स्फिचोश्चोरुयुग्मके । जानुनोर्जङ्घयोरंघ्र्योर्दशमो न्यास ईरितः ॥ ४० ॥
एषु स्थानेषु मन्त्रार्णान् न्यसेन्मन्त्री मुहुर्मुहुः । विभूतिपञ्जरन्यासो दशावृत्तिमयो मनोः ॥ ४१
आयुरारोग्यधर्मार्थकीर्तिकान्त्यादिकारकः । नरनारीनरेन्द्राणां वश्यकर्मणि शस्यते ॥ ४२ ॥
भुक्तिदो मुक्तिदो भक्तिप्रदो विष्णोः पदाम्बुजे । कुर्यान्मन्त्री ततो न्यासं पूर्ववन्मूर्तिपञ्जरम् ॥ ४३ ॥
पुनः सृष्टिस्थितिन्यासं दशाङ्गन्यासमाचरेत् । पञ्चाङ्गन्यासं कृत्वा तु मुन्यादिन्यासमाचरेत् ॥ ४४ ॥
वक्ष्यमाणास्ततो मुद्रा दर्शयेद्भावतत्परः । एवं कृत्वा विधानेन मन्त्री मन्त्रकलेवरम् ॥ ४५ ॥
विश्वोत्पत्तिस्थितिध्वंसनिधानं त्वादिवर्जितम् । त्रय्यन्ते बोधितं नित्यं कृष्णं ध्यायेज्जगत्पतिम् ॥ ४६ ॥
पूर्वं वृन्दावनं रम्यं स्मरेन्मन्त्री सुसंयतः । नानाकुसुमसंशोभि पुष्पप्रचयशालिभिः ॥ ४७ ॥
नवीनपल्लवोद्रेकफलसम्पत्तिभिस्तथा । लसद्विशिष्टसच्छाखाशालीभिः सर्वतो वृतम् ॥ ४८ ॥
निर्गच्छन्मञ्जरीसंघलतासंहतिसेवितम् । (भ्रमरोत्तमसंघैश्च गुञ्जद्भिर्मुखरीकृतम्) ॥ ४९ ॥
मधुपैः कृतझङ्कारैः पक्षिभिश्च सुखावहम् । कीरव्रजगिरा व्याप्तं पारावतरुताकुलम् ॥ ५० ॥
कोकिलप्रमुखानां च सुनादैर्व्याप्तदिङ्मुखम् । नृत्यन्मयूरसंघातसेवितं च दिवानिशम् ॥ ५१ ॥
वायुभिर्विकचत्पद्ममध्यकिञ्जल्कसङ्गिभिः । पुष्पान्तरान्तरुद्भूतरजोभिश्च सुवासितैः ॥ ५२ ॥
आदित्यतनयायाश्च लहरीकणशीतलैः । मन्मथानलसन्दीप्तवल्लवीचीरकम्पनैः ॥ ५३ ॥
सर्वदाध्युषितं सम्यगस्मिन् कल्पतरुं स्मरेत् । नूतनान् पल्लवांस्तस्य वैद्रुमांस्तदनन्तरम् ॥ ५४ ॥
पत्रजालं मारकतं प्रसूनकलिका अपि । वज्रमुक्तादिकांश्चैव पद्मरागफलोज्ज्वलम् ॥ ५५ ॥
ऋतुभिः सेवितं सर्वैरेकदाभीष्टसिद्धिदम् । स्वर्णशाखाग्रसंयुक्तं महोच्छ्रायशिखान्वितम् ॥ ५६ ॥
दिव्यामृतौघवर्षेण स्रवन्तं विश्वमञ्जसा । उद्यत्प्रद्योतनप्रख्यामधोऽस्य वरमेदिनीम् ॥ ५७ ॥
ज्वलद्रत्नसमाबद्धां पुष्परेणुविभूषिताम् । षडूर्मिरहितां मन्त्री चिन्तयेदिष्टसिद्धये ॥ ५८ ॥
माणिक्यकुट्टिमं तत्र योगपीठं विचिन्तयेत् । पद्ममष्टदलं तत्र यथोक्तं रक्तवर्णकम् ॥ ५९ ॥
तस्य मध्ये सुखासीनं कृष्णं ध्यायेदनन्यधीः । उद्यदादित्यसङ्काशं प्रसन्नवदनं विभुम् ॥ ६० ॥
इन्द्रनीलमणिप्रख्यस्निग्धदीर्घशिरोरुहम् । मायूरेण सुपिच्छेन राजमानोत्तमाङ्गकम् ॥ ६१ ॥
भ्रमराक्रान्तकल्पद्रुपुष्पसंशोभिमस्तकम् । सम्फुल्लनूतनोत्पन्नकर्णपूरीकृतोत्पलम् ॥ ६२ ॥
कुटिलालकविभ्राजल्ललाटमृदुपट्टिकम् । गोरोचनासमासक्ततिलकं चोन्नतभ्रुवम् ॥ ६३ ॥
अकलङ्कशरद्राकाचन्द्रबिम्बाद्भुताननम् । कुशेशयदलाकारसुन्दरायतलोचनम् ॥ ६४ ॥
अनर्घमणिसन्दीप्तमकराकारकुण्डलम् । कपोलस्थललावण्यविजितस्वच्छदर्पणम् ॥ ६५ ॥
अगस्त्यकुसुमाकाराद्भुतोन्नतसुनासिकम् । जितविद्रुमसौन्दर्यपक्वबिम्बफलाधरम् ॥ ६६ ॥

दाडिमीबीजसंकाशदन्तपंक्तिविराजितम् । धवलीकृतदिक्चक्रमीषद्धास्यद्विजांशुना ॥ ६७ ॥
आरण्यपल्लवैः पुष्पैः कृतग्रैवेयसम्पदम् । अतिरम्यत्रिरेखाङ्ककम्बुसुन्दरकन्धरम् ॥ ६८ ॥
मधुलोलुपभृङ्गालीसङ्गतैश्च सुगन्धिभिः । अम्लानैः कल्पवृक्षस्य प्रसूनप्रचयैः शुभैः ॥ ६९ ॥
कृतदामलसत्स्कन्धं मुक्ताहारविभूषितम् । कौस्तुभप्रभया दीप्तविशालोन्नतवक्षसम् ॥ ७० ॥
श्रीवत्साङ्काङ्कितोरस्कमुन्नतस्कन्धशालिनम् । महापरिघसङ्काशजानुलम्बिमहाभुजम् ॥ ७१ ॥
वलित्रितयसंशोभिकिञ्चिद्वन्धुरितोदरम् । दक्षिणावर्तसंयुक्तनाभीपल्वलमण्डितम् ॥ ७१ ॥
षट्पदप्रमदापंक्तिशोभिरोमावलीभुवम् । अनेकरत्नसम्बद्धवलयाङ्गदमुद्रिकम् ॥ ७३ ॥
ग्रैवेयोदरिकाबन्धतुलाकोटिसुमण्डितम् । क्षुद्रघण्टिकया बद्धकटिदेशविभूषितम् ॥ ७४ ॥
दिव्योत्तमाङ्गलेपेन भूषिताशेषगात्रकम् । पीताम्बरधरं सम्यगूरुजानुमनोहरम् ॥ ७५ ॥
मयूरगलसङ्काशजङ्घायुगलमण्डितम् । लसत्प्रपदशोभाभिर्निरस्तकच्छपश्रियम् ॥ ७६ ॥
माणिक्यमुकुराकारनखराजिविराजितम् । सुष्ठुशोणांगुलीपत्रविकासिचरणाम्बुजम् ॥ ७७ ॥
चक्रशङ्खलसत्पद्मसीरांकुशगदादिभिः । कुलिशप्रमुखैश्चिह्नैरङ्किताऽरक्तपत्तलम् ॥ ७८ ॥
सौन्दर्यनिधिसंभाररचितं विलसच्छ्रिया । सम्यग्विजितकन्दर्पगात्रशोभामनोहरम् ॥ ७९ ॥
मुखाम्बुजसमासक्तवंशच्छिद्रार्पितांगुलिम् । तदुत्थदिव्यसद्रागश्रवणाहृतमानसम् ॥ ८० ॥
अपाङ्गैः प्राणिजातं तु मोहयन्तमनारतम् । परमानन्दसन्दोहसंपूर्णीकृतमानसम् ॥ ८१ ॥
मुखपद्मसमासक्तस्वान्तनेत्राभिरावृतम् । गोभिरूधोभराक्रान्तमन्दयानाभिरेव च ॥ ८२ ॥
कवलीकृतसंत्यक्तघासलेशाभिरप्यथ । भूमिस्पृष्टमहास्थूलवालधोभिर्निरन्तरम् ॥ ८३ ॥
प्रस्नुतस्तनपानेन संभृताननिर्गतैः । डिण्डीरपिण्डसंयुक्तैः दुग्धैर्दृष्टिमनोहरैः ॥ ८४ ॥
वंशवादनसद्गीतगीताकर्णनलालसैः । उत्तम्भितीकृतश्रोत्रपुटयुग्मैश्च तर्णकैः ॥ ८५ ॥
किंविषाणांकुरोद्भूतिजातकण्डूतिमस्तकैः । परस्परविमदार्थं खुरघृष्टमहीतलैः ॥ ८६ ॥
स्निग्धैर्गुरुभिरुत्पुच्छैः सुशोभिगलकम्बलैः । वत्सवत्सीसमूहैश्च संवृतं तदनन्तरम् ॥ ८७ ॥
कृतहुंभाशब्दजालैर्गुरुदीर्घककुद्वरैः । उच्चकर्णपुटापीतवेणुशब्दसुधारसैः ॥ ८८ ॥
कृतौद्धत्यैर्वृषैर्वीतं महाविवृतनासिकैः । विद्यास्वभाववर्णादिक्रीडानेपथ्यधारणैः ॥ ८९ ॥
समानतां गतैर्गोपैर्वयःसाम्ययुतैरपि । वंशवादनशीलैश्च रम्यरागकृतश्रमैः ॥ ९० ॥
वल्लकीकांस्यतालादिधृतसारसमस्वरैः । वलद्बाहुलताक्षेपं नृत्यद्भिर्भावगर्भितम् ॥ ९१ ॥
जङ्घिकाकटिदेशेषु किङ्किणीजालमण्डितैः । इतस्ततश्चलद्भिश्च मञ्जुभाषणतत्परैः ॥ ९२ ॥
मधुराकृतिभिर्बालैरस्पष्टाद्भुतभाषणैः । शार्दूलनखसंबल्ध्वगलाकल्पैर्वृतं तथा ॥ ९३ ॥
ततो गोपपुरन्ध्रीणां स्मरेद् वृन्दं समाहितः ।.... .... ॥

तद्वंशहृद्यस्वनधीररागनिःष्यन्दपीयूषरसावसेकात् ।
सञ्जातबोधाङ्गजभूरुहस्य श्रीकोरकाकारविशिष्टरूढैः ॥ ९४ ॥
रोमोद्गमैर्भूषितदेहकानां तन्मन्दहासामृतमानसानाम् ।
संपर्कतो वृद्धसुरागवाचां रागैस्तरङ्गैरिव रागवार्द्धेः ॥ ९५ ॥
प्रस्वेदजालैः समतां गतैस्तैः सम्भूषिताशेषशरीरकाणाम् ।
तद्भ्रूधनुःप्रेरिततीक्ष्णदृष्टि-पञ्चेषुपञ्चेषुसमूलवर्षैः ॥ ९६ ॥
संभिन्नबन्धाच्छिथिलीकृताङ्गसञ्जातकम्पाद्भुतवेदनानाम् ।
तद्गात्रलावण्यसुधारसौघपाने सतृष्णेक्षणपङ्कजानाम् ॥ ९७ ॥

सस्नेहसालस्यवलत्सुरम्यसाह्लादभावाद्भुतलोचनानाम् ।
भम्मिल्लशैथिल्यवशात् पतत्सु प्रफुल्लपुष्पेषु परागलुब्धैः ॥ ९८ ॥
धीरं सुगुञ्जद्भिरनेकभृङ्गैरासादितानां मधुराकृतीनाम् ।
मनोजवेगोन्मदमानसानां मदस्खलद्वाग्विभवाद्भुतानाम् ॥ ९९ ॥
शैथिल्यसंजातसुनीविकानां श्रोणीभरैर्दृष्टिपथं गतानाम् ।
मृदुस्खलितपादाब्जधीररम्यगतैरपि । मुखरीकृतदिक्कानां चरणामृतशब्दतः ॥ १०० ॥
निमीलन्नेत्रपद्मानां चलदोष्ठयुजां मुहुः । ओष्ठम्लानिं वहन्तीनां दीर्घनिःश्वासयोगतः ॥ १०१ ॥
अनेकप्राभृतासक्तहस्तपद्मयुजां तथा । पंक्तिभिर्वेष्टितं सम्यक् पूर्वतश्च ततो बहिः ॥ १०२ ॥
एतासां नेत्रपद्मानां मालाभिर्भूषिताङ्गकम् । महानन्दनिभं सर्वविलासभुवनं प्रभुम् ॥ १०३ ॥
वल्लवीवल्लवगवां देववृन्दं बहिः स्मरेत् । सम्मुखे देवदेवस्य काङ्क्षन्तं धनसञ्चयम् ॥ १०४ ॥
ब्रह्मेशाखण्डलश्रेष्ठं स्तुतिं कुर्वाणमादरात् । ऋषिसङ्घं तथा दक्षे वेदाध्ययनतत्परम् ॥ १०५ ॥
धर्मार्थिनः स्मरेत्पश्चात् सनकप्रमुखांस्तथा । योगीन्द्रान् ध्याननिष्ठांस्तान् निःश्रेयसफलार्थिनः ॥ १०६ ॥
सस्त्रीकान् वामभागे च यक्षगन्धर्वकिन्नरान् । सिद्धविद्याधरांश्चापि चारणान् साप्सरोगणान् ॥ १०७ ॥
गीतनर्तनवाद्यादीन् कुर्वतः कामतत्परान् । चन्द्रकर्पूरकुन्दाभं काशपुष्पनिभं मुनिम् ॥ १०८ ॥
मन्त्रतन्त्रप्रवक्तारं विद्युद्दामसदृग्जटम् । विष्णुपादाम्बुजद्वन्द्वे भक्तिमिच्छन्तमद्वयम् ॥ १०९ ॥
त्यक्तान्यसर्वसङ्गं तं वेदवेदार्थपारगम् । अनेकश्रुतिसंपन्नसप्तरागसमन्वितम् ॥ ११० ॥
ग्रामत्रयीसमासक्तमूर्च्छनाभिर्यथाविधि । सम्यग्जाताभिरारागाद् गायन्तं कृष्णवेणुकम् ॥ १११ ॥
आकाशे नारदं ध्यायेन्मुनिवर्यं गतस्मयम् । ध्यात्वैवं परमात्मानं नन्दपुत्रं विशालधीः ॥ ११२ ॥
यजेत् पूर्वोदिते पीठे वैष्णवे नवशक्तिके । पूर्वमर्घ्यादिभिर्मन्त्री मानसैरुपचारकैः ॥ ११३ ॥
सर्वैः पूज्यतमं कृष्णमिष्ट्वा भक्तिपरायणः । स्वीये देहमये पीठे भगवन्तं पुरोक्तवत् ॥ ११४ ॥
ततो बहिःस्थितैर्द्रव्यैः पूजयेत् साधकोत्तमः । तत्साधनविधिः सम्यक् प्रोच्यते मन्त्रसिद्धिदः ॥ ११५ ॥
मूलमन्त्रेण मन्त्रज्ञो मूर्तिमस्य प्रकल्पयेत् । तत्रावाह्य यजेद्देवं सर्वावरणसंयुतम् ॥ ११६ ॥
आसनादिविभूषान्तान् उपचारान् प्रकल्प्य तु । न्यासोक्तक्रमतः पश्चाद् गन्धाद्यैर्देवमर्चयेत् ॥ ११७ ॥
सृष्ट्या स्थित्या च संपूज्य पञ्चाङ्गं च दशाङ्गकम् । वेणुं प्रपूजयेत्पश्चाद् वनमालामनन्तरम् ॥ ११८ ॥
श्रीवत्सं कौस्तुभं मन्त्री देहे कृष्णस्य पूजयेत् । मूलेन चात्मपूजादावावृतीः पूजयेत्ततः ॥ ११९ ॥
कर्णिकायां चतुर्दिक्षु देवस्य परितोऽर्चयेत् । दामं सुदामनामानं वसुदामं च किङ्किणीम् ॥ १२० ॥

चकाराच्चतुर्थोऽपि दामशब्दान्तः । "वसुदामं समभ्यर्च्य किङ्किणीदाममर्चयेत्" इति त्रैलोक्यसंमोहनतन्त्रवचनात् ।

तेजोरूपधरा ह्येते केसरेष्वङ्गपूजनम् । रुक्मिणीप्रमुखा ह्यष्टौ पत्रेषु महिषीर्यजेत् ॥ १२१ ॥
कमलं चार्घ्यपात्रं च करयोर्दक्षिणान्ययोः । बिभ्रतीर्दिव्यशुक्लाभवस्त्रलेपादिभिर्युताः ॥ १२२ ॥
रुक्मिणीसत्यभामे द्वे नाग्निजित्यपरा मता । सुनन्दा मित्रविन्दा चापरा चापि सुलक्ष्मणा ॥ १२३ ॥
सुशीलान्या जाम्बवती स्वर्णमारकतप्रभाः । द्विश एवं क्रमाज्ज्ञेयाः सर्वा एता मनीषिभिः ॥ १२४ ॥
स्तनभारनता नानारत्नजालविभूषणाः । पत्राग्रेषु ततः पूज्या वसुदेवश्च देवकी ॥ १२५ ॥
नन्दगोपो यशोदा च बलभद्रः सुभद्रिका । गोपाला गोपिकाः कृष्णमुखासक्तहृदीक्षणाः ॥ १२६ ॥
स्वर्णाभो वसुदेवस्तु शुक्लो नन्दः प्रकीर्तितः ज्ञानमुद्रां धारयन्तौ दक्षे वामेऽभयं तथा ॥ १२७ ॥
दिव्यवस्त्रानुलेपादिपुष्पालङ्कारसंयुते । रक्तश्यामनिभे तद्वन्मातरौ दक्षिणे करे ॥ १२८ ॥

वरं वामे वहन्त्यौ तु पात्रे च पायसामृतम् । मुक्ताहारधरे रत्नकुण्डलादिविभूषिते ॥ १२९ ॥
बलभद्रस्तु कुन्दाभो मुसली हलसंयुतः । नीलाम्बरो मदोन्मत्तश्चञ्चलश्चैककुण्डलः ॥ १३० ॥
श्यामा तन्वी सुभद्राख्या चारुभूषणभूषिता । पीताम्बरा च युवती बिभ्राणा वरदाभये ॥ १३१ ॥
गोपाला वंशवीणादिदलशृङ्गलसत्कराः । नानोपायनहस्ताञ्जा गोपपत्न्यः सुभूषिताः ॥ १३२ ॥
तद्बहिः पञ्च सम्पूज्याः कल्पवृक्षा इमे बुधैः । मन्दारः प्रथमो ज्ञेयः सन्तानस्तदनन्तरम् ॥ १३३ ॥
पारिजाताह्वयः पश्चात् कल्पवृक्ष इतीरितः । हरिचन्दननामा तु मध्ये दिक्षु च संस्थिताः ॥ १३४ ॥
दीर्घनम्रबृहच्छाखाः साधकेष्टफलप्रदाः । (तद्बाह्ये लोकपालांस्तु वज्रादीन् पूजयेत्ततः ॥ १३५ ॥
आवृतीरित्थमभ्यर्च्य गन्धपुष्पे निवेद्य च । धूपदीपौ समर्प्याथ नैवेद्यं च निवेदयेत् ॥ १३६ ॥
पूर्वोक्तविधिना सम्यक् संस्कृतं भक्तितत्परः । शर्करादधिसंयुक्तं सघृतं गोपयो हविः ॥ १३७ ॥
नारिकेलगुडापूपनवनीतसितोपलम् । मोचाफलं सोपदंशं सक्षौद्रं रुचिरं शुचिः ॥ १३८ ॥
ततः संकल्प्य नैवेद्यं ग्रासमुद्रां प्रदर्श्य च । प्राणादिपञ्चवायूनां मुद्रा दक्षेण दर्शयेत् ॥ १३९ ॥
अंगुष्ठाभ्यामनामे द्वे स्पृष्ट्वा पाणितलद्वये । नैवेद्यस्य ततो मुद्रां दर्शयेन्मन्त्रमुच्चरन् ॥ १४० ॥
लाङ्गलीजलसद्यान्तशिरोभिः सहितो नतिः । परायेति समुच्चार्य ब्रह्मात्मपदमुच्चरेत् ॥ १४१ ॥
नेऽनिरुद्धं चतुर्थ्यन्तं निवेद्यं कलया—पदम् । निवेद्यदानमन्त्रोऽयं म्यन्तो विंशतिवर्णकः ॥ १४२ ॥

लाङ्गली ठकारः । जलं व । सद्यान्त औ । शिरो बिन्दुः, एतैः ठ्वौं इति । नतिर्नमः । पराय स्वरूपं । ब्रह्मात्म स्वरूपं । नेऽनिरुद्धं चतुर्थ्यन्तं तेन नेऽनिरुद्धाय । निवेद्य स्वरूपं । कलया स्वरूपं । म्यन्तो मि— इत्यक्षरान्तस्तेन कल्पयामि । तथा—

समर्प्यैवं निवेद्यं हि कुर्यादन्यत्पुरोक्तवत् । ततश्चन्दनपङ्केन स्वीयदेहं विभूषयेत् ॥ १४३ ॥
मूलमन्त्रेण मन्त्रज्ञो मूर्तिपञ्जरमन्त्रकैः । ललाटादिषु कुर्वीत तिलकानि ह्यनामया ॥ १४४ ॥
कुर्यात् पुष्पाञ्जलीन् पञ्च तुलसीपुष्पतो बुधः । मूलमन्त्रं समुच्चार्य पादपद्मद्वये विभोः ॥ १४५ ॥
करवीरद्वयेनाथ मध्यदेहे प्रकल्पयेत् । अम्भोजयुग्मतः पश्चादुत्तमाङ्गे निवेदयेत् ॥ १४६ ॥
एभिः सर्वैः सर्वगात्रे तावतः कुसुमाञ्जलीन् । देवस्य दक्षिणे दद्याच्छुक्लपुष्पाणि मन्त्रवित् ॥ १४७ ॥
रक्तपुष्पाणि वामे तच्छ्वेतरक्तपटीरकैः । सप्तावरणसंयुक्तमित्थं कृष्णस्य पूजनम् ॥ १४८ ॥
सर्वसंपत्करं पुंसां भोगमोक्षफलप्रदम् । अङ्गैरिन्द्रादिभिर्वज्रप्रमुखैरावृतित्रयम् ॥ १४९ ॥
पूजयेदथवा ह्येवं संक्षेपात् साधकोत्तमः । एवं गन्धादिभिः सम्यक् पूजयित्वा विधानवित् ॥ १५० ॥
अष्टौ कृष्णान्यजेत् पश्चात्सुगन्धिकुसुमादिभिः । कृष्णश्च वासुदेवश्च नारायण इतीरितः ॥ १५१ ॥
देवकीनन्दनश्चाथ यदुश्रेष्ठस्ततः परम् । वार्ष्णेयश्चासुरक्रान्तभारहारी ततो भवेत् ॥ १५२ ॥
धर्मसंस्थापकस्त्वन्यो ङेनमोन्ता ध्रुवादिकाः । एतैरेव विधातव्या कृष्णार्चाप्यथवा बुधैः ॥ १५३ ॥
भवाब्धेः पारमिच्छद्भिः सर्वसंपत्तिसिद्धये । मूलमन्त्रं यथाशक्ति जपित्वा तं जपं बुधः ॥ १५४ ॥
समर्पयेदर्घ्यजलैर्गन्धपुष्पाक्षतान्वितैः । ततो नानाविधैः स्तोत्रैः स्तुत्वा देवं विशालधीः ॥ १५५ ॥
प्रणम्यान्तर्हृदम्भोजमुद्वास्य प्रजपेत्ततः । .... ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रं कृत्वा, शिरसि नारदाय ऋषये नमः । मुखे विराट्छन्दसे नमः । हृदये श्रीकृष्णाय देवतायै नमः । (गुह्ये क्लींबीजाय० । पादयोः स्वाहाशक्तये० । सर्वाङ्गे कृष्णाय प्रकृतये नमः । हृदि श्रीदुर्गायै अधिष्ठात्र्यै देवतायै नमः) । इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, मूलमन्त्रेण करयोर्व्यापकं कृत्वा, आचक्राय स्वाहा हृदयाय नमः । विचक्राय स्वाहा शिरसे स्वाहा । सुचक्राय स्वाहा शिखायै वषट् । त्रैलोक्यरक्षणचक्राय

स्वाहा कवचाय हुं। असुरान्तकचक्राय स्वाहा अस्त्राय फट्। इति पञ्चाङ्गमन्त्रानंगुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य, हृदयादिकवचान्तं देहे चाङ्गचतुष्टयं विन्यस्यास्त्रमन्त्रेण तालत्रयं दशदिग्बन्धनं च कृत्वा, हृदि गोंनमः। शिरसि पींनमः। शिखायां जंनमः। कवचस्थाने नंनमः। अस्त्रस्थाने वंनमः। दक्षपार्श्वे ल्लंनमः। वामे भांनमः। कट्यां यंनमः। पृष्ठे स्वांनमः। मूर्ध्नि हांनमः॥ ततो गोपीजनवल्लभाय स्वाहा इति करतलयोः पृष्ठयोः करपार्श्वयोश्च प्रत्येकं मन्त्रमुच्चरन् व्यापकं कृत्वा, वामांगुष्ठे ॐगोंॐ नमः। तर्जन्यां ॐपींॐनमः। मध्यमायां ॐजंॐ०। अनामायां ॐनंॐ०। कनिष्ठिकायां ॐवंॐ०। दक्षकनिष्ठकायां ॐल्लंॐ०। अनामायां ॐभांॐ०। मध्यमायां ॐयंॐ०। तर्जन्यां ॐस्वांॐ०। अंगुष्ठे ॐहांॐ०॥ इति संहारेण प्रथमं विन्यस्य, पुनर्दक्षांगुष्ठादिवामांगुष्ठपर्यन्तं दशवर्णानुक्तप्रकारेण सृष्ट्या विन्यस्य, अंगुष्ठद्वय-मारभ्य दक्षवामक्रमेण कनिष्ठाद्वयपर्यन्तं स्थित्या, वामांगुष्ठमारभ्य दक्षांगुष्ठान्तं संहृत्या सबिन्दुविसर्गान् विन्यस्य, करांगुलिषु(ष्ठादि)दशाङ्गं पञ्चाङ्गं च प्राग्वद्विन्यस्य मूलमुच्चार्य, अं पुनर्वैपरीत्येन मूलं नमः। मूलं० पुनः आं विपरीतं मूलं नमः। इत्यादियुक्त्या मातृकां विन्यस्य, (१) पादयोः गोंनमः पराय पृथिवी-तत्त्वात्मने नमः। लिङ्गे पींनमः पराय अप्तत्त्वात्मने नमः। वक्षसि जंनमः पराय तेजस्तत्त्वात्मने नमः। मुखे नंनमः पराय वायुतत्त्वात्मने नमः। शिरसि वंनमः परायाकाशतत्त्वात्मने नमः। हृदि ल्लंनमः परायाहङ्कार-तत्त्वात्मने नमः। भांनमः पराय महत्तत्त्वात्मने नमः। सर्वाङ्गे यंनमः पराय प्रकृतितत्त्वात्मने नमः। स्वांनमः पराय पुरुषतत्त्वात्मने नमः। हांनमः पराय परतत्त्वात्मने नमः॥ (२) सर्वाङ्गे हांनमः पराय परतत्त्वात्मने नमः। स्वांनमः पराय पुरुषतत्त्वात्मने नमः। यंनमः पराय प्रकृतितत्त्वात्मने नमः। हृदि भांनमः पराय महत्तत्त्वात्मने नमः। ल्लंनमः परायाहङ्कारतत्त्वात्मने नमः। शिरसि वंनमः परायाकाशतत्त्वात्मने नमः। मुखे नंनमः पराय वायुतत्त्वात्मने नमः। वक्षसि जंनमः पराय तेजस्तत्त्वात्मने नमः। लिङ्गे पींनमः पराय जलतत्त्वात्मने नमः। पादयोः गोंनमः पराय पृथिवीतत्त्वात्मने नमः। इति तत्त्वानि विन्यस्य, ततः प्रणव-पुटितमूलेन मस्तकादिपादान्तं त्रिर्व्यापकं विन्यस्य, (३) पादयोः गोंनमः। जानुनोः पींनमः। लिङ्गे जंनमः। जठरे नंनमः। हृदि वंनमः। मुखे ल्लंनमः। नासायां भांनमः। कर्णयोः यंनमः। नेत्रयोः स्वांनमः। शिरसि हांनमः॥ (४) शिरसि गों०। नेत्रयोः पीं०। कर्णयोः जं०। नासायां नं०। मुखे वं०। हृदि ल्लं०। जठरे भां०। लिङ्गे यं०। जानुनोः स्वां०। पादयोः हांनमः॥ (५) हृदि गोंनमः। उदरे पीं०। लिङ्गे जं०। जानुनोः नं०। पादयोः वं०। शिरसि ल्लं०। नेत्रयोः भां०। कर्णयोः यं०। नासायां स्वां०। मुखे हां०॥ (१) मूलाधारे गोंनमः। लिङ्गे पीं०। नाभौ जं०। हृदि नं०। गले वं०। मुखे ल्लं०। दक्षांसे भां०। वामे यं०। दक्षोरौ स्वां०। वामोरौ हां०॥ (२) स्कन्धयोः गोंनमः। नाभौ पीं०। कुक्षौ जं०। हृदि नं०। कुचद्वये वं०। दक्षपार्श्वे ल्लं०। वामपार्श्वे भां०। पृष्ठे यं०। दक्षश्रोण्यां स्वां०। वामे हांनमः॥ (३) मस्तके गोंनमः। मुखे पीं०। दक्षनेत्रे जं०। वामे नं। दक्षकर्णे वं०। वामे ल्लं०। दक्षनसि भां०। वामे यं०। दक्षगण्डे स्वां०। वामे हांनमः॥ (४) दक्षदोर्मूले गोंनमः। तन्मध्ये पीं०। मणिबन्धे जं०। अंगुलिमूले नं०। अग्रे वं०। अंगुष्ठे ल्लं०। तर्जन्यां भां०। मध्यमायां यं०। अनामायां स्वां०। कनिष्ठायां हांनमः॥ (५) एवं वामबाहुमूले इत्यादि॥ (६) दक्षोरुमूले गोंनमः। जानुनि पीं०। गुल्फे जं०। अंगुलिमूले नं०। तदग्रे वं०। अंगुष्ठे ल्लं०। तर्जन्यां भां०। मध्यमायां यं०। अनामायां स्वां०। कनिष्ठायां हांनमः॥ (७) एवं वामोरुमूले इत्यादि॥ (८) शिरसि गोंनमः। तत्पूर्वभागे पीं०। तद्दक्षे जं०। तत्पृष्ठे नं०। तद्वामे वं०। सर्वशिरसि ल्लं०। दक्षबाहौ भां०। वामे यं०। दक्षसक्थनि स्वां०। वामे हांनमः॥ (९) मस्तके गोंनमः। नयने पीं०। मुखे जं०। कण्ठे नं०। हृदि वं०। उदरे ल्लं०। मूलाधारे भां०। लिङ्गे यं०। जानुनोः स्वां०। प्रपदयोः हांनमः॥ (१०) कर्णयोः गोंनमः। गण्डयोः पीं०। अंसयोः जं०। स्तनयोः नं०। पार्श्वयोः वं०। स्फिचोः

लं० । ऊर्वोः भां० । जानुनोः यं० । जङ्घयोः स्वां० । पादयोः हांनमः ॥ ततः पूर्वोक्तं मूर्तिपञ्जरन्यासं कृत्वा पुनः सृष्टिस्थितिन्यासौ दशाङ्गपञ्चाङ्गन्यासौ ऋष्यादिन्यासं च कृत्वा मुद्राविरचनादि (पाद्यादिपात्रस्थापनान्ते स्वात्मानं गन्धाद्यैरलंकृत्य मूर्तिपञ्जरन्यासक्रमेण ललाटादिद्वादशस्थानेष्वनामया तिलकानि कृत्वा शेषं पूर्ववत् विधाय पीठपूजादि) पुष्पोपचारान्ते देवस्य देहे न्यासोक्तस्थानेषु सृष्टिस्थितिन्यासक्रमेण दशाङ्गानि पञ्चाङ्गानि च सम्पूज्य, मुखे वेणवे नमः । स्कन्धयोः वनमालायै नमः । वक्षसि श्रीवत्साय नमः । गले कौस्तुभाय नमः । ततो विभूतिपञ्जरन्यासक्रमेण देवस्य देहे सम्पूज्य, कर्णिकायां देवादिप्रादक्षिण्येन ॐदामाय नमः । ॐसुदामाय० । ॐवसुदामाय० । ॐकिङ्किणीदामाय० । केसरेषु पञ्चाङ्गानि सम्पूज्य, अष्टदलेषु देवाग्रादि रुक्मिण्यै नमः । सत्यभामायै० । नाग्नजित्यै० । सुनन्दायै० । मित्रविन्दायै० । सुलक्ष्मणायै० । सुशीलायै० । जाम्बवत्यै० । दलाग्रेषु—वसुदेवाय नमः । देवक्यै० । नन्दगोपाय० । यशोदायै० । बलभद्राय० । सुभद्रायै० । गोपालेभ्यो:० । गोपिकाभ्यो नमः । पद्ममध्ये—मन्दाराय नमः । पद्माद्बहिर्देवाग्रे—सन्तानाय नमः । पारिजाताय० । कल्पवृक्षाय० । हरिचन्दनाय नमः । इति प्रादक्षिण्येन देवाग्रादितः चतुर्दिक्षु सम्पूज्य, लोकपालान् वज्रादीनि च समभ्यर्च्य, धूपदीपौ समर्प्य (देवस्य पुरतः प्राग्वन्नैवेद्यं निधाय संस्कृत्य पाद्याचमनीये दत्त्वा, देवं गन्धादिभिः सम्पूज्यापोशानं दत्त्वा ग्रासमुद्रां प्रदर्श्य) प्राणादिपञ्चमुद्रास्तत्तन्मन्त्रेण प्रदर्श्य, करद्वयेन नैवेद्यमुद्रां बद्ध्वा "ॐनमः पराय ब्रह्मात्मनेऽनिरुद्धाय निवेद्यं कल्पयामि"इति नैवेद्यं समर्प्य, तत्कालं ध्यानादिप्रसन्नार्यान्ते मूलमुच्चर्य "श्रीकृष्णाय नमः"इति देवस्य चरणयोः शुक्लकृष्णैस्तुलसीदलैः पञ्चधा सम्पूज्य, देवस्य हृदये पञ्चधा श्वेतरक्तकरवीरपुष्पैः, देवस्य शिरसि पञ्चधा सितरक्तपद्मैर्देवस्य सर्वगात्रे श्वेतकृष्णतुलसीभिः श्वेतरक्तकमलैः श्वेतरक्तकरवीरैरन्यैश्च पञ्च पुष्पाञ्जलीन दत्त्वापुनर्मूलमुच्चार्य श्रीकृष्णाय नमः । एवं श्रीवासुदेवाय० । श्रीनारायणाय० । श्रीदेवकीनन्दनाय० । श्रीयदुश्रेष्ठाय० । श्रीवार्ष्णेयाय० । श्रीअसुराक्रान्तभूभारहारिणे० । श्रीधर्मसंस्थापकाय नमः । इत्यष्टौ कृष्णान् सम्पूज्य राजोपचारादि सर्वं प्राग्वत् कुर्यादिति । तथा——

ध्यात्वैवं परमात्मानं नन्दपुत्रं विशालधीः । पूर्वोक्तविधिना सम्यग्दीक्षितः प्रजपेन्मनुम् ॥ १५६ ॥
मन्त्रार्थं चिन्तयेन्मन्त्री नियमस्थो जितेन्द्रियः । चत्वारिंशत्सहस्राणि श्वेतपद्माक्षमालया ॥ १५७ ॥
पश्चान्मन्त्रस्य सिद्ध्यर्थं दशलक्षं जपेत्सुधीः । लक्षं हुनेद्रक्तपुष्पैः सितासर्पिर्मधुप्लुतैः ॥ १५८ ॥
शर्करामधुयुक्तेन हविर्द्रव्येण वा हुनेत् । तर्पयेत् सलिलैः शुद्धैश्चन्द्रचन्दनवासितैः ॥ १५९ ॥
आत्माभिषेकं कृत्वाथ भूदेवान् भोजयेत्ततः । नानाविधैर्भक्ष्यभोज्यैस्ताम्बूलैश्च सुदक्षिणैः ॥ १६० ॥
ततो निजगुरुं सम्यक् प्रणिपत्य यथाविधि । धनधान्याम्बराद्यैश्च वित्तशाठ्यविवर्जितः ॥ १६१ ॥
तोषयेत् परया भक्त्या निजकार्यस्य सिद्धये । ततः सिद्धमनुर्मन्त्री प्रयोगान् निजवाञ्छितान् ॥ १६२ ॥
कुर्याद्भक्तियुतः सम्यक् नित्यनैमित्तिके रत । .... ॥

इति । प्रयोगस्त्वग्रे वक्ष्यते ॥ अथ श्रीकृष्णमन्त्रः । सारसंग्रहे—

अथो वदामि कृष्णस्य मन्त्ररत्नं सुगोपितम् । त्रैलोक्यख्यातसामर्थ्यं नारदाद्यैरुपासितम् ॥ १ ॥
धर्मार्थकाममोक्षार्थकरं वश्यादिसाधनम् । अज्ञानेन्धनकालाग्नि योगैश्वर्यफलप्रदम् ॥ २ ॥
अकालमृत्युसंहारि दुरदृष्टनिवारणम् । गलग्रहमहारोगभूतराक्षसनाशनम् ॥ ३ ॥
संग्रामे जयदं नृणामरण्ये चाभयप्रदम् । भृत्यदासीगजाश्वादिरथधेनुधनावहम् ॥ ४ ॥
क्षेत्रपुत्रकलत्रादितेजःकान्तियशस्करम् । धैर्यगाम्भीर्यशौर्यादिमर्यादाप्रतिभाकरम् ॥ ५ ॥
ब्रह्माण्डक्षोभजनकं सिद्ध्यष्टकसमृद्धिदम् । किमत्र बहुनोक्तेन सर्वदं नात्र संशयः ॥ ६ ॥

चक्री पुरन्दरारूढस्त्रिमूर्तीन्दुसमन्वितः । बीजमाद्यं भवेदेत्त क्रोधीशास्त्रिविक्रमः ॥ ७ ॥
श्वेतो नरकजित् कान्तिर्वायुः शार्ङ्गी तु सद्ययुक् । अमृताक्षीन्दवः पश्चादत्रिर्दीर्घयुतस्ततः ॥ ८ ॥
वायुर्दशाक्षरश्चाष्टादशार्णोऽयं मनूत्तमः । सत्ताभिधायकः शब्दः कृषीति समुदाहृतः ॥ ९ ॥
आनन्दार्थो णकारोऽपि कृष्णस्तस्मात्तदर्थकः । कर्षणात् पापजातस्य भक्तानां कृष्ण उच्यते ॥ १० ॥
मन्त्रात्मकशरीरस्य तद्वर्णत्वाच्च देशिकैः । गोशब्दवाचकत्वात्तु ज्ञानं तत्तेन लभ्यते ॥ ११ ॥
वेत्ति शब्दमशेषं वा गोविन्दो गोविचारणात् । दशार्णं एवं तुर्यार्णस्तदर्थश्चापि पूर्ववत् ॥ १२ ॥

इति । चक्री ककारः, पुरन्दरो लकारः, त्रिमूर्तिरीकारः, इन्दुः बिन्दुः, तैः क्लीं इति कामबीजमुद्धृतम् । क्रोधीशः ककारः । त्रिविक्रमः ऋकारः । तेन कृ । श्वेतः ष, नकरजित् णकारः । कान्तिराकारस्तेन ष्णा । वायुः यकारः । शार्ङ्गी गकारः । सद्यः ओकारः । तेन गो इति । अमृतं वकारः, अक्षि इकारः, इन्दुः बिन्दुस्तेन विं । अत्रिर्दकारः, दीर्घा आकारः, तेन दा । वायुर्यकारः । दशाक्षरः पूर्वोक्तगोपालदशाक्षरः ।

नारदो मुनिराख्यातो गायत्रं छन्द ईरितम् । श्रीकृष्णो देवता प्रोक्तो बीजशक्त्यादि पूर्ववत् ॥ १३ ॥
अन्तःकरणवेदाब्धिचतुर्भिर्युगलेन च । मूलमन्त्रविभक्तार्णैः पञ्चाङ्गानि प्रकल्पयेत् ॥ १४ ॥

इति । सनत्कुमारकल्पे तु—"मन्त्रस्यास्य ऋषिर्ब्रह्मा गायत्रं छन्द उच्यते । गोपवेशधरो विष्णुर्देवता परिकीर्तितः ॥ १ ॥ वर्णेनैकेन हृदयं त्रिभिर्वर्णैः शिरो मतम् । चतुर्भिश्च शिखा प्रोक्ता तावद्भिः कवचं मतम् ॥ २ ॥ नेत्रं तथा चतुर्वर्णैर्द्वाभ्यामस्त्रं तथा मुने" इत्युक्तम् । अत्र यथागुरूपदेशं शरणमिति ।

पञ्चाङ्गानि न्यसेत् पश्चादंगुलीषु करद्वये । मूलमन्त्रेण सर्वाङ्गे त्रिवारं व्यापकं न्यसेत् ॥ १५ ॥
ध्रुवं व्यापय्य चान्ते तु मन्त्रार्णन्यासमाचरेत् । के ललाटे भ्रुवोर्मध्ये कर्णयोर्नेत्रयोर्नसोः ॥ १६ ॥
मुखे ग्रीवाहृदोर्नाभौ कट्यौर्लिङ्गे ततः परम् । जानुयुग्मे पदद्वन्द्वे न्यसेदेकैकमक्षरम् ॥ १७ ॥
वेदादि मस्तके न्यस्य पदान् पञ्च प्रविन्यसेत् । शिरोवदनहृद्गुह्यपादेषु मनुवित्तमः ॥ १८ ॥
पञ्चाङ्गानि पुनर्न्यस्य मुन्यादिन्यासमाचरेत् । न्यासान्तरादिकं सर्वं दशवर्णोक्तवद्भवेत् ॥ १९ ॥
ध्यानं चोक्तप्रकारेण पूजनं च तथा भवेत् । ....॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि नारदाय ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये श्रीकृष्णाय देवतायै नमः । इति विन्यस्य, बीजशक्त्यादिन्यासं पूर्ववत् कुर्यादिति । क्लींकृष्णाय हृदयाय नमः । गोविन्दाय शिरसे० । गोपीजन शिखायै० । वल्लभाय कवचाय० । स्वाहा अस्त्राय० । इति पञ्चाङ्गमन्त्रान् प्राग्वद्विन्यस्य, मूलमन्त्रेण प्राग्वद् व्यापकं त्रिः कृत्वा सकृत् प्रणवेन व्यापकं विन्यस्य, शिरसि क्लींनमः । ललाटे कृं० । भ्रूमध्ये ष्णां० । दक्षकर्णे यं० । वामे गों० । दक्षनेत्रे विं० । वामे दां० । दक्षनसि यं० । वामे गों० । मुखे पीं० । ग्रीवायां जं० । हृदि नं० । नाभौ वं० । दक्षकटौ ल्लं० । वामे भां० । लिङ्गे यं० । जानुगोः स्वां० । पादयोः हांनमः ॥ शिरसि ॐनमः इति प्रणवं च विन्यस्य, शिरसि क्लींनमः । मुखे कृष्णाय० । हृदि गोविन्दाय० । गुह्ये गोपीजनवल्लभाय० । पादयोः स्वाहा० । इति विन्यस्य पञ्चाङ्गन्यासं कृत्वा, दशाक्षरोक्तान्, न्यासांश्च विधाय ध्यानादिसर्वं दशाक्षरोक्तवत् कुर्यादिति । तथा—

अयुतद्वयसंख्यातमधिकारार्थमादरात् । पञ्चलक्षं जपेत्पश्चाद् दशांशं पूर्ववद्धुनेत् ॥ २० ॥
तर्पणादि ततः सर्वं पूर्वोक्तविधिना चरेत् । अथ साधितमन्त्रस्य साधकस्य फलाप्तये ॥ २१ ॥
त्रिकालार्चाविधिं वक्ष्ये गोविन्दस्य जगत्पतेः । उक्ते वृन्दावने रम्ये स्वर्णभूमौ तु मण्डपम् ॥ २२ ॥
रम्यं रत्नमयं दिव्यं स्मरेत् कल्पतरोरधः । नानारत्नस्थले मध्ये रत्नसिंहासने शुभे ॥ २३ ॥
यथोक्तपद्ममध्यस्थं वासुदेवं विचिन्तयेत् । इन्द्रनीलनिभं कान्तं शिशुं सुमधुराकृतिम् ॥ २४ ॥

स्निग्धवक्त्रललाटान्तलोलमूर्धजसंचयम् । भृङ्गसंघसमासक्तपद्मसुन्दरसन्मुखम् ॥ २५ ॥
इन्दीवरदलाकारशोभिनेत्रद्वयान्वितम् । चलत्कुण्डलसंशोभिपृथुगण्डसुमण्डितम् ॥ २६ ॥
रक्ताधरं सुनासं च हसन्तं हृष्टमानसम् । नानारत्नगणाकीर्णकण्ठाभरणभूषितम् ॥ २७ ॥
गोधूलिधूसरोरस्कं शार्दूलनखधारिणम् । विशिष्टपुष्टसद्देहं स्वर्णनेपथ्यदीपितम् ॥ २८ ॥
कटिदेशलसज्जङ्घाबन्धमनोरमम् । रत्नकाञ्चनसंछिन्नकिङ्किणीजालमालया ॥ २९ ॥
तिरस्कुर्वन्तमत्यर्थं बन्धूकप्रसवश्रियम् । अत्यन्तारुणसच्छाखहस्तपादाब्जशोभया ॥ ३० ॥
पयः सान्द्रद्रुतं पिण्डं नवनीतं नवं शुभम् । दक्षिणेतरयोः पाण्योर्वहन्तं स्वादु सस्पृहम् ॥ ३१ ॥
पृथिव्युद्वेगकर्तॄणां दैत्यानां दुष्टचेतसाम् । पूतनाशकटादीनां विनाशाय कृतोद्यमम् ॥ ३२ ॥
गोपीगोपालधेनूनां समूहेनावृतं सदा । आखण्डलमुखैर्देवैः सेवितः कामतत्परैः ॥ ३३ ॥
प्रातरेवंविधं कृष्णं ध्यात्वा सुस्थिरमानसः । प्रागुक्त एव पीठे तु हरिं सम्पूजयेत्प्रभुम् ॥ ३४ ॥
अङ्गावरणमाद्यं स्याद् द्वितीयं लोकपालकैः । वज्रादिभिस्तृतीयं च पूजयित्वा प्रसन्नधी ॥ ३५ ॥
पक्वरम्भाफलं खण्डं नवनीतं हविर्दधि । मेलयित्वा तु नैवेद्यं निवेद्य प्रीणयेत् विभुम् ॥ ३६ ॥
उषस्येवं विधानेन श्रद्धाभक्तिसमन्वितः । श्रीकृष्णं पूजयेद् यस्तु पूजोपकरणैः शुभैः ॥ ३७ ॥
ऐहिकीं सर्वसम्पत्तिं प्रागेव प्राप्नुयात्तु सः । देहान्ते विष्णुसायुज्यं प्रयाति नियतं कृती ॥ ३८ ॥
प्रगे प्रत्यहमेवं हि पूजयित्वा नरो हरिम् । गव्यं दधि निवेद्यास्मै गुडयुक्तमथापि वा ॥ ३९ ॥
तद्बुध्या शुद्धनीरेण तर्पयेत्तु मुखे हरेः । अष्टोत्तरसहस्रं तु मूलमन्त्रं जपेत्ततः ॥ ४० ॥

तद्बुध्या गोदधिबुद्ध्या—

मध्यन्दिने यजेच्चातिसुन्दराकृतिमद्भुतम् । देवर्षिदेवसिद्धौघैः सेवितं खेचरैस्तथा ॥ ४१ ॥
गवां गोपालगोपीनां समूहैः परितो वृतम् । नीलाम्बुवाहसत्कान्तिविशिष्टाङ्गश्रियं विभुम् ॥ ४२ ॥
नीलकण्ठस्य सत्पिच्छैः केशभारैः सुमण्डितम् । उद्गतभ्रूलतं देवं पद्मपत्रनिभेक्षणम् ॥ ४३ ॥
पूर्णचन्द्रलसद्वक्त्रं रत्नकुण्डलमण्डितम् । गण्डमण्डलसंशोभिसुघोणं सस्मिताननम् ॥ ४४ ॥
पीतवस्त्रधरं चारुमुक्ताहारविभूषितम् । काञ्चीकटककेयूरमुद्रिकानूपुरादिभिः ॥ ४५ ॥
अलंकृतशरीरं तमङ्गरागपिशाङ्गतम् । मुक्तामाणिक्यसञ्छन्नवनमालाद्भुतांसकम् ॥ ४६ ॥
कामबाणप्रविद्धाङ्गं वेणुवादनतत्परम् । हस्ते च बिभ्रतं वेणुं वामे शङ्खं सुवेत्रकम् ॥ ४७ ॥
अभिरामतरं वक्षोरत्नश्रेष्ठमभीष्टदम् । ध्यात्वैवं विधिना देवं पूजयेदिष्टसिद्धये ॥ ४८ ॥
दामाद्यैरङ्गकैश्चापि महिषीभिश्च तत्परम् । वासुदेवादिभिः पश्चात् कल्पवृक्षैरनन्तरम् ॥ ४९ ॥
इन्द्राद्यैश्च तदस्त्रैश्च सप्तावरणसंयुतम् । अर्चयित्वा तु गोविन्दं विधिवत्साधकोत्तम ॥ ५० ॥
नैवेद्यं काञ्चने पात्रे पूर्वोक्तं विनिवेदयेत् । अष्टाधिकं शतं पश्चाद्घनेरस्वादु पयोन्धसा ॥ ५१ ॥

पयसा दुग्धेन युतं यदन्धो भक्तं तेनेत्यर्थः ।

शर्कराघृतयुक्तेन बलिं पश्चात्प्रकल्पयेत् । देवर्षियतिसङ्घेभ्यो ह्युपदेवेभ्य आदरात् ॥ ५२ ॥
स्वस्वदिक्क्रमतो विद्वान् भक्तियुक्तः प्रसन्नधीः । .... ॥

उपदेवा गन्धर्वयक्षादयः "स्वस्वदिक्क्रमतो ध्याने देवानेवं बहिः स्मरेत् । सम्मुखे देवदेवस्य" इत्युक्तदिक्क्रमेण बलिं पायसादिभिः । तन्निवेदनप्रकारस्तु—देवाग्रादिचतुर्दिक्षु पायसादिकं पात्रेषु साधारेषु निधाय 'देवेभ्य एष गन्धो नमः' इत्यादिगन्धादिपञ्चोपचारैः सम्पूज्य, स्वहस्ते जलमाधाय 'देवेभ्य एष बलिर्नमः' इति बलिमुत्सृज्य, पुष्पांजलिं दत्त्वा प्रणमेदिति । एवमृषिभ्यो यतिभ्यो गन्धर्वादिभ्यश्च बलिं सम्पूज्य दद्यात् । तथा——

नवनीतहविर्बुद्ध्या तोयैः संतर्प्य तन्मुखे । सहस्रं शतमानं वा सम्पूज्य साष्टकं जपेत् ॥ ५३ ॥

साष्टकमिति शतं सहस्रं चेत्यात्रापि सम्बध्यते ।

मध्याह्ने कृष्णमेवं यः पूजयेद्भक्तितत्परः । गीर्वाणवृन्दवन्द्योऽसौ संमतः सर्वजन्तुषु ॥ ५५ ॥
आयुर्बुद्धीन्दिराकान्तिसुभगत्वादिसंयुतः । सत्सन्ततिसुहृद्वर्गपशुक्षेत्रधनादिभिः ॥ ५५ ॥
सर्वैश्वर्यसमेतोऽत्र सुखं भुक्त्वा हरिं व्रजेत् । अपराह्णार्चने भेदमङ्गीकुर्वन्ति तद्विदः ॥ ५६ ॥
संध्यायामूचिरे केचिद् रात्रावेवापरे तथा । अष्टादशाक्षरान्मन्त्रान् संध्याकाले समर्चनम् ॥ ५७ ॥
यामिन्यां सर्वसम्पत्तेर्दशार्णमनुना यदि । कालद्वयेऽपि मन्त्राभ्यां पूजने केऽपि संमतः ॥ ५८ ॥
संध्यायां द्वारकामध्ये रम्यारामाश्रिते शुभे । गृहैः षोडशसाहस्रैः सर्वतः परिवेष्टिते ॥ ५९ ॥
पद्मेन्दीवरकल्हारसम्भृतैः सुजलाशयैः । हंसादिपक्षिभिर्व्याप्तैः सम्वृतेऽद्भुतमन्दिरे ॥ ६० ॥
उद्यदादित्यसंकाशे चित्रितेऽद्भुतमण्डपे । (कोमलास्तरणे दिव्यस्वर्णपङ्कजमण्डिते ॥ ६१ ॥)
सूपविष्टं परात्मानं कृष्णं ध्यायन्समाहितः । नारदादिमुनिश्रेष्ठैः सम्वृतं मोक्षकांक्षिभिः ॥ ६२ ॥
अद्वैतार्थविचारेण मुनिवर्येभ्य एव तु । आत्मरूपं परं तेजो दिशन्तं मन्त्रगौरवात् ॥ ६३ ॥
नीलेन्दीवरसत्कान्ति शान्तिमूर्तिगुणालयम् । सरोजदलसंकाशनेत्रं मकरकुण्डलम् ॥ ६४ ॥
स्निग्धालकाग्रसम्बद्धमुकुटाद्भुतमस्तकम् । अत्यन्तमधुराकारं प्रसन्नमुखपङ्कजम् ॥ ६५ ॥
श्रीवत्साङ्कितवक्षस्कं वनमालाविभूषितम् । कौस्तुभप्रभया दीप्तकुंकुमारुणवक्षसम् ॥ ६६ ॥
वनमालालंकृतांसं पीतवस्त्रावृतं प्रभुम् । नूपुराङ्गदहारादिकटिसूत्रादिभूषितम् ॥ ६७ ॥
दूरीकृतधराभारं प्रसन्नहृदयं विभुम् । दरारिसगदापद्मधारिणं सुचतुर्भुजम् ॥ ६८ ॥
इत्थं संचिन्त्य देवेशं गोविन्दं सम्यगर्चयेत् । अङ्गैरष्टप्रियाभिश्च प्रथमावरणद्वयम् ॥ ६९ ॥
ततो नारदनामानं पर्वतं जिष्णुमेव च । निशटं चोद्धवं चैव दारुकं तदनन्तरम् ॥ ७० ॥
विश्वक्सेनं ततो मन्त्री शैनेयं पूजयेत्ततः । पूर्वादिपूजितैरेतैस्तृतीयावरणं भवेत् ॥ ७१ ॥
अग्रे गरुडमाराध्य लोकपालान् प्रपूजयेत् । तदस्त्राणि च तद्वाह्ये पञ्चावरणमर्चनम् ॥ ७२ ॥
नैवेद्यं पायसं दत्त्वा सम्यक् पूजावसानके । खण्डाक्तक्षीरसद्बुध्या नीरैः कृष्णं प्रतर्पयेत् ॥ ७३ ॥
अष्टोत्तरशतं पश्चाज्जपेत् कृष्णं विचिन्तयन् । सर्वार्चासु हुनेन्मन्त्री मध्याह्ने वा यथाविधि ॥ ७४ ॥

अष्टोत्तरशतमिति तर्पणजपयोः सम्बध्यते ।

अवसानार्घ्यविध्यन्तं विधाय स्तुतिमारभेत् । नत्वा निवेद्य चात्मानं विसृज्य स्वहृदि प्रभुम् ॥ ७६ ॥
न्यस्य देवमयो भूत्वा स्वात्मानं पूजयेत्ततः । संध्याकाले हरिं त्वेवं प्रत्यहं योऽर्चयेद् बुधः ॥ ७७ ॥
इह भोगान् बहून् भुक्त्वा व्रजेदन्ते च सद्गतिम । नन्दात्मजं यजेद्रात्रौ कामाकुलितचेतसम् ॥ ७८ ॥
रासक्रीडासमाक्रान्तवल्लवीचक्रवेष्टितम् । वितस्त्युच्चं सुवृत्तं च स्थूलं चिक्कणमद्भुतम् ॥ ७९ ॥
निखातं शंकुमाक्रम्य पादाभ्यां च परस्परम् । भ्रमिर्गृहीतहस्तैर्या रासगोष्ठी तु सा भवेत् ॥ ८० ॥
स्थलपङ्कजपुष्पाणां मधुरेणुयुतेन च । रिङ्गत्तरङ्गबिन्दूनां समूहार्द्रेण वायुना ॥ ८१ ॥
कालिन्दीसैकते शुभ्रे शीतले तापहारिणि । कामबाणप्रविद्धाङ्गदिव्यस्त्रीकोटिकोटिभिः ॥ ८२ ॥
संवृते चन्द्रकिरणसमुद्द्योतितदिङ्मुखे । चलद्भृङ्गाङ्गनाशब्दवाचालितदिगन्तरे ॥ ८३ ॥
सिद्धगन्धर्वदेवौघयक्षकिन्नरपन्नगैः । विद्याधरैः सपत्नीकैर्विमानेषु कृतासनैः ॥ ८४ ॥
आकाशे संचरद्भिस्तैः पुष्पवर्षकृतोद्भवे । परस्परावद्धहस्तसुन्दरीजालनिर्मिते ॥ ८५ ॥
रासक्रीडाविधौ रत्नशंकुगं परमेश्वरम् । एतद्देहसमाक्लृप्तदिव्यानेककलेवरम् ॥ ८६ ॥
नारीणां युग्मयोर्देवं प्रत्येकं चान्तरा गतम् । तत्तत्कण्ठं समालम्ब्य बाहुद्वन्द्वविराजितम् ॥ ८७ ॥

आत्मसम्बद्धसञ्जातकामानलसमुद्दीपनात् । रोमोद्गमसमाक्रान्तगात्रवल्लीयुजां मुहुः ॥ ८८ ॥
भ्रमन्तमाभी रज्यन्तं महामणिपरिष्कृतैः । कृतचारुवनैः सर्वालङ्कारैर्हृदयङ्गमम् ॥ ८९ ॥
इत्थं पृथक्शरीरं तं संयुतं मणिभिर्यथा । हिरण्यरचितैः सम्यक्सक्तं मारकतं तथा ॥ ९० ॥
मणिशङ्कौ सुविस्तीर्णे रक्तपद्मगतं प्रभुम् । अतसीसूनसङ्काशं यौवनश्रीसमन्वितम् ॥ ९१ ॥
तदानीं फुल्लरक्तारविन्दच्छदविलोचनम् । नूतनैर्विविधैश्चारुपल्लवैर्नवगुच्छकैः ॥ ९२ ॥
शितिकण्ठशिखण्डैश्च बद्धमूर्धजसंचयम् । सद्भ्रुवं चन्द्रसङ्काशसुन्दराननपङ्कजम् ॥ ९३ ॥
(रत्नकुण्डलसंशोभिगण्डमण्डलमण्डितम्) । पक्वबिम्बफलाकाररक्ताधरविराजितम् ॥ ९४ ॥
नानारत्नसमाक्लृप्तसर्वभूषणभूषितम् । स्वर्णवर्णलसद्वस्त्रविभ्रमश्रीगृहं परम् ॥ ९५ ॥
नवप्रवालरुचिरहस्तपादतलं विभुम् । भ्रमरालीलसत्सूनमाल्यशोभिभुजद्वयम् ॥ ९६ ॥
अङ्गनाकुचसंश्लेषलग्नकुंकुमवक्षसम् । महोक्षचारुगमनं वंशवादनसादरम् ९७ ॥
अनङ्गबाणसंविद्धं सर्वलोकैकसद्गतिम् । ध्यात्वेत्थं प्रोक्तसत्पीठे लक्ष्मीकान्तं प्रपूजयेत् ॥ ९८ ॥
अङ्गैरावरणं पूर्वं मिथुनैस्तदनन्तरम् । केशवाद्याः पुरा प्रोक्ताः षोडश स्वरमूर्तयः ॥ ९९ ॥
कीर्त्यादिशक्तिसहिता लक्ष्मीमन्मथपूर्विकाः । प्रत्येकं स्वरसंयुक्ता मिथुनानि भवन्ति हि ॥ १०० ॥

श्रींक्लींअं केशवाय कीर्त्यै नमः इत्यादि प्रयोगः ।

षोडशारदलेष्वर्च्या रासक्रीडनतत्पराः । इन्द्रादीन् पूजयेद्बाह्ये वक्त्रादींश्च ततः परम् ॥ १०१ ॥
इत्थमावरणैर्युक्तं चतुर्भिः पूजयेत्प्रभुम् । ततः सुकथितं दुग्धं सितशर्करया युतम् ॥ १०२ ॥
राजते भाजने सम्यक् संस्कृत्य विनिवेदयेत् । कांस्यपात्रेषु नैवेद्यं स्वरसंख्येषु कल्पयेत् ॥ १०३ ॥
प्रत्येकं मिथुनेभ्यश्च पयस्तादृक् च वैभवात् । अन्यत्सर्वं यथापूर्वं कृत्वा पूजां समापयेत् ॥ १०४ ॥
रात्रावेवं विधिं यो वै भजेल्लोकवशङ्करः । इन्दिरामन्दिरं भूयात्सर्वाराध्यः स मुक्तिभाक् ॥ १०५ ॥
रात्रावह्नो विरामे वा प्रत्यहं यस्तु पूजयेत् । तुल्यं फलं समाप्नोति भवाब्धेः पारगो भवेत् ॥ १०६ ॥

इत्थं मन्त्रकलेवरं कमलजाजानिं तु कालत्रये
भक्त्याभ्यर्चयतीह यः स नियतं भूलोकभर्ता भवेत् ।
धर्मे नित्यमतिर्महार्हविभवः कामान् यथेष्टान् भजे-
दन्ते विष्णुपुरं प्रयाति परमं सिद्धौघसंसेवितम् ॥ १०७ ॥

अर्चान्ते देवदेवस्य तर्पणानां विधिं ब्रुवे । पुरोक्तानां च काम्यानां साधकेष्टफलप्रदम् ॥ १०८ ॥
पूजनव्यतिरेकेऽपि तत्फलं लभ्यते बुधैः । पीठाणुभिस्तर्पणादौ सकृन्मूलेन चैकशः ॥ १०९ ॥
तत्रावाह्य यजेद् देवं जलैरेवोपचारकैः । धेनुमुद्रां प्रदर्श्यात्र स्मृत्वा तर्पणसाधनम् ॥ ११० ॥
तद्धिया जलमादाय स्वर्णपात्रीकृतेन तु । सम्यगञ्जलिना देवं तर्पयेन्मूलमुच्चरन् ॥ १११ ॥
त्रिकालं तर्पयेन्नित्यमष्टाविंशतिसंख्यया । तत्तत्कालोचितान् पश्चात्तर्पयेत्परिवारकान् ॥ ११२ ॥
एकैकवारं मन्त्रज्ञो मूलेनापि प्रतर्पयेत् । क्षौद्रयुक्तं दधि प्रातर्नवनीतयुतं हविः ॥ ११३ ॥
अह्नो मध्ये समाख्यातं सन्ध्यायां दुग्धमुत्तमम् । सितोपलविमिश्रं तु तर्पणद्रव्यमीरितम् ॥ ११४ ॥
वाक्यं तु पूर्ववद् विद्यादन्यत्सर्वं तथा भवेत् । तत्प्रसादजलैः पश्चात्सिञ्चेदात्मानमात्मवित् ॥ ११५ ॥
मूलमन्त्राभिसञ्जप्तं जलं मन्त्री पिबेत्ततः । हरिमुद्रास्य मन्त्रज्ञो जपेन्मन्त्रं तु तन्मयः ॥ ११६ ॥
काम्यतर्पणवस्तूनि ततो वक्ष्यामि यानि तु । भजेदुक्तप्रकारेषु समालम्ब्यैकमादरात् ॥ ११७ ॥
सकृज्जलेन सन्तर्प्य दुग्धैर्वारचतुष्टयम् । पश्चात् षोडशभिर्द्रव्यैश्चतस्रस्त्वेकशः क्रमात् ॥ ११८ ॥
आवृत्तीस्तर्पयेन्मन्त्री मूलमन्त्रेण संयुतः । चतुर्वारं पुनः क्षीरैरेकवारं जलेन च ॥ ११९ ॥

अन्यद् दुग्धाम्बुना दद्याद्भूयश्च ससितोपलम् । प्रातरेवं तर्पयेद्यश्चतुःसप्ततिसंख्यया ॥ १२० ॥
कृष्णं प्रतिदिनं विद्वान् श्रद्धाभक्तिश्च तत्परः । तस्य मण्डलमात्रेण वाञ्छितं भवति ध्रुवम् ॥ १२१ ॥
पायसं दधिभक्तं च तिलतण्डुलमेव च । गुडभक्तं च दुग्धं च दध्यतो नवनीतकम् ॥ १२२ ॥
घृतं च कदली मोचा ततश्चैव रजस्वला । मोचमोदकपूपाश्च पृथुकाश्चैव लाजकाः ॥ १२३ ॥
द्रव्याणि षोडशैतानि कथयन्ति मनीषिणः । ....॥

मोचा रजस्वला मोचश्च कदलीभेदा एव, तेन चत्वारः कदलीभेदा एव ज्ञेयाः ।

अपरं तर्पणं वक्ष्ये तुल्यं पूर्वेण यत्फलम् । धारोष्णक्वथिते दुग्धे दधिदध्युत्थके पुनः ॥ १२४ ॥
सर्पिषि पायसं चैव मत्स्यण्डी क्षौद्रमेव च । पञ्चामृतं नवैतानि द्वादशावृत्ति तर्पयेत् ॥ १२५ ॥

धारोष्णं तत्कालं दुग्धमानीतं । मत्स्यण्डी खण्डशर्कराविशेषः ।

प्रत्येकं द्रव्यतस्त्वेतैरष्टोत्तरशतं विदुः । तर्पणानि विधानेन कृतानि यशसे तथा ॥ १२६ ॥
लोकसंवलनार्थं च कथितानि मनीषिभिः । खण्डमिश्रितधारोष्णदुग्धबुद्धा जलैः शुभैः ॥ १२७ ॥
कृष्णं संतर्प्य गच्छेद्यो ग्रामं वा नगरं तथा । (स तु नानारसोद्भूतं भक्ष्यं भोज्यं च विदन्ति ॥ १२८ ॥
वस्वन्नं वस्त्रधान्यादि मनोभीष्टं च यद्भवेत् । तर्पणं यावदाख्यातं जपस्तावानिह स्मृतः) ॥ १२९ ॥
इह संतर्पणादेव फलमाप्नोति वाञ्छितम् । भिक्षुको ब्राह्मणो नित्यं स्वयं गोविन्दरूपधृक् ॥ १३० ॥
भूत्वा नानाविधैर्भावैरेभिरन्यैर्मुहुर्मुहुः । मनोभिः सह गोपीनां दधिदुग्धघृतादिकम् ॥ १३१ ॥
बलाद् गृह्णन्नलं भिक्षामाप्नोति महतीं द्रुतम् । षट्कोणान्तर्लिखेत् कामं साध्याख्याकर्मसंयुतम् ॥ १३२ ॥
षडक्षरमनोर्वर्णान् षट्सु कोणेषु संलिखेत् । पद्मं दशदलं बाह्ये रचयेल्लक्षणान्वितम् ॥ १३३ ॥
विंशत्यर्णमनोर्वर्णान् किञ्जल्केषु द्विशो लिखेत् । कोणेषु मदनाक्रान्तभूगृहं रचयेत्ततः ॥ १३४ ॥
रोचनालिखितं ह्येतत् सम्यक् स्वर्णशलाकया । हेमपट्टे विधानेन गुलिकीकृत्य पूजितम् ॥ १३५ ॥
सम्यक् सम्पातसंसिक्तं मन्त्रितं मूलमन्त्रतः । गोपालयन्त्रमेतद्धि पुण्यवद्भिः करे धृतम् ॥ १३६ ॥
त्रैलोक्यवश्यकर्मादौ समर्थं चातिगोपितम् । कीर्त्यादिवर्धनं राज्यपुत्रपौत्रधनप्रदम् ॥ १३७ ॥
कान्तिरक्षाकरं नृणां सर्वसौभाग्यदायकम् । अपस्मारमतिभ्रंशमोहमूर्च्छाज्वरादिभिः ॥ १३८ ॥
राक्षसोन्मादभूताद्यैः पीडितानां च मस्तके । एतद्यन्त्रं स्मरेन्मन्त्रं जपेन्नश्यति तत्क्षणात् ॥ १३९ ॥

अस्यार्थः—षट्कोणं कृत्वा तन्मध्ये ससाध्यं कामबीजं विलिख्य, तत्कोणेषु वक्ष्यमाणगोपालषडक्षरमन्त्राणनिकैकशो विलिख्य, तद्बहिर्दशदलपद्मं कृत्वा, तत्केसरेषु वक्ष्यमाणगोपालविंशत्यक्षरमन्त्राणान् (द्विद्विशो आलिख्य दलेषु पूर्वोक्तदशाक्षरवर्णानेकैकशो) विलिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु कामबीजं लिखेत् । एतद्यन्त्रमुक्तफलदं भवति । तथा—

कामो ब्रह्मा भारभूतिः ष्णावायुर्नमसान्वितः । षडर्णो मनुराख्यातः सर्वसंपत्प्रदायकः ॥ १४० ॥

कामस्तद्बीजं, ब्रह्मा क, भारभूतिः ऋ, तेन कृ । ष्णा स्वरूपं । वायुर्य । नमसा नमःशब्देन । तथा—
"मायालक्ष्मीपुरोऽष्टादशार्णो विंशाक्षरो मनु" । माया भुवनेश्वरीबीजं । लक्ष्मीः श्रींबीजं । एतद्बीजद्वयादि पूर्वोक्ताष्टादशाक्षरो विंशत्यर्णमन्त्रः ॥ सारसंग्रहे—

अथ काम्यानि कर्माणि वक्ष्यन्ते मन्त्रयोर्द्वयोः । देवकीतनयं कृष्णं तदानीं जातमद्भुतम् ॥ १ ॥
शङ्खचक्रगदापद्मधारिणं गगनप्रभम् । पीतवस्त्रलसद्गात्रशोभिसर्वाङ्गसुन्दरम् ॥ २ ॥
एवं संचिन्त्य संजप्य रात्रिशेषे दशायुतम् । त्रिमध्वक्तैर्दशांशं तु किंशुकप्रसवैर्हुनेत् ॥ ३ ॥
मन्त्रयोरेकतो मन्त्री यः करोतीत्थमादरात् । वीर्यं प्रज्ञां स्मृतिं प्राप्य कवीनामग्रणीर्भवेत् ॥ ४ ॥
त्यक्तदिव्याद्भुताङ्गं तं मातृक्रोडगतं शिशुम् । चलत्पादकरन्यासं चिन्तयन्नयुतं जपेत् ॥ ५ ॥

तावत्संख्यं हुनेदग्नौ घृतेनैव सुसाधकः । स लभेत्परमां भक्तिमास्तिकः शान्तचेतनः ॥ ६ ॥
रुदन्तं बालशयने गोपीभिर्दोलितं शिशुम् । ध्यात्वा क्षीरधिया तोयैस्तर्पयँल्लभत्तेऽशनम् ॥ ७ ॥
क्षुद्रबालग्रहप्रेतस्मृतिनाशादिभीतिषु । पिबन्तं पूतनास्तन्यं ग्रस्तस्य शिरसि स्मरन् ॥ ८ ॥
शतं साग्रं जपेन्मन्त्रं रुदतीं पूतनां तथा । सप्राणचूषणाशेषच्छिन्नमर्मकलेवराम् ॥ ९ ॥
तदानीं प्रकटीभूय प्रोक्ता नश्यन्ति राक्षसाः । हुनेत्सुखरमञ्जर्याः समिधस्त्वर्चितेऽनले ॥ १० ॥
पञ्चगव्योक्षिताः सम्यक्पूतनावैरिणो मुखे । पाययेद्धुतशिष्टं तु द्रव्यैः पीतनरं ततः ॥ ११ ॥
सहस्रमन्त्रितैस्तोयैः कुम्भगैरभिषेचयेत् । ग्रहपीडानिवृत्त्यर्थं दुःखौघध्वंसनाय च ॥ १२ ॥
स्वकीयचरणोत्क्षिप्तशकटं भावयन्मनुम् । अयुतं प्रजपेत् सर्वविघ्नसङ्घः शममियात् ॥ १३ ॥
नीलगात्रं स्वहस्ताभ्यां नवनीतं नवं हविः । दधानं किङ्किणीसङ्घतरक्षुनखभूषणम् ॥ १४ ॥
एवं ध्यात्वा हुनेन्मन्त्री दूर्वाकाण्डत्रिकैः शुभैः । दुग्धाज्यलोलितैर्लक्षं तावन्मन्त्रं जपेद्बुधः ॥ १५ ॥
गुरुं सन्तोष्य वसुभिस्तर्पयेच्च द्विजोत्तमान् । आधिव्याधिविनिर्मुक्तो दीर्घजीवी भवेत्तु सः ॥ १६ ॥
बाहुभ्यां बकमादाय पाटयन्तं हि तुण्डयोः । कृष्णं ध्यायंस्तु बालानां भये स्पृष्ट्वा जपेन्मनुम् ॥ १७ ॥
अभिमन्त्रिततैलेन लिम्पेत्तदुपशान्तये । गोगणं साधु रक्षन्तं चारयन्तमितस्ततः ॥ १८ ॥
वेणुं धमन्तं गोविन्दं ध्यायेत् पूर्वोदितं फलम् । महासर्पगरप्राप्तौ चिन्तयन् दष्टमस्तके ॥ १९ ॥
कालीयस्य फणामध्ये नृत्यन्तं कृष्णमञ्जसा । सुधादृष्ट्याभिवीक्ष्य (वर्ष)न्तं तद्गात्रं प्रजपेन्मनुम् ॥ २० ॥
वामहस्तस्य तर्जन्या तर्जन्यमन्त्रिसत्तमः । सुखीकरोति विषिणं कालदष्टमपि क्षणात् ॥ २१ ॥
कालीयमर्दनं कृष्णं ध्यात्वा कुम्भे प्रपूजयेत् । अष्टोत्तरशतं जप्त्वा स्नापयेत् तज्जलेन यम् ॥ २२ ॥
कालकूटविषग्रस्तः सुखीभवति सेचनात् । गोवर्धनगिरिं वामबाहुदण्डेन बिभ्रतम् ॥ २३ ॥
दक्षहस्तसुशाखाभिर्वेणुयोजितसन्मुखम् । कृष्णं सञ्चिन्तयेन्मन्त्रं गच्छन्छत्रमृते जपन् ॥ २४ ॥
भीतिदास्तं न बाधन्ते विद्युद्वर्षणवायवः । व्यर्थमेघौघमायान्तं वासवं चिन्तयन् हुनेत् ॥ २५ ॥
अयुतं लवणैः शुद्धैरनावृष्टिर्भवेद्ध्रुवम् । कलिन्दतनयातोये विहारनिरतं मुदा ॥ २६ ॥
मज्जनोन्मज्जनाद्यैश्च तरलैः जलसेचनैः । गोपाङ्गनासमूहेन सिच्यमानं मुहुर्मुहुः ॥ २७ ॥
कृष्णं संचिन्त्य मन्त्रज्ञो वेतसोत्थैः समिद्वरैः । हुनेदयुतसंख्याकैः क्षीराक्तैर्यो यथाविधि ॥ २८ ॥
भूयसीं वृष्टिमिष्टं हि कुर्यादसमयेऽपि सः । एवमेव स्मरन् कृष्णं पीडितस्य तु मस्तके ॥ २९ ॥
मोहनार्तिगरस्फोटभूतराक्षसपन्नगैः । मन्त्रं जपेत्तदानीं स सुखीभवति नान्यथा ॥ ३० ॥
वैनतेयगतं कृष्णं सप्रद्युम्नं बलान्वितम् । आत्मज्वरपराभूतज्वरेण स्तुतमादरात् ॥ ३१ ॥
एवं ध्यात्वा ज्वराक्रान्तमस्तके संजपेन्मनुम् । महाघोरज्वरो दुष्टस्तदानीं नाशमाप्नुयात् ॥ ३२ ॥
एवं ध्यात्वानले कृष्णमभ्यर्च्याङ्गादिसंयुतम् । गुडूचीशकलैर्हुत्वा क्षीराक्तैरयुतं बुधः ॥ ३३ ॥
क्रूरज्वरमशक्यं च नाशयेन्नात्र संशयः । तीक्ष्णबाणप्रविद्धाङ्गभीष्मपीडाहरं हरिम् ॥ ३४ ॥
ध्यात्वा जपेत्स्पृशन्नार्तं पाणिभ्यां स सुखी भवेत् । कृष्णं सांदीपनेःपुत्रप्रदं ध्यात्वायुतं हुनेत् ॥ ३५ ॥
दुग्धाप्लुतैर्गुडूचीनां शकलैरर्चितेऽनले । अपमृत्युर्विनश्येत कृत्याः क्रूरा अपि क्षणात् ॥ ३६ ॥
कृष्णं पुत्रान् प्रयच्छतं द्विजाय मृतसूनवे । ध्यात्वा पार्थयुतं लक्षं जपेत्पुत्रसमृद्धये ॥ ३७ ॥
पुत्रजीवोत्थकाष्ठेन ज्वलिते हव्यवाहने । फलैस्तदीयैर्जुहुयादयुतं मधुराप्लुतैः ॥ ३८ ॥
पुत्रान् बहूनरोगान् स लभते चिरजीविनः । (दुग्धवृक्षत्वचा क्वाथैः घटमापूर्य रात्रिषु ॥ ३९ ॥
पूजयित्वायुतं जप्त्वा प्रातर्योषां पतिव्रताम् । अभिषिच्य विधानज्ञो घृतं जप्तं च पाययेत्) ॥ ४० ॥
नित्यकर्मोदितेनैवं स पुत्रान् बुद्धिशालिनः । वन्ध्यापि सा समाप्नोति नीरुजो दीर्घजीविनः ॥ ४१ ॥

बोधिपत्रपुटे तोयं जप्तमष्टोत्तरं शतम् । मौनं कृत्वा पिबेन्नारी प्राग्वर्षात् सा सुतं लभेत् ॥ ४२ ॥
कृत्या क्रूरां महाभीमां काशिराजेन योजिताम् । पराजित्यात्मचक्रेण काशीं तद्भवव‍ह्निना ॥ ४३ ॥
शेषेण भस्मीकुर्वन्तं कृष्णं सम्यग्विचिन्तयन् । जुहुयान्निशि सिद्धार्थैः स्वीयतैलविलोलितैः ॥ ४४ ॥
एवं कृते तु सप्ताहं वैरिणा केनचित्कृता । कृत्या भूयस्तमेवाशु नाशयेन्नात्र संशयः ॥ ४५ ॥
आश्रमे रुचिरे दिव्ये बदरीवृक्षभूषिते । सूपविष्टं स्पृशन्तं च हस्ताम्बुजयुगेन च ॥ ४६ ॥
घण्टाकर्णस्य सर्वाङ्गं स्मृत्वा गोविन्दमादरात् । मधुराक्तैस्तिलैर्लक्षं जुहुयादेधितेऽनले ॥ ४७ ॥
अशेषपापनाशार्थं पुष्ट्यर्थं वा जपेत्ततः । रुक्मिणं बलभद्रं च दीव्यन्तं चाक्षकर्मणा ॥ ४८ ॥
ध्यायन् कृष्णं द्वेषयन्तं होमयेद् गुलिकाः शुभाः । गोमयोत्थाः क्षणाद्द्वेषः प्रीयते जायते ध्रुवम् ॥ ४९ ।
खगेश्वरसमारूढं कुर्वन्तं बाणवर्षणम् । धावमानं रिपुगणमनुधावन्तमाशुगम् ॥ ५० ॥
जपेत् सप्तसहस्राणि कृष्णं ध्यात्वा मनुं बुधः । सप्ताहाद्वैरिणो भूयादुच्चाटो देशतो ध्रुवम् ॥ ५१ ॥
कपित्थफलसंपातने वने वत्सकं क्षिपन् । कृष्णो ध्येयोऽयुतं जप्यो मनुरुच्चाटकृद्रिपोः ॥ ५२ ॥
ध्यायन् स्वं कंसमथनं स्वेन मञ्चादधःकृतम् । वैरिणं कंसरूपं च कर्षन्तं प्राणवर्जितम् ॥ ५३ ॥
अयुतं प्रजपेन्मन्त्रं हुनेद्वा तत्समं बुधः । समिद्भिर्जन्मनक्षत्रतरूणां तस्य मन्त्रवित् ॥ ५४ ॥
शत्रुर्निधनमाप्नोति सुधाभक्षोऽपि नान्यथा । कलिद्रुमसमिद्भिर्वा निम्बतैलप्लुतैर्हुनेत् ॥ ५५ ॥
यामिन्यामयुतं स्वस्थो रिपुर्यमपुरं व्रजेत् । कार्पासबीजचूर्णानि निशानिम्बदलानि च ॥ ५६ ॥
ऐरण्डतैलसिक्तानि हुनेत् त्रिकटुकानि च । रात्रौ श्मशानभूमिस्थो रिपुनाशाय मान्त्रिकः ॥ ५७ ॥
मारणं निन्दितं कर्म यदि कुर्वीत साधकः । अयुतं प्रजपेन्मन्त्रं यावद्वा हविषा हुनेत् ॥ ५८ ॥
मन्त्री तत्पापनाशाय शान्तचेता दृढव्रतः । पुरन्दरमुखाञ्जित्वा हरन्तं सुरपादपम् ॥ ५९ ॥
कृष्णं ध्यायञ्जपेल्लक्षं सर्वतो जयमाप्नुयात् । व्याख्यानमुद्रया कृष्णं गीतार्थं फाल्गुनाय च ॥ ६० ॥
कथयन्तं तथारूढं भावयन् प्रजपेन्मनुम् । धर्मवृद्धिर्भवेत् तस्य योगसिद्धिश्च जायते ॥ ६१ ॥
त्रिस्वादुयुक्तैर्लक्षं यः किंशुकप्रसवैर्हुनेत् । महाकविः स वादीन्द्रो वेदवेदाङ्गपारगः ॥ ६२ ॥
कोटिभास्करसङ्काशं विश्वरूपशरीरिणम् । सप्तहाटकसत्कान्तिमग्नीषोमशरीरिणम् ॥ ६३ ॥
सूर्यानलस्फुरद्वक्त्रचरणाम्बुजमण्डितम् । विविधानेकसद्धेतिं दिव्यनेपथ्यधारिणम् ॥ ६४ ॥
जगद्व्योमान्तरालेषु व्याप्तं कृष्णं विचिन्तयन् । मन्त्रश्रेष्ठं जपेत्सम्यक् सहस्रं साष्टकं बुधः ॥ ६५ ॥
देशगेहपुरग्रामवास्तुस्वात्मसुरक्षणम् । भवेद्दशार्णमन्त्रेण तद्वदष्टादशार्णतः ॥ ६६ ॥
उक्तानेतान् प्रयोगांस्तु यदृच्छातः समाचरेत् । वश्यकर्माधुना वक्ष्ये मन्त्रद्वयत आदरात् ॥ ६७ ॥
यत्कृत्वा विधिना मन्त्री सर्वलोकप्रियो भवेत् । अरण्योद्भवसत्पुष्पैर्विकचैररुणैः शुभैः ॥ ६८ ॥
मध्याह्नोक्तविधानेन पूजयित्वा गृहे हरिम् । प्रत्यहं दशवर्णं यः सहस्रं साष्टकं जपेत् ॥ ६९ ॥
मण्डलाद् द्विजमुख्यानां चक्रं तस्य वशी भवेत् । मालतीकुसुमैः श्रेष्ठैर्गोपवेषं यथा पुरा ॥ ७० ॥
कृष्णमभ्यर्च्य नृपतीन् वशं नयति दासवत् । क्रीडन्तं रक्तकुसुमैरश्वमारसमुद्भवैः ॥ ७१ ॥
वैश्यान् नीलोत्पलैः शूद्रानिष्ट्वा गायन्तमच्युतम् । तण्डुलैः शुक्लपुष्पैश्च घृताक्तैश्च सहस्रकम् ॥ ७२ ॥
अन्वहं सप्तरात्रं तु हुत्वा तद्भस्म धारयेत् । अलिके धारणान्नारी स्वपुमांसं वशं नयेत् ॥ ७३ ॥
पुरुषश्च तथा नारीं दासीकुर्यान्न संशयः । पुष्पताम्बूलवासांसि कज्जलालेपनादिकम् ॥ ७४ ॥
एकेन मन्त्रयेन्मन्त्री सहस्रमभिमन्त्र्य च । दद्यादेभ्यः सदा ते स्युः किङ्करा मरणान्तिकम् ॥ ७५ ॥
आपणे व्यवहारादौ विवादे राजवेश्मसु । परिषद्यज्ञकर्मादौ शतं साग्रं जपेत्तु यः ॥ ७६ ॥
तत्र यद्वचनं ब्रूयात्तेनैव स जयी भवेत् । सूपविष्टं कदम्बाधो बल्लवीभिः सहाच्युतम् ॥ ७७ ॥

हृद्यगानरतं ध्यात्वा हुत्वा त्रिमधुराप्लुतैः । अपामार्गसमिच्छ्रेष्ठैस्त्रैलोक्यं वशमानयेत् ॥ ७८ ॥
रासक्रीडारतं कृष्णं ध्यात्वा मन्त्रं दशाक्षरम् । जपेत्सहस्रं नित्यं यो मासमात्रेण साधकः ॥ ७९ ॥
इष्टां कन्यामवाप्नोति दुर्लभामपि नान्यथा । अत्युच्चकुन्दद्रुमारूढं कृष्णं ध्यात्वा सहस्रकम् ॥ ८० ॥
सायं जप्यात्तु या कन्या प्रत्यहं मण्डलाद्धि सा । मन्त्रस्यास्य प्रभावेन वाञ्छितं वृणुयाद्वरम् ॥ ८१ ॥
गोपीहस्तसरोजानि धृत्वा नृत्यन्तमञ्जसा । कृष्णं सञ्चिन्त्य मन्त्रं यो जपेदष्टादशाक्षरम् ॥ ८२ ॥
लक्षं मधुप्लुतैर्वापि चूर्णैर्लाजसमुद्भवैः । हुत्वायुतं जपेत्तावत्कन्यामिष्टां लभेत सः ॥ ८३ ॥
अष्टादशार्णमन्त्रेण पलाशसमिधोऽयुतम् । मधुप्लुतैः कुशैर्वापि हुनेद्वा तिलतण्डुलैः ॥ ८४ ॥
वशीभवन्ति भूदेवा दत्वा सर्वस्वमादरात् । कृतमालप्रसूनैश्च कुरण्टकुसुमैरपि ॥ ८५ ॥
हुत्वा वशीकरोत्येवं भूपालान् सपरिच्छदान् । बकुलोद्भवसत्पुष्पैः पाटलोत्थैश्च तैरपि ॥ ८६ ॥
अक्षजैर्विट्तुरीयौ च स्वायत्तौ कुरुते क्षणात् । नूतनोत्फुल्लसत्पद्मैः सुगन्धैरुत्पलैः ॥ ८७ ॥
मध्वक्तैश्चम्पकैर्वापि पाटलोत्थैः प्रसूनकैः । हुत्वायुतं क्रमेणैव वशयेद् वर्णयोषितः ॥ ८८ ॥
अश्वमारप्रसूनैर्यो मध्वक्तैः प्रत्यहं हुनेत् । रात्रौ सहस्रसंख्यातैः सप्तरात्रमतन्द्रितः ॥ ८९ ॥
पण्याङ्गनानां साहस्रं चारुयौवनगर्वितम् । पञ्चबाणप्रविद्धाङ्गं दासीकुर्यान्न संशयः ॥ ९० ॥
सिद्धार्थैर्लवणोपेतैर्मध्वक्तैस्त्रिसहस्रकम् । होमं प्रकुर्वतो रात्राविद्रोऽपि द्राग् वशी भवेत् ॥ ९१ ॥
श्रीवृक्षस्य फलैः पत्रैस्तत्फलैश्च प्रसूनकैः । त्रिस्वादुसंयुतैर्होमात् पद्मैस्तण्डुलसंयुतैः ॥ ९२ ॥
प्रत्येकद्रव्यतो लक्ष्मीं वशीकुर्यान्निजालये । वासांसि वल्लवस्त्रीणां मनोभिः सह केशवम् ॥ ९३ ॥
समादाय कदम्बं तु समारूढं तु चिन्तयन् । जप्यात्सहस्रमानं यो रात्रौ स दशभिर्दिनैः ॥ ९४ ॥
शचीमप्यानयन्मन्त्री शीघ्रमेव न संशयः । किं बहूक्तेन मन्त्राभ्यामेताभ्यां सदृशोऽपरः ॥ ९५ ॥
नास्ति वश्ये तथाकृष्टौ देवदानवयोषिताम् । चन्द्रकुन्दसुगौराङ्गं रक्तपद्मदलेक्षणम् ॥ ९६ ॥
अरिकम्बू गदापद्मे बाहुदण्डैस्तु बिभ्रतम् । दिव्यैश्च मण्डनालेपैः पद्मदाम्ना च भूषितम् ॥ ९७ ॥
पीताम्बरलसद्गात्रं तरुणं मुनिसेवितम् । विकचत्पद्ममध्यस्थं ध्यात्वा नन्दात्मजं प्रभुम् ॥ ९८ ॥
स्वहृत्पद्मगतं देवं पुराणपुरुषं नवम् । नीलमेघनिभं वापि द्रुतहेमद्युतिं तु वा ॥ ९९ ॥
जपेदेकतरं मन्त्री ध्रुवाभ्यां पुटितं कृती । लक्षद्वादशकं सम्यक् तत्सहस्रं समिद्वरैः ॥ १०० ॥
दुग्धाप्लुतैर्हुनेन्मन्त्री पयोद्रुमसमुद्भवैः । मध्वाज्यलोलितेनापि हविषा वा जितेन्द्रियः ॥ १०१ ॥
पश्चाद्विश्वाधिपं नित्यचिदानन्दकलेवरम् । भवान्धकारतरणिं स्वीयहृत्सरसीरुहे ॥ १०२ ॥
आत्माभेदेन सञ्चिन्त्य प्रत्यहं परमेश्वरम् । त्रिसहस्रं जपेन्मन्त्री यजेत् सांध्योक्तवर्त्मना ॥ १०३ ॥
विधिमेनं भजेद्यस्तु श्रद्धाभक्तिसमन्वितः । संसाराब्धिं महाभीमं जरामृत्युमहाह्वयैः ॥ १०४ ॥
अत्युच्चैर्लहरीजालैर्विषयग्राहसंयुतम् । समुल्लंघ्य परं तेजो जीवन्विष्णोर्निरञ्जनम् ॥ १०५ ॥
उच्चरंस्तस्य नामानि पिबंस्तस्य कथामृतम् । आकारांस्तस्य च ध्यायन् तत्पादाब्जं नमन्नपि ॥ १०६ ॥
भक्त्या परमयोपेतो जीवन्मुक्तः स कथ्यते । .... ॥

पिण्डं वह्निपुटे सुवृत्तविवरे संलिख्य तत्कोणगान्
षड्वर्णान् पुनरङ्गपञ्चकलसत्सन्धीन् दलेष्वष्टसु ।
अष्टार्णान् वसुयुग्मवर्णसुमनुं तत्संख्यपत्रस्थितं
बाह्येऽष्टादशपत्रपद्मलसितान् तत्संख्यवर्णांल्लिखेत् ॥ १०७ ॥
पद्मं तत्त्वदलं ततः प्रतिदलं गायत्रिवर्णांल्लिखेत् ।

संवेष्ट्य स्मरबीजतः पुनरथो त्रिंशद्द्विपत्राम्बुजम् ।
तत्रानुष्टुभवर्णकाननुदलं वीतं च पिण्डेन तत्
पञ्चाशल्लिपिभिः क्रमेण च पुनः पाशांकुशाभ्यां वृतम् ॥ १०८ ॥
सर्वं वृत्तेन संवीतं यन्त्रमेतत्प्रकल्पितम् । यन्त्रराजमिति ख्यातं सर्वविश्वप्रमोहनम् ॥ १०९ ॥
कामधर्मार्थफलदं शत्रुदस्युनिवारणम् । कीर्तिकान्तिधनारोग्यरक्षाश्रीविजयप्रदम् ॥ ११० ॥
पुत्रपौत्रप्रदं लोके भूतवेतालनाशनम् । लिखितं भूर्जपत्रादौ पूजितं चाभिमन्त्रितम् ॥ १११ ॥
धारितं सर्वकामानां वृद्धिदं नात्र संशयः । .... ॥

इति । अस्यार्थः—षट्कोणं कृत्वा तन्मध्ये वृत्तं विलिख्य, तस्योदरे पिण्डं गोपालैकाक्षरं बीजं विलिख्य, तन्मध्ये साध्यनाम स्फुटं कृत्वा, षट्कोणेषु पूर्वोक्तषडर्णमन्त्रवर्णानेकैकशो विलिख्य, तत्सन्धिषु "आचक्राय स्वाहा" इत्यादिपूर्वोक्तपञ्चाङ्गमन्त्रानालिख्य, तद्बाह्येऽष्टदलकमलं कृत्वा तद्दलेषु वक्ष्यमाणकृष्णाष्टाक्षरवर्णानालिख्य, (तद्बहिः षोडशदलपद्मं कृत्वा तद्दलेषु वक्ष्यमाणकृष्णषोडशार्णमन्त्रवर्णान् विलिख्य, तद्बहिरष्टादशदलं कृत्वा तद्दलेषु पूर्वोक्ताष्टादशाक्षरमन्त्रवर्णानालिख्य) तद्बाह्ये चतुर्विंशतिदलं पद्मं कृत्वा तद्दलेषु वक्ष्यमाणकृष्णगायत्रीवर्णानालिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तदन्तरालवीथ्यां कामबीजेन संवेष्टच, तद्बहिर्द्वात्रिंशद्दलं पद्मं कृत्वा तद्दलेषु वक्ष्यमाणगोपालानुष्टुभवर्णानालिख्य, तद्बहिर्वृत्तचतुष्टयमालिख्य, वीथीत्रयं निष्पाद्याभ्यन्तरवीथ्यां पिण्डगोपालमन्त्रेणावेष्टच, द्वितीयवीथ्यां मातृकावर्णैरावेष्टच, तृतीयवीथ्यां पाशांकुशबीजाभ्यां निरन्तरं संवेष्टयेत् । एतद्यन्त्रमुक्तविधिना साधितं धृतमुक्तफलदं भवति ॥ तथा—"कामः कृष्णाय गोविन्दो ङेयुग्वस्वक्षरो मनुः" । कामं कामबीजं क्लीं । कृष्णाय स्वरूपं । गोविन्दो ङेयुक् गोविन्दाय । वस्वक्षरोऽष्टाक्षरः । तथा—"तारं नमः पदं कृष्णं चतुर्थ्यन्तं वदेत्ततः । ङेन्तं च देवकीपुत्रं वर्मास्त्रान्तं द्विठान्तकः ॥ मनुः षोडशवर्णोऽयं षोडशारे प्रकल्पितः ।" तारं प्रणवं । नमः स्वरूपं । कृष्णं चतुर्थ्यन्तं कृष्णाय । ङेन्तं देवकीपुत्रं देवकीपुत्राय । वर्मं हुं । अस्त्रं फट् । द्विठः स्वाहा । तथा——

दामोदरं चतुर्थ्यन्तं विद्महे तदनन्तरम् । वासुदेवाय चेत्यन्ते धीमहीति पदं वदेत् ॥ ११२ ॥
तन्नः कृष्ण इति प्रोक्त्वा पुनर्ब्रूयात्प्रचोदयात् । गायत्रीयं समाख्याता गोपालस्य जगत्पतेः ॥ ११३ ॥

दामोदरं चतुर्थ्यन्तं दामोदराय । सुगममन्यत् । तथा——

पिण्डमारहृदन्तेऽपि ङेयुतं भगवत्पदम् । नन्दपुत्रपदं ज्ञेयं बालतो वपुषे तथा ॥ ११४ ॥
श्यामलाय पदस्यान्ते दशवर्णमनुं वदेत् । द्वात्रिंशदक्षरो मन्त्रस्तत्संख्यदलकल्पितः ॥ ११५ ॥

पिण्डं ग्लौंबीजं । मारः कामबीजं । हृन्नमः । ङेयुतं भगवत्पदं भगवते । नन्दपुत्रं ङेन्तं नन्दपुत्राय । बालवपुषे स्वरूपं । श्यामलाय स्वरूपम् । दशवर्णमनुः प्रोक्तगोपालदशाक्षरमन्त्रः । एतन्मन्त्रचतुष्टयं यन्त्रे लेख्यम् । तथा——

षट्कोणे पिण्डबीजं द्विनवलिपिवृतं कोणषट्के षडर्णं
दिक्पत्राब्जे दशार्णं विलिखतु च ततो वेष्टितं मारबीजैः ।
किञ्जल्केषु स्वराढ्यं द्विवसुदललसत्षोडशार्णं च पद्मं
कादीन् किञ्जल्कसंख्यान् रददललिखितानुष्टुवर्णं च पद्मम् ॥ ११६ ॥
पाशांकुशावृतं बाह्ये भूबिम्बद्वितयाश्रिषु । वस्वर्णमन्त्रसंयुक्तं कृष्णयन्त्रमिदं विदुः ॥ ११७ ॥
रक्षाकृद् घोरमारिघ्नं चतुर्वर्गफलप्रदम् । ....॥

इति । अस्यार्थः—षट्कोणमध्ये पिण्डबीजं ससाध्यं विलिख्य, तद्बीजमष्टादशाक्षरमन्त्रे संवेष्टच, षट्कोणेषु प्रोक्तषडक्षरमन्त्रवर्णान् विलिख्य, तद्बहिर्दशदलपद्मं कृत्वा तद्दलेषु पूर्वोक्तगोपालमन्त्रस्य दशाक्षराणा-

लिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तयोरन्तरालवीथ्यां कामबीजैर्निरन्तरं संवेष्टच, तद्बहिः षोडशदलकमलं कृत्वा तत्केसरेषु (षोडशस्वरान् तद्दलेषु प्रोक्तषोडशाक्षरमन्त्रवर्णांश्चालिख्य, तद्बहिर्द्वात्रिंशद्दलकमलं कृत्वा तत्केसरेषु) कादिसान्तात् वर्णानालिख्य तद्दलेषु प्रोक्तद्वात्रिंशदक्षरमन्त्रवर्णानालिख्य, तद्बहिर्वृत्तयोरन्तराले पाशांकुशबीजाभ्यामावेष्टच, तद्बहिः सम्पुटितचतुरस्रद्वयात्मकमष्टकोणं कृत्वा तत्कोणेषु प्रोक्ताष्टाक्षरमन्त्रवर्णानेकैकमालिखेत् । एतद्यन्त्रमुक्तफलदं भवति । तथा—

कृत्वा नवपदं मन्त्री मण्डलं चाब्जशूलकम् । मध्यकोणे लिखेच्छ्लोकं वर्तुलद्वयशोभितम् ॥ ११८ ॥
वृत्ताकारेण मन्त्रज्ञो मध्यादिमध्यपश्चिमम् । अष्टार्णं शिष्टकोणेषु द्वादशार्णेन वेष्टितम् ॥ ११९ ॥
कृष्णयन्त्रमिति ख्यातं सर्वरक्षाकरं परम् । भूर्जपत्रे लिखित्वा तु पूजितं स्थापितानिलम् ॥ १२० ॥
करेण धारितं नित्यं सर्वेष्टसुखवर्धनम् । द्विजद्रुपट्टिकामध्ये सम्यगालिख्य पूजितम् ॥ १२१ ॥
शालादौ निहितं यन्त्रं गवां वृद्धिकरं सदा । ....॥

इति । अस्यार्थः—प्राक्प्रत्यक्सूत्रचतुष्टयं दक्षिणोत्तरसूत्रचतुष्टयं च कृत्वा नवकोष्टयुतं चक्रं विरच्य कोणचतुष्टये शूलचतुष्टयं कृत्वा तन्मध्यकोष्ठमध्ये वर्तुलद्वयं विरच्य तत्र वक्ष्यमाणश्लोकमन्त्राक्षराणि वक्ष्यमाणप्रकारेण लिखेत् । तद्यथा—प्रथमवर्तुले पूर्वार्धं प्रतिलोमतो विलिख्य द्वितीयवर्तुले द्वितीयार्धं तथैव लिखेत् । अवशिष्टकोष्ठेषु पूर्वोक्तगोपालाष्टाक्षर (मन्त्रवर्णानेकमेकं लिखेत्, ततस्तद्बहिर्वृत्तयोरन्तराले पूर्वोक्तद्वादशाक्षर) मन्त्रेण वेष्टयेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ तथा—

तसुकीतिपदं ब्रूयाद् देवदेवेन उच्चरेत् । तवे देवरतो ब्रूयाद्रतं च तरतो वदेत् ॥ १२२ ॥
रूढतो ख्यातशब्दान्ते तख्यातो पदमुच्चरेत् । देवकीसुतशब्दान्तः श्लोकमन्त्रोऽयमीरितः ॥ १२३ ॥

तथाचायं मन्त्रः—"तसुकी देवदेवेन तवेदेवरतो रतम् । तरतो रूढतो ख्याततख्यातो देवकीसुतः ॥"

इति । तथा—

श्लोकमन्त्रं महेशानि चतुष्षष्टिपदे लिखेत् । राक्षसादि च यद्भूयः सर्वतोभद्रनामकम् ॥ १२४ ॥
यन्त्रं पुष्टिबलारोग्यकीर्तिलक्ष्मीजयप्रदम् । सारजे फलके कृत्वा निखातं गोष्ठमध्यतः ॥ १२५ ॥
दस्युमारीग्रहादिभ्यो रक्षां कुर्याद्गवां सदा । क्षीरगोपपदं प्रोक्त्वा पगोरक्षीति चोद्धरेत् ॥ १२६ ॥
रक्षमाक्षपदं पश्चात्क्षमाक्षरपदं ततः । गोमानो-पदमाख्यातं गगनोमापदं वदेत् ॥ १२७ ॥
गोपक्षगपदं प्रोक्त्वा त्यत्यगक्षपमुच्चरेत् । अयं श्लोकमनुः प्रोक्तो द्वितीयः सर्वसिद्धिदः ॥ १२८ ॥

मन्त्रस्तु तथा—"क्षीरगोप पगोरक्षी रक्षमाक्ष क्षमाक्षर । गोमानोग गनोमागो पक्षगत्य त्यगक्षप ॥"

इति ॥ केरलीये यन्त्रसारे-

साध्यगर्भं लिखेत्कामं वह्निगेहयुगोदरे । षट्सु कोणेषु षड्वर्णंश्चतुष्पत्राम्बुजे ततः ॥ १ ॥
केसरोद्यच्चतुर्वर्णं द्वादशार्णमनोर्लिखेत् । त्रीणि त्रीणि च वर्णानि प्रतिपत्रं ततो बहिः ॥ २ ॥
पद्मे दिक्पत्रके राजद्दशार्णमनुकेसरे । विंशत्यर्णमनोर्वर्णान् प्रतिपत्रे द्विशो लिखेत् ॥ ३ ॥
बहिः षोडशपत्रेषु स्वरोद्यत्केसरेष्वथ । आगावो ह्यस्य सूक्तस्य चार्धमर्धमृचां लिखेत् ॥ ४ ॥
बहिः संवेष्ट्य काद्यैश्च ततो भूबिम्बमालिखेत् । वाराहबीजं तद्दिक्षु भूबीजं कोणगं लिखेत् ॥ ५ ॥
गोपालयन्त्रमेतद्धि विधिना स्थापितं गृहे । तत्र गावः पयस्विन्यः सवृषाश्च निरामयाः ॥ ६ ॥
पीनोध्न्यो बहुरूपाश्च सुशीलाश्च भवन्ति हि । धनधान्यधरारत्नशालिनी तस्य मन्दिरे ॥ ८ ॥
लक्ष्मीरतिस्थिरा भूत्वा वसेदाभूतसंप्लवम् । .... ॥

इति । अस्यार्थः—षट्कोणं विलिख्य तन्मध्ये ससाध्यं कामबीजं विलिख्य, षट्कोणेषु पूर्वोक्तकृष्णषडक्षरमन्त्रार्णानालिख्य, तद्बहिश्चतुर्दलपद्मं कृत्वा तत्केसरेषु "क्लींकृष्णक्लीं" इति मन्त्रस्यैकैकमक्षरं विलिख्य-

(तद्दलेषु पूर्वोक्तद्वादशाक्षरमन्त्रस्य त्रीणि त्रीण्यक्षराणि आलिख्य तद्बहिर्दशदलपद्मं कृत्वा तत्केसरेषु पूर्वोक्त-दशाक्षरमन्त्रार्णान् विलिख्य) तद्दलेषु पूर्वोक्तविंशतिवर्णमन्त्रस्य द्विद्विक्रमाद्विंशतिवर्णानालिख्य, तद्बहिः षोडशदलपद्मं कृत्वा तत्केसरेषु षोडश स्वरानालिख्य, तद्दलेषु ऋग्वेदोक्तस्य "आगावो अग्मन्नुत" इत्येतत्सूक्तस्य प्रतिदलं ऋचामर्धमर्धं विलिख्य, तद्बहिर्वृत्तयोरन्तराले ककारादिक्षकारान्तैरावेष्टय, तद्बहिश्चतुरस्रं कृत्वा तस्य चतुर्दिक्षु वाराहबीजं कोणेषु भूबीजं चालिखेत् । एतत् यन्त्रमुक्तफलदं भवति । तथा—

मध्ये तारं ससाध्यं वसुदलविवरे गव्यसूक्तस्य चर्चा-
मेकामेकां क्रमेण प्रविलिखतु बहिर्वेष्टितं मातृकार्णैः ।
आगावो–सूक्तयन्त्रं कुगृहगतमिदं स्थापितं मन्दिरादौ
दद्याद्गोगृष्टिसत्तर्णकवृषमहिषैः संकुलामाशु लक्ष्मीम् ॥ ८ ॥

इति । अस्यार्थः—अष्टदलकमलमध्ये ससाध्यं प्रणवं विलिख्य, दलेषु वक्ष्यमाण "आगावो" सूक्तस्यै-कैकामृचं विलिख्य, वृत्तयोरन्तराले मातृकयावेष्टय तद्बहिश्चतुरस्रं कुर्यात्, यन्त्रमुक्तफलदं भवति ॥ आगावो—सूक्तस्य ऋचस्तु (ऋग्वेद ६.२८, १–८)—

आगावो अग्मन्नुत भद्रमक्रन् सीदन्तु गोष्ठे रणयन्त्वस्मे । प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥ १ ॥ इन्द्रो यज्वने पृणते च शिक्षत्युपेद्दाति न स्वं मुषायति । भूयो भूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥ २ ॥ न ता नश्यन्ति न दभाति तस्करो नसामामित्रो व्यथिरा दधर्षति । देवांश्च याभिर्यजते ददाति च ज्योगित्ताभि सचते गोपतिः सह ॥ ३ ॥ न ता अर्वा रेणुककाटो अश्नुते न संस्कृतपत्रमुप यंति ता अभि । उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरंन्ति यज्वनः ॥ ४ ॥ गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः स जंनास इन्द्र इच्छामीद्वृधा मनसा चिदिन्द्रं ॥ ५ ॥ यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकं । भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ॥ ६ ॥ प्रजावतीः सूयवसं रिशंतीः शुद्धा अपः सुप्रपाणे पिबंतीः । मा वः स्तेन ईशत माघशंसः पीर वो हेती रुद्रस्य वृज्याः ॥ ७ ॥ उपेदमुपवर्चनमासु गोषूप पृच्यतां । उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥ ८ ॥ इति तथा —

षट्कोणे कर्णिकायां स्मरमथ विलिखेत् कोणषट्के षडर्णं
पत्रेष्वेकैकवर्णं दशसु च दशवर्णस्य बाणैः स्मरस्य ।
आवीतं मातृकार्णैरपि च कुगृहगं साधुगोपालयन्त्रं
प्रोक्तं धर्मार्थकामप्रचुरसुखकरं श्रीप्रदं वश्यकारि ॥ ९ ॥

इति । अस्यार्थः—षट्कोणं कृत्वा तन्मध्ये ससाध्यं कामबीजं विलिख्य, तत्कोणेषु षडक्षरं विलिख्य, तद्बहिर्दशदलपद्मं कृत्वा तद्दलेषु दशाक्षरमन्त्रवर्णानालिख्य, तद्बहिर्वृत्तान्तराले "द्रांद्रींक्लींब्लूंसः" इति वाणबीजै-र्मातृकार्णैश्च वेष्टयित्वा तद्बहिश्चतुरस्रं कुर्यात् । एतदुक्तफलदं भवति । प्रचुरसुखं मोक्षः । तथा—

मारं मध्ये वसुदललसच्छिष्टकृष्णादिवर्णान्
द्वौ द्वावन्ते त्रयमथ लिखेत्केसरेषु स्वराणाम् ।
द्वौ द्वौ वर्णौ बहिरपि समावेष्टितं मातृकार्ण-
र्भूगेहस्थं निखिलसुखदं यन्त्रमष्टादशार्णम् ॥ १० ॥

इति । अस्यार्थः—अष्टदलकमलमध्ये कामबीजं ससाध्यमालिख्य, तद्दलेषु पूर्वोक्ताष्टादशाक्षरमन्त्रस्य 'कृष्णाय' इत्यादिवर्णेषु चतुर्दशवर्णान् द्विद्विक्रमादालिख्यान्तिमदले वर्णत्रयं विलिख्य, तत्केसरेषु द्वन्द्वशः षोडश स्वरानालिख्य, बहिर्वृत्तान्तरालवीथ्यां कादिक्षान्तवर्णैरावेष्टय बहिश्चतुरस्रं कुर्यात् । एतदुक्तफलदं

भवति ॥ मुकुन्दमन्त्रः सारसंग्रहे——

अथ मन्त्रवरं वक्ष्ये मुकुन्दस्य जगत्पतेः । सर्वसिद्धिकरं लोकवश्यदं कीर्तिपुष्टिदम् ॥ १ ॥
विबिन्दुश्रीर्विषं दीर्घा केवला कर्णयुग् रविः । चन्द्रविष्णुयुतश्चक्री सत्यः कूर्मो हुताशनः ॥ २ ॥
ससद्यान्ता समृद्धिश्च भृगुः सत्यश्च दीर्घवान् । सन्ध्याग्निर्ढान्तवैकुण्ठौ गगनं चेन्दुशेखरम् ॥ ३ ॥
शूरोऽग्निसहितः शूरः सत्यो रुद्रेरसंयुतः । अष्टादशाक्षरो मन्त्रो मुकुन्दस्य प्रकीर्तितः ॥ ४ ॥

विबिन्दुश्रीर्बिन्दुविधुरं श्रीबीजं श्री इति । विषं म, दीर्घा न, केवला स्वररहिता, तेन मन् । कर्ण उ रविः म तेन मु । चन्द्रो बिन्दुः, विष्णुः, (उ, चक्री क, तेन कुं । सत्यो द । कूर्मः च । हुताशनो र । सद्यान्त औ, समृद्धिर्ण, तेन चरणो । भृगुः स । सत्यो द) दीर्घ आ तेन दा । सन्ध्या श । अग्निः र । ढान्तो ण । वैकुण्ठो म । गगनं ह, इन्दुः बिन्दुः, तेन हं । शूरः प, अग्नि र, तेन प्र । शूरः प, सत्य द, रुद्र ए, इरो य, तेन द्ये । तथा——

नारदोऽस्य मुनिः प्रोक्तो गायत्री छन्द उच्यते । मुकुन्दो देवता प्रोक्तः सुरासुरनमस्कृतः ॥ ५ ॥
आचक्राद्यैः प्रकुर्वीत पञ्चाङ्गानि विचक्षणः । पूजा तु वैष्णवे पीठे ह्यङ्गेन्द्रादि तदायुधैः ॥ ६ ॥
मन्त्रं जपेदर्धलक्षं तद्दशांशं हुनेत्ततः । पलाशपुष्पैः स्वाद्वक्तैस्तर्पणादि ततश्चरेत् ॥ ७ ॥
मनुनानेन संजप्तमष्टोत्तरशतं जलम् । दिनादावन्वहं पीत्वा मासषट्कं प्रसन्नधीः ॥ ८ ॥
सम्यक्श्रुतिधरो मन्त्री जायते वेदपारगः । प्रयोगः सुगमः ॥ तथा—

समस्तेति समुच्चार्य मरुन्नमितमुद्धरेत् । बाललीलापदं प्रोक्त्वा आत्मने हुं समीरयेत् ॥ ९ ॥
अस्त्रेण हृदयेनापि युक्तो मन्त्रोऽयमीरितः । ....॥

समस्तेति स्वरूपम् । मरुन्नमितस्वरूपम् । बाललीला स्वरूपम् । आत्मने हुं स्वरूपम् । अत्र सन्धिस्तेन लीलात्मने इति मन्त्रे उच्चारः । अस्त्रं फट् । हृदयं नमः । अष्टादशाक्षरोऽयमपि मन्त्रः ॥ तथा—

नलकूबर आख्यातो मुनिश्छन्द उदाहृतम् । गायत्री बालकृष्णोऽस्य देवता परिकीर्तितः ॥ १० ॥
पञ्चाङ्गानि पुरोक्तानि ध्यानं पूर्वोदितं भवेत् । पूजा चाङ्गेन्द्रवज्राद्यैः पुरश्चर्यादि पूर्ववत् ॥ ११ ॥
जपादिकर्मभिर्मन्त्रतः सेवितः सर्वसिद्धिदः । ....॥

ध्यानं मातुरङ्कगतरूपं ध्येयम् ॥ तथा—

अन्नरूपपदं प्रोक्त्वा रसरूपेति चोच्चरेत् । तुष्टिरूपं च हृद्युग्ममन्नाधिपतये परम् ॥ १२ ॥
ममान्नं च समुच्चार्य प्रयच्छाग्निवधूर्मतः । अन्नप्रदोऽयमाख्यातस्त्रिंशद्वर्णो मनूत्तमः ॥ १३ ॥

आदिपदत्रयं स्वरूपम् । हृद्युग्मं नमोद्वयम् अग्रिमपदचतुष्टयं स्वरूपम् । अग्निवधूः स्वाहाकारः । अत्र नमःपदान्नपदयोर्विसन्धिः 'त्रिंशद्वर्णं' इत्युक्तेः ॥ तथा—

ऋषिर्ब्रह्मा समुद्दिष्टश्छन्दोऽनुष्टुबुदाहृतम् । अन्नान्नाधिपतिः कृष्णो देवता प्रोच्यते बुधैः ॥ १४ ॥
अन्नदो जायते मन्त्री मन्त्रमेत भजेत् सदा । द्वादशाक्षरमन्त्रान्ते वर्मास्त्राग्निवधूयुतः ॥ १५ ॥

प्रसिद्धो यो वासुदेवद्वादशाक्षरमन्त्रः पूर्वोक्तः स वर्मास्त्राग्निवध्वन्तो यदा भवति तदा षोडशाक्षरमन्त्रः स्यात् । वर्म हुं । अस्त्रं फट् । अग्निवधूः स्वाहाकारः ।

षोडशार्णो मनुः प्रोक्तो ब्रह्मा मुनिरुदाहृतः । गायत्रं छन्द इत्युक्तं देवता च निगद्यते ॥ १६ ॥
ग्रहघ्नो देवकीपुत्रो दुष्टग्रहविनाशनः । सर्वग्रहभये घोरे जप्तव्योऽयं मनूत्तमः ॥ १७ ॥
एतेषां मन्त्रवर्याणां पञ्चाङ्गानि दशार्णवत् । अर्चनाङ्गैर्लोकपालैर्वज्राद्यैश्च समीरिता ॥ १८ ॥
तत्तद्विशेषफलदा मन्त्रा एते न संशयः । (तथा—) द्वादशार्णमनोरन्ते पुरुषोत्तमशब्दतः ॥ १९ ॥
आयुर्मे च ततो देहि चतुर्थ्या विष्णुमुच्चरेत् । तादृशं प्रभविष्णुं हृन्मन्त्रो द्वात्रिंशदक्षरः ॥ २० ॥

द्वादशार्णं वासुदेवद्वादशार्णं । पुरुषोत्तम स्वरूपम् । आयुर्मे देहि स्वरूपम् । अत्र न सन्धिः । चतुर्थ्यां विष्णुं विष्णवे । तादृशं प्रभविष्णुं प्रभविष्णवे । हृन्नमः ।

नारदो मुनिरस्य स्याच्छन्दोऽनुष्टुबुदाहृतम् । श्रीकृष्णो देवता प्रोक्तः पञ्चाङ्गविधिरुच्यते ॥ २१ ॥
द्वादशार्णान् समुच्चार्य हृदानन्दात्मने भवेत् । पञ्चार्णान्ते वदेत् प्रीत्यात्मने च शिरसो मनुः ॥ २२ ॥
ज्योतिरात्मन इत्यादौ भूतवर्णा शिखा मता । मायात्मने चतुर्वर्णं कवचं परिकीर्तितम् ॥ २३ ॥
चिदानन्दात्मने पूर्वं द्वाभ्यामस्त्रमुदाहृतम् । .... ॥

ॐनमो भगवते वासुदेवायानन्दात्मने हृदयाय नमः । पुरुषोत्तमप्रीत्यात्मने शिरसे० । आयुर्मे देहि ज्योतिरात्मने शिखा० । विष्णवे प्रभविष्णवे मायात्मने कवचाय हुं । नमः चिदात्मने अस्त्राय फट् । इति पञ्चाङ्गानि प्राग्वद्विन्यसेत् ।

अङ्गलोकेशवज्राद्यैरर्चनोक्ता जपेन्मनुम् । लक्षमेकं दशांशेन जुहुयात् पायसैः शुभैः ॥ २४ ॥
दुग्धाज्यसंप्लुतैर्दूर्वात्रितयैर्बोधितेऽनले । जुहुयाद् दीर्घजीवित्वं लभते नात्र संशयः ॥ २५ ॥

इति । तथा—

ङेन्तं बालवपुः प्रोक्त्वा शिरः सप्तार्णको मनुः । बालानां भयशान्त्यर्थं रक्षार्थं च जपेन्मनुम् ॥ २६ ॥

ङेन्तं बालवपुः बालवपुषे । शिरः स्वाहा । तथा—

गोपालकपदस्यान्ते वदेद्वेषधराय च । चतुर्थ्यां वासुदेवं च कवचास्त्रद्विठान्तकः ॥ २७ ॥

गोपालकवेषधराय स्वरूपं । वासुदेवं चतुर्थ्यन्तं वासुदेवाय । कवचं हुं । अस्त्रं फट् । द्विठः स्वाहा ।

अष्टादशाक्षरो मन्त्रो नारदोऽस्य मुनिर्मतः । गायत्री छन्द इत्युक्तं देवता कृष्ण ईरितः ॥ २८ ॥
आचक्रादिभिरङ्गानि पूजा पूर्वोक्तवर्त्मना । गृहगोपालरक्षादौ प्रशस्तः शान्तिकेऽपि च ॥ २९ ॥

पूर्वोक्तवर्त्मना अङ्गेन्द्रवज्राद्यैः ॥

कालीयस्य पदं प्रोक्त्वा फणामध्ये ततो वदेत् । दिव्यनृत्यं-पदस्यान्ते करोति तं-पदं ततः ॥ ३० ॥
नमामीति समुच्चार्य देवकीपुत्रमप्यथ । नृत्यराजानमाभाष्य वदेदच्युतमन्ततः ॥ ३१ ॥
द्वात्रिंशदक्षरो मन्त्रः सर्वक्ष्वेडनिवारणः । .... ॥

अयं मन्त्रः—"कालीयस्य फणामध्ये दिव्यनृत्यं करोति तम् । नमामि देवकीपुत्रं नृत्यराजानमच्युतम् ॥" इति श्लोकरूपः ।

मुनिर्नारद आख्यातश्छन्दोऽनुष्टुबुदीरितम् । कालीयमर्दनः कृष्णो देवता सर्ववन्दितः ॥ ३२ ॥
चतुष्पादैश्च सर्वेण मनुनाङ्गविधिः स्मृतः । अङ्गैरिन्द्रादिभिः पश्चाद्वज्राद्यैरर्चनेरिता ॥ ३३ ॥
एकलक्षं जपित्वाग्नौ जुहुयादयुतं घृतैः । विषनाशकरा योगाः कर्तव्या मनुनामुना ॥ ३४ ॥
एतन्मन्त्रप्रभावेन नश्यन्ते च महोरगाः । एतन्मन्त्रसमानोऽन्यो विषघ्नो नैव विद्यते ॥ ३५ ॥
शुकवृक्षोत्थपञ्चाङ्गैर्गोमूत्रेण सुपेषितैः । निर्मिता गुलिका सम्यग् मन्त्रेणानेन मन्त्रिता ॥ ३६ ॥
नस्यालेपाञ्जनैः पानकर्मणा क्ष्वेडनाशिनी । मुकुन्दाद्येतदन्तानां मन्त्राणां क्रमतो बुधः ॥ ३७ ॥
दशार्णाणुप्रयोगांस्तु ध्यानभेदान्न कल्पयेत् । .... ॥

इति श्रीमहामहोपाध्यायाचार्यभगवत्पूज्यपाद-श्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्करा-चार्यशिष्य-श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययति-विरचिते श्रीविद्यार्णवाख्ये तन्त्रे अष्टाविंशः श्वासः ॥ २८ ॥

अथ

एकोनत्रिंशः श्वासः

अथ श्रीकान्तमन्त्रः । तथा सारसंग्रहे--

मायारमादिकोऽष्टादशार्णो विंशाक्षरो मनुः । एतन्मन्त्रसमानोऽन्यः सिद्धिदो नैव विद्यते ॥ १ ॥
मुनिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द ईरितम् । श्रीकृष्णो देवता बीजशक्त्याद्युक्तवदीरयेत् ॥ २ ॥
श्रीकान्तस्य प्रवक्ष्यामि ध्यानमत्रोत्तमोत्तमम् । कुबेरादिधनाध्यक्षैः सर्वदा यद्विधीयते ॥ ३ ॥
अक्षयस्य धनस्यापि करं सम्पत्प्रभं (करं) शुभम् । कोटिभास्करसङ्काशैर्द्वारकायां गृहोत्तमैः ॥ ४ ॥
बहुभिः कल्पतरुभिर्वेष्टिते रत्नमण्डपे । विद्योतन्मणिवर्यौघस्तम्भद्वारान्तभित्तिके ॥ ५ ॥
विकचत्पुष्पमालाभिः सहितानन्तमौक्तिकैः । पुष्परागधराशोभिरत्ननद्योरथान्तरे ॥ ६ ॥
निरन्तरत्नवद्रत्नसुधाधाराभिवर्षिणः । अधः कल्पकवृक्षस्य शाखाव्याप्तस्य सर्वतः ॥ ७ ॥
ज्वलद्रत्नप्रदीपालिसमुद्योतितदिङ्मुखे । उद्द्योतद्रविबिम्बाभरत्नसिंहासनाम्बुजे ॥ ८ ॥
सूपविष्टं रमाक्रान्तं द्रुतस्वर्णनिभं स्मरेत् । समोद्यद्रविचन्द्रौघविद्युत्कोटिनिभच्छविम् ॥ ९ ॥
हृद्याङ्गं सर्वतः सौम्यं नानालङ्कारमण्डितम् । अरिशङ्खगदापद्मधारिणं पीतवाससम् ॥ १० ॥
स्पृशन्तं कलशंश्च्योतन्मणिधारमहर्निशम् । सव्येन चरणाब्जेन विद्रुमद्युतिकारिणा ॥ ११ ॥
रुक्मिणीसत्यभामे द्वे दक्षवामस्थिते प्रभोः । उत्तमाङ्गेऽभिषिञ्चन्त्यौ नानारत्नसुधारया ॥ १२ ॥
लसत्स्वीयकराम्भोजगृहीतघटजातया । यच्छन्त्यौ नाग्नजित्याह्वसुनन्दे सुघटैस्तयोः ॥ १३ ॥
मित्रविन्दा तथैवान्या परा चैव सुलक्षणा । एतयोर्जाम्बवत्याह्वसुशीले दक्षवामगे ॥ १४ ॥
रत्नधुन्योः समादाय कलशौ रत्नसंभृतौ । अर्पयन्त्यौ विलासेन ध्यातव्ये मन्त्रवित्तमैः ॥ १५ ॥
ततः षोडशसाहस्रमिता नार्यः समन्ततः । स्मर्तव्याः स्वर्णरत्नादिधारायुग्घटसत्कराः ॥ १६ ॥
स्मरेदष्ट निधीन्तासां धनान्यावर्षतो बहिः । वृष्णींश्च तद्बहिर्भूयो देवादीनपि पूर्ववत् ॥ १७ ॥
एवं सञ्चित्य देवेशं ततः पूजां समारभेत् । पुरोदितप्रकारेण पीठन्यासावसानकम् ॥ १८ ॥
कर्म निर्वर्त्य मन्त्रज्ञो मूलमन्त्रेण मन्त्रवित् । प्राणायामत्रयं कृत्वा ऋष्यादिन्यासमाचरेत् ॥ १९ ॥
करांगुलीषु तलयोः षडङ्गन्यासमाचरेत् । व्यापकं मूलमन्त्रेण विन्यस्य करयोः तथा ॥ २० ॥
पुनः षडङ्गं विन्यस्य देहे देशिकसत्तमः । पुटितां मूलमन्त्रेण मातृकां च प्रविन्यसेत् ॥ २१ ॥

चकारात् पुनः षडङ्गन्यासः उक्तः । "पुनः षडङ्ग कृत्वा तु मन्त्रवर्णांस्तनौ न्यसेत् ।" इति सनत्कुमार॰ वचनात् ।

संहारवर्त्मना सृष्ट्या दश तत्त्वानि विन्यसेत् । व्यापकं च प्रविन्यस्य मन्त्रार्णन्यासमाचरेत् ॥ २२ ॥
उत्तमाङ्गे ललाटे च भ्रूमध्ये दृक्श्रुतिद्वये । नासिकाननयोश्चैव चिबुके च गले पुनः ॥ २३ ॥
बाहुमूले हृदि स्कन्धे नाभिदेशे शिवे तथा । मूलाधारे कटिद्वन्द्वे जानुयुग्मे च जङ्घयोः ॥ २४ ॥
गुल्फयुग्मे पादयुग्मे न्यसेद्वर्णान् मनोः क्रमात् । सृष्टिन्यासोऽयमाख्यातो हृदयाद्या स्थितिस्तथा ॥ २५ ॥
बाहुमूलान्तिकः प्रोक्तः संहारोऽपि पदादिकः । स्थित्यन्तं पञ्चधा केचिन्न्यस्योक्तं मूर्तिपञ्जरम् ॥ २६ ॥

न्यस्य सृष्टिस्थिती पश्चात्षडङ्गानि प्रविन्यसेत् । त्रिवह्निसागरैर्वेदवेदनेत्रैः क्रमाद्बुधः ॥ २७ ॥

वह्नयस्त्रयः । सागराश्चत्वारः । नेत्रं द्वयम् ।

मूलमन्त्रभवैर्वर्णैर्हृदादौ जातिसंयुतैः । दर्शयित्वा किरीटादिमुद्रा दिग्बन्धनं चरेत् ॥ २८ ॥
मूर्तिपञ्जरतो देवं सम्पूज्याङ्गे निजे ततः । देवस्य बाह्यपूजार्थमुच्यते यन्त्रमुत्तमम् ॥ २९ ॥
गोमयेनोपलिप्तायां पीठं भूमौ प्रविन्यसेत् । पूर्वोक्तगन्धपङ्केन संलिप्याब्जं वसुच्छदम् ॥ ३० ॥
विलिख्य कर्णिकासंस्थमग्निमण्डलसम्पुटम् । मादनं साध्यसहितं मन्त्रबीजं निवेशयेत् ॥ ३१ ॥
(तदूर्ध्वगैस्ततो वर्णैस्तदेव परिवेष्टयेत् । शक्रराक्षसवायूनां कोणगां कमलां लिखेत् ॥ ३२ ॥
अन्येषु च त्रिकोणेषु मायाबीजं प्रकल्पयेत् ।) कोणसन्धिषु तद्वर्णान् दलमूलेषु चाग्निशः ॥ ३३ ॥
गायत्रीं कामदेवस्य मालाणुं चाष्टगत्रगम् । रसाक्षरक्रमात् पश्चान्मातृकार्णैः प्रवेष्टयेत् ॥ ३४ ॥
धरापुरचतुर्दिक्षु रसां मायां च कोणगाम् । विलिख्यैवं महायन्त्रं पट्टे स्वर्णादिजे बुधः ॥ ३५ ॥
सम्यक् संजप्य सम्पूज्य धृतं च मनुजोत्तमैः । करोति लोकपूज्यत्वं राजवश्यं च सर्वदा ॥ ३६ ॥

यन्त्रोद्धारः प्रयोगे वक्ष्यते ।

कामदेवं चतुर्थ्यन्तं विद्महे तदनन्तरम् । ङेयुतं पुष्पबाणं च प्रवदेद् धीमहीति च ॥ ३७ ॥
तन्नोऽन्तेऽनङ्ग इत्युक्त्वा प्रवदेच्च प्रचोदयात् । ....॥

कामदेवं चतुर्थ्यन्तं कामदेवाय । विद्महे स्वरूपं । ङेयुतं पुष्पबाणं पुष्पबाणाय । धीमहि स्वरूपं । तन्नोऽनङ्गस्वरूपं । प्रचोदयात् स्वरूपम् ।

गायत्रीयं समाख्याता जपेदेनां प्रयत्नतः । सर्वगोपालमन्त्राणां जपादौ वश्यकारिणी ॥ ३८ ॥
हृदन्ते ङेयुतं कामं देवं सर्वजनप्रियम् । तथा सर्वजनस्यान्ते ङेन्तं सम्मोहनं वदेत् ॥ ३९ ॥
ज्वल संवीप्स्य मन्त्रज्ञः प्रज्वलेति प्रभाषयेत् । सर्वान्ते जनशब्दं च षष्ठ्यन्तं हृदयं ततः ॥ ४० ॥
ममेति च समुच्चार्य वशं प्रोक्त्वा कुरुद्वयम् । द्विठान्तो मारमालाणुश्चतुर्विंशद्द्वयाक्षरः ॥ ४१ ॥
जपादिसमये चायं कामबीजादिको भवेत् । राजादिसर्वलोकानां परो वश्यकरो मतः ॥ ४२ ॥

हृन्नमः । ङेयुतं कामदेवं कामदेवाय । सर्वजनप्रियं तथा सर्वजनप्रियाय । सर्वजन स्वरूपं । ङेन्तं सम्मोहनं सम्मोहनाय । ज्वल संवीप्स्य ज्वल २ । प्रज्वल स्वरूपं । सर्व स्वरूपं । जन षष्ट्यन्तं जनस्य । हृदयं स्वरूपं । मम स्वरूपं । वशं स्वरूपं । कुरुद्वयं कुरु २ । द्विठः स्वाहा । चतुर्बिंशद्द्वयम् अष्टाचत्वारिंशत् । तथा—

अस्मिन् मन्त्रे पीठपूजां कृत्वा पूर्वोक्तवर्त्मना । तत्र मूर्तिं प्रकल्प्यास्यां कृष्णमावाह्य पूजयेत् ॥ ४३ ॥
आसनप्रमुखैर्मन्त्री भूषान्तैरुपचारकैः मुहुर्न्यासक्रमेणैव पूजयेद्भक्तितत्परः ॥ ४४ ॥
आदौ सृष्टिः स्थितिः पश्चात्षडङ्गानि किरीटकम् । कुण्डलद्वितयं भूयो हरिं जलजकं गदाम् ॥ ४४ ॥

जलजं शङ्खम् ।

पद्मं च वनमालां च श्रीवत्सं कौस्तुभं तथा । चन्दनाक्षतपुष्पाद्यैः पुरोवन्मूलतोऽर्चयेत् ॥ ४६ ॥
षट्सु कोणेषु वह्न्यादि षडङ्गानि यजेत्पुरा । वासुदेवादिका मूर्तीः कोणकेसरगा यजेत् ॥ ४७ ॥
(शान्तिं श्रियं सरस्वत्या रतिं दिग्दलमूलगाः । ततः पूर्वादिपत्रेषु रुक्मिणीप्रमुखाः यजेत् ॥ ४८ ॥
दक्षवामक्रमात् पश्चादेकदैव समर्चयेत् ।) षोडशस्त्रीसहस्राणि देवदेवस्य शार्ङ्गिणः ॥ ४९ ॥
दलाग्रस्थास्ततः पूज्या निधयोऽष्टौ क्रमादमी । इन्द्रो नीलो मुकुन्दश्च मकरोऽनङ्गकच्छपौ ॥ ५० ॥
शङ्खपद्मौ च तद्बाह्ये लोकेशायुधपूजनम् । इत्थं सम्पूज्य गोविन्दं नैवेद्यं हविरर्पयेत् ॥ ५१ ॥

हवि पायसम् ।

खण्डाज्यदधिभिः पश्चाच्छत्रादीनि निवेदयेत् । स्तुत्वा प्रणम्य चोद्वास्य हरिं सावरणं हृदि ॥ ५२ ॥

पुनर्विन्यस्य सम्पूज्य स्वं जपेच्छक्तितो मनुम् । .... ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये श्रीकृष्णाय देवतायै नमः । गुह्ये क्लींबीजाय नमः (पादयोः स्वाहा शक्तये नमः) इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः, इति कृतांजलिरुक्त्वा, ह्रींश्रींक्लीं हृदयाय नमः । कृष्णाय शिरसे स्वाहा । गोविन्दाय शिखायै वषट् । गोपीजन कवचाय हुं । वल्लभाय नेत्रत्रयाय वौषट् । स्वाहा अस्त्राय फट । इति करषडङ्गन्यासं कृत्वा, मूलमन्त्रेण मूर्धादिपादान्तं व्यापकं कृत्वा, मूलपुटितां मातृकां विन्यस्य, संहारसृष्टिक्रमेण दशाक्षरोक्तप्रकारेण दश तत्त्वानि विन्यस्य पुनर्मूलमन्त्रेण प्रणवपुटितेन त्रिर्व्यापकं कृत्वा, पुनः षडङ्गानि विन्यस्य, शिरसि ह्रींनमः । भाले श्रीं० । भ्रुवोर्मध्ये क्लीं० । नेत्रयोः कृं० । श्रोत्रयोः ष्णां० । नासिकायां यं० । मुखे गों० । चिबुके विं० । गले दां० । बाहुमूलयोः यं० । हृदि गों० । उदरे पीं० । नाभौ जं० । लिङ्गे नं० । मूलाधारे वं० । कट्योः ल्लं० । जानुनोः भां० । जङ्घयोः यं० । गुल्फयोः स्वां० । पादयोः हांनमः । एवं सृष्ट्या विन्यस्य, हृदि ह्रींनमः । उदरे श्रीं० । नाभौ क्लीं० । लिङ्गे कृं० । मूलाधारे ष्णां० । कट्यां यं० । जानुनोः गों० । जङ्घयोः विं० । गुल्फयोः दां० । पादयोः यं० । शिरसि गों० । भाले पीं० । भ्रूमध्ये जं० । नेत्रयोः नं० । श्रोत्रयोः वं० । नासिकायां ल्लं० । मुखे भां० । चिबुके यं० । कण्ठे स्वां० । बाहुमूले हांनमः । इति स्थित्या विन्यस्य, पादादिमस्तकान्तं संहारेण विन्यस्येत् । एवं क्रमस्तु यतीनां, गृहस्थैस्तु संहारसृष्टिस्थितिक्रमेण कार्याः । वर्णिभिस्तु—स्थितिसंहारसृष्टिक्रमेण कार्य्या इति । ततः पूर्वोक्तमूर्तिपञ्जरन्यासं कृत्वा, पुनरप्रोक्तप्रकारेण सृष्टिस्थितिन्यासौ कृत्वा षडङ्गानि विन्यस्य, वक्ष्यमाणप्रकारेण वैष्णवमुद्रा दर्शयित्वा, दिग्बन्धं कृत्वा निजे देहे मूर्तिपञ्जरन्यासक्रमेण देवं सम्पूज्य, पुरतश्चन्दनादिना पीठे कुंकुमादिनाष्टदलं पद्मं विरच्य, तत्कर्णिकायां षट्कोणं कृत्वा, तन्मध्ये ससाध्यं कामबीजं विलिख्य "कृष्णाय" इत्यादिभिः सप्तदशभिरक्षरैः कामबीजं संवेष्टच, षट्कोणस्य पूर्वनिर्ऋतिवायुकोणेषु श्रीबीजं शिष्टकोणेषु मायाबीजं च विलिख्य, षट्कोणसन्धिषु पूर्वोक्तकृष्णषडक्षरमन्त्रवर्णानालिख्य, तत्केसरेषु प्रोक्तकामगायत्रीवर्णांस्त्रिशस्त्रिश आलिख्य, तद्दलेषु प्रोक्तमकरध्वजमालामन्त्रार्णान् षट्षडालिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैः सबिन्दुभिः संवेष्टच तद्बहिश्चतुरस्रं कृत्वा तस्य चतुर्दिक्षु श्रीबीजं कोणेषु मायाबीजं च आलिख्य, तत्र प्राग्वत् पीठपूजां कृत्वा मूर्तिकल्पनादिपुष्पोपचारान्ते देवस्य देहे सृष्टिन्यासक्रमेण स्थितिन्यासक्रमेण च सम्पूज्य, लयाङ्गत्वेन देवस्य देहे षडङ्गन्यासस्थाने षडङ्गानि सम्पूज्य, देवस्य शिरसि मूलमुच्चार्य किरीटाय नमः । कर्णयोः कुण्डलाभ्यां नमः । दक्षोर्ध्वहस्ते चक्राय नमः । वामोर्ध्वहस्ते शङ्खाय नमः । वामाधःकरे गदायै नमः । दक्षाधः करे पद्माय नमः । स्कन्धादिपादान्तं (नाभ्यन्तं वा) वनमालायै नमः । वक्षसि श्रीवत्साय० । कण्ठे कौस्तुभाय नमः । इति मूलेनैव सम्पूज्य, षट्कोणेषु प्राग्वत् षडङ्गानि सम्पूज्य, कोणकेसरेषु वासुदेवादिमूर्तीः दिग्गतकेसरेषु शान्त्यादिशक्तीश्च सम्पूज्य, दलेषु देवस्य दक्षवामक्रमेण रुक्मिण्याद्यष्टमहिषीः सम्पूज्य, षोडशसहस्रसंख्याभ्यो देवीभ्यो नमः इति देवस्य परितः सम्पूज्य, दलाग्रेषु—इन्द्राय नमः । नीलाय० । मुकुन्दाय० । मकराय० । अनङ्गाय० । कच्छपाय० । शङ्खाय० । पद्माय० । इति निध्यष्टकं सम्पूज्य लोकेशार्चादि प्राग्वत् समापयेदिति ॥ तथा—

एवमभ्यर्च्य देवेशं वेदलक्षं जपेन्मनुम् । सर्पिषा जुहुयात्पश्चाद्दशांशं तर्पयेत्ततः ॥ ५३ ॥
स्वाभिषेकं विधायथ ब्राह्मणान् भोजयेत्ततः । इत्थं साधितमन्त्रस्तु प्रयोगान् विदधीत वै ॥ ५४ ॥
पूजयित्वाऽनले कृष्णं श्वेतप्रसूनतण्डुलैः । अयुतं घृतसंयुक्तैर्हुत्वा तद्भस्म धारयेत् ॥ ५५ ॥
समस्तधनधान्याप्तिः स्त्रीवश्यं च भवेद् ध्रुवम् । रक्ताब्जैर्लक्षसंख्यं यो हुनेन्मधुरलोलितैः ॥ ५६ ।

गोघृतैर्वापि जुहुयात्तस्य लक्ष्मीः स्थिरा भवेत् । रक्तादिवसनाकांक्षी हुनेत्पुष्पैश्च तादृशैः ॥ ५७ ॥
मधुराक्तैर्घृताक्तैर्वाप्यष्टोत्तरसहस्रकम् । मधुना संयुतैः श्वेतकुसुमैरष्टसंयुतम् ॥ ५८ ॥
सहस्रमन्वहं हुत्वा मासमात्रेण साधकः । राज्ञः पुरोहितो भूयान्मन्त्रिणो वा न संशयः ॥ ५९ ॥
प्रयोगजपहोमादि दशाष्टादशवर्णजम् । मन्त्रेणानेन कुर्वीत ताभ्यां यन्त्रोक्तमादरात् ॥ ६० ॥
न्यासध्यानजपार्चादिहोमतो यो भजेन्मनुम् । रत्नकाञ्चनधान्याद्यैः समृद्धं तस्य मन्दिरम् ॥ ६१ ।
जायते हस्तगा तस्य सकला वसुधाऽचिरम् । पुत्रपौत्रकलत्राद्यैर्भुक्त्वा भोगान् बहूनिह ॥ ६२ ॥
अन्ते याति परं धाम वैष्णवं मुनिदुर्लभम् । .... ॥

इति । श्रीयन्त्रसारे—

षट्कोणकर्णिकामध्ये ससाध्य मदनं लिखेत् । षटसु कोणेषु षड्वर्णं चतुर्वर्णं चतुर्दले ॥ १ ॥
दशपत्रे केसरोद्यद्दशार्णैकैकवर्णके । विंशत्यर्णमनोर्वर्णान् क्रमाद् द्वौ द्वौ विलिख्य च ॥ २ ॥
मालामन्त्रेण मारस्य बाणैर्मातृकयापि च । वेष्टितं भूपुराश्रिस्थशक्तिश्रीवसुधास्मरम् ॥ ३ ॥
विंशत्यर्णमनोर्यन्त्रं प्रोक्तमेतद् यथाविधि । गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित् ॥ ४ ॥
धर्मार्थकाममोक्षायुः पुत्रधान्यधराप्रदम् । रक्षाकरं वश्यकारि कान्तिसौभाग्यकीर्तिदम् ॥ ५ ॥
किमत्र बहुनोक्तेन कांक्षितार्थसुरद्रुमम् । .... ॥

इति । अस्यार्थः— षट्कोणे कृत्वा तन्मध्ये ससाध्यं कामबीजं विलिख्य, षट्कोणेषु षडर्णं विलिख्य, बहिःस्थचतुष्पत्रेषु चतुरक्षरं विलिख्य, तद्बहिर्दशकेसरेषु दशाक्षरं विलिख्य, दशपत्रेषु विंशत्यर्णमन्त्रवर्णान् द्वौ द्वौ विलिख्य, बहिर्वृत्तचतुष्टयं कृत्वा तदन्तरालवीथीत्रयेऽभ्यन्तरवीथ्यां पूर्वोक्तकाममालामन्त्रेण तद्बहिर्वीथ्यां पूर्ववत् पञ्चबाणैस्तद्बहिर्वीथ्यां मातृकार्णैश्च निरन्तरं संवेष्टय, बहिःस्थचतुरस्रकोणेषु प्रतिकोणं शक्तिश्रीवसुधाकामबीजानि लिखेत् । एतद्यन्त्रमुक्तफलदम् । पूर्वोक्तं पूजायन्त्रं साधितं धारणयन्त्रं भवति । तदपि यथाविधि (कृष्णं ? धृतं) यथोक्तफलदं भवति ॥ सारसंग्रहे—

रमामायास्मरान्तं च चतुर्थ्यां कृष्णमीरयेत् । गोविन्दं ङेयुतं चाथ स्वाहान्तो द्वादशाक्षरः ॥ १ ॥

रमा श्रीबीजं । माया तद्बीजं । स्मरः क्लीं । चतुर्थ्यां कृष्णं कृष्णाय । गोविन्दं ङेयुतं गोविन्दाय इति । तथा––

मन्त्रे ब्रह्मा मुनिः प्रोक्तो गायत्रं छन्द ईरितम् । श्रीकृष्णो देवता चन्द्रधरेन्द्वग्न्यब्धिनेत्रकैः ॥ २ ॥
मूलमन्त्रभवैर्वर्णैः षडङ्गानि प्रकल्पयेत् । ध्यानपूजाजपाद्यस्य विंशार्णोक्तवदाचरेत् ॥ ३ ॥
कामयन् सर्वसम्पत्ति मन्त्रमेनं भजेद् बुधः । .... ॥

ॐश्रीं हृत् । ह्रीं शिरः । क्लीं शिखा । कृष्णाय कवचं । गोविन्दाय नेत्रं । स्वाहा अस्त्रं । तथा—

लक्ष्मीशक्तिमनोजातबीजान्ते दशवर्णकम् । काममायेन्दिरान्तोऽयं षोडशार्णो मनुर्मतः ॥ ४ ॥

लक्ष्मीः श्रीबीजं । शक्तिर्मायाबीजं । मनोजातः कामबीजं । दशवर्णाः पूर्वोक्ताः । कामस्तद्बीजं । माया ह्रीं । इन्दिरा श्रीबीजं ।

ऋष्यादिकं दशार्णोक्तं पञ्चाङ्गमपि तादृशम् । पूजा विंशाक्षरप्रोक्ता ध्यानं तस्य निगद्यते ॥ ५ ॥
वराभयकराब्जाभ्यामालिङ्गन्तं प्रियाङ्गके । अब्जोत्पललसद्धस्ते ताभ्यामालिङ्गितं मुदा ॥ ६ ॥
धारयन्तं रथाङ्गं च शङ्खं भव्यकलेवरम् । एवं ध्यात्वा जपेन्मन्त्रं दशलक्षं समाहितः ॥ ७ ॥
तावत्संख्यासहस्राणि हुनेदाज्यमनुत्तमम् । तर्पणाद्यैर्भवेन्मन्त्रः सिद्धः स्वेष्टफलप्रदः ॥ ८ ॥
मायाश्रीसहितो मन्त्रो दशार्णो द्वादशाक्षरः । विधानमस्य विज्ञेयं षोडशार्णोक्तवर्त्मना ॥ ९ ॥

सुगमम् ।

काममायेन्दिरापूर्वो मायाश्रीकामतस्तथा । लक्ष्मीमायास्मराद्यश्च मन्त्रराजो दशाक्षरः ॥ १० ॥
त्रयोदशाक्षरा मन्त्रास्त्रय एते उदाहृताः । मुन्याद्यङ्गविधिस्त्वेषां पंक्त्यर्णोक्तविधानतः ॥ ११ ॥
ध्यानं तृतीयमन्त्रे तु दशार्णोक्तमुदाहृतम् । विंशार्णोक्तं द्वितीये तु प्रथमेऽथ निगद्यते ॥ १२ ॥
दरारिचापसद्बाणगुणांकुशकराम्बुजम् । वेणुमादाय हस्ताभ्यां वादयन्तं मुदान्वितम् ॥ १३ ॥
रविमण्डलगं कृष्णं ध्यायेदिष्टफलाप्तये । अङ्गैरिन्द्रादिवज्राद्यैरर्चना सर्वसिद्धिदा ॥ १४ ॥
बाणलक्षं जपित्वाग्नौ दशांशं हविषा हुनेत् । तर्पणादि ततः कुर्यात्सिद्धमन्त्रः समाचरेत् ॥ १५ ॥
कान्तिपुष्टिधनारोग्यकामो मन्त्रैः प्रयोगकान् । ....॥

बाणलक्ष पञ्चलक्षम् । तथा—

अष्टादशलिपिर्मन्त्रः कामान्तो वसुपुत्रदः । मुनिर्नारद आख्यातो गायत्री छन्द ईरितम् ॥ १६ ॥
श्रीकृष्णो देवताङ्गानि षट्दीर्घेण स्मरेण हि । क्लांक्लीं इत्यादिना षडङ्गकम् ।

बालं नीलमुदारकान्तिविभवं हस्ताम्बुजे दक्षिणे
बिभ्राणं परिपक्वदौग्धकवलं नन्दात्मजं सुन्दरम् ।
वामे तद्दिनजातमुद्धतरसं दध्युत्थपिण्डं शुभं
वैयाघ्रेण नखेन राजितगलं त्यक्तांशुकं भावयेत् ॥ १७ ॥

अङ्गलोकेशवज्राद्यैरर्चनास्य समीरिता । एवं ध्यात्वा जपेन्मन्त्रमेकलक्षमनन्यधीः ॥ १८ ॥
शर्कराघृतयुक्तेन दशांशं हविषा हुनेत् । तर्पणादि ततः कुर्यात्पूर्वोक्तविधिना सुधीः ॥ १९ ॥
सरोजमध्यगं कृष्णं पूजयित्वा विधानतः । तस्यैव श्रीमुखाम्भोजे तर्पयेन्मन्त्रमुच्चरन् ॥ २० ॥
गोदुग्धेन सुशुद्धेन सुपक्वैः कदलीफलैः । दध्ना च नवनीतेन पुत्रमाप्नोति वत्सरात् ॥ २१ ॥
यद्यदिच्छति तत्सर्वं तर्पणेनैव सिद्धयति । ....॥

इति । तथा—

अधरो बिन्दुमान् कामो ङेयुक् कृष्णश्च मायया । गोविन्दो ङेयुतो लक्ष्मीर्दशार्णस्तदनन्तरम् ॥ २२ ॥
भृगुर्मनुविसर्गाढ्यो द्वाविंशार्णो मनुर्मतः । वागैश्वर्यप्रदो नित्यं साधकानामभीष्टदः ॥ २३ ॥
अष्टादशलिपिप्रोक्तं मुन्याद्यं चाङ्गकल्पनम् । ....॥

अधर ऐ, बिन्दुमान् बिन्दुयुक्तस्तेन ऐं । कामस्तद्बीजं । ङेयुक् कृष्णः कृष्णाय । मायया तद्बीजेन सहेति शेषः । गोविन्दो ङेयुतो गोविन्दाय । लक्ष्मीः श्रीबीजं । दशार्णः पूर्वोक्तः । भृगुः सकारः, मनु औ, विसर्गः अः, तेन सौः । विंशाक्षरोक्ता सपर्या । ध्यानमुच्यते ।

दक्षोर्ध्वे हस्तपद्मे स्फटिकजपवटीं मातृकावर्णरूपां
वामोर्ध्वे सर्वविद्याकलितमभिनवं पुस्तकं संदधानः ।
शब्दब्रह्मैकवेणुं करयुगलधृतं वादयञ्श्रेयसे वो
गायन् पीताम्बरोऽसौ भवतु मुररिपुः श्यामलः कोमलाङ्गः ॥ २४ ॥

मयूरपत्रसंनद्धकेशजालश्रियान्वितः । सर्वज्ञो मुनिवृन्देन सेवितः सर्ववेदिना ॥ २५ ॥
इत्थं संचिन्त्य देवेशं नारीनेपथ्यधारिणम् । ....॥

नेपथ्यमलङ्कारस्तेन स्त्रीरूपधारी ध्येयः । "युवतीवेशलावण्यरमणीयतनुं हरिम्" । इति गौतमीयतन्त्रवचनात् । क्लींकृष्णाय हृदयाय० । गोविन्दाय शिरसे० । गोपीजन शिखायै० । वल्लभाय कवचाय० । स्वाहा अस्त्राय० । इति पञ्चाङ्गम् । अन्यत्सुगमम् । तथा—

वेदलक्षं मनुं जप्त्वा किंशुकैर्मधुराप्लुतैः । दशांशं जुहुयादग्नौ साधको मन्त्रसिद्धये ॥ २६ ॥

तर्पणादि ततः कुर्यान्मन्त्री पूर्वोक्तवर्त्मना । मन्त्रमेतं जपेद्यस्तु मन्त्री पूर्वोक्तवर्त्मना ॥ २७ ॥
देवस्यानुग्रहात्तस्य मुखपद्माद्विजृम्भते । गङ्गातरङ्गकल्लोलवाग्विलाससमनोहरा ॥ २८ ॥
गद्यपद्यात्मिका सम्यक् प्रचण्डा भारती सदा । अशेषवेदवेदार्थसर्वशास्त्रविशारदः ॥ २९ ॥
राजैश्वर्यं महत्प्राप्य मुक्तिमेति परां कृती ।···· ···· ···· ···· ····॥

इति । तथा—

वेदादिहृदयस्यान्ते ङेयुतं भगवत्पदम् । नन्दपुत्राय नन्दान्ते वपुषे श्री दशाक्षरः ॥ ३० ॥
अष्टाविंशाक्षरो मन्त्रो भजतां कामदो मणिः । ···· ···· ···· ···· ···· ॥

वेदादिः प्रणवः । हृदयं नमः । ङेयुतं भगवत्पदं भगवते । नन्दपुत्राय स्वरूपं । नन्दवपुषे स्वरूपं । श्री स्वरूपं । दशाक्षरः पूर्वोक्तः । तथा—

नारदो मुनिरस्य स्यादुष्णिक्छन्द उदाहृतम् । देवता नन्दपुत्रोऽस्य चिन्तितेष्टफलप्रदः ॥ ३१ ॥
आचक्रादिपदैरङ्गपञ्चकं परिकीर्तितम् । रत्नपात्रं करे दक्षे हेमवेत्रं च वामतः ॥ ३२ ॥
वहन्तं भावयेत्कृष्णं स्त्रीभ्यामालिङ्गितं मुदा । अङ्गलोकेशवज्राद्यैरर्चना फलसिद्धये ॥ ३३ ॥
दशायुतं जपित्वान्ते जुहुयाद् हविषायुतम् । साधिते साधको मन्त्री भवेत् सर्वसमृद्धिमान् ॥ ३४ ॥

इति । तथा—

नन्दपुत्राय शब्दान्ते श्यामलाङ्गाय भाषयेत् । ङेन्तं बालवपुः प्रोक्त्वा चतुर्थ्या कृष्णमीरयेत् ॥ ३५ ॥
तारगोविन्दशब्दान्ते दशार्णं च मनुं वदेत् । मन्त्रोऽयं साधुसंप्रोक्तो द्वात्रिंशद्वर्ण उत्तमः ॥ ३६ ॥
मुन्याद्या नारदानुष्टुप्कृष्णा अन्यत्पुरोक्तवत् । ···· ···· ···· ···· ···· ॥

पुरोक्तवत् अष्टाविंशाक्षरोक्तवत् ॥ तथा—

प्रणवान्ते रमा माया हृदयं भगवांस्ततः । ङेयुक् च नन्दपुत्राय च्छगलाण्डोऽप्यनन्तयुक् ॥ ३७ ॥
(इन्द्रतो वपुषे ब्रूयात् श्यामलाङ्गं च ङेयुतम् ।) अष्टादशलिपिर्मन्त्रो द्विचत्वारिंशदर्णवान् ॥ ३८ ॥
रमा श्रीबीजं । माया तद्बीजं । ङेयुग्भगवान् भगवते । नन्दपुत्राय स्वरूपं । छगलाण्डो बकारः अनन्त आ, तेन बा । इन्द्रो ल । वपुषे स्वरूपं । श्यामलाङ्गं ङेयुतं श्यामलाङ्गाय । अष्टादशलिपिः पूर्वोक्तः । तथा—

ब्रह्मानुष्टुप् च कृष्णाख्या मुन्याद्याः कथिता बुधैः । अन्यत्सर्वं पुरोक्तेन विधानेन समं भवेत् ॥ ३९ ॥
वह्न्यैकादशभूतेषुधृतिसंख्यैस्तु मन्त्रवित् । मूलमन्त्रभवैर्वर्णैः पञ्चाङ्गानि प्रकल्पयेत् ॥ ४० ॥

वह्नयस्त्रयः । भूतानि पञ्च । इषवः पञ्च । धृतिरष्टादश । ॐश्रींह्रीं हृदयाय० । नमो भगवते नन्दपुत्राय शिरः० । बालवपुषे शिखा० । श्यामलाङ्गाय कवचाय० । क्लींकृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा अस्त्राय० ॥ अन्यदष्टाविंशत्यर्णवत् । "मन्त्रोऽयं सकलैश्वर्यकांक्षितैकार्थसाधनम् ।" इति तथा—

ध्रुवश्च हृदयं चैव चतुर्थ्या भगवत्पदम् । रुक्मिणीवल्लभायान्यत् स्वाहान्तः षोडशाक्षरः ॥ ४१ ॥

ध्रुवः । प्रणवः । हृदयं नमः । चतुर्थ्या भगवत्पदं भगवते । रुक्मिणीवल्लभाय स्वरूपम् ।

मुनिर्नारद आख्यातश्छन्दोऽनुष्टुबुदीरितम् । रुक्मिणीवल्लभः कृष्णो देवता सर्वसिद्धिदः ॥ ४२ ॥
भूद्वन्द्वश्रुतिपातालयुग्मार्णैरङ्गकल्पनम् । (भूः एकः । श्रुतयश्चत्वारः । पातालाः सप्त ।)
कलायश्यामलं कृष्णं नानालङ्कारमण्डितम् । पीतकौशेयसद्वस्त्रं स्वर्णवेत्रविभूषितम् ॥ ४३ ॥
करपद्मेन दक्षेण श्लिष्यन्तं वामपाणिना । चिन्तारत्नवतीं देवीमङ्कगां काञ्चनप्रभाम् ॥ ४४ ॥
वामहस्तधृताम्भोजान्येनालिङ्गितप्रियाम् । अंगैर्नारदमुख्यैश्च लोकपालैस्तदायुधैः ॥ ४५ ॥
पूजनं धर्मकामार्थनिःश्रेयसफलावहम् । एकलक्षं जपेन्मन्त्रं हुनेन्मधुरलोलितैः ॥ ४६ ॥
दशांशं कमलैः पश्चात् तर्पणादि समाचरेत् । महदैश्वर्यवश्यादि कांक्षिभिः सेव्यतां मनुः ॥ ४७ ॥

ॐहृत् । नमः शिरः । भगवते शिखा । रुक्मिणीवल्लभाय कवचं । स्वाहा अस्त्रम् ॥ तथा—

वदेल्लीलादस्यान्ते दण्डगोपीजनं पुनः । संसक्तदोःपदं पश्चाद् दण्डबालपदं वदेत् ॥ ४८ ॥
रूपमेघपदं प्रोक्त्वा श्यामं भगपदं वदेत् । वन् विष्णो वह्निवध्वन्त एकोनत्रिंशदक्षरः ॥ ४९ ॥

लीलादण्डगोपीजनसंसक्तदोर्दण्डबालरूपमेघश्याम भगवन् विष्णो इति पदानि स्वरूपाणि । वह्निवधूः स्वाहा ।

मन्त्रो निखिलसद्वश्यसिद्धिसंपत्प्रदो मतः । नारदोऽस्य मुनिश्छन्दो गायत्री देवता मता ॥ ५० ॥
लीलादण्डमहाविष्णुः सर्वदेवौघवन्दितः । चतुर्दशचतुर्वेदत्र्यक्षरैरङ्गकल्पनम् ॥ ५१ ॥

लीलादण्डगोपीजनसंसक्तदोर्दण्ड हृत् । बालरूप शिरः । मेघश्याम शिखा । भगवन् कवचं । विष्णो स्वाहा अस्त्रम् ।

वामहस्ताम्बुजस्थेन लीलादण्डेन गोपिकाः । पुराङ्गनाश्च साकूतं मोहयन्तं महाप्रभुम् ॥ ५२ ॥
आत्मनः प्रियमित्रस्य स्कन्धन्यस्तान्यहस्तकम् । हतकंसं स्मरेत् कृष्णमप्रमेयपराक्रमम् ॥ ५३ ॥
अङ्गैरिन्द्रादिवज्राद्यैरर्चनास्य मतान्वहम् । लक्षमेकं जपेन्मन्त्रं दशांशं तिलतण्डुलैः ॥ ५४ ॥
त्रिमध्वक्तैर्हुनेत्पश्चात्तर्पणादि समाचरेत् । नियमस्थो नरो योऽन्तुं लीलादण्डमनुं भजेत् ॥ ५५ ॥
सुभगः स जगद्वन्द्यो रमाया भवनं भवेत् । .... ॥

इति । तथा—

शार्ङ्गी सद्येन सन्दीप्तो बाल इन्द्रद्वयं तथा । विलोमाद्यतृतीयश्च आनान्तोऽथ समीरणः ॥ ५६ ॥
कृशानुदयितोपेतो मन्त्रोऽयं धातुवर्णकः । .... ॥

शार्ङ्गी ग । सद्य ओ, तेन गो । बाल व । इन्द्रद्वयं ल्ल । विलोमाद्यतृतीयो भ, अनन्त आ, तेन भा । समीरणो य । कृशानुदयिता स्वाहा । धातुवर्णः सप्तार्णः । तथा—

नारदो मुनिरस्य स्यादुष्णिक्छन्दश्च देवता । गोवल्लभो हरिः प्रोक्तो गवां वृद्धिकरः परः ॥ ५७ ॥
दशार्णोक्तविधानेन पञ्चाङ्गविधिरीरितः । इन्द्रनीललसत्कान्ति पीतवाससमच्युतम् ॥ ५८ ॥
सर्पारिपिच्छनिकरैः सम्यक् क्लृप्तावतंसकम् । वेणुं वामकरे दक्षे यष्टिं पाशं च बिभ्रतम् ॥ ५९ ॥
कपिलाजातमध्यस्थमाह्वयन्तं च ता मुदा । एवं ध्यात्वा यजेत् सम्यक् पीठे पूर्वोदिते शुभे ॥ ६० ॥
आदावङ्गानि सम्पूज्य पूजयेद्गोगणाष्टकम् । सुवर्णवर्णा प्रथमा द्वितीया गौरपिङ्गला ॥ ६१ ॥
तृतीया रक्तपिङ्गाक्षी चतुर्थी गलपिङ्गला । पञ्चमी बभ्रुवर्णा स्यादुत्तमा कपिला गवाम् ॥ ६२ ॥
षष्ठी चतुष्कपिङ्गा स्यात् सप्तमी समपिङ्गला । अष्टमी कपिला गोषु विज्ञेया पुच्छपिङ्गला ॥ ६३ ॥
पुरसुन्दरमुखास्तेषामायुधानि ततः परम् । ध्यात्वा मन्त्रं जपेत्सम्यग् वर्णलक्षं जितेन्द्रियः ॥ ६४ ॥
तत्सहस्रं हुनेन्मन्त्री गोदुग्धैस्तु पुरोक्तवत् । गोदुग्धैः प्रत्यहं साग्रं सहस्रं जुहुयात्तु यः ॥ ६५ ॥
मासार्धेन गवां वृद्धिर्जायते तस्य भूयसी । दशाक्षरोक्तवत् सर्वं विधानं च प्रकल्पयेत् ॥ ६६ ॥

इति ॥ तथा—

ब्रूयात् तारहृदोरन्ते चतुर्थ्या भगवत्पदम् । अस्थ्यग्निवामनेत्रान्ते गोविन्दं तादृशं वदेत् ॥ ६७ ॥
रव्यर्णो मनुराख्यातो नारदोऽस्य मुनिर्भवेत् । गायत्री छन्द इत्युक्तं देवता कृष्ण ईरितः ॥ ६८ ॥

तारः प्रवणः । हृन्नमः । चतुर्थ्या भगवत्पदं भगवते । अस्थि श । अग्नी र । वामनेत्रं ईं, तेन श्री । गोविन्दं तादृशं चतुर्थ्यायुतं तेन गोविन्दाय ।

चन्द्रनेत्राब्धिबाणार्णैर्मन्त्रेणाप्यङ्गकल्पनम् । कल्पद्रुमतले रम्ये रत्नसिंहासने शुभे ॥ ६९ ॥
सर्वलक्षणसन्दीप्तं निविष्टं नन्दनन्दनम् । प्रस्नुतस्तनभारेण गोवृन्देन वृतं स्मरेत् ॥ ७० ॥

मेघश्यामतनुं सुपीतवसनं वेत्रं दरं बिभ्रतं
हस्ताभ्यां कमलायताक्षमनिशं सौन्दर्यसीमास्पदम् ।
देवाधीश्वरहस्तयुग्मविलसत्सौवर्णसत्कुम्भतो
निर्यातामृतधारया हरिमहं संसिच्यमानं भजे ॥ ७१ ॥

दक्षे वेत्रं । वामे शङ्खः इत्यायुधध्यानम् ।

सम्पूज्य वैष्णवं पीठं तत्रावाह्य यजेद्धरिम् । देवस्य दक्षिणे भागे कर्णिकायां तु रुक्मिणीम् ॥ ७२ ॥
सत्यभामां च तद्वामे वासवं चाग्रदेशतः । सुरभिं पृष्ठतोऽभ्यर्च्य दलमूलेषु मन्त्रवित् ॥ ७३ ॥
हृदादिकवचान्तानि दिग्दलेषु समर्चयेत् । चत्वार्यङ्गानि कोणेषु सम्यगस्त्रं यजेत्ततः ॥ ७४ ॥
पूर्वादिपत्रमध्येषु कालिन्दीं रोहिणीं ततः । नाग्नजित्यादिकाश्चापि षट्शक्तीः क्रमशोऽर्चयेत् ॥ ७५ ॥
तद्बहिर्वह्निकोणादिशिवान्तं सम्यगर्चयेत् । किंकिणीधामयष्टीस्तु वेणुं पश्चात्पुरोगतौ ॥ ७६ ॥
श्रीवत्सकौस्तुभौ पूज्यौ वनमालां पुरोऽर्चयेत् । पूर्वादि तद्बहिः शङ्खं गदां चक्रं ततः सुधीः ॥ ७७ ॥
वसुदेवाभिधं पश्चाद् देवकीं नन्दगोपकम् । यशोदां धेनुगोपालगोपिकाः पूजयेत्ततः ॥ ७८ ॥
लोकपालांस्तदस्त्राणि कुमुदादींश्च पूजयेत् । उत्तरे तद्बहिः पश्चाद्विष्वक्सेनं विधानतः ॥ ७९ ॥
कुमुदः प्रथमो ज्ञेयः कुमुदाक्षो द्वितीयकः । पुण्डरीकस्तृतीयश्च वामनस्तदनन्तरम् ॥ ८० ॥
शंकुकर्णः पञ्चमश्च सर्वनेत्रस्ततः परः । सुमुखः सप्तमः पश्चादष्टमः सुप्रतिष्ठितः ॥ ८१ ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि नारदाय ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये श्रीकृष्णाय देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ॐहृदयाय नमः । नमः शिरसे स्वाहा । भगवते शिखायै० । श्रीगोविन्दाय कवचाय० । ॐनमोभगवते श्रीगोविन्दाय अस्त्राय० । इति पञ्चाङ्गानि प्राग्वद्विन्यस्य, ध्यानादिपुष्पोपचारान्ते कर्णिकायां देवस्य दक्षिणे श्रीरुक्मिण्यै नमः । वामे सत्यभामायै नमः । अग्रे इन्द्राय० । पृष्ठे सुरभ्यै नमः । दिग्गतकेसरेषु हृदयादिकवचान्तानि कोणकेसरेषु चास्त्रं सम्पूज्य, दलेषु देवाग्रादि——कालिन्द्यै नमः । रोहिण्यै० । नाग्नजित्यै० । सुनन्दायै० । मित्रविन्दायै० । सुलक्षणायै० । जाम्बवत्यै० । सुशीलायै० । अष्टदलाद्बहिः चतुरस्राभ्यन्तरे वह्निकोणादि—किङ्किणीभ्यो नमः । दामभ्यो० । यष्टचै० । वेणवे० । इति ईशानान्तमभ्यर्च्य, देवाग्रे—श्रीवत्साय नमः । कौस्तुभाय० । वनमालायै० । चतुरस्रे देवाग्रादिप्रादक्षिण्येन——शङ्खाय नमः । गदायै० । चक्राय० । वसुदेवाय० । देवक्यै० । नन्दगोपाय० । यशोदायै० । धेनुभ्यो० । गोपालेभ्यो० । गोपिकाभ्यो० इति सम्पूज्य, लोकपालांस्तदस्त्राणि च तद्बहिः सम्पूज्य, तद्बहिः——कुमुदाय नमः । कुमुदाक्षाय० । पुण्डरीकाय० । वामनाय० । शंकुकर्णाय० । सर्वनेत्राय० । सुमुखाय० । सुप्रतिष्ठिताय० । इति । तद्बहिर्देवस्योत्तरे——विष्वक्सेनाय नमः इति सम्पूज्य, धूपदीपादि सर्वं प्राग्वत् कुर्यादिति । तथा——

एवं संचिन्त्य देवेशं वर्णलक्षं जपेन्मनुम् । तत्सहस्राणि गोक्षीरैर्जुहुयात् तर्पयेत्ततः ॥ ८२ ॥
ब्राह्मणाराधनान्तं तु प्राग्वत्कुर्यादतन्द्रितः । दिनादौ चाथ मध्याह्ने समयत्रितये तथा ॥ ८३ ॥
गोष्ठाभ्याशगतं कृष्णमर्चयन् विधिनामुना । भक्त्या परमयोपेतो गोभ्यश्च तृणमर्पयन् ॥ ८४ ॥
दार्त्र्यायुर्निर्भयश्चैव धनधान्यधरादिभिः । पुत्रैः पौत्रैश्च सन्मित्रै राढ्योऽन्ते विष्णुमेति च ॥ ८५ ॥

इति ॥ तथा——

स्मृतिराप्यायनीयुक्ता सृष्टिरिन्धिकयान्विता । क्रिया दीर्घा प्रतिष्ठाढ्या वरदा तादृशी मता ॥ ८६ ॥
क्षुधा दीर्घा च तन्द्राख्या रसनादीपिता भवेत् । अष्टाक्षरैः समाख्यातो मूलमन्त्रो मनीषिभिः ॥ ८७ ॥

स्मृतिः ग, आप्यायनी ओ, तेन गो । सृष्टिः क, इन्धिका उ, तेन कु । क्रिया ल । दीर्घा न, प्रतिष्ठा

आ, तेन ना । वरदा थ, तादृशी आकारयुक्ता तेन था । क्षुधा य । दीर्घा न । तन्द्रा म, रसना विसर्गः, तेन मः । तथा--

ब्रह्मा मुनिस्तु गायत्री च्छन्दो देवो हरिर्मतः । वर्णद्वन्द्वक्रमादङ्गं सकलेनापि कल्पयेत् ॥ ८८ ॥

वन्दे नीलकलेवरं रुचिरया कान्त्या महत्या युतं
बालं कुन्तलजालरुद्धनयनं पश्चाद्दिकं चाङ्गने ।
धावन्तं रसनासुनूपुरमणिग्रैवेयहाराङ्गदै-
रादीप्तं सरलं स्तुतं मुनिगणैर्हृष्टं यशोदासुतम् ॥ ८९ ॥

श्रीकृष्णं पूजयेन्नित्यं पीठे पूर्वसमीरिते । दिग्विदिक्क्रमतः पूर्वं पूजयेदङ्गपञ्चकम् ॥ ९० ॥
दिक्पत्रेषु यजेन्मूर्तीर्वासुदेवादिकास्ततः । रुक्मिणीं सत्यभामां च लक्ष्मणां तदनन्तरम् ॥ ९१ ॥
ततो जाम्बवतीं मन्त्री कोणपत्रेषु पूजयेत् । तद्बहिर्वासवादीनां वज्रादीनां च पूजनम् ॥ ९२ ॥

इति । अथ प्रयोगः--तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये श्रीकृष्णाय देवतायै नमः । इति विन्यस्य पूर्ववद्विनियोगमुक्त्वा, गोकु हृदयाय नमः । लना शिरसे स्वाहा । थाय शिखायै० । नमः कवचाय० । गोकुलनाथाय नमः अस्त्राय० । इति पञ्चाङ्गानि विन्यस्य, ध्यानादिपुष्पोपचारान्ते देवाग्रादिकेसरचतुष्केऽङ्गचतुष्टयं कोणकेसरेषु अस्त्रमिति पञ्चाङ्गानि विन्यस्य, दिग्दलेषु वासुदेवादिमूर्तिचतुष्टयं सम्पूज्य, कोणपत्रेषु--रुक्मिण्यै नमः । सत्यभामायै०। लक्ष्मणायै० । जाम्बवत्यै० । इति सम्पूज्य दिगीशाद्यीदि प्राग्वत्कुर्यादिति । तथा--

सम्पूज्यैवं मनुं जप्त्वा वर्णलक्षं हुनेत्ततः । वसुसाहस्रसंख्यातैः पलाशोत्थसमिद्वरैः ॥ ९३ ॥
पायसैरथवाज्याक्तैस्तर्पणादि ततश्चरेत् । मन्त्रमेनं भजन्नित्थमन्वहं श्रद्धयान्वितः ॥ ९४ ॥
सर्वैश्वर्यसमृद्धोऽन्ते विष्णुसायूज्यमाप्नुयात् । .... ॥

इति । तथा—

ध्रुवो रमा महामाया कामान्ते ङेयुतं वदेत् । श्रीकृष्णं तादृशं चैव श्रीगोविन्दमपीरयेत् ॥ ९५ ॥
श्रीगोपीजनशब्दान्ते वल्लभाय ततो वदेत् । त्रिः श्रीमत्यद्भुतो मन्त्रः सिद्धगोपालसंज्ञकः ॥ ९६ ॥

ध्रुवः प्रणवः । रमा श्रीबीजं । महामाया भुवनेशीबीजं । कामः कामबीजं । ङेयुतं श्रीकृष्णं श्रीकृष्णाय । तादृशं गोविन्दं श्रीगोविन्दाय । श्रीगोपीजनवल्लभाय स्वरूपं । त्रिः श्रीं त्रिवारं श्रीबीजं च वदेदित्यर्थः ।

सेवितौ वैनतेयेन माधवौ मण्डपस्थितौ । रमन्तौ दिव्यभावेन बलकृष्णौ तु संस्मरेत् ॥ ९७ ॥

इति ॥ तथा--

सर्गी तिथीशयुक् चक्री मन्त्र एकाक्षरो भवेत् । द्व्यर्णः कृष्णेति ताराद्यो गुणवर्णोऽयमेव हि ॥ ९८ ॥

चक्री ककारः सर्गी विसर्गयुक्तः तिथीशः ऋ, तेन कृः इति मन्त्रः ॥ कृष्ण द्व्यर्णः । अयं द्व्यर्णस्ताराद्यः प्रणवाद्यश्चेद् गुणवर्णस्त्र्यक्षरः । ॐकृष्ण इति ॥

वेदार्णः स चतुर्थ्यन्तः कृष्णाय हृदयान्तकः । (कृष्णाय हृदयं चेति पञ्चार्णोयं मनुर्मतः) ॥ ९९ ॥

स त्र्यर्णश्चतुर्थ्यन्तश्चेद्वेदार्णः । ॐकृष्णाय इति ॥ कृष्णाय स्वरूपं । हृन्नमः । एष पञ्चार्णः कृष्णाय नमः इति ॥

बाणार्णः कामयुग्मान्तः कृष्णायेति परो मनुः । गोपालो ङेयुतो मन्त्रो द्विठान्तोऽयं षडक्षरः ॥ १०० ॥

बाणार्णः पञ्चाक्षरोऽस्य पूर्वेण सम्बन्धः । कामयुग्मं कामबीजद्वयं तयोरन्तर्मध्ये कृष्णाय स्वरूपं । परः पञ्चवर्ण इत्यपरः । क्लींकृष्णायक्लीं इति । गोपालो ङेयुतो गोपालाय । द्विठः स्वाहा । गोपालाय स्वाहा इति ॥

मारान्ते ङेयुतं कृष्णं षडर्णोऽन्यः शिरोऽन्तकः । ङेन्तः कृष्णश्च गोविन्दस्तादृक् सप्ताक्षरो मनुः ॥ १० ॥

मारः कामबीजं । ङेयुतं कृष्णं कृष्णाय । शिरः स्वाहा । क्लींकृष्णाय स्वाहा इति ॥ ङेन्तः कृष्णः कृष्णाय । गोविन्दस्तादृक् गोविन्दाय । कृष्णाय गोविन्दाय इति ॥

रमामायास्मरान्ते चतुर्थ्या कृष्णमीरयेत् । कामान्तः सप्तवर्णोऽयं द्वितीयः परिकीर्तितः ॥ १०२ ॥

रमा श्रीबीजं । माया शक्तिबीजं । स्मरः कामबीजं । चतुर्थ्या कृष्णं कृष्णाय । कामस्तद्बीजं । श्रींह्रींक्लीं कृष्णायक्लीं इति ॥

कामः कृष्णाय गोविन्दश्चतुर्थ्याष्टाक्षरो मनुः । द्वितीयोऽष्टाक्षरो ङेयुक् दधिभक्षणठद्वयम् ॥ १०३ ॥

कामः कामबीजं । कृष्णाय स्वरूपं । गोविन्दश्चतुर्थ्या गोविन्दाय । क्लींकृष्णाय गोविन्दाय इति ॥ ङेयुग् दधिभक्षणः दधिभक्षणाय । ठद्वयं स्वाहा ॥

सुप्रसन्नात्म–शब्दान्ते ने हृद्वस्वर्णकोऽपरः । स्मरः कृष्णाय गोविन्दो ङेन्तोऽनङ्गो नवाक्षरः ॥ १०४ ॥

सुप्रसन्नात्मने स्वरूपं । हृन्नमः । वस्वर्णोऽष्टाक्षरः ॥ स्मरः कामबीजं । कृष्णाय स्वरूपं । गोविन्दो ङेन्तो गोविन्दाय । अनङ्गः कामबीजम् ॥

अयमेव हृदन्तोऽन्यो विना कामं नवाक्षरः । (हृन्नमः । विना कामं कामद्वयविधुरः ।)

कामसम्पुटितं पिण्डं श्यामलाङ्गश्च ङेयुतः । हृद्युतो दशवर्णाढ्यः सर्वसम्पत्समृद्धिदः ॥ १०५ ॥

कामबीजपुटितं पिण्डं ग्लौं इति । श्यामलाङ्गः ङेयुतः श्यामलाङ्गाय हृन्नमः ।

बालान्ते वपुषे कृष्णं ङेन्तं स्वाहान्तिकोऽपरः । कामः कृष्णाय बालान्ते वपुषे वह्निवल्लभा ॥ १०७ ॥

बालवपुषे स्वरूपं । कृष्णं ङेन्तं कृष्णाय । अपरोऽन्यो दशाक्षरः ॥ कामः कामबीजं । कृष्णाय स्वरूपं बालवपुषे स्वरूपं । वह्निवल्लभा स्वाहा । अयमेकादशाक्षरः ॥ तथा—

नारदो मुनिरेतेषां मन्त्राणां छन्द उत्तमम् । सम्यग् देव्यादिका प्रोक्ता गायत्री देवता पुनः ॥ १०७ ॥

बालगोपालसंज्ञोऽत्र सर्वदेवौघवन्दितः । षड्दीर्घयुक्तकामेन षडङ्गविधिरीरितः ॥ १०८ ॥

वन्दे बालं मुकुन्दं सरसिजनिलयं रक्तपद्माभनेत्रं
नालाम्भोजच्छविं तं कटितटकरणत्किङ्किणीजालनद्धम् ।
हस्ताभ्यां धारयन्तं दधिजमभिनवं पायसं दिक्षु वीतं
गोगोपीगोपवृन्दैः रुरुनखलसितं कण्ठदेशेऽतिरम्ये ॥ १०९ ॥

दधिजं नवनीतम् ।

यजेत्पूर्वोदिते पीठे वह्नीशासुरवायुषु । हृदादिकवचान्तानि चत्वार्यङ्गानि साधकः ॥ १११ ॥

दृशं तत्पुरतोऽभ्यर्च्य दिक्ष्वस्त्रं तद्बहिस्ततः । आखण्डलमुखान् देवान् वज्रादींश्च समर्चयेत् ॥ ११२ ॥

इति । प्रयोगस्तु सुगमः । तथा—

विचिन्त्यैनं जपेन्मन्त्रमेकमेकं दशायुतम् । सितोपलघृताक्तेन दशांशं हविषा हुनेत् ॥ १०६ ॥

तर्पयेन्मन्त्रसिद्ध्यर्थं तावन्मन्त्री जितेन्द्रियः । मूलमन्त्रेण मूर्धानमभिषिच्याथ तर्पयेत् ॥ १०७ ॥

ब्राह्मणानन्नपानेन गुरुं वसुभिरादरात् । एवं यो भजते मन्त्रमेषामेकं दिने दिने ॥ १०८ ॥

चतुर्वर्गफलं प्राप्य देवः साक्षात् स जायते । मन्त्रान्तरमथो वच्मि चतुर्वर्गसमृद्धिदम् ॥ १०९ ॥

कामः कृष्णेति कामश्च मन्त्रः शीघ्रफलप्रदः । मुन्यादींश्च षडङ्गानि विदुरुक्तेन वर्त्मना ॥ ११० ॥

कामः कामबीजं । कृष्ण स्वरूपं । पुनः कामबीजं वर्त्मना एकाक्षराद्युक्तमार्गेण ।

श्रीमद्गीर्वाणभूमीरुहतलविकचाम्भोजसंस्थं मुकुन्दं
शाखाभ्यस्तस्य नम्रप्रमुदितकमलप्रोद्भवानेकरत्नैः ।
संसिक्तं स्वर्णवर्णं निजवपुषि लसत्तेजसा व्याप्तलोकं

वन्देऽहं पायसादं दधिजमभिनवं भक्षयन्तं सुशान्तम् ॥ १११ ॥

अङ्गैरावरणं पूर्वं निधिभिस्तदनन्तरम् । लोकपालैश्च वज्राद्यैः पश्चादावरणद्वयम् ॥ ११२ ॥

प्रयोगः सुगमः ।

एवं ध्यात्वा जपेल्लक्षं नियतं विजितेन्द्रियः । दशांशं जुहुयादग्नौ श्रीफलैर्मधुराप्लुतैः ॥ ११३ ॥

तर्पणादि ततः कुर्यात्पूर्वोक्तं मन्त्रसिद्धये । एवं सम्पूज्य गोविन्दं तर्पयेत्प्रत्यहं बुधः ॥ ११४ ॥

मधुरत्रयसद्बुद्ध्या शुद्धतोयैर्दिनागमे । ....॥

इति । श्रीयन्त्रसारे

स्मरं कर्णिकायां षडस्रे षडर्णं चतुष्पत्रराजच्चतुर्वर्णमन्त्रम् ।

वृत्तं मातृकार्णैर्धरागेहसंस्थं चतुर्वर्णयन्त्रं समस्तार्थदायि ॥ १ ॥

इति । अस्यार्थः—षट्कोणमध्ये ससाध्यं कामबीजं विलिख्य षट्कोणेषु पूर्वोक्तषडर्णवर्णानालिख्य, बहिश्चतु(र्दलकमलं कृत्वा तद्द)लेषु चतुरक्षरमन्त्रवर्णानालिख्य, बहिर्वृत्तयोरन्तराले मातृकार्णैः संवेष्ट्य बहिश्चतुरस्रं कुर्यात् । एतदुक्तफलदं भवति ॥ तथा—

अस्यैव कामयोरिन्द्रौ वह्निदीप्तावधो यदि । अन्यो मन्त्रस्तदा ज्ञेयः सर्वश्रेष्ठो मनीषिभिः ॥ ११५ ॥

पूर्वोक्तमन्त्रस्य कामवीजद्वयगतलकारयोरधस्ताद्रेफे दत्तेऽन्यो मन्त्रो भवेदित्यर्थः । क्लरीं कृष्ण क्लरीं । षड्दीर्घभाजा बीजेन तादृशेनाङ्गकल्पना ।

शोणोद्यानेगदेववृक्षशिखरे सौवर्णदोलागतं

नीलाकुञ्चितमूर्धजं कटितटे सत्किङ्किणीमण्डितम् ।

रत्नद्वीपिनखप्रकल्पितगलाकल्पं मुदा प्रेङ्खितं

गोपीभ्यामतिसुन्दरं मुररिपुं वन्दे यशोदासुतम् ॥ ११६ ॥

पूर्वोदिते यजेत्पीठे पूर्वोक्तविधिना हरिम् । सम्यगभ्यर्च्य गोविन्दं जपेन्मन्त्री पुरोक्तवत् ॥ ११७ ॥

मधुराक्तैर्हुनेन्मन्त्री रक्ताब्जैर्दशांशतः । तर्पणं पूर्वसंख्यं स्याद्गुरुं यत्नेन तोषयेत् ॥ ११८ ॥

मधुरत्रयसंसिक्तामारक्तां शालिमञ्जरीम् । जुहुयान्नित्यशोऽष्टोर्ध्वंशतमेकेन मन्त्रयोः ॥ ११९ ॥

मण्डलात्सर्वशस्याढ्या वसुधा हस्तगा भवेत् । धनधान्यसमृद्ध्या च संकीर्णं मन्दिरं भवेत् ॥ १२० ॥

पूजाहोमजपप्रयोगविधिभिर्मन्त्री य एकं भजेद्

भक्त्या काम इवापरः स युवतीवृन्देन सम्भाव्यते ।

लक्ष्म्यायुश्च यशश्च सर्वविभवान् कामांश्च लब्ध्वा ततो-

ऽप्यन्तेऽनन्तसुखप्रबोधजनकं लोकं व्रजेद्वैष्णवम् ॥ १२१ ॥

इति ॥ सारसंग्रहे—

अथ गोपालमन्त्राणां वक्ष्ये श्रेष्ठतमं मनुम् । कविताश्रीप्रदं वश्यमोहनादिकरं परम् ॥ १ ॥

वाङ्मायाविष्णुपत्न्यन्ते ह्लादिनीन्द्वग्निभूषिता । दीर्घा स्थिरा स्थितिः प्रोक्ता साग्निशान्तिसुधाकराः ॥२॥

जयं संवीप्स्य कृष्णं च दीर्घा लोचनशालिनी । रक्तेन्दु कामिकारक्तौ सृष्ट्यग्नी वामदृग्युतौ ॥ ३ ॥

नन्द्यनन्तायुतो जीवश्चक्री कामिकया युतः । पार्श्वरक्ते रविश्रोत्रे सत्यनेत्रे च कामिका ॥ ४ ॥

कूर्मो झिण्टीशसंयुक्तः कामिका च सुधाकरः । झिण्टीशो नित्यशब्दान्ते पार्श्वाग्नी नेत्रभूषिते ॥ ५ ॥

वाय्वनन्तौ पुनर्वायुः कृष्णो ङेन्तो रतिप्रियः । दशार्णः सरमामायावाग्भवान्तो मनुर्मतः ॥ ६ ॥

वैदुष्यवश्यलक्ष्मीदो द्विपञ्चाशद्भिरक्षरैः । ....॥

वाक् ऐं। माया ह्रीं। विष्णुपत्नी श्रीं। ह्लादिनी द, अत्र ईकारस्य प्रश्लेषस्तेन ई स्वरूपं, अग्नी र, इन्दुर्बिन्दुः, तेन द्रीं। दीर्घा न, स्थिरा ज, स्थितिः झ, एते वर्णाः पृथक् अग्निना रेफेण शान्त्या ईकारेण सुधाकरेण विन्दुना च युक्तास्तेन व्रींज्रींझ्रीं। जयं संवीप्स्य जय जय। कृष्णं च चकाराद्वीप्स्य तेन कृष्ण कृष्ण। दीर्घा न, लोचनं इ, तेन नि। रक्तं र, इन्दुर्बिन्दुः तेन रं। कामिका त। रक्तं र। सृष्टिः क, अग्नी र, वामदृक् ई तेन क्री। (नन्दी ड, अनन्त आ, तेन डा। जीवः स। चक्री क, कामिका त तेन क्त। पार्श्वं प, रक्तं र, तेन प्र।) रवि म, श्रोत्रं उ, तेन मु। सत्य द, नेत्रं इ, तेन दि। कामिका त। कूर्मः च, झिण्ठीश ए, तेन चे। कामिका त। सुधाकरः स, झिण्ठीश ए, तेन से। नित्य स्वरूपं। पार्श्वं प, अग्नी र, नेत्रं इ, तेन प्रि। वायुः य, अनन्त आ, तेन या। वायुः य। कृष्णो ङेन्तः कृष्णाय। रतिप्रियः क्लीं। दशार्णः पूर्वोक्तगोपाल-दशाक्षरः। रमा श्रीवीजं। माया तद्वीजं वाग्भव ऐं ॥ तथा—

आनन्दनारदाख्योऽस्य मुनिश्छन्दो विराड् भवेत्। अमृताद्यं तु सम्पूर्वो देवता मोहनो हरिः ॥ ७ ॥
अष्टभिर्हृदयं वर्णैः शिरो द्वादशभिः स्मृतम्। धातुसंख्यैः शिखा वर्म वस्वर्णैर्नेत्रमात्मना ॥ ८ ॥
पङ्क्त्यर्णैरस्त्रमुद्दिष्टं त्रिबीजपुटितैः क्रमात्। एवं मूलभवैर्वर्णैः षडङ्गं समुदीरितम् ॥ ९ ॥

धातवः सप्त। वस्वर्णैः अष्टभिः। आत्मना एकेन। पङ्क्त्यर्णैः दशभिः।

एतत्करणमात्रेण लोकसंवननं भवेत्। भूतशुद्ध्यादिकं कृत्वा देहे पीठं प्रकल्प्य च ॥ १० ॥
हस्तद्वये दशार्णोक्तविधिना न्यासमाचरेत्। षडङ्गं न्यस्य कामानां पञ्चकं च प्रविन्यसेत् ॥ ११ ॥
त्रिवारं मूलमनुना व्यापकं च प्रविन्यसेत्। कामसम्पुटितान् न्यस्येन्मातृकार्णान् यथापुरा ॥ १२ ॥
दशतत्त्वादिकान् न्यासान् मूर्तिपञ्जरपश्चिमान्। सृष्टिस्थितिषडङ्गानि बाणान् न्यस्येच्च पूर्ववत् ॥ १३ ॥
सर्वमन्यत्पुरोक्तेन विधानेन विधाय वै। साधकः सर्वलोकेशं ध्यायेत् सम्मोहनं हरिम् ॥ १४ ॥
पुरोत्तमे निजे रम्ये सर्वतोऽम्बुधिमध्यगे। विमलोच्चमहादुर्गगोपुरादिसुवीथिके ॥ १५ ॥
मेघोच्छ्रितसुधाधौतसौधजातसमाकुले। रक्तमन्दिरविस्तीर्णकपाटद्वारमण्डिते ॥ १६ ॥
भूदेवबाहुजविशां वृषलानां गृहोत्तमैः। नानाशिल्पिगृहैश्चापि हस्त्यश्वोष्ट्रखरालयैः ॥ १७ ॥
गोच्छागमहिषादीनामसंख्यातैर्गृहैर्युते। बह्वापणगतानेकसाधुलोकसमाहृतैः ॥ १८ ॥
क्रयविक्रयकार्यार्थं वस्तुसंघैश्च मण्डितैः। लोकस्वान्तवशीकारदक्षनारीनिकेतनैः ॥ १९ ॥

दीर्घानेकसुदीर्घिकाजलसमुत्फुल्लाम्बुजान्तः स्रव-
न्मध्वास्वादकृतादरैर्जलचरैः भृङ्गैश्च हंसैः शुभैः।
कारण्डादिगणै रथाङ्गविहगैरन्यैश्च सर्वैस्तथा
सन्तुष्टैरनिशं प्रियासहचरैः पक्ष्यादिभिः सेविते ॥ २० ॥
पुल्लानेकसुगन्धिपुष्पनिचयासक्तैर्भ्रमद्भृङ्गकै-
र्व्याप्तैः कल्पकपादपैरनुदिनं कामान् यथेष्टान् मुहुः।
यच्छद्भिर्मनुजेभ्य आदरपरैः शीतैश्च मन्दानिलै-
र्लोलत्सर्वशिखैर्वृते मणिमये सन्मण्डपे भास्वरे ॥ २१ ॥

पंक्तिभी रत्नदीपानां समुद्द्योतितमध्यके। नानावर्णवितानेन मौक्तिकालम्बिना युते ॥ २२ ॥
बहुवर्णसुपुष्पाभिर्मालाभिः शोभितान्तरे। सम्यक्सुगन्धिना गन्धवारिणा सिक्तभूतले ॥ २३ ॥
मङ्गलस्त्रीसहस्रौघैर्मदाघूर्णितलोचनैः। कामालसगतैर्हंस्तपद्मलोलसुचामरैः ॥ २४ ॥
पृथून्नतकुचाभारत्रुट्यत्क्षीणावलग्नकैः। स्रवन्मधुरवाग्गुम्फैरभितः सेवितेऽनिशम् ॥ २५ ॥
निरन्तरं महारत्नधारौघं वर्षतोद्भुतम्। परानन्दसुधास्पन्दं स्रवतः स्वस्तरोरधः ॥ २६ ॥

रत्नभूमौ सहस्रार्कभास्वत्सिंहासनाम्बुजे । लक्ष्मीकान्तं समासीनं चिन्तयेदिष्टसिद्धये ॥ २७ ॥

उद्यन्नूतननीलनीरजलसत्कान्तिं जगत्कारणं
वक्रस्निग्धसुमूर्धजातकुसुमं माणिक्यमौलिं प्रभुम् ।
सम्यक्शोभिललाटनासिकमुदञ्चद्भ्रूलतालंकृतं
संरक्तायतलोललोचनयुगं रत्नोल्लसत्कुण्डलम् ॥ २८ ॥
श्रीमद्गण्डतलं विनिर्जितलसद्बन्धूकशोणाधरं
हासश्रीविशदीकृताखिलदिशं प्रस्विन्नमुग्धाननम् ।
स्फूर्जद्रश्मिमहार्घरत्ननिकरप्रत्युप्तभूषागणै-
र्मुक्ताहारमुखैर्विभूषिततनुं रोमोद्गमालंकृतम् ॥ २९ ॥
कर्पूरागरुकुङ्कुमद्रवविलिप्ताङ्गं स्वतः सुन्दरं
वृत्तस्थूलसुदीर्घकोमलभुजैर्दिङ्मानसंख्यैर्युतम् ।
रक्ताब्जद्युतिपादपद्मयुगलं कामार्तचिन्ताकुलं
स्वाङ्कन्यस्तकराम्बुजद्वयमतस्तत्र स्थितायां भृशम् ॥ ३० ॥
रुक्मिण्या लसदूरुयुग्मपिहितं सत्स्वर्णकान्तिं प्रिया-
मालिङ्गन्तममुं कराब्जयुगलेनासक्तभावां दृढम् ।
बाहुभ्यां भगवन्तमार्द्रजघनामालिङ्ग्य सम्यक् स्थिताम्
रोमाञ्चाञ्चितदेहवल्लिलसितामानन्दभाराहृताम् ॥ ३१ ॥

प्रस्वेदच्छद्ममुक्ताभिर्भूषिताङ्गां मनोरमाम् । तस्मिन्नेव समासक्तसर्वेन्द्रियगणां ध्रुवम् ॥ ३२ ॥
तरङ्गरहितैरङ्गैर्मज्जन्तीं सुखसागरे । स्वदक्षस्थितया श्लिष्टं श्यामया सत्यभामया ॥ ३३ ॥
दिव्यक्षौमानुलेपाद्यैर्युक्तया सर्वभूषणैः । कामबाणप्रविद्धाङ्ग्या बाहुना परिरब्धया ॥ ३४ ॥
(मुखाम्बुजसमासक्तनेत्ररोलम्बया सदा । सर्वाङ्गभव्ययात्यर्थं पद्मद्योतिकराब्जया) ॥ ३५ ॥
रक्तया जाम्बवत्या च श्लिष्टं वामस्थया तया । तामुक्तलक्षणोपेतामालिङ्गन्तं स्वबाहुना ॥ ३६ ॥
कालिन्द्या च परीरब्धं पृष्ठदेशस्थया विभुम् । करोद्यत्पद्मया नीलमेघश्यामरुचा ततः ॥ ३७ ॥
अनङ्गबाणसंतापभीतया भूषिताङ्ग्या । पद्मं गदां चक्रशङ्खौ चतुर्भिर्दधतं करैः ॥ ३८ ॥
करद्वयलसद्वेणुच्छिद्रार्पितमुखाम्बुजम् । चतुर्दिक्षु बहिर्देवैर्मुनिभिः खेचरैर्वृतम् ॥ ३९ ॥
सर्वैर्भक्तिरतिप्रेमभावभारानताङ्गकैः । स्तुवद्भिः स्तुतिभिः सम्यक् सेवासंसक्तमानसैः ॥ ४० ॥
चतुर्वर्गप्रदं नित्यं मनोवाचामगोचरम् । स्वतेजसि स्थितं मग्नं महानन्दसुधाम्बुधौ ॥ ४१ ॥
इत्थं ध्यात्वा महाविष्णुं सर्वलोकगुरुं परम् । पीठे पूर्वोदिते चैनं पूजयेन्नित्यमादरात् ॥ ४२ ॥
विभूतिपञ्जरं न्यासक्रमाद्घ्राणान्तमर्चयेत् । मूर्तिपञ्जरमभ्यर्च्य पश्चादङ्गावसानकम् ॥ ४३ ॥
पूर्वोक्तविधिना सम्यगभ्यर्च्यात्मानमादरात् । विशाक्षरोक्तसद्यन्त्रे मध्यबीजाद्बहिर्लिखेत् ॥ ४४ ॥
जलेन्दुरविजेन्द्राणामाशास्वादौ समाहितः । चतुर्बीजान्यथोक्तानि द्विचत्वारिंशदक्षरैः ॥ ४५ ॥
शिष्टैः संवेष्ट्य कोणेषु शम्भुपूर्वाग्निगेषु तु । वाक्शक्तिलक्ष्मीबीजानि संलिख्य तदनन्तरम् ॥ ४६ ॥
क्षपाटवरुणेशानां तान्येवाश्रिषु संलिखेत् । शेषं पुरोक्तवत्कृत्वा पीठमभ्यर्च्य तत्र तु ॥ ४७ ॥
मूर्तिं मूलेन संकल्प्य तत्रावाह्य हरिं यजेत् । मध्यबीजगतं पश्चादग्रदक्षिणवामयोः ॥ ४८ ॥
पृष्ठतश्च समभ्यर्च्य बीजगा रुक्मिणीमुखाः । अङ्गानि षट्सु कोणेषु बाणान् केसरगान्यजेत् ॥ ४९ ॥
दलमध्येषु लक्ष्म्याद्यास्तदग्रेषु ध्वजादिकान् । ध्वजं कृष्णाभमग्रे तु पृष्ठगं वाहगे विषम् ॥ ५० ॥

शङ्खपद्मनिधी पूज्यौ शुक्लरक्तौ तु पार्श्वयोः । सर्वदा चाभिवर्षन्तौ धाराभिर्वसुसञ्चयम् ॥ ५१ ॥
हेरम्बं शास्तृनामानं दुर्गां च तदनन्तरम् । विष्वक्सेनं च कोणेषु वह्न्यादि परितो यजेत् ॥ ५२ ॥
रक्तमारकतप्रख्यदूर्वाकनकवर्णकान् । तद्बहिर्वासवादीनां वज्रादीनां च पूजनम् ॥ ५३ ॥
सप्तावरणसंयुक्ता विष्णुपूजा समीरिता । .... ॥

इति । अथ प्रयोगः—प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि आनन्द-नारदाय ऋषये नमः । मुखे अमृतविराट्छन्दसे नमः । हृदये श्रीसम्मोहनाय कृष्णाय देवतायै नमः । इति विन्यस्य पूर्ववद्विनियोगमुक्त्वा, ऐंह्लींश्रींद्रींग्रींव्रींझ्रीं जयजय श्रींह्लींऐं हृदयाय नमः । ऐंह्लींश्रीं कृष्णकृष्ण निरन्तरक्रीडासक्त श्रींह्लींऐं शिरसे स्वाहा । ऐंह्लींश्रीं कृष्णाय प्रमुदितचेतसे श्रींह्लींऐं शिखायै वषट् । ऐंह्लींश्रीं नित्यप्रियाय श्रींह्लींऐं कवचाय हुं । ऐंह्लींश्रीं क्लींगोपीवल्लभाय स्वाहा श्रींह्लींऐं नेत्रत्रयाय वौषट् । ऐंह्लींश्रीं ऐंक्लींश्रीं अस्त्राय फट् । इति करषडङ्गन्यासं कृत्वा दशाक्षरमन्त्रोक्तप्रकारेण करन्यासं विधाय, पुनः प्रोक्त-षडङ्गानि विन्यस्य, पूर्वोक्तप्रकारेण पञ्चकामन्यासं कृत्वा, मूलेन स्वदेहे त्रिव्यापकं विन्यस्य, कामबीजपुटित-मातृकावर्णान् स्वदेहे प्राग्वद्विन्यस्य, पूर्वोक्तदशतत्त्वन्यासं कृत्वा, प्रणवपुटितमूलमन्त्रेण त्रिव्यापकं कृत्वा, सृष्टिन्यासादिमूर्तिपञ्जरन्यासान्तं दशार्णगोपालमन्त्रप्रकारोक्तवत् कृत्वा, पुनः सृष्टिस्थितिषडङ्गानि विन्यस्य पूर्वोक्तपञ्चबाणन्यासं कृत्वा, पुनश्च ऋष्यादिन्यासं विधाय मुद्राः प्रदर्श्य, ध्यानादिमानसपूजान्ते त्रिंशत्यक्षर-प्रोक्तयन्त्रे मध्यस्थं बीजं परितस्तस्य पश्चिमोत्तरदक्षिणपूर्वदिक्षु द्रींग्रींव्रींझ्रीं इति विलिख्य, तच्चतुष्टयं शिष्टैर्द्विचत्वारिंशदक्षरैर्दशबीजरहितैः संवेष्टय, षट्कोणेषु ईशानपूर्वाग्नेयदिग्गतकोणेषु ऐंह्लींश्रीं इति विलिख्य, (नैर्ऋतिवरुणवायुदिग्गतकोणेषु पुनस्तान्येव बीजानि विलिख्य, अवशिष्टयन्त्रं पूर्वोक्तमेव विरच्य) पुरतः संस्थाप्य अर्घ्यस्थापनादिपीठार्चान्ते मध्यबीजे देवमावाह्यावाहनादिवैष्णवमुद्रादर्शनान्ते न्यासक्रमेण विभूति-पञ्जरादिमूर्तिपञ्जरान्तं सम्पूज्य, आसनादिपुष्पोपचारान्ते देवाग्रतद्दक्षवामपृष्ठलिखितबीजेषु रुक्मिणीं सत्यभामां जाम्बवतीं कालिन्दीं च सम्पूज्य, षट्कोणेषु प्राग्वत् षडङ्गानि सम्पूज्य, केसरेषु प्राग्वत् पञ्चबाणा-नभ्यर्च्य, दलाष्टके लक्ष्म्याद्याः प्रागुक्ताः सम्पूज्य, देवाग्रदलस्याग्रे ध्वजाय नमः । पृष्ठे दलाग्रे विपाय० । दक्षदलाग्रे शङ्खनिधये नमः । वामे पद्मनिधये० । आग्नेयादिदलाग्रेषु हेरम्बाय नमः । शास्त्रे० । दुर्गायै० । विष्वक्सेनाय० । इति सम्पूज्य तद्बहिश्चतुरस्रे लोकपालार्चादि सर्वं प्राग्वत् कुर्यादिति । तथा—

दीक्षितो विधिना मन्त्रं प्राप्यामुं मन्त्रं सद्गुरोः कृती । दर्शनं भाषणं स्पर्शं वचनं श्रवणादिकम् ॥ ५४ ॥
वर्जयेत् प्रजपेल्लक्षं स्त्रीमात्रस्य गुरोरपि । सिताज्यमधुमिश्रेण दशांशं हविषा हुनेत् ॥ ५५ ॥

हविषा पायसेन ।

तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत्ततः । मन्त्रमेनं जपेद्यस्तु प्रत्यहं विधिनामुना ॥ ५६ ॥
तमर्चयन्ति गीर्बाणा लोकानन्दकरश्च सः । दिनादौ शर्करायुक्तदुग्धबुद्ध्या जलैः शुभैः ॥ ५७ ॥
अन्वहं तर्पयेद्यस्तु शतं साग्रं भवेद् ध्रुवम् । इन्द्रश्चांजलबिन्द्वाभा तद्विभूतिमहार्णवे ॥ ५८ ॥
चन्द्रचन्दनपङ्काक्तमालतीकुसुमैर्नवैः । अयुतं मन्त्रवर्येण यो जुहोति विभावसौ ॥ ५९ ॥
त्रैलोक्यं तद्वशे तिष्ठेत् ख्यातः कविवरो भवेत् । मन्त्रिणो ध्यानमात्रेण मन्त्रस्यास्य यथाविधि ॥ ६० ॥
वश्या भवन्ति सततं स्मरार्ताः सुरयोषितः । जपादिकर्मभिर्नूनमस्मात् किं किं न लभ्यते ॥ ६१ ॥
स्पर्धां स्वाभाविकीं त्यक्त्वा चित्रमेतत्सुमन्त्रिणाम् । सदेन्दिरासरस्वत्यौ सेवेते भक्तितत्परे ॥ ६२ ॥
व्याधिदारिद्र्यपापौघज्वरमोहविषादिभिः । जराप्मृत्युदौर्भाग्यदुःखादिरहितः सदा ॥ ६३ ॥
पुत्रपौत्रधनारोग्यवरस्त्रीबान्धवादिभिः । उपेतः सर्वसंपद्भिः यशस्वी दीर्घजीवितः ॥ ६४ ॥
उपासकोऽस्य मन्त्रस्य भवत्येव न चान्यथा । .... ॥

इति ॥ तथा सन्तानगोपालस्य । सारसंग्रहे—

अथ संतानगोपालमन्त्रं वच्मि सुतप्रदम् । देवकीसुतशब्दान्ते गोविन्देति समीरयेत् ॥ १ ॥
वासुदेवपदात्पश्चात् समुद्धयन्तं जगत्पतिम् । देहि मे पदमाभाष्य तनयं कृष्णमुच्चरेत् ॥ २ ॥
त्वामहं शरतो ब्रूयाद् णं गतोऽयं मनुर्भवेत् । द्वात्रिंशदक्षरो मन्त्रो नारदोऽस्य मुनिर्मनोः ॥ ३ ॥
छन्दोऽनुष्टुब् देवता च कृष्णः संतानसिद्धिदः । पादैश्चतुर्भिः सर्वेण पञ्चाङ्गानि मनोर्विदुः ॥ ४ ॥
शङ्खचक्रधरं देवं श्यामवर्णं चतुर्भुजम् । सर्वाभरणसंदीप्तं पीतवाससमच्युतम् ॥ ५ ॥
मयूरपिच्छसंयुक्तं विष्णुं तेजोपबृंहितम् । समर्पयन्तं विप्राय नष्टानानीय बालकान् ॥ ६ ॥
करुणामृतसम्पूर्णचेष्टैकनिलयं प्रभुम् । .... ॥

चतुर्भुजमित्यनेन गदाम्बुजे सूचिते । वामाद्यूर्ध्वयोराद्ये तदाद्यन्ययोरन्ये, इत्यायुधध्यानम् । स्त्रीभिस्तु-

स्वांके सम्मुखसंनिविष्टममले रक्ताम्बुजे बालकं
माणिक्योज्ज्वलबालभूषणगणं प्रोत्तप्तहेमद्युतिम् ।
प्रेम्णालिङ्ग्य मुहुर्मुहुः सुखवशात् संलालितं स्वात्मना
पुत्रत्वेन विभावयेन्मुररिपुं पुत्रार्थिनि कामिनी ॥ ७ ॥

इति देवो ध्येयः ।

ध्यात्वा जपार्चनादीनि कुर्याद्भक्तिपरायणः । अर्चनाङ्गेन्द्रवज्राद्यैरुदितास्य महामनोः ॥ ८ ॥

अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा शिरसि नारदाय ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदि श्रीकृष्णाय देवतायै नमः । इति मूर्धादिषु विन्यस्य मूलमन्त्रेण करयोर्व्यापकं विन्यस्य, देवकीसुतगोविन्द हृदयाय नमः । वासुदेवजगत्पते शिरसे स्वाहा । देहि मे तनयं कृष्ण शिखायै० । त्वामहं शरणं गतः कवचाय० । देवकीसुतगोविन्द वासुदेव जगत्पते । देहि मे तनयं कृष्ण त्वामहं शरणं गतः अस्त्राय० । इति पञ्चाङ्गमन्त्रानंगुष्ठादिपञ्चांगुलीषु विन्यस्य, हृदादिष्वपि विन्यस्य ध्यानमानसपूजादि सर्वं समापयेदिति । तथा—

लक्षं जप्त्वा तद्दशांशं जुहुयाद् गोघृतेन च । तर्पणादि ततः कुर्यान्मन्त्रः सिद्धयति मन्त्रिणः ॥ ९ ॥
दशम्यामर्धरात्रे तु शुक्लपक्षेषु मन्त्रवित् । पुत्रार्थी स्वस्तिके न्यस्य तत्संस्थं विष्णुमर्चयेत् ॥ १० ॥

स्वस्तिके मण्डले ।

य एवं भजते मन्त्रं साधकः पुत्रकांक्षया । सोऽवश्यं लभते पुत्रं विनीतं चिरजीविनम् ॥ ११ ॥

इति ॥ यन्त्रसारे—

कामं मध्ये स्वरयुगलसत्केसरेष्वष्टपत्रे-
ष्वालिख्यान्तर्जलनिधिमितान् मन्त्रवर्णान् क्रमेण ।
भूयो हलिभर्वहिरभिवृतं भूपुरस्थं तदेतद्
यन्त्रं सद्यो वितरति नृणां पुत्रपौत्राभिवृद्धिम् ॥ १ ॥

इति । अस्यार्थः—अष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं कामबीजं विलिख्य तत्) केसरेषु द्वन्द्वशःस्वरान् विलिख्य, तद्दलेषु मूलमन्त्राक्षराणि चत्वारि चत्वारि विलिख्य, बहिर्वृत्तद्वयान्तराले कादिक्षान्तवर्णैरावेष्टय बहिश्चतुरस्रं सकामबीजकोणचतुष्टयं कुर्यात् । एतद्यन्त्रमुक्तफलदं भवति सारसंग्रहे—

वसुदेवं चतुर्थ्यन्तं निगडच्छे–पदं वदेत् । दनं वा–शब्दतो ब्रूयात्सुदेवं ङेसमन्वितम् ॥ १२ ॥
वर्मास्त्रवह्निजायान्तो विंशार्णोऽयं मनुर्मतः । ....॥

वसुदेवं स्वरूपं । अत्र कर्मणि द्वितीया । निगडच्छेदनं चतुर्थ्यन्तं निगडच्छेदनाय । वासुदेवं ङेसमन्वितं,

वासुदेवाय । वर्म हुं । अस्त्रं फट् । वह्निजाया स्वाहा । तथा—

नारदोऽस्य मुनिः प्रोक्तो गायत्री छन्द ईरितम् । श्रीकृष्ण देवता प्रोक्तो निगडच्छेदनाह्वयः ॥ १३ ॥
न्यासध्यानजपार्चादि दशवर्णोक्तवद् भवेत् । अथ वक्ष्ये महामन्त्रमेकाक्षरसमाह्वयम् ॥ १४ ॥
धनपुत्रकलत्रादिभोगमोक्षफलप्रदम् । सिद्धर्षियोगिवृन्दानां पुरारेरपि मोहनम् ॥ १५ ॥
नरोरगसुरस्त्रीणां वश्याकर्षकरं परम् । जयाभूशान्तिबिन्द्वात्मा मनुरेकाक्षरस्त्वयम् ॥ १६ ॥

जया ककारः, भूर्लकारः, शान्तिरीकारः, बिन्दुरनुस्वारस्तेन क्लीं । तथा—

मुनिः सम्मोहनाद्योऽस्य नारदो गदितो बुधैः । मन्त्रतन्त्ररहस्यज्ञैश्छन्दो गायत्रमीरितम् ॥ १७ ॥
जगत्संमोहनः कृष्णो देवता देववन्दितः । षड्दीर्घाढ्येन बीजेन षडङ्गानि प्रकल्पयेत् ॥ १८ ॥
आसनं न्यासपर्यन्तमुक्तरीत्या विधाय तु । अंगुलीषु न्यसेदङ्गं हस्तयोस्तलयोरपि ॥ १९ ॥
पञ्चांगुलीषु बाणांश्च पूर्वोक्तांस्तत्क्रमान् न्यसेत् । बीजसम्पुटितान् न्यसेन्मातृकार्णाननन्तरम् ॥ २० ॥
षडङ्गानि पुनर्न्यस्य यथास्थानं शरान् न्यसेत् । शिरोवदनहृल्लिङ्गपादेषु क्रमतः सुधीः ॥ २१ ॥
शोषणप्रमुखान् ङेन्तान्हृदन्तान् बीजपूर्वकान् । जगत्संमोहनं कृष्णं ध्यायेत्पश्चात् समाहितः ॥ २२ ॥
वृन्दावनद्रुमोद्यानविकसत्कल्पशाखिनः । मूले रत्नस्थलीराजद्रत्नसिंहासनोपरि ॥ २३ ॥
उद्यदादित्यसंकाशं विश्वप्राणस्वरूपिणः । महतो वैनतेयस्य वामस्कन्धोपरि स्थितम् ॥ २४ ॥
बन्धूककुसुमाभं तं शम्बरारिसवर्णकम् । अरिशङ्खसृणोन् पाशं पुष्पबाणेक्षुकार्मुके ॥ २५ ॥
पद्मं गदां च हस्ताब्जैरष्टभिर्दधतं निजैः । स्निग्धारुणविशालोद्यद् घूर्णिताक्षिद्वयाम्बुजम् ॥ २६ ॥
रत्नप्रत्युप्तमुकुटं मणिकुण्डलमण्डितम् । मुक्ताहारलसद्रत्नकङ्कणाङ्गदमुद्रिकम् ॥ २७ ॥
किङ्किणीनूपुराद्यैश्च रत्नमाल्यैरलंकृतम् । शोणालेपं स्वर्णकान्तिक्षौमाम्बरविराजितम् ॥ २८ ॥
आत्मवामोरुपीठस्थां लक्ष्मीमालिङ्गितप्रियाम् । वामबाहुधृताम्भोजां क्लिद्यन्मदनमन्दिराम् ॥ २९ ॥
कामोन्मदमदव्याप्तव्याकुलाङ्गलतोज्ज्वलाम् । रम्यमालाविलेपाङ्गीं सर्वभूषणभूषिताम् ॥ ३० ॥
सूक्ष्मशुक्लसुवस्त्राढ्यां कान्तसद्वदनाम्बुजे । प्रेरितालोलनीलाभनेत्रषट्पदमण्डिताम् ॥ ३१ ॥
सेक्षुचापेन वामेन बाहुना तरुणीमिमाम् । आलिङ्गन्तममुं तज्जपरमानन्दनन्दितम् ॥ ३२ ॥
सुरासुरभुजङ्गेन्दुसिद्धगन्धर्वयोषिताम् । वृन्दैर्वृतं सुभूषाढ्यै कामबाणनिपीडितैः ॥ ३३ ॥
सर्वलोकगुरुं देवं सत्यानन्दं विचिन्तयेत् । .... ॥

दक्षाद्यूर्ध्वयोराद्ये, तदादिद्वन्द्वक्रमेणाधोऽधोऽन्यान्यपि बोद्धव्यानि ।

विंशाक्षरकृते यन्त्रे प्रत्यहं कृष्णमर्चयेत् । आदावर्घ्यादिभूषान्तैरुपचारैर्यथाविधि ॥ ३४ ॥
पश्चादङ्गानि बाणांश्च न्यासमार्गेण पूजयेत् । किरीटं मस्तके श्रोत्रद्वये कुण्डलयुग्मकम् ॥ ३५ ॥
चक्राद्यस्त्राणि हस्तेषु श्रीवत्सं कौस्तुभं ततः । कुचोर्ध्वदेशतः कण्ठे वनमालां नितम्बके ॥ ३६ ॥
पीताम्बरां महालक्ष्मीं वामांके बीजपूर्विकाम् । अभ्यर्च्य कर्णिकामध्ये दिग्विदिक्ष्वङ्गदेवताः ॥ ३७ ॥
तद्बहिश्चतुरो बाणान् दिक्षु कोणेषु पञ्चमम् । यजेदग्रादिपत्रेषु लक्ष्म्याद्याः प्रोक्तलक्षणाः ॥ ३८ ॥
दिव्याम्बरानुलेपाद्यैर्भूषणाद्यैश्च भूषिताः । श्वेतचामरधारिण्यः कामार्ताः सस्मिताननाः ॥ ३९ ॥
इन्द्रादीन् पूजयेद्बाह्ये वज्रादीन्यायुधानि च । एकाक्षरमनोरित्थं पूजा सम्यक् समीरिता ॥ ४० ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि सम्मोहननारदाय ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये जगत्सम्मोहनाय कृष्णाय देवतायै नमः । गुह्ये कं बीजाय नमः । पादयोः ईं शक्तये नमः । (नाभौ लं कीलकाय नमः) इति विन्यस्य, मम सर्वाभीष्ट-सिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, क्लांक्लीं इत्यादिना करयोः षडङ्गमन्त्रन्यासं कृत्वा (करयो॥

पञ्चांगुलीषु पुरुषोत्तमप्रकरणोक्तान् पञ्चबाणान् विन्यस्य कामबीजपुटितमातृकान्यासं कृत्वा) पुनर्हृदयादिषु षडङ्गानि विन्यस्य, शिरोवदनहृदयलिङ्गपादेषु पञ्चबाणान् विन्यस्य, ध्यानाद्यात्मपूजान्ते विंशत्यक्षरोक्तं यन्त्रं कृत्वा, पीठपूजादिपुष्पोपचारान्ते देवस्य देहे न्यासस्थानेषु षडङ्गानि पञ्चबाणांश्च सम्पूज्य, देवस्य शिरसि किरीटाय नमः । कर्णयोः कुण्डलाभ्यां नमः । चक्राय० । शङ्खाय० । अंकुशाय० । पाशाय० । पुष्पबाणेभ्यो० । इक्षुधनुषे० । पद्माय० । गदायै०, इति देवस्य हस्तेषु ध्यानोक्तक्रमेण सम्पूज्य, वक्षःस्थले श्रीवत्साय नमः । कौस्तुभाय० । कण्ठे वनमालायै० । नितम्बे पीताम्बराय० । वामाङ्के श्रीलक्ष्म्यै० । कर्णिकायां देवाग्रादि-चतुर्दिक्षु चतुष्कोणेषु षडङ्गानि सम्पूज्य, केसरेषु देवाग्रादिचतुर्दिक्षु बाणचतुष्टयं चतुष्कोणेषु पञ्चममिति पञ्चबाणान् सम्पूज्य, अष्टदलेषु लक्ष्म्याद्याः प्रागुक्ताः सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् समापयेदिति । तथा—

एकाक्षरमनुं जप्याद् भानुलक्षं जितेन्द्रियः । पलाशकुसुमैः स्वादुत्रयाक्तैरर्चितेऽनले ॥ ४१ ॥
हुनेद्दविसहस्राणि तोयैस्तावच्च तर्पयेत् । आत्माभिषेकं कृत्वाथ विप्रानभ्यर्च्य तोषयेत् ॥ ४२ ॥
त्रैलोक्यमोहनं ङेन्तं प्रवदेद्विद्महे–पदम् । चतुर्थ्यन्तं स्मरं ब्रूयाद् धीमहि तदनन्तरम् ॥ ४३ ॥
तन्नो विष्णुरिति प्रोच्य ततो मन्त्री प्रचोदयात् । गायत्र्येषा जपात्पूर्वं जप्यात्पापविशुद्धये ॥ ४४ ॥
जपपूजाहुताद्यैश्च लक्ष्मीवृद्धिकरी मता । शुद्ध्यर्थमेतया मन्त्री पूजाद्रव्यादि सेचयेत् ॥ ४५ ॥
अनेन मनुना तोयैर्मोहिनीपुष्पसंयुतैः । दिनादावन्वहं मन्त्री तर्पयेद्यः शतं हि सः ॥ ४६ ॥
सर्वान् कामानवाप्नोति वाञ्छितान् यन्त्रवर्जितात् । अयुतं सर्पिषा हुत्वा ससम्पातं हुताशने ॥ ४७ ॥
तावज्जप्तं च सम्पातघृतं स्वां भोजयेत्प्रियाम् । यस्तस्य वशगा सा स्यात्सोऽप्यत्थं वशगो भवेत् ॥ ४८ ॥
अष्टादशलिपिप्रोक्तं वश्यकर्मात्र साधयेत् । विधिनानेन यो मन्त्रं भजेदेनमनन्यधीः ॥ ४९ ॥
लोकत्रयं वशीकृत्य भोगान् भुक्त्वा मनोरमान् । स याति वैष्णवं धाम दाहप्रलयवर्जितम् ॥ ५० ॥

इति ॥ अथ काममन्त्रः, सारसंग्रहे—(अयमेव प्रोक्तकृष्णैकाक्षरमन्त्रः)

अथायमेव कामस्य मनुरेकाक्षरो भवेत् । सम्मोहनो मुनिश्छन्दो गायत्रं देवता स्मरः ॥ १ ॥
अस्याङ्गानि स्वबीजेन दीर्घभाजा प्रकल्पयेत् । ....॥

रक्तं रक्तविलेपनं सुरुचिरं रक्ताम्बरं बिभ्रतं
रत्नोद्यन्मुकुटादिभूषणगणैरादीप्तदेहं प्रभुम् ।
पाशं सांङ्कुशमिक्षुचापसुमनोबाणान् वहन्तं करैः
रक्ताम्भोजनिकेतनं मनसिजं देवं सदा भावयेत् ॥ २ ॥

वामाद्यूर्ध्वकरयोराद्ये । तदाद्यधःस्थयोरन्ये । इत्यायुधध्यानम् ।

पीठे सम्पूजयेत्कामं सम्मोहिन्यादिशक्तिकम् । मोहिनी क्षोभिणी चैव त्रासिनी स्तम्भिनी तथा ॥ ३ ॥
आकर्षिणी द्राविणी च ह्लादिनी तदनन्तरम् । क्लिन्ना स्यात्क्लेदिनी प्रोक्ता कामपीठस्य शक्तयः ॥ ४ ॥
आसनं मनुना दद्यान्मूर्तिं मूलेन कल्पयेत् । तत्रावाह्य स्मरं भक्त्या पूजयेद्विधिनामुना ॥ ५ ॥
अङ्गानि पूर्वमाराध्य मध्ये दिक्षु शरान् न्यसेत् । उक्तबीजादिकानष्टदलेष्वर्च्या इमाः क्रमात् ॥ ६ ॥
प्रथमानङ्गरूपाख्याप्यनङ्गमदना ततः । अनङ्गमन्मथानङ्गकुसुमाह्वा परा मता ॥ ७ ॥
पञ्चमी च ततः प्रोक्ता ह्यनङ्गकुसुमातुरा । अनङ्गशिशिरा षष्ठी भूयश्चानङ्गमेखला ॥ ८ ॥
अनङ्गदीपिकाः सर्वाः पद्महस्ताः स्वलंकृताः । स्वरसंख्यदलेष्वर्च्या बहिस्तत्संख्यशक्तयः ॥ ९ ॥
युवतिः प्रथमा ज्ञेया विप्रलम्भा ततः परा । ज्योत्स्ना सुभ्रूस्ततश्चैव पञ्चमी च मदद्रवा ॥ १० ॥
सुरतावारुणीसंज्ञे लोकालीले परे मते । सौदामिनी ततः कामच्छत्राख्या चन्द्रलेखया ॥ ११ ॥
शुकी मदनया युक्ता योनिर्मायावती ततः । कह्लारहस्ताः कामार्ता तरुण्यः सस्मिताननाः ॥ १२ ॥

पत्राग्रेषु ततोऽभ्यर्च्याः कामस्य परिचारकाः । शोकमोहौ विलासाख्यो विभ्रमो मदनातुरः ॥ १३ ॥
अपत्रपयुवानौ च चन्दनस्तदनन्तरम् । चूतपुष्पाह्वयश्चैव ज्ञातव्योऽयं रतिप्रियः ॥ १४ ॥
ग्रीष्माभिधस्तापनाख्योऽप्यूर्जो हेमन्तसंज्ञकः । शिशिराख्यो मदः पुष्पबाणेक्षुजधनुर्धराः ॥ १५ ॥
पृष्ठतोऽर्पिततूणीराः शोणाः स्त्रीसक्तमानसाः । तद्बहिः पूजयेदष्टौ दिक्क्रमेण रतिप्रियान् ॥ १६ ॥
परभृत्सारसाख्यौ तु शुको मेघस्ततः परम् । अपाङ्गो भ्रूविलासश्च हावो भावो रतिप्रियाः ॥ १७ ॥
भूगृहस्य च कोणेषु चतस्रः पूजयेदिमाः । माधवाख्या मालती च हरिणाक्षी मदोत्कटा ॥ १८ ॥
श्वेतचामरसद्धस्ताः श्यामा भूषितविग्रहाः । इन्द्रादींश्च ततो बाह्ये वज्रादीन्यपि पूजयेत् ॥ १९ ॥
एवमाराधयेद्यस्तु गन्धपुष्पादिभिः स्मरन् । सौभाग्यमतुलं कामान् महालक्ष्मीं स विन्दति ॥ २० ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि सम्मोहनाय ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये श्रीकामाय देवतायै नमः । प्राग्वीजशक्त्यादि विन्यस्य विनियोगः । क्लांक्लीं इत्यादिना प्राग्वत् करषडङ्गन्यासं कृत्वा ध्यानादिपरतत्त्वार्चान्ते अष्टदल-केसरेषु—मोहिन्यै नमः । क्षोभिण्यै० । त्रासिन्यै० । स्तम्भिन्यै० । आकर्षिण्यै० । द्राविण्यै० । आह्लादिन्यै० । क्लिन्नायै० । क्लेदिन्यै नमः । इति स्वाग्रादिमध्यान्तं सम्पूज्य, क्लींसर्वशक्तिकमलासनाय नमः । इत्यासनं समस्तं पीठे सम्पूज्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, कर्णिकायां मध्ये चतुर्दिक्षु च बाणान् प्राग्वत् सम्पूज्याष्टदलेषु—अनङ्गरूपायै नमः । अनङ्गमेखलायै० । अनङ्गमन्मथायै० । अनङ्गकुसुमायै० । अनङ्गकुसुमातुरायै० । अनङ्गशिशिरायै० । अनङ्गमेखलायै० । अनङ्गदीपिकायै नमः । इति सम्पूज्य, बहिः-षोडशदलेषु—युवत्यै नमः । विप्रलम्भायै० । ज्योत्स्नायै० । सुभ्रुवे० । मदद्रवायै० । सुरतायै० । वारुण्यै० । लोकायै० । लीलायै० । सौदामिन्यै० । कामच्छत्रायै० । चन्द्रलेखायै० । शुक्यै० । मदनायै० । योन्यै० । मायावत्यै नमः । इति प्रादक्षिण्येन देवाग्रादितः सम्पूज्य, षोडशदलाग्रेषु—शोकाय नमः । मोहाय० । विलासाय० । विभ्रमाय० । मदनातुराय० । अपत्रपाय० । यूने० । चन्दनाय० । चूतपुष्पाय० । रतिप्रियाय० । ग्रीष्माय० । तापनाय० । ऊर्जाय० । हेमन्ताय० । शिशिराय० । मदाय नमः । इति सम्पूज्य, चतुरस्रस्याष्ट-दिक्षु देवाग्रात् प्रादक्षिण्येन—परभृते नमः । सारसाय० । शुकाय० । मेघाय० । अपाङ्गाय० । भ्रूविलासाय० । हावाय० । भावाय नमः । इति सम्पूज्य, चतुरस्रचतुष्कोणेषु आग्नेयादि—माधव्यै नमः । मालत्यै० । हिरण्याक्ष्यै० । मदोत्कटायै नमः । इति सम्पूज्य बहिर्लोकपालार्चादि सर्वं समापयेदिति । तथा—

संचिन्त्यैनं जपेन्मन्त्रं राशिलक्ष विधानतः । तद्दशांशं त्रिमध्वक्तैः किंशुकप्रसवैर्हुनेत् ॥ २१ ॥
तर्पणं मार्जनं कृत्वा ब्राह्मणानपि भोजयेत् । ततोऽभ्यर्च्य गुरुं वित्तैः प्रणम्य परितोषयेत् ॥ २२ ॥
(एवं सिद्धमनुर्मन्त्री प्रयोगानाचरेत्ततः । अशोककुसुमैः स्वादुत्रयाक्तैस्त्रिदिनं हुनेत्) ॥ २३ ॥
अष्टाधिकं सहस्रं यः सर्वेषां स प्रियो भवेत् । गोघृतेन ससंपातमष्टोत्तरशतं हुनेत् ॥ २४ ॥
सम्यक्सम्पूजिते वह्नौ मन्त्रेणानेन मन्त्रवित् । सम्पातसर्पिषा तेन नारीं स्वां भोजयेत् प्रियाम् ॥ २५ ॥
आज्ञानुवर्तिनी सास्य भवेज्जन्मान्तरेऽपि च । दध्यक्तलाजाहोमेन प्रत्यहं मण्डलावधि ॥ २५ ॥
वाञ्छितां लभते मन्त्री कन्यां सापि प्रियं पतिम् । .... ॥

षट्कोणे मदनं ससाध्यमथ तत्कोणेषु चाङ्गं बहि-
र्गायत्र्या गुणशो विभज्य विलिखेद् वर्णान् दलेष्वष्टसु ।
तेषामग्रगतांश्च तर्कसमितान् मालाणुवर्णांस्तथा
भूगेहाश्रिषु मन्मथेन लसितं यन्त्रं शुभं मान्मथम् ॥ २७ ॥

पूजितं धारितं ह्येतल्लोकत्रयवशीकरम् । .... ॥

अस्यार्थः—षट्कोणगर्भमष्टदलकमलं कृत्वा, षट्कोणमध्ये ससाध्यं कामबीजं विलिख्य, कोणेषु षडङ्गमन्त्रानष्टदलेषु पूर्वोक्तकामगायत्र्या वर्णत्रयं त्रयं प्रतिदले प्रविलिख्य, दलाग्रेषु पूर्वोक्तकाममालामन्त्रस्य षट्षड्वर्णान् विभज्य विलिख्य बहिश्चतुरस्रकोणेषु कामबीजं विलिखेत् । एतदुक्तफलदं भवति । तथा—

साध्याख्यार्णपुटीकृतैस्तु मदनैः कामं लिखेद् वेष्टितं
मध्ये तारविसर्गपश्चलिपिभिर्रुद्ध्या सगान्तार्णया ।
षष्ठैकादशषट्त्रिभिश्च लसितैरष्टच्छदैरम्बुजं
दिक्शूलाङ्यमिदं मनोहरतरे ताम्बूलपत्रे कृतम् ॥ २८ ॥

यन्त्रमेतद्विधानेन पूजितं स्थापितानिलम् । मूलमन्त्रेण संजप्तं नारीं यां खादयेन्निशि ॥ २९ ॥
मन्त्री सा तद्वशे तिष्ठेद्यावज्जीवं न संशय । .... ॥

इति । अस्यार्थः—अष्टदलकमलं सुगन्धिद्रव्यैर्नागवल्लीदले कृत्वा तत्कर्णिकायां साध्यनामाक्षर-सम्पुटितैः कामबीजैर्वेष्टितं कामबीजं विलिख्य, पूर्वादिदलेषु—ॐअःआढघऊएख इत्यष्टौ वर्णानेकैकशो विलिख्य दिग्दलाग्रेषु त्रिशूलं कुर्यात् । एतद्यन्त्रमुक्तफलदं भवति । इति ॥ केरलीये यन्त्रसारे—

मदनभासितमध्यमथेन्द्रियच्छदविराजितपश्चमनोभवम्
स्मरशरैर्लिपिभिश्च समावृतं कुगृहकोणविराजितमन्मथम् ॥ १ ॥
लिखतु पश्चमनोभवयन्त्रमित्युदितमेतदशेषसमृद्धिदम् ।
कनकनिर्मितपट्टतले ततः शुभतरे दिवसे विधृतं द्रुतम् ॥ २ ॥
सकलमानवसिद्धसुराङ्गनाहृदयरञ्जनमीप्सितसिद्धदम् ।
रुचकपूर्वविभूषणमध्यगं विदधती वनिताप्यखिलान्नरान् ॥ ३ ॥
निजवशे प्रविधाय रमां परां समधिगम्य सुतैः सह मोदते ।
इति विलिख्य च कुंकुमकर्दमे तदनुलिप्ततनोः सकलं जगत् ॥ ४ ॥
वशमुपैति निरीक्षणमात्रतः किमुत सान्वसहासनसङ्गमैः ।

इति ॥ अस्यार्थः—पश्चदलकमलकर्णिकायां ससाध्यं कामबीजं विलिख्य, दलेषु ऐंक्लींक्लींब्लूंस्त्रीं इति पश्चकाममन्त्रान् प्रतिदलमेकमेकं विलिख्य, बहिर्वृत्तत्रयं कृत्वा तदन्तरालयोरभ्यन्तराले पूर्वोक्तकामबीजैरावेष्टय, बाह्यान्तराले मातृकया सम्वेष्टय बहिश्चतुरस्रकोणेषु कामबीजं प्रतिकोणं लिखेत । एतद्यन्त्रमुक्तफलदं भवति ॥

अथ प्रणवस्य मन्त्रः । सारसंग्रहे—

अथ सम्यक् प्रवक्ष्यामि प्रणवाख्यं महामनुम् । पापौघध्वंसनं नानाकामकल्पमहीरुहम् ॥ १ ॥
निःश्रेयसकरं नृणां मुनिवृन्दैस्तु सेवितम् । केशवो विष्णुतन्द्रे च बिन्दुःप्रोक्तो ध्रुवाभिधः ॥ २ ॥

केशवः अ । विष्णुः उ । तन्द्रा म । बिन्दुरनुस्वारः । एतैः प्रणवः सिद्धः । तथा—

मन्त्रस्त्रिमात्रकः प्रोक्तो मुनिर्ज्ञेयः प्रजापतिः । छन्दस्तु देवीगायत्री परमात्मा च देवता ॥ ३ ॥

दक्षिणामूर्तिः—"बीजं शक्तिस्त्वनुक्रमात् । मकारं कीलक"मिति ॥ तथा—

ह्रस्वदीर्घस्वरान्तस्थैः षडङ्गानि ध्रुवैर्विदुः । षड्भिर्व्याहृतिभिः सम्यक् सत्यहीनाभिरेव च ॥ ४ ॥
निर्मलाङ्गश्रियं विष्णुं पीतकौशेयवाससम् । सर्वतो भासमानेन तेजसा भास्करद्युतिम् ॥ ५ ॥
किरीटाङ्गदहाराख्यरशनानूपुरादिभिः । ग्रैवेयकङ्कणाद्यैश्च भूषणैर्भूषिताङ्गकम् ॥ ६ ॥
चक्रशङ्खाम्बुजगदा धारयन्तं कराम्बुजैः । कौस्तुभप्रभया दीप्तं मणिकुण्डलमण्डितम् ॥ ७ ॥
भजेऽहं सर्वसंपत्त्यै प्रफुल्लाम्बुजसंस्थितम् । .... ॥

वामाधःकरमारभ्य दक्षिणाधःकरपर्यन्तमायुधध्यानम् ।
सम्पूज्य वैष्णवं पीठं तत्रावाह्य यजेद्धरिम् । केसरेष्वङ्गपूजा स्याद् दिक्पत्रेषु यजेदिमान् ॥ ८ ॥
वासुदेवं सङ्कर्षणं प्रद्युम्नमनिरुद्धकम् । शान्ति श्रियं सरस्वत्या रति कोणदलेषु च ॥ ९ ॥
दिक्पत्राग्रेषु चात्मानमन्तरात्मानमप्यथ । परमाद्यं तथात्मानं ज्ञानात्मानं च पूजयेत् ॥ १० ॥
कोणपत्राग्रगाः पूज्या निवृत्त्याद्याः पुरोदिताः । तद्बाह्ये शक्रमुख्यानां वज्रादीनां च पूजनम् ॥ ११ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे देवीगायत्रीछन्दसे नमः । हृदये परमात्मने देवतायै नमः । गुह्ये अंबीजाय नमः । पादयोः उं शक्तये नमः । नाभौ मं कीलकाय नमः । इति विन्यस्य, मम मोक्षार्थे विनियोगः इति कृताञ्जलिरुक्त्वा, अंॐआं हृदयाय नमः । इंॐईं शिरसे स्वाहा । उंॐऊं शिखायै वषट् । एंॐऐं कवचाय हुं । ओंॐऔं नेत्रत्रयाय वौषट् । अंॐअः अस्त्राय फट् । इति करषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गपूजान्ते दिक्पत्रेषु—प्रागादि वासुदेवादीन् सशक्तिकान् सम्पूज्य, दलाग्रेषु—दिक्क्रमेण आत्मादीन् सशक्तिकानभ्यर्च्य लोकपालार्चादि सर्वं समापयेदिति । तथा—

संदीक्षितो विधानेन कोटिसंख्यं जपेन्मनुम् । हविषा घृतसिक्तेन दशांशं जुहुयात्ततः ॥ १२ ॥
समिद्वरैः पलाशोत्थैराज्याक्तैरथवानले । तर्पयित्वा तद्दशांशं शुद्धतोयैर्यथाविधि ॥ १३ ॥
आत्माभिषेचनं कृत्वा ब्राह्मणान् भोजयेत्ततः । गुरुमभ्यर्च्य वित्ताद्यैः प्रणम्य परितोषयेत् ॥ १४ ॥
एवं सिद्धमनुर्मन्त्री कृतकृत्यो न संशयः । घृतं हविष्यं शालींश्च तिलांश्च समिधोऽमृतम् ॥ १५ ॥
क्रमेण जुहुयाद्यस्तु मन्त्रेणानेन मन्त्रवित् । अभीष्टसिद्धिस्तस्य स्यादिह लोके परत्र च ॥ १६ ॥

इत्थं मन्त्रवरं जपार्चनहुतैर्यः सेवते साधकः
सद्भक्त्या प्रणवं निराकुलमतिर्विध्वस्तपापव्रजः ।
पत्नीपुत्रविशिष्टमित्रसहितः सत्सम्पदा संयुतो
लोकेऽस्मिन् पुनरप्यवाप्तविमलज्ञानो व्रजेत्सद्गतिम् ॥ १७ ॥

इति श्रीकृष्णप्रकरणम् ॥ अथ कार्तवीर्यमन्त्राः—उड्डामरेश्वरतन्त्रे, देव्युवाच ।
देवदेव महादेव देवारिबलसूदन । देववर्द्धन देवेन्द्रवन्दितेन्दुशिखामणे ॥ १ ॥
पृच्छे भवन्तं भगवान् कार्तवीर्यस्य भूपतेः । माहात्म्यं मन्त्रराजस्य विस्तरेण ब्रवीतु मे ॥ २ ॥
कार्तवीर्यमनोर्देव विधानं वक्तुमर्हसि । सरहस्यं महापुण्यं श्रोतुमिच्छामि तत्त्वतः ॥ ३ ॥

ईश्वर उवाच ।

शृणु देवि महामन्त्रं विस्तरेणाखिलार्थदम् । चौरमारीविपक्षाणां विशेषेणापकृन्तनम् ॥ ४ ॥
महद्वश्यकरं शीघ्रं राज्ञां विजयवर्धनम् । भजतां सर्वपापघ्नं सर्वसौख्यकरं परम् ॥ ५ ॥
सर्वसम्पत्करं मन्त्रमुद्धरिष्येऽधुना प्रिये । इन्दो रुद्रार्णरूढोऽग्निः सतारोऽर्धेन्दुनादयुक् ॥ ६ ॥
तन्मन्त्रबीजं मुनिभिर्गदितं क्षोभकारकम् । तस्य साग्नेर्महामायाबिन्दुनादैश्च सङ्गमम् ॥ ७ ॥
इच्छन्त्येके महात्मानो लोकवश्याभिकांक्षिणः । तस्य साग्नेर्नादबिन्दुयुक्तस्य परमेश्वरि ॥ ८ ॥
इच्छन्त्यन्ये महात्मानो भौतिकेन समागमम् । (तस्य साग्नेर्भौतिकार्धचन्द्रेण समागमम् ॥ ९ ॥
इच्छन्त्यन्ये सुवाक्सिद्धिकामा देवि महर्षयः ।) इत्थं स्वरुच्या तद्बीजं समुद्धृत्य च मानवः ॥ १० ॥
द्वितीयमुद्धरेद्बीजं सर्वशत्रुविनाशनम् । द्वितीयबीजं वक्ष्यामि प्रतिलोमेन सुन्दरि ॥ ११ ॥
सूर्याद्विंशतिवर्णस्तु तत्तृतीयं त्रिमूर्तिना । संयुक्तं चार्धशशिना नादेन च पुनः प्रिये ॥ १२ ॥
सेन्द्रं षष्ठं द्वितीयात्तु प्रतिलोमेन मायया । नादेन बिन्दुना युक्तं तृतीयं लोकवश्यदम् ॥ १३ ॥

तृतीयं प्रथमात्तस्मात् चतुर्थेन चतुर्थकम् । वामकर्णेन्दुनादेन प्रोक्तं संस्तम्भनं क्षणात् ॥ १४ ॥
मुखवृत्तं बिन्दुनादसंयुक्तं परमेश्वरि । पञ्चमं च महाबीजं क्षणादाकृष्टिकारकम् ॥ १५ ॥
व्योमार्धेन्द्वग्निदेव्या च युक्तं षष्ठं समीरितम् । उद्धरेत्सप्तमं च त्रों बिन्दूत्थं विन्दुवह्निना ॥ १६ ॥
करणेन च संयुक्तमष्टमं मुनिभिः स्मृतम् । हुंफट् च कार्तवीर्यार्जुनायेत्युक्त्वा नतिं वदेत् ॥ १७ ॥
विंशत्यर्णः स्मृतो मन्त्रस्तारादिर्मुनिभिः स्मृतः । एकोनविंशत्यर्णः स्याद्वितारो यदि भाव्यते ॥ १८ ॥
कार्तवीर्यार्जुनस्यैतन्महासामर्थ्यदं प्रिये । ....॥

इति ॥ अग्नी रेफः, स इन्दोः ठकाराद्यो रुद्राणं एकादशोऽर्णः फकारस्तेनारूढः । यद्वा, पुरस्तात् प्रतिलोमेनेति स्वयमुक्तत्वादत्राप्यध्याहारः । इन्दुः सकारस्तस्माद्वा प्रतिलोमेनैकादशार्णः फकारः । सतार ॐकारयुक्तः । अत्र तारशब्देन केवलस्त्रयोदशस्वर उच्यते । अर्धेन्दुनादयुगिति स्वयमुक्तत्वात् । अर्धेन्दुरर्धचन्द्रः । नादो बिन्दुः । एतस्यैव भेदमाह, तस्येति—अत्र तच्छब्देन फकारो गृह्यते साग्नेरिति स्वयमुक्तत्वात् । महामाया ईकारः । तेन तद्बीजस्थं त्रयोदशस्वरमपास्य तत्स्थाने ईकारो योजनीय इत्यर्थः । पुनः प्रकारान्तरमाह—भौतिक ऐकारः, इकारस्थाने ऐकारो योजनीय इत्यर्थः । द्वितीयमिति—सूयान्मकारात् प्रतिलोमेन विलोमेन विंशतितमो वर्णश्चकारः । तत्तृतीयं मात्तृतीयमक्षरमनुलोमेन रेफः । त्रिमूर्तिरीकारः । अर्धशशिना इत्यादि प्राग्वत् । तेन च्रीं इति सिद्धम् । द्वितीयाद् द्वितीयबीजाक्षराच्चकारात् प्रतिलोमेन षष्ठमक्षरं ककारस्तत् सेन्द्रं लकारसहितं, मायया ईकारेण, नादेन विन्दुना च युक्तमेतेन कामबीजमुक्तं । प्रथमात् प्रथमबीजात् फकारात् तृतीयं भकारः । तस्माद्भकाराच्चतुर्थेन रेफेण वामकर्णेन ऊकारेण नादेन बिन्दुना च युक्तं, तेन भ्रूं इति जातं । मुखवृत्तमाकारो बिन्द्वादि प्राग्वत्, तेन आं इति । व्योम हकारः, अग्नी रेफः, देवी ईकारः, अर्धेन्द्वादि प्राग्वत् तेन मायाबीजमुद्धृतं । क्रों स्वरूपम् । बिन्दुः रेतस्तदुत्थमस्थि तस्य रेतोंऽशत्वात् । तथा च श्रुतिः—"अस्थिस्नायुमज्जानः पितृतः इति ।" तेन, तद्वाचकमक्षरं शकारो गृह्यते । वह्नी रेफः । करणेन चतुर्थस्वरेण ईकारेण युक्तः । बिन्दुनादौ प्राग्वत्, तेन श्रीं इत्युद्धृतं । हुंफट् स्वरूपं । कार्तवीर्यार्जुनाय स्वरूपं । नतिर्नमः । तथा—

मन्त्रस्यास्य पुरा प्रोक्तो मुनिभिर्मुनिरम्बिके । दत्तात्रेय ऋषिश्छन्दोऽनुष्टुबस्य मनोः स्मृतम् ॥ २० ॥
देवता चार्जुनो नाम कार्तवीर्यपदादिकः । मूलबीजैः स्वरारूढैः कुर्यात्पश्चाङ्गकं सुधीः ॥ २१ ॥

द्वाभ्यां द्वितीयस्वरसंयुताभ्यां द्वाभ्यां तुरीयस्वरसंयुताभ्याम् ।
द्वाभ्यां च षष्ठस्वरसंयुताभ्यां द्वाभ्यां तथा द्वादशसंयुताभ्यां ॥ २२ ॥
द्वाभ्यां च वर्मास्त्रपदाक्षराभ्यामङ्गानि कृत्वाप्यवशिष्टवर्णैः ।
संव्यापयेदात्मनि संयतात्मा कार्ताक्षराद्यैर्नवभिर्ध्रुवाद्यैः ॥ २३ ॥

द्वितीयस्वरः आ । तुरीयस्वरः ई । षष्ठस्वरः ऊ । द्वादशस्वरः ऐ । एतदारूढैरित्यर्थः । तथा—

हृदुदरनाभिजघनगुह्यपदद्वयसोरुजानुजङ्घाख्ये । मूर्धनि तुङ्ग भ्रूश्रतिलोचननासास्यकण्ठबाहौ च ॥२४॥
दशबीजानि प्रणवद्वयमध्यस्थानि प्रविन्यसेच्छिष्टान् । बिन्द्वन्तिकान् ध्रुवादीनुक्तस्थानेषु प्रविन्यसेदेवम्॥२५
ध्यायेच्च मन्त्रमूर्तिं स्वात्मैक्येनादरात् समाहितधीः । रक्षायै च भयेभ्यो वाञ्छितसिद्ध्यै धनाप्तयेसुचिरम्॥

अव्यात् सर्वभयात् प्रकाशिततनुः प्रद्योतनोद्द्योतित
स्वर्णस्रक्परिवीतकन्धरधरो रक्तांशुकोष्णीषवान् ।
नानाकल्पविभूषितः करसहस्रार्धात्तबाणासनो
बाणात्तार्धसहस्रबाहुरनिशं भूवल्लभो नः प्रभुः ॥ २७ ॥
सप्तद्वीपैकनाथः सवितृसमरुचिः सर्वदुष्टान्तको नः

पायादब्जायताक्षो रथवरनिलयः स्थूलकायोऽतिभीमः ।
चापान्तेषु त्रिलोकीं करधृतधनुषां निखनैस्त्रासयन् यः
स श्रीमान् कार्तवीर्यो निखिलनृपतांघ्यम्बुजः क्षिप्रकारी ॥ २८ ॥
एवं स्मरेन्नित्यमतीव भक्त्या समर्चयेद् हैहयवंशनाथम् ।
गन्धादिभिर्वैष्णवपीठमध्ये स्वीयाङ्गमूर्त्यष्टकशक्तियुक्तम् ॥ २९ ॥
तस्याङ्गमूर्तयः पञ्च स्फटिकाभा मनोरमाः । खड्गचर्मधरा वीराः सर्वाभरणभूषिताः ॥ ३० ॥
बाणबाणासनधरा मूर्तयो रक्तरोचिषः । सर्वाभरणसंयुक्ता ध्येयाः सर्वसमृद्धये ॥ ३१ ॥
चौरमार्यरिसुरारिपदाद्यान् दिक्षु तन्मदविभञ्जनकाख्यान् ।
दुष्टदुःखदुरितामयाद्याना ह्वयानभियजेच्च विदिक्षु ॥ ३२ ॥
क्षेमङ्करी वश्यकरी श्रीकरी च यशस्करी । आयुष्करी तथा प्रज्ञाकरी विद्याकरी तथा ॥ ३३ ॥
धनङ्करी च पूर्वादिदिक्षु पूज्याः सितप्रभाः । ....
वरदाम्बुजलसत्करा रक्तांशुकहारकुण्डलोल्लसिताः ।
हैहयनाथमनोज्ञा ध्येयाः सौन्दर्यलालिताः प्रमदाः ॥ ३४ ॥
लोकेशाद्या बहिः पूज्या गन्धपुष्पाक्षतादिभिः । षोडशैरुपचारैस्तु पूजयेद्यो दिने दिने ॥ ३५ ॥
कार्तवीर्यं महावीर्यं परिचारप्रियं प्रभुम् । सर्वान् कामानवाप्येह प्राप्यते हरिमन्दिरम् ॥ ३६ ॥
एवं यः पूजयित्वा दिनमनु विधिनैवामुना मन्त्रमुख्यं
जप्याद्भक्त्या स विन्द्याद् बलधनवसुशौर्यायुरारोग्यविद्याः ।
श्रीमेधाकान्तिपुष्टीर्धृतिमतिवचसां भाजनं स्यान्नरेन्द्रै-
र्नारीभिः पूजितः स्यादनुगतभुवनश्चाप्रधृष्यश्च लोके ॥ ३७ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि दत्तात्रेयऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीकार्तवीर्यार्जुनाय देवतायै नमः । इति विन्यस्य, मम सर्वाभीष्टसिद्धये जपे विनियोगः इति कृताञ्जलिरुक्त्वा, मूलमन्त्रेण करयोर्व्यापकं विन्यस्य, फ्रांघ्रां हृदयाय नमः । क्लींश्रीं शिरसे स्वाहा । ॐह्रूं शिखायै वषट् । क्रैंश्रैं कवचाय हुं । हुंफट् अस्त्राय फट् ॥ इति पञ्चाङ्गमन्त्रानंगुष्ठादिकनिष्ठान्तास्वंगुलीषु विन्यस्य, नेत्ररहितेषु हृदयाद्यस्त्रान्तेषु पञ्चाङ्गेषु च विन्यस्य, ॐकार्तवीर्यार्जुनाय नमः इति सर्वाङ्गे व्यापकं कृत्वा, हृदये ॐफ्रोंॐ नमः । उदरे ॐघ्रींॐ० । नाभौ ॐक्लींॐ० । जघने ॐभ्रूंॐ० । गुह्ये ॐआंॐ० । पादयोः ॐह्रींॐ० । ऊर्वोः ॐक्रोंॐ० । जानुनोः ॐश्रींॐ० । जङ्घयोः ॐहुंॐ० । मूर्ध्नि ॐफट्ॐ० । शिखायां ॐकां नमः । भ्रूमध्ये ॐर्तं नमः । श्रुत्योः ॐवीं० । नेत्रयोः ॐर्यां नमः । नासायां ॐर्जुं नमः । मुखे ॐनां नमः । कण्ठे ॐयं नमः । दक्षबाहौ ॐनं नमः । वामबाहौ ॐमं नमः । इति विन्यस्य, ध्यानाद्यात्मपूजान्ते प्रागुक्तं वैष्णवं पीठमभ्यर्च्य, तत्र देवमावाह्याङ्गार्चान्तं प्राग्वत् कृत्वाष्टदलेषु देवाग्रादिप्रादक्षिण्येन दिग्दलेषु—चौरमदविभञ्जनाय नमः । मारीमदविभञ्जनाय० । अरिमद-विभञ्जनाय० । सुरारिमदविभञ्जनाय० । विदिग्दलेषु—दुष्टमदविभञ्जनाय नमः । दुःखमदविभञ्जनाय० । दुरितमदविभञ्जनाय० । आमयमदविभञ्जनाय० । इति सम्पूज्य, दलाग्रेषु—ॐक्षेमङ्कर्यै नमः । वश्यकर्यै० । श्रीकर्यै० । यशस्कर्यै० । आयुष्कर्यै० । प्रज्ञाकर्यै० । विद्याकर्यै० । धनकर्यै० । इति देवाग्रादिप्रादक्षिण्येन सम्पूज्य, तद्बहिश्चतुरस्रे प्राग्दललोकपालास्तदस्त्राणि च सम्पूज्य धूपदीपादिसर्वं प्राग्वत् कुर्यादिति । तथा—

इत्थं ध्यात्वा मन्त्रवर्यं प्रजप्य लक्षावृत्त्या मन्त्रवित् प्राप्तदीक्षः ।
नद्यास्तीरे गुर्वनुज्ञानुपूर्वं पश्चात्कुर्याच्चोरपीडाप्रयोगान् ॥ ३८ ॥

कुम्भोदकासिक्ततनुः प्रजप्य मन्त्रेण होमं प्रकरोति मन्त्री ।
पयोन्धसाग्नौ तिलतण्डुलैर्वा दशांशमानं सघृतैश्च मन्त्री ॥ ३९ ॥

इति । एष लक्षजपः कृतयुगपरः । कलावेतच्चतुर्गुणजपः कार्यः । इति प्राग्वत्तरणं यथावत्कुर्यादिति तथा—

(एवं सिद्धमनुर्नरः सुविहितान् कुर्यात्प्रयोगान् प्रिये)
वश्यादीन् विधिवद्विशिष्टचरितश्चौरापहत्यै भृशम् ।
दुष्टानामपि वक्ष्यमाणविधिना मन्त्रैस्तैस्तर्पणं—
ध्यानैर्मन्त्रविशेषकैश्च मतिमान् गुर्वाज्ञया तत्परः ॥ ४० ॥

लिखेदष्टदलं पद्मं कर्णिकाकेसरोज्ज्वलम् । वृत्तं बहिर्भूपुराढ्यं वज्राष्टकविभूषितम् ॥ ४१ ॥
तद्बीजं कर्णिकामध्ये साध्याख्याकर्मसंयुतम् । लिखेत् समीरबीजं च सहतारगतं प्रिये ॥ ४२ ॥
सवाग्भवं च पूर्वादिपत्रेषु विलिखेत्ततः । सवर्मान्तानि बीजानि शिष्टार्णानन्तरालके ॥ ४३ ॥
केसरेषु स्वरानूष्मवर्णयुक्तान् समर्पयेत् । वृत्तं प्रवेष्टयेद्वर्णैः कादिभिश्चोष्मवर्जितैः ॥ ४४ ॥
भूमिकोणचतुष्केऽथ भूतवर्णान् समर्पयेत् । संस्थाप्य विधिवत् प्राज्ञः कलशं सम्यगर्चयेत् ॥ ४५ ॥
तोयाभिषेकः कर्तव्यो नृणामीहितसिद्धये । वन्ध्याया पुत्रसम्प्राप्त्यै दीक्षायै (यशसे) चायुषे तथा ॥ ४६॥
धनार्थं रोगनाशाय चोरशान्त्यै विशेषतः । वश्याय च हितार्थं वाक्सिद्ध्यै वाणिज्यसिद्धये ॥ ४७ ॥
तद्यन्त्रारूढकुम्भाम्बुनाभिषिक्तस्य सुन्दरि । किं न सिध्यति लोकेऽस्मिन् कामिनां मनसेप्सितम् ॥ ४८ ॥
तद्यन्त्रस्थापनाद्राज्यं ग्रामं पुरमथापि वा । रक्षयेच्चाभितोऽरिभ्यो मन्त्रः रागविषादितः ॥ ४९ ॥
(सर्वभूतादिसंत्रासकृदेतन्नगनन्दिनि ।) न प्रकाश्यं हि मूर्खाय स्तेनाय पिशुनाय च ॥ ५० ॥
गुरुप्रियाय धीराय दक्षाय शुद्धचेतसे । ईर्ष्याद्वेषविहीनाय देयं स्वाचारशालिने ॥ ५१ ॥
हिंसारतान दुष्टचित्तान् द्वेषयेच्च परस्परम् । कर्षयेद्भ्रामयेच्चौरान् दमयेच्च ज्वरादिकान् ॥ ५२ ॥
तत्तद्बीजार्पणाद् देवि क्षिप्रं सिध्यन्ति मन्त्रिणः । बहुनोक्तेन किं देवि मन्त्रोऽयमखिलार्थदः ॥ ५३ ॥

इति ॥ अस्यार्थः—यथोक्तलक्षणमष्टदलकमलं कृत्वा, तद्बहिर्वृत्तं तद्बहिरष्टवज्रयुक्तं चतुरस्रं च कृत्वा, तत्कर्णिकायां ससाध्यं कार्तवीर्यबीजं यमिति वायुबीजं वाग्भवं च प्रणवोदरे विलिख्य, तत्केसरेषु द्वन्द्वशः स्वरान् शषसह इति वर्णांश्चैकैकशो द्विरावृत्त्या विलिख्य, पूर्वादिदलेषु द्वितीयबीजादिहुंबीजान्तानि अष्टौ बीजानि प्रतिदलमेकैकशो विलिख्य, अन्तिमदल एव फट्कारं (विलिख्यावशिष्टानवान्तराले विलिख्य, तद्बहिर्वृत्तद्वयं कृत्वा तद) न्तरालवीथ्यां ककारादिक्षकारान्तैः शषसहवर्जितैरावेष्टच, चतुरस्रस्य कोणचतुष्टये तत्तत्कार्योपयोगिनो भूतवर्णान् दश दश विलिख्य, तत्र दीक्षोक्तविधिना कुम्भं संस्थाप्य, तत्र देवमावाह्य साङ्गं सावरणं सम्पूज्य, मूलमष्टोत्तरसहस्रं तत्कुम्भं स्पृशञ्जपित्वा तत्कुम्भजलेनाभिषेकादुक्तफलसिद्धिर्भवतीति ॥ भूतवर्णास्तु—शान्तौ (ऋॠओंघझढधभवस इति जलवर्णा दश लेख्याः । वश्याकर्षणे तु इईएखछठथफरक्ष इत्यग्निवर्णा दश लेख्याः । स्तम्भने उऊओगजडदबलळ इति भूमिवर्णा दश लेख्याः । उच्चाटने अआऐकचटतपयष इति वायुवर्णा) दश लेख्याः । विद्वेषणमारणयोः ऌॡअंङञणनमशह इत्याकाशवर्णा दश लेख्या इति । (अत्र भूतवर्णलेखनप्रकारस्तु आग्नेयकोणादारभ्य प्रादक्षिण्येन चतुर्षु कोणेषु द्वित्रिक्रमेण विभज्य दशवर्णाल्लिखेदिति सम्प्रदायः) तथा—

कृतवीर्यात्मजस्याथ मन्त्रभेदान् हि मन्त्रिणः । हिताय देवि वक्ष्यामि दशधैकोऽपि विद्यते ॥ ५४ ॥
कार्तवीर्यस्य मन्त्राणामृषिरेकः स्मृतः पुरा । दत्तात्रेयो महाप्राज्ञः साक्षान्नारायणांशजः ॥ ५५ ॥
देवता च स्वयं प्रोक्तो मन्त्रभेदेषु सुन्दरि । असौ चक्रहरेरंशादुत्पन्नो हैहयान्वये ॥ ५६ ॥

आज्ञया देवदेवस्य सर्वदुष्टप्रशान्तये । यस्मिन् गर्जति दैत्येन्द्रस्त्रीणां गर्भा बलाद्भृशम् ॥ ५७ ॥
प्रच्यवन्ति स चक्राख्यो हरिरासीत्क्षितौ स्वयम् । कृतवीर्यस्य भार्यायां माहिष्मत्यां पुरोत्तमे ॥ ५८ ॥
रेवातीरे समुत्पन्नो नाम्नार्जुन इतीरितः । दत्तात्रेयात्प्राप्तविद्यस्तत्प्रियश्च द्विजप्रियः ॥ ५९ ॥
राजराजो महातेजाः सहस्रकिरणोपमः । सहस्रबाहुर्दोर्दण्डः स विष्णोरंशसम्भवः ॥ ६० ॥
शीघ्रगामी महावीर्यः सर्वदुष्टान्यकः प्रभुः । सर्वदा सर्वदुष्टघ्नः पुरस्थो बहुरूपवान् ॥ ६१ ॥
सप्तद्वीपवतीं पृथ्वीं तपोबलपराक्रमैः । दमयन् सर्वदुष्टान् यो ररक्ष स हरिः स्वयम् ॥ ६२ ॥
एकस्य मूलमन्त्रस्य दशधास्य महात्मनः । कार्तवीर्यस्य वक्ष्यामि भेदांश्च शृणु सुन्दरि ॥ ६३ ॥
छन्दोभेदांश्च देवेशि ध्यानभेदांश्च तत्त्वतः । कार्तस्यादौ तस्य मूलं जपेत्सर्वार्थसिद्धये ॥ ६४ ॥
दशाक्षरविधानेन अवशिष्टाक्षरान् प्रिये । मूलबीजं च चामुण्डाबीजयुक्तं नवाक्षरम् ॥ ६५ ॥
जपेत्संस्तम्भनायाशु चौराणां वसुहारिणाम् । मूलेन सह मच्छत्रुबीजं देवि नवाक्षरम् ॥ ६६ ॥
प्रजपेन्नरनारीणां नृपाणां मोहनाय च । स्वमूलं चैव रावार्णसहितं तु नवाक्षरम् ॥ ६७ ॥
(भ्रामणोच्चाटनद्वेषमारणाय जपेद्बुधः । मन्त्री स्वमूलं मायाद्यबीजयुक्तं नवाक्षरम् ॥ ६८ ॥
पापक्षयाय वश्याय मोहनाय शुभाय च । स्वमूलं पाशबीजेन युक्तं देवि नवाक्षरम्) ॥ ६९ ॥
आकर्षणाय चौराणां क्षिप्रं देवि न संशयः । (स्वमूलं मायया चैव सहितं तु नवाक्षरम् ॥ ७० ॥
उच्चाटयेच्च दुष्टानां हिंसापैशुन्यचेतसाम् । स्वमूलं पाशबीजेन सहितं तु नवाक्षरम् ॥ ७१ ॥
नरनारीनृपाणां च वश्यकृद्भवति ध्रुवम्) (क्षेपकम्) । मूलमंकुशबीजेन पुटितं तु नवाक्षरम् ॥ ७२ ॥
वाक्स्तम्भनाय गमनस्तम्भनाय जपेत्क्षणात् । वर्मास्त्राक्षरयोर्मध्यगतं मूलं नवाक्षरम् ॥ ७३ ॥
जपेदुन्मादनायाशु स्तम्भनायारिमोहनम् । वृक्षाग्रस्थितचौराणां स्तम्भनाय विशेषतः ॥ ७४ ॥
मूर्धसम्स्फोटनायालं चौराणां देव्यसंशयः । स्वबीजं कमलाबीजपुटितं तु नवाक्षरम् ॥ ७५ ॥
यो जपेदब्दमात्रेण स स्याद्वैश्रवणोपमः । मूलं वाग्भवबीजेन यो जपेल्लक्षमात्रकम् ॥ ७६ ॥
मन्त्रवर्णैस्तु सर्वैर्वा स कवित्वमवाप्नुयात् । एतदेकमपि प्रोक्तं दशधोक्तप्रभेदतः ॥ ७७ ॥
तेषामन्यन्महामन्त्रं प्रोक्तमेतद् दशाक्षरम् । तस्य च्छन्दो विराडत्र शेषाणां शृणु तत्त्वतः ॥ ७८ ॥
एकादशाक्षराः सर्वे शेषास्तव समीरिताः । शेषाणां त्रैष्टुभं प्रोक्तं मुनिभिर्वेदवादिभिः ॥ ७९ ॥
सर्वेषां कार्तवीर्यस्य मन्त्राणां जपकर्मणि । आदौ तारेण सम्योज्य जप्तव्यास्तु मनूनथ ॥ ८० ॥

एकस्येत्याद्यथेत्यन्तैः षोडशभिः श्लोकैः कार्तवीर्यस्य मन्त्रभेदांश्छन्दोभेदांश्चाह—तत्र तस्यबीजं फ्रों इति कार्तवीर्यबीजम्, एतत्तु दशस्वपि भेदेषु ज्ञेयम् । चामुण्डाबीजं च्रीं इति । मच्छत्रुर्मम शिष्यशत्रुः कामस्तद्बीजं क्लीं इति । रावार्णं भ्रूं इति । माया ह्रीं । पाशः आं । अंकुशः क्रों । वर्म हुं । अस्त्रं फट् । कमला श्रीं । वाग्भवं ऐं । अत्र "मूलमंकुशबीजेन पुटितं तु" इत्यत्र मूलकार्ताक्षरयोर्मध्येङ्कुशबीजं देयमिति तु शब्दार्थः । अन्यथा एकादशाक्षरासम्भवात् । "वर्मास्त्राक्षरगतयोर्मध्यगतं मूलं नवाक्षर" मित्यत्र मूलनवाक्षरयोर्मध्ये हुंबीजं तथैव फट्कारं च पृथक्पृथग्योजयेदित्यर्थः । अन्यथा दशविधत्वासम्भवादित्यर्थः । वाग्भवादिस्तु दशभेदाद्बहिर्भूतः अतएव सर्वैर्वा इत्युक्तं, सर्वैर्विंशतिभिर्वर्णैः, एकोनविंशतिवर्णैर्वादौ संयोज्य जपेदित्यर्थः ।
तथा—
यन्त्रं च दशमन्त्राणां पूर्वोक्तं विलिखेद्बुधः । कर्णिकायां लिखेन्मूलं दशपत्रे दशाक्षरान् ॥ ८१ ॥
(दशाक्षरप्रयोगे च मूलं मध्यदले तथा । लिखेद्गुरूपदेशेन शेषं पूर्ववदाचरेत्) ॥ ८२ ॥

अस्यार्थः—तत्र यथोक्तलक्षणं दशदलकमलं कृत्वा, तद्बहिरष्टवज्रयुक्तं चतुरस्रं च कृत्वा, तत्कर्णिकायां ससाध्यं मूलबीजं प्राग्वद्विलिख्य, तत्केसरेषु द्वन्द्वशः स्वरानष्टसु अष्टसु कमलकेसरेषु नवमे शष दशमे सह इति

विलिख्य दशपत्रेषु कार्तादिनवाक्षराणि नवसु पत्रेषु दशमे पुनर्मूलबीजमिति सम्प्रदायः। एष एव गुरूपदेशः। इति दशवर्णान् विलिख्य शेषमन्यत सर्वं पूर्वोक्तयन्त्रवद्वहिर्लिखेत्। इत्येतद्यन्त्रमुक्तफलदं भवति। एतद्दशाक्षर-मन्त्रस्य यन्त्रम्। अन्ययन्त्रेषु तन्मध्ये (प्राग्वन्मूलं ससाध्यं विलिख्य तदनु तथैव केसरेषु) प्राग्वत् स्वरान् शषसहसहितान् विलिख्य (पत्रेषु चावशिष्टदशवर्णान् विलिख्य) शेषं प्राग्वद्विलिखेदिति। तथा—

पूजायां पूर्वसम्प्रोक्तावरणैः सम्यगर्चयेत्। तारादिविंशार्णमिदं पूजयेत्प्रयतोऽनिशम्॥ ८३॥
मन्त्रं गुर्वाज्ञया देवि स सर्वार्थानवाप्नुयात्। कार्तवीर्यस्य मन्त्राणां प्रयोगो वक्ष्यतेऽधुना॥ ८४॥
हिताय मन्त्रिणां होमः सर्वकामार्थसिद्धये। गौरवे कर्मणि चरेद्गुरुद्रव्यघृतादिभिः॥ ८५॥
होमं रात्रौ वक्ष्यमाणद्रव्यैर्देवि सदक्षिणैः। लाघवे च लघुद्रव्यैर्ज्ञात्वा सम्यक्समाचरेत्॥ ८६॥
कल्पोक्तसर्वकार्याणां यद्वाञ्छति सदा प्रिये। सम्पूजयेद्गुरुं भक्त्या द्रव्यैश्चास्य समीहितैः॥ ८७॥
अन्नदानैर्द्विजान् भक्त्या प्रीणयेत्सर्वकर्मसु। वस्त्राद्यैर्वात्महितवित्प्रारभेत्सर्वकर्म च॥ ८८॥
विप्राणां वचनैः कुर्यात्कर्माणि कमलेक्षणे। सितसर्षपहोमेन मारयेद्रिपुमात्मनः॥ ८९॥
कार्पासलशुनारिष्टैर्विषवृक्षदलैस्तथा। कनकैर्होमयेच्चौरान् स्तम्भयेन्मोहयेत्तथा॥ ९०॥
विभीतजैः खादिरोत्थैः समिद्भिश्चाटयेच्चिरम्। निम्बैर्विद्वेषयेन्मन्त्री चाकर्षेन्मधुरत्रयैः॥ ९१॥
नीलोत्पलैश्च वशयेत्तत्क्षणाद्भुवनत्रयम्। पद्मैः साज्यैः श्रिये होमः स्यात्तथा सुमहान्वशः॥ ९२॥
तिलहोमेन पापानि व्यपोहेद् गोघृतेन वा। तिलतण्डुललोणाब्जलाजसिद्धार्थमिश्रितैः॥ ९३॥
मधुराक्तैर्हुनेदेतैर्वश्यार्थाय च तत्क्षणात्। लोणैश्च सर्ववर्णानां वश्यार्थे पावके हुनेत्॥ ९४॥
सर्वसिद्ध्यै च दूर्वाभिः पयोभिश्च तथायुषे। लक्ष्म्यै दूर्वामृताह्वापामार्गार्कसमिदादिभिः॥ ९५॥
होमो रोगविमुक्त्यर्थं ग्रहशान्त्यै तथायुषे। वटोदुम्बरबिल्वानां समिद्भिरभिवृद्धये॥ ९६॥
हुनेद्धनाप्तये वापि क्षीराज्याक्तैर्विशेषतः। केवलेनैव पयसा हुनेद्गोकुलवृद्धये॥ ९७॥
ब्रह्मवृक्षसमिद्भिश्च ब्रह्मवर्चःसमृद्धये। अश्वत्थैर्मनसः शान्त्यै प्लक्षैः सन्ततिवृद्धये॥ ९८॥
भूतशान्त्यै गुग्गुलुभिः स्त्रीवश्याय प्रियंगुभिः। पुष्पैर्हुनेच्च वस्त्रार्थी तत्तद्वर्णैर्मनोहरैः॥ ९९॥
शालिहोमेन भूमान् स्यादन्नैरन्नादिमान् भवेत्। गोरोचनागोमयाभ्यां सेनायाः स्तम्भनं भवेत्॥ १००॥
होमेन देवि शत्रूणां गोमूत्रेण विशेषतः। कार्पासगृहधूमादिपादपांसुविमिश्रितैः॥ १०१॥
क्षीरवृक्षसमिद्भिश्च हुनेन्निशि निशातधीः। अङ्गनाशाय चौराणां विद्वेष्यै मारणाय च॥ १०२॥
सर्पनिर्मोककनकसिद्धार्थैर्हवनक्रिया। लवणैः सह चौराणां कुलनाशाय तद्भवेत्॥ १०३॥

सर्पनिर्मोकः सर्पमुक्तत्वक्।

तर्पयेच्च दशांशेन शुद्धतोयेन नित्यशः। हुतसंख्या च साहस्रं सहस्रादयुतान्तका॥ १०४॥
लघुगौरवकार्येषु विचार्य निपुणश्चरेत्। पुष्पैर्होमः प्रयोगोक्तैर्द्रव्यैः साज्यैर्विधीयते॥ १०५॥
रोगशान्त्यायुषे तद्वद्वश्याय मधुरैः सह। मारणद्वेषणोच्चाटस्तम्भमोहनकर्मसु॥ १०६॥
तीक्ष्णतैलयुतैर्द्रव्यैर्माहिष्याज्ययुतैस्तथा। यद्वाष्टविषयुक्तैर्वा चरेत्कर्माज्ञया गुरोः॥ १०७॥
एवं षट्कर्म सम्प्रोक्तं मनुनानेन सुन्दरि। हिताय मन्त्रिणां सम्यग् हैहयाधिपतेर्विभोः॥ १०८॥
मन्त्रसिद्धस्य सिध्यन्ति कर्माण्येतानि तत्त्वतः। यस्यासिद्धो मनुर्होमात् स पुमान्नाचरेत्क्रियाम्॥ १०९॥
न सिध्यति ह्यसिद्धस्य कल्पोक्तं कर्मणां फलम्। सदा वैदिकजप्तस्य शुद्धस्य ब्राह्मणस्य च॥ ११०॥
न्यायागतमनो किञ्चित्क्रियास्यापि प्रसिध्यति। तस्मात्सदाचारवता गुरुभक्तेन सुन्दरि॥ १११॥
जप्तव्यो मन्त्रतीर्थो हि पुरुषेण मनूत्तमः। रक्षितुं पुरराष्ट्रादीन् स्त्रीबालादीन् स मन्त्रवित्॥ ११२॥
गोब्राह्मणवरांश्चापि स्वात्मानं च विशेषतः। कुर्यात्प्रयोगान् विधिवन्मारणादीनपि प्रिये॥ ११३॥

सर्वथा चौरजातीनां मारणान्नास्ति पातकम् । यदि स्यात्प्राणिहनना न्यायमेतेन नाशयेत् ॥ ११४ ॥
अन्नगोभूमिदानाद्यैराज्यहोमैश्च मन्त्रवित् । व्यपोहेच्चौरहत्याद्यं प्राणायामजपादिभिः ॥ ११५ ॥
जपेच्च देवीं गायत्रीं सर्वपापापनुत्तये । सहस्रं नित्यशो देवीं सर्वरक्षार्थमात्मनः ॥ ११६ ॥
गायत्रीं जपमानस्य द्विजातेः संयतात्मनः । किमसाध्यं प्रयोगेषु वैदिकेषु विशेषतः ॥ ११७ ॥
गायत्रीजापकं भक्त्या ब्राह्मणं सुसमाहितम् । न स्पृशन्ति महात्मानं पापहत्यादयोऽपि च ॥ ११८ ॥
किमु भूतादयः सर्वे घोरा रुधिरभोजनाः । तस्माज्जपेच्च गायत्रीं प्रयोगादौ समाहितः ॥ ११९ ॥
प्रयोगान्ते च गायत्रीं नियतः सर्वकर्मणि । अन्यानपि प्रवक्ष्यामि मन्त्रान् क्षिप्रप्रसाधकान् ॥ १२० ॥
कृतवीर्यात्मजस्यात्मभूतान्देवि शृणुष्वतान् । यैः कुर्युः पुरराष्ट्राणां रक्षणं सिद्धमन्त्रिणः ॥ १२१ ॥
मन्त्रैर्जप्तैरपि भवेद्रक्षोभिश्च जलादिभिः । तारागिनजाययोर्मध्ये नमः कार्ताक्षरान्वदेत् ॥ १२२ ॥
वीर्यार्जुनाय हुंफट् च ऋष्याद्याश्च पुरोदिताः । चतुर्दशार्णो मन्त्रोऽयमनेनाङ्गं समाचरेत् ॥ १२३ ॥

तारः प्रणवः । अग्निजाया स्वाहाकारः । सुगममन्यत् ।

तारेण नतिना सप्तवर्णैर्वर्मास्त्रठद्वयैः । कुर्यात्पञ्चाङ्गकं मन्त्री ध्यायेत्पूर्वोक्तमार्गतः ॥ १२४ ॥

ॐ हृदयं । नमः शिरः । कार्तवीर्यार्जुनाय शिखा । हुंफट् कवचं । स्वाहा अस्त्रम् ।

नमोऽन्ते कार्तयोः पूर्वे स्याच्चेद्भगवते पदम् । तदाष्टादशवर्णः स्यान्मनुरेष मनूत्तमः ॥ १२५ ॥

"ॐ नमो भगवते कार्तवीर्यार्जुनाय हुंफट् स्वाहा" इति ।

मूलमन्त्रेण पञ्चाङ्गं कुर्यात्पूर्ववदेव तु । सतारनतिनैत्र स्यात्तदा हृदयमम्बिके ॥ १२६ ॥

ॐ नमः हृदयं । भगवते शिरः । सप्तभिः शिखा । द्वाभ्यां कवच । द्वाभ्यामस्त्रं । ध्यानं पूर्वोक्तमेव ।

यन्त्रं लिखेच्च चौराणां मारणादिषु मन्त्रवित् । षट्कोणमध्ये तद्बीजं लिखेत्कोणषडक्षरम् ॥ १२७ ॥
लिखेच्च द्वादशदले शिष्टान् स द्वादशाक्षरान् । स्वरवेष्टितषट्कोणं कादिभिर्वृत्तपञ्चकम् ॥ १२८ ॥
भूताक्षरबहिःकोणं भूतमण्डलवेष्टितम् । तत्तत्कार्यवशाद् देवि तत्तन्मण्डलमालिखेत् ॥ १२९ ॥
ताले च फलके कुड्यमूले चोरकृते बिले । त्रिलिखेत्सर्वसम्पत्यै चौराणां स्तम्भनाय च ॥ १३० ॥
एतद्यन्त्रं मन्त्रजप्तं स्थापितं यत्र कुत्रचित् । भयानि न भवन्त्यत्र देवि देव्यखिलानि च ॥ १३१ ॥

ताले तालपत्रे ॥ अथैतद्यन्त्ररचनाप्रकारः——द्वादशदलं पद्मं विरचय, तत्कर्णिकायां वृत्तद्वयवीतं षट्कोणं कृत्वा तन्मध्ये कार्तवीर्यबीजं ससाध्यं विलिख्य, षट्सु कोणेषु मूलमन्त्रस्य "ॐनमो भगवते" इति षडक्षरान् सबिन्दून् विलिख्य, षट्कोणाद्बहिर्वृत्तद्वयान्तराले षोडशस्वरैरावेष्टय, द्वादशदलेषु शिष्टद्वादशवर्णान् सबिन्दून् विलिख्य, प्राग्वत्तत्कार्योपयोगीनि भूताक्षराणि चतुरस्रकोणेषु विलिख्य तद्बहिस्तत्तद्भूतमण्डलं विलिखेत्, उक्तफलसिद्धिर्भवति ॥ तथा मन्त्रान्तरम्——

महावीर्यमनुर्नाम कार्तवीर्यस्य वक्ष्यते । स्मरणादपि नश्यन्ति तस्य चौरकुलादयः ॥ १३२ ॥
नमो भगवते प्रोच्य श्रीकार्तार्णान् समुद्धरेत् । वीर्यार्जुनायेति ततः सर्वदुष्टान्तकाय च ॥ १३३ ॥
तपोबलपदस्यान्ते पराक्रममितोरयेत् । परिपालितसप्तद्वीपाय सर्वपदं ततः ॥ १३४ ॥
राजन्यचूडामणये महाशक्तिमते तथा । सहस्रदलनायान्ते हुंफडित्युच्चरेदिदम् ॥ १३५ ॥
चतुष्षष्ट्यक्षरो मन्त्रो वाञ्छितार्थप्रसाधकः । .... ॥

अयमपि मन्त्रः प्राणवादिरिति ज्ञेयः । चतुष्षट्यक्षर इत्याद्युक्तत्वात् ।

ऋष्याद्याश्च हुताद्याश्च पूर्वोक्तास्तु स्मृताःप्रिये । जपश्चायुतसंख्य स्याच्छन्दोऽस्य त्रिष्टुबुच्यते ॥ १३६ ॥
राजन्यचक्रयुतवर्ति च वीरशूरमाहिष्मतीपतिपदैश्च चतुर्थियुक्तैः ।
रेवाम्बुलीलपरिदृप्त-पदेन कारागेहप्रबाधितदशास्य-पदेन चाङ्गम् ॥ १३७ ॥

राजन्यचक्रवर्तिने हृत् । वीराय शिरः । शूराय शिखा । महिष्मतीपतये कवचं । रेवाम्बुलीलापरिदृप्ताय नेत्रं । कारागेहप्रबाधितदशास्याय अस्त्रं । तथा--

एवं कृत्वा षडङ्गं नृपकुलतिलकं कार्तवीर्यं महान्तं
ध्यायेद्रेवातटस्थं युवतिभिरभितः क्रीडमानं मदान्धम् ।
मज्जन्तं नग्नरूपं प्रमुदितमनसं लोलरक्तायताक्षं
हस्ताब्जैः स्वैः सहस्रैर्भृशपरिविततै रुध्यमानं जलौघान् ॥ १३८ ॥

एवं ध्यात्वा जपेन्मन्त्री मन्त्रवर्यमनुत्तमम् । सर्वार्थसिद्धयै सम्यक् च वश्यायाशु विशेषतः ॥ १३९ ॥
जले भयं यदि स्याच्चेत्तदैवं संस्मरेद् बुधः । अन्यथा वक्ष्यते ध्यानं राज्यैश्वर्यसमृद्धये ॥ १४० ॥

महिष्मत्यां महात्मा कनकमणिगणालंकृताङ्ग सभाया-
मासीनं मन्त्रिमध्ये रविरुचिविलसद्रत्नपीठे प्रसन्नम् ।
ध्यायेत् स्वैर्बाहुदण्डैर्धृतशरनिकरेष्वासवर्मासिपाश-
प्रासाद्यैः सर्वसिद्धयै सकलदुरितचौरापहत्यै च लक्ष्म्यै ॥ १४१ ॥

परचक्रभये प्राप्ते तावद्राज्ञो महात्मनः । अथवा वक्ष्यते ध्यानं रक्षायै वाशु सर्वदा ॥ १४२ ॥

दशशतहययुतरथवरनिलयं त्रैलोक्यभीषणं ध्यायेत् ।
मध्याह्नार्कसमानं गर्जनतस्तर्जयन्तं परबलान् ॥ १४३ ॥
दोर्दण्डमण्डलैरायुधमण्डलान् आक्षिपन्तमाशुचरम् ।
कुण्डलमण्डितगण्डं खण्डितसर्वारिमण्डलं मन्त्री ॥ १४४ ॥
नानायुधनिकरधरैः पदातिभिर्वेष्टितं तथा रथिभिः ।
अभितो गजयूथयुतैर्हयसादिभिरुल्ल्वणैश्च पत्त्यङ्गैः ॥ १४५ ॥
ध्यात्वा यो वै मन्त्रमिति प्राङ्मुखो जपेन्नियतः ।
स तु सकलवाञ्छितार्थान्मासेन लभेदयत्नवानपि च ॥ १४६ ॥

यन्त्रं चास्योल्लिखेद्देवि सर्वकामार्थसिद्धये । आदौ चतुर्दलं पद्मं लिखेदष्टदलं ततः ॥ १४७ ॥
तद्बहिः षोडशदलं द्वात्रिंशत्तद्बहिर्दलम् । कर्णिकायां लिखेद्बीजं कार्तवीर्यस्य भूपतेः ॥ १४८ ॥
वेदादिनतिमध्यस्थं साध्यनाम च दिग्दले । दलाष्टके द्विशो लिख्यान्मन्त्रार्णान् बिन्दुसंयुतान् ॥ १४९ ॥
षोडशारदले लिख्यात्कामराजमनूत्तमम् । द्वात्रिंशतिदले तस्यानुष्टुबर्णान् समालिखेत् ॥ १५० ॥
एकैकशो बहिर्मालामन्त्रेण तत्प्रवेष्टयेत् । तद्बहिः कादिभिर्वीतं प्रतिलोमानुलोमतः ॥ १५१ ॥
क्रूं ख्रूं ग्रूं घ्रूं महाबीजैश्चतुर्भिः पूजयेत्सुधाः । चतुर्दलान्तराले तु च्रूं छ्रूं ज्रूं झ्रूं पुनस्तथा ॥ १५२ ॥
ट्रूं ठ्रूं ड्रूं ढ्रूं महाबीजैः त्रूं थ्रूं द्रूं ध्रूं पुनस्तथा । प्रूं फ्रूं ब्रूं भ्रूं महाबीजैः य्रूं र्लूं ल्रूं व्रूं पुनस्तथा ॥१५३॥
श्रूं ष्रूं स्रूं ह्रूं पुनर्यन्त्रमेतैर्बीजैः समाहितः । द्विरावृत्त्या लिखेद् देवि बहिर्वै भूतमण्डले ॥ १५४ ॥
भूताक्षराणि विलिखेत्तत्तत्कार्यसमाप्तये । एतद्यन्त्रस्य माहात्म्यं को नु जानाति पार्वति ॥ १५५ ॥
किमु देवादयः सर्वे सुरासुरनमस्कृते । अहं जानामि विष्णुश्च दत्तात्रेयश्च तद्गुरुः ॥ १५६ ॥
प्रभावमस्य देवेशि यन्त्रस्याखिलभूपतेः । तद्यन्त्रधारकं दृष्ट्वा भीता भूतादिवैरिणः ॥ १५७ ॥
चोररोगादयश्चापि प्रद्रवन्ति न संशयः । स्वर्णपत्रस्थितं यन्त्रमेतत्सर्वार्थदं क्षणात् ॥ १५८ ॥
विश्वैश्वर्यप्रदं विश्वमोहनं क्षोभकारकम् । राजते विलिखेद्येतद्राज्यलाभाय मन्त्रवित् ॥ १५९ ॥

ताम्रे च सर्वरक्षायै फलके चाम्बरेऽपि वा । भित्तौ वा सर्ववश्याय भूर्जपत्रे समालिखेत् ॥ १६० ॥
चन्दनागरुकर्पूररोचनासृगुशीरकैः । लाक्षामृगमदाद्यैश्च विलिखेद् वश्यकर्मसु ॥ १६१ ॥
लिखेदष्टविषेणाथ मारणादिषु कर्मसु । अष्टगन्धेन वा देवि गुर्वनुज्ञापुरःसरम् ॥ १६२ ॥
कारस्करस्य फलके तथा वैकङ्कतोद्भवे । अक्षजे चाथ पाषाणे शरावे वा समाहितः ॥ १६३ ॥
एतद्यन्त्रं ध्वजाग्रस्थं युध्यमानस्य शत्रुभिः । एतद् दृष्ट्वारयः सर्वे प्रद्रवन्ति न संशयः ॥ १६४ ॥
यत्र यत्र स्थितं यन्त्रं तत्र तत्र जयो भवेत् । नागाश्च नागकन्याश्च यक्षिण्यश्च सुराङ्गनाः ॥ १६५ ॥
नरनारीनृपगणा दृष्ट्वा तद्यन्त्रधारिणम् । आगत्य दृष्ट्वा मोहेन तस्मै दद्युश्च वाञ्छितम् ॥ १६६ ॥
तद्यन्त्रकलशासेकाद्वन्ध्या पुत्रं प्रसूयते । राजाभिषिक्तो भवति शत्रुनिर्यातवानपि ॥ १६७ ॥
त्रैलोक्यमपि चानेन रक्षयेत्तु समाहितः । बहुना किमिहोक्तेन यन्त्रमेतदनुत्तमम् ॥ १६८ ॥
सर्वकार्यार्थदं नृणां कुर्यान्मन्त्री विचक्षणः । ....॥

इति ॥ अथैतद्यन्त्ररचनाप्रकारः—तत्र प्रथमं चतुर्दलकमलं विलिख्य तद्बहिरष्टदलं तद्बहिः षोडशदलं तद्बहिर्द्वात्रिंशद्दलम् इति कमलचतुष्टयं कृत्वा, तत्कर्णिकायां ससाध्यं कार्तवीर्यबीजं विलिख्य, चतुर्दलेषु—"ॐ अमुकं मे वशमानय नमः" इति प्रतिदलं विलिखेत् । अत्र वशमित्युपलक्षणं स्तम्भय मोहय द्वेषयेत्यादि स्वेष्टकर्मपदं लिखेत् । ततोऽष्टदलेषु विंशत्यक्षरमूलमन्त्रस्य प्रणवमूलबीजनमःपदात्मकाक्षरचतुष्टयं विहाय द्वितीयबीजादि नाय नम इत्यन्तान् षोडशवर्णान् सबिन्दून् द्विशो द्विशः प्रतिदलं विलिख्य, (तद्बहिः षोडशदलेषु प्रतिदलं कामबीजमालिख्य तद्बहिर्द्वात्रिंशद्दलेषु एकैकशो वक्ष्यमाणानुष्टुब्मन्त्रवर्णान् विलिख्य,) तद्बहिर्वृत्तद्वयान्तराले पूर्वोक्तचतुष्षटचर्णमालामन्त्रेण संवेष्टच, तद्बहिर्वृत्तत्रयान्तरालगतवीथीद्वयेऽन्तर्गतवीथ्यां प्रतिलोमेन ककारादिक्षकारान्तैर्वर्णैः सम्वेष्टच, बहिर्गतवीथ्यामनुलोमेन तैरेव वर्णैरावेष्टच, चतुर्दलस्यान्तरालचतुष्टये प्रमाणोक्तककारादिहकारान्तेष्वष्टाविंशतिबीजेषु कवर्गोत्थं बीजचतुष्टयमष्टदलान्तरालेषु (चटवर्गोत्थबीजाष्टकं, षोडशदलान्तरालेषु तपवर्गोत्थं बीजाष्टकं यादिवर्गोत्थं बीजाष्टकं च विलिख्य द्वात्रिंशद्दलान्तरालेषु पुनः कादिहान्तानि अष्टाविंशतिबीजान्य) ष्टाविंशत्यन्तरालेषु प्रथमं विलिख्य, पुनः कवर्गोत्थं बीजचतुष्टयं शिष्टान्तरालचतुष्टये लिखेत् । अत्र केचिदाद्यबीजचतुष्टयं चतुर्दलान्तरालेषु प्रथमं विलिख्य पुनस्तदाद्यान्यष्टाविंशतिबीजान्यष्टादशान्तरालादिषु द्विरावृत्त्या लिखेदिति वदन्ति, नैतदस्मदाराध्यचरणसम्मतम् । यथागुरूपदेशं लेख्यमिति । ततस्तद्बहिस्तत्तत्कार्योपयोगिभूतमण्डलं विरच्य तत्र तत्तद्भूताक्षराणि च प्रागुक्तयुक्त्या लिखित्वा यथाविधि विनियुञ्जीत, यथोक्तफलसिद्धिर्भवति ॥ तथा अनुष्टुब्मन्त्रः—

अनुष्टुबुच्यतेऽथास्य कार्तवीर्यस्य भूपतेः । एतत् सौम्यं च रौद्रं च सर्वकामफलप्रदम् ॥ १६९ ॥
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रभाक् । तस्यानुस्मरणादेव हृतं नष्टं च लभ्यते ॥ १७० ॥
स्वयं छन्दः स्मृतं पादैः सर्वैः पञ्चाङ्गकं भवेत् । अनुष्टुबस्ततो ध्यानविधिं वक्ष्येऽधुना प्रिये ॥ १७१ ॥

कैलासाद्रिसमप्रभेभवतिपृष्ठस्थं महाभीषणं
नागस्यन्दनसप्तिपत्तिनिकरैराघूर्णितैरावृतम् ।
दोर्दण्डाम्बुजबद्धचापसशरं पाशांकुशैरावृतं
ध्यायेद् यान्तमरातिवर्गहननायातीव सम्पत्तये ॥ १७२ ॥

वने महाचौरभये गजानां युद्धे त्वरातिग्रहरक्षणाय ।
एवं स्मरन् मन्त्रवरं प्रजप्यादानुष्टुभं संयतधीर्हि देवि ॥ १७३ ॥

स्वैर्हस्ताब्जैः सहस्रैर्धृतकमलसहस्रं स्मरन्मन्त्रमेनं

जप्यादासीनमब्जे निखिलमणिगणालंकृताङ्गं प्रसन्नम् ।
बुद्ध्वैनं योगनिष्ठं मुनिभिरभिवृतं दीप्तमर्कौघतुल्यं
स्वर्णाप्त्यै गोसमृद्ध्यै सकलधनसमृद्ध्यै च मन्त्रं महान्तम् ॥ १७४ ॥
सङ्कर्षणाय जनानां दीर्घायुर्वर्धनाय रोगाणाम् । शान्त्यै च वसुसमृद्ध्यै ध्यायेदित्थं महाभयेष्वपि च ॥

तथानुष्टुभयन्त्रम्—

आशापत्रे सरोजे दलमनु चतुरोऽनुष्टुबर्णान् विलिख्यात्
तद्बीजं कर्णिकायां स्वरयुगललसत्केसरं कादिवीतम् ।
मालान्त्रार्णवीतं दलविवरलसत्तस्य गायत्रिवर्णा-
स्त्रिस्त्रिर्भूतार्णवृत्तं सकलसुखकरं यन्त्रमानुष्टुबाख्यम् ॥ १७६ ॥

इति । अस्यार्थः—तत्राष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं कार्तवीर्यबीजं विलिख्य, तत्केसरेषु द्वन्द्वशः स्वरान् विलिख्य, तद्दलेषु आनुष्टुभमन्त्रस्य वर्णांश्चतुरश्चतुरो विलिख्य, तेष्ववे वक्ष्यमाणकार्तवीर्यगायत्रीवर्णांस्त्रिशस्त्रिशो विलिख्य तद्बहिर्वृत्तत्रयं विभाव्य तदन्तर्गतवीथीद्वयेऽभ्यन्तरवीथ्यां ककारादिक्षकारान्तैर्वर्णैरावेष्टय, बहिर्वीथ्यां प्रागुक्तचतुःषष्टयक्षरमालामन्त्रेण सम्वेष्टय, तद्बहिर्वृत्तं कृत्वा वृत्ताभ्यन्तरे प्राग्वत् कार्यानुसारेण भूतवर्णान् विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ कार्तवीर्याय विद्महे सहस्रकराय धीमहि तन्नोऽर्जुनः प्रचोदयात्, इति गायत्री ।

सर्वमन्त्रप्रयोगेषु जप्तव्यैषा हितार्थिना । गायत्री जपमात्रेण मन्त्रवीर्यप्रवर्धिनी ॥ १७७ ॥
मन्त्रस्यास्य जपाद्देवि नष्टद्रव्यं च लभ्यते । हताश्चौरा भविष्यन्ति नष्टद्रव्यं च सिध्यति ॥ १७८ ॥

इति ॥ यन्त्रसारे—

क्ष्रौंबीजान्तःस्थसाध्यं दहनपुरयुगाश्रिष्वथो चक्रमन्त्रं
सन्धिष्वप्यङ्गषट्कं स्वरयुगललसत्केसरे चाष्टपत्रे ।
आलिख्यान्मन्त्रवर्णाञ्जलधिपरिमितान्वेष्टयेद्व्यञ्जनार्ण-
र्भूगेहस्थं तदेतन्निखिलसुखकरं कार्तवीर्यस्य यन्त्रम् ॥ १ ॥
सर्वरक्षाकरमिदं धनधान्यसमृद्धिदम् । स्थापितं भवने क्षेत्रे सर्वसम्पत्करं नृणाम् ॥ २ ॥
चौरभूतपिशाचादिव्याघ्रादिभयनाशनम् । .... ॥
करधृतमेतद्यन्त्रं विलिख्य कटकादिषु च युद्धेषु ।
वितरति योद्धुर्विजयं रक्षां च महत्तरां लक्ष्मीम् ॥ ३ ॥

अस्यार्थः—अष्टदलकमलमध्यस्थषट्कोणमध्ये ससाध्योदरं नृसिंहबीजं विलिख्य षट्सु कोणेषु सुदर्शनषडर्णं कोणसन्धिषु तत्षडङ्गानि केसरेषु युगशः स्वरान् दलेषु "ॐनमो भगवते कार्तवीर्यार्जुनाय महाबलाय सर्वदुष्टविनाशनाय हुंफट् स्वाहा" इति मन्त्रस्य चतुरश्चतुरो वर्णान् विलिख्य, तद्बहिर्वृत्तयोरन्तराले कादिक्षान्तार्णैः सम्वेष्टय तद्बहिश्चतुरस्रं कुर्यात् । एतद्यन्त्रमुक्तफलदं भवति ।

तद्यन्त्रस्थापनान्नृणां रक्षा सर्वत्र जायते । वाञ्छितार्थाः प्रसिध्यन्ति भूताद्यापि तथा प्रिये ॥ ४ ॥
आनुष्टुभजपाद्रात्रौ तपःस्वाध्यायतत्परः । तिष्ठन् प्रत्यङ्मुखो नित्यं शतमष्टोत्तरं प्रिये ॥ ५ ॥
मण्डलान्म्रियते चौरो विकलाङ्गोऽथवा भवेत् । जपमात्रेण वाऽचौरो भविष्यति न संशयः ॥ ६ ॥
यस्यां दिशि भयं देवि विद्यते मन्त्रवित्तमः । नित्यं तत्सम्मुखो रात्रौ जपेच्चानुष्टुभं मनुम् ॥ ७ ॥
भयानि न भवन्त्यस्य नात्र कार्या विचारणा । आसीनो वा जपेन्मन्त्री मन्त्रसाधनकर्मणि ॥ ८ ॥
अनेन तर्पयेत्प्राज्ञो वाञ्छिताप्त्यै जलैः सुधीः । हुनेद्वा पूर्वसम्प्रोक्तद्रव्यैर्मन्त्री सुरेश्वरि ॥ ९ ॥

आनुष्टुभेन मन्त्रेण साधयेत्साधकोत्तमः । सर्वकर्माणि संसिद्धः स्वयं मन्त्री समाहितः ॥ १० ॥

इत्यानुष्ठुभमन्त्रः ॥ तथा मालामन्त्रः—

प्रवक्ष्यामि च सिद्ध्यर्थं सर्वकार्येषु सुन्दरि । येनाशु मुनयः सिद्धिं गताः पूर्वं महाहवे ॥ १ ॥

ॐनमो भगवते श्रीकार्तवीर्यार्जुनाय हैहयनाथाय श्रीकार्तवीर्यार्जुन सहस्रकरसदृश सर्वदुष्टान्तक सर्वशिष्ट शिष्टेष्टद सर्वत उदधेरागन्तुकामान् अस्मद्वसुविलुम्पकांश्चोरसमूहान् स्वकरसहस्रैर्निवारय २ रुन्धय २ स्वपाशसहस्रैर्बन्धय २ अंकुशसहस्रैराकर्षय २ स्वचापोद्भूतबाणसहस्रैर्भिन्धि २ स्वहस्तोद्भूतखड्गसहस्रैश्छिन्धि २ स्वहस्तोद्भूतमुसलसहस्रैर्मारय २ स्वशङ्खोद्भूतनादसहस्रैर्भीषय २ स्वहस्तोद्भूतचक्रसहस्रैर्निकृन्तय २ परकृत्यां त्रासय २ गर्ज २ आकर्षय २ भ्रामय २ मोहय २ उद्वासय २ उन्मादय २ तापय २ विनाशय २ विदारय २ स्तम्भय २ जृम्भय २ मारय २ वशंकुरु २ उच्चाटय २ विनाशय २ दत्तात्रेयश्रीपादप्रियाय नमः श्रीकार्तवीर्यार्जुन सर्वत उदधेरागन्तुकामान् अस्मद्वसुविलुम्पकान् चोरसमूहान् सम्यगुन्मूलय २ हुं फट् स्वाहा ॥ मालामन्त्रोऽयम् ।

अस्य मालामन्त्रस्य दत्तात्रेय ऋषिः, गायत्री छन्दः, श्रीकार्तवीर्यार्जुनो देवता सर्वार्थसाधनाय विनियोगः । दत्तात्रेयप्रियतमाय हृदयाय नमः । माहिष्मतीनाथाय शिरसे० । रेवाजलक्रीडासंसक्ताय शिखायै० । हैहयाधिपतये कवचाय० । सहस्रबाहवे अस्त्राय० । ध्यानम्—

दोर्दण्डैकसहस्रसंमितकरेष्वेतेष्वजस्रं दधत्
कोदण्डैः चशरैरुदग्रविशिखैरुद्यद्विवस्वत्प्रभः ।
ब्रह्माण्डं परिपूरयंस्तदखिलं गण्डस्थलान्दोलित-
द्योतत्कुण्डलमण्डितो विजयते श्रीकार्तवीर्यप्रभुः ॥ २ ॥

एवं ध्यात्वा समभ्यर्च्य सर्वकर्माणि कारयेत् । (त्रिसहस्रं जपः प्रोक्तः शेषं पूर्ववदाचरेत् ॥ ३ ॥
मन्त्रभेदेषु पूजायामृष्यादिन्यासतत्त्वतः । पूजयेत्तत्तदङ्गाद्यं पूर्वोक्तावरणैर्बुधः ॥ ४ ॥
अनेन मन्त्रवर्येण सर्वकार्याणि कारयेत् ।) मालामन्त्रजपाच्छत्रूंश्चौरांश्चापि महाबलान् ॥ ५ ॥
क्षपयेत्स्तम्भयेद्वापि चाटयेन्मारयेत्तथा । वशयेत्तत्क्षणाद् देवि त्रैलोक्यमपि मन्त्रवित् ॥ ६ ॥
क्षोभयेत्स्तम्भयेत् प्राज्ञः शमयेच्च ज्वरादिकान् । क्षिप्रं समीहितार्थाप्त्यै मालामन्त्रः प्रजायते ॥ ७ ॥
वक्ष्यमाणप्रकारेण ध्यायेत्तन्मन्त्रदेवताम् । ध्यानम्

चक्रेषुचापमुसलासिकुठारपाशप्रासाढ्यचर्मधृतशङ्खधरैः स्वहस्तैः ।
दक्षोत्तरैः प्रतिशतैररुणाम्बराढ्यं मध्यन्दिनार्कसदृशं स्मरतातिघोरम् ॥ ८ ॥
रक्ताम्बराक्षमतिभीषणमेकनाथं नीलाम्बुदाभगजपृष्ठगतं स्वहस्तैः ।
संवेष्टितं सकलदुष्टहरं विशिष्टं शिष्टेष्टदं सकलदुःखनिवारणाय ॥ ९ ॥

एवं ध्यात्वा जपेन्मन्त्री मालामन्त्रं मनूत्तमम् । अर्धरात्रे विशेषेण नष्टद्रव्याप्तिसिद्धये ॥ १० ॥
चौरैर्हृतं समानेतुं नित्यमष्टोत्तरं शतम् । जपेन्निश्येकपादेन सदा रात्रौ विचक्षणः ॥ ११ ॥
हृतं द्रव्यं प्रगृह्यातिकृच्छ्रेण भ्रान्तमानसाः । समेत्य मन्त्रिणे चोराः प्रार्पयिष्यन्त्यसंशयम् ॥ १२ ॥
नायाति चेन्मृतिस्तस्य षण्मासाज्जपमात्रतः । चौरैर्हृतान्पशून् मन्त्री यद्यानेतुं समीहति ॥ १३ ॥
अनेन मनुना तेषां कण्ठपाशं जपेन्निशि । प्रगृह्य देवतां ध्यायन् नित्यमष्टोत्तरं शतम् ॥ १४ ॥
आयान्ति स्वगृहं गावो द्वादशाहे विमोचिताः । आयान्ति त्रिदिने देवि सितसर्षपहोमतः ॥ १५ ॥
हृतशेषैर्हुनेद्रात्रौ चौरैर्द्रव्यैः समाहितः । व्रीहिधान्यादिकं मन्त्री गुर्वादेशेन तत्क्षणात् ॥ १६ ॥
हृतं प्रकाश्यते देवि चौरैर्झटिति नान्यथा । बाणान् प्रवेशयेद्रात्रौ धनुषा ध्यानतत्परः ॥ १७ ॥

दशदिक्षु जपन्मन्त्रं गृहस्य नगरस्य वा । राष्ट्रस्य चापि देशस्य वरणस्याप्यथो गवाम् ॥ १८ ॥
मन्त्रमूर्तिः स्वयं भूत्वा रक्षायै जगतो भयात् । मन्त्रेण परिजप्तानि पार्थिवानि रजांसि च ॥ १९ ॥
क्षिप्तानि मन्त्रिणा यत्र तत्र रक्षा भवेन्निशि । तर्पयेद्वा हुनेद्वापि जपमानेन नित्यशः ॥ २० ॥
सर्वार्थसिद्ध्यै लक्ष्म्यै च रक्षायै च विशेषतः । सर्वत्र भूपतेर्ध्यानं विना ध्यानं न सिध्यति ॥ २१ ॥
यथा च लभ्यते ध्यानं गुरुभक्तेन सुन्दरि । नान्येन लभ्यते ध्यानं मन्त्रिणा चेति निश्चयः ॥ २२ ॥
सर्वदा कुर्वतः कर्म जपहोमार्चनादिभिः । विना ध्यानेन चेत्सर्वं तत्फलं नास्य सिद्ध्यति ॥ २३ ॥
गुर्वाज्ञातत्परश्चेत्स्याद्विना ध्यानादपि प्रिये । सिध्यन्ति सर्वकार्याणि तस्य नास्त्यत्र संशयः ॥ २४ ॥
तस्मात्प्राज्ञः सदा यत्नाद्गुरुभक्तिं समाचरेत् । प्राणैश्चैव धनैः सर्वैः कर्मणा मनसा गिरा ॥ २५ ॥
सर्वदा सर्वदेवेशि गुरोराज्ञां न लङ्घयेत् । कृतवीर्यसुतस्यास्य मन्त्रभेदं सुदुस्तरम् ॥ २६ ॥
गदितं तव देवेशि मया गुप्तमनुत्तमम् । त्वया चैतन्महामन्त्रं न प्रकाश्यं दुरात्मने ॥ २७ ॥
विष्णुभक्ताय दातव्यमतिगुह्यं सुदुर्लभम् । सर्वरक्षाकरं देवि चोरनाशं मलापहम् ॥ २८ ॥
भुक्तिमुक्तिप्रदं देवि सत्यं सत्यं न संशयः । .... ॥

अथ दीपविधिः ॥ श्रीदेव्युवाच ।

.... । देवदेव महादेव भक्तानुग्रहकारक ॥ २९ ॥
पृच्छामि त्वां सुरश्रेष्ठ लोकानां हितकाम्यया । कार्तवीर्यस्य नृपतेर्वद दीपविधिं प्रभो ॥ ३० ॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि लोकानुग्रहकाम्यया । गुह्यं च मम सर्वस्वं नचाख्येयं दुरात्मने ॥ ३१ ॥
राजचौरादिपीडासु ग्रहरोगभयेषु च । नानादुःखेषु देवेशि सुखप्राप्त्यै तथैव च ॥ ३२ ॥
दीपं कुर्वीत विधिवद्गुरुदर्शितमार्गतः । सौवर्णे राजते ताम्रे कांस्ये लौहेऽथ मृन्मये ॥ ३३ ॥
गोधूममाषमुद्गानां चूर्णेन घटितेऽपि वा । सौवर्णे कार्यसिद्धिः स्याद्रौप्ये वशं जगद्भवेत् ॥ ३४ ॥
ताम्रे तयोरभावेऽपि कांस्ये विद्वेषणं भवेत् । मारणं लोहपात्रे तु उच्चाटो मृन्मये तथा ॥ ३५ ॥
गोधूमचूर्णघटिते विवादे विजयो भवेत् । माषे शत्रुमुखस्तम्भः स्यान्मुद्गे शान्तिरुत्तमा ॥ ३६ ॥
अलाभे सर्वपात्राणां ताम्रे कुर्याद्विचक्षणः । सप्त पञ्च तथा तिस्र एका वा वर्तिका भवेत् ॥ ३७ ॥
गुरुकार्येऽधिका कार्या स्वल्पे स्वल्पा मता प्रिये । सूत्रं श्वेतं तथा पीतं माञ्जिष्ठं च कुसुम्भकम् ॥ ३८ ॥
कृष्णं च कर्बुरं चैव क्रमतो विनियोजयेत् । सर्वाभावे सितेनैव कुर्याद्वर्तीः पृथक् प्रिये ॥ ३९ ॥
दश पञ्चाधिकाश्चैव विंशतिस्त्रिंशदेव च । चत्वारिंशत्तथा कार्या पञ्चाशदपि वा भवेत् ॥ ४० ॥
तत्तत्कार्यवशाद्देवि कुर्यात्तन्तून्समाहितः । गोघृतेन प्रकर्तव्यो दीपः सर्वार्थसिद्धये ॥ ४१ ॥
गोमयेनोपलिप्तायां भूमौ यन्त्रं समालिखेत् । (कपिलागोमयेनैवं षट्कोणं कारयेत्ततः ॥ ४२ ॥
मारबीजं कर्णिकायां षट्कोणे बीजषटककम् । दिक्षु बीजचतुष्कं च शेषैः संवेष्टयेद्धि तत्) ॥ ४३ ॥
तत्र प्रत्यङ्मुखो दीपः स्थाप्यः सर्वाङ्गसुन्दरि । प्राणानायम्य विधिवन्मूलेनाङ्गं समाचरेत् ॥ ४४ ॥

मूलेन प्राणानायम्य प्रागुक्तं पञ्चाङ्गं कुर्यादित्यर्थः ।

यन्त्रराजं लिखित्वा तु ताम्रपात्रेऽष्टगन्धकैः । स्थापयेत्पूर्ववत्तस्य कुर्यात्सङ्कल्पमादरात् ॥ ४५ ॥
तारं पूर्वं समुद्धृत्य वक्त्रवृत्तं समुद्धरेत् । संयोजयेत्तत्सोमार्धनादेन च पुनः सति ॥ ४६ ॥
व्योमार्धेन्द्वग्निना देव्या युक्तं तदपि संलिखेत् । वषट्पदं ततः कार्तवीर्यार्जुनपदं तथा ॥ ४७ ॥
माहिष्मतीनाथपदं सहस्रबाहुमुच्चरेत् । सहस्रक्रतुदीक्षित दत्तात्रेयप्रियस्तथा ॥ ४८ ॥
ङेन्तान्येतानि सम्प्रोच्य आत्रेयाय पठेत् पुनः । अनुसूयागर्भरत्नपदं ङेन्तं समुच्चरेत् ॥ ४९ ॥

व्योमाग्निवामकर्णेन्दुनादयुक्तं पुनः प्रिये । चक्रिणं पुनरुद्धृत्य वह्निनादेन संयुतम् ॥ ५० ॥
वामकर्णेन्दुसंयुक्तमिमं दीपं पुनर्वदेत् । गृहाणेति-पदं पश्चादमुकं रक्ष रक्ष च ॥ ५१ ॥
दुष्टान्नाशय पातय घातयेति वदेद् द्विशः । शत्रूञ्जहि जहीत्युक्त्वा मायाप्रणवमुच्चरेत् ॥ ५२ ॥
स्वबीजं मारबीजं च वामाक्षि बिन्दुसंयुतम् । वह्निजायां वदेत्पश्चान्मन्त्रशास्त्रविशारदः ॥ ५३ ॥
अनेन दीपवर्य्येण पश्चिमाभिमुखेन च । मां रक्ष च वदेद्देवि देवदत्त-पदं तथा ॥ ५४ ॥
वरप्रदानाय-पदं व्योमयुग्मं वदेत्ततः । (वामकर्णेन्दुना युक्तं नादेन च पुनः प्रिये ॥ ५५ ॥
व्योमाग्निमायासंयुक्तं नादयुक्तं पुनर्वदेत् । तारं मारं द्वितीयं च बीजं प्रोच्य वदेत्ततः) ॥ ५६ ॥
वह्निजायां ततो देवि जलं भुवि विनिक्षिपेत् । .... ॥

मन्त्रः प्रयोगे स्पष्टयितव्यः । तथा—

तपवर्गौ सनादौ च वेदादिर्वह्निवल्लभा । पश्चिमाभिमुखो भूत्वा कृत्वा च करसम्पुटम् ॥ ५७ ॥
सकृज्जप्त्वा पुनर्मन्त्री जपेन्मन्त्रं समाहितः । तारं नारायणं सेन्दुं व्योमाग्निनादसंयुतम् ॥ ५८ ॥
मायायुक्तं समुद्धृत्य प्रथमं मायया युतम् । उच्चरेच्च द्वितीयं तु बीजं स्याद्वह्निवल्लभा ॥ ५९ ॥
चक्रिणं वह्निसंयुक्तं तारनादयुतं प्रिये । तारमुद्धृत्य प्रजपेद्दीपाग्रे वै सहस्रकम् ॥ ६० ॥
अनेन विधिना देवि कार्तवीर्यस्य गोपतेः । दीपो देयः प्रयत्नेन सर्वं कार्यमभीप्सता ॥ ६१ ॥
गुरोराज्ञां पुरस्कृत्य कुर्याद्देवि प्रयत्नतः । अन्यथा हि कृतं लोके विपरीतफलं भवेत् ॥ ६२ ॥
विधानं दीपदानस्य कृतघ्ने पिशुनाय च । ब्रह्मकर्मविहीनाय न वक्तव्यं कदाचन ॥ ६३ ॥
सुभक्ताय सुशिष्याय साधकाय विशेषतः । विधानं देवि वक्तव्यं मम प्रीतिकरं शिवे ॥ ६४ ॥
किं बहूक्तेन भो देवि कल्पोऽयमखिलार्थदः । अथाभिधीयते मनमाज्यस्य वरवर्णिनि ॥ ६५ ॥
साधकानां हितार्थाय सर्वार्थस्य च सिद्धये । पलानां पञ्चविंशत्या दीपो भूतविनाशनः ॥ ६६ ॥
पञ्चाशता घृतपलैश्चौरशान्त्यै च कारयेत् । शत्रुवश्याय च तथा सन्धिकार्ये तथैव च ॥ ६७ ॥
पञ्चसप्ततिभिर्देवि शत्रूणां स्यात् पराजयः । शतेन शत्रुनाशः स्यात् सहस्रेणाखिलाः क्रियाः ॥ ६८ ॥
सिध्यन्ति साधकानां हि प्रयोगा येऽपि दुष्कराः । नित्यदीपे न मानं हि सोऽपि कार्यः स्वशक्तितः ॥६९॥
यथाकथञ्चिद् देवेशि नित्यदीपं प्रकल्पयेत् । कार्तवीर्याय देवाय सर्वकल्याणसिद्धये ॥ ७० ॥
गुरुकार्येऽधिकं मानं कर्तव्यं देवि सर्वदा । अल्पद्रव्यैः प्रकर्तव्यः स्वल्पे कार्ये वरानने ॥ ७१ ॥
विना मानं न कुर्वीत कार्तवीर्यस्य भूपतेः । दीपं देवेशि कार्यार्थी कुर्वन्नेष्टमवाप्नुयात् ॥ ७२ ॥

अथ दीपदानप्रयोगः—तत्र साधकः कृतनित्यक्रियः शुभे स्थाने रहसि वितानादिभिरलंकृते गृहे गोमयेनोपलिप्ते स्थाने कपिलागोमयेन षट्कोणमण्डलं कृत्वा, तन्मध्ये कुंकुमचन्दनादिभिः कामबीजं विलिख्य, षट्सु कोणेषु मूलविंशत्यक्षरमन्त्रस्य प्रणवादि कामबीजरहितं बीजषट्कं (ओंफ्रोंव्रींभ्रूंआंह्रीं) विलिख्य, षट्कोणस्य चतुर्दिक्षु स्वाग्रादि शिष्टं बीजचतुष्टयं (क्रोंश्रींहुंफट्) विलिख्य, कार्तादिनवभिर्वर्णैः (कार्तवीर्यार्जुनाय नमः) षट्कोणं सम्वेष्टय, तत्र कार्यानुरूपेण प्रोक्तदीपपात्रे प्रोक्तवर्तीनिक्षिप्य प्रज्वाल्य, षट्कोणमध्ये पश्चिमाभिमुखं दीपं निधाय, मूलमन्त्रेण प्राणायामत्रयं कृत्वा ऋष्यादिन्यासजातं विधाय, ताम्रपात्रे वैष्णवाष्टगन्धैः कार्तवीर्यस्य, यन्त्रं (अष्टदलगर्भचतुरस्त्ररूपं) प्रागुक्तं विलिख्य, दीपस्य पूर्वभागे गोमयोपलिप्ते स्वाभिमुखं संस्थाप्य, अद्येत्यादितिथ्याद्युल्लेखनान्ते स्वगोत्रनामाद्युच्चार्य "अमुककार्यसिद्ध्यर्थं दीपदानमहं करिष्ये" इति सङ्कल्प्य, तस्मिन् यन्त्रे देवमावाह्य सर्वोपचारैः साङ्गं सावरणं सम्पूज्य, दक्षिणहस्तेन जलमादाय "ॐआंह्रींषषट्कार्तवीर्यार्जुनाय माहिष्मतीनाथाय सहस्रबाहवे सहस्रक्रतुदीक्षिताय दत्तात्रेयप्रियाय आत्रेयाय अनुसूयागर्भरत्नाय ह्रूंक्रूं इमं दीपं गृहाण अमुकं रक्षरक्ष दुष्टान् नाशय २ पातय २ घातय २ शत्रूञ्जहि २ ह्रीं

ॐफ्रोंक्लींईं स्वाहा अनेन दीपवर्येण पश्चिमाभिमुखेन मां रक्ष "देवदत्तवरप्रदानाय ह्लींह्रींह्लींओंक्लींच्रीं स्वाहा" इमं मन्त्रं जपित्वा तज्जलं भूमौ निक्षिप्य पश्चिमाभिमुखो भूत्वा कृताञ्जलिः "तंथंदंधंनंपंफंबंभंमंॐ स्वाहा" इति सकृत् जपित्वा, ॐआंह्लींफ्रींच्रीं स्वाहा क्रोंॐ" इति मन्त्रं सहस्रावृत्त्या जपित्वा ततो यावद्दीपस्तिष्ठति तावत्प्रत्यहं तस्मिन् यन्त्रे देवं पूजयेत् । दीपनिर्वापणे देवं विसर्जयेत् । इति देवाय जपं समर्प्य स्तुत्वा प्रणमेत् । इत्थं प्रत्यहं घृतसमाप्तिर्यावद्यावच्च कार्यसिद्धिस्तावत् कुर्यादिति दीपदानविधिः । इति वैष्णवं प्रकरणम् ॥

अथ सौरमन्त्रा उद्ध्रीयन्ते—तत्र सारसंग्रहे—

अथोच्यन्ते सौरमन्त्राः सर्वागमसुगोपिताः । आयुरारोग्यधनदाः कीर्तिदाः पुत्रपौत्रदाः ॥ १ ॥
सर्वसौभाग्यजनकाः सर्वापन्नाशकाः सदा । अष्टादश त्वचो रोगास्तेषां नाशकराश्च ये ॥ २ ॥
त्रिलोक्यां विश्रुता नित्या नारदाद्यैश्च सेविताः । तथा गन्धर्वसिद्धौघविद्याधरनिषेविताः ॥ ३ ॥
सर्वरोगहराः सर्वे सर्वोपद्रवनाशकाः । धर्मार्थकाममोक्षाप्तितीर्थरूपाः शुभोदयाः ॥ ४ ॥
वश्याकर्षणसंस्तम्भविद्वेषोच्चाटमारणे । शक्ताः स्मरणमात्रेण साधकेन सुसाधिताः ॥ ५ ॥
अज्ञानतिमिरान्धानां ज्ञानदृष्टिप्रदायकाः । वाक्सिद्धिखेचरीसिद्धिपादुकासिद्धिदायकाः ॥ ६ ॥
किं बहूक्तेन विधिना साधिताः सर्वकामदाः । प्रोच्यतेऽभीष्टफलदस्तेष्वप्यष्टाक्षरो मनुः ॥ ७ ॥
प्रणवो घृणिसर्गान्ते चन्द्रोऽर्घीशसमन्वितः । ईरोऽग्निशिखरोऽनन्तो द सुसूक्ष्मः त्यसंयुतः ॥ ८ ॥
अष्टवर्णो मनुर्भानोरिष्टदः परिकीर्तितः । ....

प्रणव ॐ । घृणि स्वरूपं, सर्गो विसर्गः तेन घृणिः । चन्द्रः स, अर्घीश ऊ, तेन सू, । ईरो य, अग्नी र, तेन र्यं । अनन्त आ । द स्वरूपं, सूक्ष्म इ, तेन दि । त्य स्वरूपं । अत्र यकाराकारयोर्न सन्धिः । एवं श्रुतिदर्शनात् । तथाच श्रुतिः—"घृणिरिति द्वे अक्षरे सूर्यं इति त्रीणि (? द्वे) आदित्य इति त्रीणि एतद्वै सावित्रस्याष्टाक्षरं परमं पदं श्रियाभिषिक्तं य एवं वेद श्रिया हैवाभिषिच्यते" इति । तथा—

ऋषिस्तु देवभागाख्यश्छन्दो गायत्रमिष्यते । श्रीसूर्यो देवता प्रोक्त ऐहिकामुष्मिकप्रदः ॥ ९ ॥
तेजो वदेत्ततो ज्वालामणिहुंफट् द्विठान्तकः । हृन्मनुः सत्यपूर्वोऽयं ब्रह्मपूर्वः शिरोमनुः ॥ १० ॥
विष्णुपूर्वः शिखामन्त्रो वर्माग्रू रुद्रपूर्वकः । अग्निपूर्वो नेत्रमनुः सर्वपूर्वोऽस्त्रमन्त्रकः ॥ ११ ॥
सत्याद्यांश्च चतुर्थ्यन्तान् केचिदिच्छन्ति सूरयः । सत्यतेजः-पदं केचिच्चतुर्थ्यन्तं प्रचक्षते ॥ १२ ॥

सत्यतेजोज्वालामणिहुंफट हृदयाय नमः इति केचिदिति । शारदातिलके—"सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरित" मित्यादि । अत्र चतुर्थ्यविवक्षितेत्यपेक्षितार्थद्योतनिकाकारादयः । प्रपञ्चसारे तु—
"सत्यब्रह्मविष्णुरुद्रैः साग्निभिः सर्वसंयुतैः । तेजोज्वालामणिहुंफट्स्वाहान्तैरङ्गमाचरेत्" ॥

इति । अत्रोक्तं ब्रह्मे त्यत्राकारश्रुतिश्चतुर्थीनिवारणायेति पद्मपादाचार्याः । सारसंग्रहे—

विधायैवं षडङ्गानि मूर्तिं न्यसेद्यथाक्रमम् । मस्तकाननहृद्गुह्यपाददेशेषु देशिकः ॥ १३ ॥
पञ्चह्रस्वैः सहादित्यो रविभानू च भास्करः । सूर्यस्ततश्च मन्त्रार्णान् प्रणवाद्यान् न्यसेद्बुधः ॥ १४ ॥
शीर्षाक्षिकण्ठहृत्कुक्षिनाभिलिङ्गांघ्रिषु क्रमात् । ह्रस्वैरक्लवैरोकाराद्यकारान्तैस्तु पञ्चभिः ॥ १५ ॥

"सद्यादिपञ्चभिरपि" इति शारदायाम् । ध्यानम्—

भास्करं विमलकुण्डलभूषं चारुतरारुणपङ्कजसंस्थम् ।
अब्जयुगाभयदानकरं तं रक्ततनुं प्रभजे युगनेत्रम् ॥ १६ ॥

दानकरं युगनेत्रमिति पदच्छेदः । ऊर्ध्वकरयोः पद्मे वामाद्यधःस्थयोरभयदाने, इत्यायुधध्यानम् । तथा—

अग्निकोणे प्रभूतं च विमलं नैर्ऋते यजेत् । सारं वायव्यकोणे च समाराध्य तथैशके ॥ १७ ॥
सुख परमपूर्वं च यजेन्मध्ये तु मन्त्रवित् । ....॥

अग्न्यादीति—प्रथमं मण्डूकादिसिंहासनान्तमुक्तरीत्याभ्यर्च्य अग्न्यादिकोणेषु प्रभूतादीन् धर्माधर्मादि-स्थानेषु यजेत्। "पीठांघ्रीन् कल्पयेदेतान् हृदा मध्ये विदिक्षु च"। इति नारायणीयवचनात्। "ईशानान्ते च मध्येऽपि विदिक्ष्वेतान् प्रपूजयेत्"। इति प्रयोगसारवचनाच्चेति वदन्ति। तत्र—(१५। ६) प्रयजेदथ प्रभूतां विमलां साराह्वयां समाराध्याम्। परमसुखामग्न्यादिष्वस्रिषु मध्ये च पीठक्लृप्तेः प्राक्" इति शङ्कराचार्यचरणैरुक्तत्वात्॥ स्त्रीलिङ्गप्रयोगस्तु भुवनेश्यर्चाप्रकरणात्। पीठकल्पनं तु सर्वत्र धर्मादिभिरेव। 'धर्मादि-कल्पिते पीठे' इति श्रवणाद्धर्मादिभिर्युक्तस्यैव योगपीठत्वात्। तदर्चनात् प्रागेतान् सम्पूज्य पश्चाद्धर्मादीन् सम्पूज्यानन्तादिकमर्चयेत्। तथा "स्वबिम्बं पश्चिमे पीठे पूजिते नव पूजयेत्।" स्वबिम्बं पश्चिमे इति सोमाग्निमण्डले सम्पूज्य, पश्चात् सूर्यमण्डलं सम्पूज्य, सत्त्वादिपरतत्त्वान्तमभ्यर्च्य पीठशक्तीः पूजयेदित्यर्थः। तथा—

दलमूलेषु पूर्वादि मध्ये च विधिपूर्वकम्। दीप्तासूक्ष्मे जयाभद्रे विभूतिर्विमलान्विता॥ १८॥
अमोघा विद्युता चान्या नवमी सर्वतोमुखी। पीठशक्तिः क्रमादेता ह्यग्निवर्णाः सुभूषिताः॥ १९॥
ह्रस्वत्रयक्लीववर्ज्या अचो वह्नीन्दुभूषणाः। बीजान्यासां क्रमादाहुर्मन्त्रशास्त्रविशारदाः॥ २०॥

ह्रस्वत्रयं अइउ। क्लीवाः ऋॠऌॡ इति। अचः स्वराः। वह्नी रेफः इन्दुः बिन्दुस्तेन रांरींरूंरेंरैंरों-रौंरंरः इति नवबीजानि। उक्तं च महाकपिलपञ्चरात्रे—"आद्योपान्ते तृतीयं च त्यक्त्वा चैव नपुंसकम्। भेदयेन्नवधा यान्तं स्वरैरेभिर्यथाक्रमम्॥ बिन्दुयुक्तानि बीजानि शक्तीनामुद्धृतानि वै।" इति प्रयोगसार—नारायणीययोस्तु—"आद्यमन्त्यं तृतीयं च त्यक्त्वा चैव नपुंसकम्" इत्युक्तं यथागुरूपदेशं ग्राह्यमिति।

ङेन्तं वदेत्तारपूर्वं ब्रह्मविष्णुशिवात्मकम्। ततः सौराय पीठाय हृदन्तः समुदीरितः॥ २१॥
पीठमन्त्रो दिनेशस्य यजेत्पीठमनेन हि। खखोल्कादित्यमन्त्रेण मूर्तिं तस्य प्रकल्पयेत्॥ २१॥
तस्यामावाह्य देवेशं सूर्यं सम्यक् समर्चयेत्। अङ्गपूजां पुरा कृत्वा प्रपूज्या दिग्दलस्थिताः॥ २२॥
आदित्याद्याः पुरा प्रोक्ता मूर्तयो वेदसंख्यया। उषाद्याः कोणगाः पूज्याश्चतस्रः शक्तयः शुभाः॥ २३॥
स्वनामाद्यर्णसंयुक्ताः कथ्यन्ते ता यथाक्रमम्। उषाप्रज्ञे तथा प्रोक्ते प्रभासन्ध्ये मनीषिभिः॥ २४॥
ततो दलाग्रे ब्राह्म्याद्या अर्चयेदग्रतोऽरुणम्। सोमपूर्वान् ग्रहानष्टौ पूजयेत् तद्बहिः सुधीः॥ २६॥
लोकपालांश्च वज्रादीन् पूर्ववत् संयजेत्ततः। ....॥

अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि देवभागाय ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि श्रीसूर्याय देवतायै नमः। इति विन्यस्य विनियोगमुक्त्वा, सत्य-तेजोज्वालामणि हुंफट् स्वाहा हृदयाय नमः। ब्रह्मतेजोज्वालामणि हुंफट् स्वाहा शिरसे०। विष्णुतेजोज्वा-लामणि हुंफट् स्वाहा शिखायै०। रुद्रतेजोज्वालामणि हुंफट् स्वाहा कवचाय०। अग्नितेजोज्वालामणि हुंफट् स्वाहा नेत्रत्रयाय०। सर्वतेजोज्वालामणि हुंफट् स्वाहा अस्त्राय फट्। इति करषडङ्गन्यासं कृत्वा, शिरसि ॐअं आदित्याय नमः। मुखे ॐइं रवये०। हृदि ॐउं भानवे०। गुह्ये ॐऋं भास्कराय०। पादयोः लृं सूर्याय०॥ शिरसि ॐनमः। नेत्रयोः ॐघृं नमः। कण्ठे ॐणि नमः। हृदि ॐसू नमः। कुक्षौ ॐर्यं नमः। नाभौ ॐआं नमः। लिङ्गे ॐदि नमः। पादयोः ॐत्यं नमः॥ इति विन्यस्य ध्यानाद्यात्मपूजान्ते मण्डूकादिपृथिव्यन्तं योगपीठमभ्यर्च्य, क्षीरसमुद्रं सम्पूज्य नवरत्नद्वीपादिसिंहासनस्य पादेषु प्रभूताय नमः। विमलाय०। साराय०। समाराध्याय०। मध्ये परमसुखाय०। इति सम्पूज्यानन्तरं धर्मादिपरतत्त्वान्ते प्राग्वत् सम्पूज्याष्टदलकेसरेषु—रां दीप्तायै नमः। रीं सूक्ष्मायै०। रूं जयायै०। रें भद्रायै०। रैं विभूत्यै०। रों विमलायै०। रौं अमोघायै०। रं विद्युतायै०। रः सर्वतोमुख्यै०। इति मध्यान्तं सम्पूज्य, ॐब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः, इति समस्तं पीठं सम्पूज्य, खखोल्काय स्वाहा श्रीसूर्यमूर्तिं परिकल्पयामि नमः इति मन्त्रेण मूर्तिं परिकल्प्या-

वाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, दिग्दलेषु आं आदित्याय नमः । रं रवये० । भां भास्कराय० । भां भानवे० । विदिग्दलेषु उं उषायै नमः । प्रं प्रज्ञायै० । प्रं प्रभायै० । सं सन्ध्यायै० । इति सम्पूज्याष्टदलाग्रेषु प्राग्वद् ब्राह्म्याद्यष्टशक्तीः सम्पूज्य, देवस्याग्रे अरुणाय नमः । ततश्चतुरस्रस्य प्रथमरेखायां देवाग्रादिप्रादक्षिण्येन सोमाय नमः । भौमाय० । बुधाय० । वृहस्पतये० । शुक्राय० । शनैश्चराय० । राहवे० । केतुभ्यो० । इति सम्पूज्य लोकपालार्चादिसर्वं प्राग्वत् कुर्यादिति । तथा—

अष्टलक्षं जपित्वान्ते दुग्धवृक्षसमिद्वरैः । जुहुयात्तत्सहस्राणि दुग्धाक्तैः साधकोत्तमः ॥ २७ ॥
तर्पयेच्छुद्धसलिलैश्चन्द्रचन्दनवासितैः । स्वाभिषेकं ततः कृत्वा ब्राह्मणान् भोजयेत्ततः ॥ २८ ॥

इति । प्रयोगसारे—अर्घ्यदानविधिः ।

रक्ताम्बरधरो रक्तो रक्तमालार्चितः सदा । घृतर्क्ष रससमायुक्तगुडभक्ताशनो निशि ॥ १ ॥
भिक्षाहारोऽथवा वीतसङ्गः सन्तोषवान् सदा । मन्त्रमावर्तयेन्नित्यमाराधनपरायणः ॥ २ ॥
इत्थमभ्यर्च्य भास्वन्तमर्घ्यं तस्मै निवेदयेत् । प्रत्यहं रविवारे वा तद्विधानमुदीर्यते ॥ ३ ॥
पुरो मण्डलमालिख्य यजेत्पीठं यथाविधि । तत्र संस्थाप्य पात्रं हि शुद्धताम्रसमुद्भवम् ॥ ४ ॥
रम्यं प्रस्थजलग्राहि मूलमन्त्रं समुच्चरन् । शुद्धोदकेन सम्पूज्य प्रक्षिपेत्तत्र कुंकुमम् ॥ ५ ॥
रोचनाराजिकारक्तचन्दनं वंशतण्डुलान् । श्यामाकतण्डुलान् शालीन् करवीरजपाकुशान् ॥ ६ ॥
सञ्चिन्त्य देवतात्मैक्यं भास्करं साङ्गमर्चयेत् । उपचारैर्निवेद्यान्तैस्तत्र ध्यायञ्जपेन्मनुम् ॥ ७ ॥
सम्यगष्टोत्तरशतं भूयः पुष्पादिभिर्यजेत् । उद्धृत्यामस्तकं पात्रं जानुस्पृष्टमहीतल. ॥ ८ ॥
दृष्टिं निधाय व्योमार्के स्वैक्यं सावरणं स्मरेत् । ततो जपेन्मूलमनुं धिया दद्याच्च भानवे ॥ ९ ॥
अर्घ्यं प्रसन्नचित्तः सन् दत्वा च सुमनोञ्जलिम् । पुनर्नियतधीस्तावद्यावद्भानुर्निजैः करैः ॥ १० ॥
अर्घ्योदकं समादत्ते जपेदष्टोत्तरं शतम् । ततः प्रसन्नो भगवान् प्रयच्छेदिष्टमात्मनः ॥ ११ ॥

नृणामनेन भवतीह नितान्तमायुरारोग्यपुत्रधनमित्रकलत्रवृद्धिः ।
तेजश्च वीर्यमतुलं पशुकान्तिसम्पद्विद्या यशो विभवभोगसमृद्धयः स्युः ॥ १२ ॥

तन्त्रमन्त्रसहिताम्भोभिः सप्तधाञ्जलिसेचनम् । दारिद्र्यपापान्धकारनाशनं श्रीकरं परम् ॥ १३ ॥
स्थण्डिले सुतले कुम्भं तीर्थोदकसुपूरितम् । हिरण्यरत्नगन्धादि तत्र निक्षिप्य पूजयेत् ॥ १४ ॥
देवं सपरिवारं तु प्रागुक्तविधिना ततः । स्थण्डिलेऽग्निं समाधाय कपिलापयसा चरुम् ॥ १५ ॥
पक्त्वा च तेन जुहुयात्तदाज्यसहितेन च । सहस्रं कृतसम्पातं शुद्धपात्रे तु कारयेत् ॥ १६ ॥
ऋतुस्नातां सुनियतां पूर्वेऽह्नि समुपोषिताम् । अष्टमे दिवसे तां तु सहस्रमभिमन्त्रितैः ॥ १७ ॥
अभिषिञ्चेत् कुम्भजलैर्दद्यात्तस्यै च मन्त्रवित् । सहस्रमन्त्रितं होमसम्पातान्नं ततो निशि ॥ १८ ॥
भर्तापि सूर्य एवाहमिति ध्यात्वा तया सह । सम्भोगमाचरेत्तेन सुपुत्रो गुणवान् भवेत् ॥ १९ ॥

इति । यन्त्रसारे—

कर्णिकायां साध्यगर्भं तारं यन्त्रचतुष्टये । सौरस्य चतुर्वर्णस्य क्रमादेकैकमक्षरम् ॥ १ ॥
अष्टाक्षरमनोर्वर्णान् पत्रेष्वष्टसु तद्बहिः । आवेष्ट्य मातृकावर्णैर्भूपुरास्रचतुष्टये ॥ २ ॥
प्रयोजनानां तिलकं ताराद्यं च समालिखेत् । सौरयन्त्रमिदं नृणां सर्वामयविनाशनम् ॥ ३ ॥
तेजःप्रतापसौभाग्यपुत्रायुःकीर्तिवर्धनम् । धनधान्यप्रदं वश्यं सर्वरक्षाकरं परम् ॥ ४ ॥

इदमेव यन्त्रमभिलिख्य जले प्रतिमज्जतां शितधियां दिनशः ।
ज्वरकुष्ठशूलमुखरोगसंकटा विलयं प्रयान्ति न चिरादिति ध्रुवम् ॥ ५ ॥

अस्यार्थः—चतुष्पत्रकमलकर्णिकायां साध्यगर्भं प्रणवं विलिख्य पत्रेषु ॐह्रींहंसः इति चतुरक्षरमन्त्रस्यैकैकमक्षरमालिख्य, तद्बहिरष्टपत्रेषु मूलमन्त्रस्यैकैकमक्षरमालिख्य, तद्बहिर्वृत्तयोरन्तराले सबिन्दुभिर्मातृकार्णैरावेष्टच बहिश्चतुरस्रकोणेषु ॐह्रांह्रींसः इति वर्णचतुष्टयं प्रतिकोणमेकैकं लिखेद्। एतद्यन्त्रमुक्तफलदं भवति। तथा—

प्रणवं साध्यसमेतं विलिख्य षट्कोणकर्णिकामध्ये। तारं प्रयोजनानां तिलकं हंसं च षट्सु कोणेषु ॥ ६ ॥
केसरविलसत्सौरचतुरर्णं दलचतुष्टये वापि। उद्यन्नद्याद्यास्ताः पादचतुष्कमृचोऽष्टपत्रेषु ॥ ७ ॥
केसरराजत्सौरवसुवर्णके दलेष्वृचः पादान्। आलिख्य बहिर्लिप्या चावेष्ट्य कुगृहकोणेषु ॥ ८ ॥
चतुरक्षरस्य च मनोः सौरस्यैकैकमक्षरं सम्यक्। विलिखेदेतद्यन्त्रं विनाशयेद्ग्रहान् विधृतम् ॥ ९ ॥
प्रथयति तेजो लक्ष्मीर्भोगान् धृतिं प्रतापाद्यान्। अङ्गणभूमावेतद्विलिख्य सम्पूज्य तत्र दिननाथम् ॥१०॥
दद्यादर्घ्यं कान्त्यै लक्ष्म्यै कुष्ठज्वरादिशान्त्यै च। .... ॥

रोगघ्नयन्त्रमिदमेव विलिख्य ताम्रे संस्थापितं निजगृहे विधिवत्प्रपूज्य।
हन्याच्च कुष्ठमुखरोगज्वरातिशूलविस्मृत्यपस्मृतिभवानथवा विकारान् ॥ ११ ॥
आलिख्य चैतत्कलधौतपत्रे तैले विनिःक्षिप्य सहस्रसंख्यम्।
जप्त्वा तदभ्यक्ततनोर्नरस्य कुष्ठादिरोगा विलयं प्रयान्ति ॥ १२ ॥
इदमेव नवे विलिख्य यन्त्रं नवनीते त्रितयं प्रजप्य चर्चाम्।
परिभक्षयतां तदैव शूलं विषममामयमाशु नाशमेति ॥ १३ ॥

इति। अस्यार्थः—षट्कोणमध्ये ससाध्यं प्रणवं विलिख्य, तत्कोणेषु "ॐह्रांह्रींसःहंसः" इत्यक्षरषट्कमेकमेकं विलिख्य, तद्बहिश्चतुर्दलकेसरेषु "ॐह्रींहंसः" इति मन्त्रस्यैकैकमक्षरं विलिख्य, चतुर्दलेषु उद्यन्नद्येति ऋचः पादमेकैकमालिख्य, तद्बहिरष्टदलकेसरेषु मूलमन्त्रस्याष्टवर्णानालिख्य, अष्टदलेष्वेतत्सूक्तस्य द्वितीयतृतीयर्चोः पादाष्टकं प्रतिदलमेकमेकं पादमालिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैः संवेष्टच चतुरस्रकोणेषु "ॐह्रींहंसः" इति मन्त्रस्यैकैकमक्षरं लिखेत्। एतद्यन्त्रमुक्तफलदं भवति। (ऋ० १। ५०। ११)

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥ १ ॥
शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं निदध्मसि ॥ २ ॥
उदगादयमादित्यो विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥ ३ ॥

इति ॥ सारसंग्रहे मन्त्रान्तरम्—

वदेत्पदं चतुर्थ्यन्तं खखोल्काख्यं द्विठान्तकम्। षडर्णो मनुराख्यातो दिनेशस्य जगत्पतेः ॥ १ ॥

खखोल्काख्यं चतुर्थ्यन्तं खखोल्काय। द्विठः स्वाहा। अस्मिन्मन्त्रे भेदमाह कपिलपञ्चरात्रे—

याष्टमं बिन्दुना युक्तं कद्वितीयं तथैव च। तदेव केवलं भूयः ओभिन्नं गविलोमकम् ॥ १ ॥
घविलोमाच्चतुर्थं तु मांसाऽऽक्रान्तं समीरणः। समासादुद्धृतो वत्स मूर्तिमन्त्रः षडक्षरः ॥ २ ॥

याष्टम ह, बिन्दुरनुस्वारस्तद्युक्तं तेन हं। कद्वितीयं ख। तथैव बिन्दुयुक्तं तेन खं। तदेव खं केवलं बिन्दुरहितं तेन ख। गविलोमकं खं, तदोभिन्नम् ओकारयुक्तं तेन खो। घविलोमाच्चतुर्थं घकाराद्विलोमेन चतुर्थं ककारः, मांसेन लकारेण आकारेण चाक्रान्तमुपरि स्थितं तेन ल्का। समीरणो य ॥ तथा नारायणीये मन्त्रान्तरम्—

खकान्तौ दण्डिनौ चण्डो मज्जा दशनसंयुता। मांसं दीर्घाऽजवद्वायुरेतन्मन्त्रोपकृद्विदुः ॥ १ ॥

ख ह, कान्तः ख, दण्डी अनुस्वारस्तद्युक्तौ तेन हंखं। चण्डः ख। मज्जा च, दशन ओ, तेन चो। मांसं ल, दीर्घा आ, अजः क, तेन ल्का। वायुः य। सारसंग्रहे—

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छन्द ईरितम् । देवता सविता चास्य सर्वसौख्यफलप्रदः ॥ १ ॥
सूक्ष्मरूपायाग्निवधूः स्वाहान्तं सूक्ष्मतेजसे । सूक्ष्माकारायाग्निवधूः सूक्ष्मवालाय ठद्वयम् ॥ २ ॥
सूक्ष्मकाय च हुंफट् च जातियुक्ताः समीरिताः । पञ्चाङ्गमन्त्रा मन्त्रार्णैः षडङ्गं वा समाचरेत् ॥ ३ ॥
रक्तपद्मद्वयं हस्ते बिभ्राणं वरदाभये । बन्धूकाभं त्रिनेत्रं च रविं ध्यायेत्सुभूषितम् ॥ ४ ॥
पूर्वोक्ते पूजयेत्पीठे देवमावाह्य पूर्ववत् । लक्षमेकं जपेन्मन्त्री नियतात्मा जितेन्द्रियः ॥ ५ ॥
जुहुयात्तद्दशांशेन बिल्वाश्वत्थपलाशजैः । उडुम्बरसमुद्भूतैस्त्रिमध्वक्तैः समिद्वरैः ॥ ६ ॥
तर्पणादि ततः कुर्यात्प्राक्प्रोक्तविधिना सुधीः । अर्घ्यादिकं च कुर्वीत पूर्ववद्वाञ्छिताप्तये ॥ ७ ॥
एवं संसेवनात्तस्य खेचरीसिद्धिरीरिता ।.... .... ॥

इति ॥ तथा मन्त्रान्तरम्—

सदण्डी कान्तबीजाढ्यः सप्तार्णोऽयं मनुर्मतः । ऋष्याद्यङ्गविधिध्यानजपपूजादि पूर्ववत् ॥ ८ ॥

कान्तः ख दण्डी अनुस्वारस्तेन खं बीजादिः पूर्वमन्त्रः सप्तार्ण इत्यर्थः । तथा—

ङेन्तं सप्ततुरङ्गं तु विद्महे पदमुच्चरेत् । सहस्रकिरणायेति धीमहीति पदं ततः ॥ ९ ॥
तन्नो रविरिति प्रान्ते चोदयादिति संगिरेत् । जप्यात्सर्वार्कमन्वादौ गायत्र्येषा दिनेशितुः ॥ १० ॥

तेन—सप्ततुरङ्गाय विद्महे सहस्रकिरणाय धीमहि तन्नो रविः प्रचोदयात् ॥ तथा मन्त्रान्तरम्—

अथ वक्ष्ये समासेन चतुर्वर्णमनुं रवेः । तारो माया दण्डिवियत्सविसर्गोऽस्य पूर्वगः ॥ १० ॥

तारः प्रणवः । माया भुवनेशीबीजं । वियत् ह, दण्डी अनुस्वारस्तेन हं । अस्य हकारस्य पूर्वगः स, सविसर्गो विसर्गसहितस्तेन सः । तथा—

ऋषिर्ब्रह्मा च गायत्री छन्दः सूर्यात्मिका तथा । देवता भुवनाधीशा षडङ्गानि ततो न्यसेत् ॥ ११ ॥
तानि प्रणवशक्तिभ्यां त्रिभिरावर्तनैरथ । तारादिभिश्च षड्दीर्घमायाबीजैर्भवन्ति च ॥ १२॥

भास्वद्रत्नसहस्रमौलिविलसच्चन्द्रार्धमुद्योतय-
द्धस्ताब्जैर्दधदंकुशं गुणवराभीतीः सुतुङ्गस्तनम् ।
पायाद्गालितकाञ्चनाम्बुजजपाविद्युज्ज्वलत्कान्तिभि-
र्विश्वं द्योतयदार्कमाशु शिशिरं विश्वेशिकाया वपुः ॥ १३ ॥

दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये, इत्यायुधध्यानम् ।

नवशक्तिसमायुक्ते पीठे पूर्वोदिते यजेत् । मूलेन मूर्तिं संकल्प्य तत्रावाह्य दिनेश्वरम् ॥ १४ ॥
सम्पूज्य तस्यावरणान्यर्चयेत्क्रमतः सुधीः । हृल्लेखाद्या च गगना परा रक्ता तृतीयका ॥ १५ ॥
करालिका चतुर्थी स्यान्महोच्छुष्मा तु पञ्चमी । प्रथमावृतिराभिः स्याद् द्वितीयाङ्गैः समीरिता ॥ १६ ॥
तृतीया मातृभिः प्रोक्ता चतुर्थी च ग्रहैर्मता । दिक्स्थैः सोमज्ञगुरुभिः सशुक्रैरपरा तथा ॥ १७ ॥
विदिग्गतैर्भौमसौरिराहुकेतुभिरादरात् ।.... ....॥

इति । तथा प्रयोगसारे—

स्वनामाद्यक्षरैर्बिन्दुभूषितैरन्वितान् यजेत् । भूयस्ततो लोकपालैः पञ्चमी च तदायुधैः ॥ १ ॥
षष्ठी प्रोक्तैवमभ्यर्चेद् दिनशो दिननायकम् ।.... ....॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये श्रीसूर्यरूपिणीभुवनेश्वर्यै देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ॐ हृदयाय नमः । ह्रीं शिरसे० । ॐ शिखायै० । ह्रीं कवचाय० । ॐ नेत्रत्रयाय० । ह्रीं अस्त्राय० । इति करषडङ्गन्यासं कृत्वा, ध्यानादिपुष्पोपचारान्ते कर्णिकायामेव देवस्य मूर्तौ देवाग्रदक्षोत्तर-

पश्चिमेषु—ह्रं हृल्लेखायै नमः । गं गगनायै० । रं रक्तायै० । कं करालिकायै० । मं महोच्छुष्मायै० । इति सम्पूज्य, प्राग्वत् केसरेषु षडङ्गानि सम्पूज्याष्टदलेषु प्राग्वद् ब्राह्म्याद्याः सम्पूज्याष्टदलाग्रेषु दिग्विदिक्क्रमेण— सं सोमाय नमः । वुं बुधाय० । बृं बृहस्पतये० । शुं शुक्राय० । मं मङ्गलाय० । शं शनैश्चराय० । रं राहवे० । कें केतुभ्यो० । इति सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत् कुर्यात् ॥ तथा—

चतुर्लक्षं जपेन्मन्त्रं जुहुयात्तद्दशांशतः । ब्रह्मवृक्षसमुद्भूतैः पुष्पैस्त्रिमधुराप्लुतैः ॥ १८ ॥
सरोजैर्वा ततो देवं तर्पयेदभिषेचयेत् । ब्राह्मणाराधनं कुर्यात्ततः सिद्धो भवेन्मनुः ॥ १९ ॥
एवं साधितमन्त्रस्तु काम्यकर्माणि साधयेत् । यजेदेवं प्रतिदिनं रविवारेऽथवा सुधीः ॥ २० ॥
दद्यादर्घ्यद्वयमपि भवेत्तस्येप्सितं फलम् । ....॥

इति ॥ तथा मन्त्रान्तरम्—

वह्निदीर्घेन्दुमद्व्योम माया सर्गान्वितो भृगुः । प्रयोजनानां तिलकः त्र्यक्षरः कथितो मनुः ॥ २१ ॥

वह्निः रेफः, दीर्घा आ, इन्दुरनुस्वारस्तद्युतं व्योम हकारः, तेन ह्रां । माया ह्रीं । सर्गो विसर्गः । भृगुः सकारस्तेन सः । तथा—

अजोऽस्य मुनिरुद्दिष्टो गायत्रं छन्द उच्यते । देवताऽस्य मनोः ख्यातः सविता सेवितः सुरैः ॥ २२ ॥
गुह्यात्पादतलं यावद्गलाद्गुह्यकं तथा । कान्ताच्च गलपर्यन्तं मन्त्रार्णान् विन्यसेत् सुधीः ॥ २३ ॥
मायाबीजेन षड्दीर्घयुजाङ्गानि प्रविन्यसेत् । इति । ध्यानम्—

अरुणकमलसंस्थं त्रीक्षणं भूरिभूषं ह्यरुणकमलयुग्माभीष्टदाभीतिहस्तम् ।
अरुणतरशरीरं भावयामो दिनेशं ह्यरुणकरसुसेव्यं सर्वदेवौघवन्द्यम् ॥ २४ ॥

पूर्वोदिते यजेत्पीठे नवशक्तिसमन्विते । देवमावाह्य सम्पूज्य पुराङ्गानि समर्चयेत् ॥ २५ ॥
चन्द्रादिभिर्ग्रहैरन्या दिगीशैरपरावृतिः । तदायुधैश्चतुर्थी स्यादेवं पूजा समीरिता ॥ २६ ॥
ततश्च तेजश्चण्डाय निर्माल्यं विनिवेदयेत् । .... ॥

अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अजाय ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये श्रीसूर्याय देवतायै नमः । इति विन्यस्य विनियोगमुक्त्वा, गुह्यादिपादपर्यन्तं, ह्रां नमः । कण्ठाद्गुह्यपर्यन्तं, ह्रीं नमः । मूर्धादिकण्ठान्तं, सः नमः । इति विन्यस्य, ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् । ह्रैं कवचाय हुं । ह्रौं नेत्राभ्यां० । ह्रः अस्त्राय० । इति करषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गपूजान्ते प्राग्वद् ग्रहान् सम्पूज्य लोकेशार्चादि सर्वं प्राग्वत्समापयेत् । इति । तथा—

जपेद् द्वादशलक्षं च तत्सहस्रं हुनेत्तिलैः घृताक्तैर्मधुराक्तैश्च पयोन्नैश्चैव तादृशैः ॥ २७ ॥
तर्पणादि ततः कुर्यात्प्रयोगान् साधयेत्तथा । दद्यात्पूर्वोदितं चार्घ्यं दिनेशाय सुसाधकः ॥ २८ ॥
सोऽप्यस्य धनधान्यादिपुत्रपौत्रविवर्धनम् । करोति रत्नवस्त्रादिभूषणादिविवर्धनम् ॥ २९ ॥
अष्टपत्राम्बुजं कुर्यात्तत्र कुम्भान् नव न्यसेत् । पत्रमध्ये कर्णिकायां तांश्च तोयेन पूरयेत् ॥ ३० ॥
नवग्रहान् समावाह्य तेषु कुम्भेषु मन्त्रवित् । कर्णिकाकलशं मूलमन्त्रेण च सहस्रकम् ॥ ३१ ॥
प्रजप्यान्येषु तन्मन्त्रान् शतकृत्वो जपेत् सुधीः । तज्जलैरभिषिञ्चेद्यः साधको ग्रहदोषतः ॥ ३२ ॥
रोगा नश्यन्ति सततं लक्ष्मीश्चापि स्थिरा भवेत् । ग्रहहोमः प्रकर्तव्यो ग्रहाणां वैकृते तथा ॥ ३३ ॥
चन्द्रभान्वोश्चोपरागे निजर्क्षे वाथ मन्त्रवित् । रिपुजे च भये वाथ घोररूपे गदेऽथवा ॥ ३४ ॥
पूर्ववन्मण्डलं कृत्वा ग्रहान् सम्पूज्य तत्र च । स्वदिक्षु चाग्नीन् संस्थाप्य जुहुयाच्च समिद्वरैः ॥ ३५ ॥
अर्कद्विजद्रुमायूराश्वत्थोडुम्बरखादिरैः । शमीदूर्वाकुशोद्भूतैः क्रमाद्धोमः समीरितः ॥ ३६ ॥

द्विजद्रुः पलाशः । मयूरा अपामार्गः ।
अष्टाधिकं सहस्रं च हुनेत्सूर्यस्य चाहुतीः । अष्टाधिकं शतं मन्त्री सोमादीनां तथाहुतीः ॥ ३७ ॥
अन्ते चाज्यैर्व्याहृतिभिर्हुत्वा होमं समापयेत् । गुरुं सन्तोष्य ऋत्विग्भ्यो यथाशक्ति च दक्षिणाम् ॥ ३८ ॥
दद्याच्च भोजयेद्विप्रान् संग्रामे विजयी भवेत् । रोगाः शान्ति व्रजन्त्याशु दीर्घमायुश्च विन्दति ॥ ३९ ॥
कृत्याद्रोहादिकानां च शान्तिरेवाशु जायते । सर्वेषां च ग्रहाणां च होम एकत्र वा भवेत् ॥ ४० ॥
एवं प्रतिदिनं मन्त्री दिननाथं समर्चयेत् । धनधान्यैश्वर्यपूर्णमायुर्दीर्घं च विन्दति ॥ ४१ ॥

इति ॥ अथ पुत्रेष्टिः । भविष्योत्तरे भृगुं प्रति नारदवाक्यम्—

पुत्रीयं यज्ञमाचक्ष्व सतां वंशविवर्धनम् । शक्रेणेति गुरुः प्रोक्तो यथाहं कथयामि ते ॥ १ ॥
बहुस्त्रीकोऽसुतो वन्ध्यः पुत्रीयं यज्ञमाचरेत् । पुण्यर्क्षमासतिथिषु ते कथ्यते यथाक्रमम् ॥ २ ॥
पूर्वोत्तरेषु सर्वेषु हस्तश्रवणमूलके । मृगपुष्यमहाज्येषु पूर्वातिथिगुणेषु च (?) ॥ ३ ॥
गुरुशुक्रेन्दुसौम्येषु स्थिरलग्नेषु सङ्गवे । शुक्रे केन्द्रगते वार्कग्रहणे समुपस्थिते ॥ ४ ॥
भृगुशुद्धौ विशुद्धार्के गुरुचन्द्रशुभेऽहनि । मार्गफाल्गुनवैशाखे श्रावणे कार्तिके तथा ॥ ५ ॥
शुक्लपक्षे विधातव्यं पुत्रीयं यज्ञमादरात् । आचार्यो भूसुरः श्रीमान् सर्वागमविशारदः ॥ ६ ॥
अलोभः सत्यवादी च कर्मवान् संमतः सताम् । व्रतकष्टसहिष्णुश्च जितक्रोधो जितेन्द्रियः ॥ ७ ॥
कृतोपवासो यजमानस्तद्वत् स्त्रीभिः समावृतः । तद्वदाचार्यनिकटं यायादर्घ्यकरः स्वयम् ॥ ८ ॥
पत्नीग्राहितबल्यन्नः सायं तस्य निमन्त्रणे । उत्तराभिमुखो विप्रो यजमानोऽप्युदङ्मुखः ॥ ९ ॥
पूर्वमुख्यः स्त्रियः सर्वास्ता विशेयुर्यथाक्रमम् । उपस्पृशञ्जलं दर्भं प्रोक्तासनवरोपरि ॥ १० ॥
गन्धपुष्पादिसौवर्णयज्ञसूत्राङ्गदादिभिः । वासोभिः शोभितं कृत्वा श्रावयेदिदमन्ततः ॥ ११ ॥
श्वस्तनेऽहनि पुत्रेष्टिकर्म कर्तुमहं द्विजा । उक्त्वा गोत्राह्वयं पश्चाद् ब्राह्मणं तदनन्तरम् ॥ १२ ॥
वरिष्ये त्वामिति प्रोच्य प्रणमेद्विप्रमेकदा । स्वस्तिस्वस्तिं तवाहं स्यामाचार्यः पुत्रियक्रतौ ॥ १३ ॥
श्वस्तनेऽहनि सम्प्रोच्य सर्वानुत्थापयेच्च तान् । आचार्येण समं सायमेकस्मिन्नालये शुभे ॥ १४ ॥
संविशेयुः कुशास्तीर्णे कम्बले मृदुवाससि । ततः प्रभृति कुर्वीत दीपं रात्र्यन्तगोचरम् ॥ १५ ॥
प्रत्यहं क्षालयेच्छय्यावासः क्षाराम्बुना पृथक् । गृहं च शोधयेन्नित्यं मृद्गोमयजलैः शुभैः ॥ १६ ॥
विकिरान् विकिरेत्सायं नूतनं दीपमुज्ज्वलम् । रक्षोघ्नं स्थापयेत्तत्र कपिलापञ्चगव्यकम् ॥ १७ ॥
तिलाज्यमधुसम्पूर्णं हेमपात्रं सरत्नकम् । धूपः सिन्दूरकर्पूरगुग्गुल्वगुरुकुंकुमैः ॥ १८ ॥
सचन्दनैः प्रदातव्यः सर्वविघ्नोपशान्तये । भित्तौ च सर्वतस्तस्य सेचयेच्चतुरः समैः ॥ १९ ॥
स्नानद्वयं प्रकुर्वीत यजमानो व्रते स्थितः । आचार्यो घृतपलं प्राशेदथ दुग्धपलद्वयम् ॥ २० ॥
पलद्वयं च दधि वा तोयं पलचतुष्टयम् । जलाशी वा फलाशी वा निराहारोऽथवा भवेत् ॥ २१ ॥
यजमानस्तु कलमसम्भवांस्तण्डुलांस्तथा । अक्षतान् फलसंशुद्धान् क्षालितांश्च पुनः पुनः ॥ २२ ॥
प्रस्थमात्रान् कपिलाज्यदुग्धपक्वान् मृदूँल्लघून् । सायंकृत्यान्तरे काले भुञ्जीतैक्षवसंयुतान् ॥ २३ ॥
स्त्रियोऽपि श्यामकलमसम्भवांस्तण्डुलांस्तथा । अर्धाहारं प्रकुर्वीत संस्कृतांस्तीर्थवारिणा ॥ २४ ॥
सैन्धवेन घृतेनात्र समभ्यर्च्य प्रजापतिम् । ब्राह्मे मुहूर्ते चोत्थाय मूत्रोत्सर्गौ विधाय च ॥ २५ ॥
कृतशौचक्रियः शुद्ध आचान्तः प्रोक्तवर्त्मना । दन्तकाष्ठं विधायाथ स्नायात्सूर्योदयात्पुरा ॥ २६ ॥
आचार्यो यजमानश्च महानद्यां स्त्रियश्च ताः । प्रात कृत्यं यथाप्रोक्तं कृत्वा सूर्यमनुं जपेत् ॥ २७ ॥
सार्धयामद्वये यावत्प्रातरारभ्य संजपेत् । जपादौ च जपान्ते च देवं सम्पूजयेद्रविम् ॥ २८ ॥
होमं कृत्वा दशांशेन ततो मध्याह्निकीं क्रियाम् । कृत्वा सन्तर्पयेद्देवं दशांशैः शुद्धवारिणा ॥ २९ ॥

मार्जयेच्च तदर्धेन यावदुक्तार्कमण्डलम् । सायंकृत्यं विधायाथ भुञ्जीरनुक्तवर्त्मना ॥ ३० ॥
प्रणम्याचार्यचरणौ शयीरंस्तस्य देशतः । एवं प्रोक्तानि कर्माणि प्रातःकृत्यादनन्तरम् ॥ ३१ ॥
सोपवासः प्रकुर्वीत प्रतिज्ञां पुत्रियक्रतौ । एतस्य यजमानस्य पत्न्यामस्यामथासु वा ॥ ३२ ॥
पितृभ्योऽधिकगुणवत्पुत्रकामोऽद्य कालतः । मासद्वयं यावदहं त्रिलक्षकृतसंख्यया ॥ ३३ ॥
अक्षरं (आर्कं) मन्त्रं महाश्वेताशक्ति भास्करदैवतम् । देवभागमुनिं तद्वद्गायत्रीछन्दसान्वितम् ॥ ३४ ॥
जप्त्वैतस्य दशांशेन कपिलाज्यतिलेन च । हुत्वार्कोपचिते वह्नौ योनिकुण्डे तदर्धतः ॥ ३५ ॥
तर्पयेच्छुद्धतोयेन सम्मार्ज्यापि तदर्धतः । कल्पोक्तविधिना देवं सम्पूज्य भास्करं प्रभुम् ॥ ३६ ॥
रक्तभूमध्यकुम्भं तं सञ्चिन्त्याभ्यर्च्य पूर्ववत् । तज्जलेन सपत्नीकं यजमानं स्नापितं मुने ॥ ३७ ॥
तत्पत्नीकर्तृकचरुप्राशनं चरुमुच्चरेत् । पुत्रीयं यज्ञं करिष्ये प्रतिज्ञामाचरेदिति ॥ ३८ ॥
ततो ह्यनन्तरे काले उपान्ते होममाचरेत् । सार्धं त्रिंशत्सहस्राणि जप्त्वा प्रोक्तेन वर्त्मना ॥ ३९ ॥
पूर्णाहुतिं सपत्नीकयजमानसमन्वितः । कुर्याच्च त्र्यायूषं तेषु वह्निं संरक्षयेत्ततः ॥ ४० ॥
प्रत्यहं पूजयेत्तं च देवताकारमाहितम् । प्रतिज्ञानिर्विघ्नकरान् कृतस्वस्त्ययनद्विजान् ॥ ४१ ॥
सन्तर्पयेद्भोजनेन त्रिमध्वक्तेन साधकः । तेभ्यश्च दक्षिणां दत्त्वा दद्यात्तु प्रेप्सितं वरम् ॥ ४२ ॥
चक्रं विदध्यादाचार्यस्ततो वर्णैस्तु पञ्चभिः । नवनाभं यथाशोभं वह्नेरुत्तरतो दिशि ॥ ४३ ॥
हैमान्वा रूप्यताम्रोत्थान् कलशान्नव शोभनान् । क्षालितानस्त्रमनुना धूपितान् कलशांस्तु तान् ॥ ४४ ॥
मध्यादिप्रदक्षिणतः पदेषु नवसु स्मरन् । ग्रहान्नव ततो दीक्षाविधिवत् स्थापयेत्तु तान् ॥ ४५ ॥
सूर्यादिकान् ग्रहांस्तांस्तु पूजयेच्च पृथक् पृथक् । दीक्षोक्तेन विधानेन प्रत्यहं दिवसत्रयम् ॥ ४६ ॥
दिक्पालान् पूजयेत् सूर्ये ततश्चाष्टग्रहानपि । सूर्यं तु कुम्भतोयान्तर्जलान्यप्यत्र चान्यतः ॥ ४७ ॥
कुम्भेभ्यो निक्षिपेन्मन्त्रैर्मन्त्रास्त्वाद्यर्णबीजकाः । चतुर्थ्यन्ता नमोन्ताश्च मध्यकुम्भाम्भसा पृथक् ॥ ४८ ॥
आचामयेत्स तान् सर्वानासीनानुत्तरामुखान् । स्नापयेन्मूलमन्त्रेण साधकः सूर्यं संस्मरन् ॥ ४९ ॥
यथा ज्येष्ठां च तत्पत्नीं श्वेतवस्त्रं पिधापयेत् । अन्यकुम्भाम्भसा पात्र एकत्र कृतसम्पदा ॥ ५० ॥
आचमेन्मूलमन्त्रेण सर्वानेतान् पृथक् पृथक् । चरुं पचेद्धोमवह्नौ कथ्यतेऽस्य विधिः शुभः ॥ ५१ ॥
क्षालयेदस्त्रतोयेन हौमं चरुमनेकधा । होमाग्नावादधीतामुं प्रजापतिमनुं स्मरन् ॥ ५२ ।
मूलेन कपिलादुग्धं क्षिपेत्प्रस्थचतुष्टयम् । तथा हैमन्तिकश्वेतधान्यतो हस्तविद्रुतान् ॥ ५३ ॥
अक्षतान् प्रस्थसंख्यातान् क्षालितांस्तीर्थवारिणा । कपिलायास्तु गोर्मूत्रैर्गोमयैः पयसा तथा ॥ ५४ ॥
दध्ना घृतेन प्रत्येकं त्रिभिः प्रक्षालयेद् ध्रुवम् । मूलमन्त्रं जपेत्स्पृष्ट्वा सहस्रं हेमपात्रके ॥ ५५ ॥
तत्र सम्पूजयेद्देवं कल्पोक्तविधिना रविम् । तांस्तु देवमयान्ध्यात्वा चरोर्मध्ये तु निक्षिपेत् ॥ ५६ ॥
हेमपात्र्यां च मूलेन हस्ताभ्यां तन्मुखं स्पृशन् । शतं सहस्रं प्रजपेन्मन्त्रं फलत्रयोपरि ॥ ५७ ॥
पूजयेत्पूर्ववत्तत्र भास्करं लोकभास्करम् । निर्माल्यादि चरोस्तस्माद् दूरीकृत्याथ मन्त्रवित् ॥ ५८ ॥
कल्पोक्तन्यासजातानि चरोरेव प्रविन्यसेत् । अभिघारं घृतेनात्र मूलेनोत्सृज्य च त्रिधा ॥ ५९ ॥
अवतार्य मुखं स्पृष्ट्वा सहस्रं च जपेन्मनुम् । व्याहृतीभिः पक्वचरुणाग्नये च ततः परम् ॥ ६० ॥
प्रजापतये स्वाहेति अथेन्द्रादिभ्य एव च । तदस्त्रेभ्यश्च प्रत्येकं भास्करेभ्यश्चरुं तथा ॥ ६१ ॥
जुहुयात् पञ्चमांशेन सघृतेन चरोस्ततः । नवनाभान्तरे मध्ये पूजयेत्पूर्ववच्चरुम् ॥ ६२ ॥
संस्थाप्य पूजयेत्तत्र देवं पूर्वोक्तवर्त्मना । निर्माल्यं दूरतः कृत्वा ग्रहानष्टौ ततो यजेत् ॥ ६३ ॥
दिक्पालान्पूजयेत्तेषु पायसान्नं बलिं हरेत् । ततोऽपसार्य निर्माल्यं चरुमुत्थाप्य मन्त्रवित् ॥ ६४ ॥
विप्राशीभिः प्रवृत्ताभिः पञ्चघोषपुरःसरम् । आचार्यः पुत्रतेजोदो ब्रह्मप्रत्यधिदैवतम् ॥ ६५ ॥

रुद्राधिदैवतं तस्मादिदं भास्करदैवतम् । गृहाण भुङ्क्ष्व पत्नीभ्यो विभज्याभ्यो निवेदय ॥ ६६ ॥
एतान् भुञ्जीत पुत्राप्त्यै पञ्चग्रासान् यथाकृतान् । भुक्त्वाचामयेयुरन्ते दन्तकाष्ठं विधाय च ॥ ६७ ॥
पुनराचम्य ते सर्वे गुरुपादाम्बुजद्वये । निपतेयुरसावुत्थाप्येदं ब्रुवन् स मन्त्रवित् ॥ ६८ ॥
पित्रादिगुणवत्पुत्रं लभध्वमतितेजसम् । दीर्घायुषं महासत्त्वं सदा लक्ष्मीनिषेवितम् ॥ ६९ ॥
जितशत्रुं कुलदीपं कुलदीप्तिकरं परम् । विद्यानां पारगं दान्तं दातारं गजवाजिनाम् ॥ ७० ॥
भोक्तारं वसुधायास्तं यशसा क्रान्तभूतलम् । इत्यादायाशिषं मूर्ध्ना प्रणमेच्च पुनः पुनः ॥ ७१ ॥
एतत्पुत्रीययज्ञस्य प्रतिकार्यं निवेदयेत् । गुरवे दक्षिणां दत्त्वा सुवर्णानां शतं तथा ॥ ७२ ॥
गावो महिष्यो वृषभा अश्वयूथो गजादयः । सम्पन्नापणचक्रार्था उद्यानवनशोभिताः ॥ ७३ ॥
ग्रामा ग्रामगुणोपेता ये स्युर्नद्यम्बुमातृकाः । भूषणासनशय्यादिधनधान्यालयानि च ॥ ७४ ॥
नान्यत्र याचते येन तावदस्मै निवेदयेत् । आचार्ये प्रणतिं कुर्याद् ब्राह्मणैः सहितः स्वयम् ॥ ७५ ॥
ब्राह्मणान् भोजयित्वा च दीनान्धान् रोगपीडितान् । यजमानं सपत्नीकं शान्तिकुम्भोदकेन च ॥ ७६ ॥
अभिषिच्य ऋत्विक् स्वस्ति प्रोच्यागच्छेत्स्वमालयम् । यजमानस्त्रियश्चैता यावत्कुसुमसंस्थिताः ॥७७॥
पुष्पवत्यामथैकस्यामर्धरात्रे स्त्रियं भजेत् । विशुद्धमृदुशय्याकः शुद्धवस्त्रसुगन्धिधृक् ॥ ७८ ॥
चारुस्रग् गन्धभूषाढ्यः सुगन्धिकृतलेपनः । कुण्डलादिविभूषावान् पृष्ठतो यज्ञसूत्रधृत् ॥ ७९ ॥
स्त्रियामासज्जमानायां सिञ्चेदम्भो धृढध्वजः । सिक्ते रेतस्यथाश्लिष्टौ तिष्ठतां दंपती क्षणम् ॥ ८० ॥
सुयन्त्रिता तथा नारी कर्तव्या यत्नतः स्तने । सम्भोगेऽपि निपीडया च यतः शक्तिमुपैति सा ॥ ८१ ॥
उत्थायाचामतस्तौ हि शूद्रवच्छौचमाश्रितौ । स्नायातां चेत्कृताभ्यङ्गौ तूर्णं वाचामयेत्पृथक् ॥ ८२ ॥
पयः पीत्वा यथावाञ्छं पुमांस्ताम्बूलमाचरेत् । नारी हरीतकीं भवेत्प्रातः कुंकुमसंयुताम् ॥ ८३ ॥
पूर्ववत्तौ शयीयातां यावत्षोडशवासरान् । देवपुत्रो भवेत्तत्र नात्र कार्या विचारणा ॥ ८४ ॥
आषोडशदिनाद्यावदृतुकालं बिदुर्बुधाः । दिवा वा निशि वा जाते पुष्पभागे भगाम्बुजे ॥ ८५ ॥
ताश्चतस्रो निशास्त्याज्याः स्नानं स्यात्पञ्चमे दिने । आद्याश्चतस्रो निन्द्यास्ताः सङ्गमस्तासु गर्हितः ॥८६॥
समरात्रं प्रसिञ्चेत्तु पुत्रार्थी प्रोक्तवर्त्मना । आदौ दिवा निषेवेत यदि गर्भो भवेदपि ॥ ८७ ॥
अल्पायुरल्पवचनो दाहमोहरुजाकुलः । द्वितीये दुःखभोगः स्यात्तृतीये रोगवांस्तथा ॥ ८८ ॥
चतुर्थे पञ्चपञ्चाशद्दिनानीह स जीवति । षष्ठे षष्टिं च साराढ्यो वर्षाणीह स जीवति ॥ ८९ ॥
अष्टमे सप्तति वर्षान् दशमेऽशीतिवत्सरान् । द्वादशे नवतिं चाब्दान् षोडशे साष्टकं शतम् ॥ ९० ॥
रात्रिकालेऽपि कथ्यन्ते संयोगार्थाः सुगोपिताः । प्रथमे घटिकाकाले योगाद्गर्भो यदा भवेत् ॥ ९१ ॥
अल्पायुरल्पशक्तिश्च त्रिंशद्वर्षाणि जीवति । चत्वारिंशद् द्वितीयेऽपि एवमग्रेऽपि वर्धते ॥ ९२ ॥
एकैकपंक्तिभागेन यावत्साग्रं शतं पृथक् । नन्दायां मन्दभाग्यः स्याद्भद्रायां भास्करोपमः ॥ ९३ ॥
जयायां विष्णुसदृशो रिक्तायां निर्बलोऽधमः । पूर्णायां पूर्णलक्ष्मीवान् विद्वान् भवति धार्मिकः ॥ ९४ ॥
कुजे कुब्जादिकं देहे सहिष्णुर्बहुवित्तवान् । बुधे विद्वान् बुद्धिहीनो धर्मकर्मरतः स्मृतः ॥ ९५ ॥
गुरौ गुरुमतिः श्रीमान् बहुभोक्ता जगत्प्रियः । शुक्रे मतिजिताशेषः सानुरक्तो गुणप्रियः ॥ ९६ ॥
शनौ स्थिरमतिः पापारोपणः परमर्षकः । रवौ क्रोधवशो लोलो बहुपुत्रो रुजाकुलः ॥ ९७ ॥
चन्द्रे सुन्दरदेहः स्याद्धनवान् धार्मिकः सुधीः । पञ्चपर्वसु यो जातः स भवेत्तस्करोऽधमः ॥ ९८ ॥
सार्वभौमो भवेद्गर्भः पञ्चम्यामुत्तरे भृगौ । शुभसिद्ध्यमृतानन्दे गर्भो राजेश्वरो भवेत् ॥ ९९ ॥
विष्टिदुष्टेषु कालेषु यावज्जीवं रुजाकुलः । ....॥

इति ॥ तथा मन्त्रान्तरम्—

मनुर्वह्निसमारूढो मस्तकेन च संयुतः । वर्माढ्यो मनुराख्यातः संग्रामविजयाभिधः ॥ १ ॥

मनुः औकारः, वह्नी रेफः, मस्तकोऽनुस्वारः, एतैः रौं । वर्म हुंकारः ।

ऋष्याद्या मन्त्रिभिः प्रोक्ता अजगायत्रिभानवः । ह्रामाद्यैरङ्गमुद्दिष्टं मनोरस्य दिनेशितुः ॥ २ ॥
पद्मयुग्मं वराभीती दधानं करपङ्कजैः । रक्तपद्मस्थितं भानुं रक्तं ध्यायेत्त्रिलोचनम् ॥ ३ ॥
न्यासपूजादिकं सर्वं त्र्यक्षरोक्तविधानवत् । अर्घ्यं पूर्वोदितं कृत्वा संग्रामे विजयी भवेत् ॥ ४ ॥

इति ॥ तथा मन्त्रान्तरम्—

शिरोयुक्तं विष्णुपदं चन्द्रो जिह्वान्वितो मनुः । आत्मनो युग्मवर्णोऽयमजपाख्यो विषापहः ॥ ५ ॥

शिरोयुक्तं विष्णुपदं बिन्दुयुक्ता हकारः । चन्द्रो जिह्वान्वितो विसर्गयुक्तो सकारः । तथा—

ब्रह्मा मुनिः समुद्दिष्टो गायत्रीछन्द उच्यते । देवीपूर्वं देवतास्य परमात्मा समीरितः ॥ ६ ॥
षड्दीर्घभाजा च हसा विदध्यादङ्गमस्य वै । .... ॥

रक्ताब्जकाञ्चननिभं गुणाङ्कयुक्तैर्हस्तैरभीतिवरदे दधदम्बुजस्थम् ।
गौरीहराङ्ककलितं वपुराश्रयामः सौम्याग्निरूपमनिशं गिरिजार्धभागम् ॥ ७ ॥

उपरितनयोः करयोः पद्मयुगं, वामाद्यधःकरयोरभीतिवरौ, इत्यायुधध्यानम् ।

पूर्वोदिते यजेत्पीठे दीप्तादिपरिकल्पिते । तत्र देवं यजेन्मूर्तिं मूलेनाकल्प्य मन्त्रवित् ॥ ८ ॥
पूर्वमङ्गैर्यजेन्मन्त्री दिग्दलेषु प्रपूजयेत् । क्रमादृतं वसुं तद्वन्नरं पश्चाद्वरं तथा ॥ ९ ॥
विदिग्दलेषु चाभ्यर्च्या ऋतजाख्या अतः परम् । गोजा अब्जाद्रिजा वापि ततो लोकेश्वरान् बहिः ॥ १० ॥
वज्रादीनि ततः पश्चाद्यजेदनुदिनं सुधीः । .... ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे देवीगायत्रीछन्दसे नमः । हृदि परमात्मने देवतायै नमः । इति विन्यस्य मम मोक्षार्थे विनियोगः इति कृताञ्जलिरुक्त्वा, ह्सां हृदयाय नमः । ह्सीं शिरसे० । ह्सूं शिखायै० । ह्सैं कवचाय० । ह्सौं नेत्राभ्यां० । ह्सः अस्त्राय फट् । इति करषडङ्गन्यासं कृत्वा, ध्यानाद्यङ्गार्चान्ते दिग्दलेषु देवाग्रादि प्रादक्षिण्येन—ऋताय नमः । वसवे० । नराय० । वराय० । विदिग्दलेषु—अब्जायै नमः । गोजायै० । ऋतजायै० । अद्रिजायै० । इति । सम्पूज्य लोकेशार्चादि प्राग्वत्कुर्यादिति । तथा—

जपेद् द्वादशलक्षं तु तद्दशांशं हुनेत्तथा । सर्पिरक्तेन हविषा तर्पणादि ततश्चरेत् ॥ ११ ॥
पूर्वोदितेन विधिना सूर्यायार्घ्यं निवेदयेत् । .... ॥

कृत्वा सह्निपिपद्ममत्र च भवेन्मध्ये मनुर्मूलगो
न्यस्यास्योपरि तोयपूर्णकलशं सम्यक्पिधायास्य च ।
वक्त्रं वामकरेण मूलमनुना जप्तेन चाष्टोत्तरं
संजप्याथ शतं सुधामयमिति स्मृत्वाभिषिञ्चेच्च तम् ॥ १२ ॥
साध्यं तेन नरो भवेद्विगतभीः सर्वत्र वीतामयो ।
दीर्घायुश्च विपद्भयेन रहितो योपिच्च सौभाग्ययुक् ।
तेनैव प्रजपेत्करेण करकं सम्यक्पिधायामृती-
भूतैस्तैर्विपिणं निषिञ्चति विषं वा कालकूटं हरेत् ॥ १३ ॥
अथवा मनुमत्र जपेत्स्वकरं विपिमूर्ध्नि सुधां विनिधाय ततः ।
स तु तक्षकदष्टमपीह नरं प्रतिमोचयते ह्यचिरान्मनुना ॥ १४ ॥

सञ्चिन्त्याशु सुधाकरद्वयगलत्पीयूषधाराप्लुतं बीजं प्रान्तगतं ततः स्रुतसुधासंभावितं चादिमम् ।

मन्त्रस्यास्य कृती जपेन्मनुमिमं क्षुद्रामयघ्नं परं भूतापस्मृतिसर्पजातविकृतीर्हत्वा सुखं जीवति ॥ १५ ॥
शीर्षे चन्द्रविनिःसृतं स्रुतसुधं हंसात्मरूपं मनुं तत्सौषम्नपथं स वै विमलधीर्नीत्वा ततः स्वां तनुम् ।
व्याप्तां तेन विचिन्त्य तां मनुमिमं सञ्जप्य धीमान्कृती रोगापस्मृतिकालकूटदुरितोन्मादज्वरान् संहरेत् ॥

आकाशान्तरचन्द्रखण्डविलसत्पीयूषधाराचितं
मन्त्रान्त्यं सगतार्धचन्द्रयुगलप्रोद्भूतभासा मुहुः ।
एवं साधकसत्तमस्य सततं दाहार्तिभूतामयाः
कृत्याः शत्रुकृताः प्रयान्ति विलयं योगः परोऽयं मतः ॥ १७ ॥

इति ॥ तथा मार्तण्डस्य मन्त्रः—

वियत्कृशानुमान्ताभ्यां मनुषष्ठेन्दुभिर्युतम् । मार्तण्डभैरवो मन्त्रो भजतां सर्वसिद्धिदः ॥ १८ ॥

वियत्हकारः कृशानु रेफः, मान्तो यकारः, मनुः औकारः, षष्ठ ऊकारः, इन्दुर्बिन्दुः, एभिः पिण्डितं बीजं ह्रयौऊं इति सिद्धं भवति ।

मध्यगो बिम्बमन्त्वोश्च सर्वेष्टफलदायकः । दान्ताग्न्यक्ष्युत्तमाङ्गैस्तु बिम्बबीजमुदाहृतम् ॥ १९ ॥

दान्तो धकारः, अग्नी र, अक्षि इ, उत्तमाङ्ग बिन्दुः, तेन ध्रिं इति । मन्त्रान्तरं तु—"टान्तं दहननेत्रेन्दुसहितं तदुदीरितम् ।" टान्तं ठकारः, दहनो रेफः, नेत्रं इ, इन्दुरनुस्वारः, तेन ठ्रिं इति बिम्बबीजमुद्धृतं । यथोपदेशं जपः । ब्रह्मा ऋषिः, निचृद्गायत्री छन्दः, मार्तण्डभैरवो देवता, हं बीजं, बिन्दुः शक्तिरिति वदन्ति । तथा—

मूर्तयः पञ्च चोद्दिष्टाः सूर्यभास्करभानवः । रविर्दिवाकरश्चापि न्यस्तव्या अंगुलीषु ते ॥ २० ॥
मध्यमांगुलिमारभ्य कनिष्ठान्तं न्यसेत्सुधीः । मूलाणुना पञ्चह्रस्वैर्युक्तेनानेन संयुताः ॥ २१ ॥
शिरोवदनहृद्गुह्यपादेष्वेताः क्रमान्न्यसेत् । ....॥

मध्यमांगुलिमिति मध्यमातर्जन्यंगुष्ठानामाकनिष्ठासु । "मध्यमाद्यनुजान्तास्विति" नारायणीयवचनात् । पञ्चह्रस्वैरकाराद्योकारान्तैः षण्डविधुरैः ॥ "मूर्तीः सद्यावसानिकाः" इति नारायणीयोक्तेः ।

ततः षडङ्गं नेत्रान्त्रं कुर्याद्दीर्घयुजाणुना । ततस्तेनैव कुर्वीत व्यापकं मन्त्रवित्तमः ॥ २२ ॥

अत्रास्त्रन्यासानन्तरं नेत्रन्यासः कार्यः । अत्र केचित्—"दीर्घयुक्तेन बीजेन नेत्रान्ताङ्गानि विन्यसेत् ।" इति शारदातिलकवचनात्, नेत्रान्तानि पञ्चाङ्गानि वदन्ति, तत्र "अस्त्रान्ताङ्गानि षट्" इति नारायणीयवचनात् । तथा ध्यानम्—

स्वर्णापीतजपानिभं त्रिनयनं मुक्तालसद्धारिणं
खट्वाङ्गारिगुणांस्तथा जपवटीं पद्मं च शक्त्यंकुशौ ।
हस्ताब्जैर्दधतं कपालममलं सद्ब्रह्मभालिङ्गितं ।
मार्तण्डं मणिबद्धरम्यमुकुटं ध्यायेच्च वेदाननम् ॥ २३ ॥

दक्षोर्ध्वादिखट्वाङ्गादीनि चत्वारि । वामोर्ध्वादिपद्मादीनि चत्वारि ध्येयानि । वेदाननं चतुर्मुखं, त्रिनयनं प्रतिवक्त्रमिति शेषः । अष्टबाहुं द्विषट्काक्ष" मिति नारायणीयोक्तेः । स्वर्णपीतं जपापुष्पनिभं च तेन रक्तमित्युक्तं "सिन्दूरारुणमीशानं वामोर्ध्वे दधतं रविम् ।" इति नारायणीयोक्तेः । तथा—

नवशक्तिसमायुक्ते पीठे चोषाढ्यकर्णिके । कुर्वीत पूर्ववच्चाङ्गपूजनं नेत्रमीशगम् ॥ २४ ॥
पूजयेच्च ग्रहानष्टौ लोकेशांश्च तथायुधैः ।.... .... ॥

इति । नारायणीये—

न्यसेदुषां प्रभां सन्ध्यां प्रज्ञां दिक्ष्वब्जकर्णिके । दण्डिदीर्घस्वनामादिवर्णैरावाहयेत्ततः ॥ १ ॥

इति ॥ अथ प्रयोगः——तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे निचृद्गायत्रीछन्दसे नमः । हृदि श्रीमार्तण्डभैरवदेवतायै नमः । गुह्ये हं बीजाय नमः । पादयोः बिन्दवे शक्तये नमः । नाभौ रं कीलकाय नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, मध्यमयोः अं सूर्याय नमः । तर्जन्योः इं भास्कराय नमः । अंगुष्ठयोः उं भानवे नमः । अनामयोः एं रवये नमः । कनिष्ठयोः ओं दिवाकराय नमः ॥ शिरसि अं सूर्याय नमः । मुखे इं भास्कराय० । हृदि उं भानवे० । गुह्ये एं रवये० । पादयोः ओं दिवाकराय० ॥ ह्रां हृदयाय नमः । ह्रीं शिरसे० । ह्रूं शिखायै० । ह्रैं कवचाय० । ह्रौं नेत्रत्रयाय० । ह्रः अस्त्राय० । इति करयोः कनिष्ठान्तं हृदयादिषु नेत्रान्तं च विन्यस्य, मूलमन्त्रेण व्यापकं विन्यस्य, ध्यानादिपुष्पोपचारान्ते प्राग्वदङ्गानि यथास्वस्थानं सम्पूज्यास्त्रमीशानकोणे सम्पूज्य, प्राग्वदष्टौ ग्रहान् सम्पूज्य लोकेशाद्यादि सर्वं प्राग्वत् कुर्यादिति । तथा—

लक्षाणां त्रितयं मन्त्री जपेद्बीजं च बिम्बयोः । मध्यगं जुहुयात्तस्य तस्य दशांशेनोत्पलैः शुभैः ॥ २६ ॥
त्रिमध्वक्तैस्तर्पणादि कुर्यात्सिध्यति मन्त्रराट् । एवं सिद्धे मनौ मन्त्री काम्यकर्माणि साधयेत् ॥ २७ ॥
पूर्ववच्चार्घ्यदानं च कुर्यान्मन्त्री समाहितः । चतुरंगुलसम्भूतैः सुमनोभिः श्रियं लभेत् ॥ २८ ॥
लक्षं हुनेच्च शाल्याज्यतिलबिल्वैर्निधानभाक् । राजानं वशयेच्छीघ्रं जपाकुसुमहोमतः ॥ २९ ॥
जुहुयान्मातुलुङ्गैश्च लभते वाञ्छितार्थकान् । एवं यः साधयेन्मन्त्री तस्य विद्यायशोबलम् ॥ ३० ॥
पुत्रा लक्ष्मीश्च सौभाग्यं सर्वदा विजयो भवेत् । वृत्तं त्र्यस्रं पुनर्वृत्तं षडस्रं वृत्तयुग्मकम् ॥ ३१ ॥
अष्टास्रकं कलास्रं च विधानेन लिखेत्क्रमात् । (वृत्तस्य मध्ये प्रणवं त्रिकोणेऽङ्गारकं न्यसेत् ॥ ३२ ॥
गारुडं च पुनर्वृत्ते लिखेत्पञ्चाक्षरं न्यसेत् । षट्कोणे चक्रराजं च वर्गषट्कं लिखेत्क्रमात् ॥ ३३ ॥)
वृत्तद्वये महासौरं गायत्रीं शिरसा सह । अष्टस्वष्टाक्षरं न्यसेदिन्द्रादीन्देवता अपि ॥ ३४ ॥
कलास्रेषु स्वराः प्रोक्ताः श्रींह्रीं च विलिखेत्क्रमात् । सौरचक्रमिदं पुंसामायुरारोग्यवर्धनम् ॥ ३५ ॥
वन्ध्यानां पुत्रजनकं स्त्रीणां सौभाग्यदायकम् । राज्ञां विजयदं सम्यक् रोगिणां रोगनाशनम् ॥ ३६ ॥
किं बहूक्तेन विधिना धृतं हस्तेऽखिलप्रदम् । उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ॥ ३७ ॥
हृद्रोगं मम शब्दान्ते सूर्यान्ते हरिमा-पदम् । णं च नाशयशब्दान्ते महासौरमनुर्मतः ॥ ३८ ॥

इति । वृत्तमित्यादीनां श्लोकानामयमर्थः——वृत्तं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य, तद्बहिस्त्र्यस्रेऽङ्गारकं "रं इति" विलिख्य, पुनर्वृत्ते "क्षिपओं स्वाहा" इति गारुडपञ्चाक्षरमालिख्य, षट्कोणे पूर्वोक्तसुदर्शनचक्रमन्त्रमालिख्य, तदग्रेषु कवर्गादिवर्गषट्कं विलिख्य, बहिर्वृत्तद्वये महासौरं शिरसा सह गायत्रीं च विलिख्याष्टसु कोणेषु सौराष्टाक्षरमालिख्य, तदग्रेषु शक्रादिबीजान्यालिख्य, षोडशदलेषु स्वरांस्तदग्रेषु श्रींह्रीं इति बीजद्वयं प्रत्यग्रे लिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ महासौरमन्त्रस्तु "उद्यन्नद्य मित्रमह" इति प्रोक्तवैदिकमन्त्रः ॥ अथ चन्द्रस्य मन्त्रः । सारसंग्रहे——

चन्द्रमन्त्रं प्रवक्ष्यामि मन्त्रिणां हितकाम्यया । सम्पत्प्रदं चतुर्वर्गफलदं सर्वसिद्धिदम् ॥ १ ॥
व्योमादिर्मनुपूर्वस्थो बिन्दुयुग् भृगुसद्यतः । रविराननवृत्ताढ्यो मरुद्दीर्घा विषस्तथा ॥ २ ॥
कलान्त्ययुक् षडर्णोऽयं सोममन्त्र उदाहृतः । भृग्वम्बुमन्विन्दुखण्डमपरे बीजमूचिरे ॥ ३ ॥

व्योमादिः सकारः मनुपूर्व ओकारः, बिन्दुरनुस्वारस्तेन सों इति । भृगुः सकारः, सद्य ओकारस्तेन सो इति । रविर्मकारः, आननवृत्तमाकारस्तेन मा इति । मरुत् यकारः । दीर्घा न । विषं म, अन्त्यकला विसर्गस्तेन मः इति । प्रकारान्तरेण बीजमुक्तम्—भृगुः नकारः, अम्बु वकारः मनुरौकारः, इन्दुखण्डोऽनुस्वारस्तैः स्वौं इति बीजं वदन्ति ।

ऋषिर्भृगुः पंक्तिश्छन्दो देवता चन्द्रमाः स्मृतः । सदीर्घनिजबीजेन षडङ्गानि मनोः क्रमात् ॥ ४ ॥
एवं विन्यस्य मन्त्रज्ञो द्विजराजं विचिन्तयेत् । ....॥

श्वेताब्जस्थः स्फटिकरजतप्रोल्लसत्कान्तिरुच्चै-
र्मुक्ताहारप्रलसिततनुर्नीलकेशौघरम्यः ।
हस्ताब्जाभ्यां कुमुदवरदे धारयन् नः शशाङ्को
भूत्यैर्भूयादभिमतरमामश्वकोद्यत्कलङ्कः ॥ ५ ॥

वामदक्षाभ्यां कुमुदवरदे ।

पीठे धर्मादिभिर्युक्ते गदिते परिपूज्य च । चन्द्रमण्डलपर्यन्तं ततः सम्पूजयेद्विभुम् ॥ ६ ॥

पद्मपादाचार्यस्तु—"राका कुमुद्वती नन्दा सुधा संजीवनी क्षमा । आप्यायनी चन्द्रिका चाह्लादिनी नव शक्तयः ॥ १ ॥ पूर्वादिक्रमतो मन्त्री नत्यन्ताः पूजयेदिमाः" । इति पीठशक्तीराहुः । स्वायम्भुवे तु—"अमृता तारका ज्योत्स्ना विमला व्यापिनी तथा । चित्रा च कृत्तिका कान्तिः श्रवणा नव शक्तयः ॥ अमृतान्त कलात्मने संवित्पीठाय वै नमः ।" इति । तथा—

किञ्जल्केषु षडङ्गानि तच्छक्तीः पत्रगा यजेत् । तास्वाद्या रोहिणी प्रोक्ता कृत्तिका रेवती पुनः ॥ ७ ॥
भरणी रात्रिरार्द्रा च ज्योत्स्नाख्या च कला मताः । सुश्वेताः श्वेतवसनाः श्वेतमाल्यानुलेपनाः ॥ ८ ॥
मुक्ताहारालंकृताङ्ग्यः पाण्यञ्जलिपुटाः शुभाः । आपीनोन्नतवक्षोजभाराक्लान्तावलग्नकाः ॥ ९ ॥
मदेन मन्दगाभिन्यः प्राणनाथात्तमानसाः । प्रसन्नचन्द्रवदनाः फुल्लेन्दीवरलोचनाः ॥ १० ॥
ग्रहानष्टौ दलाग्रेषु लोकेशांश्च ततो यजेत् । वज्रादीनि ततो बाह्ये एवं पूजा समीरिता ॥ ११ ॥

ग्रहार्चाक्रमस्तु—"पूर्वदक्षिणपाश्चात्यसौम्यपत्राग्रकेषु च । रविश्चान्द्रिः गुरुः शुक्रः सम्पूज्याः साधकैरमी ॥ आग्नेयादिषु कोणेषु भौममन्दाहिकेतवः ।" चान्द्रिर्बुधः । मन्दः शनिः । अही राहुः, इति स्वायम्भुवोक्ताः । "स्वनामाद्यर्णबीजकाः" इति शारदातिलके तत्तन्नामाद्यर्णबीजका रव्यादयो ज्ञेयाः । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भृगुऋषये नमः । मुखे पंक्तिच्छन्दसे नमः । हृदये श्रीचन्द्रमसे देवतायै नमः । गुह्ये सौं बीजाय नमः । पादयोः नमः शक्तये नमः । इति विन्यस्य प्राग्व-द्विनियोगमुक्त्वा, सांसीं इत्यादिना करषडङ्गं कृत्वा ध्यानाद्यात्मपूजान्ते मण्डूकादिकर्णिकान्तं योगपीठं सम्पूज्यार्कमण्डलं वह्निमण्डलं च सम्पूज्य, पश्चात् सोममण्डलमभ्यर्च्य सत्त्वादिपरतत्त्वार्चान्तेऽष्टदलकेसरेषु—स्वाग्रादि प्रादक्षिण्येन मध्यान्तं राकायै नमः । कुमुद्वत्यै० । नन्दायै० । सुधायै० । सञ्जीवन्यै० । क्षमायै० । आप्यायन्यै० । चन्द्रिकायै० । आह्लादिन्यै नमः । इति सम्पूज्य, "अमृतकलात्मने संवित्पीठाय नमः" इति पीठं सम्पूज्यावाहनादिषडङ्गपूजान्तेऽष्टदलेषु—रोहिण्यै नमः । कृत्तिकायै० । रेवत्यै० । भरण्यै० । रात्र्यै० । आर्द्रायै० । ज्योत्स्नायै० । कलायै नमः । इति सम्पूज्य, दिग्दलाग्रेषु—रं रवये नमः । बुं बुधाय० । गुं गुरवे० । शुं शुक्राय० । कोणदलाग्रेषु—भौं भौमाय नमः । मं मन्दाय० । रां राहवे० । कें केतवे० । इति सम्पूज्य लोकपालार्चादि सर्वं प्राग्वत् कुर्यात् । तथा—

वर्णलक्षं जपेन्मन्त्रं जुहुयात्तत्सहस्रकम् । हविषा घृतसिक्तेन तर्पणादि ततश्चरेत् ॥ १२ ॥
ततः सिद्धो भवेन्मन्त्रः साधकस्य न संशयः । एवमुक्तप्रकारेण संसिद्धे मन्त्रवित्तमः ॥ १३ ॥
चन्द्रं शिरसि संचिन्त्य जपेन्मन्त्रमनन्यधीः । त्रिसहस्रेण लभते राज्यैश्वर्यमकिञ्चनः ॥ १४ ॥
लघुमिष्टहविष्याशी (जलस्थो विजितेन्द्रियः । वेदलक्षममुं मन्त्रं प्रजपेद्यतमानसः ॥ १५ ॥
धरागतं निधानं स ध्रुवं प्राप्नोति तत्क्षणात् । घोरज्वरे महाक्लेशे) शिरोरोगे च दारुणे ॥ १६ ॥
शत्रूत्पादितकृत्यासु कामलाद्यामयेषु च । अयुतं प्रजपेन्मन्त्रं तच्छान्तिरचिराद्भवेत् ॥ १७ ॥

पूर्णिमायां यथाशक्ति जपेन्मन्त्रं जितेन्द्रियः । सौभाग्यारोग्यसंपत्तिभाजनं मनुजो भवेत् ॥ १८ ॥
ऐन्द्रवारुणविस्तीर्णमण्डलानां त्रयं बुधः । लिप्ते भूमण्डले कृत्वा निषीदेत्पश्चिमे स्वयम् ॥ १९ ॥
मध्यस्थे मण्डले न्यस्य पूजोपकरणानि च । अग्रस्थमण्डले पद्मसंयुते पूर्ववद्यजेत् ॥ २० ॥
विधुं ततो रौप्यजातं पात्रं संस्थाप्य पूरयेत् । शुद्धगोपयसा मन्त्री स्पृशन्पात्रं मनुं जपेत् ॥ २१ ॥
अष्टाधिकं शतं पश्चाद् राकायामुदये विधोः । चन्द्राय विद्यामनुना दद्यादर्घ्यं यथाविधि ॥ २२ ॥

राकायां पौर्णमास्यां ।

एवमर्घ्यविधानं यः करोति प्रतिमासिकम् । षण्मासादीप्सितानर्थाल्लभते नात्र संशयः ॥ २३ ॥
लक्ष्मीं च महतीं पुत्रान् सौभाग्यारोग्यसंपदः । कान्तिं निजेप्सितां कन्यां सत्कीर्तिं लभते ततः ॥ २४ ॥

इति ॥ तथा——

विद्ये विद्यामालिनियुक्चन्द्रिण्यन्ते च चन्द्रयुक् । मुखि शिरोऽन्त्यस्तारा‌द्यो विद्यामनुरयं ततः ॥ २५ ॥

विद्ये विद्यामालिनि स्वरूपं । चन्द्रिणि स्वरूपं । चन्द्रमुखि स्वरूपं । शिरोऽन्त्यः स्वाहान्त्यः । तथा यन्त्रसारे—

षट्कोणे कर्णिकायां र(ट)परपरिलसत्तारमस्रेषु मन्त्रं
षड्वर्णं चाष्टपत्रे स्वरयुगललसत्केसरे युग्मशोऽर्णान् ।
विद्यामन्त्रस्य काद्यैर्वृतमवनिपुराश्रिस्थवंबीजमुक्तं
यन्त्रं सोमस्य कान्तिद्रविणसुतयशः श्रीप्रदं क्ष्वेडहारि ॥ १ ॥

इति । अस्यार्थः—अष्टदलकमलकर्णिकायां षट्कोणमध्ये प्रणवोदरे ससाध्यं रंबीजं विलिख्य, षट्कोणेषु सोमषडक्षरस्यैकैकमक्षरं विलिख्याष्टदलकेसरेषु स्वरान् द्विश आलिख्य, अष्टदलेषु विद्यामन्त्रस्य प्रणवरहितान् षोडशवर्णान् द्वन्द्वशो विलिख्य, बहिर्वृत्तयोरन्तराले कादिक्षान्तवर्णैरावेष्टय बहिश्चतुरस्रकोणेषु वंबीजं विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ अथ भौमस्य मन्त्रः—

अथ भौममनुं वक्ष्ये सर्वरोगनिवारणम् । सबिन्द्वाद्यद्वयं प्रोक्तं गारकाय हृदन्तिकः ॥ २६ ॥
अष्टवर्णो मनुः प्रोक्तोऽङ्गारकस्य मनीषिभिः । ....॥

सबिन्द्वाद्यद्वयं अंअं । गारकाय स्वरूपं । हृन्नमः । तथा—

ऋष्याद्या ब्रह्मगायत्रीभूमिपुत्राः समीरिताः । अङ्गषट्कं चास्य मनोर्निजबीजेन संमतम् ॥ २७ ॥
नमाम्यङ्गारकं रक्तं रक्ताम्बरविभूषितम् । जानुस्थवामहस्ताढ्य साभयेतरपाणिकम् ॥ २८ ॥

आंईं इत्यादि षडङ्गकम् । अथ बुधस्य मन्त्रः—

बुं ङेन्तं बुधशब्दं च हृदयान्तः षडर्णकः । बुधमन्त्रस्य मुन्याद्या ब्रह्मपंक्तिबुधा मताः ॥ २९ ॥
षडङ्गानि स्वबीजेन विन्यस्यैवं विचिन्तयेत् । वन्दे बुधं सदा देवं पीताम्बरसुभूषणम् ॥ ३० ॥
जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम् । प्रजपेद्वर्णसाहस्रं दशांशं जुहुयाद् घृतैः ॥ ३१ ॥
अर्चनं पूर्वमुदितं ज्ञातव्यं मनुवित्तमैः । बृं बृहस्पतये हृच्च वसुवर्णो गुरोर्मनुः ॥ ३२ ॥
ऋष्याद्या ब्रह्मसानुष्टुब्गुरवोऽस्य प्रकीर्तिताः । अङ्गषट्कं दीर्घषट्कस्वीयबीजेन कल्पयेत् ॥ ३३ ॥
रत्नस्वर्णांशुकादीनि दक्षपाण्यम्बुजातकिरन् । सव्यादन्यान् वस्तुराशीन् निध्येयोऽमरसद्गुरुः ॥ ३४ ॥
जपेदष्टसहस्रं तु तच्छतं हविषा हुनेत् । घृताक्तेन षडङ्गैश्च ग्रहाशापायुधैर्यजेत् ॥ ३५ ॥
ध्यात्वा पूर्वोक्तमार्गेण समासीनो नवाम्बरे । जपेत्सप्तदिनं वह्नौ पीतपुष्पैर्घृतप्लुतैः ॥ ३६ ॥
एवं दिनाना त्रितयं चाहुनेन्मन्त्रवित्तमः । स्वर्णवस्त्रादिसंसिद्धिर्भवत्यस्य न संशयः ॥ ३७ ॥
वस्त्रं मे देहि शुक्राय शुमाद्यो हृदयान्तिकः । मुन्याद्या ब्रह्मसविराट्शुक्रा मन्त्रिभिरीरिताः ॥ ३८ ॥

शुमाद्यः शुं वस्त्रं मे इत्यादि ।

पदैः षड्भिः षडङ्गानि ततो देवं विचिन्तयेत् । शुक्रं नमाम्यापणस्थं शुक्लाभं वरभूषणम् ॥ ३९ ॥
स्वर्णभाण्डे रत्नधाराचिन्मुद्रान्नकरद्वयम् । अयुतं प्रजपेन्मन्त्रं सहस्रं जुहुयाद् घृतैः ॥ ४० ॥
अङ्गग्रहाशापहेतिचतुरावरणं यजेत् । शनैश्चराय हृदयं शमाद्यश्चाष्टवर्णकः ॥ ४१ ॥
मुन्याद्या ब्रह्मगायत्रीशनैश्चरसमाह्वयाः । बीजेनैव षडङ्गानि विदधीत विचक्षणः ॥ ४२ ॥

विचक्षण इत्युक्तेः षड्दीर्घयुक्तत्वं बीजस्य सूचयति ।

वन्दे शनैश्चरं वक्रदंष्ट्रं नीलविभूषणम् । वामजानुस्थतद्धस्तं साभयान्यकराम्बुजम् ॥ ४३ ॥
जपेदक्षरसाहस्रं तद्दशांशं हुनेद् घृतैः । षडङ्गग्रहदिक्पालैः सायुधैः परिपूजयेत् ॥ ४४ ॥
रां राहवे नमोन्तोऽयं राहुमन्त्रः समीरितः । षडर्णः स्वीयबीजेन षडङ्गानि प्रकल्पयेत् ॥ ४५ ॥
मुन्याद्या ब्रह्मगायत्रीराहवः समुदाहृताः । वन्दे राहुं धूम्रवर्णं सर्पकायं कृताञ्जलिम् ॥ ४६ ॥
विकृतास्यं रक्तनेत्रं धूम्रालङ्कारमन्वहम् । जपहोमार्चनाद्यं च पूर्ववत्परिकल्पयेत् ॥ ४७ ॥

पूर्ववत् वर्णसाहस्रघृतहोमतद्दशांशाङ्गग्रहाशाधिपतदायुधैरिति । अथ केतोः——

कें केतवे हृदित्येवं केतुमन्त्रः षडर्णकः । ब्रह्मा मुनिर्मतश्छन्दः पंक्तिः केतुश्च देवता ॥ ४८ ॥
पूर्ववत्स्यादङ्गषट्कं ततः केतुं विचिन्तयेत् । वन्दे केतुं कृष्णवर्णं कृष्णवस्त्रादिभूषितम् ॥ ४९ ॥
वामोरुन्यस्ततद्धस्तं साभयान्यकराम्बुजम् । जपहोममार्जनादि पूर्ववत् परिकल्पयेत् ॥ ५० ॥

इति । अत्र भौमादीनां (पूजाया मध्ये तं तं ग्रहं सम्पूज्य तत्तदुत्तरग्रहादितत्तत्पूर्वग्रहावसानिकान् अष्टौ ग्रहानग्रादिप्रादक्षिण्येन पूजयेत् । अत्रैते ग्रहमन्त्राः) पुरस्तान्नानामन्त्रप्रकरणे वक्तव्या अपि सूर्यमन्त्रस्य प्रयोगोपयोगितया प्रोक्ताः सौकर्यार्थं, नतु पञ्चायतनान्तर्गतत्वेनेति ॥ अथाग्नेः प्रपञ्चसारे——(१६ । २५)

अथाग्निमन्त्रानखिलार्थसिद्धिप्रदान् प्रवक्ष्ये जगतो हिताय ।
सप्ताद्दिकल्पानपि साङ्गभेदान् सार्चाविशेषान् सजपादिकांश्च ॥ १ ॥
वियतो दशमोऽर्घिसर्गयुक्तो भुवसर्गो भृगुलान्तषोडशाचः ।
हुतभुग्दयिता ध्रुवादिकोऽयं मनुरुक्तः सुसमृद्धिदः कृशानोः ॥ २ ॥

इति वियतो हकाराद्दशमो विलोमेन भकारः । अर्घी ऊकारः । सर्गो विसर्गस्ताभ्यां युक्तो भूरिति । भुवसर्गो भुव इत्यक्षरद्वयं सर्गो विसर्गस्तेन भुवरिति । भृगुः सकारः, लान्तो वकारः, अचः षोडशो विसर्गस्तेन स्वः । हुतभुग्दयिता स्वाहा । ध्रुवादिकः प्रणवादिस्तेन सप्ताक्षरोऽयं मनुः । तथा——

भृगुरपि तदृषिश्छन्दो गायत्री देवताग्निरुद्दिष्टः । प्राक्प्रोक्तान्यङ्गानि द्विशः समुक्तैश्च मन्त्रवाक्यैर्वा ॥ ३ ॥

पूर्वोक्तानि, सहस्रार्चिषे हृदयाय नमः इत्यादि प्रागुक्तानि । ध्यानम्——

शक्तिस्वस्तिकपाशान्सांकुशवरदाभयान्दधत्त्रिमुखः ।
मुकुटादिविविधभूषोऽवताच्चिरं पावकः प्रसन्नो वः ॥ ४ ॥
जपेदिमं मनुमृतुलक्षमादराद्दशांशतः प्रतिजुहुयात्पयोन्धसा ।
ससर्पिषाप्यसिततरैश्च षाष्ठिकैः समर्चयेदथ विधिवद्विभावसुम् ॥ ५ ॥

पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी । रुचिरा ज्वालिनी चेति कृशानोर्नव शक्तयः ॥ ६ ॥
पीठे तनूनपातः प्रागङ्गैरष्टमूर्तिभिस्तदनु । भूयश्च शतमखाद्यैर्विधिनाथ हिरण्यरेतसं प्रयजेत् ॥ ७ ॥

इति । अथ प्रयोगः——तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भृगवे ऋषये नमः । मुखे गायत्रीछन्दसे नमः । हृदये अग्नये देवतायै नमः । इत्यादि दीक्षाप्रकरणोक्तन्यासध्यान-पूजादिकं कृत्वा पूजाशेषं समापयेदिति । साज्येन सर्पिषा चेति तर्पणादिकमपि प्राग्वत्कुर्यात् । तथा——

आज्यैरष्टोर्ध्वशतं प्रतिपदमारभ्य मन्त्रविद्दिनशः । चतुरो मासाञ्जुहुयात् (लक्ष्मीरत्यायता भवेत्तस्य ॥८॥
शुद्धाभिःशालीभिर्दिनमनु जुहुया) दथाब्दमात्रेण । शालीशालि गृहं स्याद् गोमहिष्याद्यैश्च संकुलं तस्य ॥९॥
शुद्धान्नैर्घृतसिक्तैः प्रतिदिनमग्नौ समेधिते जुहुयात् । अन्नसमृद्धिर्महती स्यादस्य निकेतनेऽब्दमात्रेण ॥१०॥
जुहुयात्तिलैः सशुद्धैः षण्मासाञ्जायते महालक्ष्मीः । कुमुदैः सकह्लारैरपि जातीकुसुमैश्च जायते सिद्धिः ।११।

पालाशैः पुनरिध्मकैः सरसिजैर्बिल्वैश्च रक्तोत्पलै-
र्गन्धैर्वीरुहसंभवैः खदिरजैर्व्याघातवृक्षोद्भवैः ।
दूर्वाख्यैश्च शमीविकङ्कतभवैरष्टोर्ध्वयुक्तं शतं
नित्यं वा जुहुयात्प्रतिप्रतिपदं मन्त्री महासिद्धये ॥ १२ ॥

तारं व्याहृतयश्चाग्ने जातवेद इहावह । सर्वकर्माणि चेत्युक्त्वा साधयाग्निवधूर्मनुः ॥ १३ ॥

तारं प्रणवः । व्याहृतयो भूर्भुवःस्वः । अग्ने स्वरूपं । जातवेद इहावह स्वरूपं । सर्वकर्माणि स्वरूपं । साधय स्वरूपं । अग्निवधूः स्वाहा । अत्र व्याहृत्यग्निपदयोः सन्धिः, तेन स्वरग्ने इति मन्त्रे पठितव्यम् । तथा—

ऋष्याद्याः पूर्वोक्ता मन्त्रेणाङ्गक्रियार्णभिन्नेन । भूततुंकरणसेन्द्रियगुणयुग्मैर्जातिभेदितैस्तदपि ॥ १४ ॥

भूत ५ ऋतु ६ करण ४ इन्द्रिय ५ गुण ३ युग्म २ । ध्यानम्—

अथवा शक्तिस्वस्तिकदर्भाक्षस्रक्स्रुवस्रुगभयवरान् ।
दधदमिताकल्पो वो वसुरवतात् कनकमालिकालसितः ॥ १५ ॥

अथवेत्यनेन पूर्वमन्त्रध्यानोक्तरूपं वक्ष्यमाणध्यानोक्तरूपं वा ध्यायेदित्युक्तम् । प्रयोगः सुगमः । तथा—

वत्सरादेश्चतुर्दश्यां दिनादावेव दीक्षितः । मन्त्रं द्वादशसाहस्रं जपेत्सम्यगुपोषितः ॥ १६ ॥
अर्चयेदङ्गमूर्तीश्च लोकेशकुलिशादिभिः । समिदाज्यममावस्यां परिशोध्य यथाविधि ॥ १७ ॥
ब्राह्मणान् भोजयित्वाथ स्वयं भुक्त्वा समाहितः । परेऽह्नि प्रतिपद्येतै र्जुहुयादर्चितेऽनले ॥ १८ ॥
मन्त्री वटसमिद्व्रीहितिलराजीहविर्घृतैः । अष्टोत्तरशतावृत्त्या हुनेदेकैकशः क्रमात् ॥ १९ ॥
दशाहमेवं हुत्वा तु पुनरेकादशीतिथौ । शक्त्या प्रतर्प्य विप्रांश्च प्रदद्याद् गुरुदक्षिणाम् ॥ २० ॥
सुवर्णवासोधान्यानि शोणां गां च सतर्णकाम् । पुनरष्टोत्तरं मन्त्री सहस्रं दिनशो जपेत् ॥ २१ ॥

विधिनेति विधातुरग्निपूजामचिरेणैव भवेन्महासमृद्धिः ।
धनधान्यसुवर्णरत्नपूर्णा धरणी गोवृषपुत्रमित्रकीर्णा ॥ २२ ॥

वत्सरादीति चैत्रशुक्लप्रतिपत्, तत्पूर्वचतुर्दश्यां दीक्षा जपश्च । अमायां समिदाज्यशोधनम् । प्रतिपदमारभ्य दशदिनावधि प्रोक्तप्रकारेण होमः । सुगममन्यत् । अथ वेत्यनेन श्लोकेन पूर्वोक्तपुरश्चरणमन्तरेणापि मन्त्रसिद्ध्युपायमाह । पालाशैरित्यादिभिः श्लोकैः काम्यप्रयोगानाह ।

प्रजपेदथवा सहस्रसंख्यं दिनशो वत्सरतो भवेन्महाश्रीः ।
जुहुयात्प्रतिवासरं शताख्यं हविषाब्देन भवेन्महासमृद्धिः ॥ २३ ॥
पालाशैः कुसुमैर्हुनेद्दधिघृतक्षौद्रप्लुतैर्मण्डलं
नित्यं साष्टशतैस्तथैव करवीरोत्थैः समृद्ध्यै हुनेत् ।
षण्मासं कपिलाघृतेन दिनशोऽप्यष्टौ सहस्रं तथा ।
होतव्यं लभते स राज्यसदृशीं लक्ष्मीं यशो वा महत् ॥ २४ ॥

वा समुच्चयार्थः । मन्त्रान्तरम्—

उत्पूर्वात्तिष्ठशब्दात् पुरुषहरिपदे पिङ्गलान्ते निगद्य

प्रोक्त्वाथो लोहिताक्षं पुनरपि च वदेद्देहि मे दात्क्रमेण ।
भूयो ब्रूयात्तथा दापय शशियुगलं स्याच्चतुर्विंशदर्णः
प्रोक्तो मन्त्रोऽखिलेष्टप्रतरणसुरसद्मांघ्रिपानां सदृक् स्यात् ॥ २५ ॥

उत्पूर्वात्तिष्ठशब्दात् उत्तिष्ठेति स्वरूपं । पुरुष हरिपिङ्गल लोहिताक्ष देहि मे ददापय इत्येतानि पदानि स्वरूपाणि । शशियुगलं स्वाहाकारः ।

ऋष्याद्याः स्युः पूर्ववदृतुभूतदिशात्रिकरणयुगलार्णैः ।
मूलमनुनाथ कुर्यादङ्गानि क्रमश एव मन्त्रितमः ॥ २६ ॥

ऋतु ६ भूत ५ दिशा ४ त्रि ३ करण ४ युगल २ । अत्र दिशाशब्देन महादिशानामेव ग्रहणम् । आवन्तोऽपि दिशाशब्दोऽस्ति भागुरिमते । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा" । इति । ध्यानम्

हेमाश्वत्थसुरद्रुमोदरभुवो निर्यान्तमश्वाकृतिं
वर्षन्तं धनधान्यरत्ननिचयान् रन्ध्रैः स्वकैः सन्ततम् ।
ज्वालापल्लवितस्वरोमविवरं भक्तार्तिसम्भेदनं
वन्दे धर्मसुखार्थमोक्षफलदं दिव्याकृतिं पावकम् ॥ २७ ॥

जप्याच्च लक्षमानं मन्त्री संदीक्षितोऽथ मनुमेनम् । जुहुयाच्च तदवसाने घृतसिक्तैः पायसैर्दशांशेन ॥२८॥
अङ्गैर्हुतवहमूर्तिभिराशेशैः संयजेत्तदस्त्रैश्च । पात्रकमिति मन्त्रितमो गन्धाद्यैरनुदिनं तदुपहारैः ॥ २९ ॥

इति । प्रयोगः सुगमः ।

दिनावतारे मनुमेनमन्वहं जपेत्सहस्रं नियमेन मन्त्रवित् ।
अधृष्यतायै यशसे श्रिये रुजां विमुक्तये युक्तमतिस्तथायुषे ॥ ३० ॥

दिनावतारे सूर्योदयकाले ।

शालीतण्डुलकैः सितैश्च पयसा कृत्वा हविः पावकं
गन्धाद्यैः परिपूज्य तेन हविषा संवर्त्य पिण्डं महत् ।
आज्यालोडितमेकमेव जुहुयाज्जप्त्वा मनुं मन्त्रवित्
साष्टोर्ध्वं प्रतिपद्यथो शतमतः स्यादिन्दिरा वत्सरात् ॥ ३१ ॥

अष्टोत्तरं शतमथो मृगमुद्रयैव मन्त्री प्रतिप्रतिपदं जुहुयात्पयोन्नैः ।
साज्यैर्भवेन्न खलु तत्र विचारणीयं संवत्सरात् स च निकेतनमिन्दिरायाः ॥ ३२ ॥

अष्टोर्ध्वं शतं हविषा मन्त्रेणानेन नित्यशो जुहुयात् । षण्मासादाढ्यतमो भवति नरो नात्र सन्देहः ॥३३॥
शालीभिः शुद्धाभिः प्रतिदिनमष्टोत्तरशतं जुहुयात् । धनधान्यसमृद्धः स्यान्मन्त्री संवत्सरार्धमात्रेण ॥३४॥
आज्यैरयुतं जुहुयात्प्रतिमासं प्रतिपदं समारभ्य । अतिमहती लक्ष्मीः स्यात्तस्य तु षण्मासतो न सन्देहः

अरुणैः पुनरुत्पलैः शतं यो मधुरावतैः प्रजुहोति वत्सरार्धम् ।
मनुनाप्यमुना शताधिकं स प्रलभेन्मंक्षु महत्तरां च लक्ष्मीम् ॥ ३६ ॥
जातीपलाशकरवीरजपाख्यबिल्वव्याघातकेसरकुरण्टभवैः प्रसूनैः ।
एकैकशः शतमथो कपिलापयोक्तैः (जुह्वत्प्रतिप्रतिपदं श्रियमेति वर्षात् ॥ ३७ ॥
खण्डैश्च सप्तदिनमप्यमृतालतोत्थैर्मन्त्री हुनेद् गुणसहस्रमथो पयोक्तैः ।)
सम्यक् समर्च्य दहनं त्वचिरेण जन्तुश्चातुर्थिकादिविषमज्वरतो वियुञ्ज्यात् ॥ ३८ ॥

गणसहस्रं सहस्रत्रयम् ।

क्षीरद्रुमत्वगभिपक्वजलैर्यथावत्सम्पूर्य कुम्भमभिपूज्य कृशानुमत्र ।
जप्त्वा मनुं पुनरमुं त्रिसहस्रमात्रं सेकक्रिया ज्वरहरी ग्रहवैकृतघ्नी ॥ ३९ ॥
पयसि हृदयदघ्ने भानुमालोक्य तिष्ठन् प्रजपतु च सहस्रं नित्यशो मन्त्रमेनम् ।
स दुरितमपमृत्युं रोगजातांश्च हत्वा व्रजति नियतसौख्यं वत्सराद् दीर्घमायुः ॥ ४० ॥
मनुनामुनाष्टशतजप्तमथ प्रपिबेज्जलं ज्वलनदीपनकृत् ।
गुरु भुक्तमप्युदरगं त्वमुना परिजापितं पचति कुक्ष्यनलः ॥ ४१ ॥
हुनेदरुणपङ्कजैस्त्रिमधुराप्लुतैर्नित्यशः सहस्रमृतुमासतः पृथुतरा रमा जायते ।
प्रतिप्रतिपदं हुनेदिति बुधोऽथवा वत्सरं विनष्टवसुरप्यसौ भवति चेन्दिरामन्दिरम् ॥ ४२ ॥

ऋतुमासतः षण्मासतः ॥

इति श्रीमहामहोपाध्यायवर्य्यभगवत्पूज्यपाद-श्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्य-शिष्य-श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे एकोनत्रिंशः श्वासः ॥ २९ ॥

अथ

त्रिंशः श्वासः

अथ शैवमन्त्रा उद्ध्रियन्ते । तत्र श्रीनन्दिकेश्वरमते—

कैलासशिखरासीनमर्धनारीश्वरं प्रभुम् । ब्रह्मोपेन्द्रमहेन्द्राद्यैर्देवैर्विद्याधरैस्तथा ॥ १ ॥
दानवैर्मुनिभिः सिद्धैर्यक्षरक्षोऽप्सरोगणैः । हेरम्बस्कन्दपूर्वादिगणैर्भक्त्या सुसेवितम् ॥ २ ॥
अक्षक्रीडारसास्वादलालसं परमेश्वरम् । (?) क्रीडतो भुवनेशस्य जगदम्बिकया सह ॥ ३ ॥
अक्षपाताधिकारे तु देव्या नन्दी नियोजितः । क्रीडता क्रमयोगेन जितं देवेन शम्भुना ॥ ४ ॥
अक्षप्रपाताद् देवेन प्रोक्तं नन्दिञ्जितं मया । तव सत्याभियोगेन तुष्टोऽहं तव भक्तितः ॥ ५ ॥
वद किं क्रियतां वत्स यत्ते मनसि वर्तते । ददामि तत्र सन्देहः प्रीतेन मनसाधुना ॥ ६ ॥

श्रीनन्दिकेश्वर उवाच

तुष्टोऽसि यदि मे देव जगतामीश्वर प्रभो । वद मन्त्राञ्जगन्नाथ शैवांस्त्रैलोक्यदुर्लभान् ॥ ७ ॥
(वक्त्राङ्गन्यासहितान् पूजाकर्मसमन्वितान् । दीक्षाभिषेकसहितानधिकारपदान्वितान् ॥ ८ ॥

श्रीमहादेव उवाच

कथयामि महाभाग त्रैलोक्येऽप्यतिदुर्लभान् ।) शैवान् सर्वमनुश्रेष्ठान् सर्वतन्त्रेषु गोपितान् ॥ ९ ॥
भक्तोऽसीति न मे किञ्चिदवाच्यं त्वयि सुव्रत । मूलमन्त्राङ्गविन्यासपूजाकर्मसमन्वितान् ॥ १० ॥
दीक्षाभिषेकसहितानधिकारपदान्वितात् । उद्धारक्रमयोगेन सर्वकामफलप्रदान् ॥ ११ ॥
सुसमे भूप्रदेशे तु गोमयेनोपलेपिते । पुष्पप्रकरशोभाढ्ये गन्धधूपतरङ्गिते ॥ १२ ॥
विलिखेन्मातृकां तत्र वर्गाष्टकविभेदतः । स्वरैः षोडशभिर्वर्गः प्रथमः परिकीर्तितः ॥ १३ ॥
पञ्च पञ्चाक्षराश्चान्ये द्वावन्त्यौ चतुरक्षरौ । वर्गाष्टकं भवेदेवं ततो मन्त्रान् समुद्धरेत् ॥ १४ ॥
पञ्चमस्य तु वर्गस्य पञ्चमं प्रथमं वदेत् । षष्ठवर्गान्तिमो वर्णः प्रथमान्त्यसमन्वितः ॥ १५ ॥
द्वितीयं वर्णमाख्यातमष्टमस्याद्यमक्षरम् । प्रथमस्य तृतीयार्णसमेतं तत् तृतीयकम् ॥ १६ ॥
चतुर्थं सप्तमस्यादिद्वितीयार्णसमन्वितम् । चतुर्थवर्णो मन्त्रस्य सप्तमाद्यं तु पञ्चमम् ॥ १७ ॥
एष पञ्चाक्षरो मन्त्रः प्रणवाद्यः षडक्षरः । यत्साधनात्तु मनुजाः शिवसायुज्यमाप्नुयुः ॥ १८ ॥
प्रणवस्तु परब्रह्मबोधकः समुदीरितः । पञ्चाक्षरमयानि स्युः पञ्चभूतानि सुव्रत ॥ १९ ॥
भूमात्मकं जगदिदं तेनास्य जगदात्मता । ऋषिरुक्तो वामदेवः पंक्तिश्छन्द उदाहृतम् ॥ २० ॥
सदाशिवो देवतास्य मन्त्रस्य परिकीर्तितः । षडङ्गानि मनोर्वर्णैर्जातियुक्तानि कल्पयेत् ॥ २१ ॥
ततस्तत्पुरुषाघोरसद्योवामेशसंज्ञकान् । मूलवर्णादिकान् न्यसेत् त्रिषु स्थानेष्वतन्द्रितः ॥ २२ ॥
सतर्जनीमध्यमान्त्यानामांगुष्ठेष्वथापरः । आस्यहृत्पादगुह्येषु मूर्ध्नि वक्त्रेषु चापरः ॥ २३ ॥
प्राग्याम्यवारुणोदीच्यमध्यवक्त्रेषु पञ्चसु । ततः षडङ्गं विन्यसेद्वक्ष्यमाणं यथाविधि ॥ २४ ॥
सर्वज्ञो नित्यतृप्तश्च बोधान्तोऽनादिः कीर्तितः । स्वतन्त्रशक्तिश्चालुप्तशक्तिश्चानन्तशक्तियुक् ॥ २५ ॥

मूलमन्त्रार्णपूर्वैश्च धामेशब्दान्तिकैः क्रमात् । षडङ्गानि मनोरस्य जातियुक्तानि मन्त्रवित् ॥ २६ ॥
कुर्वीत गोलकन्यासं रक्षायै नन्दिकेश्वर । हृदि वक्त्रांसयोरूर्वोः, कण्ठे नाभौ द्विपार्श्वयोः ॥ २७ ॥
पृष्ठे हृदि, ततो मूर्ध्नि वदने नेत्रयोर्नसोः, । दोष्पत्सन्धिषु साग्रेषु, विन्यसेत्तदनन्तरम् ॥ २८ ॥
शिरोवदनहृत्कुक्षिसोरुपादद्वये, पुनः । हृदि वक्त्राम्बुजे कण्ठे मृगाभयवरेष्वथ, ॥ २९ ॥
वक्त्रांसहृत्सु पादोरुजठरेषु, क्रमान्न्यसेत् । मूलमन्त्रस्य षड्वर्णान् यथावद्देशिकोत्तमः ॥ ३० ॥
मूर्ध्नि भालोदरांसेषु हृदये तान् पुनर्न्यसेत् । नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने ॥ ३१ ॥
चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे । पश्चादनेन मन्त्रेण कुर्याच्च व्यापकं सुधीः ॥ ३२ ॥
एवं न्यस्ततनुर्नन्दिन् ध्यायेद् देवमनन्यधीः । गोक्षीरफेनधवलं रजताद्रिसमप्रभम् ॥ ३३ ॥
चारुचन्द्रकलाराजज्जटामुकुटमण्डितम् । पञ्चवक्त्रधरं शम्भुं प्रतिवक्त्रं त्रिलोचनम् ॥ ३४ ॥
शार्दूलचर्मवसनं रत्नाभरणभूषितम् । दक्षोर्ध्वहस्ते परशुं वरं च तदधःकरे ॥ ३५ ॥
वामोर्ध्वहस्ते हरिणं दधानमभयं परे । सुप्रसन्नमुखाम्भोजं निविष्टं पद्मविष्टरे ॥ ३६ ॥
ब्रह्मविष्णुमहेन्द्राद्यैः स्तुतं भक्त्या सुरासुरैः । विश्वाद्यं विश्ववपुषं भवभीतिहरं शिवम् ॥ ३७ ॥
इति ध्यात्वा गणश्रेष्ठ मानसैरर्चयेच्छिवम् । उपचारैः षोडशभिर्बाह्यपीठे समर्चयेत् ॥ ३८ ॥
पद्मं वसुदलं कृत्वा कर्णिकाकेसरोज्ज्वलम् । बहिरष्टदलद्वन्द्वं चतुरस्रत्रयावृतम् ॥ ३९ ॥
चतुर्द्वारसमायुक्तं मण्डलेऽस्मिन् प्रपूजयेत् । .... ॥

अत्र मानसपूजादिपीठपूजान्तस्य प्रागेव प्रयागप्रकरणे लिखितत्वाद्ग्रन्थगौरवभयाच्च नात्र लिख्यते ।

तथा--

एवं पीठं समभ्यर्च्य मूर्ति मूलेन तत्र वै । संस्थाप्य देवमावाह्य तस्यां सम्पूजयेच्छिवम् ॥ ४० ॥
सर्वोपचारैराराध्य मध्ये वत्स ततोऽर्चयेत् । प्रथमेऽष्टदले मूर्तीर्यजेत् तत्पुरुषादिकाः ॥ ४१ ॥
दिक्पत्रेषु गणश्रेष्ठ ईशं मध्ये समर्चयेत् । पीतासितश्वेताभाश्चतुराननाः ॥ ४२ ॥
वराभयमृगान् वत्स परशुं बिभ्रतीः करैः । कोणपत्रेषु मध्ये च निवृत्याद्याः कला यजेत् ॥ ४३ ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्ततः परम् । शान्त्यतीताश्च ताः प्रोक्तास्तेजोरूपाः कलाः क्रमात्॥४४॥
अग्नीशासुरवायव्यमध्ये दिक्षु च पूजयेत् । केसरेषु षडङ्गानि द्वितीयेऽष्टदले ततः ॥ ४५ ॥
अनन्ताद्यान् यजेद्वत्स देवाग्रादिप्रदक्षिणम् । अनन्तं सूक्ष्मनामानं शिवोत्तममनन्तरम् ॥ ४६ ॥
एकनेत्रमेकरुद्रं त्रिमूर्ति तदनन्तरम् । श्रीकण्ठं च गणश्रेष्ठ शिखण्डिनमपि क्रमात् ॥ ४७ ॥
रक्तपीतसितारक्तकृष्णरक्ताञ्जनासितान् । किरीटार्पितबालेन्दून् पद्मस्थांश्चारुभूषणान् ॥ ४८ ॥
त्रिनेत्राञ्छूलवज्रेषुचापहस्तान् मनोहरान् । ततोऽर्चयेद्गणश्रेष्ठ तृतीयेऽष्टदले पुनः ॥ ४९ ॥
उमाचण्डीश्वरौ नन्दी महाकालो गणेश्वरः । वृषभो भृङ्गिरिटिश्च स्कन्दश्चैतान् यथाक्रमम् ॥ ५० ॥
उत्तरं दलमारभ्य नीलपीतासितारुणान् । मुक्तानिशाकरश्वेतपाटलान् क्रमतः सुधीः ॥ ५१ ॥
चतुरस्रे गणश्रेष्ठ पूर्वादिक्रमतो यजेत् । इन्द्रं सुराधिपं पीतं वज्रहस्तं सवाहनम् ॥ ५२ ॥
अग्नि तेजोधिपं रक्तं शक्तिहस्तं सुभूषितम् । यमं प्रेताधिपं कृष्णं दण्डहस्तं समर्चयेत् ॥ ५३ ॥
रक्षोधिपं च निर्ऋतिं खड्गहस्तं सुधूम्रकम् । पाशहस्तं सुशुभ्राङ्गं वरुणं यादसां पतिम् ॥ ५४ ॥
वायुं प्राणाधिपं धूम्रमंकुशाढ्यकरं यजेत् । यक्षाधिपं कुबेरं च मुक्तावर्णं गदाधरम् ॥ ५५ ॥
विद्यापतिं तथेशानं स्वच्छं शूलकरं यजेत् । (ब्रह्माणं पद्महस्तं च लोकपं रक्तवर्णकम् ॥ ५६ ॥
अनन्तं नागपं गौरवर्णं चक्रधरं तथा ।) ऐरावतं तथा मेषं महिषं मृतपूरुषम् ॥ ५७ ॥
मकरं मृगमत्यौ च वृषं च विपहंसकौ । इन्द्रादिलोकपालानां वाहनानि गणाधिप ॥ ५८ ॥

ततो बहिस्तदस्त्राणि तत्तत्पार्श्वे समर्चयेत् । वज्रं पीतं सितां शक्तिं दण्डं कृष्णं समर्चयेत् ॥ ५९ ॥
खड्गमाकाशसङ्काशं पाशं विद्युन्निभं यजेत् । अंकुशं रक्तवर्णं तु शुक्लवर्णां गदां यजेत् ॥ ६० ॥
त्रिशूलं नीलवर्णं च यजेद्वत्स समाहितः । रथाङ्गं कुरुविन्दाभं पद्मं रक्तं समर्चयेत् ॥ ६१ ॥
लोकपालायुधान्येवं कथितानि तवानघ । एवं पूजयेद्देवं स सद्यः शिवतां व्रजेत् ६२ ॥

इति । तथा—

तन्महेशपदं ङेन्तं विद्महे वागितीरयेत् । विशुद्धाय च धीशब्दं महि तन्नः शिवः—पदम् ॥ ६३ ॥
प्रचोदयादिति प्रोच्य गायत्री श्रीशिवस्य च । ....॥

इति । अथ शैवमन्त्राः,—तत्र कैलासेत्यादि फलप्रदानित्यन्तमेकादश श्लोकास्तन्त्रावतारक्रमकथनपरा उक्तोच्यमानविषयत्वात् स्पष्टार्थाः । "सुसमे" इत्यादिभिरुद्धरेदित्यन्तैस्त्रिभिः श्लोकैर्मन्त्रोद्धारकथनार्थं मातृकाप्रस्तारस्थानस्वरूपं तस्य वर्गाष्टकविभेदं चोपदिशति । तत्र पञ्चमस्य तवर्गस्य पञ्चममक्षरं तेन नकारः, स प्रथममक्षरं मन्त्रस्येति शेषः । (षष्ठस्य वर्गस्यान्तिमो वर्णः मकारः स प्रथमस्यान्त्येन अः इत्यनेन सहितो मन्त्रस्य द्वितीयार्णस्तेन मः इति बोध्यम् ।) अष्टमस्य वर्गस्याद्यमक्षरं शकारः प्रथमस्य वर्गस्य तृतीयाक्षरेण इकारेण समेतं मन्त्रस्य तृतीयमक्षरं शि इति । सप्तमस्य वर्गस्य चतुर्थमक्षरं वकारः स प्रथमवर्गस्य द्वितीयार्णेन आ इत्यनेन समन्वितं मन्त्रस्य चतुर्थमक्षरं भवति, तेन वा इति । सप्तमवर्गस्याद्यं य इति मन्त्रस्य पञ्चममक्षरं भवति ॥ मन्त्रनिरुक्तिमाह—प्रणवस्त्वित्यादि । स्पष्टोऽर्थः ॥ अथ प्रयोगः—तत्र प्रागुक्तविधिना दीक्षितः साधकः प्रागुक्तप्रकारेण प्रातरुत्थानादियोगपीठन्यासान्तं कर्म कृत्वा मूलेन प्राणायामत्रयं कृत्वा, शिरसि वामदेवाय ऋषये नमः । मुखे पंक्तिच्छन्दसे नमः । हृदये श्रीसदाशिवाय देवतायै नमः । इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत् । तर्जन्योः नं तत्पुरुषाय नमः । मध्यमयोः मं अघोराय नमः । कनिष्ठिकयोः शिं सद्योजाताय नमः । अनामिकयोः वां वामदेवाय नमः । अंगुष्ठयोः यं ईशानाय नमः । इति करयोर्विन्यस्य, मुखे हृदये पादयोर्गुह्ये मूर्ध्नि चैता मूर्तीर्विन्यस्य, पुनर्मुखे नं तत्पुरुषाय प्राग्वक्त्राय नमः । दक्षकर्णे मं अघोराय दक्षिणवक्त्राय० । चूडाधः शिं सद्योजाताय पश्चिमवक्त्राय० । वामकर्णे वां वामदेवायोत्तरवक्त्राय० । मूर्ध्नि यं ईशानायोर्ध्ववक्त्राय० । इति पञ्चमूर्तीर्विन्यस्य, ॐ सर्वज्ञशक्तिधाम्ने हृदयाय० । नं नित्यतृप्तशक्तिधाम्ने शिरसे० । मं अनादिबोधशक्तिधाम्ने शिखायै० । शिं स्वतन्त्रशक्तिधाम्ने कवचाय० । वां अलुप्तशक्तिधाम्ने नेत्रत्रयाय० । यं अनन्तशक्तिधाम्ने अस्त्राय फट् । इति मन्त्रैः षडङ्गानि यथास्थानं विन्यस्य मूलमन्त्रेण व्यापकन्यासं कुर्यात् । ततः (१) हृदि ॐनमः । वक्त्रे नंनमः । दक्षिणांसे मंनमः । वामांसे शिंनमः । दक्षिणोरौ वांनमः । वामोरौ यंनमः ॥ (२) कण्ठे ॐनमः । नाभौ नं० । दक्षिणपार्श्वे मं० । वामपार्श्वे शिं० । पृष्ठे वां० । हृदि यं० ॥ (३) मूर्ध्नि ॐनमः । वदने नं० । दक्षनेत्रे मं० । वामनेत्रे शिं० । दक्षनसि वां० । वामे यं नमः ॥ (४) दक्षदोर्मूले ॐनमः । मध्ये नं० । मणिबन्धे मं० । अंगुलिमूले शिं० । अंगुलिमध्ये वां० । अंगुल्यग्रे यंनमः ॥ (५) वामदोर्मूले ॐनमः । मध्ये नं० । मणिबन्धे मं० । अंगुलिमूले शिं० । मध्ये वां० । अग्रे यंनमः ॥ (६) दक्षोरुमूले ॐनमः । जानुनि नं० । गुल्फे मं० । अंगुलिमूले शिं० । मध्ये वां० । अग्रे यंनमः ॥ (७) वामोरुमूले ॐनमः । जानुनि नं० । गुल्फे मं० । अंगुलिमूले शिं० । मध्ये वां० । अग्रे यंनमः ॥ (८) शिरसि ॐनमः । मुखे नं० । हृदि मं० । कुक्षौ शिं० । दक्षोरुमूलादिपादाग्रपर्यन्तं वां० । वामोरुमूलादिपादाग्रपर्यन्तं यंनमः ॥ (९) हृदि ॐनमः । वक्त्रे नं० । कण्ठे मं० । वामोर्ध्वहस्ते मृगे शिं० । वामाधःकरे अभये वां० । दक्षाधोहस्ते वरे यंनमः ॥ (१०) मुखे ॐनमः । अंसयोः नं० । हृदि मं० । पादयोः शिं० । ऊर्वोः वां० । जठरे यंनमः । इति विन्यस्य, (पुनर्मूर्ध्नि ॐनमः । ललाटे नंनमः । जठरे मंनमः । दक्षांसे शिंनमः । वामांसे वांनमः । हृदये यंनमः ॥) 'नमोऽस्तु

स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने। चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे" ॥ इति मन्त्रेण मूर्धादिपादपर्यन्तं व्यापकं न्यसेत्। इति विन्यस्य यथोक्तरूपं देवं ध्यात्वा मानसपूजादियोगपीठपूजान्ते यथाविधि देवमावाह्यासनादिपुष्पान्तैरुपचारैः सम्पूज्य, भगवन्नावरणपूजार्थमनुज्ञां देहि इति प्रार्थ्य, प्रथमेऽष्टदले दिग्दलेषु—नं तत्पुरुषाय नमः। मं अघोराय०। शिं सद्योजाताय०। वां वामदेवाय०। मध्ये यं ईशानाय०। इति देवाग्रादिप्रादक्षिण्येन सम्पूज्य, आग्नेयादिदलेषु प्रादक्षिण्येन—ॐ निवृत्त्यै नमः। ओं प्रतिष्ठायै०। ॐ विद्यायै०। ॐ शान्त्यै नमः। मध्ये—ॐ शान्त्यतीतायै नमः। इति सम्पूज्य, द्वितीयाष्टदलान्तः केसरेषु देवस्य दक्षाग्रकेसरे ॐ हृदयाय नमः। वामाग्रे ईशाने नं शिरसे०। पृष्ठदक्षिणे मं शिखायै०। पृष्ठवामे शिं कवचाय०। अग्रे वां नेत्रत्रयाय०। अग्रादिचतुर्दिक्षु यं अस्त्राय०। इति सम्पूज्य, (द्वितीयेऽष्टदले देवाग्रदलमारभ्य प्रादक्षिण्येन—अनन्ताय नमः। सूक्ष्माय०। शिवोत्तमाय०। एकनेत्राय०। एकरुद्राय०। त्रिमूर्तये०। श्रीकण्ठाय०। शिखण्डिने नमः। इति सम्पूज्य) तृतीयेऽष्टदले देवस्य वामदलमारभ्य प्रादक्षिण्येन—उमायै नमः। चण्डीश्वराय०। नन्दिने०। महाकालाय०। गणेश्वराय०। वृषभाय०। भृङ्गिरिटये०। स्कन्दाय नमः। इति सम्पूज्य, चतुरस्ररेखात्रयान्तरालगतवीथीद्वयेऽभ्यन्तरालवीथ्यां देवाग्रमारभ्य—लं इन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतवाहनाय नमः। रं अग्नये तेजोऽधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय नमः। टं यमाय प्रेताधिपतये कृष्णवर्णाय दण्डहस्ताय महिषवाहनाय नमः। क्षं निर्ऋतये रक्षोऽधिपतये धूम्रवर्णाय खड्गहस्ताय (प्रेतवाहनाय नमः। वं वरुणाय यादसांपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय नमः। यं वायवेप्राणाधिपतये धूम्रवर्णाय अंकुशहस्ताय मृगवाहनाय नमः। सं कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय) नरवाहनाय नमः। हौं ईशानाय विद्याधिपतये स्फटिकवर्णाय शूलहस्ताय वृषभवाहनाय नमः। इति सम्पूज्य, इन्द्रेशानयोर्मध्ये आं ब्रह्मणे लोकाधिपतये रक्तवर्णाय पद्महस्ताय हंसवाहनाय नमः। निर्ऋतिवरुणयोर्मध्ये ह्रीं अनन्ताय नागाधिपतये गौरवर्णाय चक्रहस्ताय गरुडवाहनाय नमः। इति सम्पूज्य, द्वितीयवीथ्यां—वज्राय नमः। शक्तये०। दण्डाय०। खड्गाय०। पाशाय०। अंकुशाय०। गदायै०। त्रिशूलाय०। पद्माय०। चक्राय०। इति लोकपालायुधानि तत्समीपस्थानेषु पूजयेत्। इत्थं लोकपालार्चायां विस्तराशक्तौ प्रागुक्तप्रकारेण वा पूजयेत्। इत्थं षडावरणसमेतं देवं सम्पूज्य, मूलमन्त्रमुच्चार्य साङ्गाय सपरिवाराय श्रीसदाशिवाय नमः। इति पुष्पाञ्जलिना मध्ये देवं सम्पूज्य धूपदीपादि पूजाशेषं प्रागुक्तविधिना समापयेदिति तथा—

लक्षषट्कं जपेद्वत्स नियमस्थो जितेन्द्रियः। तावत्सहस्रं जुहुयात्तिलैः शुद्धैर्घृतप्लुतैः ॥ ६४ ॥
पायसैः क्षीरवृक्षोत्थसमिद्भिर्वा गणेश्वर। तावत्संख्यं जलैः शुद्धैस्तर्पयेच्चन्द्रवासितैः ॥ ६५ ॥
मार्जयेच्च गणश्रेष्ठ स्वात्मानं मूलमन्त्रतः। तर्पणस्य दशांशेन तद्दशांशेन भोजयेत् ॥ ६६ ॥
शिवभक्तान् द्विजश्रेष्ठान् सदाचारानतन्द्रितः। पञ्चाङ्गमेव विधिवत्पुरश्चरणमाचरेत् ॥ ६७ ॥
एवं संसिद्धमन्त्रस्तु सर्वान् कामान् प्रयच्छति। .... ॥

एष षड्लक्षजपः कृतयुगपरः कलावेतच्चतुर्गुणजपः कार्यः ॥ लिङ्गपुराणे—

विनियोगं प्रवक्ष्यामि सिद्धमन्त्रप्रयोजनम्। दौर्बल्यं याति तन्मन्त्रं विनियोगमजानतः ॥ १ ॥
यस्य येन नियुञ्जीत कार्येण च विशेषत। विनियोगः स विज्ञेय ऐहिकामुष्मिकं फलम् ॥ २ ॥
विनियोगजमायुष्यमारोग्यं तत्सुनित्यता। राजैश्वर्यं च विज्ञानं स्वर्गो निर्वाणमेव च ॥ ३ ॥
प्रोक्षणं चाभिषेकं च अघमर्षणमेव च। स्नानं च सन्ध्ययोस्त्वेवं कुर्यादेकादशेन वै ॥ ४॥
शुद्धः पर्वतमारुह्य जपेल्लक्षमतन्द्रितः। महानद्यां द्विलक्षं तु दीर्घममायुरवाप्नुयात् ॥ ५ ॥
दूर्वांकुरैस्तिलैर्वापि शुद्धैर्द्रव्यैस्तथैव च। तेषां दश सहस्राणि होममायुःप्रवर्धनम् ॥ ६ ॥

अश्वत्थवृक्षमाश्रित्य जपेल्लक्षद्वयं सुधीः । शनैश्चरदिने स्पृष्ट्वा दीर्घमायुर्लभेन्नरः ॥ ७ ॥
जपेदष्टोत्तरशतं सोऽपमृत्युहरो भवेत् । आदित्याभिमुखो भूत्वा जपेल्लक्षमनन्यधीः ॥ ८ ॥
अर्करष्टशतं नित्यं जुहुयाद् व्याधिमुक्तये । समस्तव्याधिशान्त्यर्थं पलाशसमिधो नरः ॥ ९ ॥
हुत्वा दशसहस्रं तु नीरोगो मनुजो भवेत् । जपेल्लक्षं तु पूर्वोह्ने हुत्वा चाष्टशतेन च ॥ १० ॥
सूर्यं नित्यमुपस्थाय यः स आरोग्यमाप्नुयात् । नदीतोयेन सम्पूर्णं घटं संस्पृश्य शोभनम् ॥ ११ ॥
जप्त्वायुतं तु तैः स्नायाद्रोगाणां भेषजं भवेत् । अष्टाविंशतिजप्तान्नमश्नीयादन्वहं शुचिः ॥ १२ ॥
हुत्वा च तालपालाशैरेतैरारोग्यमश्नुते । नित्यमष्टशतं जप्त्वा पिबेदपोऽर्कसंनिधौ ॥ १३ ॥
औदरैर्व्याधिभिः सर्वैर्मासेनैकेन मुच्यते । एकादशेन भुञ्जीयादन्नं चैवाभिमन्त्रितम् ॥ १४ ॥
भक्ष्यं चान्नं तथा पेयं विषमप्यमृतं भवेत् । चन्द्रसूर्यग्रहे पूर्वमुपोष्य विधिना शुचिः ॥ १५ ॥
यावद्ग्रहणमोक्षं तु तावन्नद्यां समाहितः । जपेत्समुद्रगामिन्यां विमोक्षे ग्रहणस्य तु ॥ १६ ॥
अष्टोत्तरसहस्रेण पिबेद्ब्राह्मीरसं द्विजः । ऐहिकीं लभते मेधां सर्वश्रुतिवहां शुभाम् ॥ १७ ॥
सारस्वती भवेद् दैवी तस्य वागतिमानुषी । ग्रहनक्षत्रपीडासु जपेद् भक्त्यायुतं नरः ॥ १८ ॥
(हुत्वा चाष्टसहस्रं च ग्रहपीडा विनश्यति । दुःस्वप्नदर्शने स्नात्वा जपेच्चैवायुतं नरः ॥ १९ ॥
घृतेनाष्टशतं हुत्वा सद्यः शान्तिर्भविष्यति । चन्द्रसूर्यग्रहे लिङ्गं समभ्यर्च्य यथाविधि ॥ २० ॥
यत्किञ्चित् प्रार्थयेद् देवि जपेदयुतमादरात् । संनिधौ तस्य देवस्य शुचिः संयतमानसः ॥ २१ ॥
सर्वान् कामानवाप्नोति पुरुषो नात्र संशयः । गजानां तुरगाणां तु गोजातीनां तथैव च ॥ २२ ॥
व्याध्यागमे शुचिर्भूत्वा जुहुयात्समिधाहुतिम् । मासमभ्यर्च्य विधिना अयुतं भक्तिसंयुतः ॥ २३ ॥
तेषामृद्धिश्च शान्तिश्च भविष्यति न संशयः । उत्पाते शत्रुबाधायां जुहुयादयुतं शुचिः ॥ २४ ॥
पलाशसमिधैर्देवि तस्य शान्तिर्भविष्यति । आभिचारिकशङ्कायामेतद्देवि समाचरेत् ॥ २५ ॥
प्रतिधावति तच्छक्तिः शत्रोः पीडा भविष्यति । विद्वेषणार्थं जुहुयाद्विभीतसमिधष्टकम् ॥ २६ ॥
प्रायश्चित्तं च वक्ष्यामि सर्वपापविशुद्धये । पापशुद्धिं यथा सम्यक्कर्तुमभ्युद्यतो नरः ॥ २७ ॥
पापशुद्धिर्न चेत्पुंसः क्रियाः सर्वाश्च निष्फलाः । ज्ञानं च हीयते तस्मात् कर्तव्यं पापशोधनम् ॥ २८ ॥
विद्यालक्ष्मीविशुद्ध्यर्थं मां ध्यात्वाञ्जलिना शुभे । शिवेनैकादशेनाद्भिरभिषिञ्चेत्समन्ततः ॥ २९ ॥
अष्टोत्तरशतेनैव स्नायात् पापविशुद्धये । सर्वतीर्थफलं तच्च सर्वपापहरं शुभम् ॥ ३० ॥
सन्ध्योपासनविच्छेदे जपेद्दशशतं बुधः । विड्वराहैश्च चाण्डालैर्मार्जारैः कुक्कुरैरपि ॥ ३१ ॥
स्पृष्टमन्नं न भुञ्जीत भुक्त्वा चाष्टशतं जपेत् । ब्रह्महत्यादिशुद्ध्यर्थं जपेल्लक्षायुतं नरः ॥ ३२ ॥
पातकानां तदर्धं स्यान्नात्र कार्या विचारणा । उपपातकदुष्टानां तदर्धं परिकीर्तितम् ॥ ३३ ॥
शेषाणामपि पापानां जपेत्पञ्चसहस्रकम् । आत्मबोधकरं गुह्यं शिवरूपप्रसाधकम् ॥ ३४ ॥
जितश्वासो जपेन्मन्त्रं पञ्चलक्षमनाकुलः । पञ्चवायुजयं भद्रे प्राप्नोति मनुजः सुखी ॥ ३५ ॥
यो जपेत्पञ्चलक्षं तु निगृहीतेन्द्रियः शुचिः । पञ्चेन्द्रियाणां विजयो भविष्यति वरानने ॥ ३६ ॥
ध्यानयुक्तो जपेद्यस्तु मनः संयम्य यत्नतः । सम्यग्विजयमाप्नोति करणानां वरानने ॥ ३७ ॥
पञ्चविंशतिलक्षाणां जपेन कमलानने । पञ्चविंशतितत्त्वानां विजयं मनुजो लभेत् ॥ ३८ ॥
मध्यरात्रे व्यतीते तु जपेदयुतमादरात् । स ब्रह्मसिद्धिमाप्नोति इहैवानेन सुन्दरि ॥ ३९ ॥
जपेल्लक्षमनालस्यो निर्वाते ध्वनिवर्जिते । मध्यरात्रे शिवज्योत्स्नां पश्यत्येव न संशयः ॥ ४० ॥
(अन्धकारविनाशं च दीपस्येव प्रकाशनम् । हृदयान्तर्बहिर्वापि भविष्यति न संशयः ॥ ४१ ॥
सर्वसंपत्समृद्ध्यर्थं जपेदयुतमात्मवान् । सबीजसम्पुटं मन्त्रं शतलक्षं जपेत्सुधीः ॥ ४२ ॥

मत्सायुज्यमवाप्नोति भक्तिमान् मनुजः परम् । ....॥

इति । तथा लिङ्गपुराणे—

अस्य मन्त्रस्य वक्ष्यामि ऋषिच्छन्दोऽधिदैवतम् । बीजं शक्ति स्वरं वर्णं स्थानं चैवाक्षरं प्रति ॥ १ ॥
वामदेवो नाम ऋषिः पंक्तिश्छन्द उदाहृतम् । देवता शिव एवाहं मन्त्रस्यास्य वरानने ॥ २ ॥
नकारादीनि वर्णानि पञ्चभूतात्मकानि च । आत्मानं प्रणवं विद्धि सर्वव्यापिनमव्ययम् ॥ ३ ॥
शक्तिस्त्वमेव देवेशि सर्वदेवनमस्कृता । त्वदीयं प्रणवं केचिन्मदीयं प्रणवं तथा ॥ ४ ॥
त्वदीयं देवि मन्त्राणां शक्तिभूतं न संशयः । ॐकारस्य स्वरोदात्त ऋषिर्ब्रह्मा सिता प्रभा ॥ ५ ॥
छन्दो देवी च गायत्री परमात्माधिदेवता । उदात्तः प्रथमस्तद्वच्चतुर्थश्च द्वितीयकः ॥ ६ ॥
पञ्चमः स्वरितश्चैव मध्यमो निषादस्तथा । नकारः पीतवर्णोऽस्य (स्थानं पूर्वमुखं स्मृतम् ॥ ७ ॥
इन्द्रोऽधिदैवतं छन्दो गायत्री गौतम ऋषिः । मकारः कृष्णवर्णोऽस्य) स्थानं वै दक्षिणं मुखम् ॥ ८ ॥
छन्दोऽनुष्टुबृषिश्चात्री रुद्रो दैवतमुच्यते । शिकारो धूम्रवर्णोऽस्य स्थानं वै पश्चिमं मुखम् ॥ ९ ॥
विश्वामित्र ऋषिस्त्रिष्टुप् छन्दो विष्णुश्च देवता । वकारो हेमवर्णोऽस्य स्थानं चैवोत्तरं मुखम् ॥ १० ॥
ब्रह्माधिदैवतं छन्दो बृहती चाङ्गिरा ऋषिः । यकारो रक्तवर्णोऽस्य स्थानमूर्ध्वमुखं विराट् ॥ ११ ॥
छन्दो ऋषिर्भरद्वाजो स्कन्दो दैवतमुच्यते । ....॥

इति ॥ तथा सारसंग्रहे—

इत्थं शिवं समभ्यर्च्य सहस्रं नित्यशो जपेत् । सर्वपापविनिर्मुक्तश्चान्ते सद्गतिमाप्नुयात् ॥ १ ॥
सर्वपापविनिर्मुक्तः प्राप्नुयाद्वाञ्छितां रमाम् । सहस्रद्वयजापेन महारोगैः प्रमुच्यते ॥ २ ॥
सहस्रत्रयजापेन दीर्घमायुर्लभेन्नरः । चतुःसहस्रजापेन वाञ्छितार्थानवाप्नुयात् ॥ ३ ॥
तिलैः शुद्धैर्घृताभ्यक्तैर्हन्नेदुत्पातसम्भवाः । रोगा विनश्यन्त्यचिरान्नात्र कार्या विचारणा ॥ ४ ॥
प्रजपेच्छतलक्षं यः स शिवो नात्र संशयः । नादीनां पञ्चवर्णानामृषयोऽमी मताः क्रमात् ॥ ५ ॥
गौतमोऽत्रिर्द्वितीयः स्याद्विश्वामित्रोऽङ्गिरास्तथा । भरद्वाजश्च गायत्री सानुष्टुप् त्रिष्टुबेव च ॥ ६ ॥
बृहती सविराडेषां छन्दांसीह मतानि वै । इन्द्ररुद्रहरिब्रह्मस्कन्दा देवाः प्रकीर्तिताः ॥ ७ ॥
एषामाद्यः पूर्ववत्स्यात् (पूर्वः पीतोऽसितस्तथा । धूम्रपीतारुणा ज्ञेया एवं पञ्चार्णवो मताः ॥ ८ ॥

एषामाद्यः नादीनामाद्यः प्रणवः स पूर्ववत् स्यात्) परब्रह्मबोधक इत्यर्थः । अथ च पूर्वोक्तमुन्यादिकश्च स्यात् । तथा—

.... । ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रीच्छन्द ईरितम् ॥ ९ ॥
देव्यादिकं देवतास्य परमात्मा समीरितः । ज्योतिर्वर्णः समाख्यातो मोक्षार्थे विनियुज्यते ॥ १० ॥

इत्यादि । इति पञ्चाक्षरविधिः ॥ नन्दिकेश्वरमते मन्त्रान्तरे-—

शृणु नन्दिन् प्रवक्ष्यामि मन्त्रान्तरमुमापतेः । अष्टमान्त्यं सप्तमस्य द्वितीयार्णस्थमालिखेत् ॥ १ ॥
आद्यवर्गतुरीयार्णोपान्त्याभ्यां परिमण्डितम् । मायाबीजमिदं वत्स त्रिषु लोकेषु दुर्लभम् ॥ २ ॥
अनेनाद्यन्तयोर्युक्तः पञ्चार्णः सप्तवर्णकः । षडर्णश्चाष्टवर्णः स्यादेवं मन्त्रद्वयं भवेत् ॥ ३ ॥

अष्टमान्त्यं हकारः सप्तमद्वितीयार्णस्थं रेफोपरि स्थितं । आद्यवर्गतुरीयार्णः ईकारः, तस्यैव (वर्गस्य) उपान्त्यो बिन्दुस्ताभ्यां युक्तं लिखेत्, तेन मायाबीजं सिद्धम् ॥ तथा—

ऋषिरुक्तो वामदेवः पंक्तिश्छन्द उदाहृतम् । उमापतिर्देवता स्यान्मन्त्रयोर्जगदीश्वरः ॥ ४ ॥
तारषड्दीर्घयुङ्मायापूर्वैर्मन्त्रार्णकैः क्रमात् । षडङ्गानि गणश्रेष्ठ जातियुक्तानि कल्पयेत् ॥ ५ ॥
बन्धूककुसुमारक्तं चन्द्रार्धकृतशेखरम् । दक्षिणोर्ध्वकरे शूलं तदधो वरमुद्रिकाम् ॥ ६ ॥

वामोर्ध्वेन कपालं तदधोहस्तेन चाभयम् । दधानं निजवामोरुपीठस्थाया गणेश्वर ॥ ७ ॥
रक्तोत्पलकरायाश्च श्लिष्यन्तं वामबाहुना । सर्वाभरणसन्दीप्तदेहं देव्या मुदान्वितम् ॥ ८ ॥
स्मेरवक्त्रं त्रिनयनं सर्वाभरणभूषितम् । एवं ध्यात्वा यजेद् देवं प्राक्प्रोक्ते शैवविष्टरे ॥ ९ ॥
पद्मं पञ्चदलं कृत्वा तद्बहिश्चाष्टपत्रकम् । बहिरष्टच्छदाम्भोजं चतुरस्रत्रयं बहिः ॥ १० ॥
वीथीद्वयसमोपेतं चतुर्द्वारोपशोभितम् । अस्मिन् पीठे यजेद् देवं मूर्ति संकल्प्य मूलतः ॥ ११ ॥
सर्वोपचारैराराध्य प्राग्वदङ्गानि पूजयेत् । हृल्लेखां गगनां रक्तां महोच्छुष्मां करालिकाम् ॥ १२ ॥
पूजयेत्पञ्चपत्रेषु बहिरष्टदले पुनः । वृषभं क्षेत्रपालं च चण्डेश्वरमनन्तरम् ॥ १३ ॥
दुर्गां च षण्मुखं पश्चान्नन्दिनं विघ्ननायकम् । सेनापतिं ततो बाह्ये यजेदष्टदलेष्विमाः ॥ १४ ॥
ब्राह्म्याद्या मातरस्तास्तु ब्राह्मी माहेश्वरी ततः । कौमारी वैष्णवी चैव वाराही तदनन्तरम् ॥ १५ ॥
ऐन्द्री च षष्ठी चामुण्डा महालक्ष्मीरिति क्रमात् । लोकपालांस्तदस्त्राणि चतुरस्रान्तरालयोः ॥ १६ ॥
एवं सम्पूज्य देवेशं नियमेन जितेन्द्रियः । लक्षत्रयं जपेत्सार्धं तत्सहस्रं समिद्वरैः ॥ १७ ॥
आरग्वधतरूद्भूतैस्तत्पुष्पैर्वा हुनेत्ततः । मधुरत्रयसंसिक्तैस्तर्पणादि ततश्चरेत् ॥ १८ ॥
प्रागुक्तेन विधानेन ततः सिद्धो भवेन्मनुः । सौभाग्यसम्पदायुष्यपुत्रपौत्रादिवर्धनः ॥ १९ ॥
देहान्ते च गणश्रेष्ठ शिवसायुज्यदो भवेत् । .... ॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्तं प्राग्वत्कृत्वा, शिरसि वामदेवाय ऋषये नमः । मुखे पंक्तिच्छन्दसे नमः । हृदये श्रीउमापतये देवतायै नमः । इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिर्वदेत् । ॐह्रांॐ हृदयाय नमः । ॐह्रींनं शिरसे० । ॐह्रूंमं शिखायै० । ॐह्रैंशि कवचाय० । ॐह्रौंवां नेत्रत्रयाय० । ॐह्रःयं अस्त्राय० । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य, (हृदयादिषडङ्गेष्वपि न्यसेत् । ततो ध्यानादिमानसपूजान्ते प्रमाणोक्तं पूजाचक्रं निर्मायार्घ्यादिपुष्पोपचारान्ते प्राग्वद् देवाङ्गानि सम्पूज्य) पञ्चदलेषु देवाग्रदलमारभ्य प्रादक्षिण्येन—ॐहृल्लेखायै नमः । ॐ गगनायै० । ॐरक्तायै० । ॐमहोच्छुष्मायै० । ॐकरालिकायै नमः । इति सम्पूज्य, अष्टदलेषु देवाग्रमारभ्य— वृषभाय नमः । क्षेत्रपालाय० । चण्डेश्वराय० । दुर्गायै० । षण्मुखाय० । नन्दिने० । विघ्ननायकाय० । सेनापतये नमः । इति प्रादक्षिण्येन सम्पूज्य, तद्बहिरष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन—आं ब्राह्म्यै नमः । ईं माहेश्वर्यै० । ऊं कौमार्यै० । ॠं वैष्णव्यै० । ॡं वाराह्यै० । ऐं इन्द्राण्यै० । औं चामुण्डायै० । अः महालक्ष्म्यै नमः । इति सम्पूज्य, ततः प्राग्वल्लोकपालार्चादि सर्वं समापयेदिति ॥ तथा—प्रासादमन्त्रः

शृणु नन्दिन् प्रवक्ष्यामि प्रासादाख्यं महामनुम् । यस्य स्मरणमात्रेण नरः कथितो साक्षाच्छिवो भवेत् ॥ १ ॥
अष्टमस्यान्त्यवर्णस्तु प्रथमान्त्यादिसंयुतः । तदादिस्वरसंयुक्तः कथितो वै महामनुः ॥ २ ॥
धर्मार्थकाममोक्षाणां साधने मुनिसेवितः । प्रसादकरणाच्छीघ्रमस्य प्रासादनामता ॥ ३ ॥

अष्टमान्त्यवर्णो हः, प्रथमान्त्यादिरनुस्वारः, तदादिस्वर औकारस्ताभ्यां युतस्तेन प्रासादबीजमुद्धृतम् ।

वामदेवो मुनिर्वत्स पंक्तिश्छन्द उदाहृतम् । सदाशिवो देवतास्य मन्त्रस्य परिकीर्तितः ॥ ४ ॥
हकारो बीजमित्युक्तमौकारः शक्तिरुच्यते । षट्कलाद्येन बीजेन षडङ्गानि प्रविन्यसेत् ॥ ५ ॥
प्रथमाद्यतृतीयेषुरुद्रादित्योत्तरस्वरैः । अष्टमान्त्यं तु संभेद्य प्रथमोपान्त्यसंयुतैः ॥ ६ ॥
विलोमगैः पञ्चबीजैरीशानाद्यान् प्रविन्यसेत् । ....॥

प्रथमाद्यामिति, प्रथमाद्यं अ, तृतीयं इ, इषु उ, रुद्र ए, आदित्योत्तरः ओ, एभिर्भेदितमष्टमान्त्यं हकारः, प्रथमोपान्त्यो बिन्दुस्तेन हंहिंहुंहेंहों इति, विलोमगैः होंहेंहुंहिंहं इत्यादिभिः ।

मूर्तिरीशानश्चाद्य स्यात्ततस्तत्पुरुषाह्वयः । अघोरो वामदेवश्च सद्योजातश्च पञ्चमः ॥ ७ ॥

अंगुष्ठादिष्वंगुलीषु मूर्ध्नि वक्त्रे हृदि न्यसेत् । गुह्ये च पादयोश्चाथ पञ्च वक्त्रेषु ताः पुनः ॥ ८ ॥
ऊर्ध्वादिषु गणश्रेष्ठ ततो देवं विचिन्तयेत् । ....॥

इति । शारदातिलके—(१८ । ५६)

"तत्तदंगुलिभिर्भूयस्तत्तद्बीजादिकान् न्यसेत् । शिरोवदनहृद्गुह्यपाददेशे यथाक्रमम् ॥ १ ॥
ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु ताः ।"

इति । ता मूर्तीः । तथा--

मुक्ताविद्युद्घनस्वच्छारुणवर्णैस्तु पञ्चभिः । वदनैः शोभितं वत्स प्रतिवक्त्रं त्रिलोचनम् ॥ ९ ॥
चन्द्रावतंसविलसज्जाटामुकुटमण्डितम् । शुद्धस्फटिकसंकाशं समासीनं सरोरुहे ॥ १० ॥
प्रसन्नवदनाम्भोजं दधानं करपङ्कजैः । दक्षिणैस्त्रिशिखं टङ्कं वज्रं खड्गं तथानलम् ॥ ११ ॥
सर्पं घण्टासृणी पाशमभयं वामबाहुभिः । नानाभरणसन्दीप्तं ध्यायेद् देवं सदाशिवम् ॥ १२ ॥
इति ध्यात्वा गणश्रेष्ठ पूर्वोक्ते योगविष्टरे । पञ्चाक्षरोक्तवत् कृत्वा पूजामण्डलमन्त्रवत् ॥ १३ ॥
मूलेन मूर्ति संकल्प्य तस्यामावाह्य पूजयेत् । उपचारैः समभ्यर्च्य यजेदावृतिदेवताः ॥ १४ ॥
प्रथमेऽष्टदले वत्स सद्यादीन् पञ्च पूजयेत् । वेदाक्षमालाभीतीष्टहस्तं कुन्देन्दुसन्निभम् ॥ १५ ॥
चतुर्वक्त्रं त्रिनयनं सद्यं पश्चिमतो यजेत् । काश्मीरवर्णोऽभीतीष्टटङ्काक्षस्रक्करः शुभः ॥ १६ ॥
श्रीक्षणश्चतुरास्यश्च विलासी चोत्तरे स्थितः । पूजनीयो वामदेवस्त्वघोरं दक्षिणे यजेत् ॥ १७ ॥
अक्षमालां वेदपाशौ सांकुशं डमरुं करैः । खट्वाङ्गं त्रिशिखं चैव कपालं दधतं क्रमात् ॥ १८ ॥
अञ्जनाभं भीमदंष्ट्रं त्रिनेत्रं चतुराननम् । (प्रदीप्तविद्युद्धेमाभं पूर्वे तत्पुरुषं यजेत् ॥ १९ ॥
हस्तैर्विषावराभीतिकुठारान् दधतं क्रमात् । चतुर्वक्त्रं त्रिनयनं नागयज्ञोवीतिनम् ॥ २० ॥
ईशानं पूजयेन्मध्ये पञ्चवक्त्रं गणेश्वर । मुक्तागौरं त्रिनयनं बाहुभिर्दशभिर्निजैः ॥ २१ ॥
दधानमक्षस्रग्वेदपाशांकुशसमाह्वयान् । डमरुं चैव खट्वाङ्गं त्रिशूलं च कपालकम् ॥ २२ ॥
अभयं वरदं चैव कोणपत्रेषु पूजयेत् । तेजोरूपा निवृत्त्याद्यास्तास्त्वन्त्यां मध्यतो यजेत् ॥ २३ ॥
पुरोक्तवत् षडङ्गानि पूजयेन्नन्दिकेश्वर । अनन्ताद्यानुमाद्याश्च यजेदष्टदलद्वये ॥ २४ ॥
पूर्ववल्लोकपालांश्च तदस्त्राणि च पूजयेत् । य एवं पूजयेच्छम्भुं साधकः स्थिरमानसः ॥ २५ ॥
भुङ्क्ते स भोगानखिलान् देहान्ते शिवतां व्रजेत् । .... ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि वामदेवाय ऋषये नमः । मुखे पंक्तिच्छन्दसे नमः । हृदये श्रीसदाशिवाय देवतायै नमः । गुह्ये हं बीजाय नमः । पादयोः ॐ शक्तये नमः । इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, हां हृदयाय नमः । हीं शिरसे स्वाहा । हूं शिखायै वषट् । हैं कवचाय हुं । हौं नेत्रत्रयाय वौषट् । हः अस्त्राय फट् । इति षडङ्गमन्त्रानंगुष्ठादिकरतलान्तं करयोर्विन्यस्य, हृदयादिनेत्रत्रयान्तं विन्यस्यास्त्रमन्त्रेण तालत्रयं तर्जन्यंगुष्ठोत्थशब्देन दशदिग्बन्धनं च कृत्वा, अंगुष्ठयोः हों ईशानाय नमः । तर्जन्योः हें तत्पुरुषाय नमः । मध्यमयोः हुं अघोराय नमः । अनामिकयोः हिं वामदेवाय नमः । कनिष्ठयोः हं सद्योजाताय नमः । इति विन्यस्यैवमेव शिरोवदनहृद्गुह्यपादेषु विन्यस्येत् । शिरसि हों ईशानायोर्ध्ववक्त्राय नमः । मुखे हें तत्पुरुषाय पूर्ववक्त्राय० । दक्षिणकर्णे हुं अघोराय दक्षिणवक्त्राय० । वामकर्णे हिं वामदेवायोत्तरवक्त्राय० । चूडाधः हं सद्योजाताय पश्चिमवक्त्राय नमः । इत्यंगुष्ठादिभिरेकेनांगुलिनैकैकां मूर्तिं विन्यस्य, ध्यानादिमानसपूजान्ते पञ्चाक्षरोक्तं पूजायन्त्रं विधायार्घ्यस्थापनादिपुष्पोपचारान्ते प्रथमेऽष्टदले देवस्य पृष्ठदले हं सद्योजाताय नमः । वामदले हिं वामदेवाय० । दक्षिणदले हुं अघोराय० । अग्रदले हें तत्पुरुषाय० । कर्णिकायां देवस्याग्रे

ह्रौं ईशानाय नमः। सम्पूज्याग्नेयादिदलेषु मध्ये च निवृत्त्याद्याः सम्पूज्य, ततः प्राग्वत् षडङ्गानि सम्पूज्यानन्तादिपूजामारभ्य पञ्चाक्षरोक्तवत् सर्वं कृत्वा समापयेदिति ॥ तथा—

लक्षद्वयं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः। पञ्चसप्ततिसाहस्रं समेतं करवीरजैः ॥ २६ ॥
जपापुष्पैस्तु पद्मैर्वा त्रिमध्वक्तैर्दशांशतः। पायसैः सघृतैर्वाथ राजवृक्षसमिद्वरैः ॥ २४ ॥
जुहुयात्तस्य पुष्पैर्वा तर्पणादि ततश्चरेत्। ....॥

इति। एष जपः कृतयुगपरः। तथा मन्त्रान्तरम्—

अथ नन्दिन् प्रवक्ष्यामि मन्त्रमष्टाक्षरं परम्। प्रथमस्य तु वर्गस्योपान्त्यवर्णसमन्वितम् ॥ १ ॥
तत्त्रयोदशवर्णं तु प्रथमार्णमिदं भवेत्। मायाबीजं द्वितीयं स्यात्प्रासादाख्यं तृतीयकम् ॥ २ ॥
पञ्चाक्षरस्ततः पश्चादेवमष्टाक्षरो मनुः। ....॥

प्रथमवर्गोपान्त्योऽनुस्वारः, तत्त्रयोदश ॐकारस्तेन ॐ, स मन्त्रस्याद्दिमो वर्णो भवति।

वामदेव ऋषिः पंक्तिश्छन्दो देवः सदाशिवः। मायाप्रासादबीजाभ्यां भेदिताभ्यां स्वरैरथ ॥ ३ ॥
षड्भिः कुर्यात्षडङ्गानि मन्त्रवर्णैः सजातिभिः। ध्यायेद्देवं ततो वत्स हृदि चैकाग्रमानसः ॥ ४ ॥
सिन्दूरपुञ्जशोणाङ्गं स्मेरवक्त्रं त्रिलोचनम्। मणिमौलिलसच्चन्द्रकलालंकृतमस्तकम् ॥ ५ ॥
दक्षिणोर्ध्वकरे टङ्कं दधानं तदधो वरम्। वामोर्ध्वहस्ते हरिणं तदधः करमादरात् ॥ ६ ॥
पीनवृत्तघनोत्तुङ्गस्तनाग्रे विनिवेश्य च। वामांके सन्निविष्टायाः प्रियाया रक्तपङ्कजम् ॥ ७ ॥
दधत्या दक्षिणे हस्ते चासीनं रक्तपङ्कजे। नानाभरणसंदीप्तं दिव्यगन्धस्रगम्बरम् ॥ ८ ॥
एवं ध्यात्वा गणश्रेष्ठ पूर्वोक्ते पूजयेच्छिवम्। योगपीठे समावाह्य गन्धपुष्पाक्षतादिभिः ॥ ९ ॥
पञ्चाक्षरोक्तविधिना पूजायन्त्रं प्रकल्प्य च। तत्तन्त्रोक्तविधानेन यजेन्मूर्तीः कलाश्च ताः ॥ १० ॥
ततोऽङ्गानि समभ्यर्च्यानन्तादीनप्युमादिकान्। लोकेशांश्च तदस्त्राणि पूजयेद्वत्स पूर्ववत् ॥ ११ ॥
अनेन विधिना यस्तु शिवमाराधयेत् सदा। पुत्रपौत्रधनैश्वर्यभोगमोक्षान् स विन्दति ११ ॥

इति॥ अथ प्रयोगः—तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते पञ्चाक्षरोक्तमृष्यादिकं विन्यस्य, ह्रांह्रांॐ हृदयाय नमः। ह्रींह्रींनं शिरसे०। इत्यादि करषडङ्गन्यासं विधाय, यथोक्तरूपं देवं ध्यात्वा मानसयजनादिकं पञ्चाक्षरोक्तमन्त्रवत् सर्वं कुर्यादिति॥ तथा दक्षिणामूर्तिमन्त्रः—

दक्षिणामूर्तिमन्त्रस्य विधानं नन्दिकेश्वर। प्रवक्ष्यामि गणश्रेष्ठ मन्त्रोद्धारपुरःसरम् ॥ १ ॥
पञ्चमस्य तृतीयार्णः प्रथमः प्रथमस्य तु। तृतीयार्णयुतो वत्स द्वितीयाद्योऽष्टमस्य च ॥ २ ॥
द्वितीयार्णयुतश्चाथ चतुर्थान्त्यो गणाधिप। प्रथमस्य द्वितीयार्णयुतोऽन्त्यः षष्ठवर्गजः ॥ ३ ॥
आद्यषष्ठसमायुक्तः पञ्चमाद्यस्ततः परम्। सप्तमस्य द्वितीयार्णरूढस्तस्यादिमस्ततः ॥ ४ ॥
आद्यैकादशसंयुक्तः पञ्चमाद्यस्ततः पुनः। आद्यपञ्चमसंयुक्तस्तुरीयः षष्ठवर्गजः ॥ ५ ॥
सप्तमाद्यसमायुक्तः प्रथमोपान्त्यसंयुतः। सप्तमान्त्यस्ततो वत्स चतुर्थाद्यस्ततः परम् ॥ ६ ॥
षष्ठस्य पञ्चमस्त्वाद्यषष्ठवर्गसमन्वितः। सप्तमस्य तृतीयोऽथ पञ्चमान्त्यस्ततः परम् ॥ ७ ॥
आद्यवर्गतृतीयार्णसमेतः सप्तमान्त्यकः। आद्यद्वितीयसंयुक्तस्त्वष्टमस्य तृतीयकः ॥ ८ ॥
प्रथमस्य तृतीयार्णसमेतस्तदनन्तरम्। आद्यैकादशसंयुक्तः पञ्चमस्य तु पञ्चमः ॥ ९ ॥
सप्तमाद्यसमायुक्तः पञ्चमस्य चतुर्थकः। आद्यद्वितीययुक्तश्च पञ्चमान्त्यस्ततः परम् ॥ १० ॥
आद्यद्वादशसंयुक्तो द्वितीयाद्यस्तथा परम्। पञ्चमान्त्यस्ततो वत्स आद्यतृतीयसंयुतः ॥ ११ ॥
सप्तमस्य द्वितीयोऽथ पञ्चमाद्यस्ततः परम्। आद्यद्वितीयसंयुक्त)स्तस्य पञ्चदशान्वितः ॥ १२ ॥

द्वितीयस्य तृतीयोऽथ प्रथमस्य द्वितीययुक् । सप्तमाद्यं ततो वत्स पञ्चमान्त्यस्ततः परम् ॥ १३ ॥
षष्ठान्तिमोऽथ नन्दीश आद्यत्रयोदशान्वितः । सप्तमस्य द्वितीयोऽथ आद्यपञ्चमसंयुतम् ॥ १४ ॥
पञ्चमस्य तृतीयोऽथ आद्यसप्तम क?यो)स्तथा । द्वितीयार्णसमायुक्तः सप्तमस्यादिमस्तथा ॥ १५ ॥
अष्टमस्यादिमः पश्चात्प्रथमोपान्त्यसंयुतः । षष्ठस्य च चतुर्थोऽथ प्रथमैकादशान्वितः ॥ १६ ॥
सप्तमस्य चतुर्थार्णः प्रोक्तो द्वात्रिंशदक्षरः । पुटितस्तारमायाभ्यां भवेत् षट्त्रिंशदक्षरः ॥ १७ ॥
कथितो मन्त्रराजोऽयं वाङ्मोक्षफलदायकः । ....॥

इति ॥ पञ्चमस्य तृतीयार्णो द, प्रथमो मन्त्रस्याद्यमक्षरमित्यर्थः । द्वितीयाद्यः ककारः, अष्टमस्य द्वितीयोऽर्णः ष, प्रथमस्य तृतीयार्णः ड, ताभ्यां युतस्तेन क्षिं इति । चतुर्थान्त्यो णकारः, प्रथमस्य द्वितीयार्णयुत आकारेण युक्तस्तेन णा इति । षष्ठवर्गान्त्यो मकारः, आद्यषष्ठ ऊकारस्तद्युक्तस्तेन मू इति । पञ्चमाद्यस्तकारः, (सप्तमस्य द्वितीये रेफे आरूढस्तेन र्त । तथा तस्यैवादिमो यकारः, प्रथमस्यैकादशेनैकारेण युक्तस्तेन ये । पञ्चमाद्यस्तकारः,) आद्यपञ्चम उकारस्तद्युक्तस्तेन तु इति । षष्ठवर्गतुरीयो भकारः, सप्तमाद्यो यकारः, प्रथमोपान्त्यो बिन्दुस्तद्युक्तश्च तेन भ्यं इति । सप्तमान्त्यो वकारः । चतुर्थाद्यो टकारः । षष्ठस्य पञ्चमो मकारः, आद्यषष्ठ ऊकारस्तद्युक्तस्तेन मू । सप्तमस्य तृतीयो लकारः, । पञ्चमान्त्यो नकारः, (आद्यवर्गतृतीयार्णसमेत इकारयुक्तस्तेन नि ।) सप्तमान्त्यो वकारः, आद्यद्वितीय आकारस्तेन युक्तो वा इति । अष्टमस्य तृतीयः सकारः, प्रथमस्य तृतीय इकारस्तद्युक्तस्तेन सि । पञ्चमस्य पञ्चमो नकारः, आद्यैकादश एकारस्तद्युक्तस्तेन ने इति । पञ्चमस्य चतुर्थो धकारः, सप्तमाद्यो यकारः आद्यद्वितीय आकारस्ताभ्यां युक्तस्तेन ध्या इति । पञ्चमान्त्यो नकारः, आद्यद्वादश ऐकारस्तेन युक्तो नै इति । द्वितीयाद्यः ककारः । पञ्चमान्त्यो नकारः आद्यतृतीय इकारस्तद्युक्तस्तेन नि इति । सप्तमस्य द्वितीयो रेफः । पञ्चमाद्यस्तकारः, आद्यद्वितीय आकारस्तद्युक्तस्तस्य आद्यवर्गस्य पञ्चदशो बिन्दुस्तद्युक्तस्तेन तां इति । द्वितीयतृतीयो गकारः, प्रथमस्य द्वितीय आकारस्तद्युतस्तेन गा इति । सप्तमाद्यो यकारः । पञ्चमान्त्यो नकारः । षष्ठान्तिमो मकारः, आद्यत्रयोदश ओकारस्तद्युक्तस्तेन मो इति । सप्तमस्य द्वितीयो रेफः, आद्यपञ्चम उकारस्तेन रु इति । पञ्चमस्य तृतीयो द, आद्यसप्तमयोर्द्वितीयार्णेन आकाररेफेण युक्तस्तेन द्रा इति । सप्तमस्यादिमो यकारः । अष्टमस्याद्यः शकारः, प्रथमोपान्त्यो बिन्दुस्तद्युक्तस्तेन शं इति । षष्ठस्य चतुर्थो भकारः । सप्तमस्य चतुर्थार्णो वकारः, प्रथमैकादशान्वित एकारेण युक्तस्तेन वे इति ॥ तारमायाभ्यां पुटितः आद्रौ प्रणवस्तदनु हृल्लेखा । स्पष्टम् "ॐह्रींदक्षिणामूर्तये तुभ्यं वटमूलनिवासिने । ध्यानैकनिरताङ्गाय नमो रुद्राय शंभवेह्रींॐ ॥" तथा—

ऋषिः शुकः समुद्दिष्टश्छन्दोऽनुष्टुबुदाहृतम् । देवता जगतामादिर्दक्षिणामूर्तिरव्ययः ॥ १८ ॥
प्रणवो बीजमित्युक्तं हृल्लेखा शक्तिरीरिता । विनियोगः समुद्दिष्टः पुरुषार्थचतुष्टये ॥ १९ ॥
आद्रौ तु मूलमन्त्रेण करशुद्धिं समाचरेत् । रसनेत्राष्टकवसुबाणवह्निमितैः क्रमात् ॥ २० ॥
विभक्तैर्मन्त्रवर्णैस्तु तारमायादिकैः पुनः । षड्दीर्घभिन्नमायान्तैः षडङ्गानि प्रविन्यसेत् ॥ २१ ॥

रसाः षट् । नेत्रं द्वयं । वसवोऽष्टौ । बाणाः पञ्च । वह्नयस्त्रयः ।

मूर्ध्नि भाले दृशोः श्रोत्रगण्डयुग्मे च नासिके । आस्यदोःसन्धिषु गले स्तनहृन्नाभिमण्डले ॥ २२ ॥
कट्यां गुह्ये पुनः पादसन्धिष्ववर्णान् प्रविन्यसेत् । व्यापकं तारमायाभ्यां विन्यसेद्गणनायक ॥ २३ ॥
मूर्धादिपादपर्यन्तं ततो देवं विचिन्तयेत् । हिमाचलतटे रम्ये सिद्धकिन्नरसेविते ॥ २४ ॥
विविधद्रुमशाखाभिः सर्वतो वारितातपे । सुपुष्पितलताजालैराश्लिष्टकुसुमद्रुमैः ॥ २५ ॥
शिलाविवरनिर्गच्छन्निर्झरानिलशीतले । गायद्भृङ्गाङ्गनासङ्घैर्नृत्यद्बर्हिकदम्बकैः ॥ २६ ॥
कूजत्कोकिलसङ्घातैर्मुखरीकृतदिङ्मुखे । परस्परविनिर्मुक्तमात्सर्यमृगसेविते ॥ २७ ॥

आद्यैः शुकाद्यैर्मुनिभिरजस्रं समुपस्थिते । पुरन्दरमुखैर्देवैः सेवायातैर्निषेविते ॥ २८ ॥
वटवृक्षं महोच्छ्रायं पद्मरागलसोज्ज्वलम् । गारुत्मतमयैः पत्रैर्निबिडैरुपशोभितम् ॥ २९ ॥
नवरत्नमयाकल्पैर्लम्बमानैरलंकृतम् । जलजैः स्थलजैः पुष्पैरामोदिभिरलंकृतम् ॥ ३० ॥
गृणद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम् । संसारतापविच्छेदकुशलच्छायमद्भुतम् ॥ ३१ ॥
विचिन्त्य तस्य मूलस्थे रत्नसिंहासने शुभे । आसीनममिताकल्पं शरच्चन्द्रनिभाननम् ॥ ३२ ॥
स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः । संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम् ॥ ३३ ॥
रजताद्रिप्रतीकाशं दुग्धफेनामलच्छविम् । चन्द्रखण्डलसद्रम्यजटामुकुटमण्डितम् ॥ ३४ ॥
वीरासने समासीनं नासालोकानतत्परम् । सुप्रसन्नमुखाम्भोजं नयनत्रयशोभितम् ॥ ३५ ॥
दक्षिणोर्ध्वकरे टङ्कं व्याख्यामुद्रामधःकरे । वामोर्ध्वहस्ते हरिणं दधानं तदधःकरम् ॥ ३६ ॥
वामजानुनि विन्यस्य निविष्टं शुभ्रपङ्कजे । कक्षाबन्धविशेषोद्यत्फणिनाथैरलंकृतम् ॥ ३७ ॥
ध्यात्वैवं दक्षिणामूर्तिं मुनिवृन्दसमावृतम् । प्राक्प्रोक्ते पूजयेत्पीठे देवमावाह्य पूर्ववत् ॥ ३८ ॥
लिखेदष्टदलं पद्मं सर्वलक्षणसंयुतम् । अन्तर्बहिर्विभागेन कर्णिकाकेसरोज्ज्वलम् ॥ ३९ ॥
चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम् । अस्मिन् पीठे यजेद्देवं प्राग्वदङ्गानि पूजयेत् ॥ ४० ॥
प्रथमेऽष्टदले वत्स सनकं च सनन्दनम् । सनातनं चाथ सनत्कुमारं शुकमेव च ॥ ४१ ॥
जाबालिनं नारदं च व्यासमेतान्प्रपूजयेत् । (द्वितीयेऽनन्तसूक्ष्मादींस्तृतीये वृषभादिकान् ॥ ४२ ॥
वीथीद्वये लोकपालांस्तदस्त्राणि प्रपूजयेत् ।) ....॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शुकाय ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीदक्षिणामूर्तये देवतायै नमः । गुह्ये ॐबीजाय नमः । पादयोः ह्रींशक्तये नमः । इति विन्यस्य, मम चतुर्वर्गपुरुषार्थसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत् । ततो मूलमन्त्रेण करशुद्धिं कृत्वा, ॐह्रीं दक्षिणामूर्तये ह्रां हृदयाय नमः । ॐह्रीं तुभ्यं ह्रीं शिरसे स्वाहा । ॐह्रीं वटमूलनिवासिने ह्रूं शिखायै वषट् । ॐह्रीं ध्यानैकनिरताङ्गाय ह्रैं कवचाय हुं । ॐह्रीं नमो रुद्राय ह्रौं नेत्रत्रयाय वौषट् । ॐह्रीं शम्भवे ह्रः अस्त्राय फट् । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य, हृदयादिषडङ्गेष्वपि न्यसेत् । ततः शिरसि दंनमः । भाले क्षिं० । दक्षनेत्रे णां० । वामे मूं० । दक्षश्रोत्रे तं० । वामे यें० । दक्षगण्डे तुं० । वामे भ्यं० । नासायां वं० । मुखे टं । दक्ष बाहुमूले मूं० । मध्ये लं० । मणिबन्धे निं० । अंगुलिमूले वां० । वामबाहुमूले सिं० । मध्ये नें० । मणिबन्धे ध्यां० । अंगुलिमूले नैं० । गले कं० । स्तनयोः निं० । हृदि रं० । नाभौ तां० । कटौ गां० । गुह्ये यं० । दक्षोरुमूले नं० । जानुनि मों० । गुल्फे रुं० । पादांगुलिमूले द्रां० । वामोरुमूले यं० । जानुनि शं । गुल्फे भं० । पादांगुलिमूले वें नमः । इति विन्यस्य, (ॐह्रींमिति बीजद्वयेन मूर्धादिपादपर्यन्तं व्यापकं कृत्वा, ध्यात्वा प्राग्वच्चैवं पीठं सम्पूज्यावाह्य ध्यात्वावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य) प्रथमाष्टदले देवाग्रदलमारभ्य प्रादक्षिण्येन सनकाय नमः । सनन्दनाय० । सनातनाय० । सनत्कुमाराय० । शुकाय० । जाबालिने० । नारदाय० । व्यासाय० नमः । द्वितीये अनन्ताद्यांस्तृतीये वृषभादिकानभ्यर्च्य प्राग्वल्लोकपालादि सर्वं समापयेदिति ॥ तथा—

इत्थं देवं समभ्यर्च्य प्रजपेदयुताष्टकम् । पुरश्चरणसिद्ध्यर्थं यथोक्तनियमान्वितः ॥ ४३ ॥
जुहुयात्तद्दशांशेन तिलैः क्षीरपरिप्लुतैः । पायसेनाथ वा नन्दिन् सघृतेन द्वयेन वा ॥ ४४ ॥
तर्पणादि ततः कुर्याद्यथोक्तेन विधानतः । एवं सिद्धे मनौ मन्त्री प्रयोगानाचरेदथ ॥ ४५ ॥
मासमेकं च भिक्षाशी सहस्रं साष्टकं जपेत् । मन्त्रं प्रतिदिनं मन्त्री वैदुष्यं लभते ध्रुवम् ॥ ४६ ॥
मूलमन्त्रेण पुटितां मातृकां मन्त्रवित्तमः । जलं स्पृष्ट्वा त्रिधा जप्य पिबेदब्दाद्बुधो ध्रुवम् ॥ ४७ ॥

अखिलानां च शास्त्राणां व्याख्याता च महाकविः । गजपिप्पलिकाब्राह्मीवचासर्षपसैन्धवैः ॥ ४८ ॥
सुगन्धिद्रव्यसंयुक्तैर्नन्दिकेश्वर कल्कितैः । तत्कल्कसहिते ब्राह्मीरसे पक्वं च गोघृतम् ॥ ४९ ॥
अनेन मन्त्रवर्येण प्रजप्तमयुतावधि । एतत्संसेवितं कीर्तिकविताश्रीधृतिप्रदम् ॥ ५० ॥
कान्तिरक्षायुष्करं च गदितं सर्वसिद्धिकृत् । ....॥

इति ॥ तथा मन्त्रान्तरम्—

त्रयोदशार्णमुद्धृत्य प्रथमस्य गणाधिप । तस्य पञ्चदशार्णेन संयुक्तं पञ्चमस्य तु ॥ १ ॥
पञ्चमार्णं ततो वत्स षष्ठस्यान्तं ततो वदेत् । आद्यत्रयोदशार्णेन संयुक्तं तदन्तरम् ॥ २ ॥
(षष्ठस्य तु चतुर्थोऽर्णो द्वितीयस्य तृतीयकः । सप्तमान्त्यं तथोच्चार्य पञ्चमाद्यं समुच्चरेत् ॥ ३ ॥
आद्यद्वादशसंयुक्तं पूर्वमन्त्रादिवर्णतः । षडक्षराणि चोच्चार्य षष्ठस्यान्त्यं तथोच्चरेत् ॥ ४ ॥
अष्टमान्त्यं सप्तमाद्यसमेतं नन्दिकेश्वर । प्रथमोपान्त्यसहितं ततः षष्ठस्य पञ्चमम् ॥ ५ ॥
आद्यैकादशसंयुक्तं पञ्चमस्य चतुर्थकम् । आद्यद्वितीयोपान्त्याभ्यां संयुक्तं तदन्तरम् ॥ ६ ॥
षष्ठस्याद्यं सप्तमस्य द्वितीयेन समन्वितम् । सप्तमाद्यं ततो वत्स तृतीयस्य द्वितीयकम् ॥ ७ ॥
सघनं चाष्टमस्याथ तृतीयं सप्तमान्त्युक् । आद्यद्वितीययुक्तं च ततोऽन्त्यस्यान्त्यमक्षरम् ॥ ८ ॥
आद्यद्वितीय संयुक्तं मन्त्रो द्वाविंशदक्षरः । ....॥

इति ॥ अस्यार्थः— प्रथमस्य त्रयोदशार्ण ओकारः, तस्य प्रथमस्य पञ्चदशार्णो बिन्दुस्तद्युक्तस्तेन ॐ इति । पञ्चमस्य पञ्चमार्णो नकारः । षष्ठस्यान्तो मकारः, आद्यत्रयोदशार्ण ओकारस्तेन मो इति । षष्ठस्य चतुर्थार्णो भकारः, द्वितीयस्य तृतीयो गकारः । सप्तमान्त्यं वकारः । पञ्चमाद्यस्तकारः, आद्यैकादश एकारस्तद्युक्तं तेन ते इति । पूर्वमन्त्रादितः । षडक्षराणि (पूर्वोद्धृतद्वात्रिंशदक्षरमन्त्रस्य प्रणवमायाबिधुरस्य आदितो दकारमारभ्य षडक्षराणि) दक्षिणामूर्तये इत्येवंरूपाणि । षष्ठस्यान्तं मकारः । अष्टमान्त्यं हकारः, सप्तमाद्यो यकारः, प्रथमोपान्त्यो बिन्दुस्ताभ्यां युक्तं ह्यं इति । षष्ठपञ्चमो मकारः, (आद्यैकादश ए तद्युक्तस्तेन मे इति) । पञ्चमस्य चतुर्थो धकारः, आद्यद्वितीय आ, उपान्त्यो बिन्दुस्ताभ्यां युक्तस्तेन धां इति । षष्ठस्याद्य पकारः, सप्तमस्य द्वितीयो रेफस्तद्युक्तस्तेन प्र इति । सप्तमाद्यं यकारः । तृतीयद्वितीयं छकारः, सघनं सप्रयत्नोच्चार्यं द्वित्वद्योतकोच्चार्यमित्यर्थः, तेन च्छ इति । अष्टमस्य तृतीयः सकारः सप्तमान्त्यं वकारः, आद्यद्वितीय आकारस्तद्युक्तस्तेन स्वा इति । अन्त्यस्याष्टमस्यान्त्यं हकारः, आद्यद्वितीय आकारस्तेन युक्तं हा इति । स्पष्टं तु "ॐनमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रयच्छ स्वाहा" ॥ अत्र केचिदस्मिन्मन्त्रे मेधामिति पदं त्यक्त्वा तत्स्थाने प्रज्ञामिति पदं वदन्ति । "मेधास्थाने सूरयोऽन्ये प्रज्ञापदमथोचिरे ।" इति मन्त्रतन्त्रप्रकाशवचनात ॥ तथा—

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छन्द ईरितम् । देवता श्रीमहादेवो दक्षिणामूर्तिसंज्ञकः ॥ ९ ॥
प्रणवः प्रोच्यते बीजं स्वाहा शक्तिरिति स्मृता । मेधापदं कीलकं स्यात्पुरुषार्थे नियोज्यते ॥ १० ॥
तारुद्धस्वरैर्दीर्घैः षड्भिरङ्गानि कल्पयेत् । शिरोभ्रूमध्यवक्त्रेषु हृदि नाभौ च गुह्यके ॥ ११ ॥
जान्वोश्चरणयोर्न्यस्येत् पदानि क्रमशः सुधीः । मूर्ध्नि पश्चाल्ललाटे च चक्षुषोः श्रोत्रयोस्तथा ॥ १२ ॥
नासापुटद्वये पश्चादोष्ठयोर्दन्तयोरपि । जिह्वायां चिबुकाग्रे च अंसयोर्युगले गले ॥ १३ ॥
बाह्वोश्च हृदये चैव नाभौ गुह्ये गुदे तथा । ऊर्वोर्जान्वोश्च जङ्घायां पादपाणियुगे तथा ॥ १४ ॥
सर्वाङ्गेषु च विन्यस्येन्मन्त्रवर्णानतन्द्रितः । एवं न्यस्ततनुर्मन्त्री ध्यायेद्देवमनन्यधीः ॥ १५ ॥
अकलङ्कशरच्चन्द्रनिभमम्भोजमध्यगम् । गङ्गाधरं लसच्चन्द्रकलोल्लासितशेखरम् ॥ १६ ॥
प्रसन्नवदनाम्भोजं त्रिनेत्रं सस्मिताननम् । दिव्याम्बरधरं दिव्यगन्धमाल्यैरलंकृतम् ॥ १७ ॥

नानारत्नमयाकल्पमहिकक्ष्याविभूषितम् । मुक्ताक्षमालां दक्षोर्ध्वे ज्ञानमुद्रामधःकरे ॥ १८ ॥
वामोर्ध्वे च सुधाकुम्भं पुस्तकं तदधःकरे । दधानं चिन्तयेन्नन्दिन् मुनिवृन्दनिषेवितम् ॥ १९ ॥
सहस्रारशिरःपीठलसद्वामाङ्घ्रिपङ्कजम् । एवं ध्यात्वा गणश्रेष्ठ पूर्वोक्ते शैवपीठके ॥ २० ॥
पद्मत्रयसमोपेते भूगृहत्रितयान्विते । चतुर्द्वारसमायुक्ते देवमावाह्य पूजयेत् ॥ २१ ॥
(आदावङ्गानि सम्पूज्य केसरेषु यथा पुरा । स्वरान् षोडश तत्रैवं द्वन्द्वशः केसरस्थितान् ॥ २२ ॥
यजेद्वर्गाष्टकं पश्चादष्टपत्रेषु मन्त्रवित् । द्वितीयेऽष्टदले वत्स सरस्वत्यादिकान् यजेत् ॥ २३ ॥)
सरस्वती चतुर्वक्त्रः सनकश्च सनन्दनः । सनातनस्ततो वत्स सनत्पूर्वः कुमारकः ॥ २४ ॥
शुको व्यासश्च सम्पूज्य तृतीयेऽष्टदले पुनः । पार्वती सुभगा भद्रा क्रिया शान्तिस्तथैव च ॥ २५ ॥
रौद्री काली वल्लभेति दक्षिणामूर्तिशक्तयाः । चतुरस्रचतुष्कोणेष्वग्न्यादीशान्तमर्चयेत् ॥ २६ ॥
सिद्धगन्धर्वयोगीन्द्रविद्याधरगणानपि । इन्द्रादींश्च तदस्त्राणि प्राग्वद्वीथीद्वये यजेत् ॥ २७ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसे ब्रह्मणे ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीदक्षिणामूर्तये देवतायै नमः । गुह्ये प्रणवबीजाय नमः । पादयोः स्वाहाशक्तये नमः । नाभौ मेधाकीलकाय नमः । इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगः, इति कृताञ्जलिर्वदेत् । ततः—ॐआंॐ हृदयाय नमः । ॐईंॐ शिरसे स्वाहा । ॐऊंॐ शिखायै वषट् । ॐऐंॐ कवचाय हुं । ॐऔंॐ नेत्रत्रयाय वौषट् । ॐअःॐ अस्त्राय फट् । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत् । ततः—शिरसि ॐनमः । भ्रूमध्ये नमो नमः । वक्त्रे भगवते० । हृदि दक्षिणामूर्तये० । नाभौ मह्यं० । गुह्ये मेधां० । जान्वोः प्रयच्छ० । पादयोः स्वाहा० ॥ शिरसि ॐनमः । ललाटे नं० । नेत्रयोः मों० । कर्णयोः भं० । नासापुटद्वये गं० । ओष्ठयोः वं० । दन्तपङ्क्त्योः तें० । जिह्वायां दं० । चिबुकाग्रे क्षि० । अंसयोः णां० । गले मूं० । बाह्वोः तं० । हृदये यें० । नाभौ मं० । गुह्ये ह्यं० । गुदे में० । ऊर्वोः धां० । जान्वोः प्रं० । जङ्घयोः यं० । पादयोः च्छं० । पाण्योः स्वां० । सर्वाङ्गे हां नमः । इति विन्यस्य, प्राग्वद् ध्यानादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्य, प्रथमाष्टदलकेसरेषु अंआं नमः । इंईं नमः । उंऊं नमः । ऋंॠं नमः । लृंलॄं नमः । एंऐं नमः । ओंऔं नमः । अंअः नमः । इति प्रादक्षिण्येन देवाग्रमारभ्य सम्पूज्य, तद्दलेषु कंखंगंघंङं नमः । चंछंजंझंञं नमः । टंठंडंढंणं नमः । तंथंदंधंनं नमः । पंफंबंभंमं नमः । यंरंलंवं नमः । शंषंसंहं नमः । ळंक्षं नमः । इति सम्पूज्य, द्वितीयाष्टदले—सरस्वत्यै नमः । ब्रह्मणे० । सनकाय० । सनन्दनाय० । सनातनाय० । सनत्कुमाराय० । शुकाय० । व्यासाय० तृतीयाष्टदले तथैव—पार्वत्यै नमः । सुभगायै० । भद्रायै० । क्रियायै० । शान्त्यै० । रौद्र्यै० । काल्यै० । वल्लभायै० । इति सम्पूज्य, (चतुरस्रचतुष्कोणयोरन्तरालस्थकोणचतुष्के अग्नेयादि सिद्धगणेभ्यो नमः । गन्धर्वगणेभ्यो० । योगीन्द्रगणेभ्यो० । विद्याधरगणेभ्यो० । इति सम्पूज्य,) प्राग्वल्लोकपालार्चादि सर्वं समापयेदिति ॥ तथा—

एकलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्तथा । क्षीरप्लुतैस्तिलैः पद्मैः पायसैर्वा घृतप्लुतैः ॥ २८ ॥
तर्पणादि ततः कुर्याद्यथोक्तविधिना सुधीः । मन्त्रवर्यं प्रसाध्यैवं काम्यकर्माणि साधयेत् ॥ २९ ॥
कण्ठमात्रोदके स्थित्वा जपेन्मन्त्रं सहस्रकम् । प्रत्यहं मण्डलादर्वाक् कवीनामग्रणीर्भवेत् ॥ ३० ॥
पञ्चविंशतिधा जप्तमन्नं पायसमेव च । भक्षितं शीर्षसंसिक्तं परं वाक्सिद्धिकारकम् ॥ ३१ ॥
सर्वापन्नाशनं चैव सर्वरोगविनाशनम् । त्रयोदश्यां प्रदोषेषु सोपवासः शिवालयम् ॥ ३२ ॥
मौनी गत्वार्चयेद् देवं विद्यायुर्वृद्धयेऽनघ । आज्येन पायसान्नेन वाक्कामः सर्वदा हुनेत् ॥ ३३ ॥
श्रीकामः पद्मैर्बिल्वैर्वा नन्द्यावर्तैः सदा हुनेत् । आज्यक्षीराक्तदूर्वाभिर्हुत्वा दद्याच्च दक्षिणाम् ॥ ३४ ॥
गुरवे गां च महिषीं तस्य मृत्युभयं कुतः । आदित्याभिमुखो भूत्वा दद्याज्जलाञ्जलीन् दश ॥ ३५ ॥

मूलमन्त्रेण मन्त्रज्ञः सर्वदोषैर्न बाध्यते । प्रातः सायं च सप्तैव मध्याह्ने चैकविंशतिम् ॥ ३६ ॥
दुग्धबुद्ध्या जलैर्देवं तर्पयेदर्चयेद्बुधः । पलाशपुष्पैरचिरात्कविर्होमादिभिर्भवेत् ॥ ३७ ॥
गौर्या पार्श्वस्थया सार्धं श्रीकामं चिन्तयेत्प्रभुम् । अयुतं प्रजपेन्मन्त्रं भूयसीं श्रियमाप्नुयात् ॥ ३८ ॥
भुञ्जानः प्रयतो मन्त्री गोमूत्रे पक्वमोदनम् । भिक्षान्नमथवा मन्त्रमयुतद्वितयं जपेत् ॥ ३९ ॥
अश्रुतादृष्टशास्त्राणि व्याचष्टे नात्र संशयः । पद्मं दशदलं कृत्वा तारं तत्कर्णिकान्तरे ॥ ४० ॥
साध्याख्याकर्मसंयुक्तं विलिखेन्नन्दिकेश्वर । पत्रेषु मन्त्रसम्भूतानर्णान् द्विद्विलिखेत्क्रमात् ॥ ४१ ॥
अन्त्यमन्त्ये समालिख्य वेष्टयेन्मातृकाक्षरैः । यन्त्रं श्रीदक्षिणामूर्तेः साधितं विधिवन्नृणाम् ॥ ४२ ॥
अपस्मारग्रहादीनां नाशनं धारणाद्भवेत् । .... ॥

इति ॥ अस्यार्थः—दशदलं पद्मं कृत्वा तत्कर्णिकायां प्रणवं विलिख्य, तन्मध्ये "देवदत्तं रक्ष रक्ष" इति साध्यनाम विलिख्य, तत्पत्रेषु द्विद्विर्मन्त्रवर्णानालिख्यान्त्यदले वर्णत्रयं लिखित्वा, बहिर्वृत्तद्वयं कृत्वा तयोरन्तरालवीथ्यां प्रागादिप्रादक्षिण्येनाकारादिक्षकारान्तां सबिन्दुकां मातृकां विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ तथा—

पद्ममष्टदलं कृत्वा मध्ये साध्यं समालिखेत् । किञ्जल्केषु स्वरान्नन्दिन्द्वन्द्वशस्तु समालिखेत् ॥ ४३ ॥
तारमाद्यदले नन्दिन् वर्णत्रयविभागशः । आलिख्य विलिखेत्पश्चाद्वर्णत्रयविभागशः ॥ ४४ ॥
शिष्टपत्रेषु मन्त्रस्य शिष्टवर्णान् समालिखेत् । बहिर्वृत्तद्वयं कृत्वा अन्तराले तयोर्लिखेत् ॥ ४५ ॥
कादिक्षान्तान् सबिन्दूंश्च बहिर्भूबिम्बमालिखेत् । प्रधानदिक्षु तस्याथ सप्तमान्त्यं समालिखेत् ॥ ४६ ॥
प्रथमोपान्त्यसंयुक्तं चतुर्थं स्याद् द्वितीयकम् । कोणेषु विलिखेच्चैतद्यन्त्रं सर्वार्थसाधकम् ॥ ४७ ॥
पुत्रपौत्रप्रदं नृणामायुःश्रीविजयप्रदम् । कृत्यापस्मारभूतादिनाशनं सर्वकामदम् ॥ ४८ ॥

इति ॥ अस्यार्थः—अष्टदलपद्मं कृत्वा तत्कर्णिकायां ससाध्यं नाम समालिख्य किञ्जल्केषु द्विशः स्वरान् सबिन्दूनालिख्य, प्रथमदले प्रणवं अकार-उकारमकारभेदेन विभज्य विलिख्य, सप्तसु दलेषु मन्त्रस्यैकविंशतिवर्णांस्त्रिशस्त्रिशः समालिख्य वृत्तान्तरालवीथ्यां कादिवर्णानालिख्य भूपुरस्य दिक्षु च कोणेषु वमिति विलिखेत् । एतदुक्तफलदं भवति ॥ तथा नन्दिकेश्वरमते—मन्त्रान्तरम् ।

शृणु नन्दिन् प्रवक्ष्यामि मन्त्रमन्यन्नवाक्षरम् । देवस्य दक्षिणामूर्तेः सर्वज्ञत्वप्रदायकम् ॥ १ ॥
आद्यत्रयोदशार्णं तु तस्य पञ्चदशान्वितम् । उद्धृत्य पुनराद्यस्य प्रथमार्णं समुद्धरेत् ॥ २ ॥
स एव प्रथमवर्गस्य पञ्चदशसमन्वितः । पञ्चाक्षरमनुं पश्चादाद्यवर्णद्वयं पुनः ॥ ३ ॥
व्युत्क्रमेण वदेन्नन्दिन् मन्त्रः प्रोक्तो नवाक्षरः । ....॥

आद्यत्रयोदशार्णं ओकारः, तस्य पञ्चदशो बिन्दुस्तेन प्रणवो जातः । आद्यस्य प्रथमार्णोऽकार, स पञ्चदशार्णेन बिन्दुना समन्वितः तेन अं इति । पञ्चाक्षरमनुः पूर्वोक्तशिवपञ्चाक्षरः । आद्यवर्णद्वयं प्रणवाकारौ व्युत्क्रमेण अंकारप्रणवक्रमेण । तथा——

ऋषिः शुकः समाख्यातोऽनुष्टुप्छन्द उदाहृतम् । देवता जगतामादिर्दक्षिणामूर्तिरव्ययः ॥ ४ ॥
तारेण हृदयं प्रोक्तमंकारेण शिरः स्मृतम् । शिखा नमःपदेन स्याच्छिवाय कवचं मतम् ॥ ५ ॥
अंकारेण च नेत्रं स्यादस्त्रं तारेण विन्यसेत् । ध्यानम्——

मुद्रापुस्तकवह्निनागविलसद्बाहुं प्रसन्नाननं
मुक्ताहारविभूषणं मणिरुचा भास्वत्किरीटोज्ज्वलम् ।
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं
न्यग्रोधोपनिवासिनं परगुरुं ध्यायेदभीष्टाप्तये ॥ ६ ॥

इति ध्यात्वा यजेद्देवं शैवे पीठे पुरोदिते । पञ्चाक्षरोक्तविधिना पुरश्चर्यादिकं तथा ॥ ७ ॥
एवं यो भजते मन्त्रं सर्वज्ञो भवति ध्रुवम् । .... ॥

इति ॥ अथ प्रयोगः—तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शुकाय ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीदक्षिणामूर्तये देवतायै नमः । इति विन्यस्य, प्राग्वद्विनियोगमुक्त्वा, ॐ हृदयाय नमः । अं शिरसे० । नमः शिखायै० । शिवाय कवचाय० । अं नेत्रत्रयाय वौषट् । ॐ अस्त्राय फट् । इति करषडङ्गन्यासं कृत्वा ध्यानमानसपूजान्ते पञ्चाक्षरवत् सर्वं कुर्यात् ॥ तथा—

आद्यद्वादशवर्णं तु तस्योपान्त्येन संयुतम् । पञ्चमं पञ्चमस्याथ षष्ठस्यापि च पञ्चमम् ॥ १ ॥
प्रथमस्यान्त्यसंयुक्तं द्वितीयप्रथमं ततः । सप्तमस्य तृतीयस्थं प्रथमस्य तुरीययुक् ॥ २ ॥
प्रथमोपान्त्ययुक्तञ्च अष्टमस्याद्यमक्षरम् । तृतीयोपेतमाद्यस्य सप्तमस्य तुरीयकम् ॥ ३ ॥
आद्यद्वितीयसंयुक्तं सप्तमस्याद्यमक्षरम् । अष्टमस्य तृतीयं तु आद्योपान्त्याद्यसंयुतम् ॥ ४ ॥
तदन्त्यसहितं नन्दिन्ताराद्योऽयं नवाक्षरः । तत्र स्नेहान्मया नन्दिन् कथितः सर्वसिद्धिदः ॥ ५ ॥

आद्यद्वादश ऐ, तस्योपान्त्यो बिन्दुस्तेन युक्त ऐं इति । पञ्चमस्य पञ्चमो नकारः । षष्ठस्य पञ्चमं मकारः, प्रथमोपान्त्यो विसर्गस्तद्युक्तस्तेन मः । द्वितीयप्रथमं क, सप्तमस्य तृतीयस्थं लकारोपरि स्थितं, प्रथमस्य तुरीय ईकारः, प्रथमोपान्त्यो बिन्दुस्तेनापि युक्तम्, एतेन कामबीजमुद्धृतम् । अष्टमस्याद्यं शकारः आद्यस्य तृतीयं इकारस्तेन शि । सप्तमस्य तुरीयं वकारः, आद्यद्वितीय आकारस्तेन वा । सप्तमस्याद्यं यकारः । अष्टमस्य तृतीयं सकारः आद्योपान्त्याद्य औ, तदन्त्यो विसर्गः, ताभ्यां युक्तस्तेन सौः इति । ताराद्यः प्रणवाद्यः ॥ तथा—

मुन्याद्याः पूर्वमुद्दिष्टाः पदैः षड्भिः षडङ्गकम् । ध्यायेत्पूर्ववद्देवेशं वामार्धदयितं शिवम् ॥ ६ ॥
यजेत्पूर्वोदिते पीठे पञ्चाक्षरविधानतः । पुरश्चरणकृत्यं च पूर्वोक्तं नन्दिकेश्वर ॥ ७ ॥
पूर्वमन्त्रोदितान् कुर्यात्प्रयोगान् साधकोत्तमः । ....॥

पूर्वोक्तमिति पञ्चाक्षरोक्तम् । पूर्वमन्त्रोदितान् दक्षिणामूर्तिप्रकरणोदितान् । ओं हृत् । ऐं शिरः । नमः शिखा । क्लीं कवचं । शिवाय नेत्रं । सौः अस्त्रं । अन्यत्सुगमम् ॥ तथा—

दक्षिणामूर्तये प्रोक्त्वा विद्महे तु ततो वदेत् । ध्यानस्थिताय धीशब्दं महि तन्नो वदेत्ततः ॥ ८ ॥
धीरः प्रचोदयादेषा गायत्री नन्दिकेश्वर । ....॥

इति ॥ नन्दिकेश्वरमते—मृत्युञ्जयस्य मन्त्रः ।

अथ मृत्युञ्जयं मन्त्रं कथयामि तवानघ । आद्यत्रयोदशोपान्त्यस्वरावृद्धृत्य नन्दिक ॥ १ ॥
ततस्तृतीयवर्गस्य तृतीयं चाद्यषष्ठयुक् । तदुपान्त्यस्वरारूढमष्टमस्य तृतीयकम् ॥ २ ॥
आद्यान्त्यवर्णसंयुक्तं तृतीयवर्गमुद्धरेत् । एष मृत्युञ्जयो मन्त्रः प्रोक्तो मृत्युभयापह ॥ ३ ॥

आद्यत्रयोदश ओ, उपान्त्यो बिन्दुस्तेन प्रणवो जातः । तृतीयवर्गस्य तृतीयं जकारः, आद्यषष्ठं ऊ, तदुपान्त्यो बिन्दुस्ताभ्यां युक्तस्तेन जूं इति । अष्टमस्य तृतीयं स, आद्यान्त्यो विसर्गस्तेन सः ॥

ऋषिः कहोलो देव्यादिगायत्री च्छन्द ईरितम् । देवतास्य मनोः प्रोक्तं शिवो मृत्युञ्जयाभिध ॥ ४ ॥
प्रणवो बीजमित्युक्तं सः शक्तिरिति कीर्तिता । षड्दीर्घयुक्तेनान्त्येन षडङ्गानि प्रकल्पयेत् ॥ ५ ॥
आधारहृच्छिरःस्वेवं न्यसेद्वर्णत्रयं ततः । ध्यायेद् देवं ततो वत्स समाहितमनाश्चिरम् ॥ ६ ॥
शुद्धस्फटिकसङ्काशं शुभ्रपद्मासने स्थितम् । कपर्दमौलिविलसच्चन्द्रखण्डच्युतामृतैः ॥ ७ ॥
अभिषिक्तसमस्ताङ्गमर्केन्द्वनललोचनम् । दक्षिणोर्ध्वकरे मुद्रां ज्ञानाख्यां तदधःकरे ॥ ८ ॥
अक्षमालां च वामोर्ध्वे पाशं वेदमधःकरे । दधानं चिन्तयेद् देवं मृत्युरोगभयापहम् ॥ ९ ॥

इति ध्यात्वार्चयेत्पीठे शैवे पूर्वसमीरिते । अष्टपत्राम्बुजे वत्स चतुरस्रत्रयावृते ॥ १० ॥
अर्चनाङ्गेन्द्रवज्राद्यैरावृतित्रयसंयुता । ....॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते, शिरसि कहोलाय ऋषये नमः । मुखे देवीगायत्रीछन्दसे नमः । हृदि श्रीमृत्युञ्जयाय देवतायै नमः । गुह्ये ॐ बीजाय नमः । पादयोः सः शक्तये नमः । इति विन्यस्य, ममेष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा सांसींसूंसैंसौंसः इति करषडङ्गन्यासं कृत्वा, मूलाधारे ॐनमः । हृदये जूं नमः । शिरसि सः नमः । इति विन्यस्य ध्यानादिपुष्पोपचारान्ते प्रागवदङ्गानि सम्पूज्य लोकपालपूजादिसर्वं प्राग्वत् समापयेदिति । अत्र पूजामण्डलं चतुरस्रत्रयवेष्टितमष्टदलं ज्ञेयम् । अष्टदलेषु दिक्पालान् चतुरस्रे तदायुधानि पूजयेत् ॥ तथा—

लक्षत्रयं जपेन्मन्त्रममृताशकलैर्हुनेत् । क्षीराप्लुतैस्तर्पणादि ततो नन्दिन् समाचरेत् ॥ ११ ॥
एवं सिद्धे मनौ नन्दिन् प्रयोगानाचरेत्ततः । तारनालं मध्यपत्रमन्त्यमध्यं च सम्पुटे ॥ १२ ॥
पद्मयुग्मं तदन्तःस्थमात्मानं चिन्तयेच्छिवम् । संस्रवद्वर्णपीयूषधारासिक्तकलेवरम् ॥ १३ ॥
अनेन योगेन भवेद् दीर्घायुश्च निरामयः । ....।

अयमर्थः—ॐकारनालस्य जूंकारपत्राष्टकस्य सःकारकर्णिकस्य सम्पुटितस्य पद्मद्वयस्य मध्ये समासीनं मन्त्रवर्णत्रयनिर्गच्छदमृतधाराप्लावितसर्वगात्रं शिवात्मानं चिन्तयेदित्यर्थः ॥ तथा—

वेदांगुलमितैर्नन्दिन् गुडूचीशकलैर्हुनेत् । पयःपरिप्लुतैरर्कसहस्रं विजितेन्द्रियः ॥ १४ ॥
आरोग्यायुर्यशोलक्ष्मीरचिराल्लभते ध्रुवम् । (अमृताशकलैर्दुग्धसंप्लुतैश्चतुरंगुलैः ॥ १५ ॥
सहस्रद्वादशमितं जुहुयादेधितेऽनले । यावत्संख्यं जुहोत्येवं साधको नन्दिकेश्वर ॥ १६ ॥
तावत्संख्यैः सुधाकुम्भैरग्नि प्रीणाति शङ्करम् । आप्यायितोऽग्निना रुद्रः प्रदद्यात्साधकेप्सितान् ॥१७॥
गुडूचीशकलान् नन्दिन् समिधो वटवृक्षजाः । तिला दूर्वाः पयः सर्पिः पायसं च गणाधिप ॥ १८ ॥
इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरम् । क्रमाद् दशशतं नित्यमष्टोत्तरमतन्द्रितः ॥ १९ ॥
सप्ताधिकान् द्विजान् नित्यं भोजयेन्मधुरान्वितैः । विविधैः स्वादुभिर्भोज्यैरन्नपानादिकैर्गण ॥ २० ॥
विकारानुगुणान् नन्दिन् वर्धयेद्धोमवासरान् । होतृभ्यो दक्षिणां दद्यादरुणां गां पयस्विनीम् ॥ २१ ॥
गुरुं सम्प्रीणयेन्नन्दिन् धनाद्यैर्देवताधिया । अनेन विधिना साध्यः कृत्यारोगज्वरादिभिः ॥ २२ ॥
विमुक्तः सुचिरं जीवेच्छरदां शतमञ्जसा । अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोगदे ॥ २३ ॥
असाध्यरोगे क्ष्वेडार्तौ मोहे दाहे महाभये । होमोऽयं शान्तिदः प्रोक्तः सर्वसंपत्प्रदायकः ॥ २४ ॥
अथ त्रिजन्मदिवसे द्रव्यैः सप्तभिरादरात् । पृथक् शतं हुनेन्मन्त्री मधुरैर्भोजयेद् द्विजान् ॥ २५ ॥
दीर्घमायुरवाप्नोति नियमेन न संशयः । अथवा सप्तभिर्द्रव्यैर्जन्मर्क्षे जुहुयात्सुधीः ॥ २६ ॥
पृथक् सहस्रं तेन स्यान्निरुपद्रवमुत्तमम् । दीर्घमायुरवाप्नोति नात्र कार्या विचारणा ॥ २७ ॥
पयोक्तदूर्वात्रितयैर्हुनेदेकादशाहुतीः । दिनशः सोऽपमृत्युं च रोगाञ्जित्वाचिरादसौ ॥ २८ ॥
दीर्घमायुश्च लभते मन्त्रशास्त्रविशारदः । त्रिजन्मसु सुधावल्लीकाश्मरीबकुलोद्भवैः ॥ २९ ॥
समिद्वरैः कृतो होमः सहस्रेण पृथक्पृथक् । अपमृत्युहरो नन्दिन् सर्वरोगान् विनाशयेत् ॥ ३० ॥
सिद्धार्थैर्विहितो होमो महाज्वरविनाशनः । अपामार्गसमिद्धोमस्त्वपमृत्युगदापहः ॥ ३१ ॥
लिखेदष्टदलं पद्मं तारं मध्ये ससाध्यकम् । दिक्पत्रेषु द्वितीयार्णं विदिक्स्थेषु तृतीयकम् ॥ ३२ ॥
दिक्षु भूमण्डलस्याथ सप्तमान्तं सबिन्दुकम् । विदिक्षु च चतुर्थस्य द्वितीयं बिन्दुभूषितम् ॥ ३३ ॥
यन्त्रं मृत्युंजयस्येदं जपहोमादिसाधितम् । धृतं मूर्ध्न्यथवा कण्ठे बाहौ कट्यां प्रकोष्ठके ॥ ३४ ॥
ग्रहरोगविषादीनां नाशनं मृत्युमञ्जनम् । कीर्तिवश्येन्दिराकान्तिपुत्रदं नात्र संशयः ॥ ३५ ॥

इति ॥ अस्यार्थः—अष्टदलपद्मं विरच्य तत्कर्णिकायां प्रणवं तन्मध्ये साध्यनाम विलिख्य, तस्य दिक्पत्रेषु जूं इति विलिख्य, कोणपत्रेषु सः इति लिखित्वा, बहिश्चतुरस्रं कृत्वा तस्य दिक्षु—वं, कोणेषु—ठं, इति लिखित्वोक्तविधिना बिभृयादुक्तफलदं भवति ॥ अथाघोरास्त्रमन्त्रः । तत्रश्रीकण्ठसंहितायाम्—

अथाघोरमनुं वक्ष्ये सर्वशत्रुनिसूदनम् । सर्वदुष्टग्रहव्याधिनाशनं जगदीश्वरि ॥ १ ॥
रेवती नकुलाक्रान्ता लोलाक्षी श्रीमुखीयुता । भृग्वाक्रान्ता कुर्दिनी च वर्तुलाक्षीयुतः प्रिये ॥ २ ॥
रेवती च पुनश्चैतद्द्वयं प्रादि च तद्द्वयम् । शिवोत्तमः सद्ययुक्तो रेवती तद्द्वयं तर ॥ ३ ॥
तनुरूपपदं देवि चटयुग्मं प्रपूर्वि तत् । क्रोधीशो नकुलीशश्च पुनरेतद्द्वयं शिवे ॥ ४ ॥
वमयुग्मं बन्धयुग्मं घातयद्वितयं ततः । वर्मास्त्रान्तो मनुर्देवि एकपञ्चाशदक्षरः ॥ ५ ॥

इति । रेवती रेफः, नकुलाक्रान्ता हकाराधःस्थिता, लोलाक्षी ईकारः, श्रीमुखी बिन्दुस्ताभ्यां युक्तस्तेन ह्रीं । भृगुः सकारः, तदाक्रान्ता कुर्दिनी तदधःस्थः फकारः, वर्तुलाक्षी उकारस्तेन युता, तेन स्फु । रेवती रेफः । पुनरेतद्द्वयं स्फुर इति । प्रादि च तद्द्वयं प्रस्फुर प्रस्फुर इति । चकाराद्वीप्सा लभ्यते । शिवोत्तमो घकारः, सद्ययुक्त ओकारेण युतस्तेन घो । रेवती रेफः । पुनरेतद्द्वयं घोर इति । तर स्वरूपं । तनुरूप स्वरूपं । चटयुग्मं चटचट इति । प्रपूर्वि तत् चटयुग्मं प्रपूर्वकं च तेन प्रचट प्रचट इति । क्रोधीशः क । नकुलीशो ह । पुनरेतद्द्वयं कह इति । वमयुग्मं वमवम । बन्धयुग्मं बन्धबन्ध इति । घातयद्वितयं घातय घातय । वर्म हुं । अस्त्र फट् । इति (वर्णाः ५१) ॥ तथा—

अघोरोऽस्य ऋषिः प्रोक्तस्त्रिष्टुप्छन्दः समीरितम् । अघोररुद्रो देवता स्याद्धुंबीजं देवि कीर्तितम् ॥ ६ ॥
शक्तिश्च शक्तिबीजं स्यात्पुरुषार्थचतुष्टये । विनियोगो भवेद् देवि षडङ्गं विन्यसेत्ततः ॥ ७ ॥
शरर्तुदशदिग्दन्तिदिवाकरमितैः क्रमात् । पदान्येकादश मनोरेषु स्थानेषु विन्यसेत् ॥ ८ ॥
शिरोनेत्रवक्त्रगलहृन्नाभ्यन्धूरुजानुषु । सजङ्घापादयोश्चैवं पदानि परमेश्वरि ॥ ९ ॥
शरर्तुनेत्रवस्वब्धिरसवेदाब्धिवेदकैः । रसनेत्रमितैर्वर्णैः पदानि स्युर्महेश्वरि ॥ १० ॥

इति । षडङ्गन्यासे वर्णविभागमाह—शर इत्यादि । शराः ५ ऋतवः ६ दश १० दिक् १० दन्तिनः ८ दिवाकराः १२ ॥ पदेषु वर्णविभागमाह—शर इत्यादि । शराः ५ ऋतवः ६ नेत्रं २ वसवः ८ अब्धयः ४ रसाः ६ वेदाः ४ अब्धयः ४ वेदाः ४ रसाः ६ नेत्रं २ ॥ तथा—

एवं न्यस्ततनुर्मन्त्री ध्यायेद् देवं प्रसन्नधीः । कालमेघनिभं देवं भीमदंष्ट्रं त्रिलोचनम् ॥ ११ ॥
भुजङ्गभूषणं रक्तवसनालेपशोभितम् । परशुं करवालं च बाणांस्त्रिशिखमेव च ॥ १२ ॥
दधानं दक्षिणैर्हस्तैरूर्ध्वादिक्रमतः परैः । डमरुं खेटकं चापं नृकपालं च पार्वति ॥ १३ ॥
कामकर्मसु रक्ताभमसितं चाभिचारके । निग्रहे ग्रहभूतादिमुक्त्यै मुक्तानिभं स्मरेत् ॥ १४ ॥
एवं सञ्चिन्त्य देवेशं शैवे पीठे पुरोदिते । षट्कोणान्तःस्थिते पद्मद्वितये भूपुरैर्वृते ॥ १५ ॥
चतुर्द्वारसमायुक्ते वसुपत्रे महेश्वरि । पूजयेद् देवमावाह्य गन्धपुष्पैर्मनोहरैः ॥ १६ ॥
अङ्गानि पूर्वमभ्यर्च्य केसरेषु यथापुरा । प्रथमेऽष्टदले देवि पूजयेदायुधाष्टकम् ॥ १७ ॥
परशुं डमरुं खड्गं खेटं बाणान् धनुस्तथा । शूलं कपालं चैतानि द्वितीयेऽष्टदले पुनः ॥ १८ ॥
ब्राह्म्याद्या मातरः पूज्याश्चतुरस्रत्रयान्तरा । वीथीद्वये लोकपालांस्तदस्त्राणि च पूजयेत् ॥ १९ ॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते प्राणायामत्रयं कृत्वा, शिरसि अघोराय ऋषये नमः । मुखे त्रिष्टुप्छन्दसे नमः । हृदये श्रीअघोररुद्राय देवतायै नमः । गुह्ये हुं बीजाय नमः । पादयोः ह्रीं शक्तये नमः । इति विन्यस्य मम चतुर्वर्गपुरुषार्थसिद्धये विनियोगः इति कृताञ्जलिर्वदेत् । ततः

ह्रीं स्फुर स्फुर हृदयाय नमः। प्रस्फुर प्रस्फुर शिरसे०। घोर घोरतर तनुरूप शिखायै०। चट चट प्रचट प्रचट कवचाय०। कह कह वम वम नेत्रत्रयाय०। बन्ध बन्ध घातय घातय हुंफट् अस्त्राय फट्। इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि विन्यस्य, शिरसि ह्रीं स्फुर स्फुर नमः। नेत्रयोः प्रस्फुर प्रस्फुर०। मुखे घोर०। कण्ठे घोरतर तनुरूप०। हृदि चट चट०। नाभौ प्रचट प्रचट०। लिङ्गे कह कह०। ऊर्वोः वम वम०। जान्वोः बन्ध बन्ध०। जङ्घयोः घातय घातय०। पादयोः हुंफट् नमः। इति विन्यस्य, ध्यानादिषडङ्गपूजान्ते प्रथमाष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन—परशवे नमः। डमरुकाय०। खड्गाय०। खेटाय०। बाणेभ्यः०। धनुषे०। शूलाय०। कपालाय नमः। द्वितीयाष्टदले देवाग्रमारभ्य ब्राह्म्याद्यष्टमातृः सम्पूज्य, प्राग्वदिन्द्रादिपूजामारभ्य सर्वं समापयेदिति ॥ तथा—

लक्षमेकं जपेन्मन्त्रं हविष्याशी यतव्रतः। जुहुयात्तद्दशांशेन तिलैः शुद्धैर्घृतप्लुतैः ॥ २० ॥
तर्पणं मार्जनं कृत्वा भोजयेन्मधुरैर्द्विजान्। एवं सिद्धे मन्त्रवरे काम्यकर्माणि साधयेत् ॥ २१ ॥
क्रमात्सर्पिरपामार्गतिलसर्षपपायसैः। साज्यैः सहस्रं प्रत्येकं यामिन्यां जुहुयात्सुधीः ॥ २२ ॥
होमोऽयं नाशयेत्सद्यो भूतकृत्यामयादिकान्। श्वेतकिंशुकनिर्गुण्डीहोमोऽपामार्गसम्भवैः ॥ २३ ॥
समिद्वरैः कृतो होमः पूर्ववद्भूतशान्तिदः। अपामार्गार्ग्वधयोः पञ्चगव्यसमुक्षिताः ॥ २४ ॥
समिधो जुहुयात्कृष्णपञ्चम्यां निशि संयतः। पृथक् सहस्रहोमेन भूतानां निग्रहो भवेत् ॥ २५ ॥
क्रमात् सर्पिरपामार्गपञ्चगव्यहविर्घृतैः। हुत्वा सहस्रं प्रत्येकं पात्रे संपातयेद् घृतम् ॥ २६ ॥
संपातसर्पिषा साध्यं भोजयेद्भूतशान्तये। लिखेदष्टदलं पद्मं वह्निगेहयुगान्तरे ॥ २७ ॥
मायां तत्कर्णिकामध्ये साध्याख्याकर्मसंयुताम्। स्वरैरावेष्ट्य तां शक्तिं किंजल्केष्वष्टवर्गजान् ॥ २८ ॥
ककारादिलकारान्तानालिख्य दलसप्तके। अष्टमे तु दले वादिक्षान्तान् सप्तार्णकाँल्लिखेत् ॥ २९ ॥
स्फुरादिचटयुग्मान्तान् मन्त्रवर्णान् त्रिशस्त्रिशः। दलमध्ये तु संलिख्य दलाग्रेषु महेश्वरि ॥ ३० ॥
प्रचटाद्यान् घातयान्तांस्तथैव गुणशो लिखेत्। बहिः षट्कोणकोणेषु प्रतिकोणं समालिखेत् ॥ ३१ ॥
वर्मास्त्रबीजे तद्बाह्ये भूपुरेण तु वेष्टयेत्। दीक्षोक्तविधिना कुम्भं तस्मिन्यन्त्रे निधाय च ॥ ३२ ॥
तत्र देवं समाराध्य तज्जलैरभिषेकतः। भूतापस्मारकृत्याद्याः सर्वे नश्यन्त्युपद्रवाः ॥ ३३ ॥

अस्यार्थः—क्वचिद्भूतले सुसमे सिन्दूरादिना विपुलं षट्कोणं विरच्य, तन्मध्येऽष्टदलं पद्मं कृत्वा, तत्कर्णिकायां शक्तिबीजमालिख्य, तस्य हकारोदरे देवदत्तस्य, रेफस्थाने रोगं, ईकारस्थाने नाशय नाशयेति साधकसाध्यकर्माण्यालिख्य, तद्बीजं सबिन्दुभिः षोडशस्वरैरावेष्टयाष्टदलकेसरेषु—प्रथमदलकेसरे कंखंगंघं, द्वितीये ङंचंछंजं, तृतीये झंञंटंठं, चतुर्थे डंढंणंतं, पञ्चमे थंदंधंनं, षष्ठे, पंफंबंभं, सप्तमे मंयंरंलं, अष्टमे वंशंषंसंहंळंक्षं नमः। इति स्वाग्रादिप्रादक्षिण्येन वर्णान् विलिख्य, दलमध्येषु स्वाग्रदलमारभ्य प्रादक्षिण्येन प्रथमदलमध्ये स्फुरस्फु, द्वितीये रप्रस्फु, तृतीये रप्रस्फु, चतुर्थे रघोर, पञ्चमे घोरत, षष्ठे रतनु, सप्तमे रूपच, अष्टमे टचट, इति विलिख्य, ततः प्रथमदलाग्रेषु प्रचट, द्वितीये प्रचट, तृतीये कहक, चतुर्थे हवम, पञ्चमे वमबं, षष्ठे धबंध, सप्तमे घातय, अष्टमे घातय, इति विलिख्य, तद्बहिःस्थषट्कोणेषु हुंफट् इति प्रतिकोणं विलिख्य तद्बहिश्चतुरस्रेण वेष्टयित्वा, तत्र दीक्षोक्तविधिना कुम्भं संस्थाप्य तत्र देवमावाह्य समभ्यर्च्य, तेन जलेन साध्यमभिषेचयेत्, यथोक्तफलसिद्धिर्भवति ॥ तथा—

अष्टपत्रं लिखेत्पद्मं षट्कोणं तस्य मध्यतः। तन्मध्ये शक्तिमालिख्य साध्याख्यानामसंयुताम् ॥ ३४ ॥
स्फुरद्वयेन तां शक्तिं वेष्टयेज्जगदीश्वरि। षट्कोणस्य तु कोणेषु प्रस्फुरद्वितयं लिखेत् ॥ ३५ ॥
एकैकशो महेशानि शिष्टवर्णान् दलेष्वथ। मूलमन्त्रस्य देवेशि रसवेदचतूरसैः ॥ ३६ ॥
चतुश्चतुर्वेदरसैर्विभक्तांस्तद्बहिस्ततः। पुनः षट्कोणमालिख्य तत्कोणेषु महेश्वरि ॥ ३७ ॥

हुंफडित्यालिखेद् बाह्ये चतुस्रेण वेष्टयेत् । यन्त्रमेतदघोरस्य कीर्तितं भुवि दुर्लभम् ॥ ३८ ॥
क्षुद्रचौरग्रहव्यालभूतापस्मारनाशनम् । संसाधितं धृतं नृणां सर्वसिद्धिप्रदायकम् ॥ ३९ ॥

इति ॥ अस्यार्थः—विपुलं षट्कोणं कृत्वा तन्मध्येऽष्टदलं पद्मं विरच्य, तत्कर्णिकायां पुनः षट्कोणमालिख्य, तन्मध्ये प्राग्वत् ससाध्यां शक्तिमालिख्य, तां स्फुर २ इत्यक्षरचतुष्टयेनावेष्टयान्तःषट्कोणेषु प्रस्फुर २ इति षडक्षराणि प्रतिकोणमेकमेकमालिख्य, अष्टसु दलेषु स्वाग्रदलमारभ्य प्रादक्षिण्येन 'घोर' इत्यादि 'घातय' इत्यन्तान् वर्णान् ६ । ४ । ४ । ६ । ४ । ४ । ४ । ६ इति क्रमेण विभाज्यालिख्य बहिः षट्कोणेषु प्राग्वदन्त्याक्षरद्वयं विलिखेत् तद्बहिश्चतुरस्रेणावेष्टयेत् । एतद्यन्त्रमुक्तफदं भवतीति ।। श्रीशिवरहस्येपाशुपतास्त्रमन्त्रः—

अथ वक्ष्ये महेशानमन्त्रं पाशुपताह्वयम् । अस्त्रराजं समस्तापत्तारणं शत्रुकृन्तनम् ॥ १ ॥
तारो बकेशः शान्तीन्द्रभूषितश्चन्द्रशेखरः । शिखीशपूर्वो वान्तश्च पञ्चमस्वरसंयुतः ॥ २ ॥
वर्मास्त्रान्तः षडर्णोऽयं षडानन समीरितः । ....॥

तारः प्रणवः । बकेशः शकारः, शान्तिरीकारः, इन्द्रो लकारः, ताभ्यां भूषितश्चन्द्रशेखरो बिन्दुमस्तकस्तेन श्लीं इति । शिखीशपूर्वः पकारः । वान्तः शकारः, पञ्चमस्वर उकारस्तेन शु । वर्म हुं । अस्त्र फट् ॥ तथा—

ऋषिः स्याद्वामदेवोऽस्य पंक्तिश्छन्द उदीरितम् । रुद्रः पशुपतिः प्रोक्तो देवता देववन्दितः ॥ ३ ॥
मन्त्रार्णैः षड्भिरङ्गानि हुंफडन्तैः सबिन्दुभिः । जातियुक्तानि विन्यस्य षडानन कराङ्गयोः ॥ ४ ॥
ध्यायेत्पशुपतिं सम्यङ् मन्त्री चैकाग्रमानसः । पञ्चवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम् ॥ ५ ॥
अग्निज्वालानिभश्मश्रुमूर्धजं भीमादंष्ट्रकम् । खड्गं बाणानक्षसूत्रं शक्तिं परशुमेव च ॥ ६ ॥
दधानं दक्षिणैर्हस्तैरूर्ध्वादिक्रमतो गुह । खेटचापौ कुण्डिकां च त्रिशूलं ब्रह्मदण्डकम् ॥ ७ ॥
वामहस्तैश्च बिभ्राणं मध्याह्नार्कसमप्रभम् । नानाभरणसन्दीप्तं पन्नगेन्द्रैरलंकृतम् ॥ ८ ॥
स्फटिकौघनिभं भान्तं सर्वरक्षाकरं स्मरेत् । पूर्वोक्ते पूजयेत्पीठे शैवे गन्धादिभिः शिवम् ॥ ९ ॥
पद्ममष्टदलं कृत्वा कर्णिकाकेसरान्वितम् । चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम् ॥ १० ॥
एवं यन्त्रं समालिख्य स्वर्णरूप्यादिके शुभे । पट्टे वा फलके वत्स श्रीकण्ठादिसमुद्भवे ॥ ११ ॥
सर्वोपचारैराराध्य यजेदङ्गानि पूर्ववत् । दलेषु मातरः पूज्या लोकेशास्त्राणि तद्बहिः ॥ १२ ॥
पूजयेद्विधिनानेन रुद्रं परमभक्तितः । यः स सर्वानवाप्येह कामानन्ते शिवो भवेत् ॥ १३ ॥

अथ प्रयोगः—प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि वामदेवाय ऋषये नमः । मुखे पंक्तिच्छन्दसे नमः । हृदये पशुपतये देवतायै नमः । इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत् । ॐहुंफट् हृदयाय नमः । श्लींहुंफट् शिरसे स्वाहा । पहुंफट् शिखायै वषट् । शुहुंफट् कवचाय हुं । हुंहुंफट् नेत्रत्राय० । फट्हुंफट् अस्त्राय० । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत् । ततो ध्यानाद्यङ्गपूजान्ते अष्टदलेषु ब्राह्म्याद्याः सम्पूज्य, बहिर्वीथीद्वये इन्द्राद्यांस्तदस्त्राणि च सम्पूज्य प्राग्वत् सर्वं समापयेदिति ।। तथा—

वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः । तद्दशांशं हुनेद् द्रव्यैः सघृतैः संस्कृतेऽनले ॥ १४ ॥
तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेद् गुह । ततः सिद्धमनुर्मन्त्री प्रयोगान् विदधीत वै ॥ १५ ॥
अनेन मन्त्रितं तोयं ग्रस्तस्य वदने क्षिपेत् । सद्यस्तं मुञ्चति क्रन्दन् ग्रहो मन्त्रप्रभावतः ॥ १६ ॥
अमुना मन्त्रितान् बाणान् विसृजेद्युधि भूपतिः । जपेत्क्षणेन सबलानपि शत्रून् षडानन ॥ १७ ॥

इति ॥ अथ श्रीकण्ठसंहितायां नीलकण्ठमन्त्रः—

नीलकण्ठमनुं वक्ष्ये क्ष्वेडत्रयविनाशनम् । यं ज्ञात्वा गिरिजे मन्त्री दृष्ट्या नाशयते विषम् ॥ १ ॥

भुजङ्गेशसमारूढो लोहितेशस्तु पार्वति । सद्योऽक्रूरसमायुक्तः प्रथमं वरवर्णिनि ॥ २ ॥
मेषेशोऽपि भुजङ्गस्थो लोलाक्षीश्रीमुखीयुतः । लाङ्गलीशो महासेनयुतस्तार्तीय ईरितः ॥ ३ ॥

भुजङ्गेशो रेफः, तदुपरि स्थितो लोहितेशः पकारः, सद्य ओकारः, अक्रूरो बिन्दुस्ताभ्यां युक्तस्तेन प्रों इति । मेषेशो नकारः भुजङ्गस्थो रेफोपरि स्थितः लोलाक्षी ईकारः, श्रीमुखी बिन्दुस्ताभ्यां युक्तस्तेन न्रीं इति । लाङ्गलीशष्ठकारः, महासेनयुतो विसर्गसहितस्तेन ठः इति । तथा—

अरुणो मुनिरुद्दिष्टोऽनुष्टुप्छन्दश्च देवता । नीलकण्ठः शिवो देवी षडङ्गविधिरुच्यते ॥ ४ ॥
हरयुग्मद्विठान्तो हृत् कपर्दिने द्विठः शिरः । नीलकण्ठः सङेर्देवि स्वाहान्तश्च शिखा मता ॥ ५ ॥
कवचं कालकूटान्ते विषभक्षणङेयुतम् । वर्मास्त्रबीजयुगलं नीलकण्ठः सङेशिरा ॥ ६ ॥
अस्त्रमेवं यजेद्देवि पञ्चाङ्गानि कराङ्गयोः । मूर्ध्नि कण्ठे च हृदये न्यसेद्बीजत्रयं ततः ॥ ७ ॥
ध्यायेद्देवं नीलकण्ठं बालार्कायुतवर्चसम् । जटाजूटलसच्चन्द्रशकलं फणिसत्तमैः ॥ ८ ॥
कृताकल्पं कराम्भोजैर्दधानं जपमालिकाम् । शूलं च दक्षिणाधोर्ध्वं वामोर्ध्वं च कपालकम् ॥ ९ ॥
खट्वाङ्गं तदधोहस्ते पञ्चवक्त्रविराजितम् । प्रतिवक्त्रं त्रिनयनं व्याघ्रचर्माम्बरावृतम् ॥ १० ॥
पद्ममध्ये समासीनमतिसुन्दरविग्रहम् । एवं ध्यात्वार्चयेत्पीठे शैवे सर्वोपचारकैः ॥ ११ ॥
पद्मे वसुदले रम्ये चतुरस्त्रत्रयावृते । चतुर्द्वारसमायुक्ते पूर्वमङ्गानि पूजयेत् ॥ १२ ॥
लोकेश्वरानथाभ्यर्च्य तदस्त्राणि च संयजेत् । एवं समर्चयेन्मन्त्री नीलकण्ठं महेश्वरम् ॥ १३ ॥
दृष्ट्या विनाशयेत्क्ष्वेडं नीलकण्ठ इवापरः ।.... ....॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वत् प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अरुणाय ऋषये नमः । मुखे त्रिष्टुप्छन्दसे नमः । हृदये श्रीनीलकण्ठाय देवतायै नमः । इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत् । ततो मूलेन करशुद्धिं कृत्वा, हरहर स्वाहा हृदयाय नमः । कपर्दिने स्वाहा शिरसे स्वाहा । नीलकण्ठाय स्वाहा शिखायै वषट् । कालकूटविषभक्षणाय हुंफट् कवचाय हुं । नीलकण्ठाय स्वाहा अस्त्राय फट् । इति पञ्चाङ्गमन्त्रांगुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य नेत्रवर्जं हृदयादि-पञ्चाङ्गेष्वपि न्यसेत्ततः (शिरसि प्रों नमः) कण्ठे न्रीं नमः । शिरसि ठः नमः । इति विन्यस्य, ध्यानाद्यङ्ग-पूजान्ते लोकेशांस्तदस्त्राणि च प्राग्वद्वीथीद्वये पूजयेत् । ततः) प्राग्वत्सर्वं समापयेदिति ॥ तथा—

लक्षत्रयं जपेद्देवि दीक्षितो विजितेन्द्रियः । हविषा सघृतेनाथ हुनेद्देवि दशांशतः ॥ १४ ॥
तर्पणं मार्जनं कृत्वा भोजयेन्मधुरैर्द्विजान् । एवं सिद्धे मनौ देवि मन्त्री हरति तत्क्षणात् ॥ १५ ॥
क्ष्वेडत्रयं न संदेहो नीलकण्ठ इव स्वयम् । स्पृष्ट्वा जपेद्विषग्रस्तं तत्क्षणान्निर्विषो भवेत् ॥ १६ ॥
बीजाभ्यां प्रथमान्त्याभ्यां पार्श्वयोर्विषमाहरेत् । मध्येन मध्यगं सर्वं मनुनानेन संहरेत् ॥ १७ ॥
एतन्मन्त्राभिसंजप्तकलशोदकसेचनात् । तक्षकेणापि संदष्टस्तत्क्षणान्निर्विषो भवेत् ॥ १८ ॥
विलोक्य विषिणं मन्त्री प्रजपेत्सुसमाहितः । विषद्वयान्मुच्यतेऽसावचिरान्नात्र संशयः ॥ १९ ॥
दृष्ट्वा क्ष्वेडग्रहग्रस्तं स्वशिरःकण्ठहृत्सु च । मन्त्रवर्णत्रयं न्यस्य देवतारूपकं गुरुम् ॥ २० ॥
स्मरम् स्वदक्षिणानामामध्यमातर्जनीषु च । मन्त्राक्षरद्व(त्र)यं देवि तदंगुलिभिरुत्तमः ॥ २१ ॥
त्रिशूलमुद्रामापाद्य दष्टस्याभिमुखं नयेत् । प्रदर्श्य मन्त्रं प्रजपेत्पञ्चाशद्वारमद्रिजे ॥ २२ ॥
स्थावरं जङ्गमं च कृत्रिमं च तथा विषम् । रोगग्रहाद्यपस्मारानपमृत्युं च नाशयेत् ॥ २३ ॥
पञ्चाशन्मनुना जप्तमन्नमौषधमेव च । भक्षितं क्ष्वेडरोगादिनाशनं परमं शिवे ॥ २४ ॥

इति । तथा मन्त्रान्तरम्—

मन्त्रान्तरमथो वक्ष्ये नीलकण्ठस्य पार्वति । तारहृन्नीलकण्ठाय मनुरष्टाक्षरो भवेत् ॥ १ ॥

तारः प्रणवः । हृत् नमः । नीलकण्ठाय स्वरूपम् । तथा—

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छन्द उच्यते । देवता नीलकण्ठोऽस्य विषग्रहविनाशनः ॥ २ ॥
अङ्गध्यानार्चनाजाप्यहोमाद्यर्णत्रयोक्तवत् । तारं ङेनीलकण्ठोऽग्निवधूरष्टाक्षरोऽपरः ॥ ३ ॥
(अरुणोऽस्य मुनिश्छन्दो गायत्री देवता शिवः । नीलकण्ठो महापूर्वो विषरोगादिनाशनः ॥ ४ ॥)
करौ मूलेन संशोध्य पञ्चाङ्गविधिमाचरेत् । नीलकण्ठः सङेर्हृच्च हृदयोपरि विन्यसेत् ॥ ५ ॥
स्वाहा नमः शिरः प्रोक्तं तारं हृच्च शिखा मता । नीलकण्ठः सङेर्हृच्च कवचं परिकीर्तितम् ॥ ६ ॥
स्वाहा चैव हृदन्तास्त्रं पञ्चाङ्गानि न्यसेत्क्रमात् । दक्षतर्जनिकारम्भाद् वामतर्जनिकावधि ॥ ७ ॥
वर्णाष्टकं न्यसेन्मन्त्री पादोरुगुह्यनाभिषु । हृत्कण्ठमुखशीर्षेषु न्यसेद्वर्णाष्टकं प्रिये ॥ ८ ॥
पूर्वाद्यैराननैर्युक्तः श्वेतपीतारुणासितैः । अभयं वरदं चापं वासुकिं च दधद्भुजैः ॥ ९ ॥
ध्येयो देवस्तु पार्श्वस्थगौरीकश्चातिसुन्दरः । संहारनिर्विषस्तम्भावेशान् कुर्यात्क्रमाद्बुधः ॥ १० ॥

दक्षिणाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम् ।

त्र्यक्षरोक्तविधानेन पूजयेत्परमेश्वरम् । पुरश्चरणमप्युक्तं वर्णलक्षं महेश्वरि ॥ ११ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं विधाय, शिरसि अरुणाय ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीमहानीलकण्ठाय देवतायै नमः । इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिर्वदेत् । ततो मूलमन्त्रेण करशोधनं कृत्वा, नीलकण्ठाय नमः हृदयाय नमः । स्वाहा नमः शिरसे स्वाहा । ॐनमः शिखायै वषट् । नीलकण्ठाय नमः कवचाय हुं । स्वाहा नमः अस्त्राय फट् । इति पञ्चाङ्गमन्त्रानंगुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य नेत्रवर्जं हृदयादिष्वपि न्यसेत् । ततो यथोक्तरूपं ध्यात्वान्यत् सर्वं त्र्यक्षरवत् कुर्यादिति ॥

अथ चिन्तामणिमन्त्रः । तत्र श्रीशिवरहस्ये—

कैलासशिखरे रम्ये नानारत्नविचित्रिते । नानाद्रुमलताकीर्णे मन्दवायुतरङ्गिते ॥ १ ॥
नानाकुसुमसौरभ्यैरामोदितदिगन्तरे । सिद्धकिन्नरगन्धर्वचारणाप्सरसां गणैः ॥ २ ॥
गीतवादित्रनृत्यैश्च प्रीणयद्भिः शिवं सदा । ब्रह्मविष्णुसहस्राक्षप्रमुखैरमरैस्तथा ॥ ३ ॥
गजास्यनन्दिभृङ्ग्याद्यैर्गणैर्मुनिगणैरपि । निषेवितं शिलापृष्ठे वैडूर्यमणिनिर्मिते ॥ ४ ॥
सिंहासनसमासीनमर्धनारीश्वरं हरम् । सुप्रसन्नमुखं शम्भुं स्कन्दः पप्रच्छ शङ्करम् ॥ ५ ॥

स्कन्द उवाच ।

भगवन् सर्वधर्मज्ञ जगदाद्य जगत्पते । अनाद्यन्ताखिलाधार भक्तानुग्रहविग्रह ॥ ६ ॥
रहस्यं किञ्चिदिच्छामि प्रष्टुं त्वां भक्तवत्सल । भक्तोऽस्मि तव देवेश वदस्व कृपया विभो ॥ ७ ॥
चिन्तामणिमनुर्देव सूचितो यस्त्वया पुरा । इदानीं तं जगन्नाथ श्रोतुमिच्छामि शङ्कर ॥ ८ ॥

श्रीमहादेव उवाच ।

साधु साधु गुह प्राज्ञ सर्वतन्त्रार्थपारग । रहस्यमपि वक्ष्यामि भक्तोऽसीति षडानन ॥ ९ ॥
न कस्यापि मयाख्यातं त्वत्स्नेहात्प्रवदाम्यहम् । गोपितव्यं त्वया वत्स न प्रकाश्यं षडानन ॥ १० ॥
सद्भक्ताय सुशान्ताय सुकुलीनाय दीयताम् । मन्त्रोद्धारं प्रवक्ष्यामि शृणु वत्स समाहितः ॥ ११ ॥
भुजाङ्गेशं समुद्धृत्य क्रोधीशं तदधः कुरु । श्वेतेशं तदधः कुर्यान्महाकालं च षण्मुख ॥ १२ ॥
(पुनर्भुजङ्गमालिख्य कपालीशमधः कुरु । अनुग्रहेशमर्घीशमक्रूरेशं च योजयेत् ॥ १३ ॥
गुरूपदेशविधिना बीजं चिन्तामणेरिदम् । मथित्वा ज्ञानदण्डेन वेदागममहार्णवम् ॥ १४ ॥

उद्धृतोऽयं महामन्त्रः साक्षान्मोक्षैकसाधनम् । तपस्तप्त्वा चिरं पूर्वं कश्यपस्तु प्रजापतिः ॥ १५ ॥
दृष्टवांस्तेजसां राशिं प्रज्वलन्तं महाद्भुतम् । मन्त्ररत्नं महदिदं चिन्तयंस्तु चिरं पुनः ॥ १६ ॥
स्रष्टोऽभूज्जगतां वत्स चिन्तामणिरतो यतः । .... ॥

इति । भुजङ्गेशो रेफः, क्रोधीशः ककारः, श्वेतेशः षकारः, महाकालो म, पुनर्भुजङ्गो र, कपालीशो य, अनुग्रहेशः औ, अर्घीशः ऊ, अक्रूरेशो बिन्दुः, एतैः संपिण्डितं रक्षमरयऔऊँ इति कूटं भवति । तथा—

ऋषिः कश्यप आख्यातोऽनुष्टुप्छन्द उदाहृतम् । देवता जगतामादिः पार्वतीपतिरीरितः ॥ १७ ॥
क्षकारो बीजमाख्यातं रेफः शक्तिरितीरिता । मकारः कीलकं वत्स रेफाद्यैः षड्भिराचरेत् ॥ १८ ॥
षडङ्गानि मनोरस्य जातियुक्तानि षण्मुख ।) ततः सञ्चिन्तयेद् देवमर्धनारीश्वरं शिवम् ॥ १९ ॥
विद्रुमारक्तवामार्धदेहं नीलापराङ्गकम् । अहिगङ्गाशशाङ्कार्धविलसत्तुङ्गमौलिकम् ॥ २० ॥
हावभावविलासार्धनारीरूपं महेश्वरम् । भीषणापरदेहार्धं वामोर्ध्वे पाशमद्भुतम् ॥ २१ ॥
पद्मं च तदधोहस्ते दधानं दक्षिणोर्ध्वके । करे त्रिशूलं तस्याधो नृकपालं च षण्मुख ॥ २२ ॥
प्रविभक्तांशुकाकल्पं मालालेपविराजितम् । एवं ध्यात्वा यजेत्पीठे शैवे सर्वोपचारकैः ॥ २३ ॥
अष्टपत्राम्बुजद्वन्द्वं चतुरस्रत्रयं ततः । चतुर्द्वारसमोपेतमस्मिन् षण्मुख पूजयेत् ॥ २४ ॥
आदावङ्गानि सम्पूज्य केसरेषु यथाविधि । अर्चयेदष्टपत्रेषु कार्तिकेय वृषादिकान् २५ ॥
ब्राह्म्याद्या मातरः पूज्या द्वितीयेऽष्टदले पुनः । लोकेश्वरांस्तदस्त्राणि प्राग्वद्वीथीद्वये यजेत् ॥ २६ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि कश्यपाय ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीअर्धनारीश्वराय देवतायै नमः । गुह्ये क्षं बीजाय नमः । पादयोः रं शक्तये नमः । नाभौ मं कीलकाय नमः । इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत् । ततः, रं हृदयाय नमः । कं शिरसे स्वाहा । षं शिखायै वषट् । मं कवचाय हुं । रं नेत्रत्रयाय वौषट् । यं अस्त्राय फट् । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिनेत्रान्तेषु पञ्च मन्त्रान् विन्यस्य अस्त्रमन्त्रेण तालत्रयं दशदिग्बन्धनं कृत्वा ध्यानादिपुष्पोपचारान्ते अष्टदलकेसरेषु आग्नेये रं हृदयाय नमः । ईशाने कं शिरसे नमः । नैर्ऋत्ये षं शिखायै नमः । वायव्ये मं कवचाय नमः । देवाग्रे रं नेत्राय नमः । देवाग्रादिचतुर्दिक्षु यं अस्त्राय नमः । इति षडङ्गानि सम्पूज्य, प्रथमाष्टदले देवाग्रमारभ्य प्रादक्षिण्येन वृषाय नमः । क्षेत्रपालाय० । चण्डेश्वराय० । दुर्गायै० । षण्मुखाय० । नन्दिने० । विघ्ननायकाय० । सेनापतये० । इति सम्पूज्य, द्वितीयाष्टदले तथैवारभ्य—आं ब्राह्म्यै नमः । ईं माहेश्वर्यै० । ऊं कौमार्यै० । ॠं वैष्णव्यै० । लृं वाराह्यै० । ऐं इन्द्राण्यै० । औं चामुण्डायै० । अः महालक्ष्म्यै० । इति सम्पूज्येन्द्रादिपूजादि सर्वं प्राग्वत् समापयेदिति । तथा—

एकलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः । जुहुयात्तद्दशांशेन त्रिमध्वक्तैः सतण्डुलैः ॥ २७ ॥
तिलैः सन्तर्पयेद् देवं शुद्धतोयैः षडानन । ततोऽभिषिञ्चेन्मूलेन स्वमूर्धनि समाहितः ॥ २८ ॥
ब्राह्मणांस्तर्पयेत् पश्चादन्नपानैः सदक्षिणैः । एवं सिद्धमनुर्वत्स प्रयोगान्विदधीत वै ॥ २९ ॥

इति । एष लक्षजपः कृतयुगपरः । शिवसद्भावे तु शिवशक्त्योः पृथक्पृथग्ध्यानमुक्तम् । यथा—

अथवा देवदेवेशि ध्यायेदष्टभुजं शिवम् । दक्षिणोर्ध्वे करे देवि परशुं तदधः क्रमात् ॥ १ ॥
खड्गं वह्निं शरांश्चैव दधानं वामबाहुभिः । भुजङ्गं त्रिशिखं चैव कपालं चापमेव च ॥ २ ॥
ऊर्ध्वादितः स्त्रीविलासं त्रीक्षणं त्रिदशार्चितम् । गङ्गातरङ्गविलसच्चन्द्रखण्डाहिशेखरम् ॥ ३ ॥
इति सञ्चिन्त्य देवेशं तत्पार्श्वस्थां शिवामपि । अरुणामरुणाकल्पामरुणांशुकधारिणीम् ॥ ४ ॥
अरुणालेपमालाढ्यां त्रिनेत्रां मणिभूषणाम् । शूलैः षोडशभिर्व्यग्रभुजषोडशमण्डिताम् ॥ ५ ॥

चिन्तयेत्परमेशानीं साधकाभीष्टदायिनीम् । .... ॥

इति । प्रायशः काम्यमेतदिति चिन्त्यं, नित्यं तु प्रागुक्तमेव । मन्त्रान्तरं शिवरहस्ये—

रेफं त्यक्त्वादिमं वत्स शिवशक्ती नियोज्य च । प्रजपेत्तेन सिद्धिः स्याच्छीघ्रमेव न संशयः ॥ १ ॥

अयमर्थः—बीजस्यादिमे रेफमपास्य तत्स्थाने शिवशक्ती हकारसकारौ संयोज्य जपेदिति ।

प्रासादाद्यं जपेन्मन्त्रमयुतं मन्त्रवित्तमः । तेनावेशो भवेत्सद्यो भूतादीनां रुजामपि ॥ २ ॥
ग्रस्तस्य शिरसि ध्यायेच्चन्द्रमण्डलमध्यगम् । स्वरैः षोडशभिर्वीतं स्रवत्पीयूषचर्चितम् ॥ ३ ॥
अपमृत्युज्वरक्ष्वेडभ्रान्त्यपस्मारनाशनम् । शिरोरोगहरं चापि गदितं शिखिवाहन ॥ ४ ॥
रेफादिवर्णषट्काढ्यषटकोणान्तस्त्रिकोणगम् । प्रतिलोमस्वरावीतं ग्रस्तस्य शिरसि स्मरेत् ॥ ५ ॥
बीजमेतन्महासेन ग्रहार्ति तत्क्षणाद्धरेत् । त्रिकोणं चिन्तयेन्मूर्ध्नि ग्रस्तजन्तोः षडानन ॥ ६ ॥
तन्मध्ये चिन्तयेद्बीजं ज्वलत्कालानलप्रभम् । क्षणादावेशयेन्मन्त्री ग्रहान् रोगादिकानपि ॥ ७ ॥
एतन्मन्त्राभिजप्तं च बन्धुजीवप्रसूनकम् । ग्रस्तस्य मूर्धनि क्षिप्तं क्षणादावेशकारकम् ॥ ८ ॥
पौष्टिके शान्तिके मन्त्रं शुक्लवर्णं विचिन्त्य च । सकारमादौ संयोज्य जपेन्मन्त्रं षडानन ॥ ९ ॥
आकृष्टौ च वशीकारे रक्तो रेफादिको भवेत् । हाकारादिश्च हेमाभः स्तम्भने क्षोभणे गुह ॥ १० ॥
धूम्रवर्णो यकारादिर्विद्वेषोच्चाटयोरपि । पीतवर्णो लकारादिः स्तम्भने शिखिवाहन ॥ ११ ॥
शुद्धस्फटिकसङ्काशो मन्त्रो ध्येयो मुमुक्षुभिः । अकारादिश्च जप्तव्यो देशिकादेशतो गुह ॥ १२ ॥
वायुमण्डलमध्यस्थं मन्त्रं कृष्णं विचिन्तयेत् । नेत्रयोर्द्विषतां वत्स आन्ध्यमाशु प्रजायते ॥ १३ ॥
बाधिर्य्यं कर्णयो रन्ध्रे छर्दिश्च वदने स्मृता । कुक्षौ शूलं करोत्याशु वायुं मर्मसु संस्मृतम् ॥ १४ ॥
दुःसहं च शिरोरोगं कुर्याच्छिरसि षण्मुख । वाग्रोधं कण्ठनाले च चतुरस्रस्य मध्यगम् ॥ १५ ॥
चन्द्रमण्डलमध्यस्थं स्वरैः षोडशभिर्वृतम् । नेत्रे ध्यातं रोगहरं हरत्याशु न संशयः ॥ १६ ॥
रक्तस्रावं कृशाङ्गीनां योनौ ध्यातं हरेत्क्षणात् । कुक्षौ ध्यातं शूलनुत्स्याद्विस्फोटे विषमे ज्वरे ॥ १७ ॥
तृषि रक्तामये वत्स भ्रमे दाहे शिरोगदे । स्मरेन्मन्त्रं विद्रुमाभं तत्र तद्दोषशान्तये ॥ १८ ॥
अत्यारक्तं त्रिकोणान्तःस्थितं बीजं स्मरेद्गुह । यस्य मूर्ध्नि स वश्यः स्यादचिराद्दासवद् ध्रुवम् ॥ १९ ॥
इष्टाङ्गनाहृदम्भोजे स्थितं मन्त्रं विचिन्त्य च । मन्त्रवर्णैर्दृढं बद्ध्वा तेजोरूपं च संस्मरेत् ॥ २० ॥
तच्छीर्षमाशु पाशेन कर्षयेद्योषितं ध्रुवम् । स्वनामगर्भितं बीजं योषायोनौ विचिन्तयेत् ॥ २१ ॥
वशयेतत्क्षणाद्योषां स्रावयेच्छुक्रमेव च । निजलिङ्गशिरःस्थं तद्बीजं संचिन्तयेद्गुह ॥ २२ ॥
प्रवेशयेद्योनिमध्ये सम्पर्काद्योषितं वशे । विदध्याद् द्रावयेच्चैव नात्र कार्या विचारणा ॥ २३ ॥
कुलालमृदमानीय तत्र बीजं समालिखेत् । तन्मकारस्थरेफे तु साध्याख्यां कर्मसंयुताम् ॥ २० ॥
विलिख्य तत् त्रिकोणेन वेष्टयेत्तद्बहिस्ततः । षट्कोणेन समावेष्ट्य षट्सु कोणेषु चालिखेत् ॥ २५ ॥
रेफं सबिन्दुकं तच्च विलोमैर्वेष्टयेत्स्वरैः । प्राणप्रतिष्ठां तस्याथ कृत्वा सम्यक् षडानन ॥ २६ ॥
निखनेच्चुल्ल्यधस्ताच्च तत्र पाकं समाचरेत् । तदन्नभक्षणात् सद्यो वश्यो भवति निश्चितम् ॥ २७ ॥
पतिः प्रियायाः षड्वक्त्र नात्र कार्या विचारणा । मधुरत्रययुक्तेन शालिपिष्टेन षण्मुख ॥ २८ ॥
कृत्वा पुत्तलिकां सम्यक्स्पष्टाङ्गीमतिमञ्जुलाम् । प्रपदाभ्यां च जङ्घाभ्यां जानुभ्यामूरुयुग्मतः ॥ २९ ॥
नाभेरधस्ताद्धृदयात् कण्ठादाशीर्षकं ततः । एवं द्वादशधा छित्त्वा तीक्ष्णशस्त्रेण साधकः ॥ ३० ॥
मूलमन्त्रेण जुहुयाद्यमुद्दिश्य षडानन । स वश्यो भवति क्षिप्रं नात्र कार्या विचारणा ॥ ३१ ॥
चतुरस्रं समं कृत्वा नागवल्लीदले गुह । तन्मध्ये तु वकारस्य बीजे साध्यं समालिखेत् ॥ ३२ ॥
मन्त्रमध्यमकाराधःस्थिते रेफे विचक्षणः । चतुरस्रं चतुष्कोणे ठकारं बिन्दुसंयुतम् ॥ ३३ ॥

विलिख्य स्थापितप्राणं मूलमन्त्राभिमन्त्रितम् । अष्टोत्तरसहस्रेण शिरोरोगी प्रभक्षयेत् ॥ ३४ ॥
अम्बिकेयाचिरादेव रोगान्मुक्तः सुखी भवेत् । सरेफेण ककारेण कण्ठं साध्यस्य षण्मुख ॥ ३५ ॥
दक्षस्तनं षकारेण वामं चैव मकारतः । दक्षांसं रेफतो बद्ध्वा वामं चापि यकारतः ॥ ३६ ॥
ओकारेण मुखं वत्स नाभिमूकारतो गुह । वक्षो बिन्द्वर्धचन्द्राभ्यां बद्ध्वा कर्षन् स्मरेद्धिया ॥ ३७ ॥
मारणान्तं स वश्यः स्यादचिरान्नात्र संशयः । बन्धुजीवाख्यपुष्पेण त्रिकोणं रचयेद्गुह ॥ ३८ ॥
तन्मध्ये विलिखेद्बीजं चन्दनागरुकुंकुमैः । पुष्पेण तेन तन्मध्ये कार्तिकेय विधानतः ॥ ३९ ॥
अग्निं संस्थाप्य तत्रेशं सम्पूज्य विधिवत्सुत । हुनेदष्टोत्तरशतं घृतैः सम्पातयेद् घृतम् ॥ ४० ॥
त्रिलोहनिर्मितायां तु मुद्रिकायां विचक्षणः । सम्पातसिक्तां तावत्स सहस्रेणाभिमन्त्रिताम् ॥ ४१ ॥
साष्टकेनाथ तां हस्ते धारयेद्यस्तु भूपतिः । जयेत् स युधि षड्वक्त्र बलाढ्यानखिलान् रिपून् ॥ ४२ ॥
विषवेतालभूतादिदुरितैर्बाध्यते न सः । वक्ष्ये भागं त्रिलोहस्य शृणु षण्मुख साम्प्रतम् ॥ ४३ ॥
सोमसूर्याग्निरूपत्वान्मातृकायाः षडानन । तन्मयत्वात्त्रिलोहस्य भागास्तद्वर्णसंख्यया ॥ ४४ ॥
भवेद्रूप्यस्य सौम्यत्वाद्भागः षोडश उच्यते । काञ्चनस्यार्करूपत्वात्तद्वर्णाः पञ्चविंशतिः ॥ ४५ ॥
तेन भागस्तस्य तावत्ताम्रस्याग्निमयत्वतः । तद्वर्णाश्च दशैतेन तस्य भागोऽपि तादृशः ॥ ४६ ॥
अष्टपत्रं लिखेत्पद्मं कर्णिकायां षडस्रकम् । तन्मध्ये च त्रिकोणं स्यात्तन्मध्ये बीजमालिखेत् ॥ ४७ ॥
साध्याख्याकर्मसंयुक्तं षट्कोणेषु षडङ्गकम् । लिखेत्पूर्वादिपत्रेषु बीजवर्णान् विभज्य च ॥ ४८ ॥
रंकंषंमंरंयं इति औंऊंमिति च षण्मुख । बहिर्वृत्तचतुष्कं स्यादन्तरालत्रयान्वितम् ॥ ४९ ॥
(स्वरानाद्यान्तराले तु कादिमान्तान् द्वितीयके । तृतीये तु यकारादीन् वेष्टनत्वेन संलिखेत् ॥ ५० ॥
चतुरस्रं बहिष्कृत्वा तस्य कोणेषु संलिखेत् । बीजं नरहरेर्वत्स क्ष्रौमित्यक्षररूपकम्) ॥ ५१ ॥
एतद्यन्त्रं धृतं सर्वरक्षाकरमनुत्तमम् । अस्मिन् यन्त्रे समाधाय कलशं विधिवद्गुह ॥ ५२ ॥
तत्र देवं समभ्यर्च्य साध्यं तेनाभिषेचयेत् । ग्रहरोगादिभिर्मुक्तः सुचिरं सुखमाप्नुयात् ॥ ५३ ॥
(कृत्या रोगा विनश्यन्ति जीवेद्वर्षशतं गुह । ततः पूर्णेन्दुबिम्बाभं मण्डलं च समालिखेत्) ॥ ५४ ॥
आदौ षट्कोणमालिख्य वकारं तत्र संलिखेत् । तन्मध्ये साध्यसंयुक्तं लिखेद्बीजं षडानन ॥ ५५ ॥
स्वरैः षोडशभिर्वीतं षडस्रेषु रमालिखेत् । बहिर्वृत्तद्वयं कृत्वा अन्तराले तथा लिखेत् ॥ ५६ ॥
ककारादिक्षकारान्तान् वर्णान् बिन्दुसमन्वितान् । अष्टकोणं बहिःकृत्वा तत्कोणेषु लिखेद्गुह ॥ ५७ ॥
नृसिंहबीजं प्रागुक्तं यन्त्रमेतत्षडानन । दुष्टग्रहविषव्याधिनाशनं सर्वसिद्धिदम् ॥ ५८ ॥
आदौ षट्कोणमालिख्य तन्मध्ये साध्यसंयुतम् । चिन्तामणिं समालिख्य षट्सु कोणेषु षण्मुख ॥ ५९ ॥
रंकंषंमंरंयं इति औंऊं इति च सन्धिषु । विलिख्य बहिरावेष्ट्य वृत्तेन प्रणवेन च ॥ ६० ॥
तद्बहिर्वेष्टयेद्वत्स पुनर्वृत्तं समालिखेत् । तद्बहिश्चतुरस्रेण वेष्टयित्वा विचक्षणः ॥ ६१ ॥
नृसिंहबीजं विलिखेत्तत्कोणेषु च षण्मुख । एतद्यन्त्रं रोचनया विलिखेद्गोमयाम्भसा ॥ ६२ ॥
लाक्षावीतमिदं कृत्वा संजप्य विधिवद्बुधः । मस्तके धारयेदेतल्लक्ष्मीसौभाग्यवर्धनम् ॥ ६३ ॥
आयुरारोग्यविजयवश्यकृत्पुत्रपौत्रदम् । चौरव्यालमहारोगभूतापस्मारनाशनम् ॥ ६४ ॥
क्षारस्करतरो शाखां साग्रामानीय तत्र च । अग्रदेशे महासेन सुरम्यं कारयेत्स्थलम् ॥ ६५ ॥
षट्कोणं विलिखेद्वत्स तत्र साध्यसमन्वितम् । चिन्तामणिं विलिख्याथ षट्सु कोणेषु रं लिखेत् ॥ ६६ ॥
वह्निज्वाला इवारक्तरेखाः कार्याश्च तद्बहिः । कार्तिकेयाथ संजप्तमष्टोत्तरसहस्रतः ॥ ६७ ॥
मूलमन्त्रेण तत्सम्यक् स्थापयेद्यत्र तत्र वै । चौरव्याघ्रक्रोडसर्परिपुभूतपिशाचकाः ॥ ६८ ॥
न व्रजन्ति कदाचिच्च यन्त्रस्यास्य प्रभावतः । ....॥

इति ॥ अथ तुम्बुरुरुद्रमन्त्रः । श्रीकण्ठसंहितायाम्—

शृणु देवि प्रवक्ष्यामि मन्त्ररत्नं महाद्भुतम् । तुम्बुरोर्देवदेवस्य शत्रुक्षयकरं परम् ॥ १ ॥
संवर्तेशो महादेवि महाकालेन संयुतः । तदधश्च भुजङ्गेशो वालीशस्तदधः शिवे ॥ २ ॥
अर्घीशस्तदधो देवि सर्वोर्ध्वे श्रीमुखो स्थिता । बीजमेतत्समाख्यातं सर्वसिद्धिकरं परम् ॥ ३ ॥

संवर्तेशः क्षकारः । महाकालेशो मकारः । भुजङ्गेशो रेफः । वालीशो यकारः । अर्घीशः ऊ । श्रीमुखी बिन्दुरेतैः संपिण्डितं क्ष्म्र्य्ऊं इति बीजं भवति ।

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रीच्छन्द ईरितम् । श्रीरुद्रो देवता प्रोक्तः सर्वाभीष्टाप्तये भवेत् ॥ ४ ॥
षडदीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत् । क्षकाररहितं मूलबीजं जभसहान्वितम् ॥ ५ ॥
चत्वारि देवीबीजानि देव्यस्तु गिरिनन्दिनि । जयाख्या विजया पश्चादजिता चापराजिता ॥ ६ ॥
बीजमंगुलिषु न्यस्य करयोर्व्यापकं ततः । कनिष्ठादिषु विन्यस्येत्षडङ्गानि तलावधि ॥ ७ ॥
देवं देवीः स्वबीजाढ्याः कनिष्ठादिषु विन्यसेत् । पादान्मूर्धावधि न्यस्येन्मुष्टिना जगदीश्वरि ॥ ८ ॥
मूर्धादिपादपर्यन्तं तलाभ्यां व्यापकं न्यसेत् । षडङ्गानि पुनर्न्यस्य देवं देवीश्च पूर्ववत् ॥ ९ ॥
शिरोवदनहृन्नाभिगुदेषु क्रमतो न्यसेत् । एवं न्यस्ततनुर्देवि ध्यायेद् देवमनन्यधीः ॥ १० ॥
उद्यदादित्यरुचिरं चतुर्वक्त्रं त्रिलोचनम् । चन्द्रार्धशेखरं हस्तैश्चतुर्भिर्दधतं क्रमात् ॥ ११ ॥
दक्षिणोर्ध्वकरे देवि सृणिं खट्वाङ्गमप्यतः । पाशं वामोर्ध्वहस्ते च कपालं तदधो ज्वलत् ॥ १२ ॥
रक्ताङ्गरागाभरणांशुकं चिपिटनासिकम् । अनर्घ्यरत्नाकल्पाढ्यं ध्यायेदेवं शिवं शिवे ॥ १३ ॥
शैवं पीठं समभ्यर्च्य वक्ष्यमाणेन वर्त्मना । तत्रावाह्य यजेद्देवं सम्यग् गन्धादिभिः शिवे ॥ १४ ॥
नपुंसकस्वरैर्विद्वाननुलोमविलोमगैः । धर्मादिकैरधर्माद्यैः पादगात्राणि कल्पयेत् ॥ १५ ॥
इकारेण न्यसेद् देवि तन्तुरूपान् गुणानथ । चतुर्थपञ्चमाभ्यां तु स्वराभ्यां वरवर्णिनि ॥ १६ ॥
मायाविद्यामये देवि अध ऊर्ध्वं छदे न्यसेत् । षष्ठस्वरेण पद्मं च कल्पयित्वा वरानने ॥ १७ ॥
संध्यक्षरैर्महादेवि चतुर्भिश्च यथाक्रमम् । वामाद्याः पूजयेदेता वामा ज्येष्ठा ततः परम् ॥ १८ ॥
रौद्री चेच्छा च ता ध्येया ज्वालारूपा महेश्वरि । इत्थं संकल्पिते पीठे मूर्ति संकल्प्य मूलतः ॥ १९ ॥
तस्मिन्नावाह्य देवेशं तुम्बुरुं देवि पूजयेत् । चतुर्द्वारसमायुक्तचतुरस्रत्रयावृते ॥ २० ॥
अष्टपत्राम्बुजे देवि यजेदावरणैः सह । आदावङ्गानि सम्पूज्य केसरेषु यथा पुरा ॥ २१ ॥
दिक्पत्रेषु यजेद्देवि स्वस्वबीजादिकाः क्रमात् । वामाद्याः पूर्वमुदिता रक्ता रक्तानुलेपनाः ॥ २२ ॥
अरुणांशुकपुष्पाढ्यास्ताम्बूलापूरिताननाः । वल्लकीवादनरता मदविभ्रममन्थराः ॥ २३ ॥
कोणपत्रेषु चाभ्यर्च्या दूतीर्बीजादिकाः क्रमात् । दुर्भगा सुभगा चैव कराली मोहिनी ततः ॥ २४ ॥
(बद्धाञ्जलिपुटाः किञ्चिदानम्रवदनाम्बुजाः । देवीसदृश भूषाढ्यास्तासां बीजानि पार्वती ॥ २५ ॥
बकः श्वेतो भृगुश्चैव नकुली बिन्दुभूषिताः ।) बहिर्वीथीद्वये देवि लोकेशान्सायुधान्यजेत् ॥ २६ ॥
इत्थं यो भजते देवि तुम्बुरुं विधिवन्नरः । न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते ॥ २७ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीतुम्बुरुरुद्राय देवतायै नमः । इति विन्यस्य, मम सर्वाभीष्ट० सिद्धये विनियोगः इति कृताञ्जलिर्वदेत् । क्ष्म्रां हृदयाय नमः । क्ष्म्रीं शिरसे स्वाहा । क्ष्म्रूं शिखायै वषट् । क्ष्म्रैं कवचाय हुं । क्ष्म्रौं नेत्रत्रयाय वौषट् । क्ष्म्रः अस्त्राय फट् । इति षडङ्गमन्त्रान् कनिष्ठादितलान्तं करयोर्विन्यस्य, पुनः क्षमरयूं नमः इति केवलबीजमेव कनिष्ठाद्यंगुलिषु विन्यस्य, करयोश्च व्यापकं कृत्वा, कनिष्ठयोः क्षमरयूं

तुम्बुरुरुद्राय नमः । अनामिकयोः जमरयूं जयायै नमः । मध्यमयोः भमरयूं विजयायै नमः । तर्जन्योः समरयूं अजितायै नमः । अंगुष्ठयोः हमरयूं अपराजितायै नमः । इति विन्यस्य, पादादिमूर्धावधि क्षमरयूं नमः इति मुष्टिना विन्यस्य, पुनर्मूर्धादिपादपर्यन्तं करतलाभ्यां बीजं विन्यस्य, पुनः पूर्ववत् षडङ्गानि विन्यस्य, शिरो वदनहृन्नाभिगुदेषु प्राग्वद् देवं देवीश्च विन्यस्य, ध्यानाद्यात्मपूजान्ते पूजाचक्रं यथोक्तं कृत्वा संस्थाप्य, तत्र मण्डूकादिसिंहासनान्तं प्राग्वत्पीठं संपूज्य, सिंहासनस्य पादेषु ॠं धर्माय नमः । ॠं ज्ञानाय नमः । लृं वैराग्याय नमः । लॄं ऐश्वर्याय नमः । तस्य गात्रेषु लृं अधर्माय नमः । लॄं अज्ञानाय नमः । ॠं अवैराग्याय नमः । ॠं अनैश्वर्याय नमः । इति सम्पूज्य, ततोऽनन्तं पद्ममानन्दकन्दं संविन्नालं च सम्पूज्य ईं प्रकृतिमयपत्रेभ्यो० । ऊं विकारमयकेसरेभ्यो० । उं सर्वतत्त्वरूपायै कर्णिकायै० । इति सम्पूजयेत् । अत्र "षष्ठस्वरेण पद्मं" चेत्यनेन पद्ममध्यस्था कर्णिका लक्ष्यते, पद्मस्य प्रागेव पूजितत्वादिति । ततः सूर्यादिमण्डलपूजान्ते इं प्रबोधात्मने सत्त्वाय नमः, इत्यादिगुणत्रयं इकारादि, ततः ईं मायायै० । ॐ विद्यायै० । इति यथावत् संपूज्यात्मचतुष्टयपूजान्ते दिग्दलकेसरेषु—एं वामायै नमः । ऐं ज्येष्ठायै० । ओं रौद्र्यै० । औं इच्छायै० । इति शक्तिचतुष्टयं पूजयेत् । अत्र नवशक्तिपूजनं नास्तीति प्रतीयते, विशिष्य सबीजशक्तिचतुष्टयमात्रस्योक्तत्वात् । शैवपीठे नवशक्तिबहिर्भूतेच्छाशक्तेः संग्रहाच्चेति । इत्थं पीठपूजां विधाय, तत्र मूर्तिकल्पनादिषडङ्गपूजान्तेऽष्टदलेषु देवाग्रादिदिग्दलचतुष्टये प्रादक्षिण्येन—एं वामायै नमः । ऐं ज्येष्ठायै० । ओं रौद्र्यै० । औं इच्छायै० । अग्न्यादिकोणपत्रेषु—शं दुर्भगायै नमः । षं सुभगायै० । सं करालयै० । हं मोहिन्यै० । इति संपूज्येन्द्राद्यर्चनादि सर्वं समापयेदिति । तथा—

लक्षमेकं जपेन्मन्त्रं तद्दशांशं घृतैर्हुनेत् । तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत्ततः ॥ २८ ॥
वायुवह्नियुगान्तःस्थं बीजं स्मृत्वा जपेत्प्रिये । ज्वरशूलमहारोगा नश्यन्ति तेन तत्क्षणात् ॥ २९ ॥
कुपितस्य हृदम्भोजे स्मृत्वा बीजमिदं जपेत् । तत्कोपं शमयेच्छीघ्रं ध्रुवं मन्त्रप्रभावतः ॥ ३० ॥
एतन्मन्त्राभिजप्तं तु जलं प्रातः पिबेन्नरः । हृद्रोगकामलाकासश्वासविष्टम्भकास्तथा ॥ ३१ ॥
नश्यन्ति तत्क्षणादेव नात्र कार्या विचारणा । मण्डलं नवनाभाख्यं कृत्वा रम्यं महेश्वरि ॥ ३२ ॥
तत्र संस्थापयेद्रम्यान् कलशान् नव मन्त्रवित् । देवं मध्येऽष्टसु तथा देवीर्दूतीश्च पूजयेत् ॥ ३३ ॥
पुरोक्तवर्त्मना सिञ्चेत्कुलजां योषितं शिवे । सुतं वन्ध्यापि सा सूते किमन्या कन्यकाप्रसूः ॥ ३४ ॥
राजाभिषिक्तो विजयी भूयाद्देवि न संशयः । भूतप्रेतादिकाः कृत्या रोगा नश्यन्ति सेचनात् ॥ ३५ ॥
अष्टपत्राम्बुजे मध्ये ससाध्यं बीजमालिखेत् । केसरेषु स्वरान् देवि दिक्पत्रेषु लिखेत्ततः ॥ ३६ ॥
पूर्वोक्तदेवीबीजानि विदिक्पत्रेषु पार्वती । दूतीमन्त्रान् पुरा प्रोक्तानालिखेत्तद्बहिः पुनः ॥ ३७ ॥
वृत्तद्वयं विधायाथ तयोर्मध्ये समालिखेत् । ककारादिक्षकारान्तान् बिन्दुयुक्तान् महेश्वरि ॥ ३८ ॥
तद्बहिश्चतुरस्रेण वेष्टयेज्जगदीश्वरि । एतद्यन्त्रं महादेवि प्रोक्तं श्रीतुम्बुरोर्महत् ॥ ३९ ॥
साधितं जपहोमाभ्यां धृतं नाशयति क्षणात् । रोगकृत्याग्रहान् सम्यग् भूतापस्मारकादिकान् ॥ ४० ॥

अत्र यन्त्ररचनाप्रकारः सुगम एव ॥ अथ क्षेत्रपालमन्त्रः श्रीकण्ठसंहितायाम्—

क्षेत्रपालमनुं वक्ष्ये शृणु देवि यथाविधि । संवर्तोऽनुग्रहेन्द्वाढ्यो रुद्रसंवर्तकौ पुनः ॥ १ ॥
आषाढी रेवतीयुक्तो लोहितोऽनन्तसंयुतः । पिनाकी चानन्तयुतो वाली मेषस्ततो भवेत् ॥ २ ॥
महाकालो विसर्गाढ्यस्ताराद्योऽयं मनुः प्रिये । .... ॥

संवर्तः क्षकारः, अनुग्रह औ, इन्दुरनुस्वारस्तेन क्षौं इति । रुद्र एकारः, संवर्तः क्ष, तेन क्षे इति । आषाढी त, रेवती रेफस्तद्युक्तस्तेन त्र इति । लोहितः प, अनन्तयुतः साकारस्तेन पा इति । पिनाकी ल, अनन्त आ, तेन ला इति । वाली य । मेषो न । महाकालो म विसर्गाढ्यस्तेन मः इति । ताराद्यः

प्रणवाद्यः ॥ तथा—

मुनिर्ब्रह्मा समुद्दिष्टो गायत्री च्छन्द ईरितम् । क्षेत्रपालो देवतास्य क्षं बीजं परिकीर्तितम् ॥ ३ ॥
नमः शक्तिरिति प्रोक्ता ह्यभीष्टसिद्धिकरः स्मृतः । षड्दीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत् ॥ ४ ॥
ततः संचिन्तयेद्देवं क्षेत्रपालमनन्यधीः । अञ्जनाद्रिप्रतीकाशमूर्ध्वपिङ्गजटाधरम् ॥ ५ ॥
वर्तुलोग्रत्रिनयनं भीमसर्पविभूषणम् । दंष्ट्राकरालवदनं भीमरूपं दिगम्बरम् ॥ ६ ॥
द्विभुजं दक्षिणे हस्ते गदां वामे कपालकम् । दधतं चिन्तयेद्देवि शैवे पीठे समर्चयेत् ॥ ७ ॥
पद्ममष्टदलं बाह्ये दिग्द्वारैर्भूगृहैर्वृतम् । कृत्वा तत्र समावाह्य गन्धाद्यैरर्चयेद्द्विभुम् ॥ ८ ॥
आदावङ्गानि सम्पूज्य पूर्ववत्परमेश्वरि । अर्चयेदष्टपत्रेषु किङ्कराष्टकमद्रिजे ॥ ९ ॥
अनलश्चाग्निकेशश्च (करालो घण्टिकारवः । महाकोपः पिशिताशः पिङ्गाक्षस्तदनन्तरम् ॥ १० ॥
ऊर्ध्वकेश इमे चाष्टौ) क्षेत्रपालस्य किङ्कराः । लोकेशांश्च तदस्त्राणि पूर्ववत् परिपूजयेत् ॥ ११ ॥
धूपदीपादिकं दत्त्वा ततस्तस्मै बलिं हरेत् । एह्येहीति समुच्चार्य विद्विषोऽन्ते मुरुद्वयम् ॥ १२ ॥
भञ्जय-द्वितयं पश्चान्नर्तय-द्वितीयं ततः । विघ्नयुग्मं महान्ते स्याद्भैरव क्षेत्रपाल ॥ १३ ॥
बलि-पदं समुच्चार्य देवि गृह्णद्वयं द्विठः । बलिमन्त्रः समाख्यातः सर्वकामफलप्रदः ॥ १४ ॥

बलिर्नैवेद्यम् । तत्र मन्त्रः—एहीति । द्विठः स्वाहाकारः । अन्यत् सुगमम् ॥ अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते, शिरसि ब्रह्मणे ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीक्षेत्रपालाय देवतायै नमः । गुह्ये क्षं बीजाय नमः । पादयोः नमः शक्तये नमः । इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिर्वदेत् । ततः क्षां हृदयाय नमः । क्षीं शिरसे स्वाहा । क्षूं शिखायै वषट् । क्षैं कवचाय हुं । क्षौं नेत्राभ्यां वौषट् । क्षः अस्त्राय फट् । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादि-षडङ्गेष्वपि न्यसेत् । ततो ध्यानादिषडङ्गपूजान्तेऽष्टदलेषु—अनलाय नमः । अग्निकेशाय० । करालाय० । घण्टिकारवाय० । महाकोपाय० । पिशिताशनाय० । पिङ्गाक्षाय० । ऊर्ध्वकेशाय नमः । इति सम्पूज्य लोकेशार्चादि सर्वं समापयेदिति । तथा—

एकलक्षं जपेन्मन्त्रं जुहुयात्तद्दशांशतः । चरुणा घृतसिक्तेन तर्पणादि ततश्चरेत् ॥ १५ ॥
रात्रौ गृहाङ्गणे रम्ये कृत्वा स्थण्डिलमुत्तमम् । आवाह्य तत्र सम्पूज्य क्षेत्रेशं प्रोक्तवर्त्मना ॥ १६ ॥
अन्नव्यञ्जनदुग्धाद्यैः कृत्वा वै सिक्थकं महत् । पूर्वोक्तमनुना देवि तस्य हस्ते बलिं हरेत् ॥ १७ ॥
बलिनानेन सन्तुष्टः क्षेत्रपालो मुदान्वितः । ऐश्वर्यविजयारोग्यश्रीसौभाग्यादिसम्पदः ॥ १८ ॥
ददाति रौद्रभूतार्तिकृत्याद्याशु निवारयेत् । ....॥

अत्र रात्रौ बलिदानं काम्यं । नित्यपूजायामपि नैवेद्यं प्रोक्तमन्त्रेणैव देयम् ॥

अथ वटुकभैरवमन्त्रः कौलेशकोटिप्रभेदे—

अथ वक्ष्ये महादेवि भैरवस्येश्वरेश्वरि । मन्त्ररत्नं महागुप्तं दुष्टग्रहनिकृन्तनम् ॥ १ ॥
सर्वशत्रुक्षयकरं सर्वव्याधिविनाशनम् । सर्वापत्तारकं देवि सर्वसौभाग्यदायकम् ॥ २ ॥
वश्याकर्षणविद्वेषस्तम्भनोच्चाटमारणे । निग्रहे व्याधिकरणे प्रशस्तमखिलेष्टदम् ॥ ३ ॥
उद्धरिष्ये महामन्त्रं शृणुष्वावहिता प्रिये । व्योमाग्निशान्तितिथिभिरुद्धरेत्प्रथमाक्षरम् ॥ ४ ॥
जलं च खेचरी कर्णयुता काय ततः शिवे । अनन्तो लोहितश्चात्रिः कर्णवान् मीनयुग्मकम् ॥ ५ ॥
वह्निष्टपञ्चमोऽनन्तयुतः पवन एव च । क्रोधी कर्णयुतो वह्निः कर्णवान् परमेश्वरि ॥ ६ ॥
पुनरेतद्द्वयं प्रोक्त्वा द्वितीयार्णादि पार्वति । चतुष्टयं तु वर्णानां पुनराद्यं समुद्धरेत् ॥ ७ ॥
एकविंशतिवर्णात्मा मन्त्रराजः समुद्धृतः । गोपनीयः प्रयत्नेन त्रैलोक्येष्वपि दुर्लभः ॥ ८ ॥

व्योम ह, अग्नी रेफः, शान्ति ई, तिथिरनुस्वारः, एतैर्भुवनेश्वरीबीजम्। जलं ब। खेचरी ट, कर्णयुता उकारेण सहिता, तेन टु इति। काय स्वरूपं। अनन्त आ। अत्र यकार—आकारयोर्न सन्धिः एकविंशतिवर्ण इत्युक्तेः। लोहितः प। अत्रिः द, कर्णवान् उकारयुक्तस्तेन दु इति। मीनयुग्मं धकारद्वयं, तेन द्ध इति। वह्निः रेफः। टपञ्चमो ण, अनन्त आ, तेन णा इति। पवनो य। क्रोधी क, कर्ण उ, तेन कु इति। वह्नी र, कर्ण उ, तेन रु इति। पुनरेतद्द्वयं कुरु इति। द्वितीयार्णादिचतुष्टयं वटुकाय इति। आद्यं ह्रीं इति ॥ तथा—

ऋषिरुक्तो महादेवि बृहदारण्यसंज्ञकः। अनुष्टुप्छन्द इत्युक्तं भैरवो देवता शिवे ॥ ९ ॥
शक्तिर्बीजं च शक्तिश्च आं कीलकमुदाहृतम्। आद्यक्षरयुगं देवि पञ्चह्रस्वान्वितं कुरु ॥ १० ॥
सद्यादिप्रतिलोमेन नपुंसकविवर्जितम्। एतद्बीजद्वयाद्यास्तु न्यस्तव्याः पञ्चमूर्तयः ॥ ११ ॥
अंगुष्ठादिष्वअंगुलीषु, मूर्धास्यहृदयेषु च। सगुह्यचरणेष्वेवं, मूर्धास्ये दक्षकर्णके ॥ १२ ॥
वामकर्णे च चूडाध ऊर्ध्वपूर्वान्तिकौत्तर–। पश्चिमेषु च वक्त्रेषु मूर्तयस्ता महेश्वरि ॥ १३ ॥
ईशानाख्यस्तत्पुरुषोऽघोरो देवि तृतीयकः। वामदेवश्चतुर्थः स्यात्सद्योजातस्तु पञ्चमः ॥ १४ ॥
पुनराद्यर्णयुगलं षड्दीर्घस्वरभेदितम्। कृत्वा तैस्तु षडङ्गानि जातियुक्तानि कल्पयेत् ॥ १५ ॥

इति ॥ श्रीरुद्रयामले—श्रीदेव्युवाच।

देवदेव जगन्नाथ शम्भोस्त्रैलोक्यनायक। भैरवस्य विधिं भूयो ममाचक्ष्व महामुने ॥ १ ॥
येन कार्याणि सिद्ध्यन्ति साधकानां निरन्तरम्। सुगोप्यमपि देवेशि विधिं प्रब्रूहि शङ्कर ॥ २ ॥
येनाहं ते प्रिया देव सदा वर्ते निरन्तरम्। ततः कृपां समाधाय विधिं कथय शोभन ॥ ३ ॥

श्रीभैरव उवाच।

शृणु देवि प्रवक्ष्यामि वटुकस्य महात्मनः। विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्लभम् ॥ ४ ॥
सूत्रेणैव सुसंक्षेपात्कथयिष्यामि वल्लभे। येन विज्ञानमात्रेण त्रैलोक्यं साधयेत्सुधीः ॥ ५ ॥
एकदा देवदेवेशि तपसे मन्दराचलम्। गतोऽहं परमानन्दान्मूलप्रकृतिमीश्वरीम् ॥ ६ ॥
चक्रे परमसन्तुष्टां तपसा भावितात्मना। साकाशरूपिणी देवी प्रोवाच वचनं मुदा ॥ ७ ॥
तुष्टाहं शङ्कर प्रीता वरं वरय दुर्लभम्। इति वाक्यं समाकर्ण्य प्रोवाचाहं सुवल्लभे ॥ ८ ॥
देवि मातर्जगत्पूज्ये यदि दास्यसि मे वरम्। दुर्लभं कस्यचिद् ब्रूहि विधानं परमाशयात् ॥ ९ ॥
मन्त्रस्य येन सिद्ध्यन्ति सर्वकार्याणि सांप्रतम्। इति वाक्यं च मे श्रुत्वा मूलभूता सनातनी ॥ १० ॥
उवाच यादृशं देवि विधानं शृणु वल्लभे। वटुकाख्यस्य देवस्य भैरवस्य महात्मनः ॥ ११ ॥
ब्रह्मविष्णुमहेशाद्यैर्वन्दितस्य दयानिधेः। न्यासा एकादश प्रोक्ता वटुकाराधने शिवे ॥ १२ ॥
यान् विना नैव सिद्धिः स्याद्वर्षाणामयुतैरपि। .... ॥

आदौ न्यासं प्रेतबीजेन कार्यं पश्चात्साक्षात् सिंहबीजेन देवि।
न्यासं कार्यं क्वाणबीजेन तद्वन्मन्याबीजन्यासमग्रे विदध्यात् ॥ १३ ॥

महाश्रीबीजतो न्यासं प्राणबीजेन चापरम्। घण्टाबीजस्य च न्यासं विधाय ख्यातिबीजतः ॥ १४ ॥
मूलबीजेन पश्चाच्च न्यासं कृत्वा महामतिः। भ्रामरीबीजतो न्यासं विदध्यात्प्रीतिसंयुतः ॥ १५ ॥
एवं न्यासान्–दशादौ तु न करोति नरो यदा। त्वां शपेऽहं वरारोहे तावन्मन्त्रो न सिध्यति ॥ १६ ॥

श्रीदेव्युवाच।

देवदेव जगन्नाथ शम्भो संसारतारक। कृपां कृत्वा न्यासविधिं प्राकट्येन निरूपय ॥ १७ ॥
कालेनेह यथाल्पेन साधकः सिद्धिमाप्नुयात्। गोपनीयो न मन्त्रोऽयं वटुकाख्यो जगद्गुरो ॥ १८ ॥

तथा निरूपय विभो बालकोऽपि यथा लभेत् । श्रीशिव उवाच ।
शृणु देवि जगत्पूज्ये न्यासबीजानि शोभने । प्रकटानि यथा शश्वत्कथयामि हिताय ते ॥ १९ ॥
स्थानेषु येषु बीजानि न्यस्तव्यानि महात्मभिः । तथात्र प्रवदिष्यामि शृणु मत्प्राणवल्लभे ॥ २० ॥
शिवचन्द्रशिवैः शक्रस्वरोपेतैः सबिन्दुभिः । प्रेतबीजं समाख्यातं तेनाङ्गानि न्यसेच्च षट् ॥ २१ ॥
हृच्छिरश्च शिखानेत्रकवचास्त्रेषु सुन्दरि । ....॥

शिवो ह, चन्द्रः स, पुनर्हं, शक्रस्वरः औ, बिन्दुरनुस्वारस्तेन ह्सहौं इति । तथा—

शिवचन्द्रौ ससंवर्तौ कालवामाक्षिभूषितौ । बिन्दुनादयुतौ देवि न्यासात्सान्निध्यकारकम् ॥ २२ ॥
सिंहबीजमिदं देवि विन्यसेत्सुरसुन्दरि । मूर्ध्नि बाह्वोश्च लिङ्गे च नाभौ हस्तांगुलीषु च ॥ २३ ॥
पादांगुलीषु देवेशि विन्यसेत्परमेश्वरि । ....॥

शिवो ह, चन्द्रः स, संवर्तः क्ष, कालो म, वामाक्षि ई, बिन्दुरनुस्वारः, नादोऽर्धचन्द्रस्तैः ह्सक्ष्म्रीँ इति । तथा—

अजेशोऽग्निसमारूढः शक्रस्वरशशीयुतः । क्वाणबीजमिदं प्रोक्तं विन्यसेत्परमेश्वरि ॥ २४ ॥
ब्रह्मरन्ध्रे मुखे नेत्रयुगे ग्रीवानसोरपि । कपोलयोश्च चिबुके ब्रह्मरन्ध्रे पुनर्न्यसेत् ॥ २५ ॥

अजेशो झ, अग्नी र, शक्रस्वर औ, शशी बिन्दुस्तैः झ्रौं इति । तथा—

कालशक्रशिवाः सद्योबिन्दुनादविभूषिताः । मन्याबीजं महेशानि पादयोर्हस्तयोस्तथा ॥ २६ ॥
नेत्रयोः श्रोत्रयोः कुक्ष्योर्मेढ्रे चैव प्रविन्यसेत् । ....॥

कालो म, शक्रो ल, शिवो ह, सद्यः ओं, बिन्दुरनुस्वारः, नादोऽर्धचन्द्रस्तैः म्ल्हों इति । तथा—

अस्थ्यग्निवामकर्णेन्दुनादैर्देवि समीरितम् । महाश्रीबीजमीशानि चिबुके पादयोर्गले ॥ २७ ॥
पादयोर्हृदये पादद्वये नाभौ च पादयोः । ....॥

अस्थि श, अग्नी र, वामकर्ण ऊ, इन्दुनादौ प्राग्वत्, तेन श्रूँ इति । तथा—

लोहिताग्न्यासनो वामकर्णबिन्दुभिरद्रिजे । प्राणबीजं मुखे देवि हृदये नाभिमण्डले ॥ २८ ॥
हृदये पादयेर्देवि हृदये दक्षकुक्षिके । हृदये वामकुक्षौ च हृदये दक्षपत्तले ॥ २९ ॥
हृदये वामपादे च हृदये दक्षनेत्रके । हृदये वामनेत्रे च हृदये दक्षघोणके ॥ ३० ॥
हृदये वामघोणे च हृदये दक्षकर्णके । हृदये वामकर्णे च हृदये विन्यसेत्प्रिये ॥ ३१ ॥

लोहितः प, अग्नी र, वामकर्ण ऊ, बहुवचनान्नादोऽपि विज्ञेयस्तेन प्रूँ इति । तथा—

कतुरीयोऽग्निमारूढो वामकर्णेन्दुनादवान् । घण्टाबीजं महादेवि विन्यसेत्परमेश्वरि ॥ ३२ ॥
घण्टिकायां च नाभौ च घण्टिकायां हृदि न्यसेत् । पादयोर्हृदये कट्यां मस्तके मस्तके कटौ ॥ ३३ ॥
स्तनयोर्गुल्फयोश्चैव गुल्फयोः स्तनयोर्न्यसेत् । ....॥

कतुरीयो घ, अग्नी रेफः, वामकर्ण ऊ, नादबिन्दु प्राग्वत्, तेन घ्रूँ, इति । तथा—

चण्डीशो वायुवह्न्याढ्यो वामकर्णेन्दुनादवान् । ख्यातिबीजमिति प्रोक्तं विन्यसेद्देवि साधकः ॥ ३४ ॥
मस्तके पादयोश्चैव ग्रीवायां नाभिमण्डले । गले च हृदि देवेशि जङ्घयोर्नेत्रयोस्तथा ॥ ३५ ॥
कर्णयोर्बाहुयुग्मे च स्तनयोश्च प्रविन्यसेत् । ....॥

चण्डीशः ख, वायुः य, वह्नी र, वामकर्ण ऊ, इन्दुनादौ प्राग्वत्, तेन ख्य्रूँ इति । तथा—

प्रणवो मूलबीजं स्याद्धृदये पादयोः प्रिये । हस्तयोः कर्णयोर्नासायुगे चैव प्रविन्यसेत् ॥ ३६ ॥

प्रणव ॐकारः इति । तथा—

(द्विरण्डरेवतीशक्रचन्द्रहंसत्रिमूर्तिभिः । सबिन्दुनादैर्देवेशि भ्रामरीबीजमीरितम् ॥ ३७ ॥

द्विरण्डो भ, रेवती र, शक्रो ल, चन्द्रः स, हंसो ह, त्रिमूर्तिः ई, बिन्दुनादौ प्राग्वत्, तेन भरलसह्रीं इति। तथा—

मुखे नेत्रद्वये कर्णद्वये चैव कपोलयोः। गण्डयोः कण्ठदेशे च स्तनयोर्हृदि पादयोः॥ ३८॥
चिबुके मस्तके बाह्वोः स्कन्धयोर्दन्तलेखयोः। ब्रह्मरन्ध्रे तथाधारे भ्रूमध्ये च न्यसेत्प्रिये॥ ३९॥
इति न्यासान् समाधाय पुरश्चरणकारकः। यथोक्तन्यासकारी च यदि नो वरमाप्नुयात्॥ ४०॥
तदा कन्यादूषणोत्थं मम पापं प्रजायताम्। न्यासैरेतैर्वरारोहे ब्रह्महत्या विनश्यति॥ ४१॥
का कथान्यस्य पापस्य सत्यं सत्यं वदामि ते। मर्मन्यासानथो वक्ष्ये त्रीन् देवस्य महात्मनः॥ ४२॥
यान् विधाय नरो विन्देत्सिद्धिं लोकेषु दुर्लभाम्। आकूतबीजं विन्यस्य मस्तके गण्डयोर्मुखे॥ ४३॥
कालबीजं चक्षुषोश्च कर्णयोरपि विन्यसेत्। नाभौ लिङ्गे गुदे वापि विद्याबीजं कपोलयोः॥ ४४॥
ब्रह्मरन्ध्रे दन्तपंक्त्योर्विन्यसेत्साधकोत्तमः। श्रीदेव्युवाच।
भगवन् करुणासिन्धो दीनबन्धो जगद्गुरो। कृपां कृत्वा समाख्याहि तन्त्रैरेव पृथक्पृथक्॥ ४६॥
साधकस्तु यथा सिद्धिमचिरेणैव विन्दति। ··· ··· ···· ··· ····॥

श्रीमहादेव उवाच।

शृणु देवि प्रवक्ष्यामि न्यासत्रयविधिं पृथक्। दीर्घाकालाग्निशक्राणामधः कालानलान्त्यकाः॥ ४६॥
वह्न्यस्थिवह्निगगनचन्द्रवामाक्षिमण्डिताः। बिन्दुनादसमाक्रान्ता बीजमाकूतमुद्धृतम्॥ ४७॥

दीर्घा न, कालो म, अग्निः र, शक्रो ल, कालो म, अनलः र, अन्त्यः क्ष, वह्निः र, अस्थि श, वह्निः र, गगनं ह, चन्द्रः स, वामाक्षि ई, बिन्द्वादिः प्राग्वत्। तेन नमरलमरक्षरशरहसीं इति। तथा—

ब्रह्माग्नीन्द्रेन्द्वग्निकालवह्निवामाक्षिभिः प्रिये। बिन्दुनादौ च देवेशि कालबीजमितीरितम्॥ ४८॥

ब्रह्मा क, अग्निः र, इन्द्रो ल, इन्दुः स, अग्निः र, कालो म, वह्निः र, वामाक्षि ई, बिन्दुनादौ प्राग्वत्। तेन करलसरमरीं इति। तथा—

संवर्तानलचन्द्रोऽग्निः शिवचन्द्रत्रिमूर्तिभिः। सबिन्दुनादैर्देवेशि विद्याबीजं समुद्धृतम्॥ ४९॥

संवर्तः क्ष, अनलो रेफः, चन्द्रः स, अग्नी र, शिवो ह, चन्द्रः स, त्रिमूर्तिः ई, बिन्द्वादि पूर्ववत्। तेन क्षरसरहसीं इति। तथा—

एतन्न्यासत्रयं प्रोक्तं साधकाभीष्टसिद्धिदम्। यस्य प्रसादमासाद्य भैरवः शीघ्रसिद्धिदः॥ ५०॥
शृणु देवि प्रवक्ष्यामि शृङ्खलान्यासमुत्तमम्। यस्य प्रसादाच्च शिवे वटुकः सिद्धिदो भवेत्॥ ५१॥
मस्तके दक्षनेत्रे च वामनेत्रे तथैव च। दक्षकर्णे वामकर्णे कपोले दक्षिणे तथा॥ ५२॥
वामे कपोले दक्षे च गण्डके वामके पुनः। चिबुकेऽथ गले स्कन्धे दक्षिणे वामके तथा॥ ५३॥
स्तने दक्षे च वामे च हृदये दक्षकुक्षिके। वामकुक्षौ च नाभौ च दक्षजङ्घे च वामके॥ ५४॥
लिङ्गे मेढ्रे दक्षिणे च वामे च वरवर्णिनि। मूलाधारे दक्षगुल्फे वामगुल्फे तथैव च॥ ५५॥
दक्षपादे च वामे च दक्षपांगुलीषु च। वामपादांगुलीष्वेवं ब्रह्मरन्ध्रे तथैव च॥ ५६॥
मूलाधारे पुनश्चैव पुनर्वै ब्रह्मरन्ध्रके। महापराख्यं बीजं च विन्यसेत्साधकोत्तमः॥ ५७॥

मेढ्रशब्दो वृषणवाची दक्षवामनिर्देशाल्लिङ्गस्योक्तत्वाच्चेति।

चन्द्रसूर्यौ पुनस्तौ च मही ब्रह्मा मही प्रिये। त्रिमूर्तिरस्थि वह्न्यम्बुवह्न्यम्बुधरणीजलम्॥ ५८॥
षष्ठस्वरस्त्रिमूर्तीन्दुनादभूषितमस्तकम्। महापराख्यबीजं ते कथितं सुरवन्दिते॥ ५९॥
न्यासेनानेन सुश्रोणि साक्षाच्छिवसमो भवेत्। ···· ···· ···· ···· ····॥

चन्द्रसूर्यौ सहौ, पुनस्तौ चन्द्रसूर्यौ सहावेवेत्यर्थः, मही ल, ब्रह्मा क, मही ल, त्रिमूर्तिः ई, अस्थि श,

वह्निः र, अम्बु व, वह्निः र, अम्बु व, धरणी ल, जलं व, षष्ठस्वरः ऊ, त्रिमूर्तिः ई, इन्दुनादौ पूर्ववत्।
तेन सहसहलकलईशरवरवलवऊइँ इति। तथा—
वटुकस्याथ वक्ष्यामि मातृकान्यासमुत्तमम्। कृतेन येन वटुकः साधकस्य करे भवेत्॥ ६०॥
श्रीबीजैः पञ्चभिर्यत्र मातृकामण्डलं भवेत्। प्रोक्तमादौ च झान्ते च तान्ते फान्ते तथान्तके॥ ६१॥
वटुकस्य परं पूज्यं मातृकान्यासमुत्तमम्। विज्ञाय साधयेत्प्राज्ञः स सद्यः शिवतां व्रजेत्॥ ६२॥
विनेमं मातृकान्यासं योऽन्येन न्यासमाचरेत्। वटुकस्तस्य कुपितः सद्यः शापं प्रयच्छति॥ ६३॥
तस्मान्न्यासः प्रकर्तव्यः साधकेन विपश्चिता। सर्वेषु मातृस्थानेषु वपुष्पावित्र्यहेतवे॥ ६४॥
मातृकान्यासमेवं हि त्यक्त्वा योऽन्यत्समाचरेत्। वर्षकोटिप्रयत्नेन स सिद्धिं नैव विन्दति॥ ६५॥
ॐकारमादौ संयोज्य सर्वं पूर्ववदाचरेत्। अयमन्तर्मातृकाख्यो न्यासः स्यात्सर्वसिद्धिदः॥ ६६॥
झकारमादिमं कृत्वा न्यासोऽयं वरवर्णिनि। नाम्ना बहिर्मातृकाख्यो न्यासचूडामणिर्भवेत्॥ ६७॥
ध्यानानि पूर्ववद्देवि कथितानि महामते। अथान्यं न्यासमाख्यास्ये शृणुष्व वरवर्णिनि॥ ६८॥
सरस्वतीमातृकाख्यं सद्यः सिद्धिप्रदायकम्। न्यसेन्महामते बीजं मातृकास्थानकेषु च॥ ६९॥
महासरस्वतीदेव्याः सद्यः सिद्धिप्रदायकम्। क्रोधीशाथः पिनाकीशो दाहकेशभुजङ्गमौ॥ ७०॥
भृग्वीशनकुलीशौ च भुजङ्गनकुलीशकौ। संवर्तबकरेवत्यस्त्रिमूर्तीन्दुविभूषिताः॥ ७१॥
महासरस्वतीबीजं कथितं देवि दुर्लभम्। ....॥

क्रोधीशः क, पिनाकीशो ल, दाहकेशो ड, भुजङ्गेशः र, भृग्वीशः स, नकुलीशो ह, भुजङ्गेशो र, नकुलीशो ह, संवर्तः क्ष, बकः श, रेवती र, त्रिमूर्तिः ई, इन्दुबिन्दुस्तेन कलडरसहरहक्षशरीँ इति। तथा—
इति न्यासाः समाख्याता वटुकाराधने शिवे। सद्यः सिद्धिकरा देवि भाग्यलभ्या न संशयः॥ ७२॥
न्यूनन्यासस्य कर्ता यः सद्यो हानिमवाप्नुयात्। एवस्मादधिकान्न्यासात् सिद्धः स्याज्जन्मजन्मनि॥७३॥

इति। तथा कौलेशकोटिप्रभेदे—
एवं न्यस्ततनुर्देवि ध्यायेद्वटुकभैरवम्। शुद्धस्फटिकसङ्काशं द्विनेत्रोत्पलशोभितम्॥ १॥
कुटिलालकसंवीतचारुस्मेरमुखाम्बुजम्। नानारत्नमयाकल्पैः किङ्किणीजालनूपुरैः॥ २॥
दीप्तं शुभ्राम्बरावीतं द्विभुजं दक्षिणे करे। त्रिशिखं सव्यहस्ते च दधानं दण्डमद्भुतम्॥ ३॥
वटुवेषधरं शम्भुं सात्त्विकं साधकः स्मरेत्। ....॥

इति। रुद्रयामलेतु—"कपालं वामहस्ते तु सूक्ष्मं दण्डं च दक्षिणे" इत्युक्तं। सात्त्विकं चतुर्भुजध्यानं तत्रैव—
श्वेतवर्णं चतुर्बाहुं जटामुकुटधारिणम्। त्रिशूलपाशहस्तं च दण्डहस्तकमण्डलुम्॥ १॥
त्रिनेत्रं नीलकण्ठं च मुक्ताभरणभूषितम्। एवं ध्यात्वा यजेद्देवं शैवे पीठे सुरेश्वरि॥ २॥
अष्टपत्रं महादेवि कर्णिकाकेसरोज्ज्वलम्। पद्मं विलिख्य तन्मध्ये कर्णिकायां सुरेश्वरि॥ ३॥
कृत्वा षट्कोणमस्यान्तस्त्रिकोणं परिकल्पयेत्। व्योमपद्मं च तन्मध्ये वसुपत्रविराजितम्॥ ४॥
कर्णिकाकेसरैर्युक्तं चतुरस्रत्रयं बहिः। चतुर्द्वारसमायुक्तं तन्मध्ये वटुकं यजेत्॥ ५॥
मूर्तिं मूलेन संकल्प्य तस्यामावाहयेत्प्रभुम्। सद्योजातेन मन्त्रेण मूलाद्येन महेश्वरि॥ ६॥
स्थापयेद्वामदेवेन मूलाद्येन च सुव्रते। सन्निधाप्याथ मूलेन केवलेनैनमीश्वरि॥ ७॥
अघोरान्तेन मूलेन सन्निरोधनमाचरेत्। मूलेन सम्मुखीकुर्यादवगुण्ठ्याथ मूलतः॥ ८॥
षडङ्गैः सकलीकृत्यामृतीकृत्य च मूलतः। परमीकरणं चैव स्वस्वमुद्राभिरुक्तवत्॥ ९॥
एतत् सर्वं विधातव्यं ततो ध्यात्वा समाहितः। कृत्वाऽसुस्थापनं तस्य मुद्राः सन्दर्शयेदथ॥ १०॥
लिङ्गाद्याः पूर्वमुद्दिष्टा योनिमुद्रा च तत्र या। तां दर्शयेत्तत्पुरुषमूलाभ्यां च महेश्वरि॥ ११॥

ईशानेन नमस्कुर्यान्मूलाद्येन महेश्वरि । आसनाद्यैश्च पुष्पान्तैरुपचारैस्ततोऽर्चयेत् ॥ १२ ॥
ततो देवाज्ञया सम्यग्यजेदावृतिदेवताः । न्यासस्थानेषु देवस्य देहेऽङ्गानि समर्चयेत् ॥ १३ ॥
देवस्य देहे देवेशि पञ्चमूर्तीर्यजेत्क्रमात् । अंगुलीदेहवक्त्रेषु त्रिविधन्यासमार्गतः ॥ १४ ॥
कर्णिकायां यजेत्पश्चात् पूर्वदक्षोत्तरेषु च । पश्चिमे देवमूर्तौ च व्योमपद्मदलेष्वथ ॥ १५ ॥
असिताङ्गं रुरुं चण्डं क्रोधमुन्मत्तभैरवम् । कपालिनं भीषणं च संहारं च समर्चयेत् ॥ १६ ॥
षट्कोणेषु षडङ्गानि यजेद् देवि यथाविधि । ततोऽष्टदलपद्मान्तः षट्कोणाद्बहिर्द्विजे ॥ १७ ॥
पूर्वादीशानपर्यन्तं वक्ष्यमाणान् समर्चयेत् । डाकिनीपुत्रकान् देवि राकिणीपुत्रकानपि ॥ १८ ॥
लाकिनीपुत्रकान् पश्चात्काकिनीपुत्रकानथ । शाकिनीपुत्रकान् भूयो हाकिनीपुत्रकांस्तथा ॥ १९ ॥
मालिनीपुत्रकान् देवि देवीपुत्रानतः परम् । उमापुत्रान् रुद्रपुत्रान् (मातृपुत्रानथेश्वरि ॥ २० ॥
वामभागे तु देवस्य यजेदेतान् क्रमेण वै । इन्द्रेशानदिशोर्मध्ये) ऊर्ध्वमुख्याः सुतान् यजेत् ॥ २१ ॥
अधोमुख्याः सुतान् देवि यजेद्रक्षोजलेशयोः । अन्तराले महेशानि पुत्रवर्गांस्त्रयोदश ॥ २२ ॥

इति । रुद्रयामलेतु—रुद्रपुत्रानन्तरं—"देशग्रामाधिपांश्चैव स्थानाधिपमनुक्रमात् । मेघनादं प्रचण्डाख्यं कालदूतं तथैव च ॥" इत्युक्तं यथोपदेशमत्रापीति ।

इत्थं सम्पूज्य तद्बाह्ये पद्मपत्रेषु पूजयेत् । ब्रह्माणीपुत्रकं पूर्वे माहेशीपुत्रमीश्वरे ॥ २३ ॥
वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले । इन्द्राणीपुत्रं देवि पश्चिमे पूजयेत्ततः ॥ २४ ॥
देवेशि नैर्ऋते पश्चान्महालक्ष्मीसुतं यजेत् । वाराहीपुत्रकं देवि दक्षिणे वह्निकोणके ॥ २५ ॥
चामुण्डापुत्रमभ्यर्चेल्लोकेशवटुकान् उमे । अष्टपत्राद्बहिर्देवि चतुरस्रान्तरे पुनः ॥ २६ ॥
अष्टदिक्षु यजेदेतान् हेरुकं त्रिपुरान्तकम् । वेतालमग्निजिह्वं च कालान्तकमतः परम् ॥ २७ ॥
करालमेकपादं च भीमरूपं महेश्वरि । अभ्यर्च्येन्द्रेशयोर्मध्ये यजेदचलमद्रिजे ॥ २८ ॥
हाटकेशं महेशानि पाशिराक्षसयोस्तथा । चतुरस्रादिरेखायां दिग्विदिक्षु सुरेश्वरि ॥ २९ ॥
अन्तरालेषु चाभ्यर्चेच्छ्रीकण्ठादीन् सुरेश्वरि । ततो द्वितीयरेखायां क्रोधीशादीन् महेश्वरि ॥ ३० ॥
आषाढ्यन्तान् समभ्यर्च्य तृतीयायां समर्चयेत् । दण्डीश्वरादिभृग्वन्तान् नकुलीशादिकाञ्छिवे ॥ ३१ ॥
देवस्य वामभागे तु पूजयेत्परमेश्वरि । दिव्यन्तरिक्षभूमिष्ठान् योगीशाञ्छक्तिसंयुतान् ॥ ३२ ॥
योगिनीश्च समभ्यर्चेदीशानादिषु सुन्दरि । कोणेषु देवदेवेशि दिगीशानायुधैः सह ॥ ३३ ॥
चतुरस्राद्बहिर्देवि पूजयेदुक्तवर्त्मना । इति सम्पूजयेद् देवं वटुकं भक्तितत्परः ॥ ३४ ॥
धर्मार्थकाममोक्षाणां पतिर्भवति मानवः । ....॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा बिन्दुविसर्ग-मातृकान्यासानन्तरं ङकारादिजकारान्तान् वर्णान् वामकरांगुल्यादितन्मणिबन्धान्तेषु स्थानेषु विन्यस्य, कलामातृकादि–श्रीबीजादिमातृकान्यासानन्तरं पुनश्च "श्रीअंनमः" इत्यनन्तरं, आंनमः इत्यादि क्षंनमः इत्यन्तं केवलाक्षराणि शुद्धमातृकावदेव विन्यस्य, पुनर्झकारादौ श्रीबीजं पुनस्थकारादौ पुनर्बकारादौ पुनः क्षकारादौ श्रींनमः इति विन्यसेत् । ततः कलडरसहरहक्षश्रीं अंनमः इत्यादिमातृकां विन्यस्य, ततः काम-बीजादिमातृकान्यासान्तं ऋष्यादिन्यासं कुर्यात् । यथा— शिरसि बृहदारण्यकऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीवटुकाय भैरवाय देवतायै नमः । गुह्ये ह्रीं बीजाय नमः । पादयोः ह्रीं शक्तये नमः । नाभौ आंकीलकाय नमः । इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः, इति कृताञ्जलिर्वदेत् । ततः अंगुष्ठयोः ह्लीं वीं ईशानाय नमः । तर्जन्योः ह्रें वें तत्पुरुषाय नमः । मध्यमयोः ह्रूं वुं अघोराय नमः । अना-मिकयोः ह्रिं विं वामदेवाय नमः । कनिष्ठयोः ह्रं वं सद्योजाताय नमः । ततः शिरसि मुखे हृदये गुह्ये

पादयोश्चैता एव मूर्तीर्विन्यस्य, पुनः शिरसि ह्लौं ईशानायोर्ध्ववक्त्राय नमः। मुखे ह्लैं तत्पुरुषाय पूर्ववक्त्राय०। दक्षकर्णे ह्लूं अघोराय दक्षिणवक्त्राय०। वामकर्णे ह्लिं वामदेवायोत्तरवक्त्राय नमः। चूडाधः ह्लं सद्योजाताय पश्चिमवक्त्राय नमः। इति विन्यस्य, ह्लां ह्लां हृदयाय नमः। ह्लीं ह्लीं शिरसे स्वाहा। ह्लूं ह्लूं शिखायै वषट्। ह्लैं ह्लैं कवचाय हुं। ह्लौं ह्लौं नेत्राभ्यां वौषट्। ह्लः ह्लः अस्त्राय फट्, इति षडङ्गमन्त्रानङ्गुष्ठादितलान्तं करयोर्विन्यस्य, हृदयादिषु च विन्यस्यास्त्रमन्त्रेण तालत्रयं छोटिकाभिर्दशदिग्बन्धनं च कृत्वा, पुनः "हसहौं" इति प्रेतबीजेन षडङ्गन्यासं कृत्वा, शिरसि हस्क्ष्मीं नमः, एवं बाहुलिङ्गनाभिहस्तांगुलीषु पादांगुलीषु चेदमेव बीजं न्यसेत्। ततो ब्रह्मरन्ध्रे झ्रौं नमः। एवं मुखनेत्रद्वयग्रीवानासाकपोलद्वयचिबुकब्रह्मरन्ध्रेषु चेदमेव बीजं न्यसेत्। ततः पादयोः मलहौं नमः, एवं हस्तद्वयनेत्रद्वयश्रोत्रद्वयकुक्षिद्वयलिङ्गेषु चेदमेव बीजं न्यसेत्। ततः चिबुके श्रूं नमः। एवं पादद्वयगलपादद्वयहृदयपादद्वयनाभिपादद्वयेषु चेदमेव बीजं न्यसेत्। ततो मुखे स्रूं नमः, एवं हृदयनाभिहृदयपादद्वयहृदयदक्षकुक्षिहृदयवामकुक्षिहृदयदक्षपादतलहृदयवामपादतलहृदयदक्षनेत्रहृदयवामनेत्रहृदयदक्षनासाहृदयवामनासाहृदयदक्षकर्णहृदयवामकर्णहृदयेषु चेदमेव बीजं न्यसेत्। ततो गलघण्टिकायां घ्रूं नमः, एवं नाभिघण्टिकाहृदयपादद्वयहृदयकटिमस्तकमस्तककटिस्तनद्वयगुल्फद्वयगुल्फद्वयस्तनद्वयेषु चेदमेव बीजं न्यसेत्। ततो मस्तके खयरूँ नमः, एवं पादद्वयग्रीवामस्तकनाभिगलहृदयजङ्घाद्वदनेत्रद्वयकर्णद्वयबाहुद्वयस्तनद्वयेषु चेदमेव बीजं न्यसेदिति। ततो हृदये ॐनमः, एवं पादद्वयहस्तद्वयकर्णद्वयनासाद्वयेषु चेदमेव न्यसेदिति। ततो मुखे भ्रलसहीं नमः। एवं नेत्रद्वयकर्णद्वयकपोलद्वयगण्डद्वयकण्ठस्तनद्वयहृदयपादद्वयचिबुकमस्तकभुजद्वयस्कन्धद्वयदन्तपंक्तिद्वयब्रह्मरन्ध्रमूलाधारभ्रूमध्येषु विन्यसेत्। ततः शिरसि नमरलमरक्षरशरहसीं नमः, एवं गण्डद्वये मुखे चेदमेव बीजं विन्यस्य, ततः नेत्रयोः करलसरमरीं नमः, एवं कर्णद्वयनाभिलिङ्गगुदेषु चेदमेव बीजं न्यसेत्। ततः कपोलयोः क्षरसरहसीं नमः। एवं ब्रह्मरन्ध्रे दन्तपंक्त्योश्चेदमेव बीजं न्यसेत्। ततो मस्तके सहसहलकलईशरवरवलवऊईं नमः, एवं दक्षनेत्रवामनेत्रदक्षकर्णवामकर्णकपोलद्वयगण्डद्वयचिबुकगलस्कन्धद्वयस्तनद्वयहृदयकुक्षिद्वयनाभिजङ्घाद्वयलिङ्गमेढ्रद्वयमूलाधारगुल्फद्वयपादद्वयदक्षपादांगुलीवामपादांगुलीब्रह्मरन्ध्रमूलाधारमूलाधारब्रह्मरन्ध्रेषु न्यसेत्। ततः कलडरसहरहक्षशरीं नमः इति महासरस्वतीबीजं मातृकास्थानेषु न्यस्येत्। इत्येवं न्यासान् कृत्वा, ततो ध्यानादिमूर्तिकल्पनान्ते मूलं शद्योजाताय नमः, इति प्रागुक्तविधिनावाह्य मूलमुच्चार्य, वामदेवाय नमः इति प्राग्वत् संस्थाप्य, मूलेन सन्निधाप्य, मूलं अघोराय नमः इति प्राग्वत् सन्निरुध्य, सम्मुखीकरणादिप्राणप्रतिष्ठान्ते लिङ्गमुद्रानन्तरं मूलं तत्पुरुषाय नमः इति योनिमुद्रां प्रदर्श्य, त्रिशूलाद्यास्तु मुद्रा यथापूर्वमेव प्रदर्श्य, मूलं ईशानाय नमः इति नमस्कारमुद्रया प्रणम्यासनादिपुष्पान्तानुपचारानुपचर्य, देवस्य देहे षडङ्गन्यासस्थानेषु ह्लां ह्लां हृदयाय नमः, ह्लीं ह्लीं शिरसे नमः, इत्यादि नमोऽन्तान्येव षडङ्गानि सम्पूज्य, देवस्य देहे मूर्तिन्यासस्थानेषु पञ्चदशस्वपि न्यासोक्तप्रकारेणैव त्रिरावृत्त्या पञ्चमूर्तीः सम्पूज्य, ततो व्योमपद्मकर्णिकायां पूर्वदक्षिणोत्तरपश्चिमेषु ईशानादिचतुर्मूर्तीः सम्पूज्य पञ्चमीं देवस्य मूर्तौ पूजयेत्। तत उत्तरतोऽष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन—ॐ अं असिताङ्गभैरवाय नमः। इं रुरुभैरवाय०। उं चण्डभैरवाय०। ऋं क्रोधभैरवाय०। लृं उन्मत्तभैरवाय०। एं कपालिभैरवाय०। ओं भीषणभैरवाय०। अं संहारभैरवाय नमः इति सम्पूज्य, षट्कोणेषु स्ववामाग्रमारभ्याग्नेयेशाननिर्ऋतिवायुकोणेषु हृदयाद्यङ्गचतुष्टयं देवाग्रकोणे नेत्रं तदादिचतुर्दिक्षु चास्त्रमिति षडङ्गानि प्राग्वत् सम्पूज्य, अष्टदलपद्माभ्यन्तरे षट्कोणाद्बहिर्देवाग्रमारभ्य प्रादक्षिण्येनाष्टदिक्षु—ॐडाकिनीपुत्रेभ्यो नमः। राकिणीपुत्रेभ्यः०। लाकिनीपुत्रेभ्य०। काकिनीपुत्रेभ्यः०। शाकिनीपुत्रेभ्यः०। हाकिनीपुत्रेभ्यः०। मालिनीपुत्रेभ्यः०। देवीपुत्रेभ्यो नमः। इत्यष्टदिक्षु सम्पूज्य, देवस्य वामभागे—उमापुत्रेभ्यो नमः। रुद्रपुत्रेभ्यो०।

मातृपुत्रेभ्यो नमः। इति सम्पूज्य, इन्द्रेशानयोर्मध्ये ऊर्ध्वमुखीपुत्रेभ्यो नमः। निर्ऋतिवरुणयोर्मध्ये अधोमुखीपुत्रेभ्यो नमः। इत्यूर्ध्वाधोबुद्ध्या सम्पूज्य, बहिरष्टदलेषु देवाग्रमारभ्य प्रादक्षिण्येन—ॐ ब्रह्माणीपुत्रवटुकाय नमः। एवं माहेशीपुत्र०। वैष्णवीपुत्र०। कौमारीपुत्र०। इन्द्राणीपुत्र०। महालक्ष्मीपुत्र०। वाराहीपुत्र०। चामुण्डापुत्र० इति सम्पूज्य, अष्टपत्राद्बहिश्चतुरस्राभ्यन्तरे देवाग्रमारभ्य प्रादक्षिण्येन—हेरुकाय नमः। त्रिपुरान्तकाय०। वेतालाय०। अग्निजिह्वाय०। कालान्तकाय०। करालाय०। एकपादाय०। भीमरूपाय०। इत्यष्टदिक्षु सम्पूज्य, (इन्द्रेशानयोर्मध्ये अचलाय नमः। निर्ऋतिवरुणयोर्मध्ये हाटकेशाय नमः। इति सम्पूज्य) तद्बहिश्चतुरस्रत्रये अन्तश्चतुरस्रे देवाग्रादिप्रादक्षिण्येन दिक्षु श्रीकण्ठानन्तसूक्ष्मत्रिमूर्तीः, ईशानाग्न्यादिकोणेषु—अमरेशार्घीशभावभूतितिथीशान्, दिक्कोणयोरन्तरालेषु देवस्य दक्षिणाग्रादिप्रादक्षिण्येनाष्टसु दिक्षु स्थाणुहरझिण्ठीशभौतिकसद्यानुग्रहाक्रूरमहासेनेशान् पूजयेत्। द्वितीयरेखायामपि तथैव दिग्विदिक्ष्वन्तरालेषु—क्रोधीशाद्याषाढीशान्तानभ्यर्च्य, तृतीयरेखायामपि तथैव दण्डीशादिभृग्वीशान्तान् सम्पूज्य, नकुलीशशिवेशसंवर्तेशान् देवस्य वामभागे सम्पूज्य, तद्बहिर्देवस्य वामाग्रकोणमारभ्य प्रादक्षिण्येन सशक्तिकेभ्यो दिव्ययोगिभ्यो नमः। एवं अन्तरिक्षयोगिभ्यो नमः। भूमिष्ठयोगिभ्यो नमः। सर्वयोगिनीभ्यो नमः। इति सम्पूज्य, तद्बहिरिन्द्रादींस्तदायुधानपि प्रागुक्तविधिना सम्पूज्य, प्राग्वद् धूपदीपादि दत्त्वा मेषं समापयेदिति ॥ तथा—

जितेन्द्रियो हविष्याशी जपेदेनं मनुं प्रिये। पञ्चविंशत्सहस्राणि पञ्चलक्षं दशांशतः ॥ ३५ ॥
हुनेत्तिलैस्त्रिमध्वक्तैस्तर्पयेत्तद्दशांशतः। अभिषिच्यात्मनो मूर्ध्नि मूलमन्त्रेण साधक ॥ ३६ ॥
मार्जनस्य दशांशेन ब्राह्मणान् भोजयेत्प्रिये। ....॥

अयं कृतयुगजपः। कलावेतच्चतुर्गुणजपः कार्यः। "एवमक्षरलक्षं वा तदर्धार्धार्धमेव च" इति यामलप्रोक्तत्वात्। अक्षरलक्षमेकविंशतिलक्षम्। एतत्संख्याकथनं तु कलियुगमारभ्य कृतयुगपर्यन्तपरमिति ज्ञेयं, ईश्वरस्य स्वतन्त्रेच्छत्वात् अत एव कलियुगजपप्रतिपादकेषु संग्रहग्रन्थेषु शारदातिलकादिषु वर्णलक्षमुक्तमिति ॥

अथ वीरसाधनम्। रुद्रयामले, देव्युवाच—

भगवन् देवदेवेश रहस्यं वटुकस्य मे। ब्रूहि येन वशीकुर्यात् साधको भैरवं शिव ॥ १ ॥

श्रीशिव उवाच

शृणु देवि परं गोप्यं कथयामि सुशोभने। रहस्यं सिद्धिदं साक्षाद्वटुकस्य महात्मनः ॥ २ ॥
सर्वे वटुकदेवस्य साधने ये निरूपिताः। उपाया निष्फला एव विनैकं वीरसाधनम् ॥ ३ ॥
यो वीरसाधनं हित्वा उपायं चान्यमाश्रयेत्। न स सिद्धिमवाप्नोति नरो वर्षशतैरपि ॥ ४ ॥
माषान् मुद्गान्मसूरांश्च चणकानोदनं तथा। क्षीरं तथापूपमपि शष्कुलीरपि शोभनाः ॥ ५ ॥

माषादीन्स्विन्नान् सिद्धमाषानिति स्वयमभिधानात्। क्षीरं पायसं "पायसं मात्रमारोप्ये" ति स्वयमभिधानात् शष्कुली सुहालीनि भाषया।

आदाय सूत्रं कर्पासं कन्याकर्तितमेव च। कुंकुमेनापि संरज्य कारयित्वाष्ट कीलकान् ॥ ६ ॥
स्तम्भार्थमेकं कीलं च गृहीत्वा सुरसुन्दरि। गच्छेच्छ्मशाननिकटे सुधीः सोत्तरसाधकः ॥ ७ ॥
पादप्रक्षालनं कृत्वा ततः स्मृत्वा स्वदेवताम्। बद्धाञ्जलिरिदं वाक्यं प्रवदेत्साधकोत्तमः ॥ ८ ॥
अत्र श्मशाने याः काश्चिद्देवता निवसन्ति हि। ताः प्रयच्छन्तु मे सिद्धिं प्रसन्नाः सन्तु पान्तु माम् ॥ ९ ॥
पूर्वे मां शङ्करः पातु तथाग्नेय्यां च शूलधृक्। कपाली दक्षिणे पातु नैर्ऋते जटिलोऽवतु ॥ १० ॥
पश्चिमे पार्वतीत्राता वायव्ये प्रमथाधिपः। उत्तरे मुण्डमालाढ्य ईशाने वृषभध्वजः ॥ ११ ॥
ऊर्ध्वे पातु तथा शम्भुरधस्ताद् धूलिधूसरः। अग्रतो भैरवः पातु पृष्ठतः पातु खेचरः ॥ १२ ॥
दक्षिणे भूचरः पातु वामे च पिशिताशनः। केशान्पातु विशालाक्षो मूर्धानं मे मरुत्प्रियः ॥ १३ ॥

मस्तकं पातु भृग्वीशो नेत्रं पातु महामनाः । कपोलौ पातु वीरेशो गण्डौ पात्वरिमर्दनः ॥ १४ ॥
उत्तरोष्ठं विरुपाक्षो ह्यधरं योगिनीप्रियः । दन्तेषु दक्षविध्वंसी चिबुके नृकपालधृक् ॥ १५ ॥
कण्ठे रक्षतु मां देवो नीलकण्ठो जद्गुरुः । दक्षस्कन्धे गिरीन्द्रेशो वामस्कन्धे च सुन्दर ॥ १६ ॥
भुजे च दक्षिणे सर्वमन्त्रनाथः सदावतु । वामे भुजे सार्वभौमो हृदयं पातु पाण्डुरः ॥ १७ ॥
दक्षहस्ते पशुपतिर्वामे पातु महेश्वरः । उदरे सर्वकल्याणकारकोऽवतु मां सदा ॥ १८ ॥
नाभौ कामप्रविध्वंसी जङ्घे पातु दयामयः । जानुनी पातु जामित्रो गुल्फौ गौरीपतिः सदा ॥ १९ ॥
पादपृष्ठे ज्ञाननिधिस्तथा पादांगुलीर्हरः । पादाधः पातु सततं व्योमकेशो जगत्प्रियः ॥ २० ॥
इति रक्षां समाधाय मन्त्ररक्षां ततश्चरेत् । .... ॥

ॐह्रांह्रींह्लंह्लः पूर्वे । ॐह्लांह्लूह्लौं आग्नेये । ॐक्लांश्रीं दक्षिणे । ॐलूंलूंनूं भगनग नैर्ऋते । ॐब्रूंब्रूंब्रूं-संसः पश्चिमे । ॐभ्रांभ्रं वायव्ये । भ्रांभ्रींभैरव उत्तरे । ॐब्रूंब्रूंलूं फट् ईशाने । ॐग्लौंग्लूं ऊर्ध्वे । ॐस्रांस्रंस्रः अधः ।

एवं रक्षां समाधाय दिक्पालार्चनमारभेत् । ततो वाक्यं पुनर्ब्रूयात्साधकः प्रेमसंयुतः ॥ २१ ॥

भ्रां भैरवभैरव भयंकर हर मां रक्ष २ हुं फट् स्वाहा (वर्णाः २२) इति प्रार्थयित्वा,

एकस्मिन् भाजने कृत्वा पालाशस्य महामनाः । सिद्धमाषान् व्रजेत्प्राच्यां दिशि पूजार्थमादरात् ॥ २२ ॥
तत्र स्थित्वा तु पुटकं करे कृत्वा विचक्षणः । मन्त्रमेनं सुधीः प्रोच्य दद्यादिन्द्राय वै बलिम् ॥ २३ ॥
ॐह्लांह्लींह्लूं समुच्चार्य भो इन्द्र सुरनायक । प्रसन्नो भव मे शीघ्रं देहि सिद्धिं सनातनीम् ॥ २४ ॥
इमं बलिं गृह्णगृह्ण हुंफड् उच्चार्य साधकः । बलिं दद्यान्महाभागे सिद्ध्यर्थे प्राणवल्लभे ॥ २५ ॥
ततो रंरां समुच्चार्य रंरूंरिरीं मम प्रिये । अग्ने गृह्ण मया दत्तं बलिं हुंफट् समुच्चरेत् ॥ २६ ॥
मुद्गान् पात्रे समाधाय प्रदद्याद्बलिमादरात् । ततो दक्षिणदेशान्तं समागत्य विचक्षणः ॥ २७ ॥
ॐप्रांप्रींप्रूं समुच्चार्य तथा प्रांप्रीमपि त्रिधा । प्रेतनाथपदस्यान्ते बलिं गृह्णेति चोच्चरेत् ॥ २८ ॥
हुंफडन्तोऽयमाख्यातो यममन्त्रो वरानने । अनेन दक्षिणे देवि पात्रं मसूरपूरितम् ॥ २९ ॥
स्थापयित्वा नमस्कृत्य निर्ऋत्याशां ततो व्रजेत् । बलिं चणकपात्रस्थं दद्यात्साधकसत्तमः ॥ ३० ॥
ॐक्रेंक्रेंक्रें समुच्चार्य ततो क्रेंक्रें तथैव च । खेंखेंह्लोंह्लों ततो ब्रूयात्ततो ह्लौंह्लौं समुच्चरेत् ॥ ३१ ॥
रक्षोनाथपदं ब्रूयाद् गृह्ण हुं फट्–समन्वितः । अनेन मनुना दद्याद्रक्षोनाथबलिं बुधः ॥ ३२ ॥
ततः पश्चिमदेशस्थो भूत्वा देशिकसत्तमः । जलनाथाय सुबलिं दद्यात्स्वस्यार्थसिद्धये ॥ ३३ ॥
वांवींवूंवूं समुच्चार्य ततो वरुणमुच्चरेत् । बलिमेनं मया दत्तं गृहाण परमेश्वर ॥ ३४ ॥
अनेन मन्त्रवर्येण वरुणायोदनस्य च । बलिं दद्यान्महाभागः स्वार्थसिद्धय आदरात् ॥ ३५ ॥
वायुदेशं समासाद्य ततो वायोर्बलिं हरेत् । पायसं पात्रमारोप्य परमादरसंयुतः ॥ ३६ ॥
प्रांप्रींप्रूंप्रूं समुच्चार्य प्रैंप्रैंप्रौंप्रौं तथैव च । हुंफडन्तो मनुरयं वायोः सिद्धिप्रदायकः ॥ ३७ ॥
अनेन मनुना प्राज्ञो वायवे बलिमाहरेत् । तत उत्तरदेशे तु गत्वा साधकसत्तमः ॥ ३८ ॥
अपूपपात्रमाधाय कुबेरबलिमाहरेत् । ॐक्रींकूंकूं समुच्चार्य ततः क्रांक्रां समुच्चरेत् ॥ ३९ ॥
हुंफडन्तेन मनुना बलिं दद्याद्विचक्षणः । ऐशानीं दिशमाश्रित्य साधकप्रवरस्ततः ॥ ४० ॥
ईशानाय बलिं दद्यात्सर्वकामार्थसिद्धये । ॐश्रींश्रूंश्रूं समुच्चार्य श्रींश्रींश्रांश्रांश्रामथोच्चरेत् ॥ ४१ ॥
हुंफडन्तः समाख्यातो मन्त्रोऽयं लोकदुर्लभः । अनेन मनुना दद्याच्छष्कुलीः पात्रसंस्थिताः ॥ ४२ ॥
बल्यर्थं सर्वकामार्थसिद्धये साधकोत्तमः । एवमष्ट बलीन् दत्त्वा सर्वकामार्थसिद्धये ॥ ४३ ॥
स्तम्भाधोभागमाश्रित्य कार्यमग्निममाचरेत् । पुष्पक्षताद् समाधाय ॐह्लांह्लींह्लूंह्लः उच्चरेत् ॥ ४४ ॥

स्तम्भमन्त्रोऽयमाख्यातो सर्वकामार्थसिद्धदः । अनेन मनुना प्राज्ञः सम्पूज्य निर्भयः ॥ ४५ ॥
ततः पठेन्मन्त्रमयं कवचं कार्यसिद्धये । यस्य प्रसादमासाद्य साधको निर्भयो भवेत् ॥ ४६ ॥
ह्रांह्रींह्रूंह्रः समुच्चार्य क्ष्रांक्ष्रींक्ष्रूंक्ष्रः समुच्चरेत् । हुंहुंहुंहुं समुच्चार्थं हुंहुंहुंफडथोच्चरेत् ॥ ४७ ॥
सर्वतो रक्षरक्षेति रक्षरक्षेति भैरव । तता नाथपदं (द्वयं) प्रोच्य फडन्तोऽयं महामनुः ॥ ४८ ॥
सर्वरक्षाकरः प्रोक्त साधकाभीष्टदायकः । एवं विधाय मतिमांस्तनौ रक्षां विशालधीः ॥ ४९ ॥
वीरशान्तिमथो कुर्यात्सर्वकामार्थसिद्धये । यथा सिध्यन्ति कार्याणि साधकानां महेश्वरि ॥ ५० ॥
यावत्कुर्यान्न वीराणां शान्ति साधकसत्तमः । तावन्न जायते सिद्धिः साधकस्य कथञ्चन ॥ ५१ ॥
श्मशानदेशे ये वीरा शिरसाधाय शासनम् । मनःस्थितान् निकृन्तन्ति साधकानां मनोरथान् ॥ ५२ ॥
अपूजिताः पूजितास्ते सर्वकामफलप्रदाः । वीरशान्तिमथो वक्ष्ये साधकानां हिताय वै ॥ ५३ ॥
यस्याः प्रसादमासाद्य साधकः सुखमेधते । पद्ममष्टदलं कृत्वा तद्वाह्ये षोडशच्छदम् ॥ ५४ ॥
तद्वाह्येऽष्टदलं वापि भूपुरं च ततो लिखेत् । एवं मण्डलमालिख्य साधको निर्भयः स्थितः ॥ ५५ ॥
मूलमन्त्रेण नैवेद्यं भैरवाय समर्पयेत् । आद्यपद्मस्य मध्ये तु ततश्चैवाष्ट भैरवान् ॥ ५६ ॥
षोडशारे महापद्मे ततः साधकसत्तमः । सम्पूज्य प्रयतो दद्यान्नैवेद्यं पायसस्य च ॥ ५७ ॥
मित्राणि षोडश प्राज्ञो भैरवस्य महात्मनः । कुलीशं सुकुलीशं च जामित्रं रामठं निभम् ॥ ५८ ॥
प्रचण्डं चण्डकेशं च चण्डात्मानं च चामरम् । चारित्रं च चमत्कारं चञ्चलं चारुभूषणम् ॥ ५९ ॥
चामीकरं चारुवहं कितवं चेति षोडश । नत्यन्तनामभिः पूज्याः षोडशानन्दपूरिताः ॥ ६० ॥
ततोऽष्टपत्रे सम्पूज्या ब्राह्म्याद्या मातृकास्ततः । स्वस्वदिक्षु महेन्द्रादीन् पूजयेत्साधकोत्तमः ॥ ६१ ॥
ततोऽक्षतान् समादाय विकिरंश्चक्रमण्डले । वीरशान्ति पठेत्सम्यक् साधक प्रीतमानसः ॥ ॥ ६२ ॥
चण्डप्रचण्डोर्ध्वकेशभीषणाभीषणाभिध । व्योमकेशो व्योमवहो व्योमव्यापक इत्यपि ॥ ६३ ॥
(एतान् वीरान् समाहूयैह्यायाहीति समुच्चरेत् । मण्डले साधकश्रेष्ठो नैवेद्यादिभिरर्चयेत् ॥ ६४ ॥
गन्धपुष्पादिभिरेतान् पृथक् सम्पूज्य साधकः । एवमर्चां समाधाय साधको निर्भयः स्थितः ॥ ६५ ॥
पूर्वप्रोक्तान्सुधीः कृत्वा न्यासानत्यन्तसिद्धिदान् ।) पश्चिमाभिमुखो भूत्वा मालामादाय पाणिना ॥ ६६ ॥
उच्चैस्तरां जपं कुर्यादागताय महात्मने । भैरवाय समीपे तु वामहस्तेन पायसम् ॥ ६७ ॥
सम्भोजञ्जपं कुर्यान्निर्भयः प्रीतमानसः । तृप्तो देवो यदा ब्रूयाद्वरं वरय वाञ्छितम् ॥ ६८ ॥
प्रणम्य दण्डवद्भूमौ वाञ्छितं वरमुच्चरेत् । गृहे चागत्य प्रयतोऽप्युत्सवं च समाचरेत् ॥ ६९ ॥
अनेन मनुना देवि सिद्धेन जगतीतले । ससाध्यं नास्ति लोकेषु सत्यं सत्यं मयोदितम् ॥ ७० ॥

इति ॥ अथास्य प्रयोगो लिख्यते—तत्र साधकेन्द्रः कृतनित्यक्रियः पालाशपत्रकृतपुटकेषु स्विन्नान् माषान् मुद्गान् मसूरांश्चणकानोदनं पायसमपूपान् शष्कुलीश्च पृथक् २ कृत्वा, कन्यया कर्तितं कार्पाससूत्रं कुंकुमरञ्जितं क्षीरवृक्षभवानष्टौ कीलकान् स्तम्भार्थमेकं तेभ्यः स्थूलमिति नव कीलांश्च गृहीत्वोत्तरसाधकसहितः श्मशाननिकटे गत्वा, पादक्षालनानन्तरमाचम्य स्वेष्टदेवं स्मृत्वा कृताञ्जलिः "अत्र श्मशाने याः काश्चि" दिति प्रमाणोक्तं (श्लोकमन्त्रं पठित्वा, पूर्वे मां शङ्करः पातु—जगत्प्रिये इत्यन्तं प्रमाणोक्तं) श्लोकैकादशकं पठित्वा, पुनः पूर्वे ॐह्रांह्रींह्रंह्रः० । आग्नेये ह्रांह्रींह्रूंह्रौं० । दक्षिणे ॐह्रांश्रीं० । नैर्ऋते लूंलूंलं मगनग० । पश्चिमे ब्रूंब्रूंब्रूंमसः० । वायव्ये म्रांम्रं० । उत्तरे भ्रांभ्रींभैरव० । ईशाने घ्रूंब्रूंलूं फट्० । ऊर्ध्वे ग्लौंभ्रूं० । अधः स्रांस्रंस्रः० । इति स्वात्मानं परितो दशदिक्षु प्रमाणोक्तमन्त्रैरात्मरक्षां कृत्वा, पूर्वाद्यष्टदिक्षु मध्यश्मशाने च कीलकाष्टकं स्तम्भं च निखाय, 'भां भैरव २ भयङ्कर हर मां रक्ष २ हुं फट् स्वाहा' इति प्रार्थयित्वा, सिद्धमाषभरितं पुटकमादाय सोदकपात्रहस्तो निर्भयः पूर्वकीलकसमीपं गत्वा शुद्धे समे भूतले

(ॐ लं इन्द्र साङ्ग सपरिवार इहागच्छागच्छ इत्यावाह्यैरावतारूढं वज्रहस्तं पीतवर्णं सहस्राक्षं सुरगणपरिवृतं ध्यात्वा लं इन्द्रायैतदासनं नमः इति पुष्पादिकमासनं दत्त्वा, लं इन्द्राय एष गन्धो नमः, एवं इमानि पुष्पाणि वौषट्, एष धूपो नमः, इति दीपान्तैरुपचारैः सम्पूज्य, तत्पुरतश्चतुरस्रमण्डलं) गन्धजलेन कृत्वा, तत्र माषपुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् 'ॐह्लांह्लींह्लं भो २ इन्द्र सुरनायक मे शीघ्रं प्रसन्नो भव सिद्धिं देहि इमं माषबलिं गृह्ण २ हुंफट्' इति मन्त्रेण तस्मिन् पात्रे जालं सिञ्चन् बलिमुत्सृज्य प्रणम्य, आग्नेयकीलकसमीपं गत्वा, तत्र प्राग्वन्मण्डलं कृत्वा, तत्र रं अग्ने इहागच्छ २ इत्यावाह्य, मेषारूढं शक्तिहस्तं त्रिनेत्रं तेजोनिधिं रक्तं ध्यात्वा, रं बीजेन प्राग्वद् दीपान्तैरुपचारैः सम्पूज्य, तथैव मुद्गभरितं पात्रं तदग्रे प्राग्वन्निधाय तथैव जलमादाय, रंरांरुंरूंरिंरीं भो २ अग्ने तेजोनायक मे शीघ्रं प्रसन्नो भव सिद्धिं देहि इमं मुद्गबलिं गृह्ण २ हुंफडिति प्राग्वद्बलिं दत्त्वा प्रणम्य, दक्षिणकीलकसमीपं गत्वा प्राग्वत् टमिति यमबीजेन यममावाह्य, तत्र यमं महिषारूढं दण्डहस्तं कृष्णवर्णं प्रेतगणपरिवृतं ध्यात्वा सम्पूज्य, तदग्रे प्राग्वन्मसूरपात्रं निधाय प्राग्वज्जलमादाय, ॐप्रांप्रींप्रूंप्रांप्रीं भो २ यम प्रेताधिप मे शीघ्रं प्रसन्नो भव इमं बलिं गृह्ण २ हुंफडिति प्राग्वद्बलिं दत्त्वा प्रणम्य, निर्ऋतिदिग्गतकीलकसमीपं गत्वा तत्र प्राग्वत् क्षं बीजेन निर्ऋतिमावाह्य तं प्रेतारूढं धूम्रवर्णं खड्गहस्तं रक्षोभिः परिवृतं ध्यात्वा क्षं बीजेन तं प्राग्वत्सम्पूज्य, तदग्रे प्राग्वच्चणकपूरितं बलिपात्रं निधाय प्राग्वज्जलमादाय ॐफें ३ ह्लूं खें २ ह्लों २ ह्लौं २ भोभो रक्षोनाथ मे शीघ्रमित्यादि इमं चणकबलिं गृह्ण २ हुंफडिति प्राग्वद्बलिं दत्त्वा प्रणम्य, पश्चिमदिग्गतकीलकसमीपं गत्वा वमिति वरुणबीजेन वरुणमावाह्य, मकरवाहनं श्वेतवर्णं पाशहस्तं यादोगणवन्दितं ध्यात्वा वं बीजेन प्राग्वत्सम्पूज्य, तदग्रे ओदनपूरितपात्रं प्राग्वन्निधाय जलमादाय, वांवींवूंवूं भोभो वरुण जलनाथ मे शीघ्रमित्यादि इममोदनबलिं गृह्ण २ हुंफडिति प्राग्वद्बलिमुत्सृज्य प्रणम्य वायुकोणगतकीलकसमीपं गत्वा तत्र प्राग्वन्मण्डलं कृत्वा, तत्र यं बीजेन वायुमावाह्य मृगवाहनं कृष्णवर्णमंकुशहस्तं सपरिवारं प्राणादिवायुगणवेष्टितं ध्यात्वा यं बीजेन प्राग्वत्सम्पूज्य, तदग्रे पायसभृतं बलिपात्रं निधाय प्राग्वज्जलमादाय प्रांप्रींप्रूंप्रूंप्रेंप्रैंप्रोंप्रौं भोभो वायो भुवःपते मे शीघ्रमित्यादि इमं पायसबलिं गृह्ण २ हुंफडिति मन्त्रेण प्राग्वद्बलिं दत्त्वा प्रणम्य, उत्तरदिग्गतकीलकसमीपं गत्वा, तत्र प्राग्वत कुमिति कुबेरबीजेन कुबेरमावाह्य तं नरवाहनं गदाहस्तं शुक्लवर्णं यक्षगणवेष्टितं ध्यात्वा कुं बीजेन प्राग्वत्सम्पूज्य, तदग्रे अपूपपूरितं पात्रं निधाय प्राग्वज्जलमादाय, ॐक्रींक्रूंक्रूंक्रांक्रां भोभो यक्षनाथ मे शीघ्रमित्यादि इममपूपबलिं गृह्ण २ हुंफडिति मन्त्रेण बलिं दत्त्वा प्रणम्य, ईशानदिग्गतकीलकसमीपं गत्वा प्राग्वत् हं बीजेन ईशानमावाह्य वृषभारूढं स्वच्छवर्णं शूलहस्तं विद्यागणवेष्टितं ईशानं ध्यात्वा हं बीजेन प्राग्वदासनादिदीपान्तैरुपचारैः सम्पूज्य, तदग्रे शष्कुलीपूरितं बलिपात्रं निधाय जलमादाय, ॐश्रांश्रूंश्रूंश्रींश्रींश्रांश्रां भो २ ईशान विद्याधिपते मे शीघ्रमित्यादि इमं शष्कुलीबलिं गृह्ण २ हुं फडिति मन्त्रेण बलिं प्राग्वद् दत्त्वा प्रणम्य, मध्यस्तम्भसमीपं गत्वा पुष्पाक्षतानादाय ॐह्लांह्लींह्लूंह्लः स्तम्भाय नमः इति स्तम्भं सम्पूज्य, निर्भयः सन "ॐह्लांह्लींह्लूंह्लः क्षांक्षींक्षूंक्षः खांखींखूंखः घ्रांघ्रींघ्रूंघ्रः त्रांत्रींत्रूंत्रः प्रेंप्रें २ प्रोंप्रों २ ह्लौंह्लौं २ क्लोंक्लों २ ग्रोंग्रों ज्रोंज्रोंज्रोंज्रों हुंहुंहुंहुंहुंहुं फट् सर्वतो रक्ष रक्ष रक्ष २ भैरव नाथ नाथ फट्" इति स्वरक्षां कृत्वा, स्तम्भसमीपे स्वासने पूजिते पूर्वाभिमुख उपविश्य, स्वपुरतः सुसमे भूतलेऽष्टदलपद्मं कृत्वा, तद्बहिः षोडशदलं तद्बहिः पुनरष्टदलं तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रत्रयं कृत्वा, तन्मध्ये देवमावाह्य प्राग्वत् सर्वोपचारैराराध्याङ्गानि सम्पूज्याष्टदलेषु प्राग्वदसिताङ्गादिभैरवनाथ फट् इति अष्टभैरवानभ्यर्च्य, तद्बहिः षोडशदलेषु—ॐकुलीशाय नमः। सुकुलीशाय०। जामित्राय०। रामठाय०। निभाय०। प्रचण्डाय०। चण्डकेशाय०। चण्डात्मने०। चाभराय०। चारित्राय०। चमत्काराय०। चञ्चनाय०। चारुभूषणाय०। चामीकराय०। चारुवहाय०। कितवाय नमः। इति सम्पूज्य, तद्बहिरष्टदले प्राग्वद् ब्राह्म्याद्यष्टमातृः

(बहिश्चतुरस्रे प्राग्वल्लोकेशांस्तदस्त्राणि च) सम्पूज्य, धूपदीपौ समर्प्य पद्ममध्ये श्रीभैरवाय नमः । अष्टदलेषु पूजितदेवताभ्यः पृथक् पृथक् पात्रेषु पायसं नैवेद्यं विधिवत् समर्प्याक्षतान् हस्ताभ्यामादाय पूजामण्डले विकिरन्, ॐ चण्ड आयाहि २, एवं प्रचण्ड० ऊर्ध्वकेश० भीषण० अभीषण० व्योमकेश० व्योमवह० व्योमव्यापकायाहीति आहूय, पृथक्पृथक् गन्धादिभिरुपचारैः सम्पूज्य, पायसैः पृथक् नैवेद्यं समर्प्य, निर्भयः सन् पश्चिमाभिमुखः प्राणायामऋष्यादिन्यासपूर्वकं पूर्वोक्तानखिलान् न्यासान् कृत्वा, प्राग्वत् मालां सम्पूज्यादाय मूलमन्त्रस्य स्पष्टाक्षरपदोच्चारणपूर्वकमुच्चैस्तरां जपन्, वामहस्तेन पायसपात्रमादायागतं देवं भोजयन् प्रसन्नचित्तो जपं कुर्यात । ततस्तृप्तो देवो यदा वरं वरय इति ब्रूयात् तदा दण्डवद्भूमौ प्रणम्य निजेप्सितं वरं गृहीत्वा स्वगृहं गत्वा महोत्सवं कुर्यादिति वीरसाधनविधिः ॥

एवं सिद्धमनुर्मन्त्री नित्यनैमित्तिके रतः । विघ्नं दुर्गां समभ्यर्च्य बलिं दत्त्वा विधानतः ॥ ७१ ॥
काम्यानि साधयेन्मन्त्री यथोक्तां सिद्धिमाप्नुयात् । अन्नं शालिसमुद्भूतं मांसं पक्वं सशर्करम् ॥ ७२ ॥
लाजाचूर्णागुडापूपमाक्षिकेक्षुरसान्वितम् । घृतप्लुतं सर्वमेव एकीकृत्य महेश्वरि ॥ ७३ ॥
कृत्वा ग्रासं समाराध्य बटुकेशं महेश्वरि । प्रागुक्तेन विधानेन रक्तचन्दनसंयुतैः ॥ ७४ ॥
रक्तपुष्पाक्षतैर्देवि धूपैर्दीपैर्मनोहरैः । तस्याग्रे मण्डलं कृत्वा चतुरस्रं सुरेश्वरि ॥ ७५ ॥
त्रिकोणगर्भितं तत्र पात्रे हेममये शुभे । राजते वाथ कांस्ये वा निधाय कवलं शुभम् ॥ ७६ ॥
अर्चयित्वाथ तत्पिण्डं गन्धाद्यैर्मूलमन्त्रितैः । बलिद्रव्याय इत्युक्त्वा नम इत्यर्चयेच्च तत् ॥ ७७ ॥
ततो जलं समादाय चुलुकेन महेश्वरि । मूलमन्त्रं समुच्चार्य सम्बोध्य बटुकं प्रिये ॥ ७८ ॥
इमं बलिं गृह्णयुग्मं स्वाहान्तं समुदीर्य च । जलं समर्पयेत्तत्र चिन्तयेद्बटुकं प्रिये ॥ ७९ ॥
स्वहस्ते बलिमादाय भुञ्जानं वरदं प्रभुम् । राजसोऽयं बलिर्देवि कथितः सर्वसिद्धिदः ॥ ८० ॥
सात्त्विको राजसश्चेति बलिः स्याद् द्विविधः प्रिये । राजसः कथितो देवि सात्त्विकं शृणु वल्लभे ॥ ८१ ॥
पूर्वोक्तैः सकलैर्द्रव्यैर्मांसहीनैर्महेश्वरि । मुद्गसूपसमायुक्तैः पायसेन समन्वितैः ॥ ८२ ॥
मधुरत्रयसंयुक्तैः प्राग्वद्दद्याद्विचक्षणः । ब्राह्मणो नियतः शुद्धः सात्त्विकं बलिमाहरेत् ॥ ८३ ॥
सात्त्विकं ध्यानमाख्यातं प्रागेव तवे सुव्रते । इदानीं राजसं ध्यानं शृणु वक्ष्ये महेश्वरि ॥ ८४ ॥
उद्यत्सूर्यसहस्राभं त्रिनेत्रं चन्द्रशेखरम् । रक्ताङ्गरागमारक्तमाल्याम्बरविभूषितम् ॥ ८५ ॥
स्मेराननं नीलकण्ठं नानाभरणभूषितम् । दक्षिणोर्ध्वकरे शूलं तदधो वरमद्रिजे ॥ ८६ ॥
वामोर्ध्वहस्ते देवेशि कपालं तदधोऽभयम् । दधानं संस्मरेद्देवं स्मर्तॄणामभयप्रदम् ॥ ८७ ॥
काम्यकर्मसु देवेशि ध्यायेदेवं प्रभुं सदा । ....॥

इति ॥ रुद्रयामले तु—"दक्षे त्रिशूलमभयं कपालं वामके वरम्" इत्युक्त । यथारुचि ध्येयः ।

क्रूरकर्मसु देवेशि तामसं ध्यानमुच्यते । अञ्जनाचलसङ्काशं मुण्डमालाविभूषितम् ॥ ८८ ॥
चन्द्रखण्डलसत्पिङ्गकेशभारं दिगम्बरम् । त्रिनेत्रं दक्षिणैर्हस्तैर्डमरुं च सृणिं तथा ॥ ८९ ॥
खड्गशूले च देवेशि दधानमपरैः करैः । अभयं नागपाशं च घण्टां च नृकपालकम् ॥ ९० ॥
ऊर्ध्वादिक्रमतो देवि भीमदंष्ट्रं भयानकम् । सर्वाभरणसंदीप्तं मणिनूपुरमण्डितम् ॥ ९१ ॥
किङ्किणीजालसहितं ध्यायेद् बटुकभैरवम् । ....॥

इति । रुद्रयामले तु—"दक्षिणे चाभयं वामे वरं" इति तन्मते विशेषः । अन्यत् तुल्यम् ।

सात्त्विकं ध्यानमाख्यातमपमृत्युनिवारणम् । आयुरारोग्यजननमपवर्गफलप्रदम् ॥ ९२ ॥
राजसं धर्मकामार्थसिद्धिदं तामसं प्रिये । शत्रुक्षयकरं भूतकृत्यापस्माररोगनुत् ॥ ९३ ॥
एवं ध्यानं समाख्यातं साधकाभीष्टसिद्धिदम् । काम्यकर्मारम्भदिने तत्समाप्तिदिने ततः ॥ ९४ ॥

बलिर्देयो महादेवि तत्तत्कर्मफलाप्तये । जितेन्द्रियः प्रजुहुयादाज्येनेष्टफलं भवेत् ॥ ९५ ॥
इक्षुखण्डैर्हुनेद् देवि वशयेदखिलं जगत् । कैरवैः कुमुदैर्होमात्पुत्रलाभो भवेद् ध्रुवम् ॥ ९६ ॥
तिलाज्यतण्डुलैर्हुत्वा धनं धान्यं लभेद् बहु । पुष्पैः श्रीतरुसम्भूतैर्हुत्वा प्राप्नोति तां श्रियम् ॥ ९७ ॥
त्रिस्वादुयुक्तलवणैर्होमः स्त्रीजनवश्यकृत् । होमो वेतससम्भूतसमिद्भिर्वृष्टिदायकः ॥ ९८ ॥
अन्नहोमाद् धान्यधनसम्पत्तिर्जायतेऽचिरात् । दिनत्रयं च मधुना होमात्सर्वं वशयेज्जगत् ॥ ९९ ॥
रोगोक्तौषधहोमेन रोगा नश्यन्ति तत्क्षणात् । कृत्यापस्मारभूतादिभवे व्याघ्राजिने शिवे ॥ १०० ॥
उपविश्य तिलैर्देवि जुहुयादयुतं शुचिः । कृत्यादयः पलायन्ते नेक्षन्ते तां दिशं भयात् ॥ १०१ ॥
कृष्णाष्टमीं समारभ्य यावत्स्यात्तच्चतुर्दशी । तिलैस्तण्डुलसंमिश्रैर्मधुरत्रयलोलितैः ॥ १०२ ॥
त्रिसहस्रं प्रतिदिनं जुहुयात्संस्कृतेऽनले । वटुकेश्वरमभ्यर्च्य भक्ष्यभोज्यफलान्वितम् ॥ १०३ ॥
नित्यं निवेद्य नैवेद्यं मध्यरात्रे बलिं हरेत् । त्रिसहस्रं प्रतिदिनं जपित्वा प्रयतो वशी ॥ १०४ ॥
समाप्तिदिवसे रात्रावजं हत्वा बलिं हरेत् । ततः कारयिता राजा तोषयेत्साधकं धनैः ॥ १०५ ॥
प्रयोगदिवसे नित्यं भक्ष्यभोज्यैः सदक्षिणैः । विप्रान् सप्त महादेवि तोषयेद् वाञ्छिताप्तये ॥ १०६ ॥
समाप्तिदिवसे विंशत्सप्तसप्त समाहितः । भोजयेद् वस्त्रवित्ताद्यैस्तोषयेज्जगदीश्वरि ॥ १०७ ॥
विधिनानेन सन्तुष्टो वटुकेशः प्रयच्छति । तेजो बलं यशः पुत्रान् कीर्तिं लक्ष्मीमरोगताम् ॥ १०८ ॥
नश्यन्ति शत्रवस्तस्य वर्धन्ते मित्रबान्धवाः । अवग्रहो न जायेत राष्ट्रे तस्य महीपतेः ॥ १०९ ॥
केवलैर्लवणैर्हुत्वा स्तम्भनं कुरुते ध्रुवम् । (अनेनैव प्रयोगेन निगडान्मुच्यते नरः ॥ ११० ॥
पलं वचाया देवेशि चूर्णं कृत्वातिसूक्ष्मकम् । मन्त्रयेन्मनुनानेन देवि साग्रं सहस्रकम् ॥ १११ ॥)
विभजेदूनपञ्चाशद्भागेन परमेश्वरि । दिनशो भागमेकैकं भक्षयेद् गोघृतान्वितम् ॥ ११२ ॥
अन्तर्वत्नी सुतं सूते मेधारोग्यबलान्वितम् । दीर्घायुष्यं च वन्ध्यापि किं पुनः कन्यकाप्रसूः ॥ ११३ ॥
प्रयोगस्य तथाद्यन्ते वटुकाय बलिं हरेत् । ....॥

इति । रुद्रयामले तु—

वन्ध्याचिकित्सां कुर्वाणो बालार्काभं समर्चयेत् । हरिद्रार्धपलं चैकं वचाचूर्णं तु तत्समम् ॥ १ ॥
पेषयित्वा तु गोमूत्रे गोलकं घृतसंयुतम् । पद्मपत्रे विनिःक्षिप्य स्थापयेद्देवसन्निधौ ॥ २ ॥
प्रणिपत्य नमस्कृत्य जपेदुच्चैः सहस्रकम् । देवादेशप्रकारेण प्राशयेत्तु महौषधम् ॥ ३ ॥
श्रीमन्तमायुष्मन्तं च बलवन्तं सुदर्शनम् । विद्यावन्तं सद्य पुत्रवन्तं सद्यः पुत्रमवाप्नुयात् ॥ ४ ॥

इत्युक्तम् । तथा कौलेशकोटिप्रभेदे—

साधयेद्विधिवद्भस्म मन्त्रेणानेन सुव्रते । उशीरं चन्दनं देवि कुष्ठं कर्पूरकुंकुमे ॥ १ ॥
सितार्कमूलं वाराहीं श्रीलतां परमेश्वरि । त्वचश्च क्षीरवृक्षाणां बिल्वमूलं च शोषयेत् ॥ २ ॥
सूक्ष्मचूर्णमिदं कृत्वा गोमयेन तु मेलयेत् । अन्तरिक्षे गृहीतेन कृत्वा पिण्डानि पार्वति ॥ ३ ॥
शोषयित्वातपेनाथ विधिवत्संस्कृतेऽनले । मूलमन्त्रेण दग्ध्वाथ भस्म संगृह्य तत्पुनः ॥ ४ ॥
शुद्धपात्रे विनिःक्षिप्य शोधयित्वा यथाविधि । मालतीकेतकीपुष्पैर्वासितं संस्पृशञ्छिवे ॥ ५ ॥
अयुतं प्रजपेन्मन्त्रं तत्र सम्पूज्य भैरवम् । भस्माधारे विनिःक्षिप्य संस्थाप्य दिनशः शिवे ॥ ६ ॥
त्रिपुण्ड्रं तेन कुर्वीत्वेतोक्तविधिना द्विजः । शूद्राद्यैर्मूलमन्त्रेण कर्तव्यं परमेश्वरि ॥ ७ ॥
मूलेन साधकैः सर्वैः कर्तव्यं भस्मधारणम् । य एवं कुरुते नित्यं विधिवद्भस्मधारणम् ॥ ८ ॥
तस्य रोगाः प्रणश्यन्ति कृत्याद्रोहमहाग्रहाः । रिपुचोरमृगादिभ्यो भयं तस्य न जायते ॥ ९ ॥
वर्द्धन्ते संपदः सर्वाः पूज्यते सकलैर्जनैः । राजानो वशमायान्ति सामात्याः सपरिच्छदाः ॥ १० ॥

वचाचूर्णं पलार्धं च तन्मानघृतसंयुतम् । पद्मपत्रे विनिःक्षिप्य त्रिशतं प्रजपेद्बुधः ॥ ११ ॥
प्राशयेन्नियतो भूत्वा पुनर्लक्षत्रयं जपेत् । तस्यैवं कुर्वतः प्रज्ञाः निःसीमा भवति ध्रुवम् ॥ १२ ॥
गद्यपद्यमयी वाणी श्रुतस्याप्यवधारणम् । भवेत्तस्य महादेवि भैरवस्य प्रसादत ॥ १३ ॥

अत्र वचाचूर्णभक्षणं तु यावद्भिर्दिनैस्त्रिलक्षजपो भवति तावतो भागान् कृत्वा प्रत्यहमेकमेकं भागं प्राशयेदिति साम्प्रदायिकाः । अस्मिन् प्रयोगे विशेषमाह रुद्रयामले—

शुक्लपक्षे द्वितीयायां शुक्रवारे समाहितः । पूर्ववत्पूजयेद्देवं सिद्धान्नं च निवेदयेत् ॥ १ ॥

सिद्धान्नं सिद्धौदनः । तत्तु हरिद्रागणेशप्रकरणे वक्ष्यते ।

पलार्धं च वचाचूर्णं तन्मानघृतसंयुतम् । पद्मपत्रे विनिःक्षिप्य त्रिसहस्रं जपेद्बुधः ॥ २ ॥

त्रिसहस्रजपो विशेषः । अन्यत् सर्वं समानम् । रुद्रयामले तु—

विवादक्षेत्रविषये चतुर्थ्यङ्गारवारके । पूर्ववद्देवमाराध्य नैवेद्यं चैव पूर्ववत् ॥ १ ॥
जपमानः स्वयं मन्त्रं नमस्कृत्य च बुद्धिमान् । विवादक्षेत्रमध्ये तु देवं ध्यात्वा च तत्क्षणात् ॥ २ ॥
अभिमन्त्र्य मृदं प्राश्य सन्ध्योपास्य स्वयं प्रभुम् । सप्ताहे त्रिषु कालेषु तत्क्षेत्रं चैव सिद्ध्यति ॥ ३ ॥
मृत्युञ्जयविधिं वक्ष्ये यथावच्छृणु सुन्दरि । उत्तरायणकालेषु दक्षिणायनमेव च ॥ ४ ॥
कालज्ञानमिदं ज्ञात्वा तत्त्वज्ञानी जपेत्क्रमात् । कृष्णाष्टम्यां चतुर्थ्यां चाप्यङ्गारकदिने ततः ॥ ५ ॥
सात्त्विकं बालरूपं च द्विभुजं चिन्तयन् बुधः । अर्जयित्वा यथान्यायं सिद्धान्नं च निवेदयेत् ॥ ६ ॥
यद्रूपं कथितं पूर्वमादिमार्चनमध्यगम् । तुषारकणिकाभासं ध्यात्वा देवं समाहितः ॥ ७ ॥
भूचरीमुद्रया युक्तं खेचरीबहुमेलकम् । ध्यानयोगेन मन्त्रं च मनसापि जपेद्बुधः ॥ ८ ॥
इत्येवं च जपेल्लक्षं तदा मृत्युञ्जयो भवेत् । मृत्युभङ्गाभिकांक्षी चेत्सात्त्विकं श्वेतरूपकम् ॥ ९ ॥
हृदये स्वासनं ध्यात्वा तन्मध्ये देवमासितम् । न तस्य कालनिष्क्रान्तिर्मूर्तिमण्डलमाप्नुयात् ॥ १० ॥
कृष्णपक्षे चतुर्दश्यां भूमिपुत्रस्य वासरे । अभ्यर्च्य विधिवद्देवं तस्याग्रे स्थापयेद्बुधः ॥ ११ ॥
रोचनां हेमजे पात्रे सम्पूज्य विधिनाथ ताम् । गन्धपुष्पादिना स्पृष्ट्वा तां जपेदयुतत्रयम् ॥ १२ ॥
तद्गर्भवति प्रज्वाल्य कपिलाघृतमिश्रिताम् । सौवर्णे नृकपाले वा संगृह्य चाञ्जनम् ॥ १३ ॥
सम्पूज्य च पुनर्जप्त्वा तत्पात्रं मन्त्रसंग्रहम् । ध्यात्वा देवं दृशोरेतदाचरेञ्जनं बुधः ॥ १४ ॥
वश्या भवन्ति ते सर्वे यान्यान् पश्यति साधकः । अथाभिषेकं कुर्वीत राज्ञो विजयकांक्षिणः ॥ १५ ॥
पूर्वोक्तमण्डपे देवि वितानध्वजशोभिते । सर्वतोभद्रमालिख्य वेदिकायां सुरेश्वरि ॥ १६ ॥
अष्टद्रोणमितैस्तस्य कर्णिकां शालिभिः शुभैः । आपूर्य तण्डुलैश्चापि चतुर्द्रोणमितैः प्रिये ॥ १७ ॥
शालीनामुपरि न्यस्य कूर्चाक्षतसमन्वितम् । कुम्भं हेमादिरचितं नवरत्नसमन्वितम् ॥ १८ ॥
संस्थाप्य विधिवद् देवि शुद्धैस्तोयैश्च पूरयेत् । तस्मिन् क्षीरद्रुमोत्थानि पल्लवानि विनिःक्षिपेत् ॥ १९ ॥
कर्पूरं चन्दनं देवि कक्कोलमगरुं पुनः । उशीरं कुंकुमं बिल्वं दूर्वा लक्ष्मीं सहामपि ॥ २० ॥
चंपकं मल्लिकां जातिमुत्पलं दाडिमं तथा । गोमेदं च विनिःक्षिप्य पट्टवस्त्रद्वयेन च ॥ २१ ॥
संवेष्ट्य तस्मिन्नावाह्य वटुकं देवि पूजयेत् । राजसं ध्यानरूपं तं ध्यात्वा सर्वोपचारकैः ॥ २२ ॥
प्रथमाष्टदलस्थेषु कुम्भेष्वष्टसु पार्वति । भैरवानसिताङ्गादीन सम्पूज्य तदनन्तरम् ॥ २३ ॥
त्रयोदशसु कुम्भेषु बाह्यस्थेषु महेश्वरि । त्रयोदश गणान् पश्चात्तद्बाह्ये दशसु क्रमात् ॥ २४ ॥
लोकेशवटुकान् देवि कुम्भेषु परिपूजयेत् । चतुरस्रत्रयस्थेषु द्वयष्टद्वयष्टसु पार्वति ॥ २५ ॥
कुम्भेषु देवि प्रागुक्तान् श्रीकण्ठादीन् यजेत्क्रमात् । प्रागुक्तक्रमयोगेन गन्धाद्यैः सुमनोहरैः ॥ २६ ॥
अयुतं प्रजपेन्मन्त्रं घटान् स्पृष्ट्वा सुरेश्वरि । पृथक् सहस्रं जुहुयात्पायसैः सर्पिषा तिलैः ॥ २७ ॥

स्पृशन् कुम्भान् प्रतिदिनं रात्रौ तस्मै बलिं हरेत् । राजसोक्तविधानेन मांसत्रयसमन्वितम् ॥ २८ ॥
मेषकुक्कुटमीनानां मांसत्रयमुदाहृतम् । सुदिने शुभलग्ने च स्वस्तिवाचनपूर्वकम् ॥ २९ ॥
वेदवेदाङ्गविद्भिश्च विप्रैर्मङ्गलवादिभिः । नदत्सु पञ्चवाद्येषु नमस्कृत्य च भैरवम् ॥ ३० ॥
भूपालं चाथवा विप्रं शुद्धदेहं जितेन्द्रियम् । आस्तिकं सत्यसन्धं च अभिषिञ्चेत्प्रसन्नधीः ॥ ३१ ॥
अभिषेक्तारमसकृद् भूयसीं दक्षिणां प्रिये । दद्यात्प्रसीदति यथा साधकस्तावदर्पयेत् ॥ ३२ ॥
अभिषिक्तो नरपतिः शतक्रतुरिवापरः । शत्रूञ्जयति संग्रामे बलाढ्यान् स्तूयते जनैः ॥ ३३ ॥
अभिषिक्तस्तु देवेशि प्रतिमासं महीश्वरः । षण्मासावधि शास्त्येव चतुःसागरमेखलाम् ॥ ३४ ॥
उर्वीं युद्धेषु महती शक्तिः स्यात्पूर्वतोऽधिका । शत्रुसैन्यविनाशाय राजा दद्याद्बलिं प्रिये ॥ ३५ ॥
पूर्वोक्तं राजसं देवि बलिं निष्पाद्य मन्त्रवित् । सम्पूज्य पूर्ववद् देवं मध्यरात्रे महेश्वरि ॥ ३६ ॥
अन्यूनाङ्गमजं देवि सर्वलक्षणसंयुतम् । आनीय मूलमन्त्रेण स्नपयित्वा शुभैर्जलैः ॥ ३७ ॥
गन्धमाल्यैरलंकृत्य देवास्याग्रे निधाप्य तम् । मूलमन्त्रेण सम्प्रोक्ष्य संरक्ष्यास्त्रेण तं प्रिये ॥ ३८ ॥
कवचेनावगुण्ठ्याथ मुद्रया धेनुसंज्ञया । अमृतीकृत्य सर्वान्ते देवतारूपिणे बलि-॥ ३९ ॥
रूपाय पशवे उक्त्वा नम इत्यर्चयेत्त्रिधा । गन्धाद्यैस्तं ततो देवि कर्णे तस्य तु दक्षिणे ॥ ४० ॥
पशुपाशाय इत्युक्त्वा विद्महे तदनन्तरम् । विप्रकर्णाय देवेशि धीमहीति ततः परम् ॥ ४१ ॥
तन्नो जीवः समुच्चार्य वदेद्देवि प्रचोदयात् । इत्येतां पशुगायत्रीं त्रिर्जपित्वा महेश्वरि ॥ ४२ ॥
निधाय पुरतः खड्गं ॐह्रींकालीति च द्विधा । वज्रेश्वरि च लोहान्ते दण्डायै नम इत्यथ ॥ ४३ ॥
खड्गं त्रिः पूजयेद् देवि मुष्टौ तस्य ततोऽर्चयेत् । वागीश्वरीं च ब्रह्माणं लक्ष्मीनारायणौ ततः ॥ ४४ ॥
मध्येऽग्रदेशे देवेशि उमामहेश्वरौ यजेत् । इत्यर्चितं समादाय खड्गं हस्ते महेश्वरि ॥ ४५ ॥
ततस्तं मन्त्रयेन्मन्त्री मन्त्रेणानेन सुव्रते । खड्गायासुरनाशाय देवकार्यार्थतत्पर ॥ ४६ ॥
पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ नमोऽस्तु ते । तत उच्चार्य विधिवत्तिथ्युल्लेखावसानकम् ॥ ४७ ॥
गोत्रं नाम च संकीर्त्य कामनां समुदीर्य च । श्रीभैरव इमं छागबलिं तुभ्यमहं वदेत् ॥ ४८ ॥
प्रददे तु समुच्चार्य कुशपुष्पाक्षतान्वितम् । जलं पशोस्तु निक्षिप्य शिरसि श्रीशिवे नमः ॥ ४९ ॥
यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनम् । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥ ५० ॥
इति सम्बोधयेत्तस्य शिरः स्पृष्ट्वाऽथ तं पशुम् । अस्त्रमन्त्रं समुच्चार्य च्छिन्धियुग्मं ततो वदेत् ॥ ५१ ॥
स्वाहेत्युच्चार्य तं खड्गं तस्य स्कन्धे नियोज्य च । स्वात्मानं भैरवं ध्यायन्नित्येकेन महेश्वरि ॥ ५२ ॥
प्रहारेण समुच्छेद्य बलिमन्त्रमिमं पठेत् । शत्रुपक्षस्य रुधिरं पिशितं च दिने दिने ॥ ५३ ॥
भक्षय स्वगणैः सार्धं सारमेयसमन्वितः । शत्रुनामाक्षरैर्मन्त्रं विदर्भ्यं मनुवित्तमः ॥ ५४ ॥
सैन्यं शत्रोर्बलित्वेन कल्पयित्वा महेश्वरि । पशुना सह तत्सैन्यं सम्यक् तस्मै निवेदयेत् ॥ ५५ ॥
अनेन बलिदानेन सन्तुष्टो भैरवः स्वयम् । शत्रुसैन्यं विभज्याथ स्वगणेभ्यः प्रयच्छति ॥ ५६ ॥
क्रुद्धः सन्नाशयेच्छीघ्रं नात्र कार्या विचारणा । ....॥

इति ॥ अथ गजाश्वादिरक्षाप्रयोगः । तत्र सारसंग्रहे—

गजानां चतुरङ्गानां विशेषाच्छान्तये ततः । तच्छालासु पुरा प्रोक्तं कुण्डं कृत्वा यथाविधि ॥ १ ॥
जुहुयात्पायसाद्यैश्च तिलैस्त्र्ययुतमुक्तवत् । तदा विप्रान् भक्ष्यभोज्यैस्तोषयेच्च सदक्षिणैः ॥ २ ॥
पूर्वोक्तेन प्रकारेण कलशं स्थापयेत्ततः । तत्र गन्धादिभिः सम्यग् वटुकेशं समर्चयेत् ॥ ३ ॥
अभिषिञ्चेज्जलैस्तैस्तान् गजानश्वांश्च मन्त्रवित् । वर्धन्ते प्रत्यहं चैते गजाश्चापि तुरङ्गमाः ॥ ४ ॥

तेषां च समरे शक्तिर्महती जायते ततः । गजाश्वानामामयाश्च भवन्ति द्विपतां सदा ॥ ५ ॥
अस्मादन्या महारक्षा नास्ति भूमण्डलेऽखिले । अथ यन्त्रं प्रवक्ष्यामि वटुकस्य सुरार्चिते ॥ ६ ॥
आलिख्याष्टदलं पद्मं कर्णिकायां समालिखेत् । श्रींह्रींक्लींक्ष्रौं इति ततः पत्रेषु सुरसुन्दरि ॥ ७ ॥
वटुकायेत्यक्षराणि द्विरावृत्त्या लिखेत्प्रिये । बहिः षोडशपत्राढ्यं पद्मं कृत्वा सुशोभनम् ॥ ८ ॥
तत्पत्रेषु लिखेद् देवि (शिष्टवर्णांस्तु षोडश । मन्त्रस्य तद्बहिश्चापि पद्मं षोडशपत्रकम् ॥ ९ ॥
तत्पत्रेषु लिखेद् देवि) स्वरान् षोडश सुव्रते । द्वात्रिंशत्पत्रसंयुक्तं पद्मं कृत्वाथ तद्बहिः ॥ १० ॥
कादिसान्तांल्लिखेत्तस्य पत्रेषु परमेश्वरि । वेष्टयेच्चतुरस्रेण यन्त्रमेतद्वरानने ॥ ११ ॥
जयदं सुखदं वश्यं दुःखदारिद्र्यनाशनम् । श्रीपदं दुरितव्याधिदुष्टग्रहनिकृन्तनम् ॥ १२ ॥
भूतापस्मारकृत्यादिभये रक्षाकरं परम् । अस्मात्परतरा रक्षा नास्ति नास्ति न संशयः ॥ १३ ॥

इति ॥ अस्यार्थः—तत्राष्टदलपद्मं कृत्वा तत्कर्णिकायां श्रींह्रींक्लींक्ष्रौं इति बीजचतुष्टयं ससाध्यं विलिख्य तत्पत्रेषु वटुकायवटुकायेत्यष्टौ वर्णान् प्रतिपत्रमेकैकशो विलिख्य, तद्बहिः षोडशदलपद्मं कृत्वा तद्दलेषु वटुकेत्यादि षोडशवर्णानेकैकशो विलिख्य, पुनस्तद्बहिः षोडशदलकमलं कृत्वा तद्दलेषु षोडशस्वरान् सबिन्दूनालिख्य, तद्बहिर्द्वात्रिंशद्दलपद्मं कृत्वा तद्दलेषु ककारादिसकारान्तान् मातृकावर्णान् सबिन्दूनालिख्य तद्बहिश्चतुरस्रं कुर्यात् । एतद्यन्त्रमुक्तफलदं भवति । अत्र साध्यादिलेखनं तु संपदे श्रीबीजान्तं, वश्याय कामबीजान्तं, निग्रहादिषु नृसिंहबीजान्तं, शान्त्यादौ भुवनेश्वरीबीजान्तं विलिखेदिति सम्प्रदायः ॥ कौलेशकोटिप्रभेदे—

(अपरोऽयमष्टाक्षरः)

व्योमबीजं समुद्धृत्य वह्निमायासमन्वितम् । बिन्दुनादसमायुक्तं प्रथमं बीजमुद्धृतम् ॥ १ ॥
गौरीचतुर्थमुद्धृत्य भीषिणीप्रथमं पुनः । मालिनीपञ्चमं विद्धि मोहिनीप्रथमं ततः ॥ २ ॥
मालिनीद्वितीयोपेतं वायुबीजं ततः परम् । पूर्वबीजेन संयुक्तो नमोन्तोऽष्टाक्षरो भवेत् ॥ ३ ॥

व्योमबीजं हकारः, वह्निः रेफः, माया ईकारः, बिन्दुनादौ अनुस्वारार्धचन्द्रौ, एतेन भुवनेश्वरीबीजमुद्धृतम् । गौरीचतुर्थं वकारः । भीषिणीप्रथमं टकारः, मालिनीपञ्चमं उकारः । पुनः शब्देन तयोर्योगः सूचितस्तेन टु इति । मोहिनीप्रथमं ककारः, मालिनीद्वितीयमाकारस्तद्युक्तस्तेन का इति । वायुबीजं यकारः । पूर्वबीजं भुवनेशीबीजं । नमः स्वरूपम् ।

आपदुद्धारणो मन्त्र उत्तमः परिकीर्तितः । सर्वसिद्धिकरः साक्षाच्छिवेन परिकीर्तितः ॥ ४ ॥
ऋषिस्तु बृहदारण्यश्छन्दोऽनुष्टुबुदाहृतम् । देवता वटुकः प्रोक्तः साक्षात्परशिवः प्रिये ॥ ५ ॥
षडङ्गं सम्प्रवक्ष्यामि वटुकस्य सुरेश्वरि । ह्रांह्रींह्रूंह्रैं समुद्धृत्य ह्रौंह्रश्चैव षडक्षरः ॥ ६ ॥
वटुशब्दं समुच्चार्य वर्माम्बरपदं वदेत् । हृदयायपदं पश्चाद् हृदयं परिकीर्तितम् ॥ ७ ॥
वटुप्रमथनं पश्चाच्छिरसे च समन्वितम् । शिखायै वटुसंयुक्तं कवचं वटुकाय च ॥ ८ ॥
नेत्रं वटुकसंयुक्तं वटुशब्दं ततःपरम् । दण्डोऽथ पाणये पश्चादस्त्रमन्त्रं समुद्धरेत् ॥ ९ ॥
नमः स्वाहा वषट् हुं वौषट् फडन्तं नियोजयेत् । ....॥

अथ षडङ्गन्यासप्रकारः—ह्रांवटुवर्माम्बर हृदयाय नमः । ह्रींवटुप्रमथन शिरसे स्वाहा । ह्रूंवटु शिखायै वषट् । ह्रैंवटुकाय कवचाय हुं । ह्रौंवटुक नेत्राभ्यां वौषट् । ह्रःवटुदण्डपाणये अस्त्राय फट् इति । अत्रापि प्राग्वदंगुलीदेहवक्त्रेषु पञ्चमूर्तयो न्यस्तव्याः । ध्यानं च पूर्वोक्तमेव ।

अष्टलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः । जुहुयात्तद्दशांशेन तिलैस्त्रिमधुसंयुतैः ॥ १० ॥
एकविंशत्यक्षरोक्तविधिना देवमर्चयेत् । तत्रोक्तकाम्यकर्माणि मन्त्रेणानेन साधयेत् ॥ ११ ॥

अत्र पूर्वोक्तैकविंशाक्षरो मन्त्र एव प्रणवादिर्द्वाविंशत्यक्षरो रुद्रयामलोक्तः । तत्र देवीप्रणव इति माया-

बीजस्य नाम, तत्र षडङ्गमन्त्रेषु प्रणवादित्वं पूर्वतो विशेषः। अन्यत्सर्वं तत्रोक्तमेव ॥ मन्त्रान्तरं तु तत्रैव—
अनन्तो बिन्दुमानाद्यं नकुलीशो भुजङ्गयुक्। त्रिमूर्तिः श्रीमुखीयुक्तः क्रोधी रेफेन्दुसद्ययुक् ॥ १ ॥
चतुर्थं नृहरेर्बीजं वटुकाय पदं ततः। वटुकाय पुनर्ब्रूयादापदुद्धारणाय च ॥ २ ॥
कुरुद्वयं समुच्चार्य वटुकाय पुनर्वदेत्। द्वितीयं बीजमुच्चार्य वटुकायाग्निवल्लभा ॥ ३ ॥
समुद्धृतो महामन्त्रश्चतुस्त्रिंशद्भिरक्षरैः। ....॥

अनन्त आ, बिन्दुरनुस्वारस्तेन आं। नकुलीशो हकारः, भुजङ्गो रेफः, त्रिमूर्तिरीकारः, श्रीमुखी बिन्दुस्तेन ह्रीं। क्रोधी ककारः, इन्दुरनुस्वारः, सद्य ओ, एतैः क्रंकुशबीजमुद्धृतम्। नृहरेबीजं पूर्वोक्तं क्ष्रौं इति। अन्यानि पदानि स्वरूपाणि। तेषु द्वितीयतृतीयपदयोर्विसन्धिः चतुस्त्रिंशद्भिरक्षरैरित्युक्तेः। द्वितीयं बीजं भुवनेश्वरीबीजं, अग्निवल्लभा स्वाहाकारः। स्पष्टं तु—आंह्रींक्रोंक्ष्रौं वटुकाय वटुकाय आपदुद्धारणाय कुरुकुरु वटुकाय ह्रींवटुकाय स्वाहा (वर्णाः ३४)। तथा—
ऋषिर्ब्रह्मा समुद्दिष्टोऽनुष्टुप्छन्द उदाहृतम्। अतिपूर्वं देवतास्य भैरवः परिकीर्तितः ॥ ४ ॥
वेदाष्टमुनिसंख्यार्णैर्वसुबाणविलोचनैः। मन्त्रार्णान् विन्यसेन्मन्त्री जातियुक्तैः षडङ्गकम् ॥ ५ ॥

वेदाः ४ मुनयः ७ वसवः ८ बाणाः ५ विलोचनं २। जातयः प्रागेवोक्ताः।
शिखायां ब्रह्मरन्ध्रे च पञ्च(मूर्ध्नि)वक्त्रे च नेत्रयोः। कर्णयोर्घ्राणयोर्गण्डयुगे चोष्ठयुगे तथा ॥ ६ ॥
दन्तपंक्त्योश्च चिबुके गले बाहुयुगे तथा। सन्ध्यग्रेषु च हृदये स्तनयोरुदरे तथा ॥ ७ ॥
नाभौ पृष्ठे स्फिचोः कट्योर्गुह्ये पायौ च पादयोः। सन्ध्यग्रेषु च मन्त्रार्णान् विन्यसेत्साधकोत्तमः ॥ ८ ॥
शिरो ललाटे भ्रूमध्ये नेत्रनासामुखेषु च। गले हृदि च नाभौ च गुह्ये चोरुयुगे तथा ॥ ९ ॥
जानुनोः पादयोश्चैव पदानि च मनोर्न्यसेत्। प्रागुक्तविधिना देवि ध्यात्वा देवमनन्यधीः ॥ १० ॥
शैवे पीठे यजेद् देवं प्राक्प्रोक्तेनैव वर्त्मना। ....॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदये श्रीवटुकभैरवदेवतायै नमः। इति विन्यस्य मम सर्वाभीष्ट-सिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, आंह्रींक्रोंक्ष्रौं हृदयाय नमः। वटुकाय २ शिरसे०। आपदुद्धारणाय शिखायै०। कुरु २ वटुकाय कवचाय०। ह्रींवटुकाय नेत्राभ्यां०। स्वाहा अस्त्राय०। इति करषडङ्गन्यासं कृत्वा, शिखायां आंनमः। ब्रह्मरन्ध्रे ह्रीं०। शिरसि क्रों०। मुखे क्ष्रौं०। दक्षनेत्रे वं०। वामे० टुं०। दक्षकर्णे कां०। वामे यं०। दक्षनसि वं०। वामे टुं०। दक्षगण्डे कां०। वामे यं०। ऊर्ध्वोष्ठे आं०। अधरोष्ठे पं०। ऊर्ध्वदन्तपंक्तौ दुं। अधोदन्तपंक्तौ द्धां०। चिबुके रं०। गले णां०। दक्षबाहौ यं०। वामे कुं०। सन्ध्यग्रेषु रुं० हृदये कुं०। दक्षस्तने रुं०। वामे वं०। उदरे टुं०। नाभौ कां०। पृष्ठे यं०। दक्षस्फिचि ह्रीं०। वामे वं०। दक्षकट्यां टुं०। वामे कां०। गुह्ये यं०। पायौ स्वां०। पादयोः हांनमः। इति विन्यस्य, शिरसि आंनमः। ललाटे ह्रीं०। भ्रूमध्ये क्रों०। नेत्रयोः क्ष्रौं०। नासायां वटुकाय०। मुखे वटुकाय०। गले आपदु-द्धारणाय०। हृदि कुरु०। नाभौ कुरु०। गुह्ये वटुकाय०। ऊर्वोः ह्रीं०। जानुनोः वटुकाय०। पादयोः स्वाहा नमः ॥ इत्यक्षरन्यासः ॥ अथ पदन्यासः। शिरसि आंनमः। ललाटे ह्रीं०। भ्रूमध्ये क्रों०। नेत्रयोः क्ष्रौं० ॥ नासायां वटुकाय०। मुखे वटुकाय०। कण्ठे आपदुद्धारणाय०। हृदि कुरु०। नाभौ कुरु०। गुह्ये वटुकाय०। ऊर्वोः ह्रीं०। जानुनोः वटुकाय०। पादयोः स्वाहा०। इति विन्यस्य ध्यानादिकं सर्वं प्राग्वत् कुर्यात्। तथा—
लक्षमेकं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः। जुहुयात्तद्दशांशेन तिलैस्त्रिस्वादुसंयुतैः ॥ ११ ॥
तर्पणादि ततः कृत्वा गुरुं सन्तोष्य यत्नतः। सिद्धमन्त्रः प्रकुर्वीत काम्यकर्माणि साधकः ॥ १२ ॥
पूर्वोक्तानि महादेवि सिध्यन्त्येव न संशयः। ....॥

इति ॥ तथा—चण्डेश्वरस्य मन्त्रः

शृणु देवि प्रवक्ष्यामि मन्त्रं चण्डेश्वरस्य ते । सर्वाभीष्टकरं देवि सर्वसिद्धिकरं प्रिये ॥ १ ॥
अर्घीशं तु समुच्चार्य मीनेशं तु जलस्थितम् । अग्निमूर्धानमस्त्रान्तं त्र्यक्षरोऽयं मनुर्मतः ॥ २ ॥

अर्घीश ऊ । मीनेशो ध, जलस्थितं वकारोपरिस्थितं, अग्निमूर्धानं रेफशिरस्कं तेन र्ध्व इति सिद्धं, । अस्त्रं फट् । स्पष्टं—ऊर्ध्वफट् इति । तथा—

ऋषिस्त्रिकोऽनुष्टुप्छन्दश्चण्डेश्वरोऽस्य देवता । आद्यं बीजं शक्तिरन्त्यमिष्टार्थे विनियुज्यते ॥ ३ ॥
दीप्तफट् हृदयं प्रोक्तं ज्वालाफट् शिर ईरितम् । ज्वालिन्यस्त्रं शिखा देवि नटास्त्रं च तनुच्छदम् ॥ ४ ॥
हनफट् नेत्रमुदितं सर्वज्वालिनि फट् परम् । एभिर्मन्त्रैः षडङ्गानि जातियुक्तानि कल्पयेत् ॥ ५ ॥
चण्डेश्वरं रक्तवर्णं त्रिनेत्रं रक्तवाससम् । स्फटिकाक्षस्रजं शूलं दक्षिणे चाधऊर्ध्वयोः ॥ ६ ॥
करयोर्वामयोश्चापि टङ्कं चैव कमण्डलुम् । दधतं चन्द्रशकलविलसच्छेखरं स्मरेत् ॥ ७ ॥
इति ध्यात्वा यजेत्पीठे शैवे चण्डेश्वरं प्रिये । चण्डचण्डाय सम्प्रोच्य विद्महे तदनन्तरम् ॥ ८ ॥
चण्डेश्वराय इत्युक्त्वा धीमहीति ततो वदेत् । ततश्चण्डः प्रशब्दान्ते चोदयादिति चोच्चरेत् ॥ ९ ॥
चण्डस्यैषा समाख्याता गायत्री चानया च तम् । आवाह्य पूजयेद्देवि प्राग्वत्सर्वोपचारकैः ॥ १० ॥
आद्यक्षरं बिन्दुयुतं ङेन्तं चण्डेश्वरं च हृत् । अनेन च समभ्यर्च्य यजेदङ्गानि पूर्ववत् ॥ ११ ॥
दलेषु मातरः पूज्या वीथ्योर्लोकेशहेतयः । ....॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते प्राणानायम्य, शिरसि त्रिकऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदि श्रीचण्डेश्वराय देवतायै नमः । गुह्ये ऊं बीजाय नमः । पादयोः फट्शक्तये नमः । इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, दीप्तफट् हृदयाय नमः । ज्वाला फट् शिरसे० । ज्वालिनिफट् शिखायै० । नटफट् कवचाय० । हनफट् नेत्राय० । सर्वज्वालिनिफट् अस्त्रायफट् । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि विन्यस्य, ध्यानादिपीठपूजान्ते चमिति बीजेन मूर्तिं परिकल्प्य, चण्डचण्डाय विद्महे चण्डेश्वराय धीमहि तन्नश्चण्डः प्रचोदयात् । इत्यनयावाह्य सर्वोपचारैः चंचण्डेश्वराय नमः इति मन्त्रेण सम्पूज्य पूर्ववदङ्गानि सम्पूज्य, अष्टदलेषु ब्राह्म्यादिमातॄर्वीथ्यो-र्लोकेशांस्तदस्त्राणि च पूजयेदिति । तथा—

लक्षत्रयं जपेन्मन्त्रं जुहुयात्तद्दशांशतः । सतिलैस्तण्डुलैर्वापि त्रिमध्वक्तैर्यथाविधि ॥ १२ ॥
राजवृक्षसमिद्भिर्वा तर्पणादि ततश्चरेत् । प्राग्वत्सिद्धे मनौ मन्त्री प्रयोगानाचरेच्छिवे ॥ १३ ॥
शालिपिष्टमयीं कृत्वा पुत्तलीं प्राणसंयुताम् । देवि काष्ठेधिते वह्नौ सम्यक् त्रिमधुराप्लुतम् ॥ १४ ॥
दक्षिणांगुष्ठमारभ्य पुंसि च्छित्वा पृथक् शतम् । जुहुयाद् वामपादादि योषितश्चापि संहुनेत् ॥ १५ ॥
एवं होमो द्विजातीनां वश्यकृन्नात्र संशयः । यो मर्त्योऽनुदिनं पुष्पैर्हुनेदष्टोत्तरं शतम् ॥ १६ ॥
स याति त्रिभिर्दिनैः कैश्चित्तद्वर्णं वसनं लभेत् । प्रत्यहं मनुनानेन देवि यस्तर्पयेच्छिवम् ॥ १७ ॥
चतुर्मासं तस्य लक्ष्मीर्भवत्येव न संशयः । साध्यवृक्षत्वचा लोणैः सम्यक् पिष्टैश्च कारयेत् ॥ १८ ॥
तां तु संस्थापितप्राणां प्रतिमां संस्पृशञ्जपेत् । पूजितां च हुनेद्रात्रौ वशमानयते ध्रुवम् ॥ १९ ॥
नरो नारी सदा वश्या भवेदेव न संशयः । ....॥

इति ॥ अथ स्तोत्रम्—

वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न क्वापि क्षणमपि भवन्तं प्रणतवान् ।
नमन् मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिमान् इतीश क्षन्तव्यं तदिदमपराधद्वयमपि ॥ १ ॥
श्रीशम्भो भगवन् त्रिनेत्र जगतां बन्धोऽन्धकध्वंसन

प्रालेयांशुकलावतंस मदनद्वेषिन् मृडानीपते ।
व्योमव्यापिवपुर्महेश यमिनामाद्य त्रिलोकीतनो
भास्वद्विग्रह दुर्ग्रहार्तिशमन त्वं पाहि नः सर्वदा ॥ २ ॥
रे मूढास्तमपास्य देवमखिलस्वर्लोकिचूडामणि-
श्रेणीपल्लवितांघ्रिपीठमपरः कः स्यादुपास्यः प्रभुः ।
तुष्टो यः प्रणतामरप्रणयिनीमिष्टां ददाति श्रियं
यश्चोन्मत्तपलाशकाशकुसुमैरभ्यर्चितस्तुष्यति ॥ ३ ॥
रे मूढाः किमयं वृथैव तपसा कायः परिक्लिश्यते
यज्ञैर्वा बहुदक्षिणैः किमपरे रिक्ताः क्रियन्ते गृहाः ।
भक्तिश्चेदवरोधिनी भगवति त्र्यक्षे तदानीमसा-
वुन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मीः पुरो धावति ॥ ४ ॥
किं चिन्तामणिचिन्तनैः किमपरैः कल्पद्रुमान्वेषणैः
किं वा वाञ्छितदानमात्रफलया धेन्वा रहो ध्यातया ।
अक्षीणैर्निधिभिश्च तैः किमथवा कल्पान्तरस्थायिभि-
र्वाञ्छातीतफलप्रदे भगवति त्र्यक्षे कुरुष्वानतिम् ॥ ५ ॥
त्र्यक्ष त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नम-
न्त्याजन्म स्फुरदंघ्रिपीठविलुठत्कीटीरकोटिच्छटाः ।
यस्त्वामर्चति सोऽर्च्यते सुकृतिभिर्यः स्तौति स स्तूयते
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥ ६ ॥
त्वद्रूपैकनिरूपणप्रणयिता शम्भो दृशोस्त्वद्गुण-
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि ।
त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्तनं वाचि मे
कुत्रापि त्वदुपासनव्यसनिता मा नाथ मे शाम्यताम् ॥ ७ ॥
प्रज्ञोन्मेषपटो प्रपञ्चय वचो बौद्ध ! त्वमप्यद्भुतं
चार्वाक ! स्वविकल्पजालजटिलाः स्वैरं गिरः स्फारय ।
रे मीमांसक ! जैन ! सांख्य ! भवतां यत् संमतं ब्रूत तत्
स्वातन्त्र्यान्मम रोचते नहि नहि त्र्यक्षादृतेऽन्यः प्रभुः ॥ ८ ॥
भाग्यैः कन्दलितं सुखैः कुसुमितं दत्तं फलं वाञ्छितैः
कष्टैरस्तमितं शुचा विचलितं नष्टं तदैवारिभिः ।
सम्पद्धाम्नि निसर्गतोऽपि विपदामुन्माथिनि श्रेयसा-
मावासे निहितं यदैव गिरिजाकान्तप्रणामे मनः ॥ ९ ॥
दुःखानि क्षपयत्यघानि दलयत्युन्मूलयत्यापदो
हन्त्याधीन् विरुणद्धि साधुनिखिलव्यापाररोधा रुजः ।
मथ्नाति प्रतिपन्थिनः शमयति क्षुद्रानसावञ्जसा
किं तद्यन्न करोति चन्द्रकलिकाचूड त्वदंघ्रिस्मृतिः ॥ १० ॥
....

भक्त्या योऽङ्कुरितः प्रतिक्षणमथो··· ···· ····।
···· ···· ····फलत्यविरतं वाञ्छातिरिक्तं फलैः
··· ···· ···· ···· ···· ···· (?) ॥ ११ ॥

हंहो मानस किं न यस्य सुमते किञ्चिद्रहस्यं ब्रवी-
म्यस्त्वत्यन्तमृदुः प्रकीर्णविभवः श्रीशैलजावल्लभः ।
त्वं गत्वा विपिने प्रतार्य्य कुसुमैरर्कस्य दर्भस्य वा
गृह्णीमः सुरमौलिलालितपदां त्रैलोक्यराज्यश्रियम् ॥ १२ ॥
नन्दिन् भृङ्गिरिटे गणाधिप महाकालाग्निरुद्र प्रभो
यूयं सन्निहिताः सदैव वदतो धर्म्यं वचः श्रूयताम् ।
यद्यस्माकमनल्पपूत्कृतकृतां देवो जगद्व्यापको
नो ध्यायत्सु कृपां करोति तदहो किं नः प्रभुः स्मर्यते ॥ १३ ॥
आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।
लक्ष्मीस्तोयतरङ्गभङ्गिचपला विद्युच्चलं जीवितं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ १४ ॥

इति श्रीमहामहोपाध्यायाचार्यवर्य्य—भगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य—श्रीभगवच्छङ्कराचार्य—शिष्यश्रीविष्णुशर्माचार्यशिष्य—श्रीप्रगल्भाचार्यशिष्य—श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे त्रिंशः श्वासः ॥ ३० ॥

अथ

एकत्रिंशः श्वासः

शारदातिलके—(२३ । १)

अथ त्र्यम्बकं मन्त्रमभिधास्याम्यनुष्टुभम् । यं भजन्तं नरं कालः स्वयमोक्षितुमक्षमः ॥ १ ॥

इति । सारसंग्रहे—

भुजङ्गेशसमारूढा पूतना वसुधेन्दुयुक् । बकं यजामहे प्रोच्य सुगन्धिं पुष्टिवर्धनम् ॥ १ ॥

उर्वारुकमिवेत्युक्त्वा बन्धनान्मृ-पदं वदेत् । त्योर्मुक्षीय-पदं ब्रूयान्मामृतादित्युदीरयेत् ॥ २ ॥

त्र्यम्बकमनुः प्रोक्तो भजतां मृत्युनाशनः । ....॥

भुजङ्गेशो रेफस्तदारूढा पूतना तकारः, वसुधा यकारः, इन्दुरनुस्वारः, एतैः त्र्यं इति । अन्यानि पदानि स्वरूपाणि ॥ मन्त्रनिरुक्तिमाह वसिष्ठः—

अथातः सम्प्रवक्ष्यामि मन्त्रस्यार्थं समासतः । तिस्रो देव्यो दि(य)तश्चैव संजाता लोकमातरः ॥ १ ॥

द्यौरापः पृथिवी चेति तस्मात् त्र्यम्बक उच्यते । यत्त्वाम्बकानि चक्षूंषि त्रीण्यस्य स त्रियम्बकः ॥ २ ॥

त्रिलोचनं त्रिलोकेशं तं वयं पूजयामहे । यो लोके दृश्यते गन्धः शोभनः सर्ववस्तुषु ॥ ३ ॥

स सर्वोऽस्यैव देवस्य सुगन्धिः कथ्यते ततः । अथवा शोभनैर्गन्धैः पुष्पैश्चापि मनोहरैः ॥ ४ ॥

धूपदीपादिभिश्चैव पूजनीयो महेश्वरः । सर्वेषामेव देवानां गन्धर्वोरगरक्षसाम् ॥ ५ ॥

उपासकानां सर्वेषां पुष्टिहेतुरुमापतिः । उर्वारुकं यथा पक्वं स्वयं मुच्येत बन्धनात् ॥ ६ ॥

अहमेवं प्रसादेन देवदेवस्य शूलिनः । अनायासेन मुच्येयं मृत्योर्लोकभयङ्करात् ॥ ७ ॥

ततः प्राप्यामृतं देवं तत्रैव परमेश्वरि । मा भूवं तद्वियुक्तोऽहमिति मन्त्रार्थयोजना ॥ ८ ॥

एवं विदित्वा मन्त्रार्थमृषिं छन्दोऽस्य दैवतम् । जपहोमादि कर्तव्यं साक्षान्मृत्युञ्जयार्थिना ॥ ९ ॥

यस्मादनेन मन्त्रेण मृत्युं जयति मानवः । मृत्युञ्जयस्ततः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः ॥ १० ॥

अनेनैव तु मन्त्रेण पूर्वं ब्रह्मर्षयोऽमलाः । मृत्युं विजित्य सम्प्राप्ता ऐश्वर्यमणिमादिकम् ॥ ११ ॥

इति । शारदातिलके—(२३ । २)

वसिष्ठोऽस्य ऋषिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम् । देवतास्य समुद्दिष्टस्त्र्यम्बकः पार्वतीपतिः ॥ १ ॥

वसिष्ठः—

अग्नये हृदयायेति नमोन्तो हृदये स्थितः । त्र्यम्बकाय च शिरसे स्वाहान्तं शिरसे न्यसेत् ॥ १ ॥

त्रिनेत्राय शिखायेति वषडन्तं शिखां स्मरेत् । (वसिष्ठाय कवचाय हुमन्तं कवचं स्मरेत्) ॥ २ ॥

नेत्रत्रयेऽग्निवीर्याय वौषडन्तमुदाहृतम् । रुद्रदैवतङ्ऽस्त्राय फडन्तास्त्रमुदाहृतम् ॥ ३ ॥

प्रागाद्यासु चतुर्दिक्षु दिगस्त्रं कारयेत्क्रमात् । दुर्गां विनायकं चैव नन्दीशं क्षेत्रपालकम् ॥ ४ ॥

एते दिग्बन्धमन्त्राः स्युर्मन्त्रतो ये उदाहृताः । अथवैतस्य मन्त्रस्य वर्णतोऽङ्गानि कल्पयेत् ॥ ५ ॥

इति । शारदातिलके—(२३ । ३)

विभक्तैर्मन्त्रवर्णैः स्यात्षडङ्गानां प्रकल्पना । हृदयं त्रिभिराख्यातं चतुर्भिः शिर ईरितम् ॥ १ ॥

शिखाष्टभिः समुद्दिष्टा नवभिः कवचं मतम् । पञ्चभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतम् ॥ २ ॥

पूर्वपश्चिमयाम्येन्दुववक्त्रेषु ब्रदनन्तरम् । उरोगलास्येषु पुनर्नाभिहृत्पृष्ठकुक्षिषु ॥ ३ ॥
लिङ्गपायूरुमूलान्तजानुयुग्मेषु तत्परम् । तद्वृत्तयुग्मे स्तनयोः पार्श्वयोः पादयोः पुनः ॥ ४ ॥
पाण्योर्नासिकयोः शीर्षे मन्त्रवर्णान् न्यसेत् क्रमात् । पदान्येकादश न्यसेच्छिरोभ्रूयुगलाक्षिषु ॥ ५ ॥
वक्त्रे गण्डयुगे भूयो हृदये जठरे पुनः । गुह्योरुजानुपादेषु न्यासमेवं समाचरेत् ॥ ६ ॥

हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम् ।
अङ्कन्यस्तकरद्वयामृतघटं कैलाससंस्थं (कान्तं) शिवं
स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे ॥ ७ ॥

देवं पूर्वोदिते पीठे पूजयेद् वृषभध्वजम् । मूर्ति मूलेन संकल्प्य वक्ष्यमाणेन वर्त्मना ॥ ८ ॥
पूर्वमङ्गानि सम्पूज्य पश्चान्मूर्तीः प्रपूजयेत् । अर्केन्दुवसुधातोयवह्निरवियदात्मनः ॥ ९ ॥
द्वितीयावरणे पूज्या मूर्तयोऽष्टाविमाः क्रमात् । रमा राका प्रजा ज्योत्स्ना पूर्णोषा पूरणी सुधा ॥ १० ॥
अष्टाविमाः क्रमात्पूज्यास्तृतीयावरणे ततः । विश्वा विद्या सिता प्रह्वा सारा सन्ध्या शिवा निशा ॥११॥
चतुर्थावरणे पूज्याः शक्तयोऽष्टौ क्रमादिमाः । आर्या प्रज्ञा प्रभा मेधा शान्तिः कान्तिर्धृतिर्मतिः ॥ १२ ॥
पञ्चमावरणे पूज्याः क्रमादेतास्ततः परम् । धरोमा पाविनी पद्मा शान्ताऽमोघाऽजयाऽमला ॥ १३ ॥
षष्ठावरणगाः पूज्या लोकपालास्ततः परम् । सप्तमावरणे पूज्यास्तदस्त्रैरष्टमावृतिः ॥ १४ ॥

इति ॥ अर्कमूर्तिरीशानः, इन्दुमूर्तिर्महादेवः, वसुधामूर्तिर्भवः तोयमूर्तिः शर्वः, वह्निमूर्ती रुद्रः ईरमूर्तिरुग्रः, वियन्मूर्तिर्भीमः, यजमानमूर्तिः पशुपतिः । अत्र प्रमाणं तु जगत्प्रसिद्धः पौराणिकः पार्थिव(लिङ्ग)पूजाक्रमः । अत्र केचिच्छर्वः क्षितिमूर्तिः भवो जलमूर्तिरित्याहुः तन्न, यथा क्षितितोयादीनां भूतानां क्रमस्तथा भवादिः मूर्तिन्यासप्रकरणे "भवं च करभद्रां च शर्वं च खगलामपि" । इत्यादिक्रम एवोक्तः, अत एव तदसङ्गतमिति ॥ अथ प्रयोगः— तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि वसिष्ठाय ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये श्रीमृत्युञ्जयरुद्राय देवतायै नमः । इति विन्यस्य सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, ॐ अग्नये हृदयाय नमः । त्र्यम्बकाय शिरसे स्वाहा । त्रिनेत्राय शिखायै वषट् । वसिष्ठाय कवचाय हुं । अग्निवीर्याय नेत्रत्रयाय वौषट् । रुद्रदैवताय अस्त्राय फट् । इति मन्त्रैः करषडङ्गन्यासं कृत्वा, दुं दुर्गायै नमः । गं गणपतये नमः । नं नन्दीशाय नमः । क्षं क्षेत्रपालाय नमः, इति पूर्वादिचतुर्दिक्षु दिग्बन्धनक्रमेण न्यसेत् ॥ अथवा त्र्यम्बकं हृदयाय । यजामहे शिरसे । सुगन्धिं पुष्टिवर्धनं शिखायै । उर्वारुकमिव बन्धनात् कवचाय । मृत्योर्मुक्षीय (नेत्राभ्यां) । मामृतात् अस्त्राय । इति मन्त्रैः करषडङ्गन्यासं कृत्वा, मुखे पूर्ववक्त्रस्थाने त्र्यं नमः । चूडाधः पश्चिमवक्त्रस्थाने बं० । दक्षिणकर्णे दक्षिणवक्त्रस्थाने कं० । वामकर्णे उत्तरवक्त्रस्थाने यं० । उरसि जां० । गले मं० । मुखे हें० । नाभौ सुं० । हृदि गं० । पृष्ठे न्धिं । कुक्षौ पुं० । लिङ्गे ष्टिं० । पायौ वं० । दक्षोरुमूले र्धं० । वामोरुमूले नं० । दक्षोरौ उं० । वामोरौ र्वां० । दक्षजानुनि रुं० । वामजानुनि कं० । दक्षजानुवृत्ते मिं० । वामजानुवृत्ते वं० । दक्षस्तने बं० । वामस्तने न्धं० । दक्षपार्श्वे नात्० । वामपार्श्वे मृं० । दक्षपादे त्यों० । वामपादे र्मुं० । दक्षपाणितले क्षीं० । वामे यं० । दक्षनसि मां० । वामे मं० । शिरसि तात्० ॥ इति वर्णान् विन्यस्य, शिरसि त्र्यम्बकं नमः । भ्रूमध्ये यजामहे० । नेत्रयोः सुगन्धिं० । मुखे पुष्टिवर्धनम् । गण्डद्वये उर्वारुकं० । हृदि इव० । जठरे बन्धनात्० । गुह्ये मृत्योः । ऊरुद्वये मुक्षीय० । जानुनोः मा० । पादयोः अमृतात् नमः । इति एकादशपदानि विन्यस्य, ध्यानाद्यात्मपूजान्ते प्रागुक्तं शैवं पीठं सम्पूज्य, तत्र देवतामावाह्य स्थापनादिपुष्पोपचारान्ते प्राग्वदङ्गानि सम्पूज्याष्टदलेषु देवाग्रदलमारभ्य प्रादक्षिण्येन—ईशानाय सूर्यमूर्तये नमः । महादेवाय सोम-

मूर्तये० । भवाय क्षितिमूर्तये० । शर्वाय जलमूर्तये० । रुद्राय अग्निमूर्तये० । उग्राय वायुमूर्तये० । भीमाय आकाशमूर्तये० । पशुपतये यजमानमूर्तये० । इति सम्पूज्य, दलाग्रेषु—रमायै नमः । राकायै० । प्रभायै० । ज्योत्स्नायै० । पूर्णायै० । उषायै० । पूरण्यै० । सुधायै० । इति सम्पूज्य, द्वितीयाष्टदलमूलेषु स्वाग्रादारभ्य—विश्वायै नमः । विद्यायै० । सितायै० । प्रह्वायै० । सारायै० । सन्ध्यायै० । शिवायै० । निशायै० । इति सम्पूज्य, तद्दलेषु—आर्यायै नमः । प्रज्ञायै० । प्रभायै० । मेधायै० । शान्त्यै० । कान्त्यै० । धृत्यै० । मत्यै० । इति सम्पूज्य, तद्दलाग्रेषु—धरायै नमः । उमायै० । पावन्यै० । पद्मायै० । शान्तायै० । अमोघायै० । अजयायै० । अमलायै० । इति सम्पूज्य, प्राग्वत् चतुरस्रवीथीद्वये लोकपालांस्तदस्त्राणि च सम्पूज्य, धूपदीपादि सर्वं प्राग्वत् कृत्वा समापयेदिति ॥ तथा—

जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः । जुहुयाद् दशभिर्द्रव्यैरयुतं घृतसंप्लुतैः ॥ १ ॥

बिल्वं पलाशं खदिरं वटं च तिलसर्षपौ । दौग्धं दुग्धं दधि पुनर्दूर्वा तानि विदुर्बुधाः ॥ २ ॥

दौग्धं पायसम् । सहस्रमेकैकद्रव्येण ।

तर्पयित्वाभिषिच्याथ ब्राह्मणांस्तोषयेद् गुरुम् । एवं कृते प्रयोगार्हो जायतेऽयं महामनुः ॥ ३ ॥

इति ॥ वसिष्ठः—

ब्राह्मणाः क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः । आत्मार्थं जपहोमादि कुर्युर्नित्यमतन्द्रिताः ॥ १ ॥

परार्थमपि कुर्वीत ब्राह्मणो मन्त्रवित्तमः । दातव्या दक्षिणा तत्र यथा तुष्येद् द्विजोत्तमः ॥ २ ॥

आत्मार्थं वा परार्थं वा न कुर्यादितरो जनः । यदि कुर्याज्जपादीनि लोभादज्ञानतोऽपि वा ॥ ३ ॥

त्रयीसारेण मन्त्रेण स्वयमेव विनश्यति । आमपात्रे यथान्यस्तं पयो दधि घृतं मधु ॥ ४ ॥

तस्य पात्रस्य दौर्बल्यात्सह पात्रेण नश्यति । एवं मन्त्रं त्रयीसारं यदन्यो धारयेन्नरः ॥ ५ ॥

क्षिप्रं विनाशमायाति स मन्त्रो निष्फलो भवेत् । तस्मादाचार्यतो लब्ध्वा चीर्णदेवव्रतो द्विजः ॥ ६ ॥

मृतसञ्जीविनीं विद्यां गोपयेत् तां प्रयत्नतः । अनया विद्यया विप्र सर्वकार्याणि साधयेत् ॥ ७ ॥

आयुरारोग्यमैश्वर्य्यमपमृत्युं जयेत सः । ....॥

इति अथापरन्यासस्तत्र वासिष्ठकल्पे—

अथ न्यासविधिं वक्ष्ये मन्त्रस्यास्य महामुने । सर्वदोषप्रशमनं सर्वकल्याणकारकम् ॥ १ ॥

तेनैव मुच्यते सद्यो मृत्योः कालकृतादपि । अक्षराणि त्रयस्त्रिंशदस्मिन् मन्त्रे महामुने ॥ २ ॥

तानि देवा त्रयस्त्रिंशदिति शास्त्रेषु निश्चयः । अदावष्टौ वसून् विद्याद्रुद्रानेकादशोत्तरान् ॥ ३ ॥

ततः स्युर्द्वादशादित्याः प्रजापतिरनन्तरम् । वषट्कारोऽमितः प्रोक्तः सर्वानन्दमयं शिवः ॥ ४ ॥

ध्रुवोऽध्वरश्च सोमश्च आपश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥ ५ ॥

वीरभद्रश्च शम्भुश्च गिरिशश्चाज एकपात् । अहिर्बुध्न्यः पिनाकी च भुवनाधीश्वरस्तथा ॥ ६ ॥

कपाली दिक्पतिः स्थाणुर्भर्गो रुद्राः प्रकीर्तिताः । धातार्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा ॥ ७ ॥

विवस्वानिन्द्रपूषाख्यौ पर्जन्यस्तदनन्तरः । त्वष्टा विष्णुरिति प्रोक्ता आदित्या द्वादश क्रमात् ॥ ८ ॥

एवमेतानि रूपाणि देवानां कल्पितानि वै । अक्षराणि न्यसेन्मन्त्री सर्वाङ्गेषु समाहितः ॥ ९ ॥

मूर्धादिपञ्चरन्ध्रेषु प्रथमं पञ्चकं न्यसेत् । दक्षिणस्य करे च स्यात्पञ्चस्थानेषु पञ्चकम् ॥ १० ॥

तत्रस्थदेवता ध्यात्वा न्यसेत्पञ्चाक्षराण्यतः । ततः पराणि पञ्चैव वामहस्ते न्यसेत्क्रमात् ॥ ११ ॥

ततस्तु दक्षिणे पादे सन्धिस्थानेषु पञ्चसु । पराणि पञ्च विन्यस्य वामपादे तथा न्यसेत् ॥ १२ ॥

ततश्च दक्षिणे पार्श्वे वामपार्श्वे न्यसेत्क्रमात् । पृष्ठे नाभौ च गुह्ये च मुष्कयोस्त्रितयं न्यसेत् ॥ ३१ ॥

भ्रुवोर्मध्ये परगले हृदये मामृतात् न्यसेत् । एवं विन्यस्य सर्वाङ्गे ततोऽन्ते प्रणवं न्यसेत् ॥ १४ ॥
यस्याङ्गेषु न्यसेदेवं मन्त्री मन्त्रं समाहितः । तस्य मृत्युभयं नास्ति नच व्याधिकृतं भयम् ॥ १५ ॥
एवमेतेन रौद्रेण कवचेनाभिरक्षितम् । वेतालाश्च पिशाचाश्च गन्धर्वोरगराक्षसाः ॥ १६ ॥
पराभिचारकृत्याश्च ये चान्ये च ग्रहादयः । एनं द्रष्टुं न शक्तास्ते साक्षान्मन्त्रशरीरिणम् ॥ १७ ॥
एतद्रहस्यं परमं साक्षाद्देवान्मया श्रुतम् । य एनं धारयत्येव स निःशत्रुर्न चान्यथा ॥ १८ ॥

इति ॥ तथैतन्न्यासप्रयोगः—तत्र शिरसि त्रिं ध्रुवाय नमः । मुखे यं ध्वराय० । दक्षिणकर्णे बं सोमाय० । वामे कं आपाय० । चूडाधः यं अनिलाय० । दक्षबाहुमूले जां अनलाय० । तन्मध्ये मं प्रत्यूषाय० । मणिबन्धे हें प्रभासाय० । तदंगुलिमूले सुं वीरभद्राय० । तदग्रे गं शम्भवे० । वामबाहुमूले न्धि गिरिशाय० । तन्मध्ये पुं अजैकपादे० । मणिबन्धे ष्टिं अहिर्बुध्न्याय० । तदंगुलिमूले वं पिनाकिने० । तदग्रे र्धं भुवनाधीश्वराय० । दक्षोरुमूले नं कपालिने० । तज्जानुनि उं दिशांपतये० । तद्गुल्फे वां स्थाणवे० । तदंगुलिमूले रुं भर्गाय० । तदग्रे कं धात्रे० । वामोरुमूले मि अर्यम्णे० । तज्जानुनि वं मित्राय० । तद्गुल्फे वं वरुणाय० । तदंगुलिमूले न्धं अंशवे० । तदग्रे नात् भगाय० । दक्षपार्श्वे मृं विवस्वते० । वामपार्श्वे त्यों इन्द्राय० । पृष्ठे र्मु पूष्णे० । नाभौ क्षीं पर्जन्याय० । गुह्ये यं त्वष्ट्रे० । भ्रुवोर्मध्ये मां विष्णवे० । परगले मृं प्रजापतये० । हृदये तात् अमितवषट्काराय नमः । ग्रन्थान्तरे—

अथ त्रैयम्बकं मन्त्रमभिधास्याम्यनुष्टुभम् । यं भजन्तं नरं कालः स्वयमीक्षितुमक्षमः ॥ १ ॥
वसिष्ठोऽस्य मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम् । देवतास्य समुद्दिष्टस्त्र्यम्बकः पार्वतीपतिः ॥ २ ॥
विभक्तैर्मन्त्रवर्णैः स्यात्षडङ्गानां प्रकल्पना । चतुर्भिर्हृदयं प्रोक्तं शिरस्तावद्भिरीरितम् ॥ ३ ॥
शिखाष्टभिः समुद्दिष्टा नवभिः कवचं मतम् । पञ्चभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतम् ॥ ४ ॥
पूर्वपश्चिमयाम्योदग्वक्त्रेषु तदनन्तरम् । उरोगलांसेषु पुनर्नाभिहृत्पृष्ठकुक्षिषु ॥ ५ ॥
लिङ्गपायूरुमूलान्तर्जानुयुग्मेषु तत्परम् । तद्वृत्तयुग्मे स्तनयोः पार्श्वयोः पादयोः पुनः ॥ ६ ॥
पाण्योर्नासिकयोः शीर्षे मन्त्रवर्णान्न्यसेत् क्रमात् । पदान्येकादश न्यसेच्छिरोभ्रूयुगलाक्षिषु ॥ ७ ॥
वक्त्रे गण्डयुगे भूयो हृदये जठरे पुनः । गुह्योरुजानुपादेषु न्यासमेवं समाचरेत् ॥ ८ ॥

इति । तद्यथा—पूर्वोक्तमन्त्रोद्धारः,

आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतीश्च
प्रोच्चार्य त्र्यम्बकं यो जपति मृतिहरं भूय एवं तथाद्यम् ।
कृत्वा न्यासं षडङ्गं स्ववदनत ऋचं मण्डलान्तः प्रविष्टं
ध्यात्वा योगीशरुद्रं स जयति मरणं शुक्रविद्याप्रासादात् ॥ ९ ॥

एषा षट्प्रणवी विद्या महामृत्युविनाशिनी । चतुर्दशस्वरोपेतो हकारो बिन्दुसंयुतः ॥ १० ॥
शिवप्रसादजनकं प्रासादमिति कथ्यते । बीजं मृत्युञ्जयं प्रोक्तं देवप्रणवसंज्ञकम् ॥ ११ ॥
नकुलीशोऽग्निमारूढो वामनेत्रार्धचन्द्रवान् । मायाबीजं च शक्तिः स्याद्देवीप्रणवसंज्ञिका ॥ १२ ॥
षष्ठस्वरेण संयुक्तो जकारो बिन्दुसंयुतः । बीजं मृत्युहरं नाम द्वितीयं सम्प्रकीर्तितम् ॥ १३ ॥
सविसर्गं सकारेण मृत्युञ्जयमथाब्रुवे । ध्रुवस्तारस्तथोंकारो मूलं ज्योतिः स्वयंस्थितः ॥ १४ ॥
वेदादि तारको युक्तो शाखाद्विप्रणवान्वितः (?) । महामृत्युञ्जयं प्रोक्तं प्रासादं मृत्युनाशनम् ॥ १५ ॥
तारकं व्याहृतिश्चैव व्यस्तान्येतान्यनुक्रमात् । विलोमव्याहृतिश्चैव सम्पुटं प्रणवद्वयम् ॥ १६ ॥
ततो व्याहृतयस्तिस्रो मन्त्रः षट्प्रणवान्वितः । ....॥

वेदादिभूरादिपदत्रयं च जपेन्मनुं मृत्युहरं त्रियम्बकम् ।

जपेत्फलार्थी विधिवत्प्रयुक्तं प्रासादमृत्युञ्जयसम्पुटेन ॥ १७ ॥

अगस्त्य उवाच ।

देवदेव महादेव भक्तानुग्रहकारक । मृत्युञ्जयविधिं ब्रूहि जपपूजादिसंयुतम् ॥ १ ॥
पीठपूजादि यन्त्रं च होमं च कृपया वद । ब्रह्मोवाच ।
शृणु वत्स समासेन मृत्युञ्जयविधानकम् । यज्ज्ञात्वा मुच्यते मर्त्यो मृत्युव्याधिमहद्भयात् ॥ २ ॥
ग्रहपीडासु सर्वासु महोग्रे चापि मण्डले । वियोगे बान्धवानां च जनमारे उपस्थिते ॥ ३ ॥
राष्ट्रभङ्गे जनच्छेदे महामृत्युविनाशने । अभिचारे समुत्पन्ने मनोधर्मविपर्यये ॥ ४ ॥
मृत्युञ्जयस्य देवस्य विधानं क्रियते बुधैः । यदा कदाचित्समये चन्द्रताराबले शुभे ॥ ५ ॥
शुभवारे शुभतिथौ शुभनक्षत्रसंयुते । शुभलग्ने शुभे योगे शुभग्रहसमन्विते ॥ ६ ॥
मृत्युञ्जयस्य देवस्य विधानारम्भ इष्यते । मण्डिते शङ्करद्वारे चित्रिते मण्डपान्विते ॥ ७ ॥
दीपस्थानं तु संशोध्य रक्तकम्बलसंयुतम् । ब्राह्मणान् वेदशास्त्रज्ञानाहूय गतमत्सरान् ॥ ८ ॥
स्वस्तिवाचनपूर्वं तु साधनं परमं भवेत् । प्रारब्धस्य च कार्यस्य सदृशो जपे उत्तमः ॥ ९ ॥
ऊनाधिकं च कार्याच्च जपेत्तद्विफलं स्मृतम् । राष्ट्रभङ्गे जनक्लेशे महारोगनिपीडिते ॥ १० ॥
कोटिसंख्याजपः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः । सामान्यगदपीडायां दुःस्वप्नस्य च दर्शने ॥ ११ ॥
मृत्युञ्जयस्य मन्त्रस्य जपेल्लक्षमितं शुभम् । अपमृत्युविनाशाय जपेदयुतसंमितम् ॥ १२ ॥
दुर्वाणीश्रवणे चैव सुहृदामनृते क्षुते । यात्राकामे रुजां नाशे सहस्रं वा समापयेत् ॥ १३ ॥
आदावभ्यर्च्य देवेशं शङ्करं लोकशङ्करम् । गर्भागारं जलैर्गाङ्गैः क्षालयेच्चन्दनान्वितैः ॥ १४ ॥
दशाङ्गैर्धूपयेद् धूपैः स्नपयेच्छङ्करं ततः । पञ्चामृतेन मन्त्रेण सपुष्पैः साक्षतैः सह ॥ १५ ॥
पयो दधि घृतं गव्यं शर्करा च शुभं मधु । गायत्र्या शर्कराशुद्धजलस्नानं ततः परम् ॥ १६ ॥
तैलाभ्यङ्गः शुभः शम्भोः सर्वकार्येषु चोत्तमः । यथाविधि विधातव्यः सर्वक्लेशनिवारकः ॥ १७ ॥
चन्दनेन सुगन्धेन कुर्याद्देवस्य लेपनम् । स्थावरे पाणिना कार्यो जङ्गमे सकनिष्ठकम् ॥ १८ ॥
ततः पुष्पैर्विधातव्या पूजा देवस्य शूलिनः । कल्पोद्भवैर्यथोद्दिष्टैर्यथा स्यात्सुमनोहरम् ॥ १९ ॥
दशाङ्गैर्धूपयेत् पश्चाद्दीपैर्नीराजयेत्ततः । दीपिकाभिश्च भोज्यैस्तु नैवेद्यैः परितोषयेत् ॥ २० ॥
ताम्बूलमर्पयेत्साङ्गं प्रीत्या देवस्य शूलिन. । न्यस्तबीजाक्षरो मन्त्री जपेत्संचिन्त्य शङ्करम् ॥ २१ ॥
यावन्नो जृम्भणं निद्रा शरीरस्यावमर्दनम् । स्थीयते मन्त्रिणा तावदेवं स्याज्जप उत्तमः ॥ २२ ॥
भूतशुद्धिं पुरा कृत्वा ततो जयमुदीरयेत् । ....॥

प्रणवव्याहृतिसहितत्र्यम्बक यजामहे इति ऋक् मृतसञ्जीविनीविद्या, महामृत्युञ्जयबीजसम्पुटऋ-(यु)क्, त्र्यम्बकमितिमन्त्रस्यायमर्थः––त्रयाणां ब्रह्मविष्णुरुद्राणां पितरं यजामहे, इति शिष्यसहितो वसिष्ठोऽब्रवीत् इति । किं विशिष्टमित्यत्राह––सुगंधिं प्रसारितपुण्यकीर्तिं । किं विशिष्टं पुष्टिवर्धनं जगद्बीजमुरुशक्तिमित्यर्थः । कस्य वर्धकमणिमादिशक्तिवर्धकम्, अतस्यत्प्रसादादेव मृत्योर्मरणात् संसाराद्वा मुक्षीय वियुज्येय । यथा बन्धनात् उर्वारुकं पक्वकर्कटीफलं मुच्यते तद्वन्मां मरणात् संसाराद्वा मोचय । किं मर्यादीकृत्य आअमृतात् सायुज्यान्तं मोक्षपदपर्यन्तमित्यर्थः इति ॥ अथ प्रयोगः––तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, वसिष्ठऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, महामृत्युञ्जयाय देवतायै नमो हृदि, देवप्रणवप्रासादबीजाय नमो गुह्ये, देवीप्रणवमायाबीजशक्तये नमो जान्वोः, ॐकीलकाय नमः पादयोः, अभीष्टसिद्धये विनियोगः सर्वाङ्गेषु । ततो मूलमन्त्रेण करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यस्य, मूलमन्त्रेण व्यापकं कृत्वा, व्याहृत्यादिमन्त्रपादचतुष्टयं करयोरंगुष्ठादिकनिष्ठान्तमंगुलिषु विन्यस्य, त्र्यम्बकं

सर्वज्ञाय ह्रां हृदयाय नमः। यजामहे नित्यतृप्ताय ह्रीं शिरसे स्वाहा। सुगन्धिं पुष्टिवर्धनं अनादिबोधाय ह्रूं शिखायै वषट्। उर्वारुकमिव बन्धनात् वह्निनेत्रवज्रिणे वज्रहस्ताय स्वतन्त्राय ह्रैं कवचाय हुं। मृत्योर्मुक्षीय नित्यमलुप्तशक्तये ह्रौं नेत्रत्रयाय वौषट्। मामृतात् अचिन्त्यानन्तशक्तये ह्रः अस्त्राय फट्। ततो मूलेन व्यापकं कृत्वा देहाङ्गन्यासमारभेत्। ॐत्र्यं त्र्यक्षेशाय त्रिनेत्राशक्तिसहिताय नमः शिखायां। ॐबं बालार्कतेजसे बलप्रभेदिनीशक्तिसहिताय नमः शिरसि। ॐकं कालान्तकेशाय कल्याणीशक्तिसहिताय नमः ललाटे। ॐयं विघ्नेशाय यज्ञरूपाशक्तिसहिताय नमः भ्रुवोः। ॐजां जालन्धरेशाय ज्वालामुखीशक्तिसहिताय नमः नेत्रयोः। ॐमं महादेवेशाय महाशक्तिसहिताय नमः श्रोत्रयोः। ॐहें हाकिनीशाय हैमवतीशक्तिसहिताय नमः नासिकायां। ॐसुं सुगन्धीशाय सुगन्धिशक्तिसहिताय नमः गण्डयोः। ॐगं गन्धेशाय गम्भीराशक्तिसहिताय नमः ऊर्ध्वोष्ठे। ॐधिं महीशाय धीराशक्तिसहिताय नमः अधरोष्ठे। ॐपुं पुण्डरीकाक्षेशाय पूर्णाशक्तिसहिताय नमः ऊर्ध्वदन्तेषु। ॐष्टिं दुष्टे(? अधिष्ठे)शाय अधिष्ठानीशक्तिसहिताय नमः अधोदन्तेषु। ॐवं वरिष्ठेशाय वरेण्याशक्तिसहिताय नमः हन्वोः। ॐधं धर्मेशाय धर्मशक्तिसहिताय नमः चिबुके। ॐनं नन्दीशाय नन्दिनीशक्तिसहिताय नमः वक्त्रे। ॐउं ऋद्धीशाय उमाशक्तिसहिताय नमः कण्ठे। ॐर्वा वरुणेशाय वामाशक्तिसहिताय नमः स्कन्धयोः। ॐरुं रुद्रेशाय रूपवतीशक्तिसहिताय नमः बाह्वोः। ॐकं कान्तेशाय कान्तिशक्तिसहिताय नमः हृदये। ॐमिं मीढुष्टमेशाय शिवाशक्तिसहिताय नमः वक्षसि। ॐवं वेदेशाय वेदगर्भाशक्तिसहिताय नमः स्तनयोः। ॐबं बन्धिनीशाय बन्धिनीशक्तिसहिताय नमः हृदये। ॐधं धन्वीशाय धनुष्मतीशक्तिसहिताय नमः नाभौ। ॐनात् नार्के(के)श्वराय पुष्टिशक्तिसहिताय नमः कट्यां। ॐमृं मृत्युञ्जयेशाय मृत्युनाशिनीशक्तिसहिताय नमः गुह्ये। ॐत्यों त्यंत(नित्ये)शाय नित्याशक्तिसहिताय नमः पायौ। ॐमुं मुक्तीशाय मुकुन्दाशक्तिसहिताय नमः पार्श्वयोः। ॐक्षीं क्षितीशाय क्षेमङ्करीशक्तिसहिताय नमः ऊर्वोः। ॐयं योगीशाय मन्त्रभेदिनीशक्तिसहिताय नमः गुल्फे। ॐमां मन्त्रेशाय मन्त्रप्रभेदिनीशक्तिसहिताय नमः पादतलयोः। ॐमृं अमृतेशाय अमरशक्तिसहिताय नमः। पादोर्ध्वे। ॐतात् तन्वीशाय तन्वीशक्तिसहिताय नमः पादयोः। इति वर्णन्यासः॥ ॐत्र्यम्बकं त्रिपुरान्तकेशाय त्रैलोक्यशक्तिसहिताय नमः शिरसि। ॐयजां यज्ञवतीशाय सुगन्धाशक्तिसहिताय नमः ललाटे। ॐमहें महत्तत्त्वेशाय मायाशक्तिसहिताय नमः श्रोत्रयोः। ॐसुगन्धिं सुगन्धीशाय सुगन्धिशक्तिसहिताय नमः नासिकायां। ॐपुष्टिं पुरुषेशाय सुन्दरीशक्तिसहिताय नमः वदने। ॐवर्धनं वरेशाय वशङ्करीशक्तिसहिताय नमः कण्ठे। ॐउर्वां उमापतीशाय ऊर्ध्वरेखाशक्तिसहिताय नमः हृदये। ॐरुकं रूपवतीशाय रुक्मवतीशक्तिसहिताय नमः कट्यां। ॐमिवं मित्रेशाय मित्रवतीशक्तिसहिताय नमः कट्यां। ॐबन्धनात् बालचन्द्रमौलीशाय बर्बरीशक्तिसहिताय नमः गुह्ये। ॐमृत्योः मन्त्रेशाय मन्त्रवतीशक्तिसहिताय नमः ऊर्वोः। ॐमुक्षीय मुक्तिकरीशाय मुक्तिकरीशक्तिसहिताय नमः जान्वोः। ॐमा महाकालेशाय महाशक्तिसहिताय नमः जङ्घयोः। ॐअमृतेशाय अमृतवतीशक्तिसहिताय नमः आधारे। इति पदन्यासः॥ ॐत्र्यम्बकं भवेशाय भूतशक्तिसहिताय नमः आधारे। ॐयजामहे शर्वेशाय शर्वाणीशक्तिसहिताय नमः स्वाधिष्ठाने। ॐसुगन्धि रुद्रेशाय विरूपाशक्तिसहिताय नमः मणिपूरे। ॐपुष्टिवर्धनं पुरुषवरदेशाय वंशवर्धिनीशक्तिसहिताय नमः अनाहते। ॐउर्वारुकमिव उग्रेशाय उग्रशक्तिसहिताय नमः विशुद्धौ। ॐबन्धनात् महादेवेशाय मानवतीशक्तिसहिताय नमः आज्ञायां। ॐमृत्योर्मुक्षीय भीमेशाय भद्रकालीशक्तिसहिताय नमः ब्रह्मरन्ध्रे। ॐमामृतात् ईशानेशाय ईश्वरीशक्तिसहिताय नमः सहस्रदले। इति वाक्यन्यासः॥ ॐत्र्यम्बकं यजामहे त्र्यम्बकेशाय त्र्यम्बिकाशक्तिसहिताय नमः पूर्ववक्त्रे। ॐसुगन्धिं पुष्टिवर्धनं मृत्युञ्जयेशाय वामाशक्तिसहिताय नमः दक्षिणवक्त्रे। ॐउर्वारुकमिव बन्धनात् महादेवेशाय भीमाशक्तिसहिताय नमः पश्चिमवक्त्रे। ॐमृत्योर्मुक्षीय मामृतात्। सञ्जीवनीशाय द्रौपदीशक्तिसहिताय नमः उत्तरवक्त्रे। इति चरणन्यासः॥

ॐत्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम् महेशाय गौरीशक्तिसहिताय नमः दक्षिणपादे। ॐउर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् शाम्भवेशाय व्यापिनीशक्तिसहिताय नमः वामपादे। इत्यर्धऋग्न्यासः। ॐत्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ सर्वाख्येशाय अनाख्याशक्तिसहिताय नमः सर्वाङ्गे। इति ऋग्न्यासः॥ एवं षड्विधन्यासः॥ देहाङ्गन्यासं कृत्वा षडङ्गन्यासमारभेत्—ॐनमो भगवते त्र्यम्बकाय शूलपाण्ये नमः स्वावा ह्रां हृदयाय नमः। ॐनमो भगवते रुद्राय अमृतमूर्तये मां जीवय ह्रीं शिरसे स्वाहा। ॐनमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा ह्रूं शिखायै वषट्। ॐनमो भगवते रुद्राय त्रिपुरान्तकाय खट्वाङ्गपाण्ये ह्रैं कवचाय हुं। ॐनमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसामाथर्वणमूर्तये ह्रौं नेत्रत्रयाय वौषट्। ॐनमो भगवते मृत्युञ्जयायाग्नित्रयाय ज्वलस्व ज्वलस्व मां रक्ष रक्ष रोगान् विध्वंसय विध्वंसय दुष्टान्निवारय निवारय अघोरास्त्राय फट् ह्रः अस्त्राय फट्॥ ॐत्र्यम्बकाय त्रिनेत्राय उमाकालाग्निरुद्राय नमः पादयोः। ॐत्र्यम्बकाय त्रिनेत्राय कालाग्निमूर्तये नमः जङ्घयोः। ॐत्र्यम्बकाय त्रिनेत्राय उमाधारिणे नमः ऊर्वोः। ॐत्र्यम्बकाय त्रिनेत्राय कामविध्वंसिने नमः गुह्ये। ॐत्र्यम्बकाय त्रिनेत्राय पञ्चवक्त्राय नमः वक्ते। ॐत्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय नमः गले। ॐत्र्यम्बकाय त्रिनेत्राय चन्द्रार्कवह्निनेत्राय नमः नेत्रयोः। ॐत्र्यम्बकाय त्रिनेत्राय सर्वाभरणभूषितायामृतप्लुताय नमः मूर्धादिपादान्तम्॥ ॐसदाशिवाय नमः शिखायां। ईशानाय० मूर्ध्नि। तत्पुरुषाय०। मुखे। अघोराय० हृदि। वामदेवाय० ऊरुद्वये। सद्योजाताय नमः पादयोः। इति॥

एवं न्यासविधिं कृत्वा शिवो भूत्वा शिवं यजेत्। न्यासमूलमिदं सर्वं न्यासं पूर्वं समाचरेत्॥ १॥
न्यासेन रहितं कर्म चार्धं गृह्णन्ति राक्षसाः। तस्मात्सर्वप्रयत्नेन न्यासकर्म समाचरेत्॥ २॥

ध्यानम्। ततश्चन्द्रमण्डलोपरि बद्धपद्मासनं चन्द्रवर्णं स्रवदमृतचन्द्रकलाधरं योगमुद्राबद्धाधरहस्तद्वयं धृतामृतपूर्णकलशोत्तरकरद्वयं सोमसूर्याग्नित्रिलोचनं बद्धपिङ्गलजटाजूटं नागयज्ञोपवीतिनं नागाभरणभूषणं भक्तानुकम्पिनं भस्मानुलेपिनं श्रीरुद्रं ध्यायेत्।

शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्। गङ्गाधरं जटाजूटखण्डेन्दुमण्डितं तथा॥ १॥
कपालमालिनं सौम्यं योगासनगतस्थितम्। व्याघ्रचर्माम्बरधरं बद्धनागेन्द्रभूषणम्॥ २॥
वामे करे त्वभयदं दक्षिणे वरदं तथा। कपालकुण्डलं सव्ये त्रिशूलं दक्षिणे करे॥ ३॥
ध्यायेन्मृत्युञ्जयं देवं मृत्युरोगविनाशनम्। एवं ध्यात्वा द्विजः सम्यक् त्र्यम्बकजपमारभेत्॥ ४॥

इति। ध्यानान्तरम्—

हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम्।
अङ्कन्यस्तकरद्वयामृतघटं कैलाससंस्थं शिवं
स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे॥ ५॥

गौरीं चतुर्भुजां चण्डीं त्रिनेत्रां मुकुटोज्ज्वलाम्। पद्मदर्पणहस्तां च वरदाभयहस्तकाम्॥ ६॥
दिव्यवस्त्रपरीधानां दिव्यालङ्कारभूषिताम्। प्रसन्नवदनां ध्यात्वा शिवोत्सङ्गे तु वामतः॥ ७॥

एवं ध्यात्वा स्नेहपूर्णेन मनसा पूर्वोक्तमार्गेणार्चनं कृत्वा शरणं व्रजेत्।

त्रियम्बक महादेव पाहि मां शरणागतम्। जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः॥ ८॥
तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड। इति विज्ञाप्य देवेशं जपेन्मन्त्रं च त्र्यम्बकम्॥ ९॥
अंगुल्यग्राणि मूले तु कृत्वांगुष्ठे निपीडयेत्। मुष्टिमुद्रा शिवस्योक्ता सैव शान्तिप्रदायिनी॥ १०॥

"एष ते रुद्र भाग" इति लिङ्गमुद्रां प्रदर्शयेत्।

श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तु नेत्रयोः । मुखे त्वन्नाद्यकामस्तु ग्रीवायां रोगनाशने ॥ ११ ॥
हृदये सर्वकामस्तु नाभौ ज्ञाने प्रदर्शयेत् । प्रजाकामस्तु गुह्ये वै पशुकामस्तु गुल्फलयोः ॥ १२ ॥
जानुभ्यां ग्रामकामस्तु राष्ट्रकामस्तु पादयोः । वशीकरणकामस्तु वामहस्ते प्रदर्शयेत् ॥ १३ ॥
पापक्षयेऽभिचारे वा व्याधिरोगविनाशने । बहिः शरीरात्कुर्वीत शिवस्याग्रे तु संस्पृशत् ॥ १४ ॥

इति ॥ अथ पूजा—

त्रिभिर्व्याहृतिभिः कुर्यान्निर्माल्यस्य विसर्जनम् । मलस्नानं ततः कुर्यात्पात्रे देवं निधाय च ॥ १ ॥
गन्धमाल्यैः सुगन्धैश्च चात्मानं चार्चयेद् बुधः । आवाहनासनं पाद्यमर्घ्यमाचमनीयकम् ॥ २ ॥
स्नानं वस्त्रोपवीतं च गन्धपुष्पं यथाक्रमम् । सहस्रशीर्ष इत्यादिऋग्भिस्तु दशभिर्यजेत् ॥ ३ ॥
ततः पीठं समाराध्य गन्धपुष्पाक्षतैः शुभैः । आधारशक्तिं कूर्मं च कैलासं मन्दराचलम् ॥ ४ ॥
पृथिवीवेदिकां चैव सिंहासनस्य पादुकाम् । चतुर्थ्यन्तनमोन्तं च पीठमध्ये समर्चयेत् ॥ ५ ॥
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम् । हुताशनादिकोणेषु ततः प्रागादिषु क्रमात् ॥ ६ ॥
धर्मादींश्च यजेत्तत्र नञ्पूर्वांश्च यथाक्रमम् । सिंहासनस्य कोणेषु वह्न्यादिषु याथक्रमम् ॥ ७ ॥
गुणत्रयं तथा विद्याश्चतुर्थ्यन्तं नमोन्तकेः । अतः परं प्रवक्ष्यामि मण्डलस्य तु लक्षणम् ॥ ८ ॥
अत्रादौ मण्डलं कार्यं मनोज्ञैः शालितण्डुलैः । पूर्वमष्टादश रेखा उत्तरेऽष्टादश तथा ॥ ९ ॥
एकेनोना च नवतिः कोष्ठकाणां शतद्वयम् । आवाह्य देवतास्तत्र त्र्यम्बकाद्याश्च शक्तिकाः ॥ १० ॥
रमा-माया प्रभा ज्योत्स्ना पूर्णा पूर्णामृता सुधा । विश्वा विद्या प्रभा प्रह्वा सारा सन्ध्या शिवा निशा ।११।
ओघा प्रज्ञा प्रभा मेधा कान्तिः शान्तिर्धृतिः स्मृतिः । परा जया ह्यविघ्नी च पद्मा क्षान्तिस्तथैव च ।१२।
अघोरा अजया माला कलास्त्रिंशत्प्रकीर्तिताः । कलाज्ञानविहीनानां पूजनं निष्फलं भवेत् ॥ १३ ॥
प्रणवादिनमोन्तैश्च चतुर्थीपदमध्यगाः । सर्वत्र प्रजपेन्मन्त्रं ततः पीठं प्रपूजयेत् ॥ १४ ॥
क्षारक्षीरदधिसर्पिःस्वादोदकसुरेक्षवः । प्रणवादिनमोऽन्ताश्च सागरांस्तत्र पूजयेत् ॥ १५ ॥
जम्बुद्वीपं ततः प्लक्षं शाल्मलिं कुशसंज्ञकम् । क्रौञ्चं शाकं पुष्करं च द्वीपानि तु ततो यजेत् ॥ १६ ॥
भूर्लोकोऽथ भुवर्लोको स्वर्गलोको महर्जनः । तपो लोकः सत्यलोकः क्रमात्तत्रैव पूजयेत् ॥ १७ ॥
अतलं वितलं चैव तलातलमतः परम् । रसातलं च पातालं सुतलं च महातलम् ॥ १८ ॥
आत्मतत्त्वान्तरात्मा परमात्मा ज्ञानमेव च । चतुर्थ्यन्तप्रयोगेण नमोन्तेन प्रपूजयेत् ॥ १९ ॥
गङ्गा च यमुना चैव गोदावरी सरस्वती । नर्मदा सिन्धुः कावेरी नमोन्तेन प्रपूजयेत् ॥ २० ॥
संवत्सराश्च ऋतवो मासाः पक्षा दिनानि च । प्रणवादिनमोन्तेन ततः शक्तीः प्रपूजयेत् ॥ २१ ॥
वामा ज्येष्ठा तथा श्रेष्ठा रौद्री काली तथैव च । कलविकरणी चैव बलविकरणी तथा ॥ २२ ॥
बलप्रमथनी चैव सर्वभूतदमन्यथ । मनोन्मनी भगवती कालरुद्रात्मने नमः ॥ २३ ॥
उमा चण्डेश्वरो नन्दी महाकालस्तथैव च । वृषभो भृङ्गिरीटिश्च स्कन्दश्चैव क्रमाद्यजेत् ॥ २४ ॥
इन्द्रादिलोकपालांश्च पूजयेत्तदनन्तरम् । सरस्वतीं च दुर्गां च गणेशं क्षेत्रपालकम् ॥ २५ ॥
तत्तद्बीजेन सम्पूज्य वसूनष्टौ तथा यजेत् । रुद्रानेकादश चैव द्वादशादित्यकान् यजेत् ॥ २६ ॥
भैरवाष्टौ ततः पूज्या ब्राह्म्यादींश्च ततो यजेत् । ध्रुवोऽध्वरस्तथा सोम आपश्चैवानिलोऽनलः ॥ २७ ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः । वीरभद्रश्च शम्भुश्च गिरिशोऽप्यजएकपात् ॥ २८ ॥
अहिर्बुध्न्यः पिनाकी च भुवनाधीश्वरस्तथा । दिशांपतिः पशुपतिः स्थाणुर्भर्ग इति स्मृतः ॥ २९ ॥
आदित्यः सविता सूर्यः पूषा मित्रस्तथैव च । तमोघ्नश्च हिमघ्नश्च अरुणो भानुरेव च ॥ ३० ॥
मार्तण्डो भास्करश्चेति तथैव च दिवाकरः । असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तभैरवः ॥ ३१ ॥

कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः । ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ ३२ ॥
वाराहीन्द्राणी चामुण्डा महालक्ष्म्योऽष्ट मातरः । ....॥

इति । ततस्त्र्यम्बकमन्त्रेण पञ्चामृतस्नानादिशोडषोपचारपूजां कुर्यात् । प्लुतप्रणवयोगेन स्नपयेत् । आवाहनस्थापनसंनिधानसंनिरोधनसम्मुखीकरणसकलीकरणावगुण्ठनामृतीकरणपरमीकरणयोनिलिङ्गमहासरस्वती मुद्राः प्रदर्शयेत् । तत आवरणपूजां कुर्यात् । तत्र न्यासोक्तदेवता अष्टाविंशत्युत्तरशतं शक्तयः पूज्याः ।

सद्योजाताष्टका ज्ञेया वामदेवास्त्रयोदश । अघोरस्य कला ह्यष्टौ पुरुषस्य चतुष्कलाः ॥ ३३ ॥
ईशानस्य कलाः पञ्च क्रमेण परिकीर्तिताः । अष्टत्रिंशत्कला ज्ञेयाः पूजनीयाः प्रकीर्तिताः ॥ ३४ ॥
शशिनी चाङ्गदा हृष्टा मरीचिर्ज्वालिनी तथा । ईशानस्य कलाः पञ्च नीराजनपरानुगाः ॥ ३५ ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च । पुरुषस्य कला ह्येताश्चतस्रः परिकीर्तिताः ॥ ३६ ॥
तमा मोहा क्षमा निद्रा व्याधिर्मृत्युः क्षुधा तृषा । अघोरस्य कला ह्येताश्चाष्ट संज्ञोपलक्षिताः ॥ ३७ ॥
रजा रक्षा रतिर्वाह्य कामसञ्जीवनी तथा । कृपा वृद्धिः क्षमा धात्री भूषणी मोहिनी तथा ॥ ३८ ॥
वामदेवकला ह्येताः कीर्तिताश्च त्रयोदश । ऋद्धिः सिद्धिलघुर्लक्ष्मीर्मेधा कान्तिः स्वधा प्रजा ॥ ३९ ॥
सद्योजातकला ह्येता ह्यष्ट संज्ञोपलक्षिताः । शुद्धस्फटिकसङ्काशं निर्मलानन्दसंज्ञितम् ॥ ४० ॥
तत्त्वं निधनकं चैव ईशानोर्ध्वमुखं स्मरेत् । ....॥

"ईशानः सर्वविद्यानां" इति मन्त्रेणेशानस्योर्ध्वमुखं पूजयेत् ।

पद्मरागसमाभासं जपाबालार्कसन्निभम् । वक्त्रं च संप्रियं स्निग्धं पूर्वं तत्पुरुषं स्मरेत् ॥ ४१ ॥

"तत्पुरुषाय" इति मन्त्रेण तत्पुरुषस्य पूर्ववक्त्रं पूजयेत् ।

नीलाभं च समस्तेज्यं करालं विकृताननम् । दक्षिणस्यां दिशि ध्यातमघोरस्य मुखं स्मरेत् ॥ ४२ ॥

"अघोरेभ्य" इति मन्त्रेणाघोरस्य दक्षिणमुखं पूजयेत् ।

नित्यं च हेमवर्णाभं दिव्यरूपं सुलक्षणम् । कामिन्यर्धाङ्गसंयुक्तं वक्त्रं वामोत्तरं यजेत् ॥ ४३ ॥

"वामदेवाय" इति मन्त्रेण वामदेवस्योत्तरं मुख पूजयेत् ।

सुश्वेतं शङ्खवर्णाभं नीलकण्ठस्य शोभितम् । गङ्गार्धचन्द्रमौलिस्थं सद्योजातं तु पश्चिमम् ॥ ४४ ॥

"सद्योजात" मिति मन्त्रेण सद्योजातस्य पश्चिमवक्त्रं पूजयेत् ।

अथाङ्गपूजा—त्र्यम्बकाय त्रिनेत्राय कालाग्निरुद्राय नमः पादौ पूजयामि । त्र्यम्बकाय त्रिनेत्राय कालाग्निमूर्तये नमः जंघे पूजयामि । त्र्यम्बकाय त्रिनेत्राय उमाङ्गधारिणे नमः ऊरू० । त्र्यम्बकाय त्रिनेत्राय कामविध्वंसिने नमः गुह्यं० । त्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय नमः कण्ठं० । त्र्यम्बकाय त्रिनेत्राय पञ्चवक्त्राय नमः वक्त्रं० । त्र्यम्बकाय त्रिनेत्राय चन्द्रार्कवह्निनेत्राय नमो नेत्रं० । त्र्यम्बकाय त्रिनेत्रायमृतप्लुताय दिव्यशरीराय नमः सर्वाङ्गं पूजयामि । ततो मूलमन्त्रेण गन्धपुष्पधूपदीपनैवेद्याचमनीयान्तं कर्म समापयेदिति । ततो मूलमन्त्रं जप्त्वा विसर्जयेत् । पुरश्चरणं तु । तदुक्तम्—

जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः । जुहुयादयुतं द्रव्यैर्दशभिर्घृतसंप्लुतैः ॥ १ ॥
बिल्वं पलाशं खदिरं वटं तिलसर्षपान् । दौग्धं दुग्धं दधि पुनर्दूर्वान्तानि विदुः क्रमात् ॥ २ ॥
पञ्चाक्षरोदिते पीठे पूजयेद् वृषभध्वजम् । मूर्तिं मूलेन संकल्प्य वक्ष्यमाणेन वर्त्मना ॥ ३ ॥
पूर्वमङ्गानि सम्पूज्य पञ्चमूर्तीः प्रपूजयेत् । अर्केन्दुवसुधातोयवह्नीरवियदात्मनः ॥ ४ ॥
रमा राका प्रभा ज्योत्स्ना पूर्णोमा पूषणी सुधा । अष्टाविमाः क्रमात्पूज्यास्तृतीयावरणे ततः ॥ ५ ॥
विश्वा विद्या सिता प्रह्वा सारा सन्ध्या शिवा निशा । चतुर्थावरणे पूज्याः शक्तयोऽष्टौ क्रमादिमाः ॥ ६ ॥
आर्या प्रज्ञा प्रभा मेधा कान्तिः शान्तिर्घृतिर्मतिः । पञ्चमावरणे पूज्याः क्रमादेतास्ततः परम् ॥ ७ ॥

एवं कृते प्रयोगार्हो जायतेऽयं महामनुः ।.... ....॥

इति ॥ अथ प्रयोगा उच्यन्ते—

सर्वेषां चैव मन्त्राणां पूर्वसेवा कृता तथा । लक्षैकेन सुसिध्यन्ति दशांशेनैव होमयेत् ॥ १ ॥

पूर्वसेवार्थमयुतं गुग्गुलं घृतसंप्लुतम् । भूतशुद्धिं पुरा कृत्वा न्यासजालमतः परम् ॥ १ ॥

शुक्लाम्बरधरः शुक्ल शुक्लमाल्यानुलेपनः सपत्नीकः सर्त्विक् साचार्यो यजमानो मङ्गलघोषेण सम्पूर्णकलश सहितः शकुनादिमन्त्रघोषेण कुण्डस्थदेशं स्थण्डिलदेशं वा प्राप्य, तत्रोपविश्य प्राणानायम्य, अद्येत्यादि देशकालौ संकीर्त्य, मया कृतस्य कारितस्य वा जपस्य सम्पूर्णफलावाप्त्यर्थं तद्दशांशहोमममुकद्रव्येण करिष्ये । तदङ्गतया गणेशपूजनं मातृकापूजनं नान्दीमुखश्राद्धं च करिष्ये इति संकल्प्य, संस्कृत्य ग्रहवेद्यां ग्रहस्थापनं कृत्वा, ग्रहाधिदेवताः प्रत्यधिदेवता गणपतिदुर्गाक्षेत्रपालकान् इन्द्राद्यष्टदिक्पालांश्च तत्तन्मन्त्रैः स्थापयित्वा, तत्रैकं मध्ये कलशं संस्थाप्य तन्मुखे वस्त्रोपरि महामृत्युञ्जयमन्त्रं संस्थाप्य, मन्त्रवर्णसंख्याक्रमाषपरिमितां प्रतिमां तदुपरि संस्थाप्य तां शोधयेत् । प्रथमं देवं प्रणिपत्यैवं प्रार्थयेत् । "स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते । शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्यां सहस्व ताम्" ॥ ततो न्यासपूर्वकं रुद्राभिषेकं कुर्यात् । ततोऽग्नेरुत्तारणम् । "अग्निः सप्ति वाजम्भरं (१० । ८० । १) इति जप्त्वा पुनः सर्वसूक्तेनाभिषेकः कार्यः । प्रथमं सप्तमृत्तिकाभिरालिप्य शुद्धोदकेन प्रक्षाल्य कोष्ठं हरिद्राद्वयश्रीखण्डकचोरकमुस्ताचूर्णेनोद्वर्त्य जलेन प्रक्षालयेत् । "आपो हि ष्ठा" (१० । ९ । १) इति ऋग्भिरभ्यर्च्य ततः पुष्पाक्षतान् गृहीत्वा "आ त्वा वहन्तु हरयः" (१ । १६ । १) इति ध्यात्वा "स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम् । तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु" ॥ आवाहनादिकल्पोक्तप्रकारेण षोडशोपचारपूजां कुर्यात् ।

दशक्लेशे हि संसारे प्राप्तोऽहं शरणागतः । भक्त्या समर्चयाम्यद्य सफलं चास्तु पूजनम् ॥ १ ॥
साधु वासाधु वा कर्म यद्यदाचरितं मया । तत्सर्वं भगवञ्छम्भो गृहाण विधिपूर्वकम् ॥ २ ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥ ३ ॥
महादेव जगन्नाथ शरणागतवत्सल । भक्त्या कृतं मया देव तत्सर्वं सफलं कुरु ॥ ४ ॥

इति प्रार्थनां कृत्वा, पुनः प्रार्थयेत् ।

जय देव जगन्नाथ जय शाश्वत शङ्कर । जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥ १ ॥
जय सर्वगुणातीत जय सर्ववरप्रद । जय नित्य निराधार जय विश्वम्भराव्यय ॥ २ ॥
जय विश्वैकवन्द्येश जय नागेन्द्रभूषण । जय गौरीपते शम्भो जय चन्द्रार्धशेखर ॥ ३ ॥
जय कोट्यर्कसङ्काश जयानन्तगुणाश्रय । जय रुद्र विरूपाक्ष जयाचिन्त्य निरञ्जन ॥ ४ ॥
जय नाथ कृपासिन्धो जय भक्तार्तिभञ्जन । जय दुस्तरसंसारसागरोत्तारण प्रभो ॥ ५ ॥
प्रसीद मम देवेश संसारार्तस्य बिभ्यतः । सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर ॥ ६ ॥
महादारिद्र्यमग्नस्य महापापहतौजसः । महाशोकनिमग्नस्य महारोगातुरस्य च ॥ ७ ॥
ऋणभारपरीतस्य दह्यमानस्य कर्मभिः । ग्रहैः प्रपीड्यमानस्य प्रसीद मम शङ्कर ॥ ८ ॥
दरिद्रः प्रार्थयेद्देवं पूजान्ते गिरिजापतिम् । अर्थार्थी वापि राजा वा प्रार्थयेद्देवमीश्वरम् ॥ ९ ॥
दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्नतिः । ममास्तु नित्यमानन्दः प्रसादात्तव शङ्कर ॥ १० ॥
शत्रवः संक्षयं यान्तु प्रसीदन्तु मम ग्रहाः । नश्यन्तु दस्यवो राष्ट्रे जनाः सन्तु निरापदः ॥ १२ ॥
दुर्भिक्षमारीसन्तापाः शमं यान्तु महीतले । वसुसस्यसमृद्धिश्च भूयात्सुखमय दिशि ॥ १३ ॥
एवमाराधयेद् देवं जपहोमार्चनादिषु । यावत्कर्म समाप्येत तावत्सन्निहितो भवेत् ॥ १४ ॥

इति । ततो होमं कुर्यात् । होमकुण्डे चतुर्दिक्षु द्वारपालान् प्रतिष्ठाप्य 'गणानां त्वा०' जातवेदसे०'

क्षेत्रस्य पतिना वयं०' प्रणो देवी०' इति मन्त्रैः प्रतिष्ठाप्योपविश्य, प्राणायामपूर्वकमृष्यादिन्यासं कृत्वा, पादयोः विष्णवे नमः। हृदये ब्रह्मणे नमः। शिरसि महेश्वराय नमः। शिखायां सप्तर्षिभ्यो नमः। नासिकायां सप्तजिह्वाय नमः। श्रोत्रयोः अश्विनीदेवताभ्यां नमः। चक्षुषोः शशिभास्कराभ्यां नमः। जिह्वायां सरस्वत्यै नमः। वाचि बृहस्पतये नमः। दन्तेषु माधवाय नमः। हृदये हव्यवाहनाय नमः। पादयोः गन्धर्वाप्सरोभ्यो०। कण्ठे द्वादशादित्येभ्यः०। दक्षिणहस्ते ऐकादशरुद्रेभ्यः०। वामे अष्टवसुभ्यो०। उपकवचे द्वादशादित्येभ्यः०॥ अहमेव परमात्मा। त्र्यम्बकाय त्रिपुरान्तकेशाय शूलपाणये स्वाहा हृत। त्र्यम्बकाय त्रिनेत्राय कपर्दिने स्वाहा शिरः। त्र्यम्बकाय त्रिनेत्राय नीलकण्ठाय स्वाहा शिखा। त्र्यम्बकाय त्रिनेत्राय सर्वसिद्धिफलप्रदाय स्वाहा कवचं। त्र्यम्बकाय त्रिनेत्राय ज्ञानमूर्तये स्वाहा नेत्रे। त्र्यम्बकाय त्रिनेत्राय ज्वल ज्वल प्रज्वल २ प्रतापय स्वाहा अस्त्रं। ततः पूर्ववद् ध्यात्वा अग्निं परिसमूह्य ऋक्शाखाप्रयोगं कुर्यात्। मन्त्रहोमं कृत्वा ततः स्विष्टकृतं हुत्वा, बलिदानं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य प्राणानायम्य सङ्कल्पहोमसम्पूर्णफलावाप्त्यर्थं पूर्णाहुतिहोमं करिष्ये, समुद्रादूर्मि० मूर्धानं दिवः० पुनस्त्वादित्या० सप्त ते अग्ने० धामन्ते० एतैर्मन्त्रैर्हुत्वा आचार्याय प्रतिमां दद्यात्। ततः श्रेयःसम्पादनं कृत्वाचार्यत्विक्—गणपतिजपब्राह्मणेभ्यो गन्धमाल्यादिवस्त्रालङ्करणानि दत्त्वा, यथोचितदक्षिणां दत्त्वा, ब्राह्मणान् भोजयित्वा दक्षिणादिभिः सन्तोष्य विसर्जयेत्। इति होमविधिः॥

अथ काम्यप्रयोगाः—

दूर्वाभयार्द्रसमिधो गोघृतेन समन्विताः। होतव्याः शान्तिके विप्र शान्तिर्येन भवेत्स्फुटा॥ १॥
समिधो राजवृक्षोत्था होतव्याः स्तम्भकर्मणि। मेषीघृतेन संयुक्ताः सहदेव्या सुसिद्धिदाः॥ २॥
खादिराः मारणे प्रोक्ताः कटुतैलेन संयुताः। उत्पा(च्चा,टये)न्महीं सर्वां सशैलवनकाननाम्॥ ३॥
यशश्चैव सदा होमे कुसुमैर्दाडिमोद्भवैः। अजाघृतेन देवर्षीन् वशयेत्सचराचरम्॥ ४॥
वशमायान्ति ताः सर्वाः यक्षनागाङ्गनादयः। जातिनिर्मल्लिकाहोमो घृतेन सहितो भवेत्॥ ५॥
साध्यानां कन्यकाः सर्वाः साधकाग्रे पतन्ति च। करवीरैस्तु रक्तैस्तु योषितो वशमानयेत्॥ ६॥
शतपत्रैः कृतो होमः पृथ्वीलाभं करोति च। होमाच्च पिचुमन्दैश्च मतिमाञ्जायते नरः॥ ७॥
अङ्कोलपुष्पहोमेन सिद्ध्योऽष्टौ भवन्ति हि। अर्कपुष्पैः सदारोग्यं मन्दारैरर्थसम्पदः॥ ८॥
तथैव पालिपुष्पैश्च राजानं गिरिकर्णकैः। नीलपुष्पैस्तथा होमे देशं च वशमानयेत्॥ ९॥
ब्राह्मणास्तु वशं यान्ति वन्यैः सुक्षितिसम्भवैः। कदम्बपुष्पहोमेन यक्षिणीं वशमानयेत्॥ १०॥
कुन्दपुष्पैस्तु सौभाग्यं विद्या रक्तोत्पलैर्भवेत्। बिल्वपत्रैस्तु राज्यं च चक्रवर्तित्वमम्बुजैः॥ ११॥
अशोकपुष्पहोमेन सर्वशोकविनाशनम्। कर्णिकापुष्पहोमेन राज्यप्रीतिमवाप्नुयात्॥ १२॥
हरीतक्या च आरोग्यं व्याधिनाशो विभीतकैः। चूतपुष्पफलैर्होमश्चिन्तितार्थफलप्रदः॥ १३॥
जम्बूफलैश्च होमेन यशश्चाप्नोति निर्मलम्। न्यग्रोधफलहोमेन सर्वसिद्धिमवाप्नुयात्॥ १४॥
दाडिमीफलहोमेन दैत्यकन्यां समानयेत्। कूष्माण्डफलहोमेन धान्यसिद्धिमवाप्नुयात्॥ १५॥
बदरीफलहोमेन रत्नलाभो भवेद् ध्रुवम्। पिचुमन्दफलैः पुष्पैर्विद्वेषाकर्षणं परम्॥ १६॥
द्राक्षाफलैः सदावश्यं स्थावरं जङ्गमं तथा। नारिकेलफलैर्होमे वृद्धिमाप्नोति चाव्ययाम्॥ १७॥
कुटजीफलहोमेन वेतालसिद्धिमाप्नुयात्। चम्पकैश्च कृते होमे सिद्ध्यन्तेऽप्सरसां गणाः॥ १८॥
तिलैश्च शान्तिकं कुर्यान्मधुघृतसमन्वितम्। राजिकालवणैरेव वश्याकर्षणकं परम्॥ १९॥
शिलातालकहोमेन मारयेद्द्विजपुंजं कुलम्। विल्वमूलकहोमेन शक्रतुल्यो भवेन्नरः॥ २०॥
प्रियंगुकदलीपुष्पैः सर्वसत्त्वं वशं नयेत्। दूर्वांकुरसमिद्भिस्तु अमृताखण्डसंयुतम्॥ २१॥

घृतमधुसुसंयुक्तं महामृत्युविनाशनम् । अयुतं जुहुयाद्बिल्वसमिद्भिः संपदे सुधीः ॥ २२ ॥
जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे । खादिरैरयुतं हुत्वा कान्ति पुष्टिमवाप्नुयात् ॥ २३ ॥
वटवृक्षस्य समिधो जुहुयादयुतावधि । धनधान्यसमृद्धः स्यादचिरेणैव साधकः ॥ २४ ॥
तिलैस्तत्संख्यया हुत्वा सर्वपापैः प्रमुच्यते । सिद्धार्थैरयुतं हुत्वा शत्रून् विजयते नृपः ॥ २५ ॥
अनेनैव विधानेन नश्येन्मृत्युरकालतः । पायसेन कृतो होमो रक्षाश्रीकीर्तिदायकः ॥ २६ ॥
शुद्धान्नपशुदुग्धेन हुत्वा कृत्यां विनाशयेत् । अयमेवं मनोर्होमः शान्तिश्रीसम्पदावहः २७ ॥
दधिदुग्धेन सम्पातं कुर्याद्विद्वेषणे मतम् । प्रत्यहं जुहुयान्मन्त्री दूर्वा अष्टोत्तरं शतम् ॥ २८ ॥
आमयानखिलाञ्जित्वा दीर्घमायुरवाप्नुयात् । जुहुयाज्जन्मदिवसे पायसान्नैर्घृतान्वितैः ॥ २९ ॥
इष्टामनिन्दितां लक्ष्मीमारोग्यमतुलं यशः । गव्यदुग्धघृताक्ताभिर्दूर्वाभिर्जुहुयाद्वशी ॥ ३० ॥
सविंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः । आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः ॥ ३१ ॥
शाल्मलीसमिधः सर्पिः पयोन्नं त्रिशतं सुधीः । जुहुयाद् ब्राह्मणानन्ते भोजयेन्मधुरान्वितम् ॥ ३२ ॥
प्रीणयेद् धनधान्याद्यैरात्मनो गुरुमादरात् । अनामयमवाप्नोति दीर्घमायुः श्रिया सह ॥ ३३ ॥
सघृतेन पयोन्नेन हुत्वा पर्वणि पर्वणि । राज्यश्रियमवाप्नोति षण्मासान्नात्र संशयः ॥ ३४ ॥
लाजैर्विशुद्धैर्जुहुयात्कन्यायाः सुवराप्तये । क्षीरद्रुमसमिद्धोमाद् ब्राह्मणादीन् वशं नयेत् ॥ ३५ ॥
स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुम् । आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात् ॥ ३६ ॥
अनेन मनुना सर्वं साधयेदिष्टमात्मनः । ....॥

इति मृत्युञ्जयप्रयोगः ॥ अथ श्रीविद्यावरणाङ्गत्वेन गायत्रीविधानम् । तत्र शारदातिलके–(प० २१)

अथो वक्ष्यामि गायत्रीं तत्त्वरूपां त्रयीमयीम् । यथा प्रकाश्यते ब्रह्म सच्चिदानन्दलक्षणम् ॥ १ ॥
प्रणवाद्या व्याहृतयः स्युस्तत्पदादिकाः । चतुर्विंशत्यक्षरात्मा गायत्री शिरसान्विता ॥ २ ॥
सर्ववेदोद्धृतः सारो मन्त्रोऽयं समुदाहृतः । ब्रह्मा देव्यादिगायत्री परमात्मा समीरितः ॥ ३ ॥
ऋष्याद्याः प्रणवस्यैते मुनिभिः परिकीर्तिताः । प्राग्वत्कृत्वा षडङ्गानि ध्यायेद्विष्णुं तथा ततः ॥ ४ ॥

तथा तत्प्रकरणोक्तप्रकारेण ।

जमदग्निभरद्वाजभृगुगौतमकश्यपान् । विश्वामित्रवसिष्ठाख्यौ व्याहृतीनामृषीन् विदुः ॥ ५ ॥
गायत्र्युष्णिगथानुष्टुब् बृहतीपंक्तयः पुनः । त्रिष्टुब्जगत्यौ छन्दांसि कथितानि मनीषिभिः ॥ ६ ॥
सतार्चिरनिलः सूर्यो वाक्पतिर्वरुणो वृषा । विश्वेदेवाः क्रमादासां देवताः परिकीर्तिताः ॥ ७ ॥
भूराद्याभिर्व्याहृतिभिः षड्भि कुर्यात्षडङ्गकम् । व्याहृतीः सप्त भूराद्याः हृन्मुखांसोरुयुग्मके ॥ ८ ॥
जठरे न्यस्य मन्त्रज्ञो ध्यायेत्ता व्याहृतीस्ततः । स्थानानि सप्त लोकाः स्युः सर्वासां स्वस्वसंज्ञकाः ॥ ९ ॥
स्वे स्वे च वर्णतरवो रूपयौवनसंयुताः । क्षौमवस्त्रपरीधानाः सर्वाभरणभूषिताः ॥ १० ॥
उन्निद्राम्भोजवदनाः प्रभामण्डलमण्डिताः । सितोपवीतहृदयाः सपवित्रचतुष्कराः ॥ ११ ॥
अभयाक्षस्रगप्यत्र(?)वरहस्तसरोरुहाः । एवं होमजपारम्भे ध्येया व्याहृतयो द्विजैः ॥ १२ ॥
गायत्र्या मुनिराख्यातो विश्वामित्रो महाद्युतिः । गायत्री छन्द इत्युक्तं देवता सविता स्मृतः ॥ १३ ॥
एतान् विन्यस्य ऋष्यादीन् गायत्र्यर्णांस्तनौ न्यसेत् । पत्सन्धिषु ध्वजे नाभौ हृत्कण्ठभुजसन्धिषु ॥१४॥
आस्यनासाकपोलाक्षिकर्णभ्रूमस्तके पुनः । पाश्चात्योत्तरयाम्यप्रागूर्ध्ववक्त्रेषु साधकः ॥ १५ ॥
पदानि दश विन्यस्येदेषु स्थानेषु मन्त्रवित् । शिरोभ्रूमध्यदृग्वक्त्रे कण्ठहृन्नाभिगुह्यके ॥ १६ ॥
जानुनोः पादयोर्युग्मे तच्छिरः शिरसि न्यसेत् । हृदयं ब्रह्मणे प्रोक्तं विष्णवे शिर ईरितम् ॥ १७ ॥
शिखा रुद्राय कवचमीश्वराय समीरितम् । नेत्रं सदाशिवायोक्तमस्त्रं सर्वात्मने स्मृतम् ॥ १८ ॥

षडङ्गान्येवमुक्तानि यथास्थानं प्रविन्यसत् । शिरसोऽस्य मुनिर्ब्रह्मा छन्दो देव्यादिका स्मृता ॥ १९ ॥
गायत्री परमात्मास्य देवता कथिता बुधैः । ....॥

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयांकुशकशान् पाशं कपालं गुणं
शङ्खं चक्रमथारबिन्दयुगलं हस्तैर्वहन्तीं भजे ॥ २० ॥

कशः काशः, गुणं त्रिशूलम् । दक्षाधःकरमारभ्य दक्षवामदक्षवामक्रमेणोपर्युपरि द्वन्द्वक्रमेणायुधानि ध्येयानि ।

सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसान्विताम् । त्रिरुच्चरन् धिया प्राणान् धारयेद्यतमानसः ॥ २१ ॥
प्राणायामोऽयमाख्यातः समस्तदुरितापहः । प्राणायामान् पुरा कृत्वा गायत्रीं सन्ध्ययोर्जपेत् ॥ २२ ॥
विधाय मण्डलं विद्वान् त्रिकोणोज्ज्वलकर्णिकम् । अष्टपत्राम्बुजद्वन्द्वं चतुरस्रत्रयावृतम् ॥ २३ ॥
सौरं पीठं यजेत्तत्र दीप्तादिनवशक्तिभिः । मूलमन्त्रेण क्लृप्तायां मूर्तौ देवीं प्रपूजयेत् ॥ २४ ॥
त्रिषु कोणेषु सम्पूज्या ब्राह्म्याद्याः शक्तयो बहिः । आदित्याद्यास्ततः पूज्या उषादिसहिताः क्रमात् ।२५।
ततः षडङ्गान्यभ्यर्च्य केसरेषु यथाविधि । प्रह्लादिनीं प्रभां पश्चान्नित्यां विश्वम्भरां पुनः ॥ २६ ॥
बिलासिनीप्रभावत्यौ जयां शान्तां यजेत् पुनः । कान्तिं दुर्गासरस्वत्यौ विश्वरूपां ततः परम् ॥ २७ ॥
विशालासंज्ञितामीशां व्यापिनीं विमलां यजेत् । तमोपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम् ॥ २८ ॥
पद्मालयां परां शोभां पद्मरूपां ततोऽर्चयेत् । ब्राह्म्याद्याः सारुणा बाह्ये पूजयेत् प्रोक्तलक्षणाः ॥ २९ ॥
ततोऽर्चयेद् ग्रहान् बाह्ये शक्राद्यानायुधैः सह । इत्थमावरणैर्देवीं दशभिः परिपूजयेत् ॥ ३० ॥
धर्मार्थकाममोक्षाणां भोक्ता स्याद् द्विजसत्तमः । ....॥

इति । अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि ब्रह्मणे ऋषये नमः । मुखे देवीगायत्रीच्छन्दसे नमः । हृदये श्रीपरमात्मने देवतायै नमः । इति विन्यस्य, पूर्वं प्रणवप्रकरणोक्तप्रकारेण करषडङ्गन्यासान् कृत्वा तथैव विष्णुं ध्यात्वा, पुनः शिरसि जमदग्निभरद्वाजभृगुगौतमकाश्यपविश्वामित्रवसिष्ठेभ्य ऋषिभ्यो नमः । मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीभ्यश्छन्दोभ्यो नमः । हृदये अग्निवायुसूर्यगुरुवरुणवृषविश्वेदेवेभ्यो देवताभ्यो नमः । इति विन्यस्य, ॐभूः हृदयाय नमः । ॐभुवः शिरसे स्वाहा । ॐस्वः शिखायै वषट् । ॐमहः कवचाय हुं । ॐजनः नेत्रेभ्यो वौषट् । ॐतपः सत्यं अस्त्राय फट् । इति मन्त्रैः करषडङ्गन्यासं कृत्वा, ततः हृदि ॐभूः नमः । मुखे ॐभुवः नमः । दक्षांसे ॐस्वः नमः । वामांसे ॐमहः नमः । दक्षोरौ ॐजनः नमः । वामोरौ ओं तपः नमः । जठरे ॐसत्य नमः । इति विन्यस्य, प्रथमोक्तरूपा व्याहृतीर्ध्यात्वा, शिरसि विश्वामित्रऋषये नमः । मुखे देवीगायत्रीच्छन्दसे नमः । हृदये सवित्रे देवतायै नमः । इति विन्यस्य, ॐब्रह्मणे नमः हृदयाय नमः । विष्णवे नमः शिरसे स्वाहा । रुद्राय नमः शिखायै वषट् । ईश्वराय नमः कवचाय हु । सदाशिवाय नमः नेत्रत्रयाय वौषट् । सर्वात्मने नमः अस्त्राय फट् । इति मन्त्रैः करषडङ्गन्यासं कृत्वा, पादांगुल्मिमूलयोः तं नमः । गुल्फयोः त्सं नमः । जानुनोः वि नमः । ऊरुमूलयोः तुं नमः । लिङ्गे वं नमः । नाभौ रें नमः । हृदि णिं नमः । कण्ठे यं नमः । करांगुलिमूलयोः भं नमः । मणिबन्धयोः र्गौ नमः । कूर्परयोः दें नमः । भुजमूलयोः वं नमः । मुखे स्यं नमः । नासिकयोः धीं नमः । कपोलयोः मं नमः । नेत्रयोः हिं नमः । कर्णयोः धिं नमः । भ्रुवोः यों नमः । मस्तके यो नमः । चूडाधः नः नमः । वामकर्णे प्रं नमः । दक्षकर्णे चों नमः । मुखे दं नमः । शिरसि यात् नमः ॥ शिरसि तत् नमः । भ्रूमध्ये सवितुर्नमः । नेत्रयोः वरेण्यं नमः । मुखे भर्गो नमः । कण्ठे देवस्य नमः । हृदि धीमहि नमः । नाभौ धियो

नमः। गुह्ये यो नमः। जानुनोः नः नमः। पादयोः प्रचोदयात् नमः। इति विन्यस्य, शिरसि ब्रह्मणे ऋषये नमः। मुखे देवीगायत्रीच्छन्दसे नमः। हृदि परमात्मने देवतायै नमः। इति विन्यस्य, शिरसि ॐआपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवःस्वरों नमः। इति विन्यस्य, महाव्याहृतिभिः प्राणायामत्रयं कृत्वा, पुनश्च गायत्र्याः पदन्यासान्तं कृत्वा ततश्चतुर्विंशतिन्यासः—

अङ्गं मन्त्रस्तथा पादः पदमक्षरकेशवौ। न्यासाः स्युर्वनमाला श्रीमुद्रा चोत्पत्तिसंज्ञकाः॥ १॥
हृदि मूर्ध्नि शिखायां च कवचे लोचनत्रये। अस्त्रे च विन्यसेत्तत्सवितुरित्याद्यनुक्रमात्॥ २॥
प्रथमं दक्षिणांगुष्ठादारभ्याथ कनिष्ठिका। इतरेभ्यः समारभ्य न्यसेदंगुलिसन्धिषु॥ ३॥
अङ्गेषु विन्यसेत्पश्चान्मूर्ध्निवक्त्रे गले हृदि। नाभिमेढ्रोरुपादेषु तारव्याहृतिसंयुतम्॥ ४॥
गायत्रीमन्त्रमेषोऽयं मन्त्रन्यासः प्रकीर्तितः। न्यसेदनामिकायां च कनिष्ठे करयोस्तले॥ ५॥
देहे शिरसि नाभौ च पादान् पादयुगेऽपि च। पुनः शिरसि भालेऽक्ष्णोर्मुखे कण्ठे तथा हृदि॥ ६॥
नाभौ गुदे च जान्वादिपादयोश्चैव विन्यसेत्। पदन्यास इति प्रोक्तो वसिष्ठादिमहर्षिभिः॥ ७॥
आरभ्य दक्षिणांगुष्ठात्पश्चाच्चान्य(?द् यावत्)कनिष्ठिकाम्। अंगुलीषु दशैतानिपदानि क्रमतोन्यसेत्॥८॥
शीर्षभ्रूमध्यगे नेत्रयुगले वदने हृदि। नाभौ गुदे चोरुयुगे जानुद्वन्द्वे पदद्वये॥ ९॥
दशस्थानेषु चैकैकं न्यसेत् पदमनुक्रमात्। अनामिकाभ्यां प्रणवं न्यसेत् करतलद्वये॥ १०॥
उभाभ्यां तर्जनीभ्यां च युगपद् व्याहृतित्रयम्। अंगुष्ठद्वयरेखासु विन्यसेत् तिसृषु क्रमात्॥ ११॥
पर्वस्वंगुष्ठयोगेन अक्षराणि न्यसेत् पृथक्। मुखवृत्ते लोचनयोः कर्णयोर्नासयोरपि॥ १२॥
गण्डयोरोष्ठयोर्दन्तपंक्त्योः कण्ठे च वक्षसि। कुक्षौ नाभौ पार्श्वयोश्च गुह्ये जान्वोः पदोर्न्यसेत्॥ १३॥
चतुर्विंशतिवर्णांश्च नमोऽन्तान् प्रणवादिकान्। अक्षरन्यास इत्युक्तो मोक्षैकफलदो नृणाम्॥ १४॥
मूर्ध्नि भाले मुखे नेत्रयुगे कर्णद्वयेऽपि च। पुटद्वन्द्वे नासिकाया वदने चिबुके गले॥ १५॥
बाह्वोर्हृदि स्तनद्वन्द्वे नाभिदेशे च गुह्यके। ऊरुयुग्जानुयुग्मे च पदयुग्मे च विन्यसेत्॥ १६॥
वर्णानन्ते केशवाय नम इत्यादिकान् क्रमात्। याच्छ्रीकृष्णाय नम इत्यन्तान्नियतमानसः॥ १७॥
केशवन्यास एवं स्याद् भुक्तिमुक्तिफलप्रदः। दक्षिणेतरयोर्बाह्वोस्तर्जन्यंगुष्ठयुक्तया॥ १८॥
मुद्रया वनमालाख्यं न्यासं त्रिपदया न्यसेत्। कण्ठादिपादपर्यन्तं श्रीकरं मोक्षदं शुभम्॥ १९॥
शङ्खचक्रमनुध्यायन् गायत्र्यैकैकमक्षरम्। विन्यसेद्भुजयोर्न्यासं श्रीमुद्रापूर्वमुत्तमम्॥ २०॥
आदौ वृत्तं वसुदलमष्टकोणं ततः परम्। पश्चात् स्वरदलं ध्यायेल्लिखेद्वा भुजयोर्द्वयोः॥ २१॥
वृत्तमध्ये न्यसेत्तारं व्याहृतित्रयसंयुतम्। गायत्र्याः प्रथमं पादं न्यसेद्वसुदलान्तरम्॥ २२॥
द्वितीयं वसुकोणे च तृतीयं च तुरीयकम्। न्यसेत् स्वरदले विद्वान् सर्वपापनिवृत्तये॥ २३॥

इत्युत्पत्तिन्यासः। अथ स्थितिन्यासः—

अङ्गं वर्णाः पदः पादश्चार्धऋग् व्यापकाह्वयः। तत्त्वमावृत्तिरित्यष्टौ न्यासाः स्युः स्थितिसंज्ञकाः॥ १॥
पादयोः पञ्चतुः सन्ध्योः कट्योर्नाभौ च पार्श्वयोः। पञ्चमास्ये ललाटे च दृशोः श्रुत्योश्च नासयोः॥ २॥
गण्डोष्ठदन्तजिह्वासु कण्ठदोर्मूलहृत्स्वपि। चतुर्विंशतिवर्णांश्च न्यसेदङ्गेष्वनुक्रमात्॥ ३॥
एकैकमक्षरं ग्राह्यं दन्तयोर्बाहुमूलयोः। पादयोः पञ्चतुः सन्ध्योर्नाभौ शीर्षे ललाटके॥ ४॥
वक्त्रे कण्ठे च हृदये पदानि क्रमतो न्यसेत्। पादद्वये च जान्वादिगुदान्ते नाभिमण्डले॥ ५॥
शीर्षे भाले नेत्रयुगे वक्त्रे कण्ठे च वक्षसि। गायत्र्या विन्यसेन् पादान् क्रमेणेव विचक्षणः॥ ६॥
आनाभि पादादारभ्य न्यसेत्पादद्वयं मनोः। आचक्षुः शीर्षमारभ्यन्यसेत्पादं तृतीयकम्॥ ७॥
न्यसेद्वक्षसि गायत्रीमृङ्न्यासोऽयमुदाहृतः। गायत्रीं व्याहृतियुतां कराभ्यां विन्यसेद्बुधः॥ ८॥

पृथिव्यापस्तथा तेजो वायुराकाशमप्यथ । गन्धो रसस्तथा रूपं स्पर्शशब्दाविति स्थितौ ॥ ९ ॥
उपस्थपायुपादांश्च पाणिवाग्घ्राणजिह्विकाः । लोचनं त्वक्ततः श्रोत्रं मनोबुद्धिरहंक्रिया ॥ १० ॥
अव्यक्तमिति तत्त्वानि चतुर्थ्यन्तानि सर्वतः । नमोन्तकानि गायत्रीमन्त्रवर्णैः सबिन्दुकैः ॥ ११ ॥
आवापादौ ? च युक्तानि प्रणवादीनि पादयोः । जान्वोर्नाभौ च हृदये भ्रूमध्ये रन्ध्रयोरपि ॥ १२ ॥
नासाजिह्वालोचनेषु त्वक्कर्णशेफपायुषु । पादपाण्यास्यनासासु जिह्वायां नयने त्वचि ॥ १३ ॥
कर्णद्वये क्रमेणैव न्यसेद्भूयो हृदि न्यसेत् । अवशिष्टानि चत्वारि तत्त्वानि तनुशुद्धये ॥ १४ ॥

तत्प्रकारस्तु—ॐभूर्भुवःस्वः तत्पृथिव्यात्मने नमः पादयोः, इत्यादि ।

परिपूर्णं परं ब्रह्म स्वमात्मानं जगन्मयम् । तेजोमण्डलमध्यस्थं भावयन्नावृतीर्न्यसेत ॥ १५ ॥
दक्षिणस्य पदांगुष्ठादारभ्य त्रिपदाक्षरैः । न्यसेद् वामपदांगुष्ठपर्यन्तं मण्डलाकृति ॥ १६ ॥

इति स्थितिन्यासः । अथ लयन्यासः—

मन्त्रपादपदन्यासाक्षरदण्डकचम्पकाः । अङ्गव्यापकमित्यष्टौ न्यासाः स्युर्लयसंज्ञिताः ॥ १ ॥
पादयोश्च चतुःसंध्योर्नाभौ हृदि गले पुनः । गायत्र्या विन्यसेत्तारव्याहृतित्रयसंयुतम् ॥ २ ॥
पादोरुजानुजङ्घान्ते नाभौ हृदि गले मुखे । ललाटे मूर्ध्नि गायत्र्या न्यसेत्पादत्रयं क्रमात् ॥ ३ ॥
पाययोर्जानुनोः कट्योर्नाभौ हृदि गले मुखे । ललाटे मूर्ध्नि गायत्र्याः शिखायां विन्यसेद्दश ॥ ४ ॥
उभयोः पादयोः सन्धिचतुष्के नाभिवक्षसि । कण्ठे चोष्ठयुगे दन्तपंक्त्योस्तालुद्वयेऽपि च ॥ ५ ॥
नासाश्रुत्योर्लोचनयोः पूर्वादिमुखपञ्चके । अक्षराणि चतुर्विंशद्गायत्र्या विन्यसेत्क्रमात् ॥ ६ ॥
एकैकमक्षरं तालुनासाश्रुत्यक्षिषु न्यसेत् । पञ्च पत्सन्धिषु गले ध्वजे नाभौ च वक्षसि ॥ ७ ॥
कण्ठे दोःसन्धिषु दशस्वोंकारादि नमोन्तकान् । गायत्र्या विन्यसेद्वर्णान् बिन्दुयुक्तान् यथाक्रमम् ॥ ८ ॥

ततो दण्डकन्यासं न्यसेत् ।

पादजानूरुगुह्येषु नाभौ हृदि च वक्षसि । वक्त्रे भ्रूमध्यशिरसि पदानि क्रमतो न्यसेत् ॥ ९ ॥

अथ चम्पकन्यासः । पूर्वोक्तस्थाने—ॐतं प्रह्लादिन्यै चम्पकनिभायै नमः । ॐत्सं प्रभायै अतसीपुष्पसन्निभायै नमः । ॐवि(स?नि)त्यायै पिङ्गलरूपायै नमः । ॐतुं विश्वभद्रायै इन्द्रनीलप्रभायै नमः । ॐवँ विलासिन्यै नीलरूपायै नमः । ॐरें प्रभावत्यै नीलवर्णायै नमः । ॐणि जयायै विद्युन्निभायै नमः । ॐयं शान्तायै रक्तगौरवर्णायै नमः । ॐमं कान्तायै जलदवर्णायै नमः । ॐगौं दुर्गायै रक्तवर्णायै नमः । ॐदें सरस्वत्यै मरकतसन्निभायै नमः । ॐवं विद्रुमायै जातीपुष्पसन्निभायै नमः । ॐस्यं विशालायै स्वर्णप्रभायै नमः । ॐधीं ईशायै कुंकुमप्रभायै नमः । ॐमं व्यापिन्यै पद्मरागनिभायै नमः । ॐहि विमलायै शङ्खप्रभायै नमः । ॐधि तमोपहारिण्यै पाण्डुरनिभायै नमः । ॐयों सूक्ष्मायै इन्द्रगोपसन्निभायै नमः । ॐयों विश्वयोन्यै क्षौद्रसन्निभायै नमः । ॐनः जयावहायै आदित्योदयसन्निभायै नमः । ॐप्र पद्मालयायै नीलोत्पलसन्निभायै नमः । ॐचों परायै गोरोचनसन्निभायै नमः । ॐदं शोभायै कुन्देन्दुशंखनिभायै नमः । ॐयात् पद्मरूपायै स्फटिकसन्निभायै नमः ॥

चम्पकन्यास एषोऽयं सर्वपापप्रणाशनः । व्याहृतित्रयपादांश्च षडङ्गेषु न्यसेत्क्रमात् ॥ १० ॥
व्यापकत्वेन गायत्रीं समव्याहृतिपूर्विकाम् । शिरोन्तं तुर्यपादं च त्रिवारं विन्यसेत् पृथक् ॥ ११ ॥
मूर्धादिपादपर्यन्तमामूर्धा च पदान्ति(?दि)कम् । ....॥

इति लयन्यासः ॥ एवं चतुर्विंशतिन्यासान् विधाय गायत्र्या अर्थबोधो विधेयः । अत्र गायत्रीं प्रणवादिकसप्तव्याहृत्युपेतां शिरःसमेतां सर्ववेदसारमिति वदन्ति । एवं विशिष्टां गायत्रीं प्राणायामैरुपायस्य प्रणवव्याहृतित्रयोपेता गायत्री जपादिभिरुपास्या । तत्र शुद्धगायत्री प्रत्यग्ब्रह्मैक्यबोधिका, धियो यो नः प्रचोदयादिति नोऽस्माकं धियो बुद्धीः प्रचोदयात् सर्वबुद्धिसंज्ञान्तःकरणप्रकाशकः सर्वसाक्षी प्रत्यगात्मोच्यते ।

तत्र प्रचोदयाच्छब्दनिर्दिष्टस्यात्मस्वरूपतः परं ब्रह्म तत्सवितुः—पदैर्निर्दिश्यते । तथेदं "ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधिः स्मृतः" । इति तच्छब्देन प्रत्यग्भूतं स्वतःसिद्धं परं ब्रह्मोच्यते, सवितुरिति स्थितितयोपलक्षक-सर्वप्रपञ्चोत्पादकलक्षणसमस्तद्वैतविभ्रमाधिष्ठानत्वं लभ्यते । वरेण्यमिति सर्वैर्वरणीयं निरतिशयानन्दरूपं, भर्ग इति अविद्यादोषभाजनात् ज्ञानस्यैव विषयत्वं, देवस्य विषयस्येति सर्वद्योतनात्मकाखण्डचिदानन्दकरः ॥ तत्सवितुर्देवस्येत्यत्र षष्ठयर्थो राहोः शिरः इतिवदौपचारिकः । बुद्ध्यादिसर्वदृश्यसाक्षिलक्षणवत् निःस्वरूपं तत्सर्वाधिष्ठानं, रज्जुसर्पन्यायेन नापवादसमानाधिकरणरूपमेकत्वं सोऽहं इति न्यायेन सर्वसाक्षिप्रत्यगात्मनो ब्रह्मणा तादात्म्यरूपमेकत्वं भवतीति सर्वात्मब्रह्मबोधकोऽयं गायत्रीमन्त्रः संपद्यते ॥ सप्तव्याहृतीनामप्ययमर्थः । भूरिति सन्मात्रमत्रोच्यते । भुवरिति सर्वं भावयति प्रकाशयतीति व्युत्पत्त्या चिद्रूपमुच्यते । स्वरिति स्वर्यते इति व्युत्पत्त्या सृष्टं सर्वं प्रेर्यमाणं स्वस्वरूपमुच्यते । मह इति महीयते पूज्यते इति व्युत्पत्त्या सर्वातिशयत्व-मुच्यते । जन इति जनयतीति व्युत्पत्त्या सर्वकारणत्वमुच्यते । तप इति सर्वतेजोरूपत्वं, सत्यमिति सर्वबाधा-धिकरणं यत्तेजोरूपं तत्सत्तार्थरूपं, तत्तदोंकारवाच्यं ब्रह्मैवात्मास्य चिद्रूपात्मभाव इति । यद्वा भूराद्याः सप्त लोकाः ॐकारशब्दवाच्यब्रह्मात्मकाः न तद्व्यतिरिक्तं किञ्चिदस्तीति व्याहृतयोऽपि सर्वात्मब्रह्मबोधिकाः ॥ गायत्रीशिरसोऽप्ययमर्थः । आप इति 'आप्लृ व्याप्तौ' व्यापित्वमुच्यते, ज्योतिरिति प्रकाशरूपं, रस इति सर्वातिशयत्वं, अमृतमिति मरणादिसंसारनित्यमुक्तत्वं, ब्रह्मेति आत्मोच्यते, एवं सर्वव्यापि सर्वप्रकाशं सर्वातिशयं नित्यमुक्तमात्मस्वरूपं सच्चिदानन्दात्मकं यदोंकारवाच्यं ब्रह्माहमस्मीति, गायत्रीशिरसोऽपि सर्वात्मब्रह्मबोधकत्वं यज्ज्ञात्वा (जप्त्वा) पूर्ववत् प्राणायामादिव्याहृतिन्यासशिरसोन्यासादिकं विधाय चतुर्थ-पादगायत्रीमन्त्रजपं मोक्षार्थी कुर्यात् । "परो रजसे सावदों" इति चतुर्थः पादः । अस्य विमल ऋषिः, गायत्री छन्दः, परमात्मा देवता । सवितुर्मण्डलान्तःस्थगुणातीतोऽसौ यः सोहं इति चतुर्थपादस्यार्थः । उदासीनो बीजं सुषुम्नानाडी सरस्वती शक्तिः । मोक्षार्थे विनियोगः । ॐपरः हृदयाय नमः । ॐरजसे शिरसे स्वाहा । ॐसावदों शिखायै वषट् । ॐपरः कवचाय हुं । ॐरजसे नेत्रत्रयाय वौषट् । ॐसावदों अस्त्राय फट् । एवमंगुलीन्यासः । ध्यानम्—

ध्यायेद्भास्करशीतांशुवह्नीनां मण्डलोपरि । स्थिते वह्निपुरे नागदलपद्मसमाश्रितम् ॥ १ ॥
अंगुष्ठमात्रममलं विष्णुमोङ्काररूपिणम् । सर्वदेवमयं देवमनन्तं सर्वतोमुखम् ॥ २ ॥
स्वमायया समाक्रान्तं सूक्ष्मज्योतिः स्वरूपकम् । स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ ३ ॥

इति ध्यात्वा—

असित्रिखण्डयोनीश्च सुरभिं चाप्यजस्तनीम् । लिङ्गमुद्रां महामुद्रामञ्जलिं चापि दर्शयेत् ॥ ४ ॥
गायत्र्याश्छन्दो गायत्री विश्वामित्र ऋषिस्तथा । सविता देवताग्निस्तु मुखं ब्रह्मा शिरस्तथा ॥ ५ ॥
विष्णुश्च हृदयं शुक्लो ललाटं शुक्लवर्णता । सांख्यायनसगोत्रं स्याज्जपादौ विनियोगतः ॥ ६ ॥
त्रैलोक्यवरणा पृथ्वी देवता कुक्षिरेव च । एवं ध्यात्वा तु गायत्रीं जपेद् द्वादशलक्षणम् ॥ ७ ॥
ब्रह्मचारी गृहस्थश्च प्रणवेन युतां जपेत् । अन्ते च प्रणवं कुर्यात्तेनासौ वृद्धिमाप्नुयात् ॥ ८ ॥
वानप्रस्थो जपं कुर्याच्चतुर्थसहितां तथा । रे इत्येतत्तु बीजं स्यात्स्वर्णः शक्तिरुच्यते ॥ ९ ॥
णीत्येत् कीलकं प्रोक्तं गायत्र्यास्त्रिपदात्मनः । गायत्रीछन्दःपदानां विश्वामित्र ऋषिस्तथा ॥ १० ॥
ब्रह्मा विष्णुश्च रुद्रश्च देवतास्त्विति ताः क्रमात् । अक्षराणां च सर्वेषां प्रजापतिर्ऋषिस्तथा ॥ ११ ॥
विनियोगाङ्गविन्यासे गायत्री छन्द उच्यते । अक्षराणां च सर्वेषां वक्ष्यन्ते देवताः क्रमात् ॥ १२ ॥
अग्निर्वायू रविर्विद्युद्यमो वरुण एव च । वृहस्पतिस्तु पर्जन्य इन्द्रो गन्धर्व एव च ॥ १३ ॥
पूषा शिवश्च त्वष्टा च वसवश्च मरुत्ततः । सोमोऽङ्गिरा विश्वेदेवा अश्विनौ च प्रजापतिः ॥ १४ ॥

सर्वदेवश्च रुद्रश्च ब्रह्मा विष्णुश्च देवताः । जपकाले चिन्तनीयास्तासां सायुज्यमाप्नुयात् ॥ १५ ॥

अथाक्षरतत्त्वानि—

पृथिवी पुष्करं तेजो वायुरम्बरमेव च । गन्धो रसोऽथ रूपं च स्पर्शः शब्दोऽपि वागपि ॥ १६ ॥
हस्तावुपस्थः पायुश्च पञ्छोत्रे वक्त्रचक्षुषी । जिह्वा घ्राणो मनस्तत्त्वमहङ्कारो महांस्तथा ॥ १७ ॥
गुणत्रयं च यत्तत्वं क्रमतस्तत्त्वनिश्चयः ।.... ....॥

अथाक्षरशक्तयोऽप्युच्यन्ते—

प्रह्लादिनी प्रभा नित्या विश्वभद्रा विलासिनी । प्रभावती जया शान्ता कान्ता दुर्गा सरस्वती ॥ १८ ॥
विश्वमाया विशालेशा व्यापिनी विमला तथा । तमोपहारिणी सूक्ष्मा विश्वयोनिर्जयावहा ॥ १९ ॥
पद्मालया परा शोभा भद्ररूपा च शक्तयः । ....॥

अथ प्रत्यक्षरध्यानान्युच्यन्ते—

तत्कारं चम्पकापीतं ब्रह्मविष्णुशिवात्मकम् । शान्तं पद्मासनारूढं ध्यायेत्स्वस्थानसंस्थितम् ॥ १ ॥
सकारं चिन्तयेदेवमतसीपुष्पसंनिभम् । पद्ममध्यस्थितं सौम्यमुपपातकनाशनम् ॥ २ ॥
विकारं कपिलं नित्यं कमलासनसंस्थितम् । ध्यायेच्छान्तं द्विजश्रेष्ठो महापातकनाशनम् ॥ ३ ॥
तुकारं चिन्तयेत् प्राज्ञ इन्द्रनीलसमप्रभम् । निर्दहेत् सर्वदुःखानि ग्रहरोगसमुद्भवान् ॥ ४ ॥
वंकारं वह्निदीप्ताभं चिन्तयेच्च विचक्षणः । भ्रूणहत्याकृतं पापं तत्क्षणादेव नश्यति ॥ ५ ॥
रेकारं विमलं ध्यायेच्छुद्धस्फटिकसंनिभम् । पापं विनश्यति क्षिप्रमगम्यागमनोद्भवम् ॥ ६ ॥
णिकारं चिन्तयेद्योगी शुद्धस्फटिकसंनिभम् । अभक्ष्यभक्षणं पापं तत्क्षणादेव नश्यति ॥ ७ ॥
यंकारं तारकावर्णमिन्दुरेखाविभूषितम् । योगिनां वरदं ध्यायेद् ब्रह्महत्याविनाशनम् ॥ ८ ॥
भकारं कृष्णवर्णं तु नीलमेघसमप्रभम् । ध्यात्वा पुरुषहत्यादि पापं नाशयते द्विजः ॥ ९ ॥
र्गोकारं रक्तवर्णं कमलासनसंस्थितम् । गोहत्यादिकृतं पापं नाशयन्तं विचिन्तयेत् ॥ १० ॥
देकारं रक्तसङ्काशं कमलासनसंस्थितम् । चिन्तयेत् सततं योगी स्त्रीहत्यादहनं परम् ॥ ११ ॥
वकारं शुक्लवर्णं तु जातीपुष्पसमप्रभम् । गुरुहत्याकृतं पापं ध्यात्वा दहति तत्क्षणात् ॥ १२ ॥
स्यकारं तु तथा पीतं सुवर्णसदृशप्रभम् । मनसा चिन्तितं पापं ध्यात्वा दहति चानघः ॥ १३ ॥
धीकारं चिन्तयेच्छुक्लं कुन्दपुष्पसमप्रभम् । पितृमातृवधात् पापान्मुच्यते नात्र संशयः ॥ १४ ॥
मकारं पद्मरागाभं चिन्तयेद् दीपसंनिभम् । पूर्वजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ १५ ॥
हिकारं शङ्खवर्णं तु पूर्णचन्द्रसमप्रभम् । अशेषपापदहनं ध्यायेन्नित्यं विचक्षणः ॥ १६ ॥
धिकारं पाण्डुरं ध्यायेत् पद्मस्योपरि संस्थितम् । प्रतिग्रहकृतं पापं स्मरणादेव नश्यति ॥ १७ ॥
योकारं रक्तवर्णं तु इन्द्रगोपसमप्रभम् । ध्यात्वा प्राणिवधपापं निर्दहेन्मुनिपुङ्गव ॥ १८ ॥
द्वितीयश्चैव सम्प्रोक्तो योकारो रक्तसन्निभः । निर्दहेत् सर्वपापानि नान्यैः पापैः प्रलिप्यते ॥ १९ ॥
नःकारं तु मुखं पूर्वमादित्योदयसंनिभम् । सकृद् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्वैष्णवं पदम् ॥ २० ॥
नीलोत्पलदलश्यामं प्रकारं दक्षिणामुखम् । सकृद् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्ब्रह्मणः पदम् ॥ २१ ॥
सौम्यं गोरोचनापीतं चोकारं चोत्तरामुखम् । सकृद् ध्यात्वा द्विजश्रेष्ठ स गच्छेद्वैष्णवं पदम् ॥ २२ ॥
शुक्लवर्णेन्दुसंकाशं दकारं पश्चिमाननम् । सकृद् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्वैष्णवं पदम् ॥ २३ ॥
यात्कारस्तु शिवः प्रोक्तश्चतुर्वदनसप्रभः । प्रत्यक्षफलदो ब्रह्मविष्णुरुद्र इति स्थितः ॥ २४ ॥
एवं ध्यात्वा तु मेधावी जपहोमौ करोति यः । न भवेत् सूतकं तस्य मृतकं च न विद्यते ॥ २५ ॥
यस्त्वेवं न विजानाति गायत्रीं च तथाविधाम् । कथितं सूतकं तस्य मृतकं च तथानघ ॥ २६ ॥

नैव दानफलं तस्य नच यज्ञफलं तथा । नैव तीर्थफलं प्रोक्तं तस्यैवं सूतके सति ॥ २७ ॥
विन्यस्यैवं जपेद्यस्तु गायत्रीं वेदमातरम् । ब्रह्मलोकमवाप्नोति व्यासस्य वचनं यथा ॥ २८ ॥
स्वरूपं यः पुनस्तस्याः कृत्वेवास्ते यथाविधि । ग्रहदोषैर्न लिप्येत अन्नपूर्णा वसुन्धरा ॥ २९ ॥
यथाकथञ्चिज्जप्तैषा देवी परमभाविनी । सा च कामदा प्रोक्ता किं पुनर्विधिना नृप ॥ ३० ॥

जपादौ च चतुर्विंशतिमुद्राः प्रदर्शयेत्—

सम्मुखं सम्पुटं चैव विततं विस्तृतं तथा । द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा ॥ ३१ ॥
षण्मुखोऽधोमुखं चैव व्यापकाञ्जलिकं तथा । शकटं यमपाशं च ग्रथितं सन्मुखोन्मुखम् ॥ ३२ ॥
प्रलम्बं मुष्टिकं चैव मत्स्यकूर्मवराहकाः । सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवस्तथा ॥ ३३ ॥
एता मुद्राश्चतुर्विंशा जपादौ विनियोजयेत् । सुरभिर्ज्ञानचक्रे च योनिः कूर्मोऽथ पङ्कजम् ॥ ३४ ॥
लिङ्गनिर्याणमुद्रे च जपान्ते तु प्रकीर्तिताः । ....॥

एतासां लक्षणान्यग्रे वदिष्यामि ॥ जपादौ तु गायत्रीहृदयं पठेत् ।

अथातो वसिष्ठः स्वयंभुवं परिपृच्छति, पृच्छामस्तावद्भगवन् गायत्रीं तां भोरनुब्रूहि । श्रीभगवानुवाच । ब्रह्मज्ञानोत्पत्ति प्रकृतिं व्याख्यास्यामः, स्वांगुल्या मथ्यमानात् सलिलात् फेनो भवति, फेनाद् वुद्बुदो भवति, बुद्बुदादण्डो भवति, अण्डाद् ब्रह्मा भवति, ब्रह्मणोऽग्निर्भवति, अग्नेर्वायुर्भवति, वायोरोंकारो भवति, ॐकाराद्व्याहृतिर्भवति, व्याहृत्या गायत्री भवति, गायत्र्याः सावित्री भवति, सावित्र्याः सरस्वती भवति, सरस्वत्या वेदा भवन्ति, वेदेभ्यो गायत्रीं भगवन् पृच्छामि व्याहृतीभिः प्रवर्तन्ते । किं वै भूः किं भुवः किं स्वः किं महः किं जनः किं तपः किं सत्यं किं तत् किं सवितुः किं वरेण्यं किं भर्गः किं देवस्य किं धीमहि किं धियः किं यः किं नः किं प्रचोदयात् । भूरिति भूर्लोकः, भुवरित्यन्तरिक्षलोकः, स्वरिति स्वर्लोकः, महरिति महर्लोकः, जन इति जनो लोकः, तप इति तपोलोकः, सत्यमिति सत्यलोकः, भूर्भुवःस्वरोमिति त्रैलोक्यम् । तदिति तदसौ तेजः, सोऽग्निः, सवितुरिति सविता (त)दादित्यो वरेण्योऽन्नं वै वरेण्योऽन्नमेव प्रजापतिः, भर्ग इत्यापो वै भर्गो यदापः स भर्गो, देवस्येतीन्द्रो देवो यद्वै तद्धीन्द्रियाणि सर्वपुरुषो नाम रुद्रो धीमहीत्यन्तरात्मा यदन्तरात्मा स प्रणवो धिय इत्यध्यात्मन् यदध्यात्मन् तत् परमं पदं यो न इति पृथिवी वै योनिः, प्रचोदयादिति कामः कामीमाँल्लोकानु प्रत्याह्वयते इत्यानृशंसो यदानृशंसः तत्परो धर्मः इत्येषा गायत्री किंगोत्रा कत्यक्षरा कतिपदा कतिकुक्षिः कतिशीर्षा ? । साख्याभनसगोत्रा सा, चतुर्विंशत्यक्षरा, त्रयः पादाः, ऋग्वेदोऽस्याः प्रथमः पादो भवति, यजुर्वेदो द्वितीयः पादः, सामवेदस्तृतीयः पादः, । पूर्वा दिक्प्रथमा कुक्षिर्भवति, दक्षिणा द्वितीया, पश्चिमा तृतीया, उत्तरा चतुर्थी, ऊर्ध्वा पञ्चम्यधः षष्ठी, व्याकरणमस्याः प्रथमं शीर्षं भवति, शिक्षा द्वितीयं, कल्पस्तृतीयं, निरुक्तं, चतुर्थं ज्योतिषामयनमिति पञ्चमम । किमु चेष्टितं किमुदाहृतं किं लक्षणं मीमांसा ? । अथर्वणवेदो विचेष्टितं, छन्दो विधिरित्युदाहरन्ति । को वर्णः कः स्वरः का देवता कानीमान्यक्षरदेवता ? । उषःकाले रक्ता, मध्याह्ने शुक्ला, अपराह्ने कृष्णा । पूर्वसन्ध्या ब्राह्मी, मध्याह्नसन्ध्या माहेश्वरी, अपराह्नसन्ध्या वैष्णवी । हंसवाहिनी ब्राह्मी, वृषवाहिनी माहेश्वरी, गरुडवाहिनी वैष्णवी । षड्जर्षभगान्धाराः स्वराः । पूर्वाह्णे गायत्री रक्ता कुमारी दण्डाक्षमालाकमण्डलुहस्ता निषण्णा पद्मपीठासनस्था हंसारूढा ब्रह्मदैवत्या भूर्लोकव्यवस्थिता ऋग्वेदसहितादित्यपथगामिनी । मध्याह्ने सावित्री श्वेताम्बरा श्वेतवर्णा यौवनस्था त्रिनेत्रा त्रिशूलहस्ता रजतपीठासनस्था वृषभारूढा रुद्रदैवत्या भुवर्लोकव्यवस्थिता यजुर्वेदसहितादित्यपथगामिनी । अपराह्णे सरस्वती कृष्णा वृद्धा पीतवासाश्चतुर्भुजा शंखचक्रगदासिहस्ता निषण्णा कनकपीठासनस्था विष्णुदैवत्या स्वर्लोकव्यवस्थिता सामवेदसहितादित्यपथगामिनी ॥ "प्रह्लादोऽत्रिर्वसिष्ठश्च शुकः कण्वः पराशरः । विश्वामित्रो महातेजाः कपिलः शौनको महान् ॥ याज्ञवल्क्यो भरद्वाजो जमदग्निस्तपोनिधिः ।

गौतमो मुद्गलः श्रेष्ठो वेदव्यासश्च रोमशः ॥ अगस्त्यः कौशिको वत्सः पुलस्त्यो कपिलस्तथा । दुर्वासास्तपसा श्रेष्ठो नारदः कश्यपस्तथा" ॥ गायत्र्युष्णिगनुष्टुप् बृहती पंक्तिस्त्रिष्टुब्जगती कान्तिः बृहती पंक्तिरास्तारपंक्तिर्विराट् विष्टारपंक्तिरक्षरपंक्तिः कात्यायनी ज्योतिष्मती त्रिष्टुप्छन्दो महाच्छन्दो भूरितिछन्दो भुवरिति छन्दः स्वरिति छन्दो भूर्भुवःस्वरोमित्येतानि छन्दांसि । प्रथममाग्नेयं द्वितीयं प्राजापत्यं तृतीयं सौम्यं चतुर्थमैशानं पञ्चममादित्यं षष्ठं बार्हस्पत्यं सप्तमं पितृदैवत्यमष्टमं भगदैवत्यं नवममार्यम्यं दशमं सावित्रं एकादशं त्वाष्ट्रं द्वादशं पौष्णं त्रयोदशमैन्द्राग्नं चतुर्दशं वायव्यं पञ्चदशं वामदेव्यं षोडशं मैत्रावरुणं सप्तदशं भ्रातृव्य (आंगिरसं)मष्टादशं वैश्वदेव्यं एकोनविंशं वैष्णवं विंशं वासवं एकविंशं (रौद्रं द्वाविंशमाश्विनं त्रयोविंशं ब्राह्मं चतुर्विंशं सावित्रं) "प्रह्लादिनी प्रभा नित्या विश्वभद्रा बिलासिनी । प्रभावती जया शान्ता कान्ता दुर्गा सरस्वती ॥ विद्रुमा च विशालेशा व्यापिनी विमला तथा । तमोपहारिणी सूक्ष्मा विश्वयोनिर्जयावहा । पद्मालया परा शोभा पद्मरूपा च शक्तयः ॥ क्रमाच्चम्पकपुष्पाभमतसीपुष्पसन्निभम् । विद्रुमस्फटिकाकारं पद्मपुष्पसमप्रभम् ॥ प्रवालं पद्मपत्राभं पद्मरागसमप्रभम् । तरुणादित्यसङ्काशं शङ्खकुन्देन्दुसन्निभम । इन्द्रनीलमणिप्रख्यं मौक्तिकं कुंकुमप्रभम् । अञ्जनाभं च गाङ्गेयं वैडूर्यं क्षौद्रसन्निभम् । (हारिद्रं कृष्णं) दुग्धाभं रविकान्तिसमप्रभम् ॥ शुकपिच्छसमाकारं क्रमेण परिकल्पयेत् । पृथिव्यापस्तथा तेजो वायुराकाश एव च ॥ गन्धो रसश्च रूपं च स्पर्शः शब्दस्तथैव च । उपस्थः पायुः पादश्च पाणिर्वागपि च क्रमात् । घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं तथैव च ॥ मनो बुद्धिरहङ्कारमव्यक्तं च यथाक्रमम् । सुमुखं सम्पुटं चैव विततं विस्तृतं तथा ॥ द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा । षण्मुखोऽधोमुखं चैव व्यापकाञ्जलिकं तथा ॥ शकटं यमपाशं च ग्रथितं सम्मुखोन्मुखम् । प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मवराहकौ ॥ सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवस्तथा । इति मुद्राश्चतुर्विंशा द्वादशात्मप्रतिष्ठिताः ॥ एता मुद्रा न जानाति गायत्री निष्फला भवेत् । ब्रह्मा मूर्ध्नि संघाते विष्णुर्ललाटे रुद्रो(भ्रूमध्ये)केशाः मेघाश्चक्षुषी चन्द्रादित्यौ, कर्णौ शुक्रबृहस्पती, नासापुटावश्विनौ, दन्तोष्ठावुभयसन्धी, मरुतो बाहू, स्तनौ वसवः, ब्रह्मा हृदयं पर्जन्य, माकाशं उदरं नाभि अग्निः, कटिरिन्द्राणी, जघनं प्राजापत्यं कैलासमलयावूरू, विश्वेदेवा जानुनी, शशी जंघे, खुराः पितरः, पृथ्वी पादौ, वनस्पतयः केशा लोमानि नखानि, मुहूर्तास्ते विग्रहाः केतुर्मासं ऋतुः सन्धिकालद्वयमाच्छादनं संवत्सरो निमिषः अहोरात्रावादित्यश्चन्द्रमाः प्रवरवरदा देवी पठेद्यो हृदयं ॐ तत्सवितुर्वरदाय नमः ॐ तत्प्रातरुपदिष्टाय नमः, सायमधीयानो दिवसकृतं पापं नाशयति, प्रातः प्रयुञ्जानो रात्रिकृतं पापं नाशयति, तत्सायंप्रातः प्रयुञ्जानोऽपापो भवति । य इदं सावित्रं ब्राह्मणः पठेत् त्रीणि शतसाहस्र्याः सावित्र्याः षष्टिसहस्राणि जप्तानि फलानि भवन्ति, चत्वारो वेदा अधीता भवन्ति, सर्वेषु वेदेषु ज्ञातो भवति, सर्वेषु तीर्थेषु स्नातो भवति, स्वर्णस्तेयात् पूतो भवति, सुरापानात् पूतो भवति, ब्रह्महत्यायाः पूतो भवति, स्त्रीहत्यायाः पूतो भवति, वीरहत्यायाः पूतो भवति, अगम्यागमनात् पूतो भवति, अभक्ष्यभक्षणात् पूतो भवति, पंक्तिशतसहस्राणां पंक्तिपावनात् पूतो भवति, अष्टौ ब्राह्मणान् ग्राहयित्वाऽपरिमितमायुर्भवति । य एवं वेद ब्रह्मलोकं स गच्छति श्रीब्रह्मलोकं स गच्छत्यों नमः इति ।

तदित्यवाङ्मनोगम्यं ध्येयं यत्सूर्यमण्डले । सवितुः सकलोत्पत्तिस्थितिसंहारकारिणः ॥ १ ॥
वरेण्यमाश्रयणीयं यदाधारमिदं जगत् । गर्भस्य साक्षात्कारेण ह्यविद्याशक्तिदायकम् ॥ २ ॥
देवस्य ज्ञानरूपत्वस्वानन्दात् क्रीडतोऽपि वा । धीमह्यहं स एवेति तेनैवाभेदसिद्धये ॥ ३ ॥
धियोऽन्तःकरणे वृत्तीः प्रत्यक्प्रवणचारिणीः । य इत्यलिङ्गधर्मं यच्चेत्यज्ञानादिलक्षणम् ॥ ४ ॥
नोऽस्माकं बहुधाभ्यस्तभेदभिन्नदृशां तथा । प्रचोदयात प्रेरयति प्रार्थना बहिरिष्यते ॥ ५ ॥

यो देवः सवितास्माकं धियो धर्मादिगोचरात् । प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे ॥ ६ ॥

ब्रह्माणी चतुराननाक्षवलयं कुम्भं करैः स्रुक्स्रुवौ
बिभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका ।
हंसारोहणकेलिरम्बरमणेर्बिम्बार्चिता भूषिता
गायत्री हृदि भाविता भवतु नः सम्पत्समृद्ध्यै सदा ॥ ७ ॥
रुद्राणी नवयौवना त्रिनयना वैयाघ्रचर्माम्बरा
खट्वाङ्गत्रिशिखाक्षसूत्रवलयाभीतीर्दधानाम्बिका ।
विद्युत्पिङ्गजटाकलापविलसद्बालेन्दुमौलिर्मुदा
सावित्रि वृषवाहनामृततनुर्ध्येया यजूरूपिणी ॥ ८ ॥
सेव्या सात्र सरस्वती भगवती पीताम्बराडम्बरा
श्यामा सामजपान्विता परिमलोद्गात्राञ्चिता वैष्णवी
ताक्ष्यस्था नवनूपुराङ्गदमणिग्रैवेयभूषोज्ज्वला
हस्तालम्बितशङ्खचक्रसगदाभीतिः श्रिये चास्तु नः ॥ ९ ॥

इति कत्यायनीपाठः ॥ इति पठित्वा गायत्रीं यथाशक्ति जप्त्वा तद्दशांशतस्तुर्यगायत्रीं जपेत् ।

"त्रिपदाजपसाद्गुण्यं तुर्याजाप्यदशांशतः । तुर्याजाप्यं विना येन कृतं यन्निष्फलं भवेत् ॥"

एवं जपित्वा जपान्ते कवचं पठेत् । अस्य श्रीगायत्रीकवचमन्त्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्वाणश्छन्दांसि गायत्रीसावित्रीसरस्वत्यो देवताः ॐतद्बीजं याचच्छक्तिः धीमहीति कीलकं मम समस्तपापक्षयार्थं गायत्रीकवचपाठे विनियोगः । गायत्र्या षडङ्गं विन्यस्य "मुक्ताविद्रुमहेम" इति ध्यायेत् ।

गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे । ब्रह्मसंध्या तु मे पश्चादुत्तरे मे सरस्वती ॥ १ ॥
पावकीं मे दिशं रक्षेत् पावकोज्ज्वलशालिनी । यातुधानीं दिशं रक्षेद्यातुधानभयङ्करी ॥ २ ॥
वायवीं मे मृगारूढा रुद्राणीं रुद्ररूपिणी । ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ ३ ॥
एवं सर्वत्र संरक्षेत् सर्वाङ्गं भुवनेश्वरी । तत्पदं पातु मे पादौ जङ्घे मे सवितुः पदम् ॥ ४ ॥
वरेण्यं कटिदेशं तु नाभि भर्गस्तथैव च । देवस्य मे तु हृदयं धीमहीति गलं तथा ॥ ५ ॥
धियो यः पातु मे नेत्रे नः पदं मे ललाटकम् । एवं पादादिमूर्धान्तं मूर्धानं मे प्रचोदयात् ॥ ६ ॥
तदर्णः पातु मूर्धानं सकारः पातु भालकम् । चक्षुषी तु विकारार्णः श्रोत्रे रक्षेत् तुकारकः ॥ ७ ॥
नासापुटौ वकारार्णः रेकारस्तु कपोलयोः । णिकारस्तूत्तरोष्ठं तु यंकारस्त्वधरोष्ठकम् ॥ ८ ॥
आस्यमध्ये भकारार्णो र्गोकारश्चिबुकं तथा । देकारः कण्ठदेशं तु वकारः स्कन्धदेशकम् ॥ ९ ॥
स्यकारो दक्षिणं हस्तं धीकारो वामहस्तकम् । मकारो हृदयं रक्षेद् हिकारो जठरं तथा ॥ १० ॥
धिकारो नाभिदेशं तु योकारस्तु कटिद्वयम् । गुह्यं रक्षेत्तु योकार ऊरू मेऽव्यान्नःकारकः ॥ ११ ॥
प्रकारो जानुनी रक्षेच्चोकारो जङ्घदेशकम् । दकारो गुल्फदेशं तु यात्कारस्तु पदद्वयम् ॥ १२ ॥
इतीदं कवचं दिव्यं बाधाशतनिवारणम् । चतुःषष्टिकलाविद्याविलासैश्वर्यसिद्धिदम् ॥ १३ ॥
जपारम्भे तु गायत्र्या जपान्ते कवचं पठेत् । ब्रह्मस्त्रीगोवधान्मित्रद्रोहाद्यखिलपातकैः ॥ १४ ॥
मुच्यते सर्वपापेभ्यो परं ब्रह्माधिगच्छति । ....॥

इति गायत्रीकवचम् ॥ अथ गायत्रीपूजाविधिः । सा पूजा द्विविधा मानसिकबाह्यभेदात् । मानसिकपूजा यथा । तदङ्गत्वेन सौरपीठन्यासं कुर्यात् । ॐगुं गुरुभ्यो नमः मूर्ध्नि । ॐगं गणपतये नमः मूलाधारे । ॐ आधारशक्त्यै नमः । ॐमूलप्रकृत्यै नमः । ॐकूर्माय नमः ॐअनन्ताय नमः । ॐवराहाय नमः । ॐपृथिव्यै

नमः । ॐक्षीरार्णवाय नमः । ॐश्वेतद्वीपाय नमः । ॐकल्पवृक्षाय नमः । रत्नमण्डपाय नमः । रत्नवेदिकायै नमः । श्वेतच्छत्राय नमः । सितचामराभ्यां नमः । तन्मध्ये रत्नसिंहासनाय नमः । इति मूलाधारमारभ्य उपर्य्युपरि विन्यस्य सिंहासनदेवता न्यसेत् । ॐधर्माय नमः । ज्ञानाय नमः । वैराग्याय नमः । ऐश्वर्याय नमः । एते सिंहासनपादरूपिणः । एवं ॐअधर्माय नमः । अज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्याय नमः । इति अंसद्वयोरुद्वयप्रकल्पितपादचतुष्टयत्वेन धर्मादीन् मुखनाभिपार्श्वद्वयप्रकल्पितगात्रचतुष्टयत्नेन अधर्मादींश्च न्यसेत् । सिंहासनमध्ये ॐचिच्छक्त्ये नमः । ॐ मायाशक्त्यै नमः । आनन्दकन्दाय । संविन्नालाय नमः । प्रकृतिमयक्षेत्रेभ्यो नमः । विकारमयकेसरेभ्यो नमः । पञ्चाशद्वर्णबीजाढचसकलतत्त्वरूपायै कर्णिकायै नमः । तस्यां ॐअं अर्कमण्डलाय नमः । ॐसों सोममण्डलाय नमः । ॐरं वह्निमण्डलाय नमः । ॐसं सत्त्वाय नमः । ॐरं रजसे नमः । ॐतं तमसे नमः । ॐअं आत्मतत्त्वाय नमः । ॐ मायातत्त्वाय नमः । ॐ विद्यातत्त्वाय नमः । ॐ कलातत्त्वाय नमः । मध्ये परतत्त्वाय नमः । ॐआं आत्मने नमः । ॐअं अन्तरात्मने नमः । ॐपं परमात्मने नमः । ॐह्रीं ज्ञानात्मने नमः । ॐप्रभूताय नमः । ॐविमलाय नमः । ॐसाराय नमः । ॐसमाराध्याय नमः । (मध्ये) ॐअनन्ताय (परमसुखाय) नमः । इति तत्रैव दिक्षु मध्ये च विन्यस्य केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च नव पीठशक्तीर्न्यसेत् । ॐरां दीप्तायै नमः । ॐरीं सूक्ष्मायै० । ॐरूं जयायै० । ॐरें भद्रायै० । ॐरैं विभूत्यै० । ॐरों विमलायै० । ॐरौं अमोघायै० । ॐरं विद्युतायै० । ॐरः सर्वतोमुख्यै नमः । इति विन्यस्य, ॐनमो भगवत्यै ब्रह्मविष्णुशिवात्मिकायै सौरयोगपीठात्मने नमः । इति मध्ये सिंहासनमन्त्रं विन्यस्य, मूलमन्त्रपूर्वकस्वेष्टदेवतामूर्तिं हृदये विन्यस्य, तदेव गुरुस्वरूपं परं ब्रह्म स्वात्मानुग्रार्थनिलयां परमात्ममूर्तिं परोक्षज्ञानदायिनीं गायत्रीं मन्त्राधिदेवतां सगुणब्रह्मविद्यात्मिकां दिव्यमूर्तिं परममङ्गलात्मिकां सर्वावयवसम्पन्नां सर्वाभरणभूषितां समस्तपरिवारसहितां सकलपुरुषार्थदात्रीं तेजोमयीं स्वहृदयकमलमधितिष्ठन्तीं भावयित्वा मनसा षोडशोपचारपूजां कुर्यात् । इदमासनं स्वागतमस्तु प्रसीद पाद्यमिदमाचमनीयमिदं मधुपर्कमिदं पुनराचमनीयं स्नानमिदं वस्त्रमिदं सौरान्तमुपकल्प्य, छत्रचामरगीतनृत्यवाद्यादिमहा पूजादिकं संकल्प्य तन्मयमना भूत्वा ध्यायेदिति मानसिकपूजा ॥ बाह्यपूजायां तु यन्त्रं यथा—

शक्तेर्बाह्यकृशानुकोणविलसद्भूरादिसत्कर्णिकं
वस्वब्जस्वरयुग्मकेसरदलैर्वर्गैस्त्रिवर्णं मनोः ।
चूडामन्त्रसतुर्यवेष्टितमिदं क्ष्माकोणताराङ्कितं
गायत्र्याः कथितं महर्षिभिरिदं यन्त्रं तु दिक्ष्वङ्कितम् ॥ १ ॥

इति । द्वितीययन्त्रं तु—ब्रह्मोवाच

शृण्वन्तु ऋषयः सर्वे गायत्रीयन्त्रमुत्तमम् । यस्य विज्ञानमात्रेण सिद्धयोऽष्टौ करे स्थिताः ॥ १ ॥
पूर्वं तु विष्णुना प्रोक्तं यन्त्रं मन्त्राङ्गसंयुतम् । रहस्यं परमं गुह्यं वेदान्तेष्वपि गोपितम् ॥ २ ॥
अग्निमण्डलमालिख्य तन्मध्ये प्रणवं लिखेत् । मायास्त्रीबीजसंयुक्तं महामायां रमापतिम् ॥ ३ ॥
चिन्तामणिं नारसिंहं सुदर्शनमनुं क्रमात् । लिखेदष्टदलं बाह्ये तद्द्वारेषु च मन्त्रवित् ॥ ४ ॥
नारायणमनुं लिख्य सन्धौ तु नारसिंहकम् । मायाबीजेन संवेष्ट्य बहिर्दशदलं लिखेत् ॥ ५ ॥
दलेषु विलिखेत् कृष्णं सन्धौ राममनुं लिखेत् । स्त्रीबीजेन तु संवेष्ट्य तद्बहिर्द्वादशदलम् ॥ ६ ॥
वासुदेवं तद्दलेषु सन्धौ तु हयशीर्षकम् । मन्मथेन तु संवेष्ट्य तद्बहिः षोडशदलम् ॥ ७ ॥
तद्दलेषु स्वरांल्लिख्य तत्सन्धौ तु वराहकम् । चिन्तामण्या तु संवेष्ट्य बहिरष्टादशच्छदम् ॥ ८ ॥
दलेषु विलिखेत् कृष्णं सन्धौ चक्रे नृकेसरिम् । रामबीजेन संवेष्ट्य बहिर्द्वाविंशतिच्छदम् ॥ ९ ॥
तद्दलेषु च गायत्रीं तत्सन्धौ मन्त्रराजकम् । वेष्टने तु महामायां द्वात्रिंशद्दलमालिखेत् ॥ १० ॥

नृसिंहानुष्टुभं लेख्य सन्धौ चक्रमनुं लिखेत् । प्रणवेन तु संवेष्ट्य बहिः पार्थिवमण्डलम् ॥ ११ ॥
व्यञ्जनानि लिखेत् पश्चात्तन्मध्ये क्रमशोऽभितः । हंसहंसेति रक्षेति वाय्वग्न्यमृतसंयुतम् ॥ १२ ॥
यन्त्रसंस्कारमन्त्रांश्च तन्मध्ये विलिखेत् सुधीः । प्राणप्रतिष्ठां कृत्वाथ जपकाले विशेषतः ॥ १३ ॥
षोडशैरुपचारैश्चाप्यर्चयेन्मनसापि वा । ध्यात्वा मन्त्रं जपेत् पश्चादष्टोत्तरसहस्रकम् ॥ १४ ॥
अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा । चतुर्थ्यादिप्रदोषेषु गायत्रीं दशधा जपेत् ॥ १५ ॥

इदं धारणायन्त्रम्, पूजायन्त्रमिति केचित् । प्रकृतौ तु—पूर्वोक्तं "शक्तेर्बाह्ये ति" यन्त्रं पूजायां विशिष्टम् । स्वपुरेतो मण्डलं कुर्यात् ।

सम्मार्जनोपाञ्जनाभ्यां शोषेणोल्लेखनेन च । गवां च परिवासेन भूमिः शुध्यति पञ्चधा ॥ १६ ॥

वामहस्तेनाक्रम्य दक्षिणहस्तेन मण्डलं कृत्वा तत्र पूजायन्त्रं लिखेत् ।

सिन्दूररजसा भूमौ लिखित्वा यन्त्रमर्चयेत् । अथवा हेमरूप्यादिपट्टपीठोपरि स्थितम् ॥ १७ ॥

स्ववामभागे चतुरस्रमण्डलं कृत्वा तत्राधारमस्त्रप्रक्षालितं संस्थाप्य 'रांरींरूं अग्निमण्डलाय दशकलात्मने श्रीगायत्र्याः कलशाधाराय नमः' इति सम्पूज्य "धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गनी । सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि ॥ यादीनां वशवर्णानां कला धर्मप्रदा इमाः" । एतासां पूजा कर्तव्या । तदुपरि कलशं संस्थाप्य, मं सूर्यमण्डलाय द्वादशकलात्मने श्रीगायत्र्याः कलशाधाराय नमः इति सम्पूज्य, "तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी शुचिः । सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा । कमाद्या वसुदाः सौराष्ठडान्ता द्वादशेरिताः" ॥ कंभं तपिन्यै नमः, इत्यादिक्रमेण पूजयेत् । ततस्तन्मध्ये अनुलोम-विलोममातृकां स्मरन् शुद्धोदकेनापूर्य, मं कामप्रदषोडशकलात्मने चन्द्रमण्डलाय श्रीगायत्र्याः कलशामृताय नमः इति सम्पूज्य, अं अमृतायै नमः इत्यादि पूजयेत् । "अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः । शशिनी चन्द्रिका ज्योत्स्ना कान्तिः श्रीः प्रीतिरङ्गदा ॥ पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः" । इति क्रमेण सम्पूज्य, तन्मध्ये "गायत्र्यास्तु त्रिकोणं चे"ति यन्त्रं विलिख्य, तत्र "ब्रह्माण्डोदरतीर्थानि" इत्यादिना तीर्थमाकृष्य, "गङ्गे च यमुने चैव" इति पठित्वा, "गङ्गाद्याः सरितः सर्वाः सिन्ध्वाद्या जलदा नदाः । आयान्तु देवीपूजार्थं दुरितक्षयकारकाः" ॥ इत्यावाहनादिपञ्चमुद्राः प्रदर्श्य ध्यायेत् । "कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्थिताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा" । 'इमं मे गङ्गे यमुने' इति पठेत् । इति कलशपूजा ॥ स्वदक्षिणभागे एवमेव साधारं शंखं संस्थाप्य शङ्खमुद्रां प्रदर्श्य तदुदकं सर्वत्र पूजोपकरणादिषु सम्प्रोक्ष्य कलशशङ्खयोर्मध्ये अर्घ्यादिपञ्चपात्राणि साधाराणि स्थापयेत् । "अर्घ्यपात्रं तु वायव्ये नैर्ऋत्यां पाद्यपात्रकम् । आग्नेय्यां स्नानकलशं ईशे त्वाचमनीयकम् ॥ मध्ये तु मधुपर्कं स्यादित्येतत्पात्रलक्षणम्" । द्रव्याणि तु—

आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु । रक्तानि करवीराणि तथा रक्तं च चन्दनम् ॥ १ ॥
भानोरपि च गायत्र्या अष्टाङ्गार्घ्यमुदाहृतम् । सिद्धार्थं कुंकुमं दूर्वा लोष्टं लामज्जकं शशी ॥ २ ॥
अमूनि चात्र द्रव्याणि पाद्यस्य कथयन्ति षट् । फलकच्चोरकर्पूरकाष्ठीलोशीरकाणि च ॥ ३ ॥
अमून्याचमनीयस्य द्रव्याणि कथयन्ति षट् । मधुपर्कं च सक्षौद्रं दधि प्रोक्तं मनीषिभिः ॥ ४ ॥
दध्यभावे पयः कार्यं मध्वभावे तथा गुडः । इक्षुर्मधु घृतं चैव शर्करापयसायुतम् ॥ ५ ॥
पञ्चामृतमिदं प्रोक्तं वसिष्ठादिमनीषिभिः । ....॥

ततः पूर्ववत् सामान्यार्घ्यविशेषार्घ्ये स्वपुरतः संस्थाप्य पार्श्वयोर्दीपद्वयं संस्थाप्य मूलमन्त्रेण प्राणायामत्रयं कृत्वा षडङ्गं विन्यस्य करशुद्धिं कुर्यात् ।

प्रकोष्टे मणिबन्धे च पार्श्वयोः करयोस्तले । तत्पृष्ठे च तदग्रे च करशुद्धिरुदाहृता ॥ १ ॥

ततः सौरपीठन्यासवत् पीठपूजां कृत्वा पीठमनुं विन्यस्य, तत्र "मुक्ताविद्रुमहेम" इति ध्यानोक्तरूपिणीं स्वहृत्कमलस्थितां गायत्रीं परब्रह्मरूपिणीं वहन्नासापुटेन विनिर्गत्य पूजायन्त्रे उपविष्टामिति ध्यात्वा, आवाहनादिदशमुद्राः प्रदर्श्य षोडशोपचारपूजामष्टादशोपचारपूजां वा कुर्यात्।

आसनावाहने चार्घ्यं पाद्यमाचमनं तथा। स्नानवस्त्रोपवीतानि भूषणानि च सर्वशः ॥ १ ॥
गन्धं पुष्पं तथा धूपं दीपमन्येन तर्पणम्। माल्यानुलेपने चैव नमस्कारविसर्जने ॥ २ ॥

इत्यष्टादशोपचारैर्मूलेन देवतां सन्तर्प्यावरणपूजां कुर्यात्। तद्यथा—(शा० २१)

विधाय मण्डलं विद्वांस्त्रिकोणोज्ज्वलकर्णिकम्। सौरं पीठं यजेत्तत्र दीप्तादिनवशक्तिभिः ॥ १ ॥
मूलमन्त्रेण क्लृप्तायां मूर्तौ देवीं प्रपूजयेत्। कोणेषु त्रिषु सम्पूज्या ब्रह्म्याद्याः शक्तयो बहिः ॥ २ ॥
आदित्याद्यास्ततः पूज्या उषादिसहिताः क्रमात्। ततः षडङ्गान्यभ्यर्च्य केसरेषु यथाविधि ॥ ३ ॥
प्रह्लादिन्यादिशक्तीश्च तद्बहिः पूजयेत् सुधीः। ब्राह्म्याद्याः सारुणा बाह्ये पूजयेत् प्रोक्तलक्षणाः ॥ ४ ॥
ततोऽभ्यर्चेद् ग्रहान् बाह्ये शक्राद्यानायुधैः सह। इत्थमावरणैर्देवीं दशभिः परिपूजयेत् ॥ ५ ॥
धर्मार्थकाममोक्षाणां भोक्ता स्याद् द्विजसत्तमः। ....॥

इति। एवं क्रमेण पूजां कृत्वाक्षमालयाष्टोत्तरशतं गायत्रीजपं कृत्वा "गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि" ॥ इति तेजोरूपं जपं देव्या हस्ते समर्पयेत्। तथा—(शा०२१)

व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो जपेत्। तत्त्वलक्षं विधानेन भिक्षाशी विजितेन्द्रियः ॥ १ ॥
क्षीरौदनतिलान् दूर्वाः क्षीरद्रुमसमिद्वरान्। पृथक् सहस्त्रत्रितयं जुहुयान्मन्त्रसिद्धये ॥ २ ॥
तत्त्वसंख्यासहस्राणि मन्त्रविज्जुहुयात् तिलैः। सर्वपापविनिर्मुक्तो दीर्घमायुः स विन्दति ॥ ३ ॥
आयुषे साज्यहविषा केवलेनाथ सर्पिषा। दूर्वात्रिकैस्तिलैर्मन्त्री जुहुयात्त्रिसहस्रकम् ॥ ४ ॥
अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतं ततः। महालक्ष्मीर्भवेत् तस्य षण्मासान्नात्र संशयः ॥ ५ ॥
ब्रह्मश्रिये प्रजुहुयात् प्रसूनैर्ब्रह्मवृक्षजैः। बहुना किमिहोक्तेन यथावत् साधुसाधिता ॥ ६ ॥
द्विजन्मनामियं विद्या सिद्धा कामदुघा मता। कामनायन्त्रमन्यच्च वक्ष्यामि भुवि दुर्लभम् ॥ ७ ॥
ह्रींकारं कर्णिकामध्ये व्याहृतीनां त्रिकोणकम्। बहिश्चाष्टदलं पद्मं प्रोक्तलक्षणपेलक्षितम् ॥ ८ ॥
केसरेषु स्वरा लेख्या मन्त्रवर्णास्त्रयस्त्रयः। आदिवर्गाक्षराष्टौ च बहिर्माहेन्द्रमण्डलम् ॥ ९ ॥
आपोज्योतिरित्येतस्य वेष्टयेद् यन्त्रमुत्तमम्। भूर्जे रेनं समालिख्य रोचनाकुंकुमैः सुधीः ॥ १० ॥
प्राणप्रतिष्ठां कृत्वा तु गले वा बाहुमूलके। धारयेत् पुष्टिरक्षार्थै रोगघ्नं भवति ध्रुवम् ॥ ११ ॥
ब्रह्मास्त्रमिति सम्प्रोक्तं विलोमपठितो मनुः। पूर्वोक्ता एव मुन्याद्या मन्त्रस्यास्य प्रकीर्तिताः ॥ १२ ॥
प्रतिलोमक्रमादस्य षडङ्गानि प्रकल्पयेत्। वर्णन्यासपदन्यासौ विदध्यात् प्रतिलोमतः ॥ १२ ॥
ध्यानभेदान् विजानीयाद् गुर्वादेशान्नचान्यथा। पूर्ववज्जपक्लृप्तिः स्याज्जुहुयात् पूर्वसंख्यया ॥ १३ ॥
पञ्चगव्यसुपक्वेन चरुणा तस्य सिद्धये। अर्चनं पूर्ववत् कुर्याच्छक्तीस्तु प्रतिलोमतः ॥ १४ ॥
सर्वत्र देशिकः कुर्याद्गायत्र्या द्विगुणं जपम्। क्रूरकर्माणि कुर्वीत प्रतिलोमविधानतः ॥ १५ ॥
शान्तिकं पौष्टिकं कर्म कर्तव्यमनुलोमतः। प्रयोगकाले प्रजपेत् त्रिपदां च विलोमतः ॥ १६ ॥
साधितो जायते पश्चान्मन्त्रोऽयं विधिनामुना। आग्नेयास्त्रं शिरः कृत्वा वायव्यं मूलमाकरोत् ॥ १७ ॥
अस्त्रसम्पुटितं चास्त्रं जपेदष्टसहस्रकम्। कृष्णाष्टमीं समारम्भ यावत् कृष्णचतुर्दशी ॥ १८ ॥
रात्रौ रात्रौ प्रजुहुयाद् नगतैलपरिप्लुतैः। चित्रमूलार्कधत्तूरविषवृक्षसमिद्वरैः ॥ १९ ॥
रिपुर्गच्छेज्ज्वराक्रान्तः सकुटुम्बो यमालयम्। कृष्णपक्षे प्रतिपदमारभ्य मासमात्रकम् ॥ २० ॥

नद्यां समुद्रगामिन्या स्नात्वा मन्त्री यथाविधि । आर्द्रवस्त्रो वृष्टिकाले स्थित्वा पितृपदिङ्मुखः ॥ २१ ॥
शत्रुनामयुतं मन्त्रं जपेदष्टोत्तरं शतम् । त्रिकोणकुण्डे जुहुयाद्रात्रौ पूर्वोक्तसाधनैः ॥ २२ ॥
रक्षितोऽपि रिपुः शीघ्रं ब्रह्मविष्णुशिवैरपि । गच्छेद्यमपुरं रोगैः पीडितः सह बान्धवै ॥ २३ ॥
ब्रह्मशीर्षकमन्त्रस्य ब्रह्मदण्डस्य चानघ । ऋष्यादिन्यासपूजादिप्रयोगान् मन्त्रवित्तमः ॥ २४ ॥
ब्रह्मास्त्रवित् प्रकुर्यात् शत्रुनाशनकं विधिम् । अस्त्रत्रयं विजानाति विसर्गादानकर्मणः ॥ २५ ॥
यः स एव शिवः साक्षान्निग्रहानुग्रहक्षमः । ....॥

इति गायत्रीविधानं समाप्तम् ॥

अथ कादिमतरीत्या मन्त्रपारायणक्रमः । सतु श्रीधर्माचार्यवर्यैः स्वकीये लघुस्तवे "मायाकुण्डलिनी" इत्यादिश्लोकेन सूचितः । तथा—

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि ॥ १ ॥

इति । माया ह्रीं, कुण्डलिनी ऐं, क्रिया क्लीं, मधुमती शुद्धा बिन्दुयुता विसर्गयुक्ता बिन्दुविसर्गयुक्ता चेति चतुर्विधमातृका । काल्यादीति दश विद्याः । एभिः श्रीमदाराध्यचरणक्रियाप्राप्तो मन्त्रपारायणक्रमः प्रदर्श्यते । तत्र कृतप्रातराह्निकक्रियो विविक्ते स्थाने स्वासनमास्तीर्य 'आधारशक्तिकमलासनाय नमः' इति तत्सम्पूज्य, तत्र प्राङ्मुख उपविश्य, गुरुगणपतिपरदेवताः प्रणम्य, मूलविद्याया ऋष्यादिकरषडङ्गन्यासं चतुरासनदेवताष्टकन्यासं च विधाय देवीं ध्यात्वा मानसैरुपचारैः सम्पूज्य, श्रीपरदेवतात्मकः पारायणजपमारभेत् । तत्र—ॐमूलविद्यां ह्रींअकालीसौः । मू० ह्रींआकालीसौः । मू० ह्रींइकालीसौः । मू० ह्रींईकालीसौः । मू० ह्रींउकालीसौः । मू० ह्रींऊकालीसौः । मू० ह्रींऋकालीसौः । मू० ह्रींॠकालीसौः । मू० ह्रींऌकालीसौः । मू० ह्रींॡकालीसौः । मू० ह्रींएकालीसौः । मू० ह्रींऐकालीसौः । मू० ह्रींओकालीसौः । मू० ह्रींऔकालीसौः । मू० ह्रींअंकालीसौः । मू० ह्रींअःकालीसौः । मू० ह्रींककालीसौः । मू० ह्रींखकालीसौः । मू० ह्रींगकालीसौः । मू० ह्रींघकालीसौः । मू० ह्रींङकालीसौः । मू० ह्रींचकालीसौः । मू० ह्रींछकालीसौः । मू० ह्रींजकालीसौः । मू० ह्रींझकालीसौः । मू० ह्रींञकालीसौः । मू० ह्रींटकालीसौः । मू० ह्रींठकालीसौः । मू० ह्रींडकालीसौः । मू० ह्रींढकालीसौः । मू० ह्रींणकालीसौः । मू० ह्रींतकालीसौः । मू० ह्रींथकालीसौः । मू० ह्रींदकालीसौः । मू० ह्रींधकालीसौः । मू० ह्रींनकालीसौः । मू० ह्रींपकालीसौः । मू० ह्रींफकालीसौः । मू० ह्रींबकालीसौः । मू० ह्रींभकालीसौः । मू० ह्रींमकालीसौः । मू० ह्रींयकालीसौः । मू० ह्रींरकालीसौः । मू० ह्रींलकालीसौः । मू० ह्रींवकालीसौः । मू० ह्रींशकालीसौः । मू० ह्रींषकालीसौः । मू० ह्रींसकालीसौः । मू० ह्रींहकालीसौः । मू० ह्रींळकालीसौः । मू० ह्रींक्षकालीसौः । इत्येकपञ्चाशद्वारं जपित्वा, पुनः मूलं ह्रींअंकालीसौः । मू० ह्रींआंकालीसौः । मू० ह्रींईंकालीसौः । इत्थं सबिन्दुभिर्मातृकाक्षरैरेकपञ्चाशद्वारं जपित्वा, पुनः मूलं ह्रींअःकालीसौः । मू० ह्रींआःकालीसौः । मू० ह्रींइःकालीसौः । मू० ह्रींईःकालीसौः । इत्यादि, मू० ह्रींक्षःकालीसौः । इत्यन्तं विसर्गसहितमातृकाक्षरैरेकपञ्चाशद्वारं जपित्वा, पुनः मूलं ह्रींअंःकालीसौः । मू० ह्रींआंःकालीसौः । मू० ह्रींइंःकालीसौः । मू० ह्रींईंःकालीसौः । इत्यादि, मू० ह्रींक्षंःकालीसौः । इत्यन्तं बिन्दुविसर्गसहितमातृकाक्षरैरेकपञ्चाशद्वारं जपेत् ॥ इति मायाबीजेन सह चतुर्विधमातृकावर्णैश्चतुरधिकद्विशत (२०४) वारं मूलविद्या जपित्वा, पुनः मूलं ऐंअकालीसौः । मू० ऐंआकालीसौः । मू० ऐंइकालीसौः । मू० ऐंईकालीसौः इत्यादि, मू० ऐंक्षकालीसौः इत्यन्तं ५१ । पुनः मूलं ऐंअंकालीसौः इत्यादि, मू० ऐंक्षंकालीसौः इत्यन्तं ५१ । पुनः मूलं

ऐंअःकालीसौः । इत्यादि, मू० ऐंक्षःकालीसौः इत्यन्तं ५१ । पुनः मूलं ऐंअंःकालीसौः इत्यादि मू० ऐंक्षंःकाली-सौः इत्यन्तं ५१ । इत्थं वाग्भवबीजेन सह चतुर्विधमातृकाक्षरै श्चतुरधिकद्विशत (२०४) वारं मूलविद्यां जपित्वा, पुनः मूलं क्लींअकालीसौः इत्यादि मूलं क्लींक्षकालीसौः इत्यन्तं ५१ । पुनः मूलं क्लींअंकालीसौः इत्यादि मू० क्लींक्षंकालीसौः इत्यन्तं ५१ । पुनः मूलं क्लींअःकालीसौः इत्यादि मू० क्लींक्षःकालीसौः इत्यन्तं ५१ । पुनः मूलं क्लींअंःकालीसौः इत्यादि मू० क्लींक्षंःकालीसौः इत्यन्तं ५१ । (२०४) इत्थं चतुर्विधमातृकाक्षरैः प्रत्येकं मायावाग्भवकामराजबीजैः सह (६१२) वारं मूलविद्यां जपेत् ॥

पुनः मूलं ह्लींअकलासौः इत्यादि ५१ । पुनः मू० ह्लींअंकलासौः इत्यादि ५१ । पुनः मू० ह्लींअःकलासौः । ५१ । पुनः मू० ह्लींअंःकलासौः इत्यादि ५१ । (२०४) । पुनः मूलं ऐंअकलासौः इत्यादि ५१ । मूलं ऐंअंकलासौः इत्यादि ५१ । मूलं ऐंअःकलासौः इत्यादि । ५१ । मूलं ऐंअंःकलासौः इत्यादि ५१ । (२०४) ॥ पुनः मूलं क्लींअकलासौः इत्यादि ५१ । मूलं क्लींअंकलासौः इत्यादि ५१ । मूलं क्लींअःकलासौः इत्यादि ५१ । मूलं क्लींअंःकलासौः इत्यादि ५१ । (२०४) इत्थं चतुर्विधमातृकाक्षरैः प्रत्येकं मायावाग्भवकामराजबीजैः सह द्वादशाधिकषट्शत (६१२) वारं मूलविद्यां जपेत् ॥

ततः मू० ह्लींअमालिनीसौः इत्यादि मू० ह्लींक्षमालिनीसौः इत्यन्तं ५१ । मूलं ह्लींअंमालिनीसौः इत्यादि मू० ह्लींक्षंमालिनीसौः इत्यन्तं ५१ । पुनः मू० ह्लींअःमालिनीसौः इत्यादि मू० ह्लींक्षःमालिनीसौः इत्यन्तं ५१ । पुनः मू० अंःमालिनीसौः इत्यादि मू० ह्लींक्षंःमालिनीसौः इत्यन्तं ५१ । (२०४) । पुनः मूलं ऐंअमालिनीसौः इत्यादि मू० ऐंक्षमालिनीसौः इत्यन्तं ५१ । मू० ऐंअंमालिनीसौः इत्यादि मू० ऐंक्षंमालिनीसौः इत्यन्तं ५१ । मू० ऐंअःमालिनीसौः इत्यादि मू० ऐंक्षःमालिनीसौः इत्यन्तं ५१ । मू० ऐंअंःमालिनीसौः इत्यादि मू० ऐंक्षंः-मालिनीसौः इत्यन्तं ५१ । (२०४) ॥ पुनः मूलं क्लींअमालिनीसौः इत्यादि मू० क्लींक्षमालिनीसौः इत्यन्तं ५१ । मू० क्लींअंमालिनीसौः इत्यादि मू० क्लींक्षंमालिनसौः इत्यन्तं ५१ । मूलं क्लींअःमालिनीसौः इत्यादि मू० क्लींक्षःमालिनीसौः इत्यन्तं ५१ । मूलं क्लींअंःमालिनीसौः इत्यादि मू० क्लींअंःमालिनीसौः इत्यन्तं ५१ । (२०४) ॥ इत्थं चतुर्विधमातृकाक्षरैः प्रत्येकं मायावाग्भवकामराजबीजैः सह द्वादशाधिकषट्(६१२) शतवारं जपेत् ॥

ततः मूलं ह्लींअमातङ्गीसौः इत्यादि मू० ह्लींक्षमातङ्गीसौः इत्यन्तं ५१ । मू० ह्लींअंमातङ्गीसौः इत्यादि मू० ह्लींक्षंमातङ्गीसौः इत्यन्तं ५१ । मू० ह्लींअःमातङ्गीसौः इत्यादि मू० ह्लींक्षःमातङ्गीसौः इत्यन्तं ५१ । मू० ह्लींअंःमातङ्गीसौः इत्यादि मू० ह्लींक्षंःमातङ्गीसौ इत्यन्तं ५१ । (२०४) । पुनः मूलं ऐंअमातङ्गीसौः इत्यादि मू० ऐंक्षमातङ्गीसौः इत्यन्तं ५१ । मू० ऐंअंमातङ्गीसौः इत्यादि मू० ऐंक्षंमातङ्गीसौः इत्यन्तं ५१ । मू० ऐंअमातङ्गीसौः इत्यादि मू० ऐंक्षःमातङ्गीसौः इत्यन्तं ५१ । मू० ऐंअंःमातङ्गीसौः इत्यादि मू० ऐंक्षंःमातङ्गीसौः इत्यन्तं ५१ । (२०४) ॥ पुनः मूलं क्लींअमातङ्गीसौः इत्यादि मू० क्लींक्षमातङ्गीसौः इत्यन्तं ५१ । मू० क्लींअंमातङ्गीसौः इत्यादि मू० क्लींक्षंमातङ्गीसौः इत्यन्तं ५१ । मू० क्लींअःमातङ्गीसौः इत्यादि मू० क्लींक्षः-मातङ्गीसौः इत्यन्तं ५१ । मू० क्लींअंःमातङ्गीसौः इत्यादि मू० क्लींक्षंःमातङ्गीसौः इत्यन्तं ५१ । (२०४) ॥ इत्थं चतुर्विधमातृकाक्षरैः प्रत्येकं मायावाग्भवकामराजबीजैः सह द्वादशाधिकषट्शत (६१२) वारं जपेत् ।

ततः मूलं ह्लींअविजयासौः इत्यादि मू० ह्लींक्षविजयासौः इत्यन्तं ५१ । मू० ह्लींअंविजयासौः इत्यादि मू० ह्लींक्षंविजयासौः इत्यन्तं ५१ । मू० ह्लींअःविजयासौः इत्यादि मू० ह्लींक्षःविजयासौः इत्यन्तं ५१ । मू० ह्लींअंःविजयासौः इत्यादि मू० ह्लींक्षंःविजयासौः इत्यन्तं ५१ । (२०४) । पुनः मूलं ऐंअविजयासौः इत्यादि मू० ऐंक्षविजयासौः इत्यन्तं ५१ । मू० ऐंअंःविजयासौः इत्यादि मू० ऐंक्षंविजयासौः इत्यन्तं ५१ । मू० ऐंअःविजयासौः इत्यादि मू० ऐंक्षःविजयासौः इत्यन्तं ५१ । मू० ऐंअंःविजयासौः इत्यादि मू० ऐंक्षंःवि-

जयासौः इत्यन्तं ५१ । (२०४) । पुनर्मूलं क्लींअविजयासौः इत्यादि मू० क्लींक्षविजयासौः इत्यतं ५१ । मू० क्लींअंविजयासौः इत्यादि मू० क्लींक्षंविजयासौ इत्यन्तं ५१ । मू० क्लींअःविजयासौः इत्यादि मू० क्लींक्षःविजयासौः इत्यन्तं ५१ । मू० क्लींअं:विजयासौः इत्यादि मू० क्लींक्षं:विजयासौः इत्यन्तं ५१ । (२०४) ॥ इत्थं चतुर्विधमातृकाक्षरैः प्रत्येकं मायावाग्भवकामराजबीजैः सह द्वादशाधिकषट्शत (६१२) वारं जपेत् ॥

पुनर्मूलं ह्रींअजयासौः इत्यादि ५१ । मू० ह्रींअंजयासौः इत्यादि ५१ । मू० ह्रींअःजयासौः इत्यादि ५१ । मू० ह्रींअं:जयासौः इत्यादि ५१ । (२०४) । पुनर्मूलं ऐंअजयासौः इत्यादि ५१ । मू० ऐंअंयासौः इत्यादि ५१ । मू० ऐंअःजयासौः इत्यादि ५१ । मू० ऐंअं:जयासौ इत्यादि ५१ । (२०४) । पुनर्मूलं क्लीं-अजयासौः इत्यादि ५१ । मूलं क्लींअंजयासौः इत्यादि ५१ । मू० क्लींअःजयासौः इत्यादि ५१ । मूलं क्लींअं:जयासौः इत्यादि ५१ । (२०४) ॥ इत्थं पूर्वरीत्या (६१२) वारं जपेत् ॥

पुनर्मूलं ह्रींअभगवतीसौः इत्यादि ५१ । मू० ह्रींअंभगवतीसौः इत्यादि ५१ । मू० । ह्रींअःभगवतीसौः इत्यादि ५१ । मू० ह्रींअं:भगवतीसौः इत्यादि ५१ । (२०४) । पुनर्मूलं ऐंअभगवतीसौः इत्यादि ५१ । मू० ऐंअंभगवतीसौः इत्यादि ५१ । मू० ऐंअःभगवतीसौः इत्यादि ५१ । मू० ऐंअं:भगवतीसौः इत्यादि ५१ । (२०४) । मूलं क्लींअभगवतीसौः इत्यादि ५१ । मू० क्लींअंभगवतीसौः इत्यादि ५१ । मू० क्लींअःभगवतीसौः इत्यादि ५१ । मू० क्लींअं:भगवतीसौः इत्यादि ५१ । (२०४) ॥ इत्थं पूर्वरीत्या (६१२) वारं जपेत् ॥

पुनर्मूलं ह्रींअदेवीसौः इत्यादि ५१ । मू० ह्रींअंदेवीसौः इत्यादि ५१ । मू० ह्रींअःदेवीसौः इत्यादि ५१ । मू० ह्रींअं:देवीसौः इत्यादि ५१ । (२०४) । पुनः मूलं ऐंअदेवीसौः इत्यादि ५१ । मू० ऐंअंदेवीसौः इत्यादि ५१ । मू० ऐंअःदेवीसौः इत्यादि ५१ । मू० ऐंअं:देवीसौः इत्यादि ५१ । (२०४) । पुनः मू० क्लींअदेवीसौः इत्यादि ५१ । मू० क्लींअंदेवीसौः इत्यादि ५१ । मू० क्लींअःदेवीसौः इत्यादि ५१ । मू० क्लींअं:देवीसौ इत्यादि ५१ । (२०४) इत्थं पूर्वरीत्या ६१२ वारं जपेत् ॥

पुनः मूलं ह्रींअशिवासौः इत्यादि ५१ । मू० ह्रींअंशिवासौः इत्यादि ५१ । मू० ह्रींअःशिवासौ इत्यादि ५१ । मू० ह्रींअं:शिवासौः इत्यादि ५१ । (२०४) । पुनर्मू० ऐंअशिवासौः इत्यादि ५१ । मू० ऐंअंशिवासौः इत्यादि ५१ । मू० ऐंअःशिवासौ इत्यादि ५१ । मू० ऐंअं:शिवासौ इत्यादि ५१ । (२०४) । पुनः मूलं क्लीं अशिवासौः इत्यादि ५१ । मू० क्लींअंशिवासौः इत्यादि ५१ । मू० क्लींअःशिवासौः इत्यादि ५१ । (२०४) । मूलं क्लींअं:शिवासौः इत्यादि ५१ । (२०४) । इत्थं पूर्वरीत्या ६१२ वारं जपेत् ॥

पुनर्मूलं ह्रींअशांभवीसौः इत्यादि ५१ । मू० ह्रींअंशांभवीसौः इत्यादि ५१ । मू० ह्रींअःशांभबीसौः इत्यादि ५१ । मू० ह्रींअं:शांभवीसौः इत्यादि ५१ । (२०४) । पुनर्मूलं ऐंअशांभवीसौः इत्यादि ५१ । मू० ऐंअंशांभवीसौः इत्यादि ५१ । मू० ऐंअःशांभवीसौः इत्यादि ५१ । मू० ऐंअं:शांभवीसौः इत्यादि ५१ । (२०४) । पुनर्मूलं क्लींअशांभवीसौः इत्यादि ५१ । मू० क्लींअंशांभवीसौः इत्यादि ५१ । मू० क्लींअःशांभवी-सौः इत्यादि ५१ । मू० क्लींअं:शांभवीसौः इत्यादि ५१ । (२०४) ॥ इत्थं पूर्वरीत्या ६१२ वारं जपेत् ॥ इति सम्भूयैकस्मिन्दिने विंशत्युत्तरैकशताधिकषट्सहस्र (६१२०) जपो भवति मूलविद्यायाः ॥

ततो द्वितीयदिने प्राग्वदासनादिपूजान्ते— मू० ह्रींअकाली हस्रौं सह्रौं इत्यादि ५१ । मू० ह्रींअंकाली हस्रौं सह्रौं इत्यादि ५१ । मू० ह्रींअःकाली हस्रौं सह्रौं इत्यादि ५१ । मू० ह्रींअं:काली हस्रौं सह्रौं इत्यादि ५१ । (२०४) ॥ पुनर्मूलं ऐंअकाली हस्रौं सह्रौं इत्यादि ५१ । मू० ऐंअंकाली हस्रौं सह्रौं इत्यादि ५१ । मू० ऐंअःकाली हस्रौं सह्रौं इत्यादि ५१ । मू० ऐंअं:काली हस्रौं सह्रौं इत्यादि ५१ । (२०४) ॥ पुनर्मू० क्लींअ-काली हस्रौं सह्रौं इत्यादि ५१ । मू० क्लींअंकाली हस्रौं सह्रौं इत्यादि ५१ । मू० क्लींअःकाली हस्रौं सह्रौं इत्यादि ५१ । मू० क्लींअं:काली हस्रौं सह्रौं इत्यादि ५१ । (२०४) ॥ इत्थं पूर्वप्रकारेण ६१२ वारं जपेत् ॥

पुनर्मूलं ह्लींअकला हस्रीं सह्लीं ५१। मू० ह्लींअंकला हस्रीं सह्लीं ५१। मू० ह्लींअ:कला हस्रीं सह्लीं ५१। मूलं ह्लींअं:कला हस्रीं सह्लीं ५१। (२०४)॥ पुनः मू० ऐंअंकला हस्रीं सह्लीं ५१। मू० ऐंअंकला हस्रीं सह्लीं ५१। मू० ऐंअ:कला हस्रीं सह्लीं ५१। मू० ऐंअ:कला हस्रीं सह्लीं ५१। (२०४)॥ मूलं क्लींअकला, हस्रीं सह्लीं ५१। मू० क्लींअंकला हस्रीं सह्लीं ५१। मू० क्लींअ:कलाहस्रीं सह्लीं ५१। मू० क्लींअं:कला हस्रीं सह्लीं ५१। (२०४)॥ इत्थं पूर्वरीत्या सम्भूय ६१२ वारं जपेत्॥

पुनर्मूलं ह्लींअमालिनी हस्रीं सह्लीं ५१। मू० ह्लींअंमालिनी हस्रीं सह्लीं ५१। मू० ह्लींअ:मालिनी हस्रीं सह्लीं ५१। मू० ह्लींअं:मालिनी हस्रीं सह्लीं ५१। (२०४)॥ पुनर्मू० ऐंअमालिनी हस्रीं सह्लीं ५१। मू० ऐंअंमालिनी हस्रीं सह्लीं ५१। मू० ऐंअ:मालिनी हस्रीं सह्लीं ५१। मू० ऐंअ:मालिनी हस्रीं सह्लीं ५१। (२०४)॥ पुनः मू० क्लींअमालिनी हस्रीं सह्लीं ५१। मू० क्लींअंमालिनी हस्रीं सह्लीं ५१। मू० क्लींअ:-मालिनी हस्रीं सह्लीं ५१। मू० क्लींअं:मालिनी हस्रीं सह्लीं ५१। (२०४)॥ इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत्॥

पुनर्मूलं ह्लींअमातङ्गी हस्रीं सह्लीं ५१। मू० ह्लींअंमातङ्गी हस्रीं सह्लीं ५१। मू० ह्लींअ:मातङ्गी हस्रीं सह्लीं ५१। मू० ह्लींअं:मातङ्गी हस्रीं सह्लीं ५१। (२०४)॥ मूलं ऐंअमातङ्गी हस्रीं सह्लीं ५१। मू० ऐंअंमातङ्गी हस्रीं सह्लीं ५१। मू० ऐंअ:मातङ्गी हस्रीं सह्लीं ५१। मू० ऐंअ:मातङ्गी हस्रीं सह्लीं ५१। (२०४)॥ मूलं क्लींअमातङ्गी हस्रीं सह्लीं ५१। मू० क्लींअंमातङ्गी हस्रीं सह्लीं ५१। मू० क्लींअ:मातङ्गी हस्रीं सह्लीं ५१। मू० क्लींअं:मातङ्गी हस्रीं सह्लीं ५१। (२०४)॥ इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत्॥

पुनर्मूलं ह्लींअविजया हस्रीं सह्लीं ५१। मू० ह्लींअंविजया हस्रीं सह्लीं ५१। मू० ह्लींअ:विजया हस्रीं सह्लीं ५१। मू० ह्लींअं:विजया हस्रीं सह्लीं ५१। (२०४) पुनः मू० ऐंअविजया हस्रीं सह्लीं ५१। मू० ऐंअंविजयाहस्रीं सह्लीं ५१। मू० ऐंअ:विजया हस्रीं सह्लीं ५१। मू० ऐंअ:विजया हस्रीं सह्लीं ५१। (२०४)॥ मूलं क्लींअविजया हस्रीं सह्लीं ५१। मू० क्लींअंविजया हस्रीं सह्लीं ५१। मू० क्लींअ:विजया हस्रीं सह्लीं ५१। मू० क्लींअं:विजया हस्रीं सह्लीं ५१। (२०४)॥ इत्थं पूर्वरीत्या सम्भूय ६१२ वारं जपेत्॥

पुनः मूलं ह्लींअजयाहस्रीं सह्लीं ५१। मू० ह्लींअंजयाहस्रीं सह्लीं ५१। ह्लींअ:जयाहस्रीं सह्लीं ५१। मू० ह्लींअं:जया हस्रीं सह्लीं ५१। (२०४)॥ पुनर्मू० ऐंअजया हस्रीं सह्लीं ५१। मू० ऐंअंजया हस्रीं सह्लीं ५१। मू० ऐंअ:जया हस्रीं सह्लीं ५१। मू० ऐंअं:जया हस्रीं सह्लीं ५१। (२०४)॥ मूलं क्लींअजया हस्रीं सह्लीं ५१। मू० क्लींअंजया हस्रीं सह्लीं ५१। मू० क्लींअ:जया हस्रीं सह्लीं ५१। मू० क्लींअं:जया हस्रीं सह्लीं ५१। (२०४)॥ इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत्॥

पुनर्मूलं ह्लींअभगवती हस्रीं सह्लीं ५१। मू० ह्लींअंभगवती हस्रीं सह्लीं ५१। मू० ह्लींअ:भगवती हस्रीं सह्लीं ५१। ह्लींअं:भगवती हस्रीं सह्लीं ५१। (२०४)॥ मूलं ऐंअभगवती हस्रीं सह्लीं ५१। ऐंअंभगवती हस्रीं सह्लीं ५१। मू० ऐंअं:भगवती हस्रीं सह्लीं ५१। मू० ऐंअ:भगवती हस्रीं सह्लीं ५१। (२०४)॥ मूलं क्लींअभगवती हस्रीं सह्लीं ५१। मू० क्लींअंभगवती हस्रीं ५१। मू० क्लींअ:भगवती हस्रीं सह्लीं ५१। मू० क्लींअंभगवती हस्रीं सह्लीं ५१। (२०४)॥ इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत्॥

पुनर्मूलं ह्लींअदेवी हस्रीं सह्लीं ५१। मू० ह्लींअंदेवी हस्रीं सह्लीं ५१। मू० ह्लींअ:देवी हस्रीं सह्लीं ५१। मू० ह्लींअं:देवी हस्रीं सह्लीं ५१। (२०४)॥ मू० ऐंअदेवी हस्रीं सह्लीं ५१। मू० ऐंअंदेवी हस्री सह्लीं ५१। मू० ऐंअ:देवी हस्रीं सह्लीं ५१। मू० ऐंअं:देवी हस्रीं सह्लीं ५१। (२०४)॥ मूलं क्लींअदेवी हस्रीं सह्लीं ५१। मू० क्लींअंदेवी हस्रीं सह्लीं ५१। मू० क्लींअ:देवी हस्रीं सह्लीं ५१। मू० क्लींअं:देवी हस्रीं सह्लीं ५१।

(२०४) ।। इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत् ।।

पुनर्मूलं ह्लींअशिवा हस्रीं सह्लीं ५१ । मू० ह्लींअंशिवा हस्रीं सह्लीं ५१ । मू० ह्लींअःशिवा हस्रीं सह्लीं ५१ । मू० ह्लींअंःशिवा हस्रीं सह्लीं ५१ । (२०४) ।। मूलं ऐंअशिवा हस्रीं सह्लीं ५१ । मू० ऐंअंशिवा हस्रीं सह्लीं ५१ । मू० ऐंअःशिवा हस्रीं सह्लीं ५१ । मू० ऐंअंःशिवा हस्रीं सह्लीं ५१ । (२०४) ।। मूलं क्लींअशिवा हस्रीं सह्लीं ५१ । मू० क्लींअंशिवा हस्रीं सह्लीं ५१ । मू० क्लींअःशिवा हस्रीं सह्लीं ५१ । मू० क्लींअंःशिवा हस्रीं सह्लीं ५१ । (२०४) ।। इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत् ।।

पुनर्मूलं ह्लींअशांभवी हस्रीं सह्लीं ५१ । मू० ह्लींअंशांभवी हस्रीं सह्लीं ५१ । मू० ह्लींअःशांभवी हस्रीं सह्लीं ५१ । मू० ह्लींअंःशांभवी हस्रीं सह्लीं ५१ । (२०४) ।। मूलं ऐंअशांभवी हस्रीं सह्लीं ५१ । मू० ऐंअंशांभवी हस्रीं सह्लीं ५१ । मू० ऐंअःशांभवी हस्रीं सह्लीं ५१ । मू० ऐंअंःशांभवी हस्रीं सह्लीं ५१ । (२०४) ।। मू० क्लींअशांभवी हस्रीं सह्लीं ५१ । मू० क्लींअंशांभवी हस्रीं सह्लीं ५१ । मू० क्लींअःशांभवी हस्रीं सह्लीं ५१ । मू० क्लींअंःशांभवी हस्रीं ह्लीं ५१ । (२०४) । इत्थं सम्भूय पूर्वरीत्या ६१२ वारं जपेत् । इत्थं द्वितीयदिनेऽपि (६१२०) वारं श्रीमूलविद्याजपो भवति ।।

ततस्तृतीयदिने प्राग्वदासनादिमानसपूजान्ते—मूलं ह्लींअकालीवौषट् । एवं चतुर्विधमातृकाक्षरैः सह २०४ । ततो मू० ऐंअकालीवौषट् । एवं चतुर्विधमातृकाक्षरैः सह २०४ । मू० क्लींअकालीवौषट् । चतुर्विधमातृकाक्षरैः सह २०४ । इत्थं प्रागुक्तरीत्या सम्भूय ६१२ वारं जपो भवति ।।

ततो मूलं ह्लींअकलावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मू० ऐंअकलावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मू० क्लींअकलावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । सम्भूय । ६१२ वारं जपो भवति ।।

ततो मूलं ह्लींअमालिनीवौषट । चतुर्विधमातृकाक्षरैः सह (२०४) । मूलं ऐंअमालिनीवौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मूलं क्लींअमालिनीवौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । सम्भूय पूर्वरीत्या ६१२ वारं जपो भवति ।।

ततो मूलं ह्लींअमातङ्गीवौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मू० ऐंअमातङ्गीवौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मू० क्लींअमातङ्गीवौषट् । चतुर्विधमातृकाक्षरैः सह पूर्वरीत्या (२०४) । सम्भूय ६१२ वारं जपो भवति ।।

मूलं ह्लींअविजयावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मू० ऐंअविजयावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मू० क्लींअविजयावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । सम्भूय ६१२ वारं जपो भवति ।।

मूलं ह्लींअजयावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मू० ऐंअजयावौषट् । एवं मातृकाक्षरैः सह (२०४) । मू० क्लींअजयावौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । सम्भूय ६१२ जपो भवति ।।

मूलं ह्लींअभगवतीवौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मूलं ऐंअभगवतीवौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । मूलं क्लींअभगवतीवौषट् । चतुर्विधमातृकाक्षरैः सह (२०४) । सम्भूय ६१२ वारं जपो भवति ।।

मूलं ह्लींअदेवीवौषट् । इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४) । मू० ऐंअदेवीवौषट् । इत्यादि प्रोक्तमातृकाक्षरैः सह (२०४) । मू० क्लींअदेवीवौषट् । इत्यादि प्रोक्तमातृकाक्षरैः सह (२०४) । सम्भूय ६१२ वारं जपो भवति ।।

मूलं ह्लींअशिवावौषट् । इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४) । मू० ऐंअशिवावौषट् । इत्यादि

चतुर्विधमातृकाक्षरैः सह (२०४)। मू० क्लींअशिवावौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। सम्भूय ६१२ वारं जपो भवति ॥

मूलं ह्लींअशाम्भवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मूलं ऐंअशाम्भवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। मू० क्लींअशाम्भवीवौषट्। इत्यादि चतुर्विधमातृकाक्षरैः सह (२०४)। सम्भूय (६१२)। इत्थं तृतीयदिनेऽपि (६१२०) वारं मूलविद्याजपो भवति ॥

अथ चतुर्थदिने प्राग्वदासनादिमानसपूजान्ते—मू० ह्लींअकालीआह इत्यादि मायावाग्भवकामबीजैः प्रतिबीजं केवल-बिन्दु-विसर्ग-बिन्दुविसर्गयुक्तैर्मातृकाक्षरैः सह ६१२ वारं जपेत्। ततो मूलं ह्लींअकलाआह इत्यादि प्राग्वत् ६१२। मू० ह्लींअमालिनीआह इत्यादि प्राग्वत् ६१२। मू० ह्लींअमातङ्गीआह इत्यादि प्राग्वत् ६१२। मू० ह्लींअविजयाआह इत्यादि प्राग्वत् ६१२। मू० ह्लींअजयाआह इत्यादि प्राग्वत् (६१२)। मू० ह्लींअभगवतीआह इत्यादि प्राग्वत् (६१२)। मू० ह्लींअदेवीआह इत्यादि प्राग्वत् (६१२)। मू० ह्लींअशिवाआह इत्यादि प्राग्वत् (६१२)। मू० ह्लींअशाम्भवीआह इत्यादि प्राग्वत् (६१२)। इत्थं सम्भूय चतुर्थदिनेऽपि (६१२०) वारं जपो भवति मूलविद्यायाः ॥

ततः पञ्चमदिने प्राग्वदासनादिमानसपूजान्ते—मूलं ह्लींअकालीहस्रैं हस्क्लींरींहस्रौः एवं बीजत्रयादि-चतुर्विधमातृकाक्षरैः सह काल्यादिदशनामभिः प्राग्वत् (६१२०) वारं जपेत् ॥

ततः षष्ठदिने प्राग्वदासनादिकल्पनान्ते मू० ह्लींअकालीह्लीं इत्यादि प्राग्वत् (६१२०) वारं जपेत् ॥

ततः सप्तमदिने प्राग्वदासनाद्यन्ते मू० ह्लींअकाली ह ५ ह ६ स ४ इत्यादि प्राग्वत् (६१२०) वारं जपेत् ॥

ततोऽष्टमदिने प्राग्वदासनाद्यन्ते मू० ह्लींअकालीहस्रौं सह्रौं इत्यादि प्राग्वत् (६१२०) वारं जपेत् ॥

ततो नवमदिने प्राग्वदासनाद्यन्ते मू० ह्लींअकालीहसकलरडैं हसकलरडीं हसकलरडौः इत्यादि प्राग्वत् (६१२०) वारं जपेत् ॥

ततो दशमदिने प्राग्वदासनादिमानसपूजान्ते मू० ह्लींअकालीऐंक्लींसौः इत्यादि प्राग्वत् (६१२०) वारं जपेदिति मन्त्रपारायणक्रमः ॥

अस्मिन् पारायणजपे प्रोक्तक्रमेण दशभिर्दिनैः पर्यायो भवति। एवं दशभिर्दिनैः कर्तुमशक्तैरेकदिनस्य जपं पञ्चधा विभज्य नामद्वयस्य चतुर्विंशत्युत्तरद्विशताधिकसहस्रसंख्यं (१२२४) प्रत्यहं जपः कार्यः। ततः पञ्चाशता दिनैः पर्यायो भवति। अत्राप्यशक्तैः एकैकनाम्ना प्रतिबीजं चतुर्विधमातृकाक्षरैः सञ्जातद्वादशाधिकषट्शतसंख्यं (६१२) वा प्रत्यहं जपः कार्यः। तदा शतसंख्यैर्दिनैः पर्यायो भवति। एवमुक्तपर्यायेऽप्येक-पर्यायानुसारेण साधकैर्मन्त्रपारायणजपः कार्य इति। अत्र पारायणक्रमे प्रागुक्तनामपारायणवदहर्गणादिविचाराभावाद्यदा गुरूपदेशः स्यात तदैवारभ्य प्रोक्तविधिना साधकैः पारायणजपः कार्य इति। अत्र पारायणे काम्यफलादिकं नामपारायणोक्तमेव ज्ञेयं पृथक्फलानुक्तेः। "एवं यः कुरुते नित्यं मन्त्रपरायण बुधः। भुक्त्वेह भोगानखिलानन्ते देवीपदं व्रजेत्" ॥ इति ॥

अथ कादिमतोक्तललितायन्त्राणि लिख्यन्ते। श्रीतन्त्रराजे—(३३ शे पटले)

अथ षोडशनित्यानामाद्या या ललितोदिता। तस्या यन्त्राणि कथ्यन्ते तद्विद्याभेदसम्भवैः ॥ १ ॥
रूपैः षड्भिसमोपेतनवशत्या यथाविधि। समस्तवाञ्छितावाप्तिकारणानि कृतात्मनाम् ॥ २ ॥
ललितानित्यपूजायां यन्त्रं विश्वात्मविग्रहम्। षोडशानां च तस्याश्च पूजाकमलचक्रकम् ॥ ३ ॥
अमृताख्यघटं यन्त्रं सिद्धवज्रमतः परम्। कोष्ठवज्रं वज्रलिङ्गं मेरुलिङ्गं यथाविधि ॥ ४ ॥
महालिङ्गं योनियन्त्रं तथा तद्वज्रवज्रकम्। तदेव च महाकारं कोष्ठयन्त्राणि च क्रमात् ॥ ५ ॥
नवहस्तं त्रिहस्तं वा श्रीचक्रमभिषेचने। कुर्यात् स्थण्डिलपूजायां हस्तमात्रेऽतिसुन्दरम् ॥ ६ ॥

रत्नादिषु तु निर्माणे मानमिच्छावशाद्भवेत् । यदा सुविहिते पूजा शुभान्यस्मिन्स्तथान्यथा ॥ ७ ॥
भ्रमेण वृत्तं निष्पाद्य सुसमे चतुरस्रके । प्रमृज्य तिर्यङ्मध्यस्थं सूत्रं तिर्यङ् निपातयेत् ॥ ८ ॥
सूत्राणि नव, तेषु द्वे वृत्तस्पृष्टोभयान्तके । निधाय तद्‌द्वयोरन्तान्मध्यसूत्रान्ततः क्रमात् ॥ ९ ॥
कृते सूत्रचतुष्के तु षट्कोणं स्यात् त्रिसप्तगम् । द्व्यष्टाग्रतः समारम्भान्नवमं प्रथमान्तरा ॥ १० ॥
कुर्यात् सूत्रचतुष्कं तु (चतुर्मर्मानुगुण्यतः । नवमप्रथमाग्राभ्यां तुर्यसप्तमकावधि ॥ ११ ॥
कुर्यात् सूत्रचतुष्के तु) मर्माष्टकविभेदनात् । ततश्चतुर्थषष्ठान्तद्वयारम्भात्तथाष्टगम् ॥ १२ ॥
द्वितीयगं च सूत्राणां चतुष्कं पातयेत्तथा । चतुर्मर्मानुगुण्येन ततः पञ्चमकान्तयोः ॥ १३ ॥
तृतीयगं सूत्रयुगं कुर्यान्मर्मद्वयाश्रयम् । मार्जयेन्मध्यगं ब्रह्मसूत्रं स्याच्चक्रमुत्तमम् ॥ १४ ॥
बहिरष्टच्छदाम्भोजं तथा तद्‌द्विगुणच्छदम् । विधाय षड्भिर्वृत्तैश्च चतुरस्रं तथाष्टभिः ॥ १५ ॥
सूत्रैर्विधाय तस्यैव प्राक्प्रत्यग्द्वारसंयुतम् । दक्षिणात्तरतो रेखात्रयात् स्थानद्वयात् तथा ॥ १६ ॥
कोणेषु तिर्य्यक्सूत्रैश्च चतुर्भिस्तान्यनुक्रमात् । द्विधा कुर्याच्च चत्वारि पदानि परमेश्वरि ॥ १७ ॥
ललितार्चाचक्रमिदं लभ्यं सद्गुरुतः क्रमात् । सुन्दरं सुसमं सर्वलक्षणैश्च समन्वितम् ॥ १८ ॥
अधोमुखैः पञ्चभिश्च चतुर्भिश्च तथोर्ध्वगैः । नवभिस्त्वेकसूत्रस्थैः स्यादेतदतिसुन्दरम् ॥ १९ ॥
वृत्तस्पृष्टषडस्रं च तदस्पृष्टाष्टकं तथा । मर्मभिश्चाष्टदशभिर्युतं चक्रं सुलक्षणम् ॥ २० ॥
षड्‌खासन्धिमर्माख्यं सन्ध्याख्यद्वयसङ्गमात् । तच्चतुर्विंशतियुतं चक्रं सर्वार्थसिद्धिदम् ॥ २१ ॥
अन्यथा भिन्नमर्मादियुतचक्रसमर्चनात् । शस्त्राद्भयं महाव्याधिं दारिद्र्यमयशो मृतिम् ॥ २२ ॥
तस्माल्लक्षणसंयुक्तमुक्तरूपं विधाय वै । चक्रं तत्रैव तां नित्यमर्चयन् मत्समो भवेत् ॥ २३ ॥
विधाय वृत्तयोर्मध्यं चत्वारिंशत् सहाष्टभिः । प्रागादितिर्यक्सूत्राणि षट्सु षट्सु च पञ्चसु ॥ २४ ॥
पश्चिमात् षट्त्रयेऽप्येवं तन्मध्ये मर्मयुक्तितः । विदध्यात् त्रीणि सूत्राणि कुर्यात्तेनातिसुन्दरम् ॥ २५ ॥
त्र्यस्रं वृत्तं पञ्चदशच्छदानि च ततो बहिः । अष्टपत्राम्बुजं बाह्ये दशच्छदसरोरुहम् ॥ २६ ॥
पुनर्दशच्छदं पद्मं चतुर्दशदलं ततः । अष्टच्छदाब्जं द्विगुणच्छदमष्टादशच्छदम् ॥ २७ ॥
विधाय तस्य मध्ये तां समावाह्य यजेत् तथा । पश्चान्नाथान् पार्श्वयोश्च हेतोरन्यास्तथार्चयेत् ॥ २८ ॥
एतस्मिन् पद्मचक्रस्य मध्ये तासां प्रपूजनात् । महतीं श्रियमाप्नोति ज्ञानान्मां च समाप्नुयात् ॥ २९ ॥
पूर्वस्मिन् पूजयेद् देवीमुक्तक्रमसमन्वितम् । श्रियं ज्ञानात्तथावा च सन्याति परमेश्वरि ॥ ३० ॥
घटद्वयं समालिख्य बाह्याभ्यन्तरभेदतः । तन्मध्यं नवधा कृत्वा कोणेषु प्रथमं लिखेत् ॥ ३१ ॥
द्वितीयं दिक्षु संलिख्य मध्ये तार्तीयमालिखेत् । घटयोरन्तरा कृत्वा तिर्यग्रेखाः समन्ततः ॥ ३२ ॥
तेषु प्रदक्षिणं विद्यात्तार्तीयाक्षरसप्तकम् । लिखेद् बिन्दुविसर्गाभ्यां लिखेत्पञ्चामृताम्बुजम् ॥ ३३ ॥
आद्यनालमयं द्वन्द्वपत्रकेसरकर्णिकम् । विधाय च घटाधस्ताद् विदध्याद् विनियोगकम् ॥ ३४ ॥
मध्ये साध्याक्षरोपेतं कृत्वा तममृतं घटम् । बिभृयादभिषिञ्चेच्च जन्मर्क्षेऽव्वायुराप्तये ॥ ३५ ॥
कुहूपरागसंक्रान्तिदोषेष्वखिलशान्तये । अभिषिञ्चेदशेषार्तिशान्त्यै सिद्ध्यै च सम्पदाम् ॥ ३६ ॥
अपमृत्युमहारोगक्षयापस्मारशान्तये । त्रिवर्षमभिषेकं तु कुर्याज्जन्मत्रये तथा ॥ ३७ ॥
सर्वक्लेशविनिर्मुक्तः सुखी वर्षशतं भुवि । अरोगी विजयी विश्ववन्द्यो भवति मानवः ॥ ३८ ॥
सौवर्णे राजते ताम्रे कृत्वैतत् सिक्थलिङ्गकम् । विधाय स्थापयेत् क्षौद्रे यजेत्सर्वापमृत्युजित् ॥ ३९ ॥
तार्तीयविद्यापुटितं नामालिख्य तु साधकः । ऊर्मिकादौ वहेत् सर्वसम्पदेऽरिष्टशान्तये ॥ ४० ॥
कृत्वाश्मनि तथा यन्त्रं तडागादिषु मध्यतः । स्थापयेत् तत्र ये स्नाता नराःस्युः सुखिनोऽनिशम् ॥ ४१ ॥
प्राक्प्रत्यग्दक्षिणोदक्च सूत्रैरष्टभिराहितैः । कोष्ठान्येकोनपञ्चाशत् तेषु कोणेषु मार्जयेत् ॥ ४२ ॥

चतुर्विंशति कोष्ठानि शेषेषु विलिखेत्क्रमात् । दिक्ष्वेकतस्त्रिकोणानि प्रागारम्भात्प्रवेशतः ॥ ४३ ॥
तार्तीयस्य च भेदोत्थचतुर्विंशतिमालिखेत् । विलोमेनाथ मध्यस्थे तत् ससाध्यं समालिखेत् ॥ ४४ ॥
सिद्धवज्राभिधं यन्त्रमशेषशुभदायकम् । विनाशनमरिष्टानां जयसौभाग्यदायकम् ॥ ४५ ॥
समरे विजयप्राप्त्यै बिभृयात् तद्विवादजे । समस्ते धारयेत् क्लेशे विजयं सुखमाप्नुयात् ॥ ४६ ॥
प्रतिमासं च पूर्णायामभिषिञ्चेच्च तत्र वै । स्थापयित्वा घटं प्राग्वत्समस्ताभ्युदयाय वै ॥ ४७ ॥
पुत्राप्त्यै कन्यकावात्यै वराप्त्यै कन्यका तथा । दाराधनपशुप्राप्त्यै नरनारीनृपादिनाम् ॥ ४८ ॥
वश्यायाविघ्नसंसिद्ध्यै वाक्सिद्ध्यै गेहसिद्धये । धारयेत् सिद्धवज्रं तु समस्तेषु प्रसिद्धये ॥ ४९ ॥
ललिताविद्यया विद्यामन्यां यन्त्रेण चामुना । यन्त्रमन्यत् समं वेत्ति योऽसौ स्यान्मूढचेतनः ॥ ५० ॥
प्राक्प्रत्यग्दक्षिणोदक्चसूत्राण्यष्टादश क्षिपेत् । तैस्तत्र कोष्ठानि तथा नवाशीतिशतद्वयम् ॥ ५१ ॥
तेषु कोणेषु कोष्ठानि मार्जयेत्पूर्ववत्त्रिये । षट्त्रिंशच्छिष्टवज्रे तु चतुर्भिर्दिक्त्रिकोणकम् ॥ ५२ ॥
विधाय, प्राग्बहिर्मध्यात्प्रादक्षिण्यप्रवेशतः । विलिखेत्तद्द्वितीयोत्थभेदांस्तु विलिखेत्ततः ॥ ५३ ॥
त्रिकोणेष्वथ तार्तीयं ससाध्यं मध्यतस्तथा । नवस्वपि लिखेद्विद्याकूटत्रयमथ त्रिश ॥ ५४ ॥
दक्षत्रये त्वाद्यकूटं मध्ये तार्तीयकं तथा । वामत्रये द्वितीयं च लिखेत् साध्ये तृतीयकम् ॥ ५५ ॥
एतत्तु कोष्ठवज्राख्यं यन्त्रमिष्टार्थदायकम् । फलानि सर्वयन्त्राणां पटलेऽस्मिन् शृणु प्रिये ॥ ५६ ॥
तन्त्रेऽस्मिन्नन्यतन्त्रेषु यत्र यत्रास्ति यत्फलम् । प्रोक्तं तदेवमेकैकं योजयेत्सर्वमेव च ॥ ५७ ॥
तेनात्र यन्त्रनिर्माणमात्रमेवोच्यते मया । फलानि वाञ्छयावाप्नोत्ययत्नान्नामयोजनैः ॥ ५८ ॥
अतः फलानि यन्त्राणामिह नोक्तानि कृत्स्नशः । सर्वं च सर्वदा सर्वसमीहितफलाप्तिकृत् ॥ ५९ ॥
प्राक्प्रत्यग्दक्षिणोदक्च षड्विंशत्या समाहितैः । सूत्रैः कोष्ठानि जायन्ते षट्शतं पञ्चविंशतिः ॥ ६० ॥
तेषु कोष्ठेषु परितो मार्जयेदष्टसप्ततिम् । शिष्टे चतुर्भिस्त्र्यस्रं च विदध्याद् दिक्षु पूर्ववत् ॥ ६१ ॥
तेषु तार्तीयविद्यां च ससाध्यां प्राग्वदालिखेत् । शिष्टेषु सप्तनवतिद्विशते मध्यतस्तथा ॥ ६२ ॥
सर्वमध्यस्थकोष्ठस्य पार्श्वयोरुभयोरपि । कोष्ठानि त्रीणि तिर्यक्च समीकृत्य तयोस्तथा ॥ ६३ ॥
उपर्यधश्च द्वे द्वे तु समीकुर्यात्ततस्तथा । तयोरधोर्ध्वं च तथा द्वे द्वे कुर्यादथैकधा ॥ ६४ ॥
तदधश्चोपरि तथा त्वेकैकं च द्वयं द्वयम् । एकीकृत्य पुनश्चोर्ध्वे द्वे द्वे तन्मार्जयेत् तथा ॥ ६५ ॥
ततो मालावदुपरि पार्श्वयोश्च प्रमार्जयेत् । दशखण्डानि शिष्टैस्तु मध्ये लिङ्गं भवेत् तथा ॥ ६६ ॥
एवं लिङ्गः समाख्यातश्चत्वारिंशद्भिरेव च । शिष्टानि कोष्ठवज्राणि द्विशतं दशपञ्च च ॥ ६७ ॥
लिङ्गस्य पार्श्वयोर्मृष्टान्येकविंशतियुग्मकम् । तस्य लिङ्गस्य मध्यस्थपंक्त्यां तार्तीयमालिखेत् ॥ ६८ ॥
ऊर्ध्वादि मायामध्यस्थं सर्वमध्ये ससाध्यकम् । सर्वत्र तार्तीयाविद्यालेखनं समुदीरितम् ॥ ६९ ॥
लिङ्गरूपेषु नवसु पार्श्वषट्केषु पूर्ववत् । विद्याशेषं समालिख्य प्राग्वदारम्भतस्तथा ॥ ७० ॥
विद्याद्वितीयभेदोत्थं तद्विंशशतमालिखेत् । द्विशस्तत्र यजेद्देवोमावाह्य परिवारकैः ॥ ७१ ॥
स्थापयेद्विनियोगेषु प्रोक्तेषु परमेश्वरि । नासाध्यमस्ति भुवने यन्त्रैरेतैर्मयोदितैः ॥ ७२ ॥
एकादिद्वयसंवृद्ध्या पार्श्वयोः कोष्ठवर्धनम् । एकोनविंशकोष्ठान्तं कृत्वा लिङ्गं तथोपरि ॥ ७३ ॥
कृत्वा प्राङ्मध्यतः प्राग्वच्चत्वारिंशद्भिरेव हि । तेषु मूलादि परितो मध्यान्तं विन्यसेत् तथा ॥ ७४ ॥
विद्याद्वितीयभेदोत्था विद्या विंशशतं प्रिये । लिङ्गस्य मध्यकोष्ठान्तं शिष्टं कोणेषु संलिखेत् ॥ ७५ ॥
विधाय चतुरस्रं तु सूत्रद्वयनिपातनात् । सर्वबाह्ये तदाबद्धं तस्योपरि समालिखेत् ॥ ७६ ॥
पंक्तिशः सप्तकोष्ठेषु पर्यायादींस्तथार्णकान् । नित्यापर्यायजनिते पार्श्वयोर्दक्षवामयोः ॥ ७७ ॥
मध्ये युगोदयार्णां तु लिखेत् प्रोक्तक्रमेण वै । लिङ्गाग्रमध्यादभितः पिण्डिकायां च संलिखेत् ॥ ७८ ॥

विद्याः प्रथमभेदोत्थाश्चतुर्विंशतिकारतथा । कृत्वैवं मेरुलिङ्गं तु यन्त्रं तत्रैव तां लिखेत् ॥ ७९ ॥
समस्तवाञ्छितप्राप्त्यै जयारोग्यायुराप्तये । पटादौ तत् समालिख्य पूजयेन्नित्यशश्च ताम् ॥ ८० ॥
(प्राक्प्रत्यग्दक्षिणोदक् च सैकविंशतिसूत्रतः । चतुःशतानि कोष्ठानि भवन्ति सुसमानि वै ॥ ८१ ॥
तस्यैकपार्श्वाधोभागे पञ्च कोष्ठानि मार्जयेत् । ततश्चोपरि षट् सप्तेत्येवमेकादशावधि ॥ ८२ ॥
मार्जयेदुपरिष्टाच्च तस्यैव प्रतिलोमकम् । तथा कुर्यात् पार्श्वयोश्च तेनाधिष्ठानपिण्डके ॥ ८३ ॥
भवतश्चोपरिष्टात्तु पञ्चविंशतिकोष्ठकैः । लिङ्गमन्यानि पार्श्वस्थमार्जनाद् भवति प्रिये ॥ ८४ ॥
अधिष्ठाने पिण्डिकायां तद्द्वितीयविभेदतः । लिङ्गे प्रथमभेदोत्थास्तन्मध्यस्थे स्ववाञ्छितम् ॥ ८५ ॥
मध्ये तद्दिनजां विद्यामिति प्रोक्तं तवानघे । महालिङ्गाभिधं यन्त्रं तत्र पूजाखिलेष्टदा ॥ ८६ ॥
समत्रिरेखां निष्पाद्य योनिं तस्यास्तु मध्यतः । ततत्सूत्रवशात्कुर्याद् दश त्रिषु तथा समम् ॥८७॥
एवं कृतेऽत्र परितो लिखेत्तां विंशतिं शतम् । शिष्टमध्यत्रिकोणे तु लिखेद्वाञ्छितमात्मनः ॥ ८८ ॥
तत्र तामर्चयेत्प्राग्वत् स्थापयेच्च तथा तथा । (तत्र स्वेष्टमवाप्नोति योनिचक्रानुभावतः ॥ ८९ ॥
समत्रिरेखं निष्पाद्य त्र्यस्रं योनिं च सङ्गतम् । तत्र तिर्यक् चतुःसूत्रपातनादन्यतस्तथा ॥ ९० ॥
तिर्यक् सूत्रं मार्जयित्वा पूर्वश्रृङ्गात् तथाभितः । प्रवेशगतया विलिखेत्ताश्चतुर्विंशति क्रमात् ॥ ९१ ॥
विलिख्य शिष्टवज्रस्थं विलिखेन्निजवाञ्छितम् । तत्र तां पूजयेद्देवीं पूर्णास्विष्टार्थसिद्धये ॥ ९२ ॥
तथा विधाय दशभिर्दशभिःसूत्रपातनैः । द्वितीयभेदान् विलिखेत् तथा साध्यसमन्वितान् ॥ ९३ ॥
तत्रापि पूजनाद्यैस्तु सिद्धयो निजवाञ्छिताः । एवमूह्यं तृतीयोत्थविद्याभिरभिकल्पयेत् ॥ ९४ ॥
तेऽपि वाञ्छितसंसिद्धिं कुर्युरेव सुनिश्चितम् । कोष्ठयन्त्रविभेदानि शृणु वक्ष्ये यथाविधि ॥ ९५ ॥
नवषोडशकोष्ठादि संवर्ध्य विषमं समम् । तेष्वङ्कानि समं कृत्वा पंक्तौ तेषु समालिखेत् ॥ ९६ ॥
विद्यातृतीयभेदोत्थांस्तत्तदङ्कानुगुण्यतः । मनीषितं च संलिख्य तेषां मध्यस्थकोष्ठतः ॥ ९७ ॥
विदध्याद्वाञ्छितं सर्वं तैर्यन्त्रैः कल्पितैस्तथा । वश्याकर्षणविद्वेषस्तम्भनोच्चाटनादिकम् ॥ ९८ ॥
आयुरारोग्यविजयविभूत्याद्यं च सिध्यति । स्थापनाद्धारणाच्चान्यैरुपायैः साधकोऽनिशम् ॥ ९९ ॥
इति देव्या यन्त्रभेदास्तवोक्ताः सर्वसिद्धिदाः । अशेषं देवि ते प्रोक्तं यन्त्रसिध्यभिधागमे ॥ १०० ॥

इति । अत्र प्रोक्तयन्त्रक्रमस्तु गुरुमुखादवगन्तव्यः ॥

अथ वासनामाह श्रीतन्त्रराजे—(३५ प०)

अथ षोडशनित्यानां स्वात्मत्वे वासनां शृणु । यया तन्मयतासिद्धिः प्रत्यक्षा भवति ध्रुवम् ॥ १ ॥
गुरुराद्या भवेच्छक्तिः सा विमर्शमयी मता । नवत्वं तस्य देहस्य रन्ध्रत्वेनावभासते ॥ २ ॥

गुरुमन्त्रात्मनामैक्यत्ववद्धिविमर्शः । त्रैलोक्यमोहनादिसर्वानन्दमयान्तचक्राणां नवत्वमित्यर्थः ।

बलिदेव्याः स्वमायाः स्युः पञ्चमी जनकात्मिका । कुरुकुल्ला भवेन्माता पुरुषार्थास्तु सागराः ॥ ३ ॥

अथ मायायास्त्रैविध्यं सात्त्विकी–राजसी-तामसी चेति, एतास्तिस्रः कुरुकुल्लाबलित्रयरूपाः । जनकात्मिका मूलभूता इत्यर्थः ।

रत्नद्वीपो भवेद्देहो नवत्वं धातुरोमभिः । सकल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः ॥ ४ ॥

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रप्राणजीवाख्या नव धातवो नवखण्डरूपा इत्यर्थः । रोमाण्येव कल्पवृक्षाः, षडाधाराः षड्तवः ।

ग्रहर्क्षराशिचक्रेण कालात्मा पश्चिमामुखः । तेन पूर्वाभिमुख्यं स्यादन्यत्ते कथितं मिथः ॥ ५ ॥
ज्ञाता स्वात्मा भवेज्ज्ञानमर्घ्यं ज्ञेयं बहिःस्थितम् । श्रीचक्रं पूजनं तेषामेकीकरणमीरितम् ॥ ६ ॥

तेषां ज्ञातृज्ञानज्ञेयानाम् ।

श्रीचक्रे सिद्धयः प्रोक्ता रसा नियतिसंयुताः। ऊर्मयः पुण्यपापे च ब्राह्म्याद्या मातरः स्मृताः ॥ ७ ॥

रसाः षट्। नियतिश्चतुर्विधा नियतिपुरुषप्रकृत्यहङ्काराः। षडूर्मयः क्षुट्पिपासाशोकमोहजरामृत्यवः, पुण्यपापे च एते अष्टौ ब्राह्म्यादिमातृका इत्यर्थः।

भूतेन्द्रियमनांस्येवं क्रमान्नित्यकलाः पुनः। कर्मेन्द्रियार्था दोषाश्च ज्ञेयाः स्युः शक्तयोऽष्ट वै ॥ ८ ॥

पञ्चभूतानि पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनश्च। कर्मेन्द्रियार्था वचनादानविहरणविसर्गानन्दाः। दोषा वातादयः।

नाड्यश्चतुर्दश प्रोक्ताः क्षोभिण्याद्यास्तु शक्तयः। वायवो दश सम्प्रोक्ताः सर्वसिद्ध्यादिशक्तयः ॥ ९ ॥

नाड्यश्चतुर्दश प्रागुक्ताः प्रसिद्धाः।

वह्नयो दश सम्प्रोक्ताः सर्वज्ञाद्यास्तु शक्तयः। शीतोष्णसुखदुःखेच्छाः गुणाः प्रोक्ताः क्रमेण वै ॥ १० ॥
वशिन्याद्याः शक्तयः स्युस्तन्मात्राः पुष्पसायकाः। मनो भवेदिक्षुधनुः पाशो राग उदीरितः ॥ ११ ॥
द्वेषः स्यादंकुशः प्रोक्तः क्रमेण वरवर्णिनि। अव्यक्ताहंकृतिमहदाकाराः प्रतिलोमतः ॥ १२ ॥
कामेश्वर्यादिदेव्यः स्युः संवित्कामेश्वरः स्मृतः। स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा ॥ १३ ॥
लौहित्यं तद्विमर्शः स्यादुपास्तिरिति भावना। सिद्धिस्त्वनन्यचित्तत्वं मुद्रा वैभवभावना ॥ १४ ॥
उपचाराश्चलत्वेऽपि तन्मयत्वाप्रमत्तता। प्रयोगास्तु विकल्पानां हेतोः स्वात्मनि नाशनम् ॥ १५ ॥
यन्त्राणि मन्त्राः सर्वत्र स्वात्मत्वे स्थैर्यसाधनम्। सन्ध्यासु भजनं देव्या आदिमध्यान्तमज्जनम् ॥ १६ ॥
अन्यास्तु शक्तयश्चक्रगामिन्यो याः समन्ततः। तास्तु विश्वविकल्पानां हेतवः समुदीरिताः ॥ १७ ॥
न्यासस्तु देवतात्वेन स्वात्मनो देहकल्पनम्। जपस्तन्मयतारूपभावनं सम्यगीरितम् ॥ १८ ॥
होमो विश्वविकल्पानामात्मन्यस्तमयो मतः। तेषामन्योन्यसम्भेदभावनं तर्पणं स्मृतम् ॥ १९ ॥
मोहाज्ञानादिदुःखानामात्मन्यस्तमयो ह्यम्। अभिषेकस्तु विद्या स्यादात्मा सर्वाश्रयो महान् ॥ २० ॥
उपाधीनां तु राहित्यमुपदेश इतीरितः। दक्षिणा भेदशून्यत्वं शुश्रूषा स्थैर्यमुच्यते ॥ २१ ॥
तिथिरूपेण कालेन परिणामावलोकनम्। नित्यापञ्चदशैताः स्युरिति प्रोक्तास्तु वासनाः ॥ २२ ॥
पृथिव्यादीनि भूतानि कनिष्ठाद्याः क्रमान्मताः। तेषामन्योन्यसंभेदप्रकारैस्तत्प्रपञ्चता ॥ २३ ॥
ललितायास्त्रिभिर्वर्णैः सकलार्थोऽभिधीयते। शेषेण देवीरूपं तु तेन स्यादिदमीरितम् ॥ २४ ॥
अशेषतो जगत्कृत्स्नं हृल्लेखात्मकमीरितम्। तस्याश्चार्थस्तु कथितः सर्वतन्त्रेषु गोपितः ॥ २५ ॥
व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना। तयोर्विमर्श ईकारो बिन्दुना तन्निफालनम् ॥ २६ ॥
अथ मन्त्रविनिर्माणविधानमभिधीयते। मन्त्रवीर्यसुसिद्धानामितरेषां विशेषकृत् ॥ २७ ॥

प्रागुक्तरश्मिक्रमज्ञानामित्यर्थः (मन्त्रवीर्यज्ञानसुसिद्धानाम्। इतरेषां तज्ज्ञानसिद्धिरहितानाम्)

मन्त्रा एकाक्षराः पिण्डाः कर्तर्यो द्व्यक्षरा मताः। वर्गत्रयं समारभ्य नवार्णावधि बीजकाः ॥ २८ ॥
ततो दशार्णमारभ्य यावद्विंशति मन्त्रकाः। अत ऊर्ध्वं गता मालास्तासु भेदो न विद्यते ॥ २९ ॥
तथैव पिण्डकर्तर्योर्भेदो बीजेषु वर्णतः। पदैर्मन्त्रेषु भेदः स्यात्तेषां संख्याः शृणु क्रमात् ॥ ३० ॥
षट् चतुर्विंशति तथा शतं विंशतिसंयुतम् (१२०)। सविंशति सप्तशतं (७२०) चत्वारिंशद्भिरन्वितम् ॥
सहस्रपञ्चकं (५०४०) पश्चाच्चत्वारिंशत्सहस्रकम्। त्रिशतं विंशति (४०३२०) ततस्त्रिलक्षेण समन्वितम् ॥
द्विषष्टिश्च सहस्राणां साशीत्यष्टशतं इति(३६२८८०)। भेदसंख्यास्तु सप्तानां ताभिरन्याः समुन्नयेत् ॥
प्रस्तारक्रममेतेषां शृणु देवि यथाक्रमम्। एतैरेवोन्नयेन्मन्त्रपदभेदाननुक्रमात् ॥ ३४ ॥
तिर्यग्रेखाद्वयं कृत्वा तत्रायोर्ध्वं लिखेत्क्रमात्। रेखाश्चतस्रः पञ्चैवमृज्वाकारा दशावधि ॥ ३५ ॥
तदधो वर्धयेद्रेखास्तत्तत्संख्यांगुलावधि। तिर्यग्रेखास्तावतीश्च कृत्वा तेष्वङ्कमालिखेत् ॥ ३६ ॥

सव्यदक्षस्थितेष्वेषु कोष्ठपंक्तिष्वनुक्रमात् । आद्ये द्विद्विक्रमादङ्कान् पूरयेत् तन्त्रचोदितान् ॥ ३७ ॥
एतेनान्यत्र सर्वत्र देयानङ्काननुक्रमात् । द्वितीयपंक्तौ प्रथमे खण्डे शेषांस्तु पूरयेत् ॥ ३८ ॥
द्वितीयादिष्वपि तथा शेषान् खण्डेषु पूरयेत् । ततस्तृतीयपंक्तौ तु खण्डान् शेषैस्तु पूरयेत् ॥ ३९ ॥
चतुर्थादिष्वपि तथा नवमान्तं समालिखेत् । तिर्यक् पंक्तिष्वनभ्यस्तक्रममङ्कांस्तु सर्वतः ॥ ४० ॥
एवं कृते भवेद्विद्या सर्वोर्ध्वा वारवन्दिते । सर्वाधस्ताद्विलोमा सा मध्यस्था व्याकुलक्रमात् ॥ ४१ ॥
ताभिः सर्वाभिरप्याशु सिध्यत्येवाभिवाञ्छितम् । ....॥

इति ॥ तथा—(३५ प० ५८ श्लो०)

अनुष्णशीते विजने सुसमे रम्यविग्रहे । गृहे वा मण्डपे स्थित्वा पीठं धवलितोदरम् ॥ १ ॥
विन्यस्य तस्मिन् पूर्णायां शुभर्क्षे वा शुभोदये । कुचन्दनैः कुंकुमैर्वा दरदैर्वोपदेशतः ॥ २ ॥
कृत्वोक्तं मण्डलं सार्णं तत्रावाह्य यजेच्छिवाम् । नित्यशो मातृकां जप्यात्सम्प्रदायानुसारतः ॥ ३ ॥
एवमब्दे तु सम्पूर्णेऽभीष्टदेवाय मन्त्रवित् । कुर्यान्मन्त्रमभीष्टार्थगमकं प्रोक्तयोगतः ॥ ४ ॥

अत्र प्रागुक्तरश्मिक्रमं ज्ञात्वा यद्यद्भूतरश्मिबाहुल्यं यस्मिन्मन्त्रे दृश्यते तत्तद्भूतार्णयुक्ततत्तन्मण्डलं विलिख्य, तन्मध्ये तद्भूतरश्मिकदम्बप्राचुर्यविशिष्टस्वेष्टदेवतापूजायन्त्रं विलिख्य, तत्तदुपचारैः सम्पूजयन् तत्तद्भूतार्णमालया स्वेष्टदेवतामन्त्रं जपन् प्रोक्तसिद्धिर्भवतीत्यर्थः, मन्त्रसिद्धिरपि भवतीति ॥ तथा—

नमोऽग्निवायुप्रायार्णाः क्रूराः क्षोभकरा मताः । भूतोयप्रचुराः सौम्याः सेव्याः सिद्धिकरा मताः ॥ ५ ॥

अत्र येषुयेषु मन्त्रेषु आकाशाग्निवायुवर्णप्राचुर्यं दृश्यते तैस्तैर्मन्त्रैस्तत्तन्मण्डले क्रूरप्रयोगाः कर्तव्याः । येषु येषु मन्त्रेषु सौम्यभूतरश्मिप्रचुरता दृश्यते तैर्मन्त्रैस्तत्तत्सौम्यभूतमण्डले सौम्यप्रयोगाः सिध्यन्तीत्यर्थः ।

एषामन्योन्यसम्भेदबाहुल्याद्बहवोऽर्णवः । तैस्तथा भजनात्सिद्धाः फलन्ति स्वैक्ययोगतः ॥ ६ ॥

द्वित्रिचतुष्टयपञ्चभूतरश्मिसाङ्कर्यमन्त्रा बहवो जायन्ते, तादृशमन्त्राणां तत्तद्भूतसाङ्कर्यमण्डलेषु भजनं कुर्यात्तत्तत्सिद्धिर्भवतीति । अत्र क्रमस्त्वेवं बोद्धव्यः—मन्त्राक्षराणि स्वरव्यञ्जनरूपेण पृथक्पृथग्विलिख्य, तत्तद्वर्णस्य प्रागुक्तषड्विधरश्मिक्रमं पृथक्पृथग्विलिख्य, तत्तद्भूतरश्मीनां पृथक्पृथगैक्यमेलनेन भूताधिक्यतां विज्ञाय, यस्य भूतस्याधिक्यता संपद्यते तत्तन्मण्डलगर्भं पूजायन्त्रं विलिखेत् । पूजायन्त्रमपि प्रचुरभूतमण्डलमध्ये तस्मादूनं तद्बहिस्तस्मादूनं तद्बहिरेवमुत्तरोत्तरं न्यूनाधिकभावेन विलिख्य, तादृशकल्पितोपचारैस्तत्तदावरणदेवतानां तत्तद्भूतार्णसंधानेन सम्पूजयन् तथैव भूतार्थघटितमालया जपेत्तत्तत्सिद्धिर्भवतीत्यर्थः । इदं सर्वं गुरुतः शास्त्रतश्च सम्यग्विज्ञाय भजनं कुर्यात् ॥ तथा—

मन्त्रार्थास्त्रिविधा ज्ञेया ज्ञातव्याः सिद्धिकांक्षिभिः । पूजापटलसम्प्रोक्तास्त्रिविधाः स्युरुपासकाः ॥ ७ ॥
वर्णस्योदयविश्रान्तिपदे बुद्धिनिवेशनम् । एकोऽन्यः सर्वतः सिद्धव्युत्पत्त्यर्थाभिवीक्षणम् ॥ ८ ॥
वाच्यवाचकसम्भेदभावनादिभिरीरिताः । एषां पञ्चप्रकाराणामशेषेणेष्टसिद्धिदाः ॥ ९ ॥

अत्र मन्त्रार्थचिन्तने त्रैविध्यं लक्ष्यते, तत्र वर्णकदम्बकं पदं, पदकदम्बकं वाक्यमिति, प्रतिवर्णे उदयो विश्रान्तिश्च पदे पदे ज्ञातव्या । तादृशपदेषु बुद्धिनिवेशनं कृत्वा तादृशबुद्धिपूर्वकं जपेदित्येकः । द्वितीयस्तु प्राचीनैर्व्याख्यातसिद्धव्युत्पत्त्यार्थाभिवीक्षणपूर्वकजापकः । तृतीयस्तु मन्त्रतद्गतवर्णपदवाक्यतत्प्रतिपादकदेवतानां वाच्यवाचकभावनादिभिरुपासकः । प्रोक्तपञ्चभूतार्णतद्रश्मितत्तद्भूतसाङ्कर्यरश्मिप्रकाराणां प्रोक्तोपासनाक्रमेणाशेषसिद्धयो भवन्तीत्यर्थः । तथा—(३५ प० ६० श्लो०)

सिद्धमन्त्रेण कर्तव्याः प्रयोगा नान्यथा प्रिये । नराणामिव मन्त्राणां देवतानां च पार्वति ॥ १ ॥
अन्योन्यं वैरमस्त्येव गुणभूतसमन्वयात् । आग्नेयानां च भौमानामाप्या मन्त्रास्तु वैरिणः ॥ २ ॥
वायव्यानां जलानां च भौमानां स्यात्परस्परम् । स्त्रीदैवत्या वैरिणः स्युः पुंदैवत्यस्य भूयसा ॥ ३ ॥

स्त्रीदैवत्येषु सौम्यानां क्रूराणां स्यात्परस्परम् । तथैव पुंदैवतानां च त्वरितानरसिंहयोः ॥ ४ ॥
शास्त्रा तु यक्षिणीनां स्यादघोरास्त्रस्य चक्रतः । मन्त्राणां देवतानां च वैरीकरणमीश्वरि ॥ ५ ॥
कथयामि शृणु प्राज्ञे येन लोकोऽवसीदति । वैषम्यभजनं पुंसामज्ञानादाशयात्तथा ॥ ६ ॥
तेन मन्त्रा देवताश्च क्रुद्धा हन्युरुपासकम् । तस्मात्सर्वस्य लोकस्य मन्त्रवीर्यं हि जीवितम् ॥ ७ ॥
यन्निष्ठानाममी दोषा न स्पृशन्ति कदाचन । गुरोः शुश्रूषया काले दीक्षया लब्धमादरात् ॥ ८ ॥
तदाज्ञया भवेदेकरूपं मन्त्रं स्वसिद्धये । अन्यथा साधकं हन्याच्छस्त्रेण रिपुतो भयात् ॥ ९ ॥
दारिद्र्याद् दीर्घरोगाद्वा व्यसनैर्व्वतिसर्जनात् । यो यो मन्त्रस्तस्य तस्य वर्णौषधिविनिर्मिता ॥ १० ॥
तत्तद्वर्णोऽथसंख्याभिर्गुलिका मन्त्रसिद्धिदा । तयाभिषेकस्तद्धरणं तत्खादस्तद्विलेपनम् ॥ ११ ॥
तत् पूजा च तथा सिद्धिलाभाय स्यान्नचान्यथा । ....॥

इति श्रीमहामहोपाध्यायाचार्य्यवर्य–भगवत्पूज्यपाद–श्रीगोविन्दाचार्यशिष्य–श्रीभगवच्छङ्कराचार्य–शिष्य–श्रीविष्णुशर्माचार्यशिष्य–श्रीप्रगल्भाचार्यशिष्य–श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे एकत्रिंशः श्वासः ॥ ३१ ॥

अथ

द्वात्रिंशः श्वासः

अथ महागणपतिमन्त्राः प्रदर्श्यन्ते—

अथ वक्ष्ये महादेवि मन्त्रमेकाक्षरं परम् । शार्ङ्गी प्रीतियुतः प्रोक्तो गणेशस्यैकवर्णकः ॥ १ ॥

इति । शार्ङ्गी गकारः । प्रीतिरनुस्वारः । नारायणीये त्वस्य मन्त्रस्य पञ्च भेदा उक्ताः । यथा—"खान्तं सान्तविषं सबिन्दुसकलं बिन्द्वौयुतं केवलं पञ्चैतानि पृथक्फलं विदधते बीजानि विघ्नेशितुः" इति । अन्तो विसर्गः, विषं मकारः ताभ्यां सह वर्तमानः खान्तो गकारः, तेन गं गः इति सिद्धं । कला विसर्गः तद्युक्तोऽन्यस्तेन गंः । बिन्दुश्च औच ताभ्यां युत इत्यपरः । केवलं बिन्द्वादिरहितः । तथा—"गणकः स्यादृषिश्छन्दो निचृद्विघ्नोऽस्य देवता" इति । प्रयोगसारे—

आदौ गणञ्जयायोक्त्वा स्वाहा हृदयमुच्यते । एकदंष्ट्राय चाभाष्य हुंफट् विद्याशिरस्तथा ॥ १ ॥
शिखाप्यचलशब्दादिकर्णिने हृत्ततो नमः । कवचं गजवक्त्राय नमो नमः इतीरितम् ॥ २ ॥
महोदराय चण्डाय हुंफडित्यस्त्रमिष्यते । एतान्यङ्गानि विन्यसेत्पञ्चाङ्गानि मनीषिभः ॥ ३ ॥

इति पञ्चाङ्गानि उक्तानि । सारसंग्रहे तु—"षड्दीर्घेण निजेनैव बीजेनाङ्गानि योजयेत्" इत्युक्तं । तदेतयोर्विकल्पः । "सप्रांशुना वा बीजेन षडङ्गानि नियोजयेत्" इति प्रयोगसारवचनात् । एवं सप्रांशुना सदीर्घेण षड्दीर्घयुक्तेनेति यावत् । अत्र यथागुरूपदेशं कार्यमिति । प्रयोगसारे—

रक्तो रक्ताङ्गरागांशुककुसुमयुतस्तुन्दिलश्चन्द्रमौलि-
नेंत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरात्तनासः ।
हस्ताग्रक्लृप्तपाशांकुशरदवरदो नागवक्त्रोऽहिभूषो
देवः पद्मासनो वो भवतु नतसुरो भूतये विघ्नराजः ॥ १ ॥

वामाद्यूर्ध्वयोराद्ये तदाद्यधस्तनयोरन्ये, इत्यायुधध्यानम् । सारसंग्रहे—

रक्ताभः शशिमौलिरंकुशगुणौ दन्तं वरं धारयन्
हस्ताब्जैर्द्विरदाननस्त्रिनयनो रक्ताङ्गरागावृतः ।
बीजापूरबृहत्करोरुजठरो दानार्द्रगण्डस्थलो
विघ्नेशः फणिभूषणो गणपतिर्भूयाद्भवद्भूतये ॥ १ ॥

अत्र दक्षोर्ध्वादि तदधोन्तमायुधध्यानम् । बृहत्करः शुण्डादण्डः (इति ध्यात्वा गणेशानं मानसैरुपचारकैः पूजयित्वेति शेषः । तीव्रादिशक्तिसंयुक्ते पीठे त्वावाह्य पूजयेत् ।) प्रपञ्चसारे—

तीव्रा ज्वालिनीनन्दे सभोगदा कामरूपिणी चोग्रा
तेजोवती च सत्या सम्प्रोक्ता विघ्ननाशिनी नवमी ॥ १ ॥
बीजान्ते सर्वशक्ति–प्रोक्त्वा कमलासनाय नम इति च
आसनमन्त्रः प्रोक्तो नवशक्त्यन्ते समर्चयेदमुना ॥ २ ॥

इति । अत्र मण्डूकादिपरतत्त्वान्ता योगपीठदेवतानां पूजा प्रागेव पूजाप्रकरणे लिखित्वाद् ग्रन्थगौरवभयाच्चात्र न लिखिता । सारसंग्रहे—

अष्टपत्रं सरोजं तु चतुरस्रत्रयावृतम् । चतुर्द्वारसमायुक्तमर्चापीठं विधाय च ॥ १ ॥
तत्रावाह्य गणेशानमर्चयेदुपचारकैः । कर्णिकायां तु पूर्वादिचतुर्दिक्षु गणाधिपम् ॥ २ ॥
पीतं गौरं गणेशानं रक्तं च गणनायकम् । गणक्रीडं नीलवर्णं केसरेषु ततो यजेत् ॥ ३ ॥
अग्नीशासुरवायव्यमध्ये दिक्षु यथाक्रमम् । षडङ्गानि मनोरस्य ध्यातव्याश्चाङ्गदेवताः ॥ ४ ॥
तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः । वरदाभयधारिण्यः प्रधानतनवः स्त्रियः ॥ ५ ॥
वक्रतुण्डादिकानष्टौ वक्ष्यमाणान् दले यजेत् । वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ ॥ ६ ॥
लम्बोदराख्यविकटौ विघ्नराड्धूम्रवर्णकौ । दलाग्रेषु ततः पूज्या ब्राह्म्याद्यास्त्वष्ट मातरः ॥ ७ ॥
ब्राह्मी स्वर्णसमा ध्येया मृगचर्मविभूषिता । अक्षमालाभये दण्डकुण्डिके दधती करैः ॥ ८ ॥
त्रिशिखं परशुं हस्तैर्डमरुं नृकपालकम् । बिभ्राणां चन्द्रगौराङ्गीं माहेशीं भावयेच्छुभाम् ॥ ९ ॥
गुणखट्वाङ्गदण्डांकुशान् वहन्तीं कराम्बुजैः । इन्द्रगोपारुणां ध्यायेत्कौमारीं करुणालयाम् ॥ १० ॥
अरिशङ्खकपालानि घण्टां च करपङ्कजैः । बिभ्राणां वैष्णवीं ध्यायेन्नीलमेघसमप्रभाम् ॥ ११ ॥
हलं च मुसलं दोर्भिर्दधानां खड्गखेटकौ । वाराहीं भावयेच्छक्तिमञ्जनाद्रिसमप्रभाम् ॥ १२ ॥
तोमरांकुशवज्राह्वविद्युद्युक्तकराम्बुजाम् । इन्द्राणीं भावयेन्मन्त्री नीलवर्णां सुभूषणाम् ॥ १३ ॥
धारयन्तीं शूलखड्गौ कपालं नृशिरः करैः । चामुण्डां शोणवर्णां च मुण्डमालायुतां स्मरेत् ॥ १४ ॥
स्वर्णाभामक्षमालां च बीजपूरकपालके । पद्मं च दधतीं हस्तैर्महालक्ष्मीं स्मरेत् सुधीः ॥ १५ ॥

दक्षाधःकरमारभ्य तदूर्ध्वंकरपर्यन्तमायुधध्यानं ब्राह्म्याः । दक्षाद्यधःस्थयोराद्ये तदाद्यूर्ध्वस्थयोरन्ये माहेश्याः । कौमार्यास्तु वामोर्ध्वंकरमारभ्य दक्षोर्ध्वंकरपर्यन्तम् । वैष्णव्यास्तु दक्षोर्ध्वंकरमारभ्य दक्षाधःकरपर्यन्तम् । अरिश्चक्रम् । वाराह्यास्तु दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये । इन्द्राण्यास्तु वामोर्ध्वंकरमारभ्य वामाधः-करपर्यन्तम् । चामुण्डायास्तु दक्षोर्ध्वाधःकरयोराद्ये वामोर्ध्वाधःकरयोरन्ये । महालक्ष्म्यास्तु दक्षाधःकरमारभ्य दक्षोर्ध्वंकरपर्यन्तमायुधध्यानम् । तथा—

चतुरस्रत्रयेऽन्तःस्थवीथीद्वन्द्वे समर्चयेत् । दिक्पालांश्च तदस्त्राणि गणेशार्चनमीरितम् ॥ १६ ॥
इन्द्रं सुराधिपं पीतं वज्रहस्तं सवाहनम् । अग्निं तेजोधिपं रक्तं शक्तिहस्तं सुभूषितम् ॥ १७ ॥
यमं प्रेताधिपं कृष्णं दण्डहस्तं समर्चयेत् । रक्षोधिपं च निर्ऋतिं खड्गहस्तं सुधूम्रकम् ॥ १८ ॥
पाशहस्तं सुशुभ्राङ्गं वरुणं यादसां पतिम् । वायुं प्राणाधिपं धूम्रमंकुशाढ्यकरं यजेत् ॥ १९ ॥
यक्षाधिपं कुबेरं च मुक्तावर्णं गदाकरम् । विद्याधिपं तथैशानं स्वच्छं शूलकरं यजेत् ॥ २० ॥
नागाधिपं तथा रक्तं गौरं चक्रकरं यजेत् । लोकाधिपं विधातारं रक्तं पद्मकरं यजेत् ॥ २१ ॥
ऐरावतं तथा मेषं महिषं मृतपुरुषम् । मकरं मृगमत्स्यौ च वृषं च विपहंसकौ ॥ २२ ॥
इन्द्रादिलोकपालानां वाहनानि विदुर्बुधाः । ततो बहिस्तदस्त्राणि तत्पार्श्वे च समर्चयेत् ॥ २३ ॥
वज्रं पीतं सितां शक्तिं दण्डं कृष्णं समर्चयेत् । खड्गमाकाशसंकाशं पाशं विद्युन्निभं यजेत् ॥ २४ ॥
अंकुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत् । त्रिशूलं नीलवर्णं च यजेत्साधकसत्तमः ॥ २५ ॥
रथाङ्गं कुरुविन्दाभं पद्मं रक्तं समर्चयेत् । लोकपालायुधान्येव कथितानि मनीषिभिः ॥ २६ ॥
य एवं पूजयेद्देवं गणेशं भक्तिसंयुतः । इह भुक्त्वाखिलान् भोगानन्ते शिवपदं व्रजेत् ॥ २७ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते गणेशमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः । मुखे निचृच्छन्दसे नमः । हृदये श्रीविघ्नेश्वराय देवतायै नमः । इति विन्यस्य मम सर्वाभीष्टसिद्धये जपे विनियोगः । इति कृताञ्जलिरुक्त्वा मूलमन्त्रेण करशुद्धिं कृत्वा, अंगुष्ठयोः गणञ्जयाय स्वाहा, हृदयाय नमः । तर्जन्योः एकदंष्ट्राय हुंफट्, शिरसे स्वाहा । मध्यमयोः अचलकर्णिने नमोनमः, शिखायै

वषट् । अनामिकयोः गजवक्त्राय नमोनमः, कवचाय हुं । कनिष्ठिकयोः महोदराय चण्डाय हुंफट्, अस्त्राय फट् । इति मन्त्रानंगुष्ठादिकनिष्ठान्तं करयोर्विन्यस्य, नेत्रवर्जं हृदयादिपञ्चाङ्गेष्वपि न्यसेत् । अथवा गांगीं इत्यादिना करषडङ्गन्यासं कृत्वा ध्यानाद्यात्मपूजान्तं प्रोक्तविधिना कृत्वा, एकदंष्ट्राय विद्महे वक्रतुण्डाय धीमहि तन्नो विघ्नः प्रचोदयात् । इति गणेशगायत्र्या गणेशपूजाद्रव्याणि पूजास्थानं च प्रोक्ष्य, देवताग्रं पूर्वं परिकल्प्य तदनुसारेण प्राप्तनिर्ऋतिकोणे श्रीपर्ण्यादिपीठे कुंकुमादिना चतुर्द्वारयुक्तचतुरस्रत्रयवेष्टितमष्टदलकमलं पूजायन्त्रं निर्माय, तत्र प्रागुक्तविधिना मण्डूकादिपृथिव्यन्तं सम्पूज्य, सुधार्णवस्थाने इक्षुरससमुद्रं सम्पूज्य, रत्नद्वीपादिपरतत्त्वाचान्तेऽष्टदलकेसरेषु स्वाग्रान्मध्यान्तं—ॐतीव्रायै नमः । ज्वालिन्यै० । नन्दायै० । भोगदायै० । कामरूपिण्यै० । उग्रायै० । तेजोवत्यै० । सत्यायै० । विघ्ननाशिन्यै नमः । इति सम्पूज्य, गं सर्वशक्तिकमलासनाय नमः, इति समस्तं पीठमभ्यर्च्य, तत्र मूलमन्त्रमुच्चार्य श्रीगणेशमूर्तिं परिकल्पयामि नमः इति चक्रमध्ये मूर्तिं परिकल्प्य, मूर्त्यभावे पुष्पादिकं निक्षिप्य ध्यानोक्तां मूर्तिं भावयन् मूलमुच्चार्य 'श्रीगणपतिमूर्तये नमः' इति मूर्तिं सम्पूज्य, तस्यां प्रागुक्तविधिना गणेशमावाह्यावाहनादिमुद्राः प्रदर्श्य, प्राणप्रतिष्ठान्ते दन्तपाशांकुशविघ्नपरशुलड्डुकबीजापूराख्याः सप्त मुद्राः प्रदर्श्य, आसनादिपुष्पान्तानुपचारानुपचर्य्य, कर्णिकायां देवाग्रादिचतुर्दिक्षु—ॐगणाधिपाय नमः । गणेशानाय० । गणनायकाय० । गडक्रीडाय नमः । इति सम्पूज्य, अष्टदलकेसरेषु—आग्नेये ॐगणञ्जयाय स्वाहा हृदयाय नमः । ईशाने ॐएकदंष्ट्राय हुंफट् शिरसे स्वाहा० । नैर्ऋते ॐअचलकर्णिने नमोनमः शिखायै वषट्० । वायव्ये गजवक्त्राय नमोनमः कवचाय हुं० । ततो देवाग्रादिचतुर्दिक्षु—ॐमहोदराय चण्डाय हुंफट् अस्त्राय फट् नमः । यद्वा, पूर्वोक्तस्थानेष्वेव—गां हृदयाय नमः । गीं शिरसे स्वाहा इत्यादिषडङ्गानि पूजयेत् । अत्र षडङ्गपक्षे तु देवस्याग्रे गौं नेत्रत्राय वौषट् । इति नेत्रं सम्पूज्य पश्चादस्त्रं पूजयेदिति शेषः । ततोऽष्टदलेषु देवाग्रदलमारभ्य—ॐवक्रतुण्डाय नमः । एकदंष्ट्राय० । महोदराय० । गजाननाय० । लम्बोदराय० । विकटाय० । विघ्नराजाय० । धूम्रवर्णाय नमः । इति प्रादक्षिण्येन सम्पूज्य, दलाग्रेषु—आं ब्राह्म्यै नमः । ईं माहेश्वर्य्यै० । ऊं कौमार्य्यै० । ॠं वैष्णव्यै० । लॄं वाराह्यै० । ऐं इन्द्राण्यै० । औं चामुण्डायै० । अः महालक्ष्म्यै नमः । इति सम्पूज्य, बहिश्चतुरस्रे प्रथमवीथ्यां देवाग्रमारभ्य—ॐ लं इन्द्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतवाहनाय नमः । ॐ रं अग्नये तेजोधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय नमः । ॐ टं यमाय प्रेताधिपतये कृष्णवर्णाय दण्डहस्ताय महिषवाहनाय नमः । ॐ क्षं निर्ऋतये रक्षोधिपतये धूम्रवर्णाय खड्गहस्ताय प्रेतवाहनाय नमः । ॐ वं वरुणाय जलाधिपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय नमः । ॐयं वायवे प्राणाधिपतये कृष्णवर्णायांकुशहस्ताय मृगवाहनाय नमः । ॐसं कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय नरवाहनाय नमः । ॐ ह्रौं ईशानाय विद्याधिपतये स्फटिकवर्णाय शूलहस्ताय वृषवाहनाय नमः । इति सम्पूज्य, इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे लोकाधिपतये रक्तवर्णाय पद्महस्ताय हंसवाहनाय नमः । निर्ऋतिवरुणयोर्मध्ये ॐ ह्रीं अनन्ताय नागाधिपतये गौरवर्णाय चक्रहस्ताय गरुडवाहनाय नमः । इति सम्पूज्य, द्वितीयवीथ्यां—ॐ वज्राय नमः । शक्तये० । दण्डाय० । खड्गाय० । पाशाय० । अंकुशाय० । गदायै० । त्रिशूलाय० । पद्माय० । चक्राय नमः । इति लोकपालायुधानि देवाग्रमारभ्य प्रादक्षिण्येन सम्पूज्य, मूलमुच्चार्य साङ्गाय सपरिवाराय श्रीगणपतये नमः । इति त्रिःपुष्पांजलिना सम्पूज्य, धूपदीपादि पूर्वोक्तविधिना सर्वं कुर्यादिति ॥ सारसंग्रहे—

एकलक्षं मनुं जप्त्वा जुहुयात्तद्दशांशतः । अष्टद्रव्यैर्महेशानि तर्पणादि ततश्चरेत् ॥ १ ॥
मोदकैः पृथुकैर्लाजैः सक्तुभिः सेक्षुपर्वभिः । नारिकेलैस्तिलैः शुद्धैः सुपक्वैः कदलीफलैः ॥ २ ॥

इति । अत्रैकैकद्रव्येण सार्धद्वादशशतं जुहुयात् । उक्तं च गणेश्वरपरामर्शिन्याम्—"अष्टद्रव्यैस्त्रिमध्वक्तैर्जुहुयाच्च पृथक्पृथक्" । इति । अत्र जपः कृतयुगपरः । कलावेतच्चतुर्गुणं जपहोमादिकं कार्यमिति ।

तथा सारसंग्रहे—

दौग्धान्नेन घृताक्तेन होमोऽभीष्टफलप्रदः। लक्ष्मीकामो नारिकेलैश्चतुर्थ्यां जुहुयाच्छिवे ॥ ३ ॥
तिललाजान्वितैः सक्तुनारिकेलैश्चतुःशतम्। सितपक्षादिमारभ्य प्रत्यहं च हुनेत्क्रमात् ॥ ४ ॥
चतुर्थ्यन्तं ततः सर्वे प्राणिनो वशगा नृणाम्। तिलैस्तण्डुलसंसिक्तैः (होमः श्रीवश्यकीर्तिदः ॥ ५ ॥
स्वादुत्रययुतैर्लाजैर्हुनेत् सप्तदिनावधि। कन्यार्थी लभते कन्यां वरं कान्तं वरार्थिनी ॥ ६ ॥
दधिसंसिक्तलवणे)र्जुहुयाच्च चतुर्दिनम्। निशीथिन्यां च सर्वेषां भवेद्वश्यं तथेप्सितम् ॥ ७ ॥

इति। अत्र सर्वत्र काम्यहोमेषु संख्यानुक्तौ कार्यस्य गुरुलाघवं ज्ञात्वा च सहस्रादिनियुतपर्यन्तं कार्यानुसारेण जुहुयात्। उक्तं च कुलार्णवे—

एकेन वाथ सर्वैर्वा तत्कार्यगुरुलाघवम्। ज्ञात्वा देवी सहस्रं वा त्रिसहस्रं तु पञ्च वा ॥ १ ॥
अयुतं नियुतं वापि प्रयुतं वा कुलेश्वरि। तत्तत्कर्मोदिते कुण्डे संस्कृते हव्यवाहने ॥ २ ॥
सितार्कद्रुममूलेन कुचन्दनसुदारुभिः। गजत्रोटितनिम्बेन विषाणेनैव दन्तिनाम् ॥ ३ ॥
विधाय विघ्नं सम्पूज्य तं स्पृष्ट्वा प्रजपेन्मनुम्। उपोषितः शुचिश्चन्द्रग्रहे तं च समुद्धरेत् ॥ ४ ॥
शिखायां व्यवहारादौ समरे विजयो भवेत्। रोचना समदानेन सञ्जप्त्वा मनुना ततः ॥ ५ ॥

समदा गजमदसहिता।

तिलकात्सर्वराजानो लोकाः स्युर्वशगाः प्रिये। नवनीते नवे साध्यनामालिख्यानुलोमगे ॥ ६ ॥
विलोमे विघ्नबीजे च तद्धृतं स्थापितानिलम्। अष्टोत्तरशतं जप्त्वा तूष्णीं तद्भक्षयेत् ततः ॥ ७ ॥
सप्ताहाद्वशगः साध्यः साधकस्य भवेद् ध्रुवम्। गणेशं तर्पयेत्तोयैः संख्यया वक्ष्यमाणया ॥ ८ ॥
एकोनपञ्चाशता च दिनैरिष्टमवाप्नुयात्। प्रणवादिममुं मन्त्रं केचिदिच्छन्ति सूरयः ॥ ९ ॥
पूजायां च हृदन्तोऽयं होमे स्वाहान्त ईरितः। ....॥

इति। तथा सारसंग्रहे—मन्त्रान्तरम्।

स्मृतिर्भूमनुयुग्बिन्दुनादालंकृतमस्तकः। एकाक्षरो गणेशस्य मन्त्र एष उदाहृतः ॥ १ ॥

इति। स्मृतिर्गकारः, भूर्लकारः मनुरौकारः, बिन्दुनादेन युतस्तेन ग्लौं इति। तथा—

शार्ङ्गी चतुर्दशार्णाद्यस्वरयुग् बिन्दुभूषितः। अयमेको गणपतेरेकार्णो मन्त्र उत्तमः ॥ १ ॥

इति। शार्ङ्गी गकारः, चतुर्थशाद्यस्वर ओकारः, बिन्दुरनुस्वारस्तेन गों इति ॥ तथा—

गणको मुनिरुक्तः स्यान्निचृच्छन्दश्च देवता। बालो गणपतिः सर्वसुरासुरनमस्कृतः ॥ २ ॥
स्वेन षड्दीर्घयुक्तेन षडङ्गानि प्रकल्पयेत्। ....॥

अत्राद्ये ग्लांग्लीं इत्यादि, द्वितीये गांगीं इत्यादि करषडङ्गन्यासो ज्ञेयः ॥ तथा—

ध्यानपूजाजपाद्यं स्यादस्य पूर्ववदेव तु। ततः सिद्धे मनौ सम्यक् पूर्वमन्त्रोदितान् प्रिये ॥ ३ ॥
प्रयोगान् विधिवत्कुर्यात्साधकोऽभीष्टसिद्धये। .... ॥

इति। इत्थमेकाक्षरः सप्तविधः। काम्यहोममाह—दौग्धान्नेनेति, तिललाजेत्यादि-श्लोकस्यायमर्थः—शुक्लप्रतिपदमारभ्य तच्चतुर्थ्यन्तेषु चतुर्षु दिनेषु प्रत्यहं प्रथमतस्तिलैरेकशतं, तदनु लाजैस्तदनु सक्तुभिस्तदनु नारिकेलैस्त्रिमध्वक्तैः क्रमाच्चतुःशतं जुहुयात् इति। नवनीत इत्यादि, नवे नवनीते परस्परविमुखगणेशबीजद्वयस्य मध्ये तद्बीजद्वयबिन्दुस्थाने मम, बीजाधः अमुकं, तयोर्मध्ये वशं कुरु कुरु, इति साध्यसाधककर्माणि विलिख्य, तत्सर्वं गणेशबीजैरावेष्ट्य, तत्र साध्यप्राणस्थापनं विधायाष्टोत्तरशतं मूलमन्त्रं नवनीतं स्पृशञ्जपित्वा पश्चात् तद्भक्षयेत्। इत्थं सप्ताहप्रयोगेन साध्यो वश्यो भवति ॥ सारसंग्रहे—मन्त्रान्तरम्।

विरिशब्दद्वयं प्रोच्य वदेद्गणपतिं ततः। वरेति च समुच्चार्य वरदेति वदेत्पुनः ॥ १ ॥

सर्वलोकद्वितीयान्तमन्ते वशमथोच्चरेत् । आनयाग्निवधूरन्ते मायाद्यं च समुद्धरेत् ॥ २ ॥
विरिविघ्नेशमन्त्रोऽयं षड्विंशत्यक्षरो भवेत् ।···· ···· ···· ···· ····॥

इति । विरिशब्दद्वयं विरिविरि इति । गणपतिमिति लेखनं कर्मणि द्वितीया तेन गणपतिमिति । द्वितीयान्तेन सर्वलोकमिति । अग्निवधूःस्वाहा । मायाद्यं भुवनेश्वरीबीजाद्यं । केचित्त्वेनं मन्त्रमेकोनविंशत्यक्षरात्मकं वदन्ति । तन्मते 'वरवरद' इति पञ्चवर्णा लोकमिति वर्णद्वयं इति सप्तवर्णा न भवन्ति ॥ उक्तं च गणेश्वरपरामर्शिन्याम्—

"वकाररेफावपि लोचनाढ्यौ पुनस्तथोद्धृत्य गणात्पतीति ।
सर्वं समुच्चार्य च मे वशं स्यान्माकारतश्चापि तथानयेति ॥ १ ॥

शब्दः शिरः स्यात्" इति । अस्यार्थः—वकाररेफौ लोचनाढ्यौ प्रत्येकमिकारयुक्तौ, पुनरेतौ वर्णावुद्धृत्य तेन विरिविरि इति । गणात्पति गणपति सर्वं मे वशमानय, शिरः स्वाहाकारः । मायाद्यश्च पूर्वोद्धृतमन्त्रस्यैव मन्त्रान्तरत्वेनोक्तत्वात् । अन्ये तु—वैपरीत्येनादौ महागणपतिमन्त्रस्य बीजषट्कं योजयित्वा षड्विंशत्यक्षरस्य द्वात्रिंशदक्षरत्वं वदन्ति । बीजषट्कं तन्मन्त्रोद्धारप्रकरणे वक्ष्यते, वैपरीत्यं तु तत्रोक्तक्रमस्य । तथा—

मुनिर्गणक आख्यातश्छन्दो गायत्रमुच्यते । देवाता विरिविघ्नेशो दृष्टादृष्टफलप्रदः ॥ २ ॥

द्वितीयमन्त्रस्य निचृच्छन्दः ।

वेदवेदेषुपञ्चार्णैः शरलोचनसंख्यकैः । विभक्तैर्मूलमन्त्रार्णैः षडङ्गानि मनोरथ ॥ ३ ॥
मायाद्यानि विधेयानि जातियुक्तानि मन्त्रिणा ।···· ···· ···· ····॥

वेदाश्चत्वारः । इषवः पञ्च । शराः पञ्च । लोचनं द्वयं । मायाद्यानीति प्रत्येकं मायाबीजयुक्तानि । जातयो नमःस्वाहावषट् इत्यादयः । एतल्लक्षणमुक्तं प्रागेव । द्वितीयमन्त्रस्य तु मन्त्रपदैः षड्भिः षडङ्गानि ।

सिन्दूराभमिभाननं त्रिनयनं हस्तेषु पाशांकुशौ
बिभ्राणं मधुमत्कपालमनिशं सार्धेन्दुमौलिं भजे ।
पुष्ट्या श्लिष्टतनुं ध्वजाग्रकरया पद्मोल्लसद्धस्तया
तद्योन्याहितपाणिमात्तवसुमत्पात्रोल्लसत्पुष्करम् ॥ ४ ॥

वामदक्षोर्ध्वकरयोर्वामाधःकरे च पाशादित्रयं, दक्षाधःकरं देव्या वराङ्गे, वामाङ्गनिविष्टया देव्या दक्षिणकरेण प्रियाश्लेषः । वामाधःकरेण ध्वजाग्रं स्पृशन्त्या, वामदक्षिणयोः पद्ममित्यायुधध्यानम् । पुष्करं शुण्डादण्डः । द्वितीयेऽपि मन्त्रे इदमेव ध्यानम् । तृतीये तु—

बीजापूरगदे शरासनमरिं मालां च वामैः करै-
र्दक्षैरुत्पलपाशमार्गणरदान् रत्नाढ्यकुम्भं दधत् ।
सिन्दूरारुणविग्रहस्त्रिनयनो योन्यात्तशुण्डो गण-
स्तल्लिङ्गाहितपाणिमम्बुजकरा पुष्टिं वहन् वोऽवतात् ॥ ५ ॥

अत्र वामाधःकरादिदक्षाधःकरादिषु चायुधध्यानम् । कुम्भस्य सर्वोर्ध्वकरे युक्तत्वात् । तथा—

यजेत्पीठे पुरा प्रोक्ते नवशक्तिसमन्विते । मूलमन्त्रेण क्लृप्तायां मूर्तावावाह्य पूजयेत् ॥ ६ ॥
मिथुनानि यजेदादावामोदादीन् दिगम्बरान् । अङ्गानि पूजयेत्पश्चान्मातृश्चैव ततः सुधीः ॥ ७ ॥
अर्चयेल्लोकपालांश्च तदस्त्राणि ततो बहिः । षडावरणसंयुक्तं विरिविघ्नेश्वरं यजेत् ॥ ८ ॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि विरिविघ्नेश्वराय देवतायै नमः । इति विन्यस्येष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, चतुर्भिर्हृदयं, चतुर्भिः शिरः, पञ्चभिः शिखा, पञ्चभिः कवचं, पञ्चभिर्नेत्रं, द्वाभ्यामस्त्रमिति विभक्तैर्मन्त्रवर्णैः षडङ्गानि विन्यस्य, ध्यानादिपुष्पोपचारान्ते ततस्त्रिकोणे वक्ष्यमाणमहा-

गणपतिपूजोक्तमिथुनत्रयं षट्कोणेष्वामोदादिषट्कं अष्टदलकेसरेष्वङ्गषट्कं दलेषु लोकेशांस्तदस्त्राणि चतुरस्र-वीथीद्वये सम्पूज्य प्राग्वत् शेषं समापयेदिति ॥ तथा—

वेदलक्षं जपेन्मन्त्रं जुहुयात्तद्दशांशतः । मधुरत्रयसंयुक्तैर्द्रव्यैरष्टभिरीरितैः ॥ ९ ॥
एवं साधितमन्त्रस्तु प्रयोगान् कर्तुमर्हति । विकचोत्पलहोमेन वशयेत्सकलं जगत् ॥ १० ॥
तिलतण्डुलहोमेन श्रियमाप्नोत्यनिन्दिताम् । मोदकानाज्यसंयुक्तान् हुत्वा विजयमाप्नुयात् ॥ ११ ॥
मधुरत्रयहोमेन राजानं वशमाप्नुयात् । अभीष्टसाधनो होमो भक्ष्यभोज्यादिभिः कृतः ॥ १२ ॥

इति सारसंग्रहे—मन्त्रान्तरम्

वदेत्सौम्यं चतुर्थ्यन्तं महागणपतिं तथा । वरान्ते वरदं प्रोक्त्वा वदेत्सर्वजनं ततः ॥ १ ॥
मे वशं च समाभाष्य वदेदानय ठद्वयम् । लक्ष्मीगणेशबीजाढ्य एकोनत्रिंशदक्षरः ॥ २ ॥
लक्ष्मीगणेशमन्त्रोऽयं सर्वसम्पत्प्रदायकः । ....॥

चतुर्थ्यन्तं महागणपतिं महागणपतये इति । ठद्वयं स्वाहाकारः । लक्ष्मीबीजं श्रीं । गणेशबीजं गं । एतदाढ्य । तथा—

अन्तर्यामी मुनिः प्रोक्तो गायत्री निचृदन्विता । छन्दो लक्ष्मीगणेशोऽत्र देवता समुदाहृतः ॥ ३ ॥
षड्दीर्घयुक्तेनाद्येन द्वितीयेन च तद्वता । षडङ्गानि विधेयानि जातियुक्तानि मन्त्रिणा ॥ ४ ॥

हेमाभः पीतवस्त्रः करतलकमलैः सन्दधच्चक्रशङ्खौ
दन्ताभीती च नासाधृतकनकघटः पद्मसंस्थस्त्रिनेत्रः ।
वामाङ्गाविष्टलक्ष्म्या विधृतकमलया प्रोल्लसद्दक्षदोष्णा
श्लिष्टः सौवर्णकान्त्या गणप इह महाश्रीकरो वः श्रियेऽस्तु ॥ ५ ॥

दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तमायुधध्यानम् । नासा शुण्डादण्डः । तथा—

प्राक्प्रोक्ते पूजयेत्पीठे तीव्रादिनवशक्तिके । अष्टपत्राम्बुजद्वन्द्वे कर्णिकाकेसरोज्ज्वले ॥ ६ ॥
चतुर्द्वारसमायुक्तचतुरस्रत्रयावृते । मूलेन मूर्तिं सङ्कल्प्य तस्यामावाह्य पूजयेत् ॥ ७ ॥
प्रथमावृतिरङ्गैः स्याद् वक्रतुण्डादिभिः परा । अणिमा महिमा चैव लघिमा गरिमा तथा ॥ ८ ॥
ईशित्वं च वशित्वं च प्राकाम्यं प्राप्तिरेव च । एताः समर्चयेत्सम्यक् तृतीयावरणे क्रमात् ॥ ९ ॥
ततस्तु मातरः पूज्या लोकेशास्तदनन्तरम् । तदायुधानि तद्वच्च भक्तियुक्तः समर्चयेत् ॥ १० ॥

इति ॥ अथ प्रयोगः—तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि अन्तर्यामिऋषये नमः । मुखे निचृद्गायत्रीछन्दसे नमः । हृदये श्रीलक्ष्मीगणेशाय देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, श्रांगां हृदयाय नमः । श्रींगीं शिरसे स्वाहा । श्रूंगूं शिखायै वषट् । श्रैंगैं कवचाय हुं । श्रौंगौं नेत्रत्राय वौषट् । श्रःगः अस्त्राय फट् । इति करषडङ्गन्यासं विधाय ध्यानादिमानसपूजान्ते प्रोक्तमर्चापीठ-मुद्धृत्यार्घ्यस्थापनादिपुष्पोपचारान्ते प्रथमाष्टदलकेसरेषु प्राग्वत् षडङ्गानि सम्पूज्य, दलाष्टके एकाक्षर-पूजोक्तान् वक्रतुण्डादिकान् सम्पूज्य, द्वितीयाष्टदलेषु देवाग्रदलमारभ्य ॐ अणिमासिद्ध्यै नमः । एवं महि-मासि० । लघिमासि० । गरिमासि० । ईशित्वसि० । वशित्वसि० । प्राकाम्यसि० । प्राप्तिसिद्ध्यै नमः । इति प्रादक्षिण्येन सम्पूज्य, दलाग्रेषु ब्राह्म्यादिकाः प्राग्वत् सम्पूज्य, चतुरस्रवीथीद्वये लोकपालांस्तदायुधानि च सम्पूज्य धूपदीपादि सर्वं पूर्ववत् समापयेत् इति । तथा—

लक्षमेकं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः । दशांशं जुहुयाद्बिल्वसमिधो मधुरप्लुताः ॥ ११ ॥
(तर्पणादि ततः कुर्यात्पूर्वोक्तविधिना प्रिये । एवं सिद्धमनुर्मन्त्री साधयेदिष्टमात्मनः ॥ १२ ॥
हुनेच्चतुःसहस्राणि श्रीफलैर्मधुरप्लुतैः । महालक्ष्मीकरो होमः पुत्रमित्रकलत्रदः ॥ १३ ॥

शुद्धतोयेन सन्तर्प्य चत्वारिंशच्चतुःशतम् । चत्वारिंशद्दिनान्मन्त्री वाञ्छितां लभते श्रियम् ॥ १४ ॥

इति ॥ सारसंग्रहे—मन्त्रान्तरम्

बिन्दुवामाक्ष्यग्नियुता स्मृतिर्मायासुमध्यगा । त्र्यक्षरः शक्तिगणपः सर्वसिद्धिप्रदायकः ॥ १ ॥

स्मृतिर्गकारः । अग्नी रेफः । वामाक्षि ईकारः । बिन्दुरनुस्वारः । एतैः पिण्डितं बीजं मायासुमध्यगा मायाबीजद्वयस्य मध्ये कुर्यात् । तथा—

भार्गवोऽस्य मुनिश्छन्दो विराड् देवः समीरितः । शक्त्यादिगणपस्तत्र देवदानववन्दितः ॥ २ ॥
षड्दीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत् । गजेन्द्रवदनं साक्षाच्चलत्कर्णसुचामरम् ॥ ३ ॥
हेमवर्णं चतुर्बाहुं पाशांकुशधरं विभुम् । स्वदन्तं दक्षिणे हस्ते बीजापूरं च वामके ॥ ४ ॥
पुष्करे मोदकांश्चैव धारयन्तमनुस्मरेत् । ....॥

वामोर्ध्वकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम् ।

पूर्वोक्ते पूजयेत्पीठे तीव्रादिनवशक्तिके । अष्टपत्राम्बुजे देवं चतुरस्रत्रयावृते ॥ ५ ॥
प्रथमाङ्गावृतिः प्रोक्ता द्वितीया मातृभिः स्मृता । तृतीया लोकपालैः स्याद्वज्राद्यैश्च चतुर्थ्यपि ॥ ६ ॥

(इति ॥ अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि भार्गवाय ऋषये नमः । मुखे विराट्छन्दसे नमः । हृदये श्रीशक्तिगणपतये देवतायै नमः । इति विन्यस्य, ग्रांग्रीमित्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते पूजाचक्रमुद्धृत्यार्घ्यादिपुष्पोपचारान्ते केसरेषु षडङ्गानि दलेषु मातृः चतुरस्रे लोकेशान् तदायुधानि च प्राग्वत् सम्पूज्य शेषं प्राग्वत् समापयेदिति । तथा—

लक्षमेकं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः । तद्दशांशं प्रजुहुयादपूपैर्घृतसंप्लुतैः ॥ ७ ॥
एवं सिद्धमनुर्मन्त्री काम्यकर्माणि साधयेत् । ....॥

अत्रापि कलौ चतुर्गुणजपादिकं कार्यमिति ।

शुक्लपक्षे चतुर्थ्यां तु पूजयित्वा विनायकम् । अपूपैर्गुडसंमिश्रैः पक्वान्नैर्घृतसंप्लुतैः ॥ ८ ॥
मरिचैर्जीरकैश्चैव सैन्धवेन विमिश्रितैः । देवस्य सन्निधौ मन्त्री जुहुयात्त्रिसहस्रकम् ॥ ९ ॥
गद्यपद्यमयी वाणी सप्ताहाद्भवति ध्रुवम् । वश्यार्थे मधुहोमेन राजानं वशमानयेत् ॥ १० ॥
कन्यार्थी जुहुयाल्लाजैस्तन्नामपुटमन्त्रतः । एकां कन्यामथो सप्तधा जपेल्लभते वधूम् ॥ ११ ॥
चन्द्रसूर्यग्रहे प्राप्ते पलं तु कपिलाघृतम् । कर्षमात्रं वचाचूर्णं मिश्रीकृत्याभिमन्त्रयेत् ॥ १२ ॥
पिबेत्तदानीं यो भूत्वा देवताध्यानतत्परः । यावत्पानं भवेत्तावत्नाश्नीयात् किमपीह सः ॥ १३ ॥
सप्ताहाज्जायते शीघ्रमपरो वाक्पतिर्यथा । वन्ध्यर्तुस्नानदिवसे पूजयित्वा विनायकम् ॥ १४ ॥
निष्कार्धपादभागेन हरिद्रां सैन्धवं वचाम् । गोमूत्रकुडवे पिष्टं सहस्रमभिमन्त्रितम् ॥ १५ ॥
बध्वा कन्यां भक्ष्यभोज्यैर्भोजयित्वा च तत्क्रमात् । गुरवे दक्षिणां दत्त्वा पिबेन्नारी तदौषधम् ॥ १६ ॥
ततः सा लभते पुत्रं सर्वलक्षणसंयुतम् । आयुष्मन्तं सुरूपं च बुद्धिमन्तं श्रिया युतम् ॥ १७ ॥

इति । सूर्यचन्द्रग्रहे इत्यादिना एतदुक्तं भवति । चन्द्रग्रहे सूर्यग्रहे वा कर्षमात्रमतिश्लक्ष्णं वचाचूर्णं पलमात्रेण कपिलागोघृतेन मिश्रीकृत्य मूलमन्त्रेणाष्टोत्तरसहस्रवारमभिमन्त्र्य तत्सप्तधा विभज्यैकं भागं देवताध्यानपूर्वकं तदानीं पिबेत् । उर्वरितं भागषट्कं प्रत्यहमेकैकभागं प्रतिप्रातर्देवताध्यानपूर्वकं दिनषट्कं पिबेत् । एवं कृते प्रोक्ता सिद्धिर्भवति । बध्वा इत्यादिना एतदुक्तं भवति । निष्कमात्रं हरिद्रा निष्कार्धं सैन्धवं, निष्कचतुर्थांशं वचाचूर्णमेतत्त्रयं पेषितं श्लक्ष्णेन कुडवमात्रेण गोमूत्रेण प्रोक्तसंख्यया मिश्रीकृत्य प्रोक्तविधिना पीतं प्रोक्तफलदं भवति ॥ तथा सारसंग्रहे—

ताराद्यः पूर्वमन्त्रोऽसौ चतुर्वर्णः प्रकीर्तितः । ऋषिः शुक्रो निगदितश्छन्दो गायत्रमुच्यते ॥ १ ॥

देवता शक्तिगणपः सर्वसिद्धिकरः परः । पूर्ववच्च षडङ्गानि कुर्याद् देशिकसत्तमः ॥ २ ॥

असौ पूर्वः शक्तिगणपतिमन्त्रश्चेत् प्रणवपूर्वस्तदा चतुर्वर्णो मन्त्रो भवति ।

हेमाभं दिव्यवस्त्रं बृहदुदरतनुं चारुबाहुं त्रिनेत्रं
दोर्भिः पाशाक्षसूत्रे निजरदनसृणी मोदकं पुष्करेण ।
बिभ्राणं हेमभूषं तरुणतरणिरुक्चारुशक्त्या समेतं
विघ्नेशं विश्ववन्द्यं त्रिभुवनशरणं चिन्तये श्रीगणेशम् ॥ ३ ॥

दक्षोर्ध्वकरमारभ्य वामोर्ध्वकरपर्यन्तमायुधध्यानम् । तथा—

ततः पूर्वोदिते पीठे देवमावाह्य पूजयेत् । प्रथमावृतिरङ्गैः स्याद् वक्रतुण्डादिभिः परा ॥ ४ ॥
तृतीया मातृभिः प्रोक्ता लोकपालैस्ततो बहिः । तदायुधैः पञ्चमी स्यादेवं सम्पूजयेत्क्रमात् ॥ ५ ॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि शुक्राय ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि श्रीशक्तिगणपतये देवतायै नमः । इति विन्यस्य, ग्रांग्रीं इत्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते प्रोक्तत्र्यक्षरमन्त्रवत् पूजाचक्रमुद्धृत्यार्घ्यादिपुष्पोपचारान्ते केसरेषु षडङ्गानि दलेषु वक्रतुण्डादीन् दलाग्रेषु मातॄश्चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य प्राग्वच्छेषं समापयेदिति । कलावेष एव जपो ज्ञेयः ॥ तथा—

लक्षत्रयं जपेन्मन्त्रं तद्दशांशं समाहितः । जुहुयाद् घृतसंयुक्तैस्तिलैर्मन्त्रविदुत्तमः ॥ ७ ॥
तर्पणादि ततः कुर्यादेवं सिद्धो भवेन्मनुः । काम्यकर्म ततः कुर्याद् देशिको यतमानसः ॥ ८ ॥
आज्यावर्तैर्नुहुयान्नित्यमन्नवान् वत्सराद्भवेत् । पायसान्नेन महतीं श्रियमाप्नोति मानवः ॥ ९ ॥

इति ॥ तथा सारसंग्रहे—मन्त्रान्तरम् ।

खान्तो बिन्दुसमायुक्तः क्षकारोऽक्षिसमन्वितः । लोहितो रेफसंयुक्तः पार्श्वो वह्निसमन्वितः ॥ १ ॥
सादनाय हृदन्तोऽयं मन्त्रः पंक्त्यक्षरो मतः । ....॥

खान्तो ग, बिन्दुरनुस्वारस्तद्युक्तः । क्ष स्वरूपं, अक्षि इकारस्तद्युक्तः । लोहितः पकारः, रेफः रकारस्तद्युक्तः । पार्श्वः पकारः, वह्नी रेफस्तद्युक्तः । सादनाय स्वरूपं, हृन्नमः । तथा—

ऋषिर्गणक आख्यातश्छन्दः प्रोक्तं विराडिति । देवता गदितः क्षिप्रप्रसादनविनायकः ॥ २ ॥
दीर्घभाजा स्वबीजेन कुर्यादङ्गक्रियां मनोः । ....॥

पाशांकुशौ कल्पलतां विषाणं दधत्स्वशुण्डाहितबीजपूरः ।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलिर्हारोज्ज्वलो हस्तिमुखोऽवतान्नः ॥ ३ ॥

वामोर्ध्वकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम् ॥

पूर्वोक्ते पूजयेत्पीठे नवशक्तिसमन्विते । मूर्तिं मूलेन संकल्प्य तस्यां विघ्नेश्वरं यजेत् ॥ ४ ॥
प्रथमावृतिरङ्गैः स्याद् द्वितीया चाष्टभिर्गणैः । विघ्नो विनायकाख्योऽन्य शूराख्यो वीरसंज्ञकः ॥ ५ ॥
वरदश्चेभवक्त्रोऽन्य एकदन्ता ह्ययोऽपरः । लम्बोदरोऽष्टमः प्रोक्तो दलाग्रे मातृपूजनम् ॥ ६ ॥
बाह्ये लोकेश्वराः पूज्यास्तदस्त्राणि ततो बहिः । ....॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः । मुखे विराट्छन्दसे नमः । हृदये क्षिप्रप्रसादनाय गणपतये देवतायै नमः । इति विन्यस्य गांगीं इत्यादिना करषडङ्गन्यासं विधाय ध्यानादिमानसपूजान्ते चतुर्द्वारयुक्तचतुरस्रत्रयान्वितमष्टदलकमलर्चापीठं निर्माय, अर्घ्यादिपुष्पोपचारान्ते केसरेषु षडङ्गानि सम्पूज्य, अष्टदलेषु देवाग्रादिप्रादक्षिण्येन—ॐविघ्नाय

नमः । विघ्ननायकाय नमः । शूराय० । वीराय० । वरदाय० । इभवक्त्राय० । एकदन्ताय० । लम्बोदराय नमः । इति सम्पूज्य, दलाग्रेषु मातॄः, चतुरस्रे लोकपालांस्तदस्त्राणि च सम्पूज्य प्राग्वच्छेषं समापयेदिति । तथा—

लक्षमेकं जपेन्मन्त्रं तदन्ते तद्दशांशतः । त्रिस्वाद्वक्तैस्तिलैर्होमं कुर्यात्पूर्वोदिताष्टभिः ॥ ७ ॥
द्रव्यैर्वा तर्पणादीनि ततः पूर्ववदाचरेत् । एवं सिद्धे मनौ मन्त्री कुर्यात्काम्यान्यशेषतः ॥ ८ ॥

कलावेतच्चतुर्गुणजपः ।

शर्कराघृतयुक्तेन हविषा जुहुयात्सुधीः । लक्ष्मीवान् केवलाज्येन होमो लोकवशङ्करः ॥ ९ ॥
घृताक्तान्नं प्रजुहुयादन्नवान् साधको भवेत् । चत्वारिंशद्दिनं मन्त्री नारिकेलं हुनेत्ततः ॥ १९ ॥
समर्च लोष्टपक्वं च प्रत्यहं साधकोत्तमः । स वाञ्छितार्थमभ्येति नात्र कार्या विचारणा ॥ ११ ॥
सलाजकैः सक्तुभिश्च पृथुकैर्वाञ्छिताप्तये । होमो भवेदष्टभिश्च द्रव्यैस्त्रिमधुरान्वितैः ॥ १२ ॥
(हुनेत्ततश्च वशयेद्राज्ञस्तत्प्रमदा अपि ।) चतुश्चत्वारिंशदाढ्यं चतुःशतमतन्द्रितः ॥ १३ ॥
प्रातः प्रातस्तु सलिलैर्विघ्नेशस्य च मस्तके । तर्पयेच्छ्रीः समृद्धिश्च भवेत्तस्य न संशयः ॥ १५ ॥
पूर्वोदितं गणेशानमायान्तं रविबिम्बतः । सोपानेनाब्जसंस्थं तं चिन्तयित्वा तु तर्पयेत् ॥ १५ ॥
पूर्वमन्त्रप्रयोगांश्च कुर्यादत्रापि साधकः । ....॥

इति । पूर्वमन्त्रोक्तान् त्र्यक्षरमन्त्रोक्तान् ॥ तथा सारसंग्रहे—मन्त्रान्तरम् ।

बिन्द्वर्घीशयुतः शार्ङ्गी ताराद्यो नमसा युतः । चतुर्वर्णो मनुः प्रोक्तो हेरम्बस्य महात्मनः ॥ १ ॥

शार्ङ्गी गकारः, बिन्दुरनुस्वारः, अर्घीशः षष्ठस्वरस्ताभ्यां युक्तः 'ताराद्यो, नमोऽन्तः । तथा—

मुनिर्गणक आख्यातो गायत्रं छन्द ईरितम् । पञ्चवक्त्रोऽस्य हेरम्बो देवता सिंहवाहनः ॥ २ ॥
षड्दीर्घयुक्तबीजेन षडङ्गविधिरीरितः । ....॥

मुक्ताविद्युत्पयोदामृतघुसृणनिभैः पञ्चभिर्नागवक्त्रै-
र्हेरम्बो भावनीयः शशधरमुकुटो दृप्तसिंहाधिरूढः ।
हस्तैर्बिभ्रत् त्रिशूलांकुशकजपवटीमुद्गरान् पुंस्कपालं
टङ्काङ्को मोदकं स्याद्वरदलसदभये दानमकौघदीप्तिः ॥ ३ ॥

अधःस्थदक्षवामयोर्वराभये, तदुपरि मोदकरदौ, तदुपरि परशुकपाले, तदुपर्यक्षमालामुद्गरौ, तदुपर्यंकुश-त्रिशूले । तथा—

पूर्वोक्त एव पीठे तु यजेद्धेरम्बमन्वहम् । पद्ममष्टदलं कृत्वा चतुस्रत्रयावृतम् ॥ ४ ॥
चतुर्द्वारसमायुक्तं तत्रादावासनं यजेत् । ध्रुवान्ते हुंद्वयं प्रोक्त्वा महासिंहं च ङेयुतम् ॥ ५ ॥
गां च हेरम्बशब्दः स्यादासनाय नमोन्ततः । आसनाख्यो मनुः प्रोक्तो दत्त्वा तेनासनं विभोः ॥ ६ ॥
ध्रुवयुक्तेन बीजेन कुर्यान्मूर्तिप्रकल्पनम् । तस्यामावाह्य विघ्नेशं यजेदावरणान्वितम् ॥ ७ ॥
आदावङ्गानि सम्पूज्य लोकपालान् यजेद् बुधः । तेषामस्त्राणि तद्बाह्ये हेरम्बार्चा समीरिता ॥ ८ ॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वद्योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीहेरम्बाय देवतायै नमः । इति विन्यस्य, गांगीं इत्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते प्रोक्तमष्टदलकमलं विलिख्य, प्रोक्तयोगपीठनवशक्तिपूजान्ते "ॐहुंहुं महासिंहाय गां हेरम्बासनाय नमः" इत्यासने सम्पूज्य, ओंगं गणपतिमूर्तिं कल्पयामि, इति तत्र मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते केसरेषु षडङ्गानि सम्पूज्य लोकेशार्चादि प्राग्वत् समापयेदिति । तथा—

लक्षत्रयं जपित्वान्ते तिलैर्हुत्वा दशांशतः । मधुरत्रयसंयुक्तैस्तर्पणादि समाचरेत् ॥ ९ ॥
एवं सिद्धमनुर्मन्त्री प्रयोगानाचरेत्ततः । चतुर्दश्यष्टमीषष्ठीष्वेकैकं जुहुयाद् बुधः ॥ १० ॥

अत्रायमेव कलियुगजपः ।

अपूपैः कृसरैर्मन्त्री मोदकैश्चेष्टसिद्धये । पूर्वोक्तैर्जुहुयाद् द्रव्यैः पर्वस्वपि च मन्त्रवित् ॥ ११ ॥
यद्यदिच्छति तत् सर्वं साधकस्तेन साधयेत् । अथ यन्त्रं प्रवक्ष्यामि हेरम्बस्य गणेशितुः ॥ १२ ॥

भूर्जे पद्मं लिखेत् तद्गजमदघुसृणैर्मध्यबीजाढ्यसाध्यं
किञ्जल्केष्वङ्गमन्त्रान् वसुदलविवरे सप्तधा संविभज्य ।
मालाणुं शिष्टपत्रे विलिखतु षडपि प्रोक्तगाणेशवर्णान्
शक्त्या बीजं सकारावृतमपि तदनु श्वेतसूत्रावृतं स्यात् ॥
लोहैः संवेष्ट्य यन्त्रं त्रिभिरपि विधृतं बाहुनाभीष्टदं स्यात् ॥ १३ ॥

इति । अयमर्थः—भूर्जपत्रे गजमदसहितकुंकुमेन अष्टदलकमलं विलिख्य हेरम्बबीजं विलिख्य, तस्य बिन्दुस्थाने अमुकस्य हुंकारस्थाने अमुकं, मध्ये वशं कुरु कुरु इत्यादि स्वेष्टं कर्मपदं विलिखेदित्येवं साध्यसाधककर्माण्यालिख्य, तत्केसरेषु षडङ्गमन्त्रान् यथास्थानमालिख्याष्टसु पत्रेषु पूर्वादितः प्रादक्षिण्येन ह्रींक्रोंऽँगं नमः स, द्वितीयदले—वं विघ्ताधिपाय स, तृतीयदले—वर्थसिद्धिदाय स, चतुर्थदले—वंदुःखप्रशमना, पञ्चमदले—य एह्येहि भगवन्, षष्ठदले—सर्वान् खादय स्तम्भ, सप्तमदले—य स्तम्भय ह्रींगंगं, अष्टमदले—नमः स्वाहा क्रोंह्रीं इति विलिख्य, पश्चाद्बहिर्वृत्तत्रयं कृत्वा वीथीद्वयं निष्पाद्य तत्र प्रथमवीथ्यां स्वाग्रमारभ्य प्रादक्षिण्येन निरन्तरं शक्तिबीजैरावेष्टच, द्वितीयवीथ्यां तथैव सबिन्दुसकारेणावेष्टच गुलिकीकृत्य श्वेतसूत्रेण सम्वेष्टच, पुनः स्वर्णरजतताम्रैरग्निसम्बन्धमकुर्वन्नावेष्टच यथाविधि धृतमुक्तफलदं भवति । अत्र यन्त्रलिखितमालामन्त्रस्य पूजाजपादिकं सर्वं हेरम्बमन्त्रवत् कार्यम् । अमितं छन्द इति विशेषः ॥ सारसंग्रहे—मन्त्रान्तरम्

प्रणवः पतृतीयं च ततो वामबाहुमूलकम् । स्वरहीनस्तवर्गादिर्भुवे हृद् धातुवर्णकः ॥ १ ॥
सुब्रह्मण्यमनुः प्रोक्तो भजतां सर्वकामदः । .... ॥

इति । पतृतीयो बकारः । वामबाहुमूलं चकारः । तवर्गादिस्तकारः सच स्वररहितः । भुवे स्वरूपं । हृन्नमः । धातुवर्णः सप्ताक्षरः । शारदातिलके तु—अन्तःस्थो वकार उक्तः । प्रयोगसारे तु—प्रशस्तप्रणवा यत्र वाऽप्यशक्तिपूर्वं जपेद्गुरुरिति । अयमर्थः—प्रणवान्तश्चेदयं मन्त्रस्तदाष्टाक्षरो भवतीति । प्रणवादौ शक्तिबीजं चेद्दीयते तदान्योऽयमष्टाक्षरो भवति । एवं त्रिविधोऽयं मन्तव्य इति । तथा—

ऋषिरग्निः समाख्यातो गायत्री च्छन्द उच्यते । सुब्रह्मण्योऽस्य मन्त्रस्य देवता परिकीर्तितः ॥ २ ॥
दीर्घभाजाग्निबीजेन षडङ्गानि समाचरेत् । ....॥

पायाद्वोऽरुणविग्रहः शशिमुखः सम्यग दधानो भुजैः
पद्मं भीतिहरं रिपुक्षयकरीं शक्तिं शुभं कुक्कुटम् ।
रक्तालेपनवस्त्रदामरुचिरो नानाविभूषान्वितः
सुब्रह्मण्यगणाधिपः शुभकरो भक्ताघविध्वंसकः ॥ ३ ॥

दक्षाद्यधःकरयोराद्ये, तदाद्यूर्ध्वयोरन्ये, इत्यायुधध्यानम् । तथा—

वह्न्यन्ते पूजिते पीठे पूर्वोक्ते पूजयेद्विभुम् । उक्तोपचारसहितं विधिना भक्तवत्सलम् ॥ ४ ॥

वह्न्यन्ते इत्यनेन सत्त्वादिपूजानिषेधः प्रतीयते अन्यथोक्तिवैयर्थ्यप्रसङ्गात् ।

(पूर्वोदिते यजेत्पीठे सुब्रह्मण्यं गणाधिपम् । केसरेषु षडङ्गानि पूर्वादिषु दलेषु च ॥ ५ ॥
जयन्तो ह्यग्निवेपश्च कृत्तिकापुत्र एव च ।) ततो भूतपतिसेनान्यौ गुहाख्यो हेमशूलकः ॥ ६ ॥
विशालाक्षश्च सम्प्रोक्ताः शूलशक्तिकरा इमे । दलाग्रेषु च पूर्वादि यजेदेताननन्तरम् ॥ ७ ॥
देवसेनापतिं शक्तिं विद्यां कुक्कुटमेव च । मेधां मयूरं वज्रं च द्विपं लोकेश्वरांस्ततः ॥ ८ ॥

वज्रादीनि ततो बाह्ये देवमित्थं प्रपूजयेत् । ....

इति ॥ अथ प्रयोगः––तत्र प्रातरुत्थानादियोगपीठन्यासान्ते, शिरसि अग्नये ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि सुब्रह्मण्याय देवतायै नमः । इति विन्यस्य विनियोगमुक्त्वा, रांरीं इत्यादिना करषडङ्गन्यासं विधाय, ध्यानादिमानसपूजान्ते प्रागुक्तमर्चापीठमुद्धृत्यार्घ्यादिपुष्पोपचारान्ते प्राग्वत् केसरेषु षडङ्गानि सम्पूज्याष्टदलेषु देवाग्रमारभ्य–ॐजयन्ताय नमः । एवं अग्निवेषाय० । कृत्तिकापुत्राय० । भूतपतये० । सेनान्ये० । गुहाय० । हेमशूलाय० । विशालाक्षाय० नमः । ततोऽष्टदलेषु देवाग्रमारभ्य–देवसेनापतये नमः । एवं शक्तये० । विद्यायै० । कुक्कुटाय० । मेधायै० । मयूराय० । वज्राय० । द्विपाय नमः । इति सम्पूज्य लोकेशाचादि सर्वं प्राग्वत् समापयेदिति । तथा––

लक्षमेकं जपेन्मन्त्रं सर्पिषा वा पयोन्धसा । अयुतं जुहुयान्मन्त्री तर्पयेद् द्विजपुङ्गवान् ॥ ९ ॥

अयं जपः कृतयुगपरः कलावेतच्चतुर्गुणमिति ।

एवं सिद्धे मनौ मन्त्री कुर्यात्कामान्यथेप्सितान् । षष्ठीदिने सुमधुरैर्भक्ष्यभोज्यैः प्रतोषयेत् ॥ १० ॥
देवं देवधिया सम्यगर्चयेद् ब्रह्मचारिणः । सुब्रह्मण्यमनोः सम्यगुपासित ये प्रकुर्वते ॥ ११ ॥
लक्ष्मीमायुश्च तेजश्च पुत्रपौत्रान्यशः पशून् । ऐहिकामुष्मिकाँल्लोकान् लभन्ते नात्र संशयः ॥ १२ ॥

इति । सारसंग्रहे––

अथ प्रवक्ष्ये मनुवर्य्यमेनं महागणेशस्य समासतोऽत्र ।
उपास्य सम्मूढधियोऽपि सिद्धिं प्रापुः सुरैरप्यभिवाञ्छितां ताम् ॥ १ ॥
सिद्धर्षिसङ्घैर्द्विविधैरुपास्यं सुरासुरैः किन्नरयक्षनागैः ।
गन्धर्वसिद्धव्रजचारणाद्यैः संसेवितं चापि गणैः समस्तैः ॥ २ ॥
नारीनराणां वशकारकं तद् भूपालसङ्घातवशे प्रशस्तम् ।
तत्सुन्दरीवश्यकरं ह्यमात्यभृत्यौघवश्यप्रदमाशु लोके ॥ ३ ॥
व्याघ्रद्विपव्यालसमूहचोरवेतालभूतादिकदुष्टजन्तून् ।
वशे विधातुं प्रथितः पृथिव्यां लोकैकजन्तुव्रजमोहकं च ॥ ४ ॥
तथा जनाकृष्टिकरं प्रसिद्धं पुष्टिप्रदं भक्तजनस्य नित्यम् ।
उच्चाटकर्मण्यपि शस्तमाद्यं लोके तथा मारणकर्मशक्तम् ॥ ५ ॥
कृशानुसंस्तभनकारकं च विद्वेषिवाणीगतिरोधकं च ।
कृपाणधाराशरसञ्चयानां संस्तम्भकं विद्युदपस्ततीनाम् ॥ ६ ॥
संस्तम्भकं वातसमूहवृष्टेः शुक्रादिसंस्तम्भकरं परं च ।
पाताललोकेषु गतिप्रदं च रसायनाद्यञ्जनसिद्धिदं च ॥ ७ ॥
सुपादुकापारदवन्धसिद्धिखड्गादिसिद्धिप्रदमुत्तमं च ।
सुयक्षिणीसाधनशक्तमुच्चैः सम्यग्जनावेशकरं प्रसिद्धम् ॥ ८ ॥
वेदादि पद्मनिलया भुवनेश्वरी सकामा क्षमा गणपमन्त्रवरानिहोक्त्वा ।
कान्तान्ततादि पतये वरनीरवह्नीनुक्त्वा दसर्वजनमर्कशिवौ वशं च ॥ ९ ॥
प्रोक्त्वानयेति दहनस्य वधू समुक्त्वा संकीर्तितो मनुरयं मनुयुग्मवर्णः ।
प्रोक्तोऽथ चिन्तितमनोरथकल्पशाखी भूतिप्रदश्च यततां वरसाधकानाम् ॥ १० ॥

इति । वेदादि प्रणवः । पद्मनिलया श्रीबीजं । भुवनेशी तद्बीजं । सकामा कामबीजसहिता, भुवनेशीबीजानन्तरं कामबीजमित्यर्थः । क्षमा भूबीजं ग्लौं इति । गणपमन्त्रो गं । कान्तान्तो गकारः, तादिर्णकारः, ।

पतये स्वरूपं । वर स्वरूपं । नीरं वकारः । वह्निः रेफः । द सर्वजनं स्वरूपं । अर्को मकारः, शिव ऐकारस्तेन मे । वशं स्वरूपं । आनय स्वरूपं । अत्र सन्धिर्ज्ञेयः । दहनस्य वधूः स्वाहाकारः । मनुयुग्मवर्णोऽष्टाविंशत्यक्षरः ॥ तथा—

ऋषिः समुक्तो गणको निचृच्च च्छन्दोऽस्य गायत्रमुदीरितं हि ।
महागणेशो गदितोऽस्य देवः सुरासुरैः सेवितपादपद्मः ॥ ११ ॥

गं बीजं ह्रीं शक्तिरिति पद्मपादाचार्याः ।

तारादिषड्बीजसमन्वितेन षड्दीर्घभाजा निजबीजकेन ।
कुर्यात् षडङ्गानि मनोर्यथावत् स्वजातियुक्तान्यथ मन्त्रविज्ञः ॥ १२ ॥
सद्द्वादशान्तश्रुतिनेत्रनासाद्वन्द्वास्यदोष्पद्द्वयसन्धिदेशे ।
अनाहतेऽथो मणिपूरके स्वाधिष्ठान आधारपदेऽगुत्तर्णान् ॥ १३ ॥
विन्यस्य शीर्षाननहृत्सु गुह्यपद्धृत्सु बीजानि परिन्यसेच्च ।
ततोऽवशिष्टैः खलु मन्त्रवर्णैः स व्यापयेत्स्वे सकले शरीरे ॥ १४ ॥
कवक्त्रहृद्गुह्यपदेषु पश्चान्न्यसेत्स्वनाम्ना मिथुनानि मन्त्री ।
तेष्वेव हृज्जानुयुतेषु भूयो न्यसेच्च षट् शक्तियुतान् गणेशान् ॥ १५ ॥
इत्थं प्रविन्यस्य निजे शरीरे ध्यायेद् गणेशं निजहृत्सरोजे ।

ऐक्षवे जलधौ द्वीपे नवरत्नमये शुभे । तत्तरङ्गोल्लसत्तोयैर्धौते शीततलेऽमले ॥ १६ ॥
तत्तोयकणसम्पृक्तगन्धवाहनिषेविते । कल्पपादपसंशोभिभूभागसमलंकृते ॥ १७ ॥
नानाकुसुमसंकीर्णे नानापक्षिविराजिते । अनेकफलसंकीर्णे सेविते चाप्सरोगणैः ॥ १८ ॥
उद्यद्बालातपोद्द्योतिचन्द्रज्योत्स्नासमाकुले । विलसत्पद्मरागौघकुट्टिमारुणभूतले ॥ १९ ॥
कल्पपादपपुष्पस्थषट्पदस्वनमञ्जुले । पारिजातं कल्पतरुं तस्य मध्ये विचिन्तयेत् ॥ २१ ॥
युगपदृतुषट्केन सेवितं पुष्पशोभितम् । नवरत्नमयं तस्याधस्तात् सिंहासनं स्मरेत् ॥ २२ ॥
तन्मध्ये लिपिपद्मं च षडरं तस्य मध्यतः । कर्णिकायां त्रिकोणं च तत्संस्थं च महागणम् ॥२२॥
नानारत्नविभूषाढ्यमेकदन्तं गजाननम् । ....॥

चक्राब्जत्रिशिखान् गुणेक्षवधनू रक्तोत्पलं सद्गदां
व्रीह्यग्रान्वितबीजपूररदनं कुम्भं करैर्बिभ्रतम् ।
पद्मोद्यत्करया निजप्रमदया श्लिष्टं जपासन्निभं
सार्धेन्दुं प्रभजे महागणपतिं नेत्रत्रयोद्भासितम् ॥ २३ ॥

पुष्करोद्धृतरत्नौघमयकुम्भमुखस्रुतान् । मणिमुक्ताप्रवालादीन् वर्षन्तं धारया मुहुः ॥ २४ ॥
सर्वतः साधकस्याग्रे स्वदानजललोलुपाम् । षट्पदालीं कर्णतालैर्वारयन्तं मुहुर्मुहुः ॥ २५ ॥
अमरासुरसंसेव्यं सद्रत्नमुकुटोज्ज्वलम् । उरूदरं गजमुखं नानाभरणभूषितम् ॥ २६ ॥
इति ध्यात्वा गणपतिं यजेत्सर्वोपचारकैः ।.... ... .॥

ऊर्ध्ववामदक्षयोश्चक्राब्जे, तदधः शूलपाशौ, तदधो धनुरुत्पले, तदधो गदाव्रीह्यग्रे, तदधो बीजपूररदनौ, शुण्डाग्रे रत्नकुम्भः । इत्यायुधध्यानम् । अपरे तु वामोर्ध्वादिक्रमेण दक्षोर्ध्वान्तं वदन्ति । तदुक्तं प्रयोगसारे—"चक्रप्रासरसालकार्मुकगदासद्बीजपूरद्विजव्रीह्यग्रोत्पलपाशपङ्कजकरं शुण्डाग्रजाग्रद्घटम्" इति । प्रासस्त्रिशूलम् । रसालकार्मुक इक्षुकार्मुकः । द्विजो दन्तः । गणेश्वरपरामर्शिन्यां तु—"दक्षाधःकरमारभ्य वामाधःस्थकरावधि । गदाशूलाब्जकह्लारविषाणं दक्षिणैः करैः । शाल्यग्रपाशचक्रेक्षुचापसद्बीजपूरकान् । वामैर्दधान" मित्युक्तमत्र

यथागुरूपदेशं कार्यमिति । तथा—

धर्मादिकल्पे पूर्वोक्ते तीव्रादिनवशक्तिके । पीठे विघ्नेशमभ्यर्च्य सम्यक् सर्वोपचारकैः ॥ २७ ॥
त्रिकोणाग्रस्थं बिल्वाधो विष्णुं लक्ष्म्यान्वितं यजेत् । पद्मद्वयकरा पद्मा शंखचक्रधरो हरिः ॥ २८ ॥
दक्षकोणे बहिस्तद्वद्गौरीं गौरीपतिं यजेत् । (संस्थितौ च वटाधस्तात्सुवर्णरजतप्रभौ ॥ २९ ॥
पाशांकुशधरा गौरी टङ्कशूलधरो हरः । पृष्ठस्थपिप्पलाधस्ताद्रतिकामौ समर्चयेत्) ॥ ३० ॥
उत्पलद्वन्द्वकोदण्डपुष्पेषुसमलंकृतौ । (देवपृष्ठे बहिस्तद्वद्रतिं रतिपतिं यजेत्) ॥ ३१ ॥
उत्तरेऽथ प्रियङ्गोस्तु महीकोलौ यजेत्ततः । शुक्लव्रीह्यग्रकगदाचक्रालंकृतसद्भुजौ ॥ ३२ ॥
देवस्याग्रे यजेल्लक्ष्म्या सहितं गणनायकम् । षट्कोणेषु यजेत्पश्चादामोदादींश्च षट् क्रमात् ॥ ३३ ॥
आमोदं सिद्धिसहितमग्रकोणे समर्चयेत् । समृद्ध्या युतमभ्यर्चेत् प्रमोदं वह्निकोणतः ॥ ३४ ॥
सुमुखं कान्तिसंयुक्तमीशकोणे समर्चयेत् । दुर्मुखं मदनावत्या यजेद् वरुणकोणके ॥ ३५ ॥
विघ्नं मदद्रवायुक्तं कोणे नैशाचरे यजेत् । वायव्ये विघ्नकर्तारं द्राविण्या सहितं यजेत् ॥ ३६ ॥
पाशांकुशधरा विघ्नाः शक्तयश्चाभयेष्टदाः । रक्ता रक्ताम्बरालेपभूषणा मदविह्वलाः ॥ ३७ ॥
(षट्कोणस्य बहिर्देवं दक्षिणे तु समर्चयेत्) । तस्य सव्ये शङ्खनिधिं वसुधारान्वितं यजेत् ॥ ३८ ॥

तस्य महागणेशस्य ।

अपसव्ये पद्मनिधिं वसुमत्या सहार्चयेत् । तत्राद्यो मौक्तिकाभोऽन्यो माणिक्याभस्तु धारया ॥ ३९ ॥
वर्षन्तौ धनसम्पत्तिं लोकानां स्वेच्छया सदा । केसरेष्वङ्गपूजा स्याद् ब्राह्म्याद्याः पत्रमध्यगाः ॥ ४० ॥
चतुरस्रे लोकपालांस्तदस्त्राणि च पूर्ववत् । षडावरणसंयुक्तमित्थं देवं प्रपूजयेत् ॥ ४१ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः । मुखे निचृद्गायत्रीच्छन्दसे नमः । हृदये श्रीमहागणपतये देवतायै नमः । गुह्ये गं बीजाय नमः । पादयोः ह्रीं शक्तये नमः । इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, ॐगां हृदयाय नमः । श्रींगीं शिरसे स्वाहा । ह्रींगूं शिखायै वषट् । क्लींगैं कवचाय हुं । ग्लौंगौं नेत्रत्रयाय वौषट् । गंगः अस्त्राय फट् । इति षडङ्गमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत् । ततो ब्रह्मरन्ध्रे गं नमः । दक्षनेत्रे णं नमः । वामे पं नमः । दक्षश्रोत्रे तं नमः । वामे यें नमः । दक्षनासायां वं नमः । वामे रं नमः । मुखे वं नमः । दक्षबाहुमूले रं नमः । मध्ये दं नमः । मणिबन्धे सं नमः । अंगुलिमूले वं नमः । अंगुल्यग्रे जं नमः । वामबाहुमूले नं नमः । मध्ये में नमः । मणिबन्धे वं नमः । अंगुलिमूले शं नमः । अंगुल्यग्रे मां नमः । अनाहते नं नमः । मणिपूरके यं नमः । स्वाधिष्ठाने स्वां नमः । मूलाधारे हां नमः ॥ शिरसि ॐनमः । मुखे श्रीं० । हृदये ह्रीं० । गुह्ये क्लीं० । पादयोः ग्लौं० । हृदये गं नमः । इति विन्यस्य, गणपतये इत्यादिद्वाविंशतिवर्णैर्मूर्धादिपादान्तं व्यापकं विन्यस्य, ध्यानादिमानसपूजान्ते प्रागुक्तं मातृकापद्मं चतुर्द्वारयुक्तचतुरस्रत्रयवेष्टितं कृत्वा तत्कर्णिकायां षट्कोणं तदन्तस्त्रिकोणं च कुर्यादिति पूजाचक्रमुद्धृत्य, अर्घ्यस्थापनादिपुष्पोपचारान्ते प्रोक्तविधिना त्रिकोणं विधाय त्रिकोणाद्बहिर्देवस्याग्रे ॐश्रीं लक्ष्मीनारायणाभ्यां नमः । देवस्य दक्षिणे ॐह्रीं गौरीहराभ्यां नमः । देवस्यपृष्ठे ॐक्लीं रतिकामाभ्यां नमः । देवस्य वामे ॐग्लौं महीवराहाभ्यां नमः ॥ ततस्त्रिकोणान्तर्देवाग्रे ॐगं लक्ष्मीगणनायकाभ्यां नमः । इति प्रोक्तमिथुनानि तत्तद्वृक्षाधस्तत्तद्ध्यानोक्तरूपाणि सम्यग् ध्यात्वा गन्धादिभिः सम्पूज्य, ततः षट्कोणेषु देवाग्रमारभ्य—ॐगं आमोदसिद्धिभ्यां नमः । ॐगं प्रमोदसमृद्धिभ्यां नमः । सुमुखकान्तिभ्यां नमः । दुर्मुखमदनावतीभ्यां नमः । विघ्नमदद्रवाभ्यां नमः । विघ्नकर्तृद्राविणीभ्यां नमः । इति सम्पूज्य, षट्कोणाद्बहिर्देवस्य दक्षिणे शं शङ्खनिधिवसुधाराभ्यां नमः । वामे पं पद्मनिधिवसुमतीभ्यां नमः । इति सम्पूज्य अष्टदलकेसरेषु

प्राग्वत् षडङ्गानि दलेषु ब्राह्म्याद्याश्चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य धूपदीपादि सर्वं प्राग्वत् समापयेत् ॥ तथा—

एकादशायुतं जप्त्वा सहस्रोत्तरमादरात् । दशांशं जुहुयादष्टद्रव्यैरेकाक्षरोदितैः ॥ ४२ ॥
तर्पयित्वा दशांशेन चाभिषिक्तोऽणुना ततः । ब्राह्मणान् भोजयेत्सम्यग् षड्रसैर्भूरिदक्षिणाम् ॥ ४३ ॥
दत्त्वा प्रणम्य विसृजेदेवं सिद्धो भवेन्मनुः । ततः प्रणम्य विधिवद्गुरुं सन्तोषयेत्ततः ॥ ४४ ॥
काम्यकर्माणि कुर्वीत सिद्धये स्युर्नचान्यथा । ....॥

अयं पुरश्चरणजपः कृतयुगपरः । कलावेतच्चतुर्गुण इति । तथा—

वक्ष्ये प्रयोगानधुना समासान्महागणेशाणुवरस्य सर्वान् ।
रक्तप्रसूनैर्गणपं समर्च्य जपेन्मनुं चाष्टसहस्रमन्ते ॥ १ ॥
दशांशतो लोहितवाजिवैरिपुष्पैर्हुनेत् स्वादुपरिप्लुतैश्च ।

अष्टसहस्रमष्टोत्तरसहस्रमित्यर्थः । वाजिवैरी करवीरः । स्वादूनि मधुराणि, तानि तु घृतमधुशर्कराः । घृतमधुदुग्धानि वा ।

राजा वशे तिष्ठति मन्त्रिणोऽस्य सामात्यभृत्यादिकसैन्ययुक्तः ॥ २ ॥
ब्रह्मद्रुसूनैस्त्रिमधुप्लुतैश्च हुत्वा द्विजातीन् वशयेदवश्यान् ।
ते चात्र मन्त्रिप्रवरस्य नित्यमुक्तं हि कुर्वन्ति न संशयोऽत्र ॥ ३ ॥

ब्रह्मद्रुसूनैः पलाशकुसुमैः ।

सर्पिर्हुनेन्मन्त्रिवरो हि तावत् जितेन्द्रियः संस्तदनन्यचेताः ।
चराचरेऽस्मिञ्जगति प्रसिद्धां कीर्तिं विशालाममलां लभेत् सः ॥ ४ ॥
मन्त्री हुनेदाज्यपरिप्लुतं यो धनं स धान्यं विपुलं लभेत् ।
मधुप्लुतैर्लोहितपङ्कजैर्यो हुनेदथाष्टोत्तरकं सहस्रकम् ॥ ५ ॥
पृथ्वीपतींस्तत्प्रमदाश्च नित्यं वशे करोत्येव तदात्मजांश्च ।
हयारिवृक्षोत्थसमिद्भिरष्टाधिकं सहस्रं जुहुयान्मनुज्ञः ॥ ६ ॥
(भूदेववर्यान् ससुतान् सबन्धून् सपत्निकांश्च वशयेदवश्यम् ।)
अष्टाधिकं मन्त्रिवरः सहस्रं जप्त्वा दशांशेन हुनेन्मनुज्ञः ॥ ७ ॥
विशुद्धया राजिकया च लोणैस्तद्भस्म संशोध्य करे गृहीत्वा ।

साज्ययेति साम्प्रदायिकाः ।

योषां निजेष्टां खलु ताडयेत् सा कन्दर्पतीक्ष्णेषुनिपीडिताङ्गी ॥ ८ ॥
स्वजीवितं यावदमुष्य वश्या भवेदवश्या किल किङ्करीव ।
शिवालये लक्षमितं मनुं यो जपेद् दशांशेन हुनेच्च मन्त्री ॥ ९ ॥
पयोन्धसा साधुमधुप्लुतेन सोऽर्थानवश्यं विविधांल्लभेत ।

पयोन्धसा पायसेन ।

जातीप्रसूनैर्विधिवत् तथाष्टाधिकं सहस्रं जुहुयान्मनुज्ञः ॥ १० ॥
मेधायुतो वेदसदर्थवेत्ता भवेदथासावचिरादवश्यम् ।
दूर्वात्रिकैर्यो जुहुयान्मनुज्ञोऽयुतत्रयं तेन भवेदवश्यम् ॥ ११ ॥
मृत्युञ्जयः सर्वगदान् विजित्य लोके स धीमानिह दीर्घजीवी ।
समाहितो मन्त्रिवरोऽयुतं यो हुनेद्विधानेन सुपीतपुष्पैः ॥ १२ ॥

संस्तम्भयेद्वैरिनृपस्य सेनां सभृत्यनागाश्वरथामवश्यम् ।
लोहादिकैः संघटितानि यानि दिव्यानि शस्त्राणि सितानि तेषाम् ॥ १३ ॥
धारां ध्रुवं स्तम्भयतीह शत्रोर्नागाश्वसंस्तम्भनमत्र कुर्यात् ।
विभीतकद्रूत्थसमिद्भिरत्रायुतत्रयं यो जुहुयाद्विधिज्ञः ॥ १४ ॥
उच्चाटयेदाशु च वैरिसंघान् स्वस्थानतो मन्दरसन्निभांश्च ।
ग्रामं पुरं वा नगरं च देशं ध्यायंश्च यं यं जुहुयात् क्रमेण ॥ १५ ॥
तं तं तदोच्चाटयतीह मन्त्री तथा च कामं प्रतिमानवानाम् ।
मन्त्री त्वपामार्गसमिद्भिरष्टाधिकं सहस्रं विधिवज्जुहोतु ॥ १६ ॥
स्वजीवितावध्यथ पण्ययोषा वश्या भवेयुर्न विचार्य्यमत्र ।
एरण्डवृक्षोत्थसमिद्भिरष्टोत्तरं सहस्रं जुहुयाद्विधानात् ॥ १७ ॥
रण्डाः स्वजीवावधि तस्य वश्या अर्थप्रदाः कामदुघा भवन्ति ।
आनीय निम्बद्रुदलानि तेषु स्वसाध्यनामानि विलिख्य मन्त्री ॥ १८ ॥
रक्तैश्च सम्यग् महिषाश्वजातैर्हुनेत्कटुस्नेहयुतै रहस्तैः ।
विशत्सहस्रं भवतीह तेन मर्त्यो हि विप्लुष्टतरः सदैव ॥ १९ ॥

अमुकममुकेन द्वेषयेति साध्यनामानि । रह इति परिच्छेदः ।

मर्त्यास्थितसंभूतमयं हि कीलमष्टांगुलं शावशिरोरुहैस्तम् ।
सम्वेष्ट्य सम्यग् वसुयुक् सहस्रं संजप्तमेनं कुलिकोदये च ॥ २० ॥

वसुयुक्सहस्रमष्टोत्तरसहस्रं । कुलिकोदयस्तु ज्योतिःशास्त्रे ।

शत्रोर्गृहे द्वारि खनेद्यथावत्सप्ताहतोऽसौ मृतिमेति मर्त्यः ।

कुलिकोदयस्तु––

"मन्वर्कदिग्वस्वृतुवेदपक्षैरर्कान्मुहूर्तः कुलिका भवेयुः
दिवा निरेकैरथ यामिनीषु ते गर्हिता कर्मसु शोभनेषु ॥"

इति । अर्कादर्कवारात् । मनु १४ अर्क १२ दिक् १० वसु ८ ऋतु ६ वेद ४ पक्षाः २ इति दिवा । रात्रौ तु निरेकैरेकहीनैरेभिर्मुहूर्तैः कुलिककालो ज्ञेयः । अयमर्थः–रात्रौ तु त्रयोदशैकादशनवसप्तपञ्चतृतीयप्रथममुहूर्ताः अर्कादिवारेषु यथाक्रमं कुलिककालो ज्ञेयः ।

मन्त्री बिलद्वारसमीपवर्ती जपेन्मनुं लक्षमितं यथा च ॥ २१ ॥
तस्याग्रतश्चाभिपतन्ति नागकन्या विलज्जाः खलु सत्त्वहीनाः ।
दिव्यानि सिद्धानि रसायनानि नानाप्रकारांश्च मणीन् प्रसिद्धान् ॥ २२ ॥
इष्टान्यनर्घ्याणि बहूनि सर्वास्ताः सम्प्रयच्छन्ति नचान्यथात्र ।
जपेद्गिरेर्मूर्धनि लक्षमेकं दृढव्रतश्चैकमना नितान्तम् ॥ २३ ॥
भवेद् ध्रुवं तस्य कृपाणसिद्धिः सुरासुरैरप्यभिकांक्षिता या ।
लज्जालुकासद्घनसारनन्द्यावर्तानि शुक्लां गिरिकर्णिकां च ॥ २४ ॥
अधःप्रसूनामथ मेलयित्वा संपिष्य जप्त्वा नियुतद्वयेन ।
एभिः शुभैरञ्जितलोचनो यो मर्त्यो निधानानि स पश्यतीह ॥ २५ ॥

लज्जालुका प्रसिद्धा । तस्या लक्षणं तु–"स्पर्शसंकुचत्पत्रत्वम् ।" घनसारः कर्पूरः । शुक्ला गिरिकर्णिका श्वेतापराजिता । अधःप्रसूना शङ्खपुष्पी, अधोमुखपुष्पवती ।

भवेद्गणेशाणुशताष्टजप्तश्रीखण्डलेपात् खलु दुःखनाशः ।
शताष्टजप्तेत्यष्टोत्तरशतमित्यर्थः । एवं सर्वत्र ।
लूतासविस्फोटकभूतकृत्याप्रेतोद्भवान् घोरतरांश्च ज्वरांश्च ॥ २६ ॥
मनोरथाद्यष्टसहस्रजापाद् विनाशयेन्मन्त्रवरस्त्ववश्यम् ।
विषद्वयं स्थावरजङ्गमं च ज्वरानथाष्टाविह शूलरोगान् ॥ २७ ॥
सुदारुणान्तान् गृहिणीं च रोगान् वातप्रभूतान् कफपित्तजातान् ।
गलग्रहादीनपि रोगसङ्घान् शताष्टजापेन विनाशयीत ॥ २८ ॥
लक्षैकजापेन मनोरथानां सिद्धिर्भवेदस्य हि पादुकायाः ।
मन्त्री ततो गच्छति दूरवर्त्म शतत्रयं योजनसंज्ञकानाम् ॥ २९ ॥
गुप्तप्रदेशे विजने मनोज्ञे विलेपिते गोमयतो विशुद्धे ।
स्नातः शुचिर्मन्त्रिवरो जितात्मा कुम्भं नवं चर्चितचन्दनार्द्रम् ॥ ३० ॥
संस्थाप्य नीरेण सुगन्धिना तं प्रपूरयेत्तत्र शरावमेकम् ।
कुम्भोपरिष्टात् कपिलाज्यपूर्णं विन्यस्य प्रज्वाल्य च दीपमेकम् ॥ ३१ ॥
प्रपूजयेच्चन्दनपुष्पधूपैः कुमारिकां चाथ कुमारकं च ।
आनीय संस्पृश्य जपेदिमं च मनुं तथाष्टाढ्यशतं मनुज्ञः ॥ ३२ ॥
भूतं भविष्यं किल वर्तमानं शुभाशुभं वा कथयेदवश्यम् ।
महागणेशं गदितस्वरूपं ध्यात्वा जपेद्रात्रिषु मन्त्रिवर्य्यः ॥ ३३ ॥
स्वप्ने गणेशः कथयत्यवश्यं शुभाशुभं नात्र विचारणीयम् ।
चन्द्रग्रहे वाथ रविग्रहे वा मन्त्रं जपेत्साधुजलाशयस्थः ॥ ३४ ॥
आकृष्टिरस्यात्र भवेत्सुसिद्धा धान्यादिकानां पशुयोषितां च ।
न्यग्रोधमूले ह्युपविश्य मन्त्री मन्त्रं जपेल्लक्षमिमं विधानात् ॥ ३५ ॥
सा यक्षिणी तस्य भवेत्सुसिद्धा अर्थादि कृष्ट्वा च ददाति नित्यम् ।
उपोष्य रात्रौ विधिवद्वचां समानीय यत्नात्प्रयतो नितान्तम् ॥ ३६ ॥
स्नात्वार्चयेदत्र महागणेशं स्पृष्ट्वायुतं तां प्रजपेच्च मन्त्रम् ।
कृत्वातिसूक्ष्मं किल चूर्णमस्याः कर्षान्मितं तत्कपिलाज्ययुक्तम् ॥ ३७ ॥
सम्प्राशयेत्प्रातरतीव शुद्धः कविर्भवत्येव हि सप्तरात्रात् ।
अत्रापि प्राग्वत् सप्तधा विभज्यैकैकं भागं प्रातःप्रातः सघृतं भक्षयेदिति ।
रसं समादाय च कामचारी रसेन संशोध्य च याममेकम् ॥ ३८ ॥
कार्पासपत्रोत्थरसेन तावत्प्रमर्द्य सम्यक् खलु मर्दयेच्च ।
कुमारिकापत्ररसेन तावत्ततो भवेद्रूप्यसमानवर्णः ॥ ३९ ॥
भागा मताः षोडश पारदस्य शुल्वस्य भागत्रितयं तथैव ।
भागत्रयं स्याद्गगनस्य चैकं हेम्नस्तथैकं किल लोहजातेः ॥ ४० ॥
एकत्र कृत्वा बहुधा प्रमर्द्य संस्थापयेत् सम्यगथारनाले ।
शिवालये शुद्धमनाश्च गत्वा मनुं जपेल्लक्षमिमं मनुज्ञः ॥ ४१ ॥
महागणेशस्य ततः प्रसादात्सिद्धा हि नूनं गुटिका भवेत्सा ।

रसं पारदम् । कामचारी आकाशवल्लीति प्रसिद्धा । शुल्वस्ताम्रम् । गगनं स्वगापाक्षिकमभ्रकमिति केचित् । आरनालं काञ्जिकः । अत्र ताम्रादिकं चूर्णीकृत्य मेलयितव्यम् ।

तां धारयेदानन एव मन्त्री सुदुर्जयः स्यात्सुरदानवाद्यैः ॥ ४२ ॥
समग्रभूतैश्च भवेदवध्यः शस्त्रास्त्रवृन्दैरपि भिद्यते नं ।
न दह्यते वह्निशतैश्च मर्त्यो विपद्भयेन म्रियते न वापि ॥ ४३ ॥
तस्याः प्रभावात्किल वज्रदेहो भवेद्गतिस्तस्य च खेचरी स्यात् ।
धरामदृश्यः सकलां च नष्टच्छायो हि भूत्वा विचरेदवश्यम् ॥ ४४ ॥
सदा च सा तिष्ठति यस्य गेहे लक्ष्मीः स्थिरा तस्य गृहे भवेच्च ।
सा दृष्टिबन्धं जगतः करोति महागणेशाणुवरप्रसादात् ॥ ४५ ॥
सब्रह्मदण्डीं वशिनीं गृहीत्वा पुष्यार्कवारेण ततोऽभियोज्य ।
वज्राभ्रकेणाथ पुनस्त्रिलोहैः संवेष्ट्य सम्यग्गुलिकां च कुर्यात् ॥ ४६ ॥
महागणेशं परिपूज्य मन्त्रजप्तां गणेशस्य कराच्च लब्धाम् ।
इत्थं विचिन्त्य स्वकरे नयेत्तां सिद्धां गणेशस्य मनुप्रभावात् ॥ ४७ ॥
वक्त्रे शिखायां च करेऽथ कण्ठे तां धारयेन्मन्त्रिवरः सदैव ।
तस्याः प्रभावान्न भवेत्समीपे व्याघ्रादिचौरोरगविघ्नवृन्दः ॥ ४८ ॥
क्षोणीभुजः स्युर्वशगास्तथास्य लोके भवेदेव हि कामचारी ।
स्त्रीणां प्रियोऽसौ मदनातुराणां भवेदवश्यं गुटिकाप्रसादात् ॥ ४९ ॥

ब्रह्मदण्डी भारङ्गी । वशिनी लज्जालुका । वज्राभ्रकोऽभ्रकविशेषः । त्रिलोहैः स्वर्णरजतताम्रैः ।

गोरोचनोन्मत्तसुशङ्खपुष्पे देवी सिता स्यादपराजिताह्वा ।
सब्रह्मदण्डी मलयोद्भवं च कृष्णागुरुः स्युः समभागकानि ॥ ५० ॥
संपिष्य सम्यक् च रवौ सपुष्ये कुर्याद् विधानाद् गुटिकां मनुज्ञः ।
कृत्वा च तामर्कसहस्रजप्तां विशेषकोऽस्या जनमोहकः स्यात् ॥ ५१ ॥

देवी सहदेवी । विशेषकस्तिलकः ॥

ग्राह्यामृता मन्त्रिवरेण दीर्घतुण्डा ततस्तां किल पेषयित्वा ।
तच्चूर्णमालिप्य करद्वयेन जपेन्मनुं ह्यष्टयुतं सहस्रम् ॥ ५२ ॥
प्रदर्शयेत्तौ गजसम्मुखं च दृष्ट्वा दिशस्ते दश विद्रवन्ति ।
मदोत्कटा दानजलार्द्रगण्डा ऐरावतस्यापि कुले प्रसूताः ॥ ५३ ॥
सुदीर्घदन्तद्वयरोचमाना गच्छन्ति दूरं विवशा भयार्ताः ।
वश्या भवेयुर्मनुवित्तमस्य ह्युक्तं च कुर्वन्ति न संशयोऽस्तिन् ॥ ५४ ॥

गजान् गृहीतुकामो वै राजा गत्वा वनेषु सः । ततश्च कारयेद्गूढां सम्यक् च गजबन्धनीम् ॥ ५५ ॥
चतुरस्रां विशालां च शालां तां निकटे ततः । दृढावरणसंवीतां चतुर्द्वारां सुतोरणाम् ॥ ५६ ॥
कुर्यात्तत्र स्थलीं सम्यक् चतुरस्रां समुन्नताम् । तस्यामुत्तरदिग्भागे विदध्यात्कुण्डमुत्तमम् ॥ ५७ ॥
सर्वलक्षणसंयुक्तं मेखलाद्यैरलंकृतम् । पूर्वादितः स्थलीमध्ये प्रोक्तलक्षणलक्षितम् ॥ ५८ ॥
मण्डलं कारयेत्तत्र समावाह्य गणेश्वरम् । सम्पूज्य च निवेद्यान्तैरुपचारैः सुशोभनैः ॥ ५९ ॥

मण्डलं सर्वतोभद्रम् ।

आधायाग्निं ततः कुण्डे स्वमन्त्रैः पूजयेच्च तम् । पुरोक्तैरेव जुहुयादाज्यैर्वारत्रयं ततः ॥ ६० ॥

हुनेत् समृद्धिमन्त्रेण नव मूलाणुनाहुतीः । ....॥

पुरोक्तैरेवेति दीक्षाप्रकरणोक्ताग्निमुखमन्त्रैः । समृद्धिमन्त्रः भूर्भुवःस्वरग्निर्जातवेदा इत्यादिको वक्ष्यमाणः ।

प्रणवः श्रीशक्तिमारभूविनायकबीजकैः । अनुबद्धैः क्रमादेभिस्त्रिविभक्तेन संहुनेत् ॥ ६१ ॥

पुरोक्तैः श्रीशक्तिमारविनायकबीजकैः । प्रणवेत्यादिना प्राग्दीक्षाप्रकरणे अग्निमुखीकरणहोमे महागणपतिमन्त्रस्य यो दशधा विभाग उक्तस्तत्रान्तिमपदद्वयमेकीकृत्य जुहुयात्, तेन नवधा होमो भवति इत्यर्थः । उक्तं तदाचार्य्यचरणैः—(प्र० सा०)

तारेण लक्ष्म्यद्रिसुतास्मरक्ष्माविघ्नेशबीजैः क्रमशोऽनुबद्धैः ।
पदत्रयेणापि च मन्त्रराजं विभज्य मन्त्री नवधा जुहोतु ॥ इति ।

मूलाणुना समस्तेन हुनेन्मन्त्रार्णसंख्यया । आज्येनैव ततश्चाष्टद्रव्यैः स्वादुविलोलितैः ॥ ६२ ॥
चत्वारिंशत्सहस्राणि चतुर्भिरधिकानि च । चतुश्शतं चतुश्चत्वारिंशद्भिः सहितं हुनेत् ॥ ६३ ॥
प्रत्यहं भोजयेद्विप्रांस्तदाशीर्भिर्विवर्धितः । गुरवे दक्षिणां दद्यात् पञ्चाशद्दन्तिनोऽथवा ॥ ६४ ॥
तन्मूल्यं तद्दशांशं वा दत्त्वा सन्तोष्य सद्गुरुम् । चतुर्णां मिथुनानां षड्गणेशनिधियुग्मयोः ॥ ६५ ॥
अङ्गमातृदिगीशानां तन्मन्त्रैः सर्पिषा हुनेत् । एवं होमं समाप्याथ नैवेद्यं च समुद्धरेत् ॥ ६६ ॥
पुनरभ्यर्च्य विघ्नेशं साङ्गं सावरणं ततः । निजे हृदि समुद्वास्य विहरेत् स यथासुखम् ॥ ६७ ॥
ततो दिनैश्चतुश्चत्वारिंशता निपतन्ति हि । विनायकप्रभावेन कलभाः करिणस्तथा ॥ ६८ ॥
करिणीनां समूहाश्च पात्यन्ते ह्यवटे ततः । प्रोक्तरूपं प्रोक्तकुण्डे गणेशं सम्यगर्चयेत् ॥ ६९ ॥

अवटे गर्ते ।

तत्र वह्निं समाधाय लक्षमेकं पृथग् हुनेत् । पयोघृताभ्यामुन्मत्तपुष्पैः शर्करयापि च ॥ ७० ॥
क्षौद्रेणान्नेन च ततो कुण्डलमध्यात् समुज्ज्वला । वेतालसंज्ञा गुटिका प्राप्यते मन्त्रिणा ततः ॥ ७१ ॥
अणिमाद्यष्टसिद्धीनां जायते भाजनं सुधीः । ....॥

अत्राप्येकैकद्रव्येण सप्तषष्टयुत्तरषट्शताधिकषोडसहस्रसंख्यो जपः कार्यः । अन्तिमद्रव्ये त्वाहुतिद्वयं न्यूनमिति ।

ब्राह्मे काले समुत्थाय क्षीणचन्द्रेऽथ पर्वणि । पद्मपत्रे कापिलं खे गोमयं प्रतिगृह्य च ॥ ७२ ॥
अयुतं मन्त्रसंजप्तं निखातं द्वारि वारयेत् । व्याघ्रक्रोडाहिचोरारीन् नात्र कार्या विचारणा ॥ ७३ ॥

क्षीणचन्द्रे पर्वणि अमावस्यायां । खे अन्तरिक्षे ।

जातौ सरक्ता महादिमोहा सदण्डिना स्यात्करयुग्ममेव ।
तथाद्रिकर्णी सशिखा च कन्या गोरोचनैतानि समानभागैः ॥ ७४ ॥

रक्ता मञ्जिष्ठा, महामोहा धत्तूरः, अद्रिकर्णी अपराजिता, शिखा मयूरशिखा, कन्या कुमारी, करयुग्ममञ्जलिनी ।

संपिष्य पञ्चाङ्गमलानि तानि कुर्यादथैकत्र ततो जपेच्च ।
स्पृष्ट्वैतदेनं मनुवर्य्यमष्टाधिकं सहस्रं भवतीह सिद्धम् ॥ ७५ ॥

पञ्चाङ्गमलानीति श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणोत्थानि ।

गजे प्रदेयं बदरप्रमाणं यवप्रमाणं तुरङ्गमे तत् ।
यवार्धमात्रं मनुजे प्रदेयं ततश्च तद्योषिति सर्षपार्धम् ॥ ७६ ॥
प्रभक्षितं पीतमथो हि वश्यकरं प्रशस्तं हि तथावशानाम् ।

जितेन्द्रियः शुद्धतनुर्मनुज्ञो जपेन्मनुं त्वष्टयुतं सहस्रम् ॥ ७७ ॥
हुनेद्दशांशं करवीरलाजान् कन्यां लभेदुत्तमवंशजां सः ।
पूर्वोक्तरूपं गणपं विचिन्त्य गन्धादिनाभ्यर्च्य जपेत मन्त्री ॥ ७८ ॥
मन्त्रं हि लक्षप्रमितं विमुक्तो भवेदकस्मान्निगडादिबन्धात् ।
बिल्वस्य पुष्पं तगरं प्रियंगुं सदेवदारुं हरिचन्दनं च ॥ ७९ ॥
तथागुरुं नागसुकेसरं च समानि कृत्वा मधुसाधितानि ।
स्पृष्ट्वा जपेत्तानि मनुं सहस्रमष्टाधिकं तैः खलु सिद्धधूपः ॥ ८० ॥
भवेदनेनाशु सुधूपितो ना विजित्य रोगान् किल दीर्घजीवी ।
प्राप्नोति चार्थं जुहुयाच्च कोऽपि भवेन्नरः सर्वजनप्रियश्च ॥ ८१ ॥
अनेन धूपेन च धूपिता स्त्री सुदुर्भगाऽथो सुभगा भवेच्च ।
कुमारिका धूपसुधूपिता च वरं लभेताशु कुलीनमग्र्यम् ।
जलाशये लक्षमिताऽगुजापः सप्ताहतो वृष्टिकरः प्रशस्तः ॥ ८२ ॥
स्वर्णाप्तौ मधुना च गव्यपयसा गोसिद्धये सर्पिषा
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना च सम्वृद्धये ।
अन्नै रत्नसमृद्धये च सतिलैर्द्रव्याप्तये तण्डुलै-
र्लाजाभिर्यशसे कुसुम्भकुसुमैरश्वारिजैर्वाससे ॥ ८३ ॥
पद्मैर्भूपतिमुत्पलैर्नृपवधूं तन्मन्त्रिणः कैरवै-
रश्वत्थादिसमिद्भिरास्यजमुखान् वर्णान् बधूः पिष्टजैः ।
पुत्तल्यादिभिरन्वहं स वशयेज् जुह्वन्ननावृष्टये
लोणैर्वृष्टिसमृद्धये च जुहुयान्मन्त्री पुनर्वेतसैः ॥ ८४ ॥

इति । अश्वत्थादीत्यादिशब्दैरुदुम्बरप्लक्षवटा गृह्यन्ते । पुत्तल्यादीत्यादिशब्देन पिष्टरचितवृक्षादयो गृह्यन्ते । तथा सारसंग्रहे—

"शार्ङ्गी शचीवल्लभसोत्तमाङ्गं सद्यान्तयुक्तं खलु भूमिबीजम्" ॥

इति पूर्वमूलयन्त्रोद्धारप्रकरणेऽनुद्धृतं भूमिबीजं समुद्धरति । शार्ङ्गः गकारः । शचिवल्लभो लकारः । उत्तमाङ्गो बिन्दुः । सद्यान्त औकारः । तथा—

षट्कोणे कमलापुटं प्रविलिखेत् तारं ससाध्यं ततः
कोणेष्वङ्गमनून् स्वरान् वसुदले (द्विद्विक्रमात् संलिखेत् ।
कामं द्वादशपत्रगं स्वरदले) ष्वालिख्य भूमेर्मनुं
पद्मे तत्त्वदले महागणमनोर्वर्णांश्च शिष्टांल्लिखेत् ॥ ८५ ॥
द्वात्रिंशद्दलपङ्कजे कखमुखाम् वर्णान् लिखेत् सान्तगान्
भूबिम्बं बहिरष्टवज्रविलसत्कोणस्थशक्रं लिखेत् ।
बाह्ये वारुणमण्डले परिवृतं तेनैव शक्त्यावृतं
रुद्धं तत्सृणिना महागणपतेर्यन्त्रं समुक्तं महत् ॥ ८६ ॥

षट्कोणेत्यादिमहदित्यन्तस्यायमर्थः—षट्कोणमध्ये श्रीबीजसम्पुटितं प्रणवं विलिख्य, तन्मध्ये साध्यनामालिख्य, षट्कोणेषु षडङ्गमन्त्रानालिख्य, बहिरष्टदलकमलं कृत्वा तद्दलेषु प्रागादिक्रमेण षोडश स्वरान् द्वन्द्वशो विलिख्य, तद्बहिर्द्वादशदलकमलं कृत्वा तद्दलेषु प्राग्वत् कामबीजं त्रिर्लिख्य, तद्बहिः षोडशपत्रेषु

भूबीजमालिख्य, तद्बहिश्चतुर्विंशतिदलेषु प्रणवश्रीकामभूबीजातिरिक्तानि मूलमन्त्राक्षराण्येकैकशो विन्यस्य, तद्बहिर्द्वात्रिंशद्दलेषु कादिसान्तान् मातृकावर्णान् सबिन्दुकानालिख्य, तद्बहिरष्टवज्रोपेतं चतुरस्रं कृत्वा तत्कोणेषु लमिति विलिख्य, तद्बहिरर्धचन्द्राकारं वारुणं मण्डलं विलिख्य वंबीजेन संवेष्ट्य, तद्बहिर्वृत्तद्वयं कृत्वा, वृत्तयोरन्तराले ह्लींबीजैरावेष्ट्याकुशबीजाभ्यां निरोधयेत्, निरोधनं त्वाद्यन्तयोर्लेखनम् । तथा—

भूर्जे धरायां वसने लिखेत्तत् गोरोचनाकुंकुमगोमयाद्भिः ।
कस्तूरिकाभिः सुधया च हेमरूप्योद्भवा स्यादिह लेखनी च ॥ ८७ ॥
यन्त्रं धृतं येन स दुर्जयः स्योल्लोकैरशेषैर्गणपप्रसादात् ।
न दह्यतेऽसौ दहनेन तस्य भीतिर्न च स्यान्नृपतस्करेभ्यः ॥ ८८ ॥
द्यूते रणे राजकुले च वादे सदा मनुज्ञो विजयी भवेच्च ।
अनामिकारक्तविमिश्रितैस्तत् शोणैर्लिखेद् द्रव्यवरैर्यथावत् ॥ ८९ ॥
कुचन्दनाद्यैररुणैश्च पुष्पैः सम्पूज्य तन्मन्त्रिवरो निवेद्यैः ।
कृत्वा मनोज्ञाङ्गवतीं च मूर्तिं विन्यस्य तस्या उदरे च यन्त्रम् ॥ ९० ॥
प्रतापयेद् दीपशिखाकृशानौ सप्ताहतो योषितमानयेत् सः ।
जप्त्वा मनुं चाष्टशतं प्रताप्य वह्नौ धृतं तद्वशयेन्मृगाक्षीम् ॥ ९१ ॥
स्वभावविद्वेषवतां हि रक्तैः श्मशानकाङ्गारयुतैर्लिखेत्तत् ।
शावांशुके लेखनिकात्र काकपक्षोत्थिता सम्यगथाभिपूज्य ॥ ९२ ॥
उच्चाटयेद्बद्धमिदं ध्वजाग्रे विद्वेषयत्येव हि वैरिसङ्घम् ।
द्रव्यैः सुपीतैर्विलिखेच्छिलायां पीतप्रसूनैः रुचिरार्कपुष्पैः ॥ ९३ ॥
सम्पूज्य संवेष्ट्य च पीतसूत्रैः साध्यानिलस्थापनमाचरेच्च ।
तद्देहलीदेश इदं निखातं करोन्मिते स्तम्भनकारि यन्त्रम् ॥ ९४ ॥
दुष्टस्य वाक्स्तम्भमरिव्रजस्य गतेस्तु संस्तम्भनमाशु कुर्यात् ।
सेनां परेषां गजवाजियुक्तां संस्तम्भयेन्नात्र विचारणीयम् ॥ ९५ ॥
श्मशानकाङ्गारखरोत्थमष्या श्मशानवस्त्रे कुपितेन मन्त्री ।
चित्तेन संलिख्य नरास्थिजात्र सल्लेखनी चन्दनपुष्पधूपैः ॥ ९६ ॥
सम्पूज्य तच्छावधरानिखातं स मारयेद्वैरिणमाशु नूनम् ।
उत्खातमेतत्पयसा च धौतं यन्त्रं हि शान्तिं तनुते नराणाम् ॥ ९७ ॥

इति । भूर्जेत्यादि, सुधया चूर्णेन । मूर्तिर्देवस्य । साध्यानिलस्थापनं साध्यप्राणप्रतिष्ठा । करोन्मिते हस्तमात्राधस्तात् । शावधरा श्मशानभूमिः ॥ तथा—

आलिख्याग्निपुरे सतारविवरे बीजं बहिर्दिक्ष्वथ
श्रीमायामदनं भुवं गृहयुगे बीजानि वह्नेस्ततः ।
सन्धिष्वङ्गमनूनथाष्टदलके वर्णान् मनोरालिखेत्
त्रींस्त्रीनन्त्यदले क्रमेण विधिवच्छिष्टं तथैकं कृती ॥ ९८ ॥

वेष्टितं मातृकावर्णैः क्रमोत्क्रमगतैरपि । पाशांकुशावृतं बाह्ये भूगेहद्वितयेन च ॥ ९९ ॥
महागणपतेर्यन्त्रं कृतं हेमशलाकया । अलक्तकं च काश्मीरं कस्तूरीरोचनान्वितम् ॥ १०० ॥
मेलयित्वा विभागेन पिष्ट्वा चन्दनवारिणा । स्वर्णपट्टेऽथ भूर्जे वा लिखितं विधिपूर्वकम् ॥ १०१ ॥
कृतप्राणप्रतिष्ठं तद् दोर्धृतं भुक्तिमुक्तिदम् । आयुरारोग्यसम्पत्तिकीर्तिदं प्रीतिवर्धनम् ॥ १०२ ॥

इति । अयमर्थः—षट्कोणमध्ये त्रिकोणमालिख्य त्रिकोणमध्ये प्रणवमध्यगतं ससाध्यं गंबीजमालिख्य, त्रिकोणषट्कोणयोरन्तराले पूर्वादिचतुर्दिक्षु श्रींह्रींक्लींग्लौं इति बीजचतुष्टयमेकैकशो विलिख्य, षट्कोणेषु पूर्वादिक्रमेण प्रणवादिषट्बीजान्यालिख्याष्टदलेषु गणपतये इत्याद्यवशिष्टमन्त्रगतद्वाविंशतिवर्णेषु त्रींस्त्रीन् वर्णान् सप्तदलेषु विलिख्यावशिष्टमेकमक्षरमष्टमदले विलिख्य, बहिर्वृत्तपञ्चकं विधाय तदन्तर्गतवीथीचतुष्टये सर्वाभ्यन्तरवीथ्यां सबिन्दूनकारादिक्षकारान्तान् वर्णानालिख्य, द्वितीयवीथ्यां क्षकाराद्यकारान्तान् वर्णान् विलिख्य, तृतीयवीथ्यां आं इति पाशबीजैरावेष्टच, सर्वबाह्यवीथ्यां क्रों इत्यंकुशबीजैरावेष्टच, तद्बहिश्चतुरस्रद्वयं कुर्यात् । एतद्यन्त्रमुक्तफलदं भवति । अत्र चतुरस्रद्वयवेष्टनं बाह्याभ्यन्तरभेदेनेति केचित् । अष्टकोणरूपेणेत्यन्ये । यथागुरूपदेशं कार्यमिति ॥ केरलीये यन्त्रसारे—

आलिख्य कर्णिकामध्ये शक्ति कोणेषु षट्स्वपि । तारश्रीशक्तिकामेलाविघ्नबीजानि तद्बहिः ॥ १ ॥
आलिख्य चाष्टपत्रस्य पद्मस्य प्रथमे दले । कएइत्यादि वाग्बीजं द्वितीये च दले ततः ॥ २ ॥
यदद्येत्याद्यृचो वर्णानष्टौ पत्रे तृतीयके । कामबीजं हसेत्यादि पत्रे भूयश्चतुर्थके ॥ ३ ॥
उदगा इत्यष्टवर्णानालिख्याथ च पञ्चमे । सकलेत्यादि शाक्तं च बीजं षष्ठे दले पुनः ॥ ४ ॥
सर्वं तदिन्द्र तेत्यादिवर्णानष्टौ च सप्तमे । पत्रे गणपतेत्यादिनववर्णान् दलेऽष्टमे ॥ ५ ॥
सर्वेत्यादिद्वादशार्णांस्तद्बाह्ये मातृकाक्षरैः । संवेष्ट्य कुगृहाश्लिष्टैः श्रींह्रींक्लींग्लौंमिति क्रमात् ॥ ६ ॥
आलिखेद्धेमपट्टादौ हेमसूच्यातिरञ्जनम् । ....॥

इति । रञ्जनं वश्यकरम् । अस्यार्थः—अष्टदलकमलकर्णिकायां षट्कोणमध्ये ससाध्यं शक्तिबीजं विलिख्य, षट्स्वपि कोणेषु ॐश्रींह्रींक्लींग्लौंगं इत्येकैकशो विलिख्य अष्टदलेषु प्रथमदले श्रीविद्यायाः प्रथमकूटं, द्वितीयदले "यदद्यकं च वृत्रहन्" इति विलिख्य, तृतीयदले श्रीविद्याया द्वितीयकूटं, चतुर्थदले "उदगा अभिसूर्य" इति विलिख्य, पञ्चमे दले श्रीविद्यायास्तार्तीय कूटं, षष्ठे दले "सर्वं तदिन्द्र ते वशे" इति, सप्तमे दले "गणपतये वरवरदेति" अष्टमे "सर्वजनं मे वशमानय स्वाहा" इति विलिख्य, तद्बहिर्वृत्तयोरन्तराले मातृकाक्षरैरावेष्टच चतुरस्रचतुष्कोणेषु च महागणपतिमन्त्रस्य द्वितीयबीजादिबीजचतुष्टयं विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति । इदं यदद्येत्यादिऋचा श्रीविद्यया च सहितं महागणपतियन्त्रम् ॥ श्रीविद्या तु ज्ञानार्णवे—

सकला भुवनेशानी कामेशीबीजमुत्तमम् । अनेन सकला विद्याः कथयामि तवानघे ॥ १ ॥
शक्त्यन्तस्तुर्यवर्णोऽयं कलामध्ये सुलोचने । वाग्भवं पञ्चवर्णं तु कामराजमथोच्यते ॥ २ ॥
मादनं शिवचन्द्राद्यं शिवान्तं मीनलोचने । कामराजमिदं भद्रे षड्वर्णं सर्वमोहनम् ॥ ३ ॥
शक्तिबीजं वरारोहे चन्द्राद्यं सर्वसिद्धिदम् । ....॥

इति । शक्तिः एकारस्तस्यान्ते अधः तुर्यवर्णं ई, सकला भुवनेशानीत्यस्य कलाभ्यां सह वर्तमाना भुवनेशानीत्यर्थत्वात्तयोर्मध्ये एईइति वर्णद्वये दत्ते कामराजविद्यायाः प्रथमकूटं भवति । मादनं सकलेत्येतत्सम्बन्धात्ककारः शिवचन्द्रौ हसौ आद्यौ यस्य तत् । शिवो हकारोऽन्ते यस्य तत्, चन्द्रः सकार आद्यो यस्य तत् । एतत्सपर्या यथायोग्या प्रागुक्तविधिनावगन्तव्या ॥ श्रीयन्त्रसारे—

कर्णिकायां साध्यगर्भं तारं पत्रेषु चाष्टसु । अग्न्यक्ष्यग्न्यग्निजलधित्रीणि त्रिद्व्यक्षराणि च ॥ १ ॥
आलिख्य मातृकावर्णैर्भूपुरेण च वेष्टयेत् । यदद्यकेत्यृचो यन्त्रं वश्यसौभाग्यकान्तिदम् ॥ २ ॥
सुवर्णरत्नधान्यादिसर्वसम्पत्करं परम् । ....॥

इति ॥ अस्यार्थः—अष्टदलकर्णिकामध्ये ससाध्यं तारं विलिख्य, तद्दलेषु त्रिद्वित्रित्रिचतुस्त्रित्रिद्विक्रमेण "यदद्यकं च" त्यृचो वर्णान् विभज्य विलिख्य, तद्बहिर्वृत्तयोरन्तराले मातृकार्णैरावेष्टच बहिश्चतुरस्रेण वेष्टयेत् । एतद्यन्त्रमुक्तफलदं भवति । ऋक् तु महागणपतेर्यन्त्रे लिखिता, ऋच ऋष्यादयः सकक्ष इन्द्रो

गायत्रीति ॥ श्रीयन्त्रसारे—

षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि । ॐश्रींह्रींक्लींग्लौंगमिति गणपतये च तद्बहिः ॥ १ ॥
शिष्टांश्चतुष्पञ्चसप्तवर्णाश्चापि चतुर्दले । बाह्ये सम्वादसूक्तस्याप्यर्धमर्धमृचां क्रमात् ॥ २ ॥
आलिख्य चाष्टपत्रेषु त्रिष्टुभावेष्ट्य तद्बहिः । मातृकार्णैश्च भूबिम्बकोणेषु च यथाक्रमम् ॥ ३ ॥
आलिखेद्भद्र इत्यादि पादमन्त्रचतुष्टयम् । एतत्संवादसूक्तस्य यन्त्रं लोकेषु दुर्लभम् ॥ ४ ॥
सङ्घातभेदेऽमात्यानां मैत्रीकरणमुत्तमम् । जगत्संमोहनं वश्यं कान्तिसौभाग्यपुष्टिदम् ॥ ५ ॥

इति । अस्यार्थः—चतुर्दलकमलकर्णिकायां षट्कोणमध्ये ससाध्यं प्रणवं विलिख्य, तत्कोणेषु प्रोक्तबीजषट्कमालिख्य, चतुर्दलेषु प्रथमे "गणपतये" इति, द्वितीये "वरवरद" इति, तृतीये 'सर्वजनं मे" इति, चतुर्थे "वशमानय स्वाहा" इति विलिख्य, तद्बहिरष्टदलेषु वक्ष्यमाणसम्वादसूक्तस्य ऋचामर्धमर्धं विलिख्य, तद्बहिर्वृत्तत्रयात्तःस्थान्तरालद्वयस्याभ्यन्तरान्तराले वक्ष्यमाणत्रिष्टुभावेष्टच, बहिःस्थान्तराले मातृकार्णैरावेष्टय, तद्बहिश्चतुरस्रकोणेषु "भद्रं नो अभिवातय नमः, मरुतामोजसे स्वाहा, इन्द्रो विश्वस्य राजति, शन्नो भव द्विपदे शं चतुष्पदे" इति पादमन्त्रचतुष्टयं लिखेत् । एतदुक्तफलदं भवति ॥

सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्या भर ॥ १ ॥
सं गच्छध्वं सं वदध्वं सं वो मनांसि जानतां । देवा भागं यथा पूर्वे संजानाना उपासते ॥ २ ॥

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषां ।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥ ३ ॥

समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति ॥ ४ ॥

इति ऋग्वेदोक्तं (१०।१९१।१) सम्वादसूक्तम् । ॐजातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ इति त्रिष्टुप्मन्त्रः । संसमिदित्यस्य संवनन ऋषिः, संज्ञानं देवता, तिस्रोऽनुष्टुभः, तृतीया त्रिष्टुप्, आद्या आग्नेयी ॥ सारसंग्रहे—

ध्यानं प्रवक्ष्ये ह्यथ कामनाया भेदेन भिन्नं बहुधातिरम्यम् ।
भिन्नाञ्जनाद्रिप्रभदेहकान्ति सुमेरुसन्मन्दरतुल्यसारम् ॥ १ ॥
नानामणिव्रातविभूषिताङ्गं रत्नोल्लसद्दिव्यकिरीटयुक्तम् ।
भीमं महान्तं नयनत्रयाढ्यं कर्णद्वयोल्लासिसुचामरं च ॥ २ ॥
लम्बोष्ठमुद्यद्वरनागयज्ञोपवीतिनं चैकरदं गजास्यम् ।
सत्काञ्चनोद्यत्कटिसूत्रयुक्तं रक्तांशुकं लोहितपुष्पभूषम् ॥ ३ ॥
पद्मांकुशौ पाशरदे च शक्ति गदां वरं चाब्जमथेक्षुदण्डम् ।
शालेस्तथाग्रं दधतं कराग्रे पद्मासनस्थं हृदि भावयेत्तम् ॥ ४ ॥
बाणं तथैवाक्षयबाणधन्वकमण्डलून् मोदकपात्रशक्ती ।
सत्तोमरं पाशमथेक्षुदण्डं सृणि कराब्जैर्दधतं भजेत्तम् ॥ ५ ॥
सदाखिलोपद्रवनाशकारि ध्यानं गणेशस्य समीरितं हि ।
पीतं स्मरेत् स्तम्भनकार्य एनं वश्याय मन्त्री ह्यरुणं स्मरेत्तम् ॥ ६ ॥
कृष्णं स्मरेन्मारणकर्मणीशमुच्चाटने धूम्रनिभं स्मरेत्तम् ।
बन्धूकसूनाभनिभं च कृष्टौ स्मरेद्बलार्थं किल पुष्टिकार्ये ॥ ७ ॥
स्मरेद्धनार्थी च हरिन्निभं तं भुक्त्यै च शुक्तं मनुवित् स्मरेत्तम् ।
एवं प्रकारेण गणं त्रिकालं ध्यायञ्जपन् सिद्धियुतो भवेत् सः ॥ ८ ॥

इति ॥ अथ काम्यतर्पणविधिस्तत्रैव--

पूर्वं मनुं विंशतिधा गणेशं प्रतर्प्य वर्णानिह ठद्वयान्तान् ।
प्रतर्पयेद्वारचतुष्टयं च प्रत्येकशो मूलमनुं च तद्वत् ॥ १ ॥
युग्मानि विघ्नान् निधिसंयुतान् षट् प्रतर्पयेच्छक्तियुतान् पृथक् च ।
पुरोक्तवन्मूलममुं चतुर्धा प्रतर्पयेन्मन्त्रिवरो यथावत् ॥ २ ॥

यथावदित्यनेन मिथुनचतुष्टयषड्गणेशनिधिद्वयानां स्वस्वबीजादित्वं सूचितम् । तदुक्तं गणेश्वरपरामर्शिन्याम्--

मिथुनानि च षड् विघ्नाश्च शङ्खपद्मनिधी अपि । स्वस्वबीजादिकैर्मन्त्री स्वाहान्तैश्च चतुर्विधैः ॥ १ ॥

इति । तथा--

सचतुश्चत्वारिंशच्चतुःशतानि तर्पणानि चैवं स्युः
अथवा प्रकारभेदात् तर्पणमेतत् प्रवक्ष्येऽहम् ॥ २ ॥

मूलाणुना च दशधा विभक्तेनाथ तर्पयेत् । प्रत्येकं मूलमन्त्रेण चतुरावृत्ति तर्पयेत् ॥ ३ ॥
तत्र ताररमामायामारभूविघ्नबीजकैः । शरेषुदशयुग्मैश्च मन्त्रार्णैस्तर्पयेत्क्रमात् ॥ ४ ॥

शराः पञ्च, इषवः पञ्च, युग्मं द्वयम् ।

अशीतिप्रमितान्येव तर्पणानि भवन्ति च । एकादशभिरप्यत्र बीजपूरादिभिः क्रमात् ॥ ५ ॥
कलशान्तैश्चतुर्धा च मूलेनापि तथा सुधीः । विघ्नभूमारमायाश्रीबीजानि व्युत्क्रमाणि च ॥ ६ ॥
समस्तान्येतदन्तैश्च बीजपूरैः प्रतर्पयेत् । अष्टाशीतिमितान्येवं जायन्ते तर्पणान्यथ ॥ ७ ॥

अत्र बीजपूरादिमन्त्रेषु विशेषमाह, गणेश्वरपरामर्शिन्यां--

बीजपूरं गदा चेक्षुकार्मुकं च त्रिशूलयुक् । चक्राब्जपाशोत्पलानि कमलाग्रविषाणयुक् ॥ १ ॥
ङेन्ताश्च रत्नकलशो हृदन्ताः प्रणवादिकाः । गंबीजाद्यादिकाः पञ्च श्रीबीजाद्यादिकाः पुनः ॥ २ ॥
षड्बीजाद्योऽन्तिमश्चैते वक्ष्यमाणपदादिकाः । यथाक्रमं महाविघ्नायुधानां मनवः स्मृताः ॥ ३ ॥
मन्त्रफलं स्याच्छक्तिः सप्राणत्रिगुणकालचक्रमिति ।
व्याप्तिरक्ते भूस्वरूपं विद्या त्रैलोक्यमात्मने--युक्तम् ॥ ४ ॥

गंॐमन्त्रफलात्मने बीजपूराय नमः इत्याद्याः प्रयोगे प्रदर्शयितव्याः ।

षड्बीजाद्यैर्गणपतेत्यादिमन्त्रादिकैः क्रमात् । दशविघ्नैश्चतुर्वारं मूलेनापि च तर्पयेत् ॥ ५ ॥
विघ्नो विनायको वीरः शूरो वरद एव च । एभवक्त्रश्चैकदन्तो लम्बोदरगणस्तथा ॥ ६ ॥
क्षिप्रप्रसादनश्चैव महागणपतिस्तथा । तर्पणानि तथाशीतिमितान्येव भवन्ति हि ॥ ७ ॥
चत्वारि मिथुनान्यत्र तानि शक्त्यादिकानि च । स्वविनायकबीजादिकानि सन्तर्प्य मन्त्रवित् ॥ ८ ॥
मूलाणुना चतुर्वारं मध्ये सन्तर्पयेत्क्रमात् । चतुष्षष्टिमितान्येवं जायन्ते तर्पणान्यथ ॥ ९ ॥
आमोदादीन् स्वशक्त्यन्तान् शक्त्याद्यांश्च प्रतर्पयेत् । विघ्नेशबीजप्रथमं चतुर्मूलाणुना चतुः ॥ १० ॥
तर्पयेत् षण्वत्येवं तर्पणानि भवन्त्यथ । शक्त्यादिकान् स्वशक्त्यन्तनिधिद्वयमथो चतुः ॥ ११ ॥
तर्पयेच्च चतुर्मूलं द्वात्रिंशत्प्रमितानि च । तर्पणानि भवन्त्येवं ततो मूलाणुना चतुः ॥ १२ ॥
तर्पयेत् सचतुश्चत्वारिंशच्चाथ चतुःशतम् । तर्पणानि भवन्त्येभिः सर्वान् कामान् प्रसाधयेत् ॥ १३ ॥

इति ॥ अथ तर्पणप्रयोगः--तत्र प्रथमं श्रीगणेश्वरपरामर्शिन्युक्तपरिपाट्या तर्पणस्थाने तत्र देवं च ध्यात्वा तर्पणारम्भं कुर्यात् । तद्यथा--

सर्वाभीष्टप्रदं वक्ष्ये चतुरावृत्ति तर्पणम् । एकान्ते विजने रम्ये सर्वोपद्रववर्जिते ॥ १ ॥

कृतस्नानादिको मन्त्री पूर्ववन्न्याससंयुतः। तडागमध्ये सञ्चिन्त्य पुष्पितं नलिनीवनम् ॥ २ ॥
तस्य मध्ये महापद्मं तरुणादित्यसन्निभम्। समुन्नतं सुगन्धाढ्यं रमणीयं मनोहरम् ॥ ३ ॥
सद्यो विकसितं ध्यायेन्मन्त्री पूर्वोक्तमन्त्रवित्। शुद्धं रजतसोपानपंक्त्या तं रविमण्डलात् ॥ ४ ॥
विनिर्गत्यावरुह्याथ कर्णिकामध्यसंस्थितम्। इति ध्यात्वा सावरणं महागणपतिं सुधीः ॥ ५ ॥
प्रवरैर्गन्धकुसुमैः समभ्यर्च्याथ पूर्ववत्। निधाय पुष्करमुखं साधकेन्द्रस्य मूर्धनि ॥ ६ ॥
वर्षन्तं रत्नधाराभिर्ध्यात्वा देवस्य मूर्धनि। चन्द्रचन्दनकाश्मीरकस्तूरीलोलितैर्जलैः ॥ ७ ॥
तर्पयेत् परया भक्त्या देवदेवं प्रसन्नधीः। ....॥

इत्येवं ध्यायन् मूलमन्त्रमुच्चार्य्य "श्रीमहागणपतिं तर्पयामि" इति देवस्य मूर्ध्नि विंशतिवारं सन्तर्प्य, ४ मू० ४ ॐ तर्पयामि स्वाहा। ४ मू० ४ श्रीं तर्पयामि स्वाहा। ४ मू० ४ ह्रीं तर्पयामि स्वाहा। ४ मू० ४ क्लीं तर्पयामि०। ४ मू० ४ ग्लौं तर्पयामि०। ४ मू० ४ गं तर्पयामि०। ४ मू० ४ गं तर्पयामि०। ४ मू० ४ णं तर्पयामि०। ४ मू० ४ पं तर्पयामि०। ४ मू० ४ तं तर्पयामि०। ४ मू० ४ यें तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ रं तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ रं तर्पयामि०। ४ मू० ४ दं तर्पयामि०। ४ मू० ४ सं तर्पयामि नमः। ४ मू० ४ वँ तर्पयामि नमः। ४ मू० ४ जं तर्पयामि०। ४ मू० ४ नं तर्पयामि०। ४ मू० ४ में तर्पयामि०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ शं तर्पयामि०। ४ मू० ४ मां तर्पयामि०। ४ मू० ४ नं तर्पयामि०। ४ मू० ४ यं तर्पयामि०। ४ मू० ४ स्वां तर्पयामि०। ४ मू० ४ हां तर्पयामि स्वाहा॥ ४ मू० ४ श्रीं नारायणसहितां लक्ष्मीं तर्पयामि स्वाहा। ४ मू० ४ श्रीं लक्ष्मीसहितं नारायणं तर्पयामि०। ४ मू० ४ ह्रीं हरसहितां गौरीं तर्पयामि०। ४ मू० ४ ह्रीं गौरीसहितं हरं तर्पयामि०। ४ मू० ४ क्लीं कामदेवसहितां रतिं तर्पयामि०। ४ मू० ४ क्लीं रतिसहितं कामदेवं तर्पयामि०। ४ मू० ४ ग्लौं वराहसहितां महीं तर्पयामि०। ४ मू० ४ ग्लौं महीसहितं वराहं तर्पयामि०। ४ मू० ४ गं आमोदसहितां सिद्धिं तर्पयामि०। ४ मू० ४ गं सिद्धिसहितं आमोदं तर्पयामि०। ४ मू४ ४ गं प्रमोदसहितां समृद्धिं तर्पयामि०। ४ मू० ४ गं समृद्धिसहितं प्रमोदं तर्पयामि०। ४ मू० ४ गं सुमुखसहितां कान्तिं तर्पयामि०। ४ मू० ४ गं कान्तिसहितं सुमुखं तर्पयामि०। ४ मू० ४ गं दुर्मुखसहितां मदनावतीं तर्पयामि०। ४ मू० ४ गं मदनावतीसहितं दुर्मुखं तर्पयामि०। ४ मू० ४ गं विघ्नसहितां मदद्रवां तर्पयामि०। ४ मू० ४ गं मदद्रवा-सहितं विघ्नं तर्पयामि०। ४ मू० ४ गं विघ्नकर्तृसहितां द्राविणीं तर्पयामि०। ४ मू० ४ गं द्राविणीसहितं विघ्नकर्तारं तर्पयामि०। ४ मू० ४ शं शङ्खनिधिसहितां वसुधारां तर्पयामि०। ४ मू० ४ शं वसुधारासहितं शङ्खनिधिं तर्पयामि०। ४ मू० ४ पं पद्मनिधिसहितां वसुमतीं तर्पयामि०। ४ मू० ४ पं वसुमतीसहितं पद्मनिधिं तर्पयामि स्वाहा॥ ४ मू० ४ ॐ तर्पयामि स्वाहा। ४ मू० ४ श्रीं तर्प०। ४ मू० ४ ह्रीं तर्प०। ४ मू० ४ क्लीं तर्प०। ४ मू० ४ ग्लौं तर्प०। ४ मू० ४ गं तर्प०। ४ मू० ४ गं तर्प०। ४ मू० ४ णं तर्प०। ४ मू० ४ पं तर्पयामि०। ४ मू० ४ तं तर्प०। ४ मू० ४ यें तर्प०। ४ मू० ४ वं तर्प०। ४ मू० ४ रं तर्प०। ४ मू० ४ वं तर्प०। ४ मू० ४ रं तर्प०। ४ मू० ४ दं तर्प०। ४ मू० ४ सं तर्प०। ४ मू० ४ वँ तर्प०। ४ मू० ४ जं तर्प०। ४ मू० ४ नं तर्प०। ४ मू० ४ में तर्प०। ४ मू० ४ वं तर्पयामि०। ४ मू० ४ शं तर्प०। ४ मू० ४ मां तर्प०। ४ मू० ४ नं तर्प०। ४ मू० ४ यं तर्प०। ४ मू० ४ स्वां तर्प०। ४ मू० ४ हां तर्पयामि स्वाहा। एवं ८०॥ ४ मू० ४ गंॐ मन्त्रफलात्मने बीजपूराय नमः बीजपूरं तर्पयामि स्वाहा। ४ मू० ४ ग्लौंॐ शक्त्यात्मने गदायै नमो गदां तर्प०। ४ मू० ४ क्लींॐ प्राणात्मने इक्षुकार्मुकाय नमः इक्षुकार्मुकं तर्पया०। ४ मू० ४ ह्रींॐ त्रिगुणात्मने त्रिशूलाय नमः त्रिशूलं तर्प०। ४ मू० ४ श्रींॐ कालात्मने चक्राय

नमः चक्रं तर्प० । ४ मू० ४ श्रीं ॐ चक्रात्मने अब्जाय नमः अब्जं तर्प० । ४ मू० ४ ह्रीं ॐ व्याप्त्यात्मने पाशाय नमः पाशं तर्प० । ४ मू० ४ क्लीं ॐ रक्तात्मने उत्पलाय नमः उत्पलं तर्प० । ४ मू० ४ ग्लौं ॐ भुवनात्मने कलमाग्राय नमः कलमाग्रं तर्प० । ४ मू० ४ गं ॐ विद्यात्मने विषाणाय नमः विषाणं तर्प० । ४ मू० ४ ॐश्रींह्रींक्लींग्लौंगं ॐत्रैलोक्यात्मने रत्नकलशाय नमो रत्नकलशं तर्प० । एवं ८८ ॥ ४ मू० ४ ॐश्रींह्रींक्लीं- ग्लौंगं विघ्नगणपतये वरवरद इत्यादि० । ४ मू० ४ ६ँ विनायकगणपतये इत्यादि० । ४ मू० ४ ६ँ वीरगण- पतये इत्यादि० । ४ मू० ४ ६ँ शूरगणपतये इत्यादि० । ४ मू० ४ ६ँ वरदगणपतये इत्यादि० । ४ मू० ४ ६ इभवक्त्रगणपतये इत्यादि० । ४ मू० ४ ६ँ एकदन्तगणपतये इत्यादि० । ४ मू० ४ ६ँ लम्बोदरगणपतये इत्यादि० । ४ मू० ४ ६ँ क्षिप्रप्रसादगणपतये इत्यादि० । ४ मू० ४ ६ँ महागणपतिगणपतये इत्यादि० । एवं ८० ॥ ४ मू० ४ श्रींगं लक्ष्मीसहितं नारायणं तर्पयामि० । ४ मू० ४ गंश्रीं नारायणसहितां लक्ष्मीं त० । ४ मू० ४ ह्रींगं गौरीसहितं हरं त० । ४ मू० ४ गंह्रीं हरसहितां गौरीं तर्प० । ४ मू० ४ क्लींगं रतिसहितं कामं तर्प० । ४ मू० ४ गंक्लीं कामसहितां रतिं तर्प० । ४ मू० ४ ग्लौंगं महीसहितं वराहं तर्प० । ४ मू० ४ गंक्लीं वराहसहितां महीं तर्प० । एवं ६४ ॥ ४ मू० ४ श्रींगं सिद्धिसहितमामोदं तर्पयामि० । ४ मू० ४ गंश्रीं आमोदसहितां सिद्धिं तर्प० । ४ मू० ४ श्रींगं समृद्धिसहितं प्रमोदं तर्प० । ४ मू० ४ गंश्रीं प्रमोदसहितां समृद्धिं तर्प० । ४ मू० ४ श्रींगं कान्तिसहितं सुमुखं तर्प० । ४ मू० ४ गंश्रीं सुमुखसहितां कान्तिं तर्प० । ४ मू० ४ क्लींगं मदनावतीसहितं दुर्मुखं तर्प० । ४ मू० ४ गंक्लीं दुर्मुखसहितां मदनावतीं तर्प० । ४ मू० ४ क्लींगं मदद्रवासहितं विघ्नं तर्प० । ४ मू० ४ गंक्लीं विघ्नसहितां मदद्रवां तर्प० । ४ मू० ४ क्लींगं द्राविणी- सहितं विघ्नकर्तारं तर्प० । ४ मू० ४ गंक्लीं विघ्नकर्तृसहितां द्राविणीं तर्प० । एवं ९६ ॥ ४ मू० ४ ह्रींगं वसुधारासहितं शङ्खनिधिं तर्पयामि० । ४ मू० ४ गंह्रीं शङ्खनिधिसहितां वसुधारां तर्प० । ४ मू० ४ ग्लौंगं वसुमतीसहितं पद्मनिधिं तर्प० । ४ मू० ४ गंग्लौं पद्मनिधिसहितां वसुमतीं तर्प० । एवं ३२ ॥ ततः ४ मू० ४ । एवं सम्भूय ४४४ ॥ प्रकारान्तरं तु गणेश्वरपरामर्शिन्याम्—

प्रथमं मूलमन्त्रेण चतुर्वारं प्रतर्प्य च । मिथुनानि च षड् विघ्नान् शङ्खपद्मनिधी अपि ॥ १ ॥
स्वस्वबीजादिकैर्मन्त्री स्वाहान्तैश्च चतुश्चतुः । मूलमन्त्रं चतुर्वारं पूर्ववत् तर्पयेत्पृथक् ॥ २ ॥
सम्भूयाष्टोत्तरशतं कनिष्ठः स्यादयं क्रमः । अथवा मूलमन्त्राद्यैस्तैस्तैरेतैश्च पूर्ववत् ॥ ३ ॥
मन्त्रैर्वा तर्पयेद्विद्वानर्चनोक्तविधानतः । मध्यक्रमोऽयं सम्भूय द्विशतं षोडशोत्तरम् ॥ ४ ॥
अथवा मूलमन्त्रेण चतुर्वारं प्रतर्प्य च । पूर्वमन्त्राक्षरैर्मन्त्रैः स्वाहान्तैश्च चतुश्चतुः ॥ ५ ॥
मूलमन्त्रचतुर्वारपूर्वकं सम्प्रतर्प्य च । मिथुनादींस्ततः पश्चात्पूर्ववत् सम्प्रतर्पयेत् ॥ ६ ॥
भवेत् सम्भूय सचतुश्चत्वारिंशच्चतुश्शतम् । एवं ज्येष्ठक्रमः प्रोक्तो बुधैरागमपारगैः ॥ ७ ॥
एवं सन्तोष्य तत्पश्चात् पूर्ववत् सोपचारकैः । सर्वाभीष्टं च सम्प्रार्थ्य प्रणम्योद्वासयेत्सुधीः ॥ ८ ॥
य एवं तर्पयेन्नित्यं मण्डलात् स फलं लभेत् । अनावृष्ट्यां भये घोरे राजचोराद्युपद्रवे ॥ ९ ॥
महत्तरे विवादे च महादारिद्र्यसंकटे । विवाहादिषु कार्येषु सर्वेषु च विशेषतः ॥ १० ॥
एवं वै तर्पणं कुर्यात् मानवेन्द्रः प्रसन्नधीः । महागणेश्वरः प्रीतो महासम्पत्करो भवेत् ॥ ११ ॥

इति ॥ अथ प्रयोगः—४ मू० ४ महागणपतिं तर्पयामि स्वाहा । ४ मू० ४ पुष्टिं तर्प० । ४ मू० ४ श्रीं लक्ष्मीनारायणौ तर्प० । ४ मू० ४ ह्रीं गौरीहरौ तर्प० । ४ मू० ४ क्लीं रतिकन्दर्पौ तर्पया० । ४ मू० ४ ग्लौं महीवराहौ तर्पयामि० । ४ मू० ४ गं लक्ष्मीगणनायकौ तर्प० । ४ मू० ४ गं आमोदसिद्धी तर्प० । ४ मू० ४ गं प्रमोदसमृद्धी तर्प० । ४ मू० ४ गं सुमुखकान्ती तर्प० । ४ मू० ४ गं दुर्मुखमदनावत्यौ तर्प० । ४ मू० ४ गं विघ्नमदद्रवे तर्प० । ४ मू० ४ गं विघ्नकर्तृद्राविण्यौ० । ४ मू० ४ गं शङ्खनिधिवसुधारे० । ४ मू०

४ पं पद्मनिधिवसुमत्यौ तर्प० । ४ मू० ४ । एवं १२४ ॥ इत्ययं कनिष्ठक्रमः ॥ ४ मू० ४ श्रीं नारायणसहितां लक्ष्मीं तर्प० । ४ मू० ४ श्रीं लक्ष्मीसहितं नारायणं तर्प० । एवं मिथुनानि पञ्च, आमोदादिषट्, निधिद्वयं, तेषां त्रयोदशमिथुनान्तानां तर्पणसंख्याष्टोत्तरशतद्वयम् । आद्यन्तयोर्मूलेन चतुश्चतुः । एवं सम्भूय षोडशाधिकद्विशतमिति मध्यमप्रकारः ॥ आदौ मूलेन । ४ मू० ४ ॐ तर्पयामि स्वाहा । ४ मू० ४ श्रीं तर्पयामि० । ४ मू० ४ ह्रीं तर्प० । ४ मू० ४ क्लीं तर्प० । ४ मू० ४ ग्लौं तर्पयामि० । ४ मू० ४ गं तर्प० । ४ मू० ४ गं तर्प० । ४ मू० ४ णं तर्प० । ४ मू० ४ पं तर्प० । ४ मू० ४ तं तर्प० । ४ मू० ४ यें तर्प० । ४ मू० ४ वं तर्प० । ४ मू० ४ रं तर्प० । ४ मू० ४ वं तर्प० । ४ मू० ४ रं तर्प० । ४ मू० ४ दं तर्प० । ४ मू० ४ सं तर्प० । ४ मू० ४ वं तर्प० । ४ मू० ४ जं तर्प० । ४ मू० ४ नं तर्प० । ४ मू० ४ मे तर्प० । ४ मू० ४ वं तर्प० । ४ मू० ४ शं तर्प० । ४ मू० ४ मां तर्पयामि० । ४ मू० ४ नं तर्प० । ४ मू० ४ यं तर्प० । ४ मू० ४ स्वां तर्प० । ४ मू० ४ हां तर्पयामि० ॥ एवं सम्भूयाष्टाविंशत्यधिकशतद्वयसंख्यं तर्पयित्वा पुनर्मध्यप्रकारोक्तषोडशोत्तरशतद्वयं तर्पयेत् । तेन सम्भूय चतुश्चत्वारिंशदधिकचतुःशतं तर्पणानि भवन्ति, इत्युत्तमप्रकारः । इति काम्यतर्पणविधिः ॥

अथ श्रीमहागणपतेरङ्गविशेषे तु द्रव्यविशेषैस्तर्पणात् फलविशेषानाह सारसंग्रहे—

शुण्डाकराग्रे गणपं जलेन प्रतर्पयेन्मुक्तिफलाय मन्त्री ।
तथेन्दिराकामनया गणेशं प्रतर्पयेन्मूर्ध्नि पयोभिरत्र ॥ १ ॥
गुह्यप्रदेशे मधुना गणेशं प्रतर्पयेत् कामफलाय विद्वान् ।
आकृष्टिवश्यादिनिमित्तमत्र प्रतर्पयेत्तं मधुभिश्च नेत्रे ॥ २ ॥
भूपालवश्याय महागणेशं प्रतर्पयेच्चारु घृतेन पृष्ठे ।
ऊरुस्थले तैलसुतर्पणं च महागणेशप्रियमेतदुक्तम् ॥ ३ ॥
एरण्डतैलेन तथास्य रण्डावश्याय नाभौ किल तर्पणं स्यात् ।
स्कन्धप्रदेशेऽस्य पयः पयोभिः प्रतर्पणं प्रीतिविवर्धनाय ॥ ४ ॥
क्षीरेण दध्ना मधुनास्य तुण्डे प्रतर्पणं धर्मविवृद्धिकृत् स्यात् ।
एवं परिज्ञाय समस्तमेतत्कुर्यात्प्रयोगान् विधिना मनुज्ञः ॥ ५ ॥
एवं मन्त्री य एवं गणपमनुवरं ह्यर्चनातर्पणाद्यै-
र्होमैर्जपैश्च सम्यक् प्रभजति विधिना प्राप्नुयात्सोऽत्र लोके ।
नानार्थानस्य भूपो भवति च वशगो मोहयेत् सर्वलोकान्
भुक्त्वा भोगान् यथेष्टं व्रजति स विमलां मुक्तिमन्ते दुरापाम् ॥ ६ ॥

इति ॥ सारसंग्रहे—मन्त्रान्तरम् ।

वक्रेत्युक्त्वा च तुण्डैकदंष्ट्राय तदनन्तरम् । कामशक्तीन्दिराविघ्नबीजानि प्रवदेत्ततः ॥ १ ॥
वदेद् गणपतिं पश्चाद्वरान्ते वरदं पदम् । ततः सर्वजनं मेऽन्ते वशमानय ठद्वयम् ॥ २ ॥
त्रैलोक्यमोहनो मन्त्रो गणेशस्येष्टदः शुभः । ....॥

इति । वक्र स्वरूपं । तुण्डैकदंष्ट्राय स्वरूपं । मे स्वरूपं वशमानय स्वरूपं । ठद्वयं स्वाहा । त्रयस्त्रिंशदक्षरोऽयं मन्त्रः ॥ तथा—

ऋषिस्तु गणकः प्रोक्तो गायत्रं छन्द ईरितम् । त्रैलोक्यमोहनो विघ्नो देवता परिकीर्तितः ॥ ३ ॥
हृदेकादशभिः प्रोक्तं पञ्चभिः शिर ईरितम् । भूतार्णैश्च शिखा प्रोक्ता चतुर्भिः कवचं मतम् ॥ ४ ॥
नेत्रं षड्भिः समाख्यातं द्वाभ्यामस्त्रमुदीरितम् । ध्यानपूजादिकं सर्वं महाविघ्नेशवद्भवेत् ॥ ५ ॥

वर्णैरिति शेषः। ध्यानम्—

त्रैलोक्यमोहनगणेशमिमं यथावदभ्यर्चनाजपहुतिस्तुतितर्पणाद्यैः।
सम्पूजयेद्य इह साधकसत्तमोऽसौ लोकेऽखिले भवति पूज्यतमोऽमराणाम् ॥ ६ ॥

इति ॥ अथ प्रयोगः—योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये त्रैलोक्यमोहनाय गणपतये देवतायै नमः। इति ऋष्यादिकं विन्यस्य ममाभीष्टसिद्धये विनियोगः, इति कृताञ्जलिरुक्त्वा, वक्रतुण्डैकदंष्ट्राय क्लींह्रींश्रीं हृदयाय नमः। गं गणपतये शिरसे०। वरवरद शिखायै०। सर्वजनं कवचाय०। मे वशमानय नेत्रेभ्यो०। स्वाहा अस्त्राय०। इति मन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य, हृदयादिषडङ्गेष्वपि विन्यस्य ध्यानपूजादिकं सर्वं महागणपतिवत् कुर्यादिति ॥ सारसंग्रहे—मन्त्रान्तरम्।

शक्तिरुद्धा स्मृतिः प्रोक्ता चन्द्रखण्डेन संयुता। महागणान्ते पतये स्वाहान्तो द्वादशाक्षरः ॥ १ ॥

स्मृतिर्गकारः। चन्द्रखण्डेन संयुता बिन्दुयुक्ता। शक्तिरुद्धा भुवनेशीबीजसंपुटिता। अन्यत्सुगमम्। तथा—

ऋषिर्गणक आख्यातो गायत्री निचृदन्विता। छन्दः शक्तिगणेशोऽत्र देवता सर्वकामदः ॥ २ ॥
एकैनैकेन चैकेन सप्तभिर्द्वितयेन च। समस्तेन च मन्त्रार्णैरङ्गक्लृप्तिरिहोदिता ॥ ३ ॥

मुक्ताचन्द्रोत्थदीप्तिं शशिशकलधरं भालनेत्रं मनोज्ञं
हस्ताम्भोजैर्दधानं सरसिरुहसृणी रत्नपात्रं विशालम्।
स्वीयक्रोडस्थिताया ध्वजनिहितलसच्चारुपाणेः प्रियाया
योनौ विन्यस्तहस्तं मणिगणमुकुटं संश्रयेन्नागवक्त्रम् ॥ ४ ॥

दक्षाधःकरमारभ्य वामाधःकरपर्यन्तं सरसिजादिकध्यानम्।

एवं संचिन्त्य विधिवत् साधकः सर्वसिद्धये। यजेत्पूर्वोदिते पीठे विरिविघ्नेशवर्त्मना ॥ ५ ॥

इति ॥ अथ प्रयोगः—मूलेन प्राणायामत्रयं कृत्वा, शिरसि गणकाय ऋषये नमः। मुखे निचृद्गायत्रीच्छन्दसे नमः। हृदये श्रीशक्तिगणेशाय देवतायै नमः। इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, आद्यवर्णेन हृदयं, द्वितीयेन शिरः, तृतीयेन शिखा, सप्तभिः कवचं, द्वाभ्यां नेत्रं, समस्तमन्त्रेणास्त्रमिति मूलमन्त्रार्णैः करषडङ्गन्यासं विधाय ध्यानादिसर्वं विरिविघ्नेशवत् कुर्यादिति ॥ तथा—

दशायुतं जपेन्मन्त्रमयुतं जुहुयात्ततः। अपूपैर्घृतसंयुक्तैर्विधिवत् पूजितेऽनले ॥ ६ ॥
तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत्ततः। एवं सिद्धमनुर्मन्त्री प्रयोगान् विधिवच्चरेत् ॥ ७ ॥
इक्षुदण्डैः कृतो होमो राज्यलक्ष्मीं प्रयच्छति। कदलैर्नारिकेलैश्च होमो लोकवशङ्करः ॥ ८ ॥
ससितैः पृथुकैर्होमो राजानं वशमानयेत्। सक्तुभिश्च कृतो होमो ब्राह्मणानां वशङ्करः ॥ ९ ॥
सर्पिषा जुहुयात् सम्यग्धनधान्यादिसम्पदः।.... ....॥

इति ॥ सारसंग्रहे—मन्त्रान्तरम्।

प्रणवो मायया रुद्धबीजं च वशमानय। ठद्वयान्तो मनुः प्रोक्तः सम्यगेकादशाक्षरः ॥ १ ॥

मायया रुद्धबीजं भुवनेशीबीजद्वयमध्यस्थं गणेशबीजं। ठद्वयं स्वाहाकारः। तथा—

पूर्वोदितास्तु मुन्याद्या मन्त्रार्णैरङ्गकल्पनम्। हृदयं प्रणवेनाथ शिरो मायापुटेन च ॥ २ ॥
स्वबीजेन शिखा प्रोक्ता वशंशब्देन चानय। अनेन कवचं नेत्रं स्वाहाशब्देन मन्त्रिभिः ॥ ३ ॥
समग्रेणास्त्रमाख्यातं सर्वागमविशारदैः।.... ....॥

बन्धूकाभं त्रिनेत्रं शशधरमुकुटं भोगलोलं गणेशं
नागास्यं धारयन्तं गुणसृणिवरदानिक्षुदण्डं कराग्रैः।

शुण्डासंस्पृष्टयोषामदनगृहममुं श्यामलाङ्गया तयापि
श्लिष्टं लिङ्गस्पृशा तं विधृतकमलया भावयेद्देववन्द्यम् ॥ ४ ॥

(वामोर्ध्वकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम् । पूर्वोक्ते पीठे पूर्वोक्ता पूजा कार्या ।) अत्र प्रयोगः सुगमः । मुन्यादयस्तु द्वादशाक्षरोक्ताः । तथा--

लक्षत्रयं जपेन्मन्त्रमपूपैस्तद्दशांशतः । घृताप्लुतैस्तु जुहुयात् तर्पणादि ततश्चरेत् ॥ ४ ॥
ततो निजगुरुं नत्वा धनधान्यैश्च तोषयेत् । ततः काम्यप्रयोगांश्च तत्कल्पोक्तान् प्रसाधयेत् ॥ ५ ॥
स्वादुत्रयप्लुतापूपैर्होमो राजवशङ्करः । नारिकेलफलैर्होमो राज्यश्रीवृद्धिदः परः ॥ ६ ॥
त्रिस्वादुसंयुतैर्लोणैर्होमः कान्तावशङ्करः । ....॥

इति ॥ सारसंग्रहे--मन्त्रान्तरम् ।

अथो वच्मि महामन्त्रं हरिद्रागणपस्य तु । जगत्त्रयहितं भोगमोक्षदं कविताकरम् ॥ १ ॥
नानामन्त्रगणस्याशु सिद्धिदं भुवि दुर्लभम् । गरिष्ठं सफलं चाथ कार्यमात्रप्रसाधने ॥ २ ॥
गोपनीयं प्रयत्नेन वाञ्छितार्थसुरद्रुमम् । सौभाग्यपुष्टिलक्ष्मीदं दीर्घजीवित्वदं नृणाम् ॥ ३ ॥
नरनारीनरेन्द्राणां परं वश्यफलप्रदम् । विघ्नौघध्वंसने दक्षं कृत्याद्रोहनिवारणम् ॥ ४ ॥
दैत्यगीर्वाणसङ्घानां नागगन्धर्वरक्षसाम् । दन्तिनामश्वमुख्यानां श्वापदानां च पक्षिणाम् ॥ ५ ॥
स्वान्तसम्मोहनं सम्यक् प्राणाकृष्टिकरं क्षणात् । रोधकं राजसैन्यस्य वायुवर्गविप्रुताम् ॥ ६ ॥
कृशानुजलशस्त्राणां स्तम्भकं परमं मतम् । वादिनां जन्तुजातानां वाचां संस्तम्भनं द्विषाम् ॥ ७ ॥
सिंहेहामृगनागानां हृदयस्तम्भकारकम् । भूपस्य मन्त्रिणः शत्रोः क्रोधस्तम्भकरं हठात् ॥ ८ ॥
तरुणीनां कुमारीणां हृदयस्तम्भनं महत् स्निग्धानामपि शत्रूणां विद्वेषकरणक्षमम् ॥ ९ ॥
उन्मादोच्चाटने शत्रोर्मारणे च्छेदने क्षमम् । बहुप्रयोगसंयुक्तं यन्त्रभेदसमन्वितम् ॥ १० ॥

तारः क्रोधसमन्वितं च खपरं चन्द्रार्धचूडं धरा-
सद्बीजं हरि दाग्निविष्णुशयनान्याभाष्य पश्चाद् गणम् ।
सम्ब्रूयात् पतये वरश्च वरदं सर्वाजनान्ते हृद-
यं च स्तम्भययुग्ममग्निगृहिणी द्वात्रिंशदर्णो मनुः ॥ १ ॥

तारः प्रणवः । क्रोधो हूं । खपरं ग, चन्द्रार्धचूडं विन्दुयुक्तं । धरा ग्लौं । हरि स्वरूपं, दाग्निविष्णुशयनानि द्रा इति । गणपतये स्वरूपं । वरवरद स्वरूपं । सर्वजन स्वरूपं । हृदयं स्वरूपं । स्तम्भययुग्मं स्तम्भय स्तम्भय इति । अग्निगृहिणी स्वाहा । तथा--

सेवितो मनुसङ्घातैरुद्धृतः सर्वकामदः । मुनिर्मदन आख्यातश्छन्दोऽनुष्टुप् समीरितम् ॥ २ ॥
हरिद्रागणपो देवो देवता मुनिभिः स्मृतः । षड्दीर्घयुक्स्वबीजेन षडङ्गविधिरीरितः ॥ ३ ॥

इति । विनायकसंहितायां सम्मोहनपञ्चरात्रे च--"षड्दीर्घयुक्स्वबीजेन भूमियुक्तेन बुद्धिमान् । षडङ्गमाचरे" दित्युक्तं तत्र यथोपदेशं कार्यमिति । स्वबीजेन महागणपतिबीजेन । तथा--

विधिना येन मन्त्रोऽयं गृह्यते तदहं ब्रुवे । चतुर्थीदिवसे प्राप्ते शुक्लपक्षस्य मन्त्रवित् ॥ ४ ॥
शुद्धां हरिद्रामानीय कन्यया पेषितां शुभाम् । सर्वाङ्गे तां समालिप्य स्नायाच्छुद्धजलैस्ततः ॥ ५ ॥
भक्त्या परमयोपेतः प्रसन्नेनान्तरात्मना । प्रणम्य गुरुपादाब्जमर्चयित्वा विधानतः ॥ ६ ॥
स्वर्णांगुलीयहाराद्यैर्भूषणैश्च शुभाम्बरैः । पूर्वोक्तविधिना तस्मादधीयीत मनुं त्विमम् ॥ ७ ॥
सुगन्धैः सुमनोभिस्तं यजेद्देवधिया पुनः ।.... ....॥

स्थाने पूर्वसमीरिते मणिमये सिंहासने संस्थितं

पीतं पीतविभूषणाम्बरलसन्माल्यादिसंशोभितम् ।
विघ्नं दन्तिमुखं त्रिनेत्रलसितं हस्तैर्वहन्तं भजेत्
पाशं सत्परशुं वरं सृणियुतं क्रोधाख्यमुद्राभये ॥ ८ ॥

वामोर्ध्वादिकरत्रये आद्यत्रयं दक्षोर्ध्वादित्रयेऽन्यत्त्रयमित्यायुधध्यानम् । क्रोधमुद्रा मुष्टिः ।

एवं सञ्चित्य देवेशं गजाननमनन्यधीः । एकाक्षरोदितेनात्र वर्त्मना देवमर्चयेत् ॥ ९ ॥

इति । अथ प्रयोगः——तत्र प्रातरुत्थानादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि मदनाय ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदये हरिद्रागणपतये देवतायै नमः । इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, गांगींगूमित्यादिना करषडङ्गन्यासं विधाय ध्यात्वा, मानसपूजादिसर्वं प्राग्वत्तैकाक्षरविधिना कृत्वा समापयेदिति । तथा——

साग्रं सहस्रं सञ्जप्य दशांशं हव्यवाहने । सर्पिर्गुडयुतैः सम्यगपूपैर्जुहुयाद् हविः ॥ १० ॥
हरिद्रागणपं तावत्तर्पयेद्भक्तितत्परः । कुमारीर्भोजयेत् तावद् ब्रह्मचारिण एव च ॥ ११ ॥
काम्यकर्म ततः कुर्याद्यदिष्टं विष्टपत्रये ।.... ....॥

साग्रं सहस्रमष्टोत्तरं सहस्रमित्यर्थः । तावत्होमसंख्यासमसंख्यमित्यर्थः । एतेन तर्पणसंख्ययैव कुमार्य्यो ब्रह्मचारिणश्च भोजयितव्याः । ब्रह्मचारिणस्तु नैष्ठिकाः । 'स्वाश्रमस्थांस्त्वपेक्षन्ते' इति सांप्रदायिकाः । तथा—

पद्मे नागदले सुधाकरगृहे साध्याख्यकर्मावृते
वेदादौ वसुधाविनायकगतं वर्मालिखेन्मध्यतः ।
दिक्पत्रेषु वसुन्धरामनुगतं क्रोधं विदिक्पत्रगं
भूबीजं बहिरष्टकोणवसुधाबीजस्थितं वारुणम् ॥ १२ ॥

वसुकोणाग्रगानि स्युर्हस्तिनो मस्तकानि च । मस्तकेषु लिखेत् पश्चाद्गणान्तं बीजमुत्तमम् ॥ १३ ॥
चतुरस्रेण सम्वेष्ट्य दिक्षु वर्मान्तमालिखेत् । विदिग्गतं च भूबीजमेवं यन्त्रमनुत्तमम् ॥ १४ ॥

अस्यार्थः——तत्र यथोक्ताधिकरणे यथोक्तद्रव्यैरष्टदलकमलं कृत्वा, तत्कर्णिकामध्ये वृत्तं कृत्वा, तन्मध्ये साध्यनामवेष्टितं प्रणवं विलिख्य, तस्योदरे भूबीजमालिख्य भूबीजस्योदरे गणेशबीजमालिख्य, तस्यान्तः हुंकारमालिख्य, अष्टदलकमलस्य पूर्वदक्षिणपश्चिमोत्तरदलेषु भूबीजोदरगतं हूंकारमालिख्याग्नेयादिकोणदलेषु केवलं भूबीजं विलिख्य, कमलाद्बहिश्चतुरस्रद्वयसम्पुटरूपमष्टकोणं कृत्वा तत्कोणेषु भूबीजोदरे वकारं सबिन्दुं विलिख्य, अष्टकोणाग्रेषु गजमस्तकानि कृत्वा तेषु सबिन्दुं गकारं विलिख्य, तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु भूबीजं, तद्दिक्षु हुंकारं च विलिखेदिति ॥ तथा——

आदित्यबुधशुक्राणामेकस्य दिवसे वशी । निशीथे विजने देशे सुलिप्ते गोमयाम्भसा ॥ १५ ॥
प्रदीपैर्दीपिते तत्र दृषदं विन्यसेच्छुभाम् । उपलं च समानीय हरिद्रां क्षालितां जलैः ॥ १६ ॥
तस्यां दृषदि संस्थाप्य कन्यया पेषयेत्तत । हरिद्रायाश्चतुर्थांशं वसुविघ्नगृहान्मृदम् ॥ १७ ॥
समाहृत्य च सम्पिष्य मिश्रयित्वाथ शोधयेत् । मन्त्रेणानेन मन्त्रज्ञः पञ्चविंशतिसंख्यया ॥ १८ ॥
तत्पश्चाल्लेपयेन्मन्त्री शुभे सूक्ष्मे नवाम्बरे । अस्मिन् पट्टे लिखेद्यन्त्रमेतत्संस्तम्भनाह्वयम् ॥ १९ ॥
अत्र प्राणान् प्रतिष्ठाप्य पूजितं गुलिकीकृतम् । गणेशप्रतिमां पश्चादङ्गप्रत्यङ्गशोभिताम् ॥ २० ॥
विनिर्माय त्रिभिर्भागैर्निशायास्तद्धृदि क्षिपेत् । प्राणसंस्थापनं भूयः कुर्यान्मूर्तेर्विचक्षणः ॥ २१ ॥
गन्धपुष्पादिनैवेद्यै (रभ्यर्च्य गणनायकम् । शरावे क्षालितं न्यस्य सहस्रं साष्टकं मनुम् ॥ २२ ॥
संजप्य पूजयेद्भक्त्या पीतवर्णैश्च पुष्पकैः । सिद्धौदनेन नैवेद्यं) निवेद्यात्र बलिं हरेत् ॥ २३ ॥
तण्डुलान् शालिसम्भूतान् प्रस्थमानमिताञ्शुभान् । द्विदलीकृतमुद्गान्नं तदर्धेन च मेलयेत् ॥ २४ ॥

गुडं वेदपलं भूयो नारिकेलं च तत्समम् । मरिचं मुष्टिमानं च सैन्धवं च तदर्धकम् ॥ २५ ॥
तदर्धं जीरकं चाज्यं कुडवार्धसमं भवेत् । एतत्सर्वं चतुष्प्रस्थ गोदुग्धे मन्दवह्निना ॥ २६ ॥
पचेत् सिद्धौदनं ह्येतद् गणेशस्य महत्प्रियम् । अमुना पायसेनाथ लड्डुकापूपकादिभिः ॥ २७ ॥
कर्पूरवासितैः पूगताम्बूलैश्चन्दनादिभिः । तोषयित्वा विधानेन हरिद्रागणपं विभुम् ॥ ३७ ॥
बलिं दत्त्वा शरावेण च्छादयेदपरेण तम् । प्रणमेद् दण्डवद्भूमौ स्तुत्वा स्तुतिभिरादरात् ॥ ३८ ॥
एवं यः कुरुते नित्यं पञ्चभिः सप्तभिर्दिनैः । विघ्नेश्वरप्रभावेण त्रैलोक्यं सचराचरम् ॥ ३९ ॥
स्तम्भयेत् साधकेन्द्रस्तु सत्यमेतन्नचान्यथा । युद्धभूमौ तमिस्रायां यत्नेन स्थापयेद् बुधः ॥ ४० ॥
वैरिणो वाहिनीं वीरैर्व्याकुलां स्तम्भयेत्तदा । देशे ग्रामे पुरे गेहे सभायां स्थापितं यदि ॥ ४१ ॥
तत्तत्स्थानगतान् सर्वान् विविधान् स्तम्भयेज्जनान् । शाखिशाखाग्रगं सम्यक् स्तम्भयेद्वर्षणं महत् ॥४२॥
चत्वरे नगरान्तःस्थान् जलान्तःस्थापितं जलम् । निवासे पथि वा दस्यून् सर्पादीन् वा समीरणान् ॥४३॥
हस्तिघोटकशालासु क्षणात्सर्वानुपद्रवान् । आखून् शाल्यालये सर्पान् वल्मीके श्वापदान् वने ॥ ४४ ॥
क्षेत्रेषु शलभान् हेतीः पाषाणे स्तम्भयेत्स्थितम् । स्मृतिं वाणीं च गानं च विद्यां शत्रोर्विभावसोः ॥ ४५ ॥
रेतसः स्तम्भनं कुर्याच्छय्यास्थाननिवेशितम् । सम्यङ्निवेश्य चैतेषु स्थानेषु बलिमाहरेत् ॥ ४६ ॥
स्तम्भयेदखिलं विश्वं किं पुनर्वाञ्छितं जनम् । सफलं सर्वथा ह्येतद्विधानं गोपयेत्सदा ॥ ४७ ॥
अथाकृष्टिकरं यन्त्रं विघ्नेशस्य वदाम्यहम् । हरिद्रां शोधयेद्वेश्ममृदा प्रोक्तेन वर्त्मना ॥ ४८ ॥
उदितं यन्त्रमालिख्य मायां गं मध्यतो लिखेत् । अवशिष्टैर्मन्त्रवर्णैर्मायया च प्रवेष्टयेत् ॥ ४९ ॥
लिखेत् पाशांकुशावष्टपत्रेषु तदनन्तरम् । वारुणं दिग्दलाग्रेषु टपरं कोणपत्रगम् ॥ ५० ॥
धरामण्डलयुग्मस्य कोणेष्वाशाविदिक्क्रमात् । बाणबीजानि विलिखेद् वक्ष्यमाणानि मन्त्रवित् ॥ ५१ ॥
तदग्रवसुशूलेषु कवचं साधु संलिखेत् । जलगेहद्वयेनापि मायाकोणेन वेष्टितम् ॥ ५२ ॥
यन्त्रमाकर्षणं ह्येतल्लिखितं पूर्ववर्त्मना । कृतप्राणप्रतिष्ठं च निशाविघ्नेशकुक्षिगम् ॥ ५३ ॥
मुहुः सम्पूज्य यत्नेन समीरं स्थापयेद् बुधः । चक्रिहस्तमृदायोज्य गणेशागारमृत्तिकाः ॥ ५४ ॥
शरावयुगलं रम्यं निर्मायान्यत्र चोभयोः । विन्यस्य तं गणेशानं कुसुमैररुणैर्यजेत् ॥ ५५ ॥
सिद्धौदनादिनैवेद्यैर्बलिभिश्चोक्तवर्त्मना । मनोः सर्वजनस्थाने दत्त्वा साध्याभिधां बुधः ॥ ५६ ॥
स्तम्भय–द्वितयं यत्र तत्राकर्षय–युग्मकम् । साध्याशाभिमुखो भूत्वा सहस्रं साष्टकं जपेत् ॥ ५६ ॥
बलिं दत्त्वाथ सम्पूज्य विघ्नेशं चन्दनादिभिः । द्वितीयेन शरावेण पिदधीत सुसाधकः ॥ ५८ ॥
प्रत्यहं कुर्वतस्त्वेवं सप्तभिर्दिवसैर्भुवि । साधकस्य समायाति संनिधौ वाञ्छितो जनः ॥ ५९ ॥
भूपालस्तत्सुतो वापि महिषी वा वराङ्गना । अमात्यः पण्ययोषा वा सुरकन्यापि वा द्रुतम् ॥ ६० ॥
आगच्छति न सन्देहो मन्त्रिसक्तेन चेतसा । यन्त्रमेतल्लिखित्वा तु तालपत्रे गुडाम्भसा ॥ ६१ ॥
पूजितं स्थापितप्राणमजादुग्धे निवेश्य तत् । साध्याशाभिमुखो भूत्वा क्वाथयेत्प्रजपन् मनुम् ॥ ६२ ॥
तदानीमानयेत् कामविह्वलां सुरसुन्दरीम् । सामुद्रं रामठं न्यस्य तस्यागारे हरिद्रया ॥ ६३ ॥
सिक्थेन मर्दयित्वा तु कृत्वा साध्याकृतिं शुभाम् । श्वेतार्कच्छदयुग्मान्तः सप्राणां संनिवेश्य ताम् ॥ ६४ ॥
दीप्ताग्नौ तापयन् मन्त्रं जपेदष्टसहस्रकम् । क्षणादायाति कामार्ता वाञ्छिता वरवर्णिनी ॥ ६५ ॥
नागवल्लीदले क्षौद्रलिप्ते यन्त्रमिदं लिखेत् । साध्यं संस्मृत्य सम्पूज्य सेरं जप्तं प्रभक्षयेत् ॥ ६६ ॥
सीमन्तिनी समायाति शीघ्रं यौवनगर्विता । पत्रे पुष्पे सुवस्त्रादौ क्षौमे वालिख्य सेरणम् ॥ ६७ ॥
यन्त्रमेतत् प्रदातव्यं क्षणादाकृष्टिकारकम् । प्रवाहाभिमुखो वापि सरित्सङ्गमतीरगः ॥ ६८ ॥
तर्पयेत्तज्जलैः शुद्धैरष्टोत्तरसहस्रकम् । शतयोजनदूरस्थं साध्यमाकर्षयेद् ध्रुवम् ॥ ६९ ॥

बहूदितेन किं वात्र स्मृत्वा यं प्राणिनं जपेत् । मन्त्रमेनं विधानेन हठादाकर्षयेद्धि तम् ॥ ७० ॥

इति ॥ अथाकृष्टिकरं यन्त्रमित्यादिपूर्ववर्त्मनेत्यन्तस्यायमर्थः— तत्र पूर्वोक्तं यन्त्रमालिख्य तन्मध्यस्थं भूबीजं हित्वा तत्स्थाने मायाबीजं विलिख्य तन्मध्ये प्राग्वद्गणपतिबीजमालिख्य हुंकारादिगंबीजरहितैरवशिष्टवर्णैः प्रागुक्तसाध्यनामवेष्टनस्थाने संवेष्टच मायाबीजैश्च वेष्टयेत् । अत्र मायाबीजवेष्टनं वृत्तान्तराले ज्ञेयं, तेन कर्णिकाभ्यन्तरे वृत्तद्वये ज्ञेयम् । ततोऽष्टदलेषु प्रतिदलं आंक्रों इति पाशांकुशबीजे विलिख्य, दिग्दलाग्रेषु (वमिति, कोणपत्रेषु) ठमिति च विलिख्य, प्राग्वदष्टकोणं कृत्वा तस्य पूर्वदिग्गतकोणे द्रां, दक्षिणे द्रीं, पश्चिमे क्लीं, उत्तरे ब्लूं, इति । विदिग्गतकोणेषु चतुर्ष्वपि सः इति विलिख्याष्टकोणाग्रेषु त्रिशूलानि कृत्वा तेषु शूलेषु हुंकारमालिख्य, तद्बहिरर्धचन्द्रद्वयेन सम्पुटितेन संवेष्टच तत्कोणेषु मायाबीजं विलिखेत् । अत्र कोणशब्देनार्धचन्द्रद्वयस्याग्रचतुष्टयं गृह्यते, तस्याग्नेयादिकोणचतुष्टयस्थितत्वात् । अत्र प्राग्वद् गुलिकीकृत्य हरिद्रारचितगणेशकुक्षिगतं समीरं स्थापयेत् प्राणप्रतिष्ठां कुर्यान्मूर्तेरिति शेषः । चक्रिहस्तमृदा कुलालहस्तमृत्तिकया । अन्यत्रान्यतमे । सामुद्रं लवणं । रामठं हिंगुः । तस्यागारे गणेशागारे । सिक्थेन मधूच्छिष्टेन । सेरं सप्राणं कृतप्राणप्रतिष्ठमित्यर्थः । जप्तमभिमन्त्रितम् ॥ तथा—

अथो वदामि वश्यार्थे यन्त्रसाधनमुत्तमम् । यन्त्रं संलिख्य पूर्वोक्तं स्मरमध्ये गणाधिपम् ॥ १ ॥
बहिः शिष्टैर्मन्त्रवर्णैः कामेनापि प्रवेष्टयेत् । शेषमाकर्षयन्त्रेण समानं परिकल्पयेत् ॥ २ ॥
निशाशोधनमप्यत्र कुर्यादीरितवर्त्मना । हरिद्रायाश्चतुर्थांशमितेनेक्षुरसेन हि ॥ ३ ॥
सामुद्रं रोचनां क्षौद्रं पिष्ट्वा संलिप्य सत्पटे । लिखेद्वश्याभिधं यन्त्रं सम्यक कृत्वा निवेशयेत् ॥ ४ ॥

इति ॥ अस्यार्थः— पूर्वोक्तं यन्त्रं विलिख्य तन्मध्यस्थं मायाबीजमपास्य तत्स्थाने कामबीजं तदुदरे गणपतिबीजं विलिख्य, तत्प्राग्वदवशिष्टैर्मन्त्रवर्णैः कामबीजेन चावेष्टच शेषमाकर्षयन्त्रवत् कुर्यादिति ॥ तथा—

पूर्ववत् कृतविघ्नेशकुक्षिमध्ये निवेश्य तत् । विधिना स्थापितप्राणं शरावे न्यस्य तं यजेत् ॥ ५ ॥
रक्तामाल्यानुलेपाद्यैर्नैवेद्यैः पूर्ववत्कृतैः । मनौ माध्याभिधां दत्त्वा स्थाने पूर्वसमीरिते ॥ ६ ॥
वशमानययुग्मं च जपेदष्टसहस्रकम् । साध्यदिक्सम्मुखो भूत्वा मन्त्रं मन्त्री समाहितः ॥ ७ ॥

अष्टसहस्रमष्टोत्तरसहस्रमित्यर्थः ।

विघ्नेशाय बलिं दत्त्वा च्छादयेत्तं च पूर्ववत् । एवं प्रतिदिनं कुर्वन् सप्तभिर्दिवसैर्बुधः ॥ ८ ॥
रक्षोभूतपिशाचाद्यान् देवदानवपन्नगान् । राजानं मन्त्रिणं राज्ञां स्त्रीगणं चेष्टमानुषम् ॥ ९ ॥
वशयेत्साधकः शीघ्रं यावज्जीवं न संशयः । निशांशेनावशिष्टेन निजदेहं विलिम्पयेत् ॥ १० ॥
अचलां कमलां लब्ध्वा वशयेद्विश्वमञ्जसा । हरिद्रांशसमं चूर्णं शालितण्डुलसंभवम् ॥ ११ ॥
तत्समेन गुडेनापि मधुना सैन्धवेन च । संमिश्र्य मर्दयित्वा च पिण्डाकारं पचेद् घृते ॥ १२ ॥
निर्माय गणपं तेन यन्त्रं तद्धृदि निःक्षिपेत् । समीरं च प्रतिष्ठाप्य गन्धाद्यैः पूर्ववद्यजेत् ॥ १३ ॥
त्रिदिनं पूजयित्वेत्थं यन्त्रं मध्यात् पृथङ् नयेत् । प्रतिमां भक्षयेत्पश्चात् साध्यो वश्यो भवेद् ध्रुवम् ॥१४॥
शालिपिष्टादिपिण्डेन कृत्वा साध्याकृतिं शुभाम् । अष्टाधिकं शतं जप्त्वा पूजितां स्थापितानिलाम् ॥ १५ ॥
निवेद्य विघ्नराजाय साध्यं संस्मृत्य भक्षयेत् । वशयेद्वाञ्छितं साध्यं सदा सर्वस्वदायिनम् ॥ १६ ॥
वश्ययन्त्रं लिखेन्मन्त्री खानपानादिवस्तुषु । सेरं कृत्वा जपेन्मन्त्री सहस्रं साष्टकं बुधः ॥ १७ ॥
भक्षणाद्वशयेत् साध्यवस्तुमात्रस्य साधकः । चन्दनागरुकर्पूरनिशाकुंकुमरोचनाः ॥ १८ ॥
मृगेभमदसंयुक्ता अष्टाङ्गं विघ्ननाशनम् । संपिष्य तद्वशीकारयन्त्रमालिख्य पूर्ववत् ॥ १९ ॥
प्रतिमां पूर्ववत् कृत्वा जप्त्वा चाष्टोत्तरं शतम् । लिम्पेदनेन गात्रं स्वं कुर्वीतास्य विशेषकम् ॥ २० ॥
ईक्षणात् स्पर्शनादेव त्रिलोकीं वशमानयेत् । एवं कृते नरं नारी वशयेद्योषितं पुमान् ॥ २१ ॥

चन्दनेनैव वा कुर्याद्विधिमेनं फलाप्तये । द्विरेफश्च सदाभद्रा मुसली चेन्द्रवारुणी ॥ २२ ॥
भूपद्मं श्रीफलं विष्णुक्रान्ता हस्ती च वन्दिनी । वाराही शतवीर्या च मायूरी चन्द्ररोचने ॥ २३ ॥
सर्वमिक्षुरसेनैव निशाभागार्धसंयुतम् । पिष्ट्वा वश्याभिधं यन्त्रं निर्माय प्रतिमामपि ॥ २४ ॥
प्राणसंस्थापनं कृत्वा जपेदष्टसहस्रकम् । शिष्टद्रव्येण तिलकं कुर्यात्प्रातस्तु यो नरः ॥ २५ ॥
त्रैलोक्यं सम्पदा लक्ष्म्या तिरस्कुर्याद्धनाधिपम् । कपिलागोमयं व्योम्नि पद्मिनीदलसम्पुटे ॥ २६ ॥
आदाय ब्रह्मचर्येण भेषजैरुदितैः समम् । पञ्चगव्येन संमर्द्य पिण्डाकारं प्रकल्पयेत् ॥ २७ ॥
शुष्कं दहेच्छतं हुत्वा बिल्वकाष्ठैधितेऽनले । समुद्धृत्य च तद्भस्म तन्मध्ये यन्त्रमालिखेत् ॥ २८ ॥
समीरणं प्रतिष्ठाप्य गणपं तत्र पूजयेत् । अष्टाधिकं शतं मन्त्रं जपित्वा श्रीफलान्तरे ॥ २९ ॥
काञ्चने रूप्यरचिते पत्रे कांस्यमयेऽथवा । निधाय धारयेद्भस्म ललाटादिषु साधकः ॥ ३० ॥
कान्तिपुष्टिधनारोग्यपुत्रपौत्रयशःपशून । लब्ध्वा लोकप्रियो भूत्वा दीर्घजीवी भवेद् ध्रुवम् ॥ ३१ ॥
पुरोधा नृपतेः रक्षां भस्मना प्रातरन्वहम् । कुर्यादायुष्यवृध्यर्थं यशोविजयसम्पदे ॥ ३२ ॥
तस्मै निष्कत्रयं नित्यं नृपो दद्यात्पुरोधसे । रक्ताम्बरः सुवर्त्यन्तः प्रोक्तभेषजचूर्णकम् ॥ ३३ ॥
निधाय कपिलाज्येन तद्वर्त्या नृकपालके । दीपं प्रज्वाल्य तेनैव जपेन्मन्त्रं सुसंयतः ॥ ३४ ॥
गृहीत्वा कज्जलं जप्तमष्टोत्तरशतं शुभम् । नेत्रयोरन्वहं दद्याद् युवा वा युवती च या ॥ ३५ ॥
दृष्टिमात्रेण वशयेन्निखिलं विश्वमञ्जसा । उक्तौषधीनां गुटिकां पिष्ट्वा चन्दनवारिणा ॥ ३६ ॥
अभिमन्त्र्य तु या योषा तिलकं प्रकरोति सा । सर्वलोकप्रिया भूयादङ्गस्पर्शान्निजं पतिम् ॥ ३७ ॥
आज्ञानुवर्तिनं कुर्याद्यावज्जीवं न संशयः । शुद्धया निशया कृत्वा विघ्नेशं प्रोक्तलक्षणम् ॥ ३८ ॥
चन्द्रोपरागसमये सेरं जप्त्वा सहस्रकम् । अष्टाधिकं समभ्यर्च्य चन्दनादिभिरादरात् ॥ ३९ ॥
शिखायां प्रोद्वहेन्नित्यं सर्वतो जयमाप्नुयात् । संग्रामे विपिने दुष्टश्वापदोत्थभये परे ॥ ४० ॥
आपणे व्यवहारे च द्यूते वादे महार्णवे । पाटच्चरसमूहेषु सभायां शत्रुसङ्कटे ॥ ४१ ॥
विजयी जायते धीरः कृतकृत्यो निवर्तते । वराङ्गनावृन्दमध्ये शोभते मन्मथो यथा ॥ ४२ ॥
नागवल्लीदले यन्त्रं लिखित्वा रात्रिवारिणा । सप्राणमर्चितं जप्तमष्टोत्तरसहस्रतः ॥ ४३ ॥
अशितं वाञ्छितं साध्यं वश्यं नयति तत्क्षणात् । गोदुग्धे ससिते मन्त्री क्वथिते सुदृढीकृते ॥ ४४ ॥
यन्त्रं विलिख्य तेनैव निर्माय गणनायकम् । अभिमन्त्र्य शतं साग्रं भक्षयेद् वशयेज्जगत् ॥ ४५ ॥
नारिकेलगुडोपेतं चूर्णितं त्रिफलं हुनेत् । अन्वहं कृतसंपातमष्टाधिकशतं बुधः ॥ ४६ ॥
सम्पातं भक्षयेद्यस्तु वशमायाति सोऽचिरात् । किं बहूक्तेन मन्त्रज्ञः साध्यं सञ्चिन्तयन् मनुम् ॥ ४७ ॥
जपेत् स दासतां याति यावदायुर्न संशयः । ....॥

इति ।। अत्र विषमपदव्याख्या—पूर्वसमीरिते स्थाने सर्वजनमिति स्थाने। मनौ सर्वजनपदस्थाने साध्याभिधा । स्तम्भयेति पदस्थाने वशमानययुग्मं च दत्त्वा जपेदित्यर्थः । तद्धृदि गणेशहृदि । स्थापितानिलं कृतसाध्यप्राणप्रतिष्ठं । साध्यप्राणप्रतिष्ठाप्रकारस्तु प्रागेवोक्तः । अस्य द्रव्याष्टकस्य, विशेषकस्तिलकम् । द्विरेफो भृङ्गराजः । सदाभद्रा मुस्ता । मुसली तालमूलिका । वन्दिनी लज्जालुका । शतवीर्या दूर्वा । मायूरी अपामार्गः । चन्द्रः कर्पूरं । उदितैर्भेषजैर्द्विरेफादिभिः । रात्रिवारिणा हरिद्रोदकेनेति ।। तथा—

उच्चाटनं ततो यन्त्रं कथयामि समासत । उक्तरीत्या लिखेद्यन्त्रं ससाध्यं वर्ममध्यगम् ॥ १ ॥
तदन्तर्मारुतं बीजं गाणपत्यं तदन्तरे । प्राणबीजं च पत्रेषु वामकर्णं तदग्रतः ॥ २ ॥
तद्बहिर्वसुकोणाग्रशूलेषु कवचं कवचं लिखेत् । वायुना वेष्टितं पश्चात्षड्बिन्दुगतवायुना ॥ ३ ॥

प्रेतवस्त्रे तदालिख्य निशालेपनपूर्वकम् । श्मशानाङ्गारसारेण ध्वांक्षपक्षशलाकया ॥ ४ ॥
यन्त्रमेतत् समालिख्य स्थापयेदीरणं ततः । पिचुमन्दस्थितं ध्वांक्षगृहकाष्ठद्वयं तत ॥ ५ ॥
श्मशानवह्नौ संदह्य भस्मादाय तदुद्भवम् । विघ्नाधीशगृहद्वाःस्थशर्करारजसा युतम् ॥ ६ ॥
यन्त्रमध्ये प्रविन्यस्य सेरं तद्गुलिकीकृतम् । शवालिप्तनिशाभागं चिताभस्मास्थिनी सदा ॥ ७ ॥
सर्षपं च चिताङ्गारं कपिकच्छूं च वानरीम् । संपिष्योन्मत्तसारेण निर्माय गणपाकृतिम् ॥ ८ ॥
तत्तुन्दमध्यगं कृत्वा पुनः प्राणान् प्रतिष्ठयेत् । चक्रिहस्तमृदा चैव साध्यपादोत्थपांसुना ॥ ९ ॥
शरावयुगलं मन्त्री निर्मायान्यत्र चोभयोः । आम्बिकेयं प्रविन्यस्य कृष्णपुष्पैः समर्चयेत् ॥ १० ॥
मनावुच्चाटय-द्वन्द्वं संयोज्य प्रजपेन्मनुम् । अष्टोत्तरसहस्रं हि च्छादयित्वाऽपरेण तम् ॥ ११ ॥
निखन्य वैरिणो द्वारि मासेनोच्चाटयेद्धि तम् । सप्तिपस्यालये वैरिसदनेऽपि रणाङ्गणे ॥ १२ ॥
स्थापिते गणपे मासादुच्चाटो जायते ध्रुवम् । म्रियन्ते वा ज्वरार्तास्ते प्राणिनो भयविह्वलाः ॥ १३ ॥
चतुष्पथेऽथ वल्मीके चत्वरे द्रुमकोटरे । स्थापनाद्विघ्नराजस्य शत्रुरुच्चाटितो भवेत् ॥ १४ ॥
विघ्नेशतुन्दगं भस्म विन्यसेद्यस्य मस्तके । भ्रमते काकवत् सोऽपि गतो देशेष्वनिश्चलः ॥ १५ ॥
आसने शयने याने पथि शत्रोर्गजालये । भस्मक्षेपान्मृतिस्तत्र भवत्येव च नान्यथा ॥ १६ ॥

इति ॥ अयमर्थः—पूर्वोक्तं यन्त्रमालिख्य तन्मध्ये हुंबीजं विलिख्य, तदन्तर्यमिति वायुबीजमालिख्य, तदन्तर्गमिति गणपतिबीजमालिख्य, तन्मध्ये साध्यनाम लिखित्वा, पत्रेषु यमित्यालिख्य, दलाग्रेषु ईमिति विलिख्य, तद्बहिरष्टकोणाग्रगतशूलेषु हुमित्यालिख्य, बहिः षड्विन्दुलाञ्छितवृत्ताकारेण वायुमण्डलेन संवेष्टच तस्य षड्विन्दुस्थानेषु यमिति वायुबीजं लिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ प्रेतवस्त्रे प्रेतत्यक्तवस्त्रे) अङ्गारसारः कोइला इति प्रसिद्धः । ध्वाङ्क्षः काकः । ईरणं प्राणं । पिचुमन्दो निम्बवृक्षः । शर्करा कर्करः । शवालिप्तनिशाभागं शवस्य चर्चितं हरिद्रांशं । सर्षपं "श्वेतसर्षपमेव चे"ति तन्त्रान्तरात् । उन्मत्तसारो धत्तूररसः । वानरी लताविशेषः । तुन्दः कुक्षिः । आम्बिकेयं गणेशं । उच्चाटयद्वन्द्वं स्तम्भय-पदमपास्येति शेषः । सप्तिरश्वः इति ॥ तथा—

अथ वक्ष्ये समासेन यन्त्रं विद्वेषणाह्वयम् । यन्त्रे पूर्वोदिते वह्निवायुबीजं प्रविन्यसेत् ॥ १ ॥
वसुपत्रेषु रंवर्णं फट्कारं विलिखेत्ततः । अष्टशूलेषु हुंकारं व्योम्ना बाह्ये प्रवेष्टयेत् ॥ २ ॥
निशातुर्यांशमानेन मरिचं निम्बमेव च । तन्तिडीं द्विगुणां पिष्ट्वा हेमपत्राम्बुना ततः ॥ ३ ॥
मृतकर्पटके लिप्त्वा द्वेषयन्त्रमिदं लिखेत् । पञ्चाङ्गं पारिभद्रस्य काकनीडं च तद्गतम् ॥ ४ ॥
चिताग्नौ संदहेद्भस्म यन्त्रमध्ये निवेशयेत् । संवृत्य विघ्नराजस्य सेरं कुक्षौ विनिक्षिपेत् ॥ ५ ॥
शरावान्तरगं विघ्नं पूजयेत्पूर्ववर्त्मना । पिचुमन्दभवैः पत्रैः कृष्णपुष्पैर्निवेद्यकैः ॥ ६ ॥
विद्वेषयद्वयं मन्त्री जपेत्संयोज्य साष्टकम् । सहस्रं च शरावेण निखनेच्छादितं ततः ॥ ७ ॥
मित्रयोर्विधिनानेन विद्वेषो भवति ध्रुवम् । आदाय गणपं मन्त्री मित्रयोरन्तरा क्षिपेत् ॥ ८ ॥
वैरं च जायते क्षिप्रं देहनाशावधि द्वयोः । एतद्यन्त्रगतं भस्म गृहीत्वा पथि विन्यसेत् ॥ ९ ॥
गच्छतां पादसंस्पर्शाद्विवादः सुमहान् भवेत् । देशे ग्रामे पुरे यत्र स्थापितो गणपो भवेत् ॥ १० ॥
तिष्ठतां प्राणिनां तत्र वैरं भवति सर्वदा । पारिभद्रस्य पञ्चाङ्गमेकभागमितं भवेत् ॥ ११ ॥
भागैकं मरिचं रात्रिस्तावती त्रितयं त्विदम् । संदह्य भसितं पूर्ववर्त्मना संस्कृतं पुनः ॥ १२ ॥
विकीर्णं वैरिणो मूर्ध्नि कुर्यादुन्मादमूकते । ....॥

इति ॥ अस्यार्थः—तत्र पूर्वोक्तं यन्त्रमालिख्य तन्मध्ये रं यं इति विलिख्याष्टसु दलेषु रकारं फट्कारं च विलिख्य, दलाग्रेषु ईंकारं विलिख्याष्टकोणगतशूलाष्टके हुंकारमालिख्य बहिराकाशमण्डलेन वृत्ताकारेण

वेष्टयेदिति ॥ पारिभद्रो निम्बः । हेमपत्राम्बु धत्तूररसः । संवृत्य गुलिकीकृत्य । विद्वेषयद्वयमुच्चाटयस्थाने । रात्रिर्हरिद्रा । पूर्ववर्त्मना चिताग्निा इति ॥ तथा—

सांमतं मारणं यन्त्रं प्रवदामि यथाक्रमम् । यन्त्रं विरच्य पूर्वोक्तं वर्म मध्ये निवेशयेत् ॥ १ ॥
मायाविघ्नेशबीजे द्वे तन्मध्येऽपि समालिखेत् । तद्वाह्येऽप्युक्तरीत्यैव वर्णानग्निगतांल्लिखेत् ॥ २ ॥
आशुशुक्षणिबीजं च धरासम्पुटकोणगम् । मस्तकेऽस्त्रबीजानि वह्निशूलेषु वर्मकम् ॥ ३ ॥
तद्बहिर्वह्निकोणेषु वह्निबीजं समालिखेत् । निशां शुद्धां समालिप्य मृतकर्पटके शुभे ॥ ४ ॥
चिताङ्गारास्थिनिर्यासैः काकपक्षशलाकया । यथोक्तं विलिखेद् यन्त्रमेतन्मारणनामकम् ॥ ५ ॥
कणारामठशुण्ठ्याख्यानिशामरिचसद्वचाः । स्नुहीक्षीरेण संपिष्य लिप्त्वा शावपटेऽथवा ॥ ६ ॥
कारस्करस्य पञ्चाङ्गं रजनीं जम्बूकासृजा । पिष्ट्वाथ कर्पटे शावे लिप्त्वा शेषं पुरोक्तवत् ॥ ७ ॥
समीरं च प्रतिष्ठाप्य कृत्वा गणपतिं ततः । यन्त्रं तद्धृदये न्यस्य पुनः प्राणान् प्रतिष्ठयेत् ॥ ८ ॥
मातृसद्मसमुद्भूतां गणेशागारमृत्तिकाम् । निम्बमूलमृदं वापि कर्कन्धूमूलसंभवाम् ॥ ९ ॥
श्मशानमृत्तिकां तद्वत् करवीरद्रुमूलजाम् । कुम्भकारकरस्पृष्टामपरस्थानजां मृदम् ॥ १० ॥
पिष्ट्वा शरावयुगलं कृत्वा चान्यत्र चोभयोः । यन्त्राढ्यं गणपं न्यस्य कृष्णपुष्पैः समर्चयेत् ॥ ११ ॥
कारस्करभवैः पत्रैर्नैवेद्यैश्च यथा पुरा । उक्तमन्त्रपदस्थाने साध्यनाम निवेश्य हि ॥ १२ ॥
मारयद्वयशब्दं च सहस्रं साष्टकं जपेत् । दक्षिणाशामुखो भूत्वा रजन्यां भूतवासरे ॥ १३ ॥
चत्वरे पितृभूमौ वा मातृविघ्नगृहेऽथवा । वल्मीके कोटरे वापि कारस्करतरूद्भवे ॥ १४ ॥
पिधायान्यशरावेण निखन्य बलिमाहरेत् । साध्यो यमपुरं याति सप्ताहाज्ज्वरपीडितः ॥ १५ ॥
अमोघवीर्यमेतद्धि विधानं भुवि दुर्लभम् । भूदेवव्यतिरिक्तेषु राजावैरिषु योजयेत् ॥ १६ ॥
नृपोऽपि कारयेद्यः स कर्तारं तोषयेद्धनैः । कर्तापि तद्दशांशेन प्रायश्चित्तं समाचरेत् ॥ १७ ॥
हरिद्राविघ्नमन्त्रस्य साङ्गोपाङ्गविधानकम् । निरूपितं यथाशास्त्रं गोपनीयं सदा बुधैः ॥ १८ ॥
दातव्यं पुत्रकलाय शिष्याय स्थिरचेतसे । चित्तवाक्कायवसुभिर्गुरुशुश्रूषकाय च ॥ १९ ॥
श्रद्धाहीनाय दुष्टाय नैव देयं कदाचन । ....॥

इति ॥ अयमर्थः—तत्र पूर्वोक्तप्रकारेण यन्त्रं विलिख्य मध्ये हुंकारं विलिख्य, तस्योदरे शक्तिबीजं गणपतिबीजं च विलिख्य, दलेषु रमित्यालिख्य, बहिष्षटकोणं कृत्वा तत्कोणेषु रमित्यालिख्य, कोणाग्रेषु फट्कारमालिख्य तदग्रगतशूलेषु हुंकारं विलिख्य, तन्मध्ये रमिति वह्निबीजं विलिख्य तद्बहिस्त्रिकोणं विलिख्य तत्कोणेषु रमित्यालिखेत् । एतद्यन्त्रमुक्तफलदं भवति ॥ चिताङ्गारास्थिनिर्यासश्चितास्थिगलितो द्रवः । कणा पिप्पली । रामठं हिंगुः । स्नुही सेहुंड इति कान्यकुब्जभाषया नाम । स्तम्भयपदस्थाने मारयेति च । भूतवासरे चतुर्दश्यां । कोटरे कारस्करस्य । कारस्करोऽपि विषवृक्षो यस्य बीजं कुचिला इति प्रसिद्धम् ॥ सारसंग्रहे—मन्त्रान्तरम् ।

वक्रतुण्डगणेशस्य मनुं वक्ष्ये यथाविधि । सर्वपापक्षयकरं सर्वसौभाग्यदायकम् ॥ १ ॥
राज्यवश्यकरं पुंसां वन्ध्यानां पुत्रदायकम् । अमृतं चतुरास्याग्निः कामिका श्रोत्रबिन्दुयुक् ॥ २ ॥
टतृतीयोऽनन्तयुक्तः पवनः कवचं तथा । षडक्षरोऽयमादिष्टो भजतां कामदो मणिः ॥ ३ ॥

अमृतं व । चतुरास्यः क अग्नी रेफस्तेन क्र । कामिका त श्रोत्र उ बिन्दुरनुस्वारस्तैः तुं । टतृतीयो ड अनन्त आ तेन डा । पवनो य । कवचं हुं । अत्र केचिद्दीर्घकवचं वदन्ति । "प्रादुर्बभूव मनसि मन्त्रराजः षडक्षरः । तप्तचामीकरप्रख्यो वक्रतुण्डाय हूमिति" ॥ इति वक्रतुण्डकल्पवचनात् । "वक्रतुण्डाय कवचं दीर्घमेव षडक्षरः" । इति गणेश्वरपरामर्शिनीवचनाच्च । तथा—

भार्गवो मुनिराख्यातश्छन्दोऽनुष्टुबुदाहृतम् । देवता वक्रतुण्डोऽस्य सुरासुरनमस्कृतः ॥ ४ ॥
विधाय मूलमन्त्रेण करशुद्धिं जितेन्द्रियः । षड्भिर्मन्त्रगतैर्वर्णैः षडङ्गानि प्रकल्पयेत् ॥ ५ ॥
भ्रूमध्यकण्ठहृदयनाभ्यन्ध्वाधारके क्रमात् । षडक्षराण्यणोर्न्यस्येत्सर्वाङ्गे व्यापकं ततः ॥ ६ ॥
विधाय देवं हृदये ध्यायेदेकाग्रचेतसा । ....॥

रम्योद्भिन्नारुणतरमणिव्रातसंशोभिकान्ति
संबिभ्राणं करकिसलयैः पाशमप्यंकुशाह्वम् ।
साभीतीष्टं त्रिनयनयुतं रक्तमाल्यांशुकाढ्य-
मम्भोजोद्यत्पुटगतममुं संस्मरेद् वक्रतुण्डम् ॥ ७ ॥

वामाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये, इत्यायुधध्यानम् । तथा—

पूर्वोक्ते पूजयेत्पीठे वक्रतुण्डं गणेश्वरम् । अष्टपत्राम्बुजद्वन्द्वचतुर्द्वारयुतेन च ॥ ८ ॥
चतुरस्त्रत्रयेणाथ वेष्टितं चक्रमालिखेत् । मध्ये देवं समभ्यर्च्य पुष्पान्तैरुपचारकैः ॥ ९ ॥
आदावङ्गानि सम्पूज्य यथास्थानं विशालधीः ! पूर्वादिदलमूलेषु शक्तीरष्टौ क्रमाद्यजेत् ॥ १० ॥
विद्याख्या विश्वधात्री च भोगदा विघ्नघातिनी । निधिप्रदा च पापघ्नी तथा पुण्या शशिप्रभा ॥ ११ ॥
दलेषु च यजेत्तद्वदणिमाद्याः पुरोदिताः । द्वितीयेऽष्टदले तद्वद्वक्रतुण्डादिकान् यजेत् ॥ १२ ॥
चतुरस्त्रे लोकपालांस्तदस्त्राणि च पूजयेत् । प्राग्वद् वीथीद्वये सम्यग् वक्रतुण्डार्चनेरिता ॥ १३ ॥

इति ॥ अथ प्रयोगः—तत्र प्राग्वत् प्रातरुत्थानादिषडङ्गपूजान्ते प्रथमाष्टदलेषु ॐ विद्यायै नमः । विश्वधात्र्यै० । भोगदायै० । विघ्नघातिन्यै० । निधिप्रदायै० । पापघ्न्यै० । पुण्यायै० । शशिप्रभायै० । ततोऽष्टदलमध्येषु प्राग्वल्लक्ष्मीगणेशप्रकरणोक्तसिद्धचष्टकं सम्पूज्य, द्वितीयेऽष्टदले प्राग्वदेकाक्षरप्रकरणोक्तवक्रतुण्डादिकान् सम्पूज्य, लोकपालपूजादि प्राग्वत् सर्वं कुर्यात् इति ॥ तथा—

वर्णलक्षं जपेन्मन्त्रं जुहुयात्तद्दशांशतः । अष्टद्रव्यैः पुरा प्रोक्तैर्मधुराक्तैर्यथाविधि ॥ १४ ॥
तर्पणादि ततः कुर्याद् ब्राह्मणाराधनावधि । एवं सिद्धे मनौ मन्त्री काम्यकर्माणि साधयेत् ॥ १५ ॥
तर्पयेत्पूर्वमार्गेण वक्रतुण्डगणेश्वरम् । चतुरस्त्रं हस्तमात्रं कुण्डं कुर्यात्तदग्रतः ॥ १६ ॥
आदधीत मथित्वाग्निमनूचानगृहाद् हरेत् । प्राणायामत्रयं कृत्वा मन्त्री कर्म समारभेत् ॥ १७ ॥

पूर्वमार्गेण महागणपतिप्रकरणोक्तप्रकारेण । मथित्वा काष्ठादितः । अनूचानः श्रोत्रियः ।

ततः पूर्वोक्तवत्कृत्वा मन्त्रन्यासं षडङ्गकम् । गन्धपुष्पादिकैरग्निं सम्पूज्य स्थापयेत्ततः ॥ १८ ॥

षडङ्गन्यासं कृत्वा मन्त्रन्यासं कुर्यात् । स्थापयेद् दीक्षोक्तविधिना नित्यहोमविधिना वा । ध्यानम्—

कृशानुमध्ये तत्राथ नागयज्ञोपवीतिनम् । लम्बोदरं भास्वरं तमेकदन्तं त्रिलोचनम् ॥ १९ ॥
पद्मासनसमारूढं चतुर्बाहुं सुवर्णभम् । किरीटहारकेयूराङ्गदालङ्कारभूषितम् ॥ २० ॥
एवं संचिन्त्य मनसा समावाह्य गणेश्वरम् । गन्धादिभिः समभ्यर्च्य जलेनाग्निं प्रसिच्य च ॥ २१ ॥
षडर्णेन द्विठान्तेन जुहुयाच्च घृताहुतीः । अष्टाधिकं सहस्रं च तत सिद्धो भवेन्मनुः ॥ २२ ॥
सहस्राष्टं चतुर्थीषु पक्षयोरुभयोर्जपेत् । शतं हुनेदपूपैश्च वत्सराल्लभते धनम् ॥ २३ ॥

सहस्राष्टं साष्टसहस्रमित्यर्थः ।

मध्याह्नकाले नित्यं हि तदग्रे प्रजपेन्मनुम् । सहस्रं त्रिशतं वाथ शतं चाष्टोत्तरं सुधीः ॥ २४ ॥

अष्टोत्तरमिति स्थानत्रयेऽप्यन्वेति ।

अचिरेणैव महतीं लक्ष्मीं प्राप्नोत्ययत्नतः । प्रसन्नतात्र मनसस्तुष्टिरल्पाशिता तथा ॥ २५ ॥
स्वापवैमुख्यता चापि स्वप्ने द्विरददर्शनम् । एतानि मन्त्रसिद्धेर्हि चिह्नान्युक्तानि मन्त्रिभिः ॥ २६ ॥

पूर्वोक्तसिद्धौदनेन त्रिमासं त्रिशतं हुनेत् । महानिधीनां भवनं भवेद्वैश्रवणोऽपरः ॥ २७ ॥
गुडाक्तैः पृथुकैर्नारिकेलैर्मरिचसंयुतैः । अग्नौ सहस्रं जुहुयात् स मन्त्री धनवान् भवेत् ॥ २८ ॥
शुभशालीमयैश्चूर्णैः समरीचैः ससैन्धवैः । सजीरकैर्बहुगुडैः शुभैरतिघृतप्लुतैः ॥ २९ ॥

शालिमयैः शालितण्डुलचूर्णैः ।

अपूपैर्जुहुयान्मन्त्री गणेशस्य हि सन्निधौ । सहस्रमात्रं स लभेन्महतीमचिराद्रमाम् ॥ ३० ॥
साध्यनामार्णपुटितमनुना जुहुयात्सुधीः । अपामार्गसमिद्भिर्वा पक्वैः पनसजैः फलैः ॥ ३१ ॥
सहस्रं कदलैर्वाथ नरं नारीं वशं नयेत् । लाजाभिर्जुहुयादग्नौ सहस्रं कन्यकाप्तये ॥ ३२ ॥
सहस्रमाज्याहुतीनां हुनेत्क्षोराहुतीरपि । सहस्रं रोगशान्त्यर्थं मन्त्रशास्त्रविशारदः ॥ ३३ ॥
दूर्वाहुतीनां जुहुयाल्लक्षं मृत्युञ्जयो भवेत् । ब्रह्मवृक्षोत्थसमिधो मधुरत्रयलोलिताः ॥ ३४ ॥
सहस्रं जुहुयान्मन्त्री मासाच्छत्रूञ्जयेद् ध्रुवम् । विभीतकोत्थसमिधां सहस्रं साष्टकं निशि ॥ ३५ ॥
लोहिताक्तं श्मशानाग्नौ जुहुयान्मारयेद्रिपुम् । भूमौ शत्रुस्वरूपं च विलिख्यास्योदरेऽनलम् ॥ ३६ ॥
प्रज्वाल्य सिद्धार्थवरैः सहस्रं जुहुयात्सुधीः । तं मारयेत्सप्तदिनान्नात्र कार्या विचारणा ॥ ३७ ॥
कालमेघसमानाभं गणेशं निजशुण्डया । रिपुं गृहीत्वा वडवामुखे वह्नौ महोत्कटे ॥ ३८ ॥
प्रक्षिपन्तं गणपतिं ध्यात्वामुं प्रजपेन्मनुम् । सहस्रं त्रिदिनेनासौ शत्रुमुच्चाटयेद् ध्रुवम् ॥ ३९ ॥
समुद्रगां नदीं प्राप्य गृहीत्वाञ्जलिना जलम् । सहस्रकृत्वोऽभिमन्त्र्य चाभिषिञ्चेत्स्वमूर्धनि ॥ ४० ॥
अनेन विधिना मन्त्री पापौघं नाशयेद् ध्रुवम् । शनैश्चरदिनेऽश्वत्थमालम्ब्य त्रिसहस्रकम् ॥ ४१ ॥
जपेन्मनुं गणं ध्यायन् दोषान् ग्रहभवान् हरेत् । वेतसोत्थसमिद्धोमात्सहस्राद् वृष्टिमाप्नुयात् ॥ ४२ ॥
धान्यार्थी जुहुयाद्धान्यै रत्नार्थ्यत्नैर्हुनेत्सुधीः । कमलैरुत्पलैर्वापि होमो वस्त्रप्रदो मतः ॥ ४३ ॥
क्षेत्राभिकांक्षी पललैर्गुडाभ्यक्तैर्हुनेत्सुधीः । तमर्चयित्वा गणपं हरिद्रां सैन्धवं वचाम् ॥ ४४ ॥
निष्कार्धार्धप्रमाणेन संपिष्यैतानि निक्षिपेत् । प्रसूत्युन्मितगोमूत्रे सहस्रेणाभिमन्त्रयेत् ॥ ४५ ॥
स्नातामृतुस्नानदिने विशुद्धां शुक्लवाससम् । पाययेत्तां च सा वन्ध्या सूते प्राग्वत्सरात्सुतम् ॥ ४६ ॥
उपोष्य सोमग्रहणे भास्करग्रहणेऽथवा । कपिलाज्यं पलं चूर्णं वचायाश्च पलार्धकम् ॥ ४७ ॥
एतत्सहस्रसंजप्तं समस्तं प्रपिबेत्सुधीः । अवाप्य मेधां महतीं कवित्वं लभते ध्रुवम् ॥ ४८ ॥
गोचर्ममात्रं भूदेशमुपलिप्यांशुकावृतम् । कृत्वात्र स्थापयेत्कुम्भमर्चितं चन्दनादिभिः ॥ ४९ ॥
तस्योपरिष्टात् कपिलाघृतपूर्णं शरावकम् । घृतं तत्र प्रतिष्ठाप्य ज्वालयेद्दीपमुत्तमम् ॥ ५० ॥
तत्र विघ्नेशमावाह्य पूजयेत्कुसुमादिभिः । कुमारीं वा कुमारं वा दीपस्याग्रे निधाय च ॥ ५१ ॥
जपेत्तु मन्त्रप्रवरमष्टोत्तरसहस्रकम् । ततः पृष्टा कुमारी वा कुमारो वा ब्रवीति तत् ॥ ५२ ॥
मनोगतं हि सकलं भविष्यं भूतमेव च । वर्तमानं मनोरस्य प्रसादान्नात्र संशयः ॥ ५३ ॥

इति ॥ सारसंग्रहे—मन्त्रान्तरम् ।

मन्त्रान्तरमथो वक्ष्ये वक्रतुण्डगणेशितुः । यस्य स्मरणमात्रेण सर्वे नश्यन्त्युपद्रवाः ॥ १ ॥
झिण्टीशेन समायुक्तो यपूर्वः कतुरीयकः । सद्याक्रान्तो धरा ब्रह्मानन्तो वाली भृगुस्तथा ॥ २ ॥
खड्गीशो दीर्घसंयुक्तो वियन्नारायणान्वितम् । षडक्षरोऽयमाख्यातः सर्ववश्यफलप्रदः ॥ ३ ॥

इति । झिण्टीश एकारः, तेन युक्तो यपूर्वो म तेन मे इति । कतुरीयो घ, सद्य ओ, तेन घो । धरा ल, ब्रह्मा क, अनन्त आ, तेन ल्का इति । वाली य । भृगुः स, खड्गी व, दीर्घ आ, तेन स्वा । वियत् हकारः, नारायण आ, तेन हा इति । तथा—

भार्गवो मुनिरस्य स्यादनुष्टुप्छन्द ईरितम् । वक्रतुण्डगणेशोऽस्य देवता देववन्दितः ॥ ४ ॥

मन्त्रवर्णैः षडङ्गानि षड्भिः कुर्याद्यथा पुरा । ध्यानपूजादिकं सर्वं मन्त्री पूर्ववदाचरेत् ॥ ५ ॥

इति । प्रयोगः सुगमः ॥ तथा—मन्त्रान्तरम् ।

अथान्यत् सम्प्रवक्ष्यामि मन्त्रं द्वात्रिंशदर्णकम् । रायस्पोषपदं प्रोक्त्वा वदेत् स्य दयिता नि च ॥१॥
धिदो रत्नपदं चोक्त्वा दोवदं च ततो वदेत् । रक्षोहणो पदान्ते वो वलगेति पदं ततः ॥ २ ॥
हनो पदान्ते सम्प्रोक्तो मन्त्रराजः षडक्षरः । द्वात्रिंशदक्षरो मन्त्रः आथर्वणिक ईरितः ॥ ३ ॥

रायस्पोष इति स्वरूपं । स्यदयितानि स्वरूपं । धिदोरत्न स्वरूपं । दोवदं स्वरूपं । रक्षोहणो स्वरूपं । वो स्वरूपं । वलगहनो स्वरूपं । षडक्षरः पूर्वोक्तः । तथा—

संख्यादिकं पुरा प्रोक्तं ध्यानपूजादि पूर्ववत् । जपेदर्कसहस्राणि जुहुयात्तद्दशांशतः ॥ ४ ॥
हविषा घृतसिक्तेन तदन्ते तोषयेद्गुरुम् । एवं सिद्धमनुर्मन्त्री साधयेदिष्टमात्मनः ॥ ५ ॥

इष्टं काम्यं, तदपि षडक्षरोक्तवत् ॥ तथा—

ङेन्तं तत्पुरुषं प्रोक्त्वा विद्महे पदमुच्चरेत् । वक्रतुण्डं चतुर्थ्यन्तं धीमहीति ततो वदेत् ॥ ६ ॥
तन्नो दन्ती-पदं भाष्य वदेदन्ते प्रचोदयात् । गायत्रीयं समाख्यता वक्रतुण्डगणेशितुः ॥ ७ ॥
स्नानकाले सदा जप्या मन्त्रिभिः कर्मसिद्धये । .... ॥

ङेन्तं तत्पुरुषं तत्पुरुषायेति । सुगममन्यत् ॥ सारसंग्रहे—मन्त्रान्तरम् ।

उच्छिष्टस्य गणेशस्य विधानमभिधीयते । हस्तिशब्दं समुच्चार्य पिशाचीति ततो वदेत् ॥ १ ॥
लिखे-पदं समुच्चार्य वह्निजायान्तमुद्धरेत् । नवाक्षरोऽयमाख्यात उच्छिष्टस्य गणेशितुः ॥ २ ॥

वह्निजाया स्वाहा । अन्यत् स्वरूपम् । तथा—

ऋषिः कङ्कोलनामास्य विराट् छन्द उदाहृतम् । उच्छिष्टगणपो देवः सर्वसम्पत्प्रदायकः ॥ ३ ॥
द्वाभ्यां हृदयमाख्यातं त्रिभिः शिर उदाहृतम् । द्वाभ्यां शिखा समाख्याता वर्माक्षिभ्यां समीरितम्॥४॥
समस्तेनास्त्रमाख्यातं पञ्चाङ्गविधिरीरितः । ध्यानार्चनविधानं च मन्त्री पूर्ववदाचरेत् ॥ ५ ॥

अत्र तु चकारात्पुरश्चरणमपि पूर्वमन्त्रोक्तमेव प्राप्यते तेन वक्रतुण्डषडक्षरप्रकरणे "वर्णलक्षं जपेन्मन्त्र" मित्युक्तं तदत्रापि लभ्यते, तेनास्य मन्त्रस्य नवलक्षजपः पुरश्चरणमित्यवगम्यते इति । प्रयोगादिकं सुगमम् । तथा—

काम्यकर्माणि वक्ष्यामि स्तम्भे द्वेषे च मोहने । मारणे च वशीकारे तथाकर्षणकर्मणि ॥ ६ ॥
एतत् सर्वं करोत्येव सुप्रीतो गणनायकः । प्रतिमां कारयेद्धीमान् निम्बकाष्ठमयीं शुभाम् ॥ ७ ॥
साध्यांगुष्ठप्रमाणां च गणेशस्य महात्मनः । स्पृष्ट्वा तां प्रजपेन्मन्त्रं काम्यसिद्धिस्ततो भवेत् ॥ ८ ॥
अष्टम्यां च चतुर्दश्यां कृष्णपक्षस्य मन्त्रवित् । उच्छिष्टो रात्रिमध्ये तु जपेन्मन्त्रमिमं शुभम् ॥ ९ ॥
वाञ्छितो वशमायाति साधकस्य न संशयः । भूर्जपत्रे समालिख्य साध्यनाम यथाविधि ॥ १० ॥
मन्त्रेणावेष्टितं कृत्वा जपेन्मन्त्रमनन्यधीः । पादेनाक्रम्य तत्पत्रं हठाकृष्टिरियं मता ॥ ११ ॥
लिखित्वा पूर्ववत्पत्रं पूजयित्वा विधानतः । साध्यं स्मृत्वा जपेन्मन्त्रं सर्वलोकं वशं नयेत् ॥ १२ ॥
धारयेन्मस्तके यन्त्रं जपेन्मन्त्रमनन्यधीः । राजानं राजपत्नीं वा कर्षयेत्तत्क्षणात्सुधीः ॥ १३ ॥

यन्त्रं मूलमन्त्रवेष्टितं साध्यनामगर्भं भूर्जपत्रम् ।

ताम्बूलपत्रपुष्पाणि वस्त्राण्याभरणानि च । फलमूलादिवस्तूनि समादाय जपेन्मनुम् ॥ १४ ॥
एकविंशतिवाराणि दद्यादिष्टाय नान्यथा । सर्वलोके वशकरः प्रयोगोऽयमुदाहृतः ॥ १५ ॥
श्रीखण्डधूपदानेन राजानं वशमानयेत् । समिधो निम्बकाष्ठस्य कटुतैलसन्विताः ॥ १६ ॥
काकपक्षसमायुक्ता हुत्वा मन्त्री यथाविधि ।.... ....॥

यथाविधि चिताग्नौ ।

रिपुं च परसेनां च समुच्चाटयति क्षणात् । उलूककाकयोः पक्षांस्तद्वसारक्तसंयुतान् ॥ १७ ॥
श्मशाग्नौ तु जुहुयाद्विद्वेषः स्निग्धयो क्षणात् । शत्रुपादरजोयुक्तां वक्रिहस्तनृदं बुधः ॥ १८ ॥
श्मशानभस्मसंयुक्तामुद्वर्तनमलान्विताम् । गृहीत्वा पुत्तलीं कुर्यात्सर्वावयवशोभिताम् ॥ १९ ॥

उद्वर्तनमलं शत्रुशरीरस्य ।

तस्या हृदि लिखेन्नाम मूलमन्त्रेण वेष्टितम् । कृत्वा प्राणप्रतिष्ठां तु विषरक्ताढ्यगात्रके ॥ २० ॥
स्थापयित्वा जपेन्मन्त्रं सम्यगेकाग्रमानसः । म्रियतेऽरिर्न संदेहो देवेनापि सुरक्षितः ॥ २१ ॥
चितायां दग्धदम्पत्योर्भस्मादाय यथाविधि । रोचनाकुंकुमाभ्यां च भूर्जे नाम समालिखेत् ॥ २२ ॥
वेष्टितं मूलमन्त्रेण प्राणस्थापनमाचरेत् । साध्यं स्मृत्वा जपेन्मन्त्रं सम्यगष्टोत्तरं शतम् ॥ २३ ॥
द्विष्टयोर्जनयोः सम्यक् स्नेहो भवति तत्क्षणात् । ....॥

इति ॥ सारसंग्रहे—मन्त्रान्तरम्

क्रींक्रींपदं समुच्चार्य ह्रींह्रीं च पदमुच्चरेत् । हुंकारं सम्यगुच्चार्य घेघेशब्दमथोच्चरेत् ॥ १ ॥
फट्कारं स्वाहया युक्तः प्रणवाद्योऽयमीरितः । एकादशाक्षरः सम्यग् मूलमन्त्रो गुणेशितुः ॥ २ ॥
ऋष्यादिकं पुरः प्रोक्तं ध्यानपूजादिकं तथा । ....॥

इति ॥ तथा—मन्त्रान्तरम् ।

एकदंष्ट्रं चतुर्थ्यन्तं वदेद्धस्तिमुखं ततः । लम्बोदरपदं ङेन्तमुच्छिष्टेति पदं ततः ॥ १ ॥
आत्मनेऽकुशबीजं च ग्लूंकारं भुवनेश्वरीम् । हुंघेघेपदमुच्चार्य स्वाहाकारं समुच्चरेत् ॥ २ ॥
सप्तविंशतिभिर्वर्णैर्मन्त्रः प्रोक्तो गणेशितुः । ऋष्यादि ध्यानपूजादि यथापूर्वं समाचरेत् ॥ ३ ॥

तृतीयचतुर्थपदयोर्विसन्धिः । अन्यत्सुगमम् । यथापूर्वं वक्रतुण्डषडक्षरवत् ॥ तथा मन्त्रान्तरम्—

ॐकारं विलिखेदादौ नमो भगवते पदम् । एकदंष्ट्राय सम्भाष्य हस्त्यन्ते मुखशब्दः ॥ १ ॥
लम्बोदरपदं ङेन्तमुच्छिष्टेति पदं ततः । महात्मने पदं प्रोक्त्वा वदेदंकुशबीजकम् ॥ २ ॥
ग्लूंकारं मायया युक्तं हुंघेघे च समुच्चरेत् । स्वाहान्तो मनुराख्यातः सम्यक् षट्त्रिंशदक्षरः ॥ ३ ॥

उच्छिष्टेत्यत्र विसन्धिः ।

ऋष्यादिकं पुरा प्रोक्तं षड्बीजैरङ्गमीरितम् । ध्यानपूजादिकं सर्वं मन्त्री पूर्वोक्तमाचरेत् ॥ ४ ॥

मन्त्रोद्धारः सुगमः । षड्बीजैरिति, क्रों हृदयं, ग्लूं शिरः, ह्रीं शिखा, हुं कवचं, घे नेत्रं, घे अस्त्रं । अन्यत् सुगमम् । तन्त्रान्तरे—बलिमन्त्रः ।

"ॐगांहंक्लौंसमुच्चार्य ग्लौं उच्छिष्टगणे पदम् । ततः शाय महायक्षायायं बलिरिति स्मृतः ॥
बलिमन्त्रस्तथोच्छिष्टगणेशस्य महात्मनः । अनेन मांसं फलं वापि बलिं हरेत् ॥"

ॐगांहंक्लौंग्लौं उच्छिष्टगणेशाय महायक्षायायं बलिः । ध्यानविशेषमाह—

चतुर्भुजं त्रिनेत्रं च रक्तवर्णं कराम्बुजैः । पाशांकुशौ मोदकानां पात्रं दन्तं च बिभ्रतम् ॥ ५ ॥
कमलासनमासीनमुन्मत्तं गणनायकम् । पुरश्चरणसिद्ध्यर्थं लक्षसंख्यं जपेद् बुधः ॥ ६ ॥
जुहुयात्तद्दशांशेन तिलैराज्यपरिप्लुतैः । यजेत्पूर्वोदिते पीठे उच्छिष्टगणनायकम् ॥ ७ ॥
आदवङ्गानि सम्पूज्य मातृका दलसंस्थिताः । दलाग्रेषु च सोर्ध्वाधो दक्षदिक्षु प्रपूजयेत् ॥ ८ ॥
वक्रतुण्डैकदंष्ट्रौ च लम्बोदरसमाह्वयः । विकटो धूम्रवर्णश्च विघ्नश्चैव गजाननः ॥ ९ ॥
विनायको गणपतिर्हस्तिदन्तश्च वै दश । चतुरस्रे लोकपालान् वज्रादीनि ततो बहिः ॥ १० ॥
एवं सम्पूज्य विघ्नेशं ततः काम्यानि साधयेत् । श्वेतार्कमूलतो वापि मर्कटीकाष्ठकेन वा ॥ ११ ॥

स्वांगुष्ठप्रमितां कुर्याद्गणेशप्रतिमां तथा । प्रोक्तलक्षणसम्पन्नां प्रतिष्ठाप्य प्रयत्नतः ॥ १२ ॥
मधुना स्नापयेत्तां तु कृष्णप्रतिपदादितः । शुक्ला चतुर्दशी यावत्सगुडं पायसं तथा ॥ १३ ॥
निवेद्य प्रजपेन्मन्त्रं सहस्रं नित्यमादरात् । तिलैस्तावच्च जुहुयाद् घृताक्तैरेधितेऽनले ॥ १४ ॥
गणेशोऽहमिति ध्यायन्नुच्छिष्टेन दिगम्बरः । पक्षाद्राज्यमवाप्नोति नृपो योऽन्यो नरोऽपि वा ॥ १५ ॥
कुलालमृत्स्नाप्रतिमां पूजितां राज्यमाप्नुयात् । वल्मीकमृत्कृता वापि सर्वाभीष्टं प्रयच्छति ॥ १६ ॥
सौभाग्यदा गुडमयी लोणजा शत्रुनाशिनी । रणे द्यूते विवादे च जपेन जयमाप्नुयात् ॥ १७ ॥
एतन्मन्त्रप्रभावेन कुबेरो धनदोऽभवत् । विभीषणश्च सुग्रीवो लेभाते राज्यमञ्जसा ॥ १८ ॥
रक्तवस्त्रधरो रक्तताम्बूलं निश्यदञ्जपेत् । यद्वा नैवेद्यशेषं तु मोदकं भक्षयञ्जपेत् ॥ १९ ॥

इति ॥ तथा—मन्त्रान्तरम् ।

प्रणवो भुवनेशी च स्मृतिर्विन्दुसमन्विता । ततो नवाक्षरश्चैव सम्प्रोक्तो द्वादशाक्षरः ॥ २० ॥

ॐह्रींगं हस्तिपिशाचि लिखे स्वाहा (१२) ॥ तथा—

तारं हृदुच्छिष्टपदं गणेशाय नवाक्षरः । एकोनविंशत्यर्णोऽयं मुन्याद्याः पूर्ववत्स्मृताः ॥ २१ ॥
(भ्यगद्वित्रिद्विद्विभिश्च मन्त्रार्णैः स्यात्षडङ्गकम् ।) ....॥

ॐ नमः उच्छिष्टगणेशाय हस्तिपिशाचि लिखे स्वाहा । १९ ॥ इति ॥ तथा—

प्रणवं हृद्भगवते एकदंष्ट्राय वै वदेत् । ततो हस्तिमुखं ङेन्तं तथा लम्बोदरं ततः ॥ २२ ॥
वदेदुच्छिष्टशब्दान्ते महात्मानं च ङेन्तगम् । पाशमंकुशमाये च विघ्नबीजं च घेद्वयम् ॥ २३ ॥
वह्निजायावधि सप्तत्रिंशदर्णो मनुर्मतः । ....॥

ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आंक्रोंह्रींगंघेघे स्वाहा (३७) ॥

गणकोऽस्य ऋषिश्छन्दो गायत्री देवता ततः । उच्छिष्टपदपूर्वश्च गणनाथः समीरितः ॥ २४ ॥
गिरिपंक्तिशराद्रयब्धियुगार्णैरङ्गकल्पना । ....॥

शरचापगुणांकुशान् स्वहस्तैर्दधतं रक्तसरोरुहे निषण्णम् ।
विगताम्बरजायया प्रवृत्तं सुरते सन्ततमाश्रये गणेशम् ॥ २५ ॥

लक्षमानं जपेन्मन्त्रं दद्दशांशं हुनेद् घृतैः । तर्पणानि दशांशेन कुर्याद् ब्राह्मणभोजनम् ॥ २६ ॥
एवं संसिद्धमन्त्रस्तु प्रयोगानाचरेद् बुधः । धनं धान्यं सुतान् पौत्रान् सौभाग्यमतुलं यशः ॥ २७ ॥
प्राप्नोति साधकश्रेष्ठो गणेशस्य प्रसादतः । इभभग्नेन निम्बेन मूर्तिं कुर्याद्गणेशितुः ॥ २८ ॥
प्राणान् संस्थाप्य सम्पूज्य तदग्रे तु मनुं जपेत् । ध्यात्वा यं दासवत्सोऽपि वश्यो भवति नान्यथा ॥ २९ ॥
नदीजलं समादाय सप्तविंशतिसंख्यया । अभिमन्त्र्य ततस्तेन मुखं प्रक्षालयेद्बुधः ॥ ३० ॥
तं दृष्ट्वा वशमायान्ति नरनारीनृपालकाः । वामपादरजो गृह्य योषायाः प्रजपेन्मनुम् ॥ ३१ ॥
गणेशसन्निधाने हि रविसाहस्रकं स्मरन् । सा समायाति नियतं हठादाकर्षणं त्विदम् ॥ ३२ ॥
इभभग्नेन निम्बेन श्वेतार्केनाथवा सुधीः । गणेशप्रतिमां कृत्वा चतुर्थ्यां निशि पूजयेत् ॥ ३३ ॥
सर्वरक्तोपचारैश्च सहस्रं प्रजपेन्मनुम् । सरित्तटे क्षिपेत्तां तु प्रतिमां निशि साधकः ॥ ३४ ॥
यत्कार्यमारभेत् तस्य स्वप्ने वक्ति फलाफलम् । सहस्रनिम्बकाष्ठानां होमादुच्चाटयेदरीन् ॥ ३५ ॥
समिधां वज्रिणां होमान्मारयेच्छत्रुमात्मनः । मर्कटास्थि सुसंजप्तं क्षिप्रमुच्चाटयेद् गृहे ॥ ३६ ॥
नरास्थि जप्तं कन्याया गृहे क्षिप्तं तदाप्तिकृत् । स्त्रीणां वामांघ्रिरजसा कुलालस्य मृदा तदा ॥ ३७ ॥
कुर्यात्पुत्तलिकां तस्या हृदि स्त्रीनाम चालिखेत् । निम्बकाष्ठैः सहैतां तां जप्तां भूमौ विनिक्षिपेत् ॥ ३८ ॥
उन्मता जायते सा च प्रोद्धृतायां सुखीभवेत् । लशुनेन सहैवारेः शरावद्वयसम्पुटे ॥ ३९ ॥

क्षिप्त्वा तां प्रतिमां सम्यक् पूजितां द्वारि विद्विषः । निखाय पक्षमात्रेण शत्रुमुच्चाटयेद् ध्रुवम् ॥ ४० ॥
सङ्कटे समनुप्राप्ते सितार्कारिष्टदारुजम् । पूजितं गणपं सम्यग्रक्तगन्धोपचारकैः ॥ ४१ ॥
मद्यभाण्डे विनिक्षिप्य पूजास्थाने निखातयेत् । तत्रोपविश्य प्रजपेन्मन्त्रं नक्तन्दिवं बुधः ॥ ४२ ॥
नश्यन्त्युपद्रवा सर्वे सप्ताहान्नात्र संशयः । दुष्टनारीवामपादरजोभिर्निजदेहजैः ॥ ४३ ॥
मलैर्मृत्तिकया कुम्भकारकस्य प्रतिमां तथा । गणेशस्य ततो मद्यभाण्डस्थां निखनेद् भुवि ॥ ४४ ॥
तत्र कुण्डं विधायाशु जुहुयाद्धयमारजैः । कुसुमैः सा भवेद् दासी सहस्रमितहोमतः ॥ ४५ ॥

इति । तथा—मन्त्रान्तरम् ।

तारो हस्तिमुखं ङेन्तं लम्बोदरपदं ततः । तथोच्छिष्टमहात्मानं पाशांकुशत्रपास्ततः ॥ १ ॥
कामत्रपावर्म घेघे उच्छिष्टायाग्निवल्लभा । द्वात्रिंशदक्षरो मन्त्रो गणेशस्य महात्मनः ॥ २ ॥
रसेषुसप्ताष्ट्युगनेत्रार्णैरङ्गकल्पना । ....॥

ॐहस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आंक्रोंह्रींक्लींह्रींहुंघेघे उच्छिष्टाय स्वाहा (३२) ॥

अथ मञ्जुघोषप्रकरणम्—

जाड्यौघतिमिरध्वंसः संसारार्णवतारकः । श्रीमञ्जुघोषो जयतां साधकानां सुखावहः ॥ १ ॥

आगमोत्तरे—

मातृकादिं समुद्धृत्य वह्निबीजं समुद्धरेत् । वामांसं कूर्मसंज्ञं च ततो मेषेशमुद्धरेत् ॥ १ ॥
मीनेशं च ततः कुर्याद्वामनेत्रेन्दुसंयुतम् । षडक्षरो मनुः प्रोक्तो मञ्जुघोषस्य शम्भुना ॥ २ ॥

मातृकादिरकारः । वामांसोऽन्तःस्थचतुर्थः । कूर्मश्चकारः । मेषेशो लकारः । मीनेशो धकारः ।

इयं तु दीपनी प्रोक्ता मूलमन्त्रस्तु कथ्यते । अंकुशं शक्तिबीजं च रमाबीजं ततः प्रिये ॥ ३ ॥
बीजत्रयात्मको मन्त्रो जाड्यौघध्वान्तनाशनः । ततः शक्तिरमाबीजं कामबीजं तथा प्रिये ॥ ४ ॥
विद्या श्रुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका । हकारो वह्निमारूढो वामनेत्रेन्दुभूषितः ॥ ५ ॥
प्रोक्ता सार्वज्ञविद्येयमेकवर्णात्मिका प्रिये । सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुःसदा ॥ ६ ॥
तदा मन्त्रो भवेद्भक्त्या शुभदो बुद्धिदो भवेत् । मध्याह्ने सलिले चैव भोजने भाजने तथा ॥ ७ ॥
गोमये तु बहिर्देशे मैथुने रमणीकुचे । गोष्ठे च निशि गोमुण्डे यन्त्रं डमरुसन्निभम् ॥ ८ ॥
विलिख्य मन्त्रवर्णांश्च त्रिश ऊर्ध्वमधस्तथा । लिखेच्चन्दनलेखिन्या प्रयत्नात् साधकोत्तमः ॥ ९ ॥
उच्चाटने लिखेद्यन्त्रं गोचर्मणि विशेषतः । सलिले विजयो नित्यं भाजने च महेश्वरः ॥ १० ॥
गोमये वावदूकः स्याद्गोष्ठे सर्वज्ञतां व्रजेत् । कुचे श्रुतिधरो नित्यं गोमुण्डे च महाकविः ॥ ११ ॥
गोमूत्रं बदरीमूलं चन्दनं पांसुमेव च । एकीकृत्याष्टधा जप्त्वा तिलकं धारयेत्सदा ॥ १२ ॥
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेद् भक्तितत्परः । वरं प्राप्य च तस्माद्वै विहरेत्तु यथासुखम् ॥ १३ ॥
नान्यदेवार्चनं स्नानं प्रणवोच्चारणं नतु । वस्त्राञ्चलेन दन्तानां शोधनं लवणेन वा ॥ १४ ॥
रात्रिवासो न मुञ्चेत न शुचिः स्यात्कदाचन । एवं कृते प्रयत्नेन ज्ञात्वा गुरुमुखात्सुधीः ॥ १५ ॥
मासैकेन कवीन्द्रः स्याद् द्विमासेनैव ईश्वरः । त्रिभिर्मासैर्भवेन्मर्त्यः सर्वशास्त्रविशारदः ॥ १६ ॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् । आयुरारोग्यकामस्तु सर्वान् कामानवाप्नुयात् ॥ १७ ॥

तन्त्रान्तरे—

संवर्तको बकेशश्च द्वौ वर्णौ कथितौ प्रिये । षड्दीर्घभाग्भ्यामेताभ्यां षडङ्गानि समाचरेत् ॥ १८ ॥

संवर्तः क्ष । बकेशः श ।) इति । अथ ध्यानम्—

शशिधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं सुरुचिरमतिशान्तं पञ्चचूडं कुमारम् ।
पृथुतरवरमुख्यं पद्मपत्रायताक्षं कुमतिदहनदक्षं मञ्जुघोषं नमामि ॥ १९ ॥

पीठपूजां ततः कुर्यादाधाराद्यादिशक्तितः । भूतप्रेतादिभिः कुर्यात्पीठासनमनन्तरम् ॥ २० ॥
ज्ञानदात्रे नमः पाद्यं बुद्धिदात्रे तथाचमम् । जाड्यनाशाय गन्धः स्यादर्घ्यं यक्षाधिपाय वै ॥ २१ ॥
सर्वसिद्धिप्रदायेति पुष्पं दद्याद्विशेषतः । कुन्दपुष्पं समादाय भैरवान् पूजयेत्ततः ॥ २२ ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः । कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥ २३ ॥
ततो धूपादिकं दत्वा प्रसूनानि विसर्जयेत् । तैः पुष्पैः पूजयेदष्टौ यक्षिणीश्च विशेषतः ॥ २४ ॥
सुखादिसुन्दरी चैव मनोहारिण्यनन्तरम् । कनकावती तथा कामेश्वरी रतिकर्यथ ॥ २५ ॥
पद्मिनी च नटी चैव अनुरागिण्यनन्तरम् । पूज्या एतास्तु योगिन्यो हृल्लेखाबीजपूर्विकाः ॥ २६ ॥
एवं सम्पूज्य देवेशं लक्षषट्कं जपेन्मनुम् । घृताक्तकुन्दपुष्पैश्च एकादश शतानि च ॥ २७ ॥
जुहुयादेधिते वह्नौ कान्तारे पितृवेश्मनि । एवं सिद्धमनुर्मन्त्री महावागीश्वरो भवेत् ॥ २८ ॥

इति ॥ कुक्कुटेश्वरतन्त्रे—

मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुम् । शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥ १ ॥

श्रीपार्वत्युवाच ।

भगवन् सर्वधर्मज्ञ सर्वशास्त्रागमादिषु । वाञ्छितार्थप्रदं लोके मञ्जुघोषं ब्रवीहि मे ॥ २ ॥
विशेषतोऽपि जप्त्वा किं कवित्वपददं नृणाम् । सर्वकर्मप्रदं साक्षान्मनःसिद्धिप्रदं तथा ॥ ३ ॥
भक्तानां कामदं मन्त्रं कल्पवृक्षमिवापरम् । ....॥

श्रीशङ्कर उवाच ।

शृणु देवि महामन्त्रं साधकानां सुखावहम् । यज्जप्त्वा जडधीः प्रायो वाचस्पतिसमो भवेत् ॥ ४ ॥
अङ्गन्यासकरन्यासबहिर्न्याससमन्वितम् । जपात्सिद्धिप्रदं मन्त्रं विना होमार्चनादिभिः ॥ ५ ॥
जपेद्वा जापयेद्वापि साधको विधिपूर्वकम् । सर्वज्ञत्वमवाप्नोति सत्यं सत्यं हि पार्वति ॥ ६ ॥
कार्तिकेयमुखं यावत्तावल्लक्षं जपेन्मनुम् । सर्वशास्त्रेषु सोऽप्युच्चैर्बृहस्पतिसमो भवेत् ॥ ७ ॥

श्रीपार्वत्युवाच ।

कोऽप्यत्रापि ऋषिश्छन्दः पूज्यते कोऽत्र देवता । ध्येयश्च को वा तत्सर्वं ब्रूहि मे भक्तवत्सल ॥ ८ ॥

श्रीईश्वर उवाच ।

बृहदारण्यको नाम ऋषिर्विराडुदाहृतम् । छन्दश्च मञ्जुघोषाख्यो भुक्तिदानेन मुक्तिदः ॥ ९ ॥
ध्यात्वा भैरवरूपेण जपेन्मन्त्रमनन्यधीः । तदा मुक्तिप्रदो मन्त्रो नात्र कार्या विचारणा ॥ १० ॥
ध्यानं तत्र प्रवक्ष्यामि भैरवस्य महात्मनः । यथा ध्यात्वा जपेन्मन्त्रं तन्मे निगदतः शृणु ॥ ११ ॥
सात्विकं राजसं चैव तामसं तदनन्तरम् । ध्यानं वक्ष्ये महादेवि क्रमेण हितकाम्यया ॥ १२ ॥
सद्यः सिद्धिकरं रूपं ध्यात्वा जपेच्च सात्त्विकम् । सिद्धिप्रदं साधकानां भक्तानां चिन्तितप्रदम् ॥ १३ ॥
मन्त्रोद्धारमिदं देवि त्रैलोक्यस्यातिदुर्लभम् । अप्रकाश्यं परं गोप्यं न देयं यस्य कस्यचित् ॥ १४ ॥
मन्त्रोद्धारं प्रवक्ष्यामि गुह्याद्गुह्यतरं प्रिये । ....॥

विष्णवग्निवाश्च शशियुक् चलधीषडर्णो मन्त्रः समस्तजगतां सकलेष्टदश्च ।
सर्वज्ञतां सदसि वाक्पटुतां प्रसूते वेदान्तवेदनिरतस्य वसुप्रदः स्यात् ॥ १५ ॥

आशु मन्त्रं जपेन्मन्त्री स्वमन्त्रं यदि साधकः । बलिनैवेद्यभुक् साक्षाद् बृहस्पतिरिवापरः ॥ १६ ॥
मासमात्रेण यः कुर्यात्पुरश्चरणवान्नरः । तस्यापि वदनाद्वाणी निःसरेद्वरवर्णिनि ॥ १७ ॥
मासमात्रेण सततं कविरेव न संशयः । गोमुण्डे गवि पृष्ठे च चक्रे वापिच गोमये ॥ १८ ॥

यन्त्रे मन्त्रं लिखित्वादौ पश्चान्मन्त्रं जपेत्पुनः । ध्यानमात्रं विधायादौ भावयित्वा चिरं सुधीः ॥ १९ ॥
निर्जनं स्थानमासाद्य जपेन्मन्त्रमधोमुखः । पौर्णमासीं समासाद्य कुन्दस्य कुसुमैः शतैः ॥ २० ॥
अष्टाधिकैश्च सम्पूज्य जपेन्मन्त्रं चतुष्पथे । त्रिमुण्डारोहणं कृत्वा निशीथे मुक्तकुन्तलः ॥ २१ ॥
षण्मासमात्रं जपति यदि मन्त्री विधानवित् । बृहस्पतिसमो वक्ता नात्र कार्या विचारणा ॥ २२ ॥
कुक्कुरस्य च मुण्डैकं मुण्डं क्रोष्टुर्वृषस्य च । त्रिमुण्डमेतद् विख्यातं साधकानां सुखावहम् ॥ २३ ॥
आसने चैव गोमुण्डं वामे कुक्कुरमुण्डकम् । दक्षिणे च शिवामुण्डं कृत्वा पूजां समाचरेत् ॥ २४ ॥
अर्धचन्द्राकृति साक्षाद्बालचन्द्रोपमं स्फुटम् । यन्त्रं लिखेत्तत्र पूजां कुन्दस्य कुसुमेन च ॥ २५ ॥

सव्येन पाणिकमलेन जपादिपूजा शृङ्गारशीलनविधिः खलु दक्षिणेन ।
राकासुधाकरमरीचितुषारगौरं ध्यात्वा चतुष्पथतटे वृषमस्तके च ॥ २६ ॥
सञ्चिन्त्य कुक्कुरशिरः शिरसाधिरूढं कुन्देन साधकतमो जपति प्रकामम् ।
गोचर्मणा विरचितं रसलक्षमग्रे चक्रं ततोऽपि नवकुंकुमरोचनाभिः ॥ २७ ॥
निर्माय सव्यविधिना व्यजने श्मशाने सम्पूजयेद्वनभवैश्च नवैः पलाशैः ।
सम्पूर्णमण्डलतुषारमरीचिमध्ये बालं विचिन्त्य धवलं वरखड्गहस्तम् ॥ २८ ॥
(उद्दामकङ्कण(केशनि)वहं वरपुस्तकाढ्यं नग्नं जपेत्क्षतजपद्मदलायताक्षम् ॥ २९ ॥
अरिष्टगेहे निशि तैलमेवमादाय यत्नात् करपल्लवेन ।
तेनाञ्चितं काञ्चनपुष्पमेव निवेद्य तस्मै जपति प्रकामम्) ॥ ३० ॥
अशोकशाकोटतरोश्च मूले विलिप्य पादौ वदनामृतेन ।
त्रिमुण्डमात्राश्रित एव रात्रौ जपेद्यथाशक्ति तु पौर्णमास्याम् ॥ ३१ ॥
लकुचतरुतलस्थो मुण्डमात्रैकरूढो हिमकरकरगौरं चिन्तयित्वा निशीथे ।
यदि जपति जडात्मा मन्त्रमेनं त्रिलक्षं भवति जगति साक्षाद्गीष्पतिर्नात्र चित्रम् ॥ ३२ ॥
भुक्त्वान्नमेव कदलीतरुमूलसंस्थ आस्तीर्णपुष्परचितासनसंनिविष्टः ॥ ३३ ॥
राकाविधूद्गममुपेत्य करोति पूजां यः सोऽप्यजेय इति वाक्पतिरीश्वरःस्यात् ॥ ३४ ॥
जिह्वां विमृज्य निजपाणिसरोरुहाभ्यां कुन्दप्रसूनशतकैः परिपूज्य गोष्ठे ।
यो वै जपेदनुदिनं रसलक्षमात्रं शेषं जयेत्किमुत वाक्पतिमेकवक्त्रम् ॥ ३५ ॥
स्थित्वा निशीथसमये रजकस्य काष्ठे खड्गान्वितो जपति यद्यपि पौर्णमास्याम् ।
सम्पूर्णमासमथ वा तरसापि तस्य वक्त्राद् विनिःसरति गीरमृतायमाना ॥ ३६ ॥
यो दन्तधावनकृतैश्च करञ्जकाष्ठैस्तस्यापि गीष्पतिवचो नियतं सुलभ्यम् ।

तिलतैलेन मतिमान् कुन्दकैरवपुष्पकैः । यत्नतो जुहुयान्मन्त्री सर्वसिद्धिमुपालभेत् ॥ ३७ ॥

मञ्जिष्ठतोयसुवचासितभानुपुष्पैः स्वीयाङ्गशोणितयुतैः समकुष्ठकैश्च ।
कृत्वा ललाटफलके तिलकं जपस्थो विद्यार्थबोधविषये नवगीष्पतिः स्यात् ॥ ३८ ॥

इति ॥ भैरवतन्त्रे—मञ्जुघोषमन्त्रः ।

मञ्जुघोषाख्यममलं मन्त्रमाकर्णय प्रिये । धनवंशप्रदं रम्यं सार्वज्ञवाग्मिताप्रदम् ॥ १ ॥
अदोषकवितामूलममलं प्रतिभाप्रदम् । ....॥

श्रीदेव्युवाच ।

भगवन् गिरिजानाथ कथयस्व यथोदितम् । मञ्जुघोषः स कः कीदृक् तस्यानुष्ठानमेव हि ॥ २ ॥

श्रीईश्वर उवाच ।

श्रूयतां देवि मे वाक्यं (नात्रकार्या विचारणा । मञ्जुघोषस्तु यो देवः सोऽहं देवि न संशयः ॥ ३ ॥
एकोऽहं शङ्करो देवि नानारूपधरः स्वयम् । तस्यानुष्ठानमधुना) श्रूयतां मम तत्त्वतः ॥ ४ ॥
मन्त्रः षडक्षरः सारः सद्यः कुमतिनाशकः । रसलक्षावधिस्तस्य जाप्य एव सुरेप्सितः ॥ ५ ॥

(मञ्जलरींलरीमिति मन्त्रः)

त्रिपक्षजपनाद् देवि वाग्मी भवति मानवः । सुकवित्वं भवेत्तस्य प्रतिभा विश्वजित्वरी ॥ ६ ॥
मासत्रयं जपेद्यस्तु पण्डितोऽपण्डितो यदि । षण्मासं यस्तु जपति स सर्वज्ञः कुशाग्रधीः ॥ ७ ॥
अब्देन सिद्धयः सर्वा भवन्ति सत्यमीश्वरि । आहारोऽस्य नृणां वर्चो नैवेद्यं चक्षुषोर्मलम् ॥ ८ ॥
मूत्रैः पाद्यं ददेत्तस्य गन्धो विट्खदिरोद्भवः । अरण्यस्य च पत्राणि पुष्पाण्येव सुनिश्चितम् ॥ ९ ॥
एरण्डमूलैः कार्पासबीजमर्घ्यं प्रचक्षते । तुण्डकीलालदानेन भवेदाचमनीयकम् ॥ १० ॥
ध्यानं वक्ष्ये महादेवि सर्वसिद्धिप्रदायकम् । ....॥

शशिधरमिव शुभ्रमित्यादि प्रागुक्तं ध्यानम् ।

मन्त्रोद्धारं प्रवक्ष्यामि नमस्कारोपदेशतः । शृणु देवि महाभागे कलौ सद्यः फलप्रदम् ॥ ११ ॥
मन्त्रं सर्वार्थदं सारं वशीकरणमुत्तमम् । अमलं निर्गुणं सारं गुणितं सर्वकामदम् ॥ १२ ॥
तं नमामि हितं नाथं मञ्जुघोषं नमाम्यहम् । वरेण्यं परमं सारं स्तुतं ब्रह्मादिभिः सुरैः ॥ १३ ॥
रक्तं रजोगुणैर्युक्तं मञ्जुघोषं नमाम्यहम् । वचनेन न जानन्ति कायेन न च कोविदाः ॥ १४ ॥
तं शान्तं तमसा युक्तं पीतवस्त्रं नमाम्यहम् । चरणे पतिता यस्य दैत्यानां जयहेतवे ॥ १५ ॥
चरणे पतितो जीवो वृद्धये तं नमाम्यहम् । न जानन्ति सुरा यस्य तत्त्वं सत्त्वगुणेन वै ॥ १६ ॥
कृष्णं समस्तसारं च मञ्जुघोषं नमाम्यहम् । धीशं विश्वेश्वरं चैव प्रतिपत्त्यादिहेतुकम् ॥ १७ ॥
सकलं निष्कलं चैव तं नमामि हितप्रदम् । (ऋषिः कण्वो भवेत्पंक्तिश्छन्दोऽङ्गानि षडक्षरैः) ॥ १८ ॥
दक्षिणां च ततो दद्याद् गुरुस्तुष्टिर्यथा भवेत् । गुरुसन्तोषमात्रेण सिद्धिर्भवति निश्चितम् ॥ १९ ॥
(पिता गुरुर्न कार्यो वै दीक्षाकर्मणि पार्वति । यावत्कालं सुतो दुःखी पिता तु नरकं व्रजेत् ।) ॥ २० ॥

इति मञ्जुघोषप्रकरणम् ॥ (अथ चरणायुधमन्त्रः—)

पाशबीजं ततस्तीक्ष्णं वामकर्णेन्दुसंयुतः । सद्योजातयुतः क्रोधी पिनाकी सूक्ष्मसंयुतः ॥ १ ॥
पुनरेतत् त्रयं प्रोक्त्वा खड्गीशोऽनन्तसंयुतः । मायाबीजं द्वितीयादित्रयं प्रोक्त्वा द्विधा ततः ॥ २ ॥
कूर्मः कर्णयुतः खड्गी युतोऽनन्तेन चांकुशम् । अष्टादशाक्षरो मन्त्रश्चरणायुधसंज्ञकः ॥ ३ ॥

आपूकोलिपूकोलिवाह्रींपूकोलिपूकोलिचुवाक्रों ॥ १८ ॥

महारुद्रो मुनिः प्रोक्तो जगती च्छन्द उच्यते । मायाबीजं सृणिः शक्तिः पाशबीजं तु कीलकम् ॥ ४ ॥
देवता कथितः सद्भिश्चरणायुधसंज्ञकः । चतुर्भिश्च त्रिभिर्नेत्रैस्त्रित्रित्र्यर्णैः षडङ्गकम् ॥ ५ ॥
मूर्ध्नि भाले भ्रुवोरक्ष्णोः कर्णयोर्घ्राणयोर्मुखे । कण्ठे कुक्षौ च नाभौ च लिङ्गे चैव गुदे तथा ॥ ६ ॥
जानुनोः पादयोर्न्यस्येन्मन्त्रवर्णान् यथाविधि । सर्वालङ्कारसन्दीप्तकण्ठपादद्वयान्वितम् ॥ ७ ॥
गलत्सुवर्णवर्णाभं चलत्पक्षद्वयान्वितम् । गौरीकरसरोजस्थं सर्वामरसुपूजितम् ॥ ८ ॥
रक्तवर्णशिखायुक्तं रक्तचञ्चुपुटद्वयम् । चलत्पादं समस्तार्तिनाशनं सर्वसिद्धिदम् ॥ ९ ॥
एवं ध्यायन् महादेवं कुक्कुटेश्वरसंज्ञितम् । एवं ध्यात्वा यजेत्पीठे शैवे वै ताम्रशेखरम् ॥ १० ॥
अङ्गावृतिं यजेदादौ दलेष्वष्टसु वै यजेत् । प्रादक्षिण्यक्रमाच्छंभुं गौरीं गणपतिं तथा ॥ ११ ॥
कार्तिकेयं च मन्दारं पारिजातं ततः परम् । महाकालं बर्हिणं च चतुरस्रे दिगीश्वरान् ॥ १२ ॥
तदायुधान्यपि बहिः पूजान्ते बलिमाहरेत् । द्वितीयबीजं संवर्तं सबिन्दुं भुवनेश्वरीम् ॥ १३ ॥

कुक्कुटेति द्विरुच्चार्य एह्येति च द्विधा वदेत् । इमं बलिं गृह्ण गृह्ण गृह्णापययुगं ततः ॥ १४ ॥
सर्वान् कामांश्च देवि द्वे यं कूं ह्रीं पूं नमः पदम् । कुक्कुटायेति मन्त्रोऽयं जिनयुग्मार्णकः परः ॥ १५ ॥
मधुरत्रययुक्तैश्च लाजैर्दद्याद्बलिं निशि । ....॥

पूंक्षं ह्रीं कुक्कुट २ एहि २ इमं बलिं गृह्ण २ गृह्णापय २ सर्वान् कामांश्च देहि २ यं कूं ह्रीं पूं नमः कुक्कुटाय (४८) ॥

अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि महारुद्राय ऋषये नमः । मुखे अतिजगतीच्छन्दसे नमः । हृदये श्रीकुक्कुटेश्वराय देवतायै नमः । गुह्ये ह्रीं बीजाय नमः । पादयोः क्रों शक्तये नमः । नाभौ पूं कीलकाय नमः । इति विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, आंपूंक्रोंलिं हृदयाय नमः । पुंक्रोंलिं शिरसे० । वाह्रीं शिखायै० । पूंक्रोंलिं कवचाय० । पूंक्रोंलिं नेत्रत्रयाय० । चुवाक्रों अस्त्राय० । इति करषडङ्गन्यासं विधाय, मूर्ध्नि आं नमः । भाले पूं० । दक्षभ्रूप्रदेशे क्रों० । वामे लिं० । दक्षनेत्रे पूं० । वामे क्रों० । दक्षकर्णे लिं० । वामे वां० । दक्षनासिकायां ह्रीं० । वामे पूं० । वक्त्रे क्रों० । कण्ठे लिं० । कुक्षौ पूं० । नाभौ क्रों० । लिङ्गे लिं० । गुदे चुं० । जान्वोः वां० । पादयोः क्रों नमः । इति विन्यस्य, ध्यानादिमानसपूजान्तेऽस्य पुरतः कुंकुमचन्दनादिनाष्टदलकमलं विलिख्य तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रं कुर्यात्, इति पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याश्यर्च्याद्यादिस्थापना-द्यात्मपूजान्ते शैवं पीठं समभ्यर्च्य, मूलेन मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते कर्णिकायामग्नीशासुर-वायव्यमध्ये दिक्षु च प्राग्वत षडङ्गानि सम्पूज्य, दलेषु देवाग्रादिप्रादक्षिण्येन शम्भवे नमः । गौर्यै० । गणपतये० । कार्तिकेयाय० । मन्दाराय० । पारिजाताय० । महाकालाय० । बर्हिणे० । इति सम्पूज्य, लोकपालार्चादि सर्वं प्राग्वत् समाप्य प्रोक्तमन्त्रेण प्रोक्तद्रव्यैर्बलिं दद्यादिति ॥ तथा—

जपेल्लक्षं दशांशेन त्रिमध्वक्तैस्तिलैर्हुनेत् । तर्पणादि ततः कुर्याद्ब्राह्मणाराधनं ततः ॥ १६ ॥
एवं सिद्धमनुर्मन्त्री सर्वाभीष्टं च साधयेत् । अयुतं द्विशताधिक्यात्प्रयोगादौ जपेन्मनुम् ॥ १७ ॥
दधिक्षीरसिताक्षौद्रसताम्बूलेन्दुपायसैः । बलिं दद्यात्प्रयत्नेन भोजनादौ तदन्तके ॥ १८ ॥
अनेन बलिदानेन कुबेरो धननायकः । बभूव शान्तिके पुष्टौ बलिं दद्यात्प्रयत्नतः ॥ १९ ॥
बलिदानेन सन्तुष्टः कुक्कुटोऽभीष्टदायकः । निश्योदनैर्बलिं दत्त्वा त्रिदिनैर्वशयेज्जगत् ॥ २० ॥
गोधूमपिष्टघटितैरपूपैर्दुग्धमिश्रितैः । साज्यकर्पूरकैर्दद्याद् बलिं निशि विशेषतः ॥ २१ ॥
त्रिदिनैर्वशमायाति सत्यं जगदशेषतः । यमुद्दिश्य जपेन्मन्त्रं सहस्रं नियतो निशि ॥ २२ ॥
पीतैः पुष्पैर्बिल्वपत्रैः करवीरैः सहस्रशः । पूजयन्नेव सप्ताहात्स नरो दासतां व्रजेत् ॥ २३ ॥
छाग-लावकमांसेन बलिं दत्त्वा निरन्तम् । समस्ताभीष्टसिद्धिः स्यात् सङ्कटान्मुच्यते ध्रुवम् ॥ २४ ॥
जपेद्रविसहस्रं तु मुक्तकेश उदङ्मुखः । निशीथेऽष्टदिनं यावद्यमुद्दिश्य स्मरन् धिया ॥ २५ ॥
तमाकर्षयति क्षिप्रं योजनानां शतैरपि । जातीफलेऽथ संचूर्णकर्पूरं मध्यतः क्षिपेत् ॥ २६ ॥
स्पृष्ट्वा द्वादशसाहस्रमभिमन्त्र्य तु साधकः । सिन्दूरं तत्र निःक्षिप्य जले तु क्वाथयेततः ॥ २७ ॥
लोहपात्रे तु संस्थाप्य तत्स्पृष्टं स्तम्भितं भवेत् । लोहकारगृहाद्वह्निमानीयायसपात्रके ॥ २८ ॥
हयारिकाष्ठैः प्रज्वाल्य जुहुयात्तत्र धूर्तजैः । शतसंख्यैश्च विषजचूर्णैः सिद्धार्थतैलकैः ॥ २९ ॥
उच्चाटयेद्रिपून् सत्यं सप्ताहान्नात्र संशयः । श्मशानाग्नौ प्रजुहुयात्त्रिदिनान्मारयेदरीन् ॥ ३० ॥
साध्यर्क्षवृक्षजां कृत्वा पुत्तलीं स्थापितेरणाम् । स्पृष्ट्वा सहस्रं प्रजपेन्मूलमन्त्रं हि साधकः ॥ ३१ ॥
चिताकाष्ठस्य कीलेन श्मशाने निशि संयुतः । यदङ्गं छेद्यते तस्यास्तदङ्गं तस्य नश्यति ॥ ३२ ॥

प्राक्प्रयोगप्रकरणे ये ये पुत्तलीप्रयोगास्ते तु सर्वेऽत्रापि ज्ञेयाः । इति ताम्रचूडप्रकरणम् ॥

अथ शास्तृप्रकरणम्—

अथ वक्ष्ये मनुं शास्तुः सर्वाभीष्टप्रदायकम् । शास्तारं मृगयाश्रान्तमश्वारूढं गणावृतम् ॥ १ ॥
पानीयार्थं विना शास्त्रे ते नतो रैवते नमः । द्वात्रिंशदक्षरो मन्त्रो रैवत ऋषिरुच्यते ॥ २ ॥
पंक्तिश्छन्दो महाशास्ता देवता सकलेष्टदः । पादैश्चतुर्भिः सर्वेण पञ्चाङ्गन्यासमाचरेत् ॥ ३ ॥
अश्वारूढं त्रिनेत्रं च शास्तारं पाशकेन च । बद्ध्वा साध्यं साधकाग्रे पातयन्तं भजाम्यहम् ॥ ४ ॥
ध्यात्वैवं पूजयेत्पीठे शैवे प्राग्वत्सुसाधकः । आदावङ्गानि सम्पूज्य प्रादक्षिण्याद्दलेष्वथ ॥ ५ ॥
गोप्तारं पिङ्गलाक्षं च वीरसेनं च शाम्भवम् । त्रिनेत्रं शूलिनं दक्षं भीमरूपं च पूजयेत् ॥ ६ ॥
चतुरस्रे लोकपालान् वज्राद्यायुधसंयुतान् ।.... ....॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि रैवताय ऋषये नमः । मुखे पंक्तिच्छन्दसे नमः । हृदये श्रीमहाशास्त्रे देवतायै नमः । इति विन्यस्य, ममाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, शास्तारं मृगयाश्रान्तं हृदयाय० । अश्वारूढं गणावृतं शिरसे० । पानीयार्थं विना शास्त्रे शिखायै० । ते नतो रैवते नमः कवचाय० । समस्तेनास्त्रं० । इति कराङ्गन्यासं विधाय, ध्यान-मानसपूजान्ते स्वपुरतः कुंकुमादिना चन्दनादिपीठे चतुर्द्वारयुक्तचतुरस्रावृतमष्टदलकमलं कृत्वा, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते शैवं पीठं समभ्यर्च्य, मूलेन मूर्तिं परिकल्प्यावाहनादिपुष्पोपचारान्ते प्राग्वदङ्गपूजां विधायाष्टदलेषु देवाग्रे प्रादक्षिण्येन, गोप्त्रे नमः । पिङ्गलाक्षाय० । वीरसेनाय० । शाम्भवाय० । त्रिनेत्राय० । शूलिने० । दक्षाय० । भीमरूपाय० । इति सम्पूज्य, चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं सर्वं प्राग्वत् कुर्यादिति ॥ तथा—

तथा लक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्तिलैः । तर्पणादि ततः कुर्यादेवं सिद्धो भवेन्मनुः ॥ ७ ॥
तस्मै जलार्थिने दद्याद् मध्याह्ने तु जलाञ्जलिम् । गणेभ्योऽपि तथा दद्याज्जलमञ्जलिना सुधीः ॥ ८ ॥
तेन सन्तर्पितः शास्ता स्वाभीष्टफलदो भवेत् । अर्धरात्रे बलिं दद्याद्गायत्र्या चाभिमन्त्रितम् ॥ ९ ॥
अष्टोत्तरशतं जप्यान्मूलमन्त्रमनन्यधीः । भूताधिपाय चाभाष्य विद्महे पदमीरयेत् ॥ १० ॥
महादेवाय शब्दान्ते धीमहीति-पदं ततः । तन्नः शास्ता-पदं प्रोक्त्वा ततश्चैवं प्रचोदयात् ॥ ११ ॥
गायत्र्येषा समाख्याता सर्वाभीष्टप्रदा नृणाम् ।.... ....॥

इति शास्तृप्रकरणम् ॥ अथ वैवस्वतमन्त्रः—

अथ वक्ष्ये समासेन वैवस्वतमहामनुम् । यस्य विज्ञानमात्रेण नरकं नैव पश्यति ॥ १ ॥
प्रणवं चांकुशं मायां पाशं वरुणबीजकम् । ङेन्तं वैवस्वतपदं धर्मराजं तथा वदेत् ॥ २ ॥
भक्तानुग्रहकृत् ङेन्तं हृदन्तो जिनवर्णकः । ....॥

ओंक्रोंह्रींआंवं वैवस्वताय धर्मराजाय भक्तानुग्रहकृते नमः ॥ ४ ॥

वह्निनेत्रेषुबाणाद्रिनेत्रार्णैरङ्गकल्पना । नीलजीमूतसङ्काशं नृणां पुण्यवतां शुभम् ॥ ३ ॥
अशुभं पापकर्तॄणां नानाभरणभूषितम् । दण्डहस्तं च महिषारूढं पितृगणैर्वृतम् ॥ ४ ॥
दक्षिणाशाधिपं वीरं सूर्यपुत्रं सदा स्मरेत् । एवं ध्यात्वा जपेन्मन्त्रमष्टोत्तरशतं सुधीः ॥ ५ ॥
प्रत्यहं सर्वदुःखार्तिनाशनं नरकापहम् । सर्वसंपत्करं शत्रुनाशनं श्रीसुखावहम् ॥ ६ ॥

सिद्धमन्त्रत्वादृष्यादिकं नास्ति ॥ अथ चित्रगुप्तमन्त्रः—

प्रणवो हृदयं चैव विचित्रं ङेन्तमेव च । धर्मान्ते लेखकं ङेन्तं यमवान्ते हिकाधि च ॥ १ ॥
कारिणे यमलान्ते च वरयूं जन्म चेति च । संपदन्ते च प्रलयं कथय द्वेऽग्निवल्लभा ॥ २ ॥
अष्टात्रिंशार्णको मन्त्रश्चित्रगुप्तस्य दुःखहा । सप्ताङ्गनवनागाङ्गनेत्रार्णैरङ्गकल्पना ॥ ३ ॥

ॐनमो विचित्राय धर्मलेखकाय यमवाहिकाधिकारिणे यमलवरयूं जन्मसंपत्प्रलयं कथय २ स्वाहा ॥ (३८) ॥

किरीटिनं चित्रवस्त्रं चित्राभरणभूषितम् । विचित्रासनमासीनं पूर्णेन्दुसदृशाननम् ॥ ४ ॥
पापपुण्यानि जीवानां लिखन्तं पितृराट्सखम् ।···· ···· ···· ···· ····॥

ध्यायेदिति शेषः ।

सिद्धमन्त्रं जपेन्मर्त्यः प्रत्यहं नियतः शुचिः । चित्रगुप्तः प्रसन्नः सन् पुण्यमेव लिखेत्परम् ॥ ५ ॥
पापं न गणयेत्तस्य शुभं वितनुतेऽन्वहम् ।···· ···· ···· ···· ···· ····॥

इति ॥ अथ आसुरीमन्त्रः—

प्रणवं कटुके कटुवन्ते कान्त्रे सुभान्तगे । आसुर्यन्ते तु रक्ते च ततो वै रक्तवाससे ॥ १ ॥
अथर्वणस्य दुहिते अघोरेऽघोरकर्म च । कारिकेऽमुकशब्दान्ते स्यगति दहयुग्मकम् ॥ २ ॥
उपविष्टस्य तु गुदं दहयुग्मं च सुप्त च । स्यमनो दहयुग्मं च प्रबुद्धस्य हृदान्तके ॥ ३ ॥
यं दह द्वे हन द्वन्द्वं पच द्वे तावदन्तके । दह तावत्पचान्ते च यावन्मे वशमा-पदम् ॥ ४ ॥
याति वर्मास्त्रयुग्वह्निर्वल्लभान्तो मनुर्मतः । दशोत्तरशतार्णोऽयमासुर्या मन्त्रनायकः ॥ ५ ॥

ॐकटुके कटुकपत्रे सुभगे आसुरि रक्ते रक्तवाससे अथर्वणस्य दुहिते अघोरे अघोरकर्मकारिके अमुकस्य गतिं दहदह उपविष्टस्य गुदं दहदह सुप्तस्य मनो दहदह प्रबुद्धस्य हृदयं दहदह हनहन पचपच तावद्दह तावत्पच यावन्मे वशमायाति हुंफट् स्वाहा ॥ ११० ॥

अङ्गिरा मुनिराख्यातो विराट् छन्द उदाहृतम् । देवता चासुरी दुर्गा प्रणवो बीजमुच्यते ॥ ६ ॥
स्वहा शक्तिः समुद्दिष्टा दहयुग्मं तु कीलकम् । नवार्णैर्हृदयं प्रोक्तं षड्वर्णैः शिर ईरितम् ॥ ७ ॥
सप्तवर्णैः शिखा वर्म वसुवर्णैस्ततः परम् । रुद्रार्णैर्नेत्रमाख्यातं पञ्चषष्ट्या तथास्त्रकम् ॥ ८ ॥
वर्मास्त्रस्वाहयान्ते स्युरङ्गमन्त्राः षडेव हि । सरोजनिलयां देवीं शरच्चन्द्रप्रभां शिवाम् ॥ ९ ॥
वरदं चाभयं शूलमंकुशं दधतीं करैः । नागयज्ञोपवीतां च सर्वाभरणभूषिताम् ॥ १० ॥
अथर्वणसुतां घोरामासुरीं चिन्तयेद्बुधः । अयुतं प्रजपेन्मन्त्रं जुहुयात्तद्दशांशतः ॥ ११ ॥
राजिकाभिर्घृताक्ताभिस्ततः सिद्धो भवेन्मनुः । आसुर्याश्चैव पञ्चाङ्गं शतवाराभिमन्त्रितम् ॥ १२ ॥
तेन प्रधूपयेन्मन्त्री स्वात्मानं नियतो निशि । तद्गन्धाघ्राणतःसर्वे लोका वश्या भवन्ति हि ॥ १३ ॥
मधुरत्रयसंयुक्तामासुरीं जुहुयान्निशि । सहस्रसंख्यया सत्यं वशयेदखिलं जगत् ॥ १४ ॥

लवणदुर्गाप्रकरणे यावन्तः प्रयोगाः प्रोक्तास्तेऽत्रापि ज्ञेयाः ।

राजिका निम्बपत्राणि कटुतैलसमन्वितम् । नाम संयोज्य मन्त्रे तु जुहुयादेधितेऽनले ॥ १५ ॥
ज्वराक्रान्तो रिपुः सद्यो म्रियते नात्र संशयः । राजीं लवणसंयुक्तां हुत्वा स्फोटो भवेदरेः ॥ १६ ॥
अर्कदुग्धयुतां राजीं हुत्वान्धत्वं रिपोर्भवेत् । पलाशेन्धनदीप्ताग्नौ घृताक्तां राजिकां हुनेत् ॥ १७ ॥
ब्राह्मणा वशमायान्ति क्षत्रिया गुडयोगतः । दधियोगेन वैश्याः स्युः शूद्रा लवणयोगतः ॥ १८ ॥
आसुर्युपासकानां च नासाध्यं भुवनत्रये ।···· ···· ···· ···· ···· ····॥

इत्यासुरीप्रयोगः ॥ अथ कुबेरमन्त्रः—

कुबेरस्य मनुं वक्ष्ये सर्वसम्पत्प्रदायकम् । यक्षं ङेन्तं कुबेरं च तथा वैश्रवणाय च ॥ १ ॥
धनधान्याधिपतये धनधान्यपदं ततः । समृद्धिं मे देहि-पदं दापयाग्निवधूर्मतः ॥ २ ॥
पञ्चत्रिंशार्णको मन्त्रः कुबेरस्य महात्मनः ।···· ···· ···· ···· ···· ····॥

"यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा" ॥ (३९) ॥

विश्रवा मुनिराख्यातो बृहती च्छन्द एव च । कुबेरो देवता प्रोक्तो वह्न्यब्धिशरदन्तिभिः ॥ ३ ॥
नागाद्रिवर्णैर्मनुजैः षडङ्गविधिरीरितः । गारुत्मतशिलाकूटसंनिभं निधिनायकम् ॥ ४ ॥
किरीटहारकेयूरवलयाङ्गदभूषणम् । वरं गदां च दधतं नरवाहनसंपदम् ॥ ५ ॥
अलकानगराधीशं शिवमित्रं विचिन्तयेत् । जपेल्लक्षं दशांशेन तिलैराज्यपरिप्लुतैः ॥ ६ ॥
जुहुयात्पीठके शैवे पूजयेद्धननायकम् । अदावङ्गानि सम्पूज्य दिगीशांश्च तदायुधैः ॥ ७ ॥
अयुतं धनवृद्ध्यर्थं प्रजपेच्छिवसन्निधौ । तथा बिल्वतरोर्मूले जपेद् धनसमृद्धये ॥ ८ ॥

इति ॥ तथा मन्त्रान्तरम् ।

तारसम्पुटिता लक्ष्मीः मायया पुटिता रमा । कामेन पुटिता लक्ष्मीर्ङेन्तं वित्तेश्वरं नतिः ॥ १ ॥
महादारिद्र्यसंहर्ता षोडशार्णो मनुर्मतः । वह्निद्वियुगलद्वीपुयुग्मार्णैरङ्गकल्पना ॥ १ ॥
ध्यानपूजादिकं सर्वं प्राक्प्रोक्तविधिना चरेत् । ....॥

इति ॥ सारसंग्रहे––विश्वावसुमन्त्रः ।

अथ गन्धर्वराजस्य मन्त्रं विश्वावसोरहम् । प्रवक्ष्यामि समासेन कन्याप्रातिकरं शुभम् ॥ १ ॥
तारं विश्वावसुपदं नाम गन्धर्व उच्चरेत् । कन्यानामधिशब्दान्ते पतिर्यंत इतीरयेत् ॥ २ ॥
लभामि ते देव कन्यां सुवर्णालंकृतां ततः । अमुकनाम्नीं देहि शब्दं मे विश्वावसवे द्विठः ॥ ३ ॥
कन्याप्राप्तिकरो मन्त्रो गन्धर्वस्य त्विहेरितः । दशभिर्हृदयं प्रोक्तं नवभिश्च शिरो मतम् ॥ ४ ॥
अष्टभिश्च शिखा प्रोक्ता षड्भिः कवचमीरितम् । पञ्चभिर्नेत्रमाख्यातं दशभिश्चास्त्रमीरितम् ॥ ५ ॥
एभिर्विभक्तैर्मन्त्रार्णैर्जातियुक्तैः षडङ्गकम् । कराङ्गयोस्तु विन्यस्य ध्यायेद्गन्धर्वनायकम् ॥ ६ ॥

हस्ताब्दं विनिधाय पाणिकमले स्वीये तदीयं वरं
कन्यां प्रार्थयते वराय ददतं सद्वस्त्रभूषोज्ज्वलम् ।
कन्याभिः परितो वृतं नतमुखाम्भोजाभिरानन्दितं
नानाकल्पकलाकलापकलितं विश्वावसुं चिन्तयेत् ॥ ७ ॥

नाभिमात्रेऽम्भसि स्थित्वा जपेन्मन्त्रं समाहितः । चत्वारिंशत्सहस्राणि तद्दशांशं हुनेत्ततः ॥ ८ ॥
इक्षुखण्डयुतैर्लाजैर्घृताक्तैरेधितेऽनले । तर्पणं मार्जनं कृत्वा ब्राह्मणान् भोजयेत्ततः ॥ ९ ॥
एवं कृते मन्त्रसिद्धिर्भवत्येव न संशयः । पश्चिमाभिमुखो मन्त्री जपेन्मन्त्रमिमं नरः ॥ १० ॥
यामुद्दिश्य जपेत्कन्यां तां प्राप्नोति न संशयः । ....॥

इति ॥ शारदातिलके—शताक्षरमन्त्रः । (२३ । ३४)

गायत्रीत्रिष्टुबनुष्टुव्वर्णैः प्रोक्तः शताक्षरः । पूर्वोक्ता एव मुन्याद्याः परं तेजोऽत्र देवता ॥ १ ॥
हृत्त्रयोदशभिः प्रोक्तं रुद्रार्णैः शिर ईरितम् । द्वाविंशत्या शिखा प्रोक्ता तावद्भिः कवचं मतम् ॥ २ ॥
स्यात् पञ्चदशभिर्नेत्रमस्त्रं सप्तदशाक्षरैः । वर्णन्यासादिकं सर्वं कुर्यात्पूर्वोक्तवर्त्मना ॥ ३ ॥

सत्यं मानविवर्जितं श्रुतिगिरामाद्यं जगत्कारणं
व्याप्तं स्थावरजङ्गमं मुनिवरैर्ध्यातं निरुद्धेन्द्रियैः ।
अर्काग्नीन्दुमयं शताक्षरवपुस्तारात्मकं सन्ततं
नित्यानन्दगुणालयं परतरं वन्दामहे तन्महः ॥ ४ ॥

सौरे पीठे यजेत् सम्यग् वक्ष्यमाणविधानतः । आद्यामावृतिमभ्यर्चेत् षडङ्गैर्देशिकोत्तमः ॥ ५ ॥
गायत्रीशक्तिभिस्तस्त्रः पूजयेदावृतीः क्रमात् । आवृतिः पञ्चमी प्रोक्ता त्रिष्टुबुद्धृतशक्तिभिः ॥ ६ ॥
अनुष्टुप्शक्तिभिः प्रोक्तमावृतीनां चतुष्टयम् । इन्द्राद्यैर्दशमी प्रोक्ता वज्राद्यैस्तत्परा मता ॥ ७ ॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि विश्वामित्रकाश्यपवशिष्ठेभ्य ऋषिभ्यो नमः। मुखे गायत्रीत्रिष्टबनुष्टुप्छन्देभ्यो नमः। हृदये परतेजसे देवतायै नमः। इति ऋष्यादिकं विन्यस्य, मम सर्वाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, तत्सवितुर्वरेण्यं भर्गो देवस्य हृदयाय नमः। धीमहि धियो यो नः प्रचोदयात् शिरसे०। जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः शिखायै०। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः कवचाय०। त्रियम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं नेत्राभ्यां०। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् अस्त्राय फट्, इति मन्त्रैर्यथाविधि करषडङ्गन्यासं कृत्वा, वामपादांगुलिमूलयोः तत् नमः। गुल्फयोः सं०। जानुनोः वि०। उरुमूलयोः तुं०। लिङ्गे वं०। नाभौ रें०। हृदि णिं०। कण्ठे यं०। करांगुलिमूलयोः भं०। मणिबन्धयोः र्गों०। कूर्परयोः दें०। भुजमूलयोः वं:। मुखे स्यं०। नसोः धीं०। कपोलयोः मं०। नेत्रयोः हिं०। कर्णयोः धिं०। भ्रुवोः यों०। मस्तके यों०। चूडाधः पश्चिमवक्त्रे नः०। वामकर्णे उत्तरवक्त्रे प्रं०। दक्षकर्णे दक्षवक्त्रे चों०। मुखे पूर्ववक्त्रे दं०। शिरसि ऊर्ध्ववक्त्रे यात् नमः॥ दक्षपादांगुष्ठे जां नमः। वामे तं। दक्षगुल्फे वें०। वामे दं०। दक्षजङ्घायां सें०। वामे नुं०। दक्षजानुनि नं०। वामे वां०। दक्षोरौ मं०। वामे सों०। दक्षकट्यां मं०। वामे मं०। लिङ्गे रां०। नाभौ तीं०। हृदि यं०। दक्षस्तने तों०। वामे० निं०। दक्षपार्श्वे दं०। वामे हां०। पृष्ठे तिं०। दक्षस्कन्धे वें०। वामे दः०। दक्षबाहुमूले नं०। वामे नः०। दक्षबाहुमध्ये पं०। वामे रं०। दक्षकूर्परे पं०। वामे दं०। दक्षप्रकोष्टे तिं०। वामे दुं०। दक्षमणिबन्धे र्गां०। वामे णिं०। दक्षकरतले विं०। वामे श्वां०। मुखे नां०। दक्षनसि वें०। वामे वं। दक्षनेत्रे सिं०। वामे न्धुं०। दक्षकर्णे दुं०। वामे रिं०। ललाटे तां०। ललाटोपरि त्यं०। मूर्ध्नि ग्नि नमः। मुखे त्र्यं०। चडाधः वं। दक्षकर्णे कं०। वामे यं०। उरसि जां०। गले मं०। मुखे हें०। नाभौ सुं०। हृदि गं०। पृष्ठे धिं०। कुक्षौ पुं। लिङ्गे ष्टिं०। पायौ वं०। दक्षोरुमूले र्धं०। वामे० नं०। दक्षोरौ उं०। वामे र्वां०। दक्षजानुनि रुं०। वामे कं०। दक्षजानुनि वृत्ते मिं०। वामे वं०। दक्षस्तने वं०। वामे न्धं०। दक्षपार्श्वे नां०। वामे न्मृं०। दक्षपादे त्यों०। वामे र्मुं०। दक्षपाणितले क्षीं०। वामे यं०। दक्षनसि मां०। वामे मृं०। शिरसि तात् नमः॥ इत्यक्षरन्यासः॥ अथ पदन्यासः। शिरसि तत् नमः। भ्रूमध्ये सवितु०। नेत्रयोः वरेण्यं०। मुखे भर्गो०। कण्ठे देवस्य०। हृदि धीमहि०। नाभौ धियो०। गुह्ये यो०। जानुनोः नः०। पादयोः प्रचोदयात्०॥ शिखायां जातवेदसे नमः। ललाटे सुनवाम०। दक्षनेत्रे सोमं०। वामे अरातीयतः०। दक्षकर्णे नि०। वामे दहाति०। ओष्ठे वेदः०। अधरे स०। रसनायां नः०। कण्ठे पर्षत्०। बाह्वोः अति०। हृदि दुर्गाणि०। कुक्षौ विश्वा०। कटौ नावा०। गुह्ये इव०। उरुद्वये सिन्धुं०। जानुद्वये दुरिता। जङ्घयोः अति०। पादयोः अग्निः०॥ शिरसि त्र्यम्बकं नमः। भ्रूयुगे यजामहे०। नेत्रयोः सुगन्धिं०। मुखे पुष्टिवर्धनं०। गण्डयोः उर्वारुकं०। हृदि इव०। उदरे बन्धनात्०। गुह्ये मृत्योः०। ऊरुद्वये मुक्षीय०। जानुनोः मा०। पादयोः अमृतात् नमः॥ इति विन्यस्य, ध्यानाद्यात्मपूजान्ते प्रागुक्तं सौरपीठमभ्यर्च्य मूर्तिकल्पनाद्यङ्गपूजान्ते गायत्रीप्रकरणोक्ताः ब्रह्मादिन्याद्याश्चतुर्विंशतिशक्तीरावणत्रयस्थितास्तत्रोक्तप्रकारेणैवावरणत्रये तद्बहिश्चतुश्चत्वारिंशद्दलेषु प्रागुक्तजागराद्याः शक्तीस्त्रिष्टुप्प्रकरणोक्ताः सम्पूज्य तद्बहिरष्टदलद्वये प्रागुक्तानुष्टुभमन्त्रप्रकरणोक्ता रमाद्या द्वात्रिंशच्छक्तीः प्रतिकमलमावरणद्वयक्रमेण दलमध्यदलाग्रेषु सम्पूज्य तद्बहिर्लोकेशाद्यादि सर्वं प्राग्वत् कल्पयेदिति ॥ तथा—

लक्षमात्रं जपेदेनमयुतं पायसान्धसा। जुहुयाद् घृतसिक्तेन तर्पणादि ततश्चरेत् ॥ ८ ॥
एवं सिद्धे मनौ मन्त्री भवेद्भास्करसन्निभः। सुधालतोद्भवैः खण्डैर्जुहुयात् क्षीरसंयुतैः ॥ ९ ॥
दीर्घमायुरवाप्नोति निराधिर्व्याधिवर्जितः। दूर्वाभिर्घृतसिक्ताभिस्तदेव फलमाप्नुयात् ॥ १० ॥

मधुरत्रयसंयुक्तैर्जुहुयादरुणाम्बुजैः । महालक्ष्मीमवाप्नोति षड्भिर्मासैर्विधानवित् ॥ ११ ॥
रक्तोत्पलैस्त्रिमध्वक्तैर्जुहुयात् सर्वसम्पदे । श्रीप्रसूनैः प्रजुहुयाद्रमाया वसतिर्भवेत् ॥ १२ ॥
सहस्रं जुहुयान्नित्यं मासमेकं तिलैः शुभैः । भानुसंख्यान् द्विजान् नित्यं भोजयेन्मधुरान्वितैः ॥ १३ ॥
सर्वपापविनिर्मुक्तः सर्वरोगविवर्जितः । कृत्योद्रोहग्रहान् रोगान् जित्वा दीर्घं स जीवति ॥ १४ ॥
प्रातः स्नानरतो मन्त्री जपेन्नित्यं शतं शतम् । भानुमालोकयन् सम्यक् स जीवेच्छरदां शतम् ॥ १५ ॥
नित्यमष्टोत्तरशतं निःश्रेयसफलाप्तये । गायत्र्याद्यं जपेन्मन्त्रं सर्वपापविमुक्तये ॥ १६ ॥
सर्वशत्रुविनाशाय त्रिष्टुबाद्यं जपेदमुम् । अनुष्टुबाद्यं प्रजपेदायुरारोग्यसिद्धये ॥ १७ ॥
शताक्षरो मनुः प्रोक्तः समस्तपुरुषार्थदः ।

इति श्रीमहामहोपाध्यायाचार्य्यवर्य-भगवत्पूज्यपाद-श्रीगोविन्दाचार्यशिष्य-श्रीभगवच्छङ्कराचार्य-शिष्य-श्रीविष्णुशर्माचार्यशिष्य-श्रीप्रगल्भाचार्यशिष्य-श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे द्वात्रिंशः श्वासः ॥ ३२ ॥

अथ

त्रयस्त्रिंशः श्वासः

श्रीयन्त्रसारे—(शताक्षरमनुयन्त्रम् ।)

कर्णिकायां लिखेत्तारं व्याहृतीभिः समावृतम् । कोणेषु षट्सु पञ्चार्णान् प्रणवाद्यं दलेष्वथ ॥ १ ॥
पूर्वार्धमाद्ये गायत्र्यास्त्रैष्टुभार्धं द्वितीयके । अनुष्टुबस्याद्यमर्धं तृतीये च चतुर्थके ॥ २ ॥
ॐह्रींठंवंकंसंहंसः जूंसः सोहं वंठं नमः । शिवाय मां पालय संकंवंठंह्रींध्रुवाक्षरान् ॥ ३ ॥
आलिख्य पञ्चमेऽनुष्टुबपरार्धं च षष्ठके । त्रिष्टुभश्चापरार्धं च गायत्र्या अपरार्धकम् ॥ ४ ॥
सप्तमे च दले तारमापो ज्योतीरसोऽमृतम् । ब्रह्म भूर्भुवरित्यन्ते स्वरोमिति दलेऽष्टमे ॥ ५ ॥
आलिख्य मातृकार्णाद्यद्वृत्तेनावेष्टय तद्बहिः । चिन्तामणिलसत्कोणं भूपुरं च समालिखेत् ॥ ६ ॥
शताक्षरमनोर्यन्त्रमेतद्यो धारयेन्नरः । पुत्रारोग्यधराधान्यधनकोशौघशालिनीम् ॥ ७ ॥
लब्ध्वातिबहुलां लक्ष्मीं स जीवेच्छरदः शतम् । ताम्रादिपट्टेष्वालिख्य जप्त्वा चाष्टोत्तरं शतम् ॥ ८ ॥
हुत्वा घृतेन तावत्तु सिक्थसम्पातमेव च । भूयोऽपि तावज्जप्त्वा च पुरग्रामाकरादिषु ॥ ९ ॥
स्थापितं यन्त्रमेतत्तु गोसस्यारोग्यपुष्टिदम् । कुर्याच्च रक्षां तेनारिव्याघ्रादिभयतः सदा ॥ १० ॥

इति ॥ अस्यार्थः—तत्राष्टदलकमलमध्यगतषट्कोणमध्ये ससाध्यं तारं विलिख्य तत्सप्तव्याहृतिभिरावेष्टय, षट्कोणेषु प्रणवादिशिवपञ्चाक्षरस्यैकैकमक्षरमालिख्याष्टदलेषु प्रथमदले गायत्र्याः पूर्वार्धं, द्वितीयदले त्रिष्टुभः प्रथमार्धं, तृतीयेऽनुष्टुप्प्रथमार्धं, चतुर्थे ॐह्रींठंवंकंसंहंसः जूंसः सोहं वंठं नमः शिवाय मां पालय संकंवंठंह्रींॐ इति मन्त्रं विलिख्य, पञ्चमेऽनुष्टुम्मन्त्रस्योत्तरार्धं विलिख्य, षष्ठे त्रिष्टुम्मन्त्रस्योत्तरार्धं, सप्तमे गायत्र्युत्तरार्धं, अष्टमे आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवःस्वरोमिति विलिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकावर्णैरावेष्टय, तद्बहिश्चतुरस्रकोणेषु पूर्वोक्तचिन्तामणिं विलिख्योक्तविधिना धारणादुक्तफलसिद्धिर्भवति ॥ इति ॥

तथा शारदातिलके—(२३–५२) वरुणऋग्विधानम् ।

ऋचो विधानं वारुण्या यथावदभिधीयते । ऋग्वेदे सा समुद्दिष्टा ध्रुवास्वाद्या मनीषिभिः ॥ १ ॥

"ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्यस्मत्पाशं वरुणो मुमोचत् ।
अवो वन्वना अदितेरुपस्थाद्ययं पात स्वस्तिभिः सदा नः" ॥ (७–८८–७)

वसिष्ठोऽस्य मुनिः प्रोक्तश्छन्दस्त्रिष्टुबुदाहृतम् । वरुणो देवता प्रोक्तस्तद्वर्णैरङ्गकल्पना ॥ २ ॥
अष्टभिर्हृदयं प्रोक्तं सप्तभिः शिर ईरितम् । शिखा षड्वर्णकैः प्रोक्ता वस्वर्णैः कवचं मतम् ॥ ३ ॥
सप्तभिः नेत्रमाख्यातमस्त्रं षड्भिरुदाहृतम् । साग्रेषु सन्धिषु पदोर्गुदान्ध्वाधारनाभिषु ॥ ४ ॥
कुक्षौ पृष्ठे हृदि कुचे गले बाह्वग्रसन्धिषु । वक्त्रे कपोलनासाक्षिकर्णभ्रूमध्यमस्तके ॥ ५ ॥
शिरः सर्वाङ्गयोर्न्यस्येन्मन्त्रवर्णान् यथाविधि ।.... ....॥

चन्द्रप्रभं पङ्कजसन्निषण्णं पाशांकुशाभीतिवरं दधानम् ।
मुक्ताविभूषाञ्चितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै ॥ ६ ॥

धर्मादिकल्पिते पीठे वरुणं सम्यगर्चयेत् । कृत्वाङ्गपूजनं शेषं वासुकिं तक्षकं पुनः ॥ ७ ॥

कर्कोटकं तथा पद्मं महापद्मं ततः परम् । शङ्खपालाख्यकुलिकौ सम्यक् पत्रेषु पूजयेत् ॥ ८ ॥
इन्द्राद्यानायुधान्येषामर्चयेत् तदनन्तरम् ।···· ···· ···· ··· ····॥

इति ॥ अथ प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलमन्त्रेण प्राणायामत्रयं कृत्वा शिरसि वसिष्ठाय ऋषये नमः । मुखे त्रिष्टुप्छन्दसे नमः । हृदि वरुणाय देवतायै नमः । इति विन्यस्य सर्वाभीष्टप्राप्तये विनियोगः इति कृताञ्जलिरुक्त्वा, ध्रुवासु त्वासु क्षितिषु हृदयाय० । क्षियन्तो व्यस्मत्पाशं शिरसे० । वरुणो मुमोचत् शिखायै० । अवो वन्वाना अदितेः कवचाय० । उपस्थाद्यूयं पात नेत्रत्रयाय० । स्वस्तिभिः सदा नः अस्त्राय० । इति मन्त्रैः करषडङ्गन्यासं विधाय, दक्षपादाग्रे ध्रुं नमः । वामे वां० । दक्षपादाङ्गलिमूले सुं० । वामे त्वां० । दक्षगुल्फे सुं० । वामे क्षि० । दक्षजानुनि तिं० । वामे षुं० । दक्षोरुमूले क्षि० । वामे यं० । गुदे तों० । लिङ्गे व्यं० । मूलाधारे स्मत्० । नाभौ पां० । कुक्षौ शं० । पृष्टे वं० । हृदि रुं० । कुचयोः णों० । गले मुं० । दक्षकराग्रे मों० । वामे चत्० । दक्षकराङ्गलिमूले अं० । वामे वों० । दक्षमणिबन्धे वं० । वामे न्वां० । दक्षबाहुमूले नां० । वामे अं० । दक्षकूर्परे दिं० । वामे तें० । मुखे रुं० । दक्षकपोले पं० । वामे स्थां० । दक्षनासायां यूं० । वामायां यं० । दक्षनेत्रे पां० । वामे तं० । दक्षकर्णे स्वं० । वामे स्ति० । भ्रूमध्ये भिः० । ललाटे सं० । शिरसि दां० । सर्वाङ्गे नं नमः । इति विन्यस्य, ध्यानाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठं सम्पूज्य, वं वरुणपीठाय नमः इति समस्तं पीठं सम्पूज्य पीठशक्तिरहिते तस्मिन् पीठे च वरुणमावाह्य, प्राणप्रतिष्ठान्ते पाशांकुशवराभीतिमुद्राः प्रदर्श्य, आसनाद्यङ्गपूजान्तेऽष्टदलेषु देवाग्रादिप्रादक्षिण्येन ॐ शेषाय नमः । एवं वासुकये० । तक्षकाय० । कर्कोटकाय० । पद्माय० । महापद्माय० । शङ्खपालाय० । कुलिकाय० । इति सम्पूज्य लोकेशार्चादि सर्वं कुर्यादिति ॥ तथा—

लक्षमेकं जपेन्मन्त्रं पायसेन दशांशतः । सर्पिःसिक्तेन जुहुयात्तर्पणादि ततश्चरेत् ॥ ९ ॥
ऋणमुक्त्यै जपेन्मन्त्रं प्रत्यहं साष्टकं शतम् । जपेनानेन लभते महतीमव्ययां श्रियम् ॥ १० ॥
सितेक्षुशकलैर्मन्त्री जुहुयाद् घृतसंप्लुतैः । चतुर्दिनं दशशतं ऋणमुक्त्यै महाश्रिये ॥ ११ ॥
समिद्भिर्वेतसोत्थाभिः क्षीराक्ताभिर्दिनत्रयम् । जुहुयाद् वृष्टिसंसिद्ध्यै मन्त्रविद् विजितेन्द्रियः ॥ १२ ॥
अनेन विधिना मन्त्री सूर्ये शतभिषं गते । चतुःशतं घृतयुतं पायसं जुहुयाद्वशी ॥ १३ ॥
ऋणनाशाय सम्पत्त्यै वश्यारोग्याभिवृद्धये । भृगुवारे कृतो होमः पायसेन सर्सर्पिषा ॥ १४ ॥
महतीं सम्पदं कुर्यान्नाशयेत्सकलापदः । शालिभिर्घृतसंसिक्तैः सरिदन्तिरितः सुधीः ॥ १५ ॥
त्र्यहं चतुःशतं हुत्वा स्तम्भयेत् परसैन्यकम् । सायं प्रत्यङ्मुखो वह्निमाराध्य प्रजपेन्मनुम् ॥ १६ ॥
चतुःशतं विमुच्येत मन्त्री सर्वैरुपद्रवैः । मन्त्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैर्जलैः ॥ १७ ॥
सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये । बहुना किमिहोक्तेन मन्त्रेणानेन साधकः ॥ १८ ॥
साधयेत्सकलान् कामाञ्जपहोमादितत्परः । ध्रुवासु त्वासु क्षितिषु जपन् बन्धात्प्रमुच्यते ॥ १९ ॥
तिष्ठन् रात्रौ जपेदेतां विकासः सम्प्रपद्यते । अहोरात्रं स्थितश्चैवमनश्नन् स्याद्विवोत्थितः ॥ २० ॥
अयः पाशाः स्फुटन्त्यस्य दारुपाशास्तथैव च ।···· ···· ···· ···· ····॥

श्रीयन्त्रसारे—

षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि । षडर्णमष्टपत्रे च केसरेषु स्वरांल्लिखेत् ॥ १ ॥
पञ्चषडवेदषट्पञ्चषट्चतुःषट्क्रमान्मनोः । ध्रुवास्वाद्यस्याक्षराणि बहिः पर ऋणेत्यृचा ॥ २ ॥
हलिभश्चावेष्ट्य भूगेहे कोणे वंबीजमालिखेत् । ऋणमोचनमेतत्तु यन्त्रं सर्वसमृद्धिदम् ॥ ३ ॥
सर्वरक्षाकरं वश्यं सर्वचोरविनाशनम् । किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं नृणाम् ॥ ४ ॥

इति ॥ अस्यार्थः—तत्राष्टदलस्थषट्कोणमध्ये ससाध्यं प्रणवं विलिख्य, षट्कोणेषु वरुणाय नमः इति

मन्त्रस्यैकैकमक्षरं विलिख्य, केसरेषु द्वन्द्वशः स्वरान् विलिख्याष्टदलेषु ध्रुवास्वाद्यस्य मन्त्रस्य वर्णान् पञ्चषड्वेदेति क्रमेण विभज्य विलिख्य, बहिर्वृत्तयोरन्तराले परऋणेत्यृचा वेष्टयित्वा तद्बहिर्वृत्तवीथ्यां ककारादिक्षकारान्तैरावेष्टय तद्बहिश्चतुरस्रकोणेषु वंबीजं विलिखेत् । एतद्यन्त्रं साधितं धृतमुक्तफलदं भवति ।

पर ऋण सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजं ।
अव्युष्टा इन्नु भूयसी रुषास आ नो जीवान् वरुण तासु शाधि ॥ (२-२८-९)

अस्या ऋष्यादिकं कूर्मो वरुणस्त्रिष्टुप् । श्रीयन्त्रसारे—

कर्णिकायां लिखेत्तारं क्रमात्पत्रेषु चाष्टसु । पिशङ्गभृष्टि-मन्त्रस्य त्रीणि त्रीण्यक्षराणि च ॥ ५ ॥
रक्षोहणं वाजिनमित्यचा मातृकयापि च । अया त इत्यृचा चैव भूपुरेण च वेष्टयेत् ॥ ६ ॥
एतद्यन्त्रं ज्वरोन्मादग्रहपीडादिनाशनम् । इदमेव समालिख्य वसने गैरिकादिभिः ॥ ७ ॥
तेन प्रावृतदेहं च ज्वरः सद्यो विमुञ्चति ।···· ···· ···· ···· ····॥

अयमर्थः—अष्टदलकमलकर्णिकायां ससाध्यं तारं विलिख्याष्टसु दलेषु वक्ष्यमाण "पिशङ्गभृष्टि" मन्त्रस्यत्रीण त्रीण्यक्षराणि विभज्य विलिख्य, तद्बहिर्वृत्तचतुष्टयान्तरालस्य वीथीत्रये प्रथमवीथ्यां रक्षोहणं वाजिनमित्यृचा तद्बहिर्वीथ्यां मातृकार्णैस्तद्बहिर्वीथ्यां अयाते अग्ने-इत्यृचा च संवेष्ट्य तद्बहिश्चतुरस्रं कुर्यात् । एतद्यन्त्रमुक्तफलदं भवति । ऋचस्तु—

पिशङ्ग भृष्टिमंभृणं पिशाचिमिन्द्र संमृण । सर्वं रक्षो नि बर्हय ॥ (१-१३३-५)
रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥ (१०-८७-१)
अया ते अग्ने समिधा विधेम स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात् ॥ (४-४-१५)

पिशङ्गभृष्टिमन्त्रस्य परुच्छेप ऋषिः गायत्री च्छन्दः इन्द्रो देवता ॥ रक्षोहणमित्यस्य पायुर्भरद्वाज ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता, रक्षोघ्नं हि ॥ अया ते मन्त्रस्य वामदेव ऋषि त्रिष्टुप्छन्दः रक्षोहाग्निर्देवता ॥ तथा—

अष्टपत्रस्य पद्मस्य कर्णिकायां विलिख्य च । तारं पत्रेषु मन्त्रार्णांश्चतुरश्चतुरः क्रमात् ॥ ८ ॥
मातृकार्णैः समावेष्ट्य क्ष्रौंबीजं कुगृहाश्रिषु । आलिख्य यन्त्रमेतत्तु धारयेद् यो यथाविधि ॥ ९ ॥
कृत्याभिभवनिर्मुक्तः स जीवेच्छरदः शतम् ।···· ···· ···· ···· ···· ····

अयमर्थः—अष्टदलकमलकर्णिकायां ससाध्यं प्रणवं विलिख्य, अष्टदलेषु वक्ष्यमाणाया "यां कल्पयन्ती" त्यृचो वर्णान् प्रतिदलं चतुरश्चतुरो विभज्य विलिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैः संवेष्ट्य बहिश्चतुरस्रकोणेषु क्ष्रौं इति नृसिंहबीजं विलिखेत् । एतद्यन्त्रमुक्तफलदं भवति । मन्त्रस्तु—

यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव । तां ब्रह्मणापनिर्णुद्मः प्रत्यक्कर्तारमृच्छतु ॥ १ ॥

अस्य मन्त्रस्य प्रत्यङ्गिरा ऋषिः, अनुष्टुप्छन्दः प्रत्यङ्गिरा देवता ॥ तथा—

कर्णिकायां साध्यगर्भं तारं पत्रेषु षट्स्वपि । कृणुष्वेत्याद्यमर्धं च दधर्षीदन्तमालिखेत् ॥ १० ॥
तद्बाह्येऽष्टसु पत्रेषु ह्युदग्नेत्याद्यृचां क्रमात् । अर्धमर्धं सासदिष्टिरित्यन्तं षोडशस्वथ ॥ ११ ॥
पत्रेष्वर्चाम्याद्यवद्यादन्तं चर्चां यथाक्रमम् । अर्धमर्धं समालिख्य बाह्ये रक्षोहणाद्यया ॥ १२ ॥
वि ज्योषिषेत्यृचा भूयस्तद्वदेव च वेष्टयेत् । मातृकार्णैः समावेष्ट्य भूपुरेण च वेष्टयेत् ॥ १३ ॥
रुचकादिषु भूषासु सम्यक् संयोज्य धारणात् । यन्त्रमेतद् ग्रहोन्मादज्वरकृत्याद्युपद्रवान् ॥ १४ ॥
नाशयेदथवा वस्त्रे कुंकुमाद्यैर्विलिख्य च । जप्त्वा तत्प्रावृतो यस्तु ज्वरः सद्यो विनश्यति ॥ १५ ॥

इति। अस्यार्थः—षड्दलकमलकर्णिकायां ससाध्यं तारं विलिख्य, षड्दलेषु कृणुष्व पाज इत्यारभ्य व्यथिरादधर्षीदित्यन्तस्य ऋक्त्रयस्यार्धषट्कं विलिख्य, तद्बाह्येऽष्टदलेषु उदग्ने तिष्ठेत्यादि सुदिना सासदिष्टिरित्यन्तस्य ऋक्चतुष्टयस्यार्धमर्धं विलिख्य, तद्बहि, षोडशदलेषु अर्चामि ते इत्यादि मित्रमहो अवद्यादित्यन्तस्य ऋगष्टकस्यार्धमर्धं विलिख्य, तद्बाह्ये वृत्तचतुष्टयान्तर्गतान्तरालत्रये प्रथमे रक्षोहणं वाजिनमित्यृचा पूर्वोक्तया, द्वितीये विज्योतिषा बृहतेत्याद्यया ऋचा, तृतीये मातृकया च संवेष्ट्य तद्बहिश्चतुरस्रं कुर्यात्। एतदुक्तफलदं भवतीति ॥ ऋचस्तु—(४ । ४ । १)

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ १ ॥
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्वगुल्काः ॥ २ ॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ ३ ॥
उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ ओषतात् तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं ॥ ४ ॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥ ५ ॥
स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥ ६ ॥
सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ ७ ॥
अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ ८ ॥
इह त्वा भूर्या चरेदुप त्मन् दोषावस्तर्दीदिवांसमनु द्यून् ।
क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥ ९ ॥
यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग् जुजोषत् ॥ १० ॥
महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ ११ ॥
अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर ॥ १२ ॥
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान् सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ १३ ॥
त्वया वयं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान् ।
उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥ १४ ॥
अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात् ॥ १५ ॥ इति ।

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥(१०-८७-१)
वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ (५-२-९)

इति ॥ कृणुष्व पाज इत्यस्य पञ्चदशर्चस्य रक्षोघ्नस्य वामदेव ऋषिः, त्रिष्टुप्छन्दः रक्षोहाग्निर्देवता । वि ज्योतिषेत्यस्य कुमार ऋषिस्त्रिष्टुप्छन्दः, अग्निर्देवता ॥ तथा—

कर्णिकायां लिखेत्तारं मनोः पत्रेषु चाष्टसु । पञ्चषट्पञ्चषट्पञ्चरसभूतषडर्णकान् ॥ १ ॥
(इन्द्र श्रेष्ठेत्यृचो वर्णान् विभज्य तु विलिख्य च) । वयं त एभिर्मातृकया भूपुरेण च वेष्टयेत् ॥ २ ॥
इन्द्र श्रेष्ठानि मन्त्रस्य यन्त्रं सर्वसमृद्धिदम् । आयुरारोग्यसौभाग्यधनधान्यसुतप्रदम् ॥ ३ ॥
सर्वरक्षाकरं वश्यं सुदिनत्वयशस्करम् । किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं परम् ॥ ४ ॥

अयमर्थः—अष्टदलमध्ये ससाध्यं प्रणवं विलिख्याष्टसु पत्रेषु पञ्च षट् पञ्च षट् पञ्च षट् पञ्च षट् इति क्रमेण इन्द्र श्रेष्ठानीत्यृचो वर्णान् विभज्य विलिख्य, तद्बहिर्वृत्तान्तरालयोः प्रथमे "वयं त एभि" रित्यृचा वक्ष्यमाणया द्वितीये मातृकया च संवेष्टय तद्बहिश्चतुरस्रं कुर्यात् । एतदुक्तफलदं भवति । ऋक् तु—(२।२१।६)

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥ १ ॥

इन्द्र श्रेष्ठानि मन्त्रस्य गृत्समद ऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता । एतस्यैव यन्त्रान्तरमाह—

प्रणवभास्वरमध्यमथो बहिर्वसुदले स्वरसंयुतकेसरे ।
अयुजि पञ्चगुहाननशो युजि प्रविलिखेच्च मनो क्रमशोऽर्णकान् ॥ ५ ॥
अभिवृतं खलु कादिभिरक्षरैर्धरणिगेहयुगाश्रिगमन्मथम् ।
धनधरासुभगत्वमनोज्ञतां मधुरवाग्वररत्नयशःश्रियम् ॥ ६ ॥
सुदिनतां च तनोति परं नृणां बलनिषूदनयन्त्रमिदं धृतम् ।

गुहाननशः षट्षट्संख्यया । अस्यार्थः—प्रागुक्त एव यन्त्रे केसरेषु युगशः स्वरान् विलिखेत्, कादिक्षान्तैरावेष्टत् । अत्र पूर्वयन्त्रोक्तऋग्वेष्टनं नास्ति, अष्टकोणेषु कामबीजं विलिखेत् । वासोऽलङ्कारभूषणमिष्टभोजनस्वेष्टजनदर्शनप्राप्तिः सुदिनत्वम् । तथा—

विलिख्य कर्णिकान्तरे ध्रुवं दलाष्टके मनोः । षडर्तुवेदषट्शरत्रयीस्वरेन्द्रियाक्षरान् ॥ ७ ॥
लिखेच्च मातृकाक्षरैर्धरापुरेण चावृतम् । वयं त एभिरित्यृचः सुयन्त्रमेतदिष्टदम् ॥ ८ ॥
विशिष्टरत्नगोधरासुवर्णधान्यशालिनीम् । वितीर्य सम्पदं परां रिपुक्षयं च यच्छति ॥ ९ ॥

अस्यार्थः—अष्टदलकमलकर्णिकायां ससाध्यं प्रणवं विलिख्य तद्दलेषु वयं त एभिरित्यृचो वर्णान् षट् षट् चतुः षट् पञ्च चतुः सप्त पञ्च–क्रमेण विभज्य विलिख्य, तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैरावेष्टय तद्बहिश्चतुरस्रं कुर्यात् । एतदुक्तफलदं भवति । मन्त्रस्तु–(६ । १९ । १३)

वयं त एभिः पुरुहूत सख्यैः शत्रोः शत्रोरुत्तर इत्स्याम ।
घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः ॥ १ ॥

वयं त एभिरिति मन्त्रस्य भरद्वाज ऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता ॥ श्रीयन्त्रसारे—

आलिख्य वीप्सितं यन्त्रं बीजं तत्कर्णिकान्तरे । तस्योदरे समिति च बीजं साध्यार्णवेष्टितम् ॥ १ ॥
बीजस्य पार्श्वयोर्दृष्टी इईं इति च तत्पुरः । जिह्वां सधूमिति दिक्ष्वेतान् सोऽहं हंसार्णकान्बहिः ॥ २ ॥

प्राणप्रतिष्ठामन्त्रं च गायत्रीं मन्त्रयन्त्रयोः । यथावकाशं विलिखेत्स्वगुरूक्तेन वर्त्मना ॥ ३ ॥

इति ॥ सारसंग्रहे—

गुलिकीकृत्य यन्त्रं च लाक्षालोहत्रयावृतम् । कृत्वा प्रतिष्ठितप्राणं सिक्तं सम्पातसर्पिषा ॥ १ ॥
विन्यस्य कलशे यन्त्रस्थापिते विधिवद्गुरुः । तत्रावाह्य यजेत्सम्यक् तत्र यन्त्रस्य देवताम् ॥ २ ॥
तत्कुम्भोदकसिक्ताय वितरेद् यन्त्रमादरात् । गृहीत्वा गुरुणा दत्तं यन्त्रं भव्यः प्रसन्नधीः ॥ ३ ॥
बिभृयादुक्तविधिना विश्वस्तः सर्वसिद्धये । चन्दनागुरुकर्पूरकस्तूरीरोचनान्वितः ॥ ४ ॥
मदः करिभवो लाक्षारसकुंकुमसंयुतम् । यन्त्रलेखनद्रव्याणि क्रूरेष्वष्टविषाणि च ॥ ५ ॥
लवणोषणमेहाम्बुगृहधूमाग्निसंयुतः । श्मशानाङ्गारनिम्बोत्थनिर्यासो विषमीरितम् ॥ ६ ॥

उषणमूषर. मेहाम्बु प्रस्रवः, अग्निश्चित्रकम् ।

त्रिलोहभूर्जपत्राणि क्षौमतालदलानि च । तत्तत्कल्पोदितानि स्युर्यन्त्राधिकरणानि च ॥ ७ ॥

इति अथैतत्प्रयोगः—तत्र सुदिने शुभे मुहूर्ते चन्द्रताराद्यनुकूले साधकः कृतनित्यक्रिय श्रीगुरुं प्रणम्य विघ्नेश्वरं समभ्यर्च्य, पूर्वोक्तवारेशद्वयतिथीशनक्षत्रेशान् सम्पूज्य, स्वाभिमतं यन्त्रं वर्णविन्यासमन्तरेण विरच्य, तन्मध्ये लेख्यं बीजं विपुलतरोदरं विलिख्य, समिति जीवबीजं विलिख्य तद्बीजं साध्यनामाक्षरैः संवेष्ट्य, पूर्वलिखितबीजाद्बहिस्तद्दक्षवामपार्श्वयोः इंईं इति दृष्टिद्वयं विलिख्य, तत्पुरतः स्यूमिति जिह्वाबीजं विलिख्य, तस्य प्रागादिदिक्षु सोऽहंहंस इति प्रादक्षिण्येनैकैकमक्षरं विलिख्य, तदनु यथास्थानं साधककर्मादि तत्तत्कल्पोक्तं सर्वं विलिख्य सर्वान्ते प्राणप्रतिष्ठामन्त्रं मन्त्रगायत्रीं यन्त्रगायत्रीं च यथावकाशं लिखेत् । तत्र प्राणप्रतिष्ठा मन्त्रः प्रागेवोक्तः । मन्त्रगायत्री तत्तत्कल्पोक्ता द्रष्टव्या । यन्त्रगायत्री तु—ॐ यन्त्रराजाय विद्महे देवगृहाय धीमहि तन्नो यन्त्रं प्रचोदयात् । इतीत्थं यन्त्रं विलिख्य लाक्षालोहत्रयवेष्टितं क्वचित संस्थाप्य, स्वासन-पूजादिन्यासजालं विधाय, यन्त्रस्य यन्त्रलिखितमन्त्रगणस्य साध्यस्य च पृथक्पृथक् प्राणप्रतिष्ठां कृत्वा, तत्र तद्योगपीठपूजापूर्वकं यन्त्राधिदेवतामावाह्य साङ्गां सावरणां सम्पूज्य, तद्यन्त्रं स्पृशन् मूलविद्यां देवताध्यान-पूर्वकं लक्षाद्ययुतावधि कार्यस्य गौरवलाघवं विज्ञाय जपित्वा, कुण्डादावग्निं संस्कृत्य गोघृतेनायुतादिसहस्रान्तं यन्त्रे हुतशेषं स्रुवलग्नं सम्पातयन् हुत्वा, तत्तद्यन्त्रे सर्वतोभद्रमण्डले वा दीक्षोक्तविधिना कुम्भं संस्थाप्य, यन्त्र देवतां साङ्गां सावरणां सम्पूज्य तेन जलेनाभिषिक्ताय यन्त्रं दद्यात् । सोऽपि प्रणामपूर्वकं यन्त्रमादायाचार्य-तोषणं कृत्वा सुसंहृष्टो विश्वासपूर्वकं धारयेत् । तेन सर्वाभीष्टसिद्धयो भवन्तीति ॥ तथा—

आ कृष्णेनेत्यृचा तारं कर्णिकामध्यसंस्थितम् । साध्यगर्भं समावेष्ट्य प्राग्दले विलिखेत्पुनः ॥ १ ॥
आप्यायस्वेत्यृचा याम्ये उद्बुध्यस्वेति पश्चिमे । बृहस्पतेरृचा सौम्ये प्र वः शुक्राय इत्यपि ॥ २ ॥
आग्नेकोणगे पत्रे अग्निर्मूर्धेति नैर्ऋते । शन्नोदेवीत्यृचं पत्रे पत्रे वायव्यकोणगे ॥ ३ ॥
कया नेति तथैशाने केतुं कृण्वेत्यृचं दले । तद्बाह्ये मातृकावर्णैः सम्वेष्ट्य कुगृहास्त्रिषु ॥ ४ ॥
ॐ ह्रींहंसाक्षरान् दिक्षु सोऽहंहंसाक्षरांल्लिखेत् । स्वर्णादिपट्टे ष्वालिख्य यन्त्रमेतद् यथाविधि ॥ ५ ॥
अभिषिक्तः शुभैस्तोयैः कृतपुण्याहमङ्गलः । कर्णिकायां क्रमादर्च्याः प्रागाद्यष्टदलेषु च ॥ ६ ॥
सूर्यचन्द्रारसौम्यार्किजीवाहिभृगुकेतवः । सुजप्तं सिक्तसम्पातं स्वमन्त्रैश्च यथाविधि ॥ ७ ॥
ग्रहपीडाप्रशमनं कृत्याज्वरविनाशनम् । सर्वामयहरं दिव्यं समरे विजयप्रदम् ॥ ८ ॥
आयुष्करं पुत्रदं च परचक्रविनाशनम् । किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं नृणाम् ॥ ९ ॥

एतस्यायमर्थः—अष्टदलकमलकर्णिकायां ससाध्यं प्रवणं विलिख्य आ कृष्णेनेत्यृचा संवेष्ट्य, पूर्वदले आप्यायस्वेति, याम्ये उद्बुध्यस्वेति, पश्चिमे बृहस्पते अतीति, उत्तरदले प्र वः शुक्रायेति, आग्नेयदले अग्नि-मूर्धेति, नैर्ऋत्ये शन्नो देवीरिति, वायव्ये कया नश्चित्र इति, ईशानदले केतुं कृण्वन्निति मन्त्रान् विलिख्य,

तद्बाह्ये वृत्तद्वयान्तराले अकारादिक्षकारान्तमातृकावर्णैरावेष्टच, तद्बहिर्भूपुरे आग्नेयादिकोणेषु ॐह्लींहंसः इति प्रतिकोणं विलिख्य पूर्वादिचतुर्दिक्ष सोहंहंसः इति प्रतिदिशं विलिखेत् । एतद्यन्त्रं प्रोक्तविधिना धारयेत् प्रोक्तफलदं भवतीति ॥

अथ वेदोक्तनवग्रहविधानम् । तत्र स्मृतिसंग्रहे—

विधानं ग्रहमन्त्राणां वक्ष्ये सर्वसमृद्धिदम् । आ कृष्णेन सहस्रांशोरिमं देवा तथेन्दवे ॥ १ ॥
अग्निर्मूर्धेति भौमाय उद्बुध्यस्व बुधाय च । बृहस्पतेति च गुरोः शुक्रायान्नात्परिस्रुतः ॥ २ ॥
शनैश्चरस्य मन्त्रोऽयं शन्नो देवीरुदाहृतः । कया न इति राहोश्च केतुं कृण्वंस्तु केतवे ॥ ३ ॥
आप्यायस्वेति चेन्दोश्च शुक्रंत इति वा भृगोः । नव मन्त्राः समुद्दिष्टाः सर्वे व्याहृतिपूर्वकाः ॥ ४ ॥
(१) आ कृष्णेनेति मन्त्रस्य हिरण्यस्तूपसंज्ञकः । ऋषिः प्रोक्तस्ततस्त्रिष्टुप्छन्दः सूर्यस्तु देवता ॥ ५ ॥
इष्टकामार्थसिद्ध्यर्थं विनियोग उदाहृतः । व्याहृतित्रयमादौ स्यादा कृष्णेन हृदीरितम् ॥ ६ ॥
तथैव रजसा चेति शिरश्च समुदाहृतम् । शिखायां च समुद्दिष्टं वर्तमानो निवेशयन् ॥ ७ ॥
कवचे चामृतं चैव मर्त्यं चेति समीरयेत् । हिरण्ययेन सविता रथेनेति त्रिनेत्रके ॥ ८ ॥
शेषमस्त्रे समुद्दिष्टं षडङ्गन्यास ईरितः । हृदयाय नमः प्रोक्तं शिरसे चाग्निवल्लभा ॥ ९ ॥
शिखायै वषडित्युक्तं कवचाय हुमीरितम् । नेत्रत्रयाय वौषट् च अस्त्राय फडुदीरितम् ॥ १० ॥
एवं षडङ्गं विन्यस्य पदन्यासं समाचरेत् । आ कृष्णेनेति शिरसि ललाटे रजसेति च ॥ ११ ॥
वर्तमानो निवेशयन् मुखेऽमृतमथो हृदि । मर्त्यं चेति च नाभौ स्यात्कट्यां हिरण्ययेन तु ॥ १२ ॥
जङ्घयोः सवितेत्यूर्वोः रथेनेति च जानुनोः । आ देवो याति पदयोर्भुवनानि ततः परम् ॥ १३ ॥
पश्यन्निति विधायैवं ध्यानं कुर्यात्समाहितः । ....॥

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥ १४ ॥

ध्यात्वैवं पूजयेत्सूर्यं वृत्तं षट्कोणकं तथा । वृत्तमष्टदलं बाह्ये वृत्तं भूमिपुरं तथा ॥ १५ ॥
चतुर्द्वारसमायुक्तं मण्डलेऽस्मिन् प्रपूजयेत् । मध्ये रविं सुसम्पूज्य षट्कोणे तु षडङ्गकम् ॥ १६ ॥
तद्बहिर्वसुपत्रेषु पूर्वाद्यं तु प्रदक्षिणम् । सोमं भौमं तथा सौम्यं गुरुशुक्रौ शनिं तथा ॥ १७ ॥
राहुं केतुं च सम्पूज्य स्वस्वमन्त्रैर्विशेषतः । भूपुरे लोकपालांश्च पूर्वादिक्रमतो यजेत् ॥ १८ ॥
इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा । वायुं कुबेरमीशानं ब्रह्माणं शेषमेव च ॥ १९ ॥
वासवेशानयोर्मध्ये ब्रह्माणं पूजयेत् तथा । रक्षोवरुणयोर्मध्ये ह्यनन्तमपि पूजयेत् ॥ २० ॥
तल्लिङ्गकैश्च मन्त्रैर्वा नाममन्त्रैश्च पूजयेत् । तदस्त्राणि ततो बाह्ये वज्रं शक्तिं च दण्डकम् ॥ २१ ॥
खड्गं पाशं सृणिं चैव शूलं पद्मं सुदर्शनम् । एवं सम्पूज्य विधिवदुपचारैर्मनोरमैः ॥ २२ ॥
अष्टोत्तरसहस्रं वा शतमष्टाधिकं तु वा । तदग्रे मन्त्रमावर्त्य स्तुत्वा देवं विसर्जयेत् ॥ २३ ॥
एवं यः पूजयेद्भक्त्या भास्करं ग्रहनायकम् । ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात् ॥ २४ ॥
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी । अन्ते सद्गतिमाप्नोति यत्र देवो दिवाकरः ॥ २५ ॥
(२) इमं देवेति मन्त्रस्य गौतम ऋषिरीरितः । विराट् छन्दो देवतात्र सोमः सर्वार्थसिद्धये ॥ २६ ॥
विनियोगः समाख्यात इमं देवा तथैव च । असपत्नं सुवध्वं च हृदयं महते ततः ॥ २७ ॥
क्षत्राय शिर आख्यातं महते च ततः परम् । ज्यैष्ठ्यायेति शिखा प्रोक्ता महते च पुनर्वदेत् ॥ २८ ॥
जानराज्याय कवचमिममेति च मुष्य च । पुत्रं नेत्रं ततोऽस्यै च विशेऽस्त्रं समुदाहृतम् ॥ २९ ॥

एवं न्यस्य षडङ्गानि पदन्यासं समाचरेत् । इमं देवेति शिरस्यसपत्नमिति भालके ॥ ३० ॥
सुवध्वं मुखदेशे तु महते च ततः परम् । क्षत्राय हृदयं प्रोक्तं महते च ततः परम् ॥ ३१ ॥
ज्यैष्ठ्याय ऊर्वोर्महते जानराज्याय जानुनोः । इमममुष्य च पुत्रं गुल्फयोस्तदनन्तरम् ॥ ३२ ॥
अस्यै विशे पादयोश्च पदन्यास उदाहृतः ।.... ....

श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः ।
चन्द्रोऽमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः ॥ ३३ ॥

एवं ध्यात्वा स्वपुरतः पूजामण्डलमालिखेत् । चतुरस्रं च षट्कोणं वसुपत्रं च भूपुरम् ॥ ३४ ॥
मध्ये देवं समावाह्य पूजयेदुपचारकैः । षट्कोणे तु षडङ्गानि वसुपत्रे कुजादिकान् ॥ ३५ ॥
भूपुरे लोकपालांश्च बहिर्वज्रादिकान् यजेत् । यथापूर्वं जपं कृत्वा समर्प्य विधिपूर्वकम् ॥ ३६ ॥
स्तुत्वा नत्वा च सम्प्रार्थ्य स्वात्मन्युद्वासयेत्सुधीः । एवं यः पूजयेद्भक्त्या सुधांशुं ग्रहनायकम् ॥ ३७ ॥
ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात् । अरोगी दीर्घजीवी च पुत्रवान्धनवान् सुखी ॥ ३८ ॥
अन्ते सद्गतिमाप्नोति यत्र देवः सुधाकरः । (३) अग्निर्मूर्धेति मन्त्रस्य विरूपाक्ष ऋषिः स्मृतः ॥ ३९ ॥
गायत्रीच्छन्द आख्यातं देवता स्यान्महीसुतः । इष्टकामार्थसिद्ध्यर्थं विनियोगः प्रकीर्तितः ॥ ४० ॥
वैदिकेषु च सर्वेषु न्यासे चैव जपे हुते । व्याहृतित्रयसंयुक्तं साधकाभीष्टसिद्धिदम् ॥ ४१ ॥
व्याहृतित्रयसंयुक्तमग्निर्मूर्धा हृदि स्मृतम् । दिवः ककुत्शिरः प्रोक्तं पतिः पृथिव्या अयं शिखा ॥ ४२ ॥
अपां बर्मणि रेतांसि नेत्रमस्त्रं च जिन्वति । षडङ्गमेवं विन्यस्य पदन्यासं समाचरेत् ॥ ४३ ॥
अग्निर्मूर्धेति शिरसि ललाटे दिव इत्यपि । मुखे ककुदिति पतिर्नाभौ कट्यां ततः परम् ॥ ४४ ॥
पृथिव्या अयमपामूर्वोर्जानुनोः पदद्वयम् । रेतांसि गुल्फयोर्न्यसेत् पादयोश्चैव जिन्वति ॥ ४५ ॥
एवं विन्यस्य विधिवत्ततो ध्यायेदनन्यधीः ।.... ....॥

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाधरः ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ॥ ४६ ॥

एवं भौमं चिरं ध्यात्वा पूजामण्डलमालिखेत् । त्रिकोणं चैव षट्कोणं वसुपत्रं च भूपुरम् ॥ ४७ ॥
मध्ये देवं समावाह्य पूजयेदुपचारकैः । षट्कोणेषु षडङ्गानि वसुपत्रे बुधादिकान् ॥ ४८ ॥
चतुरस्रे लोकपालान् वज्रादींश्च ततो बहिः । सम्पूज्यैवं यथापूर्वं जप्त्वा स्तुत्वा विसर्जयेत् ॥ ४९ ॥
एवं यः पूजयेद्भक्त्या भूमिपुत्रं दृढव्रतः । ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात् ॥ ५० ॥
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी । अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः ॥ ५१ ॥
(४) उद्बुध्यस्वेति मन्त्रस्य परमेष्ठी ऋषिः स्मृतः । त्रिष्टुप्छन्दो देवतात्र बुधोऽभीष्टार्थसिद्धये ॥ ५२ ॥
विनियोगः समाख्यात उद्बुध्यस्व ततः परम् । अग्ने प्रतीति तत्पश्चाज्जागृहि त्वं हृदि स्मृतम् ॥ ५३ ॥
इष्टापूर्ते शिरः प्रोक्तं संसृजेथामयं च तु । शिखा अस्मिन् सधस्थे तु कवचाय हुमीरयेत् ॥ ५४ ॥
अध्युत्तरस्मिन्विश्वेदेवा नेत्रमन्त्र उदाहृतः । ततोऽस्त्रे च प्रविन्यस्येद् यजमानश्च सीदत ॥ ५५ ॥
एवं षडङ्गं विन्यस्य पदन्यासं समाचरेत् । उद्बुध्यस्वेति शिरसि अग्ने प्रति ललाटके ॥ ५६ ॥
जागृहि त्वं मुखे चैवमिष्टापूर्ते हृदि स्मृतम् । संसृजेथामयं चेति नाभावस्मिंस्ततः परम् ॥ ५७ ॥
सधस्थे इति कट्यां वै अध्युत्तेति ततः परम् । रस्मिन् ऊर्वोस्ततो विश्वे देवा इति च जानुनोः ॥ ५८ ॥
गुल्फयोर्यजमानश्च पादयोः सीदतेति च । एवं न्यासविधिं कृत्वा ध्यायेद् देवमनन्यधीः ॥ ५९ ॥

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दण्डधरश्च सौम्यः ।
सिंहस्थितश्चन्द्रसुतो हरिप्रियः सदा मम स्याद्वरदस्तु सौम्यः ॥ ६० ॥

एवं ध्यात्वा स्वपुरतः पूजामण्डलमालिखेत् । बाणाकारं लिखेन्मध्ये बहिः षट्कोणमालिखेत् ॥ ६१ ॥
बहिरष्टदलं पद्मं तद्बहिर्भूपुरं लिखेत् । मध्ये बुधं समावाह्य पूजयेदुपचारकैः ॥ ६२ ॥
षट्कोणे तु षडङ्गानि पद्मे गुर्वादिकान् यजेत् । भूपुरे लोकपालांश्च बहिर्वज्रादिकान् यजेत् ॥ ६३ ॥
एवं यः पूजयेद्भक्त्या बुधं सोमसुतं बुधः । ग्रहपीडां विजित्याशु सर्वान् कामानवाप्नुयात् ॥ ६४ ॥
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी । अन्ते सद्गतिमाप्नोति यत्र देवो महेश्वरः ॥ ६५ ॥
(५) बृहस्पते अतीत्यस्य ऋषिर्गृत्समदः स्मृतः । त्रिष्टुप्छन्दो देवता च बृहस्पतिरुदाहृतः ॥ ६६ ॥
इष्टकामार्थसिद्ध्यर्थे विनियोगः प्रकीर्तितः । बृहस्पते अति यदर्यो हृदि प्रतिनिन्यसेत् ॥ ६७ ॥
ततश्चार्हाद् द्युमदिति शिरः प्रोक्तं विभाति च । क्रतुमच्च शिखा प्रोक्ता जनेषु कवचं मतम् ॥ ६८ ॥
यद्दीदयच्छवसर्तप्रजात इति नेत्रके । तदस्मासु द्रविणमिति धेहि चित्रं तदस्त्रकम् ॥ ६९ ॥
षडङ्गमेवं विन्यस्य पदन्यासमथाचरेत् । बृहस्पते इति शिरसि अति यदर्यो ललाटे ॥ ७० ॥
अर्हाद्द्युमदिति मुखे विभाति क्रतुमद् हृदि । जनेषु नाभौ यद्दीदयत् कट्यां शवसर्त च ॥ ७१ ॥
प्रजात तदिति चोर्वोः अस्मासु द्रविणं तथा । जान्वोर्धेहि तथा गुल्फे चित्रं चेति च पादयोः ॥ ७२ ॥
एवं न्यासविधिं कृत्वा ध्यायेद्देवमनन्यधीः ।.... ....॥

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ।
तथाक्षसूत्रं च कमण्डलुं चाभीष्टं च बिभ्रद्वरदोऽस्तु मह्यम् ॥ ७३ ॥

एवं ध्यात्वा स्वपुरतो मण्डलं विलिखेत्सुधीः । चतुरस्रं तथा दीर्घं बहिः षटकोणमालिखेत् ॥ ७४ ॥
तद्बहिर्वसुपत्राढ्यं बहिर्भूबिम्बमालिखेत् । मध्ये देवं समावाह्य पूजयेदुपचारकैः ॥ ७५ ॥
षट्कोणे तु षडङ्गानि शुक्रादीन् वसुपत्रके । भूपुरे लोकपालांश्च वज्रादींस्तद्बहिर्यजेत् ॥ ७६ ॥
पूर्ववन्मन्त्रमाजप्य स्तुत्वा नुत्वा विसर्जयेत् । एवं यः पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात् ॥ ७७ ॥
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी । अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः ॥ ७८ ॥
(६) अन्नात्परिस्रुत इति मन्त्रस्य ऋषयः स्मृताः । प्रजापत्यश्विनौ चैव सरस्वती तथैव च ॥ ७९ ॥
इन्द्रश्चातिजगती च च्छन्दः शुक्रोऽत्र देवता । इष्टकामार्थसिध्यर्थं विनियोगः प्रकीर्तितः ॥ ८० ॥
अन्नात्परिस्रुतो हृदि रसं ब्रह्म तथैव च । णा व्यपिबच्छिरश्चैव क्षत्रं पयस्तथा शिखा ॥ ८१ ॥
सोमं प्रजापतिर्वर्म ऋतेन सत्यमिन्द्रियम् । नेत्रं विपानं शुक्रं चाप्यन्धसेत्यस्त्रमीरितम् ॥ ८२ ॥
इन्द्रस्येति ततपश्चात् पदन्यासमथाचरेत् । अन्नात्परिस्रुतः शिरो रसं ब्रह्मणेति ललाटके ॥ ८३ ॥
व्यपिबत् क्षत्रं मुखं चैव पयः सोमं हृदि स्मृतम् । प्रजापतिर्नाभिदेशे ऋतेन सत्यमित्यपि ॥ ८४ ॥
इन्द्रियं कटिदेशे विपानं गुह्यप्रदेशके । शुक्रं वृषणयोरन्धस इत्यूर्वोस्तथैव च ॥ ८५ ॥
इन्द्रस्येन्द्रियमिदं पय इत्येव जानुनोः । ततोऽमृतं मधु पदोः पदन्यास उदाहृतः ॥ ८६ ॥

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः ।
तथाक्षसूत्रं च कमण्डलुं च दण्डं च बिभ्रद् वरदोऽस्तु मह्यम् ॥ ८७ ॥

एवं शुक्रं चिरं ध्यात्वा पूजामण्डलमालिखेत् । पञ्चकोणं लिखेदादौ षटकोणं वसुपत्रकम् ॥ ८८ ॥
भूपुरं तद्बहिर्लेख्यं चतुर्द्वारोपशोभितम् । मध्ये देवं समावाह्य पूजयेदुपचारकैः ॥ ८९ ॥
षट्कोणे तु षडङ्गानि शन्यादीन् वसुपत्रके । भूपुरे लोकपालांश्च वज्रादींस्तद्बहिर्यजेत् ॥ ९० ॥
प्राग्वन्मन्त्रं जपित्वा तु स्तुत्वा नत्वा विसर्जयेत् । एवं यः पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात् ॥९१॥
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी । अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः ॥ ९२ ॥
(७) शन्नो देवीति मन्त्रस्य दध्याङाथर्वण ऋषिः । गायत्री च्छन्द आख्यातं देवता शनिरीरितः ॥ ९३ ॥

इष्टकामार्थसिद्ध्यर्थं विनियोगः प्रकीर्तित । शन्नो देवीति हृदयं रभिष्टये शिरः स्मृतम् ॥ ९४ ॥
आपो भवन्त्विति शिखा पीतये कवचं मतम् । शं योरभि च नेत्रं स्यादपि स्रवन्तु नस्तथा ॥ ९५ ॥
अस्त्रमिति षडङ्गानि पदन्यासं समाचरेत् । शन्नः शिरसि देवीश्च ललाटेऽभिष्टये मुखे ॥ ९६ ॥
आपो भवन्त्विति नाभौ पीतये कटिदेशके । शं योरूर्वोरभि जान्वोः स्रवन्तु न इति पदोः ॥ ९७ ॥

नीलाम्बरः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतोऽप्रशान्तः सदास्तु मह्यं वरदोऽल्पगामी ॥ ९८ ॥

एवं ध्यात्वा स्वपुरतः पूजामण्डलमालिखेत् । लिखेद्वै धनुराकारं षट्कोणं तद्बहिर्न्यसेत् ॥ ९९ ॥
बहिरष्टदलं पद्मं तद्बहिर्भूपुरं न्यसेत् । मध्ये देवं समावाह्य पूजयेदुपचारकैः ॥ १०० ॥
षट्कोणेषु षडङ्गानि मध्ये राह्वादिकान्यजेत् । भूपुरे लोकपालांश्च तद्बहिर्हेतिपूजनम् ॥ १०१ ॥
एवं यः पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात् । अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी ॥ १०२ ॥
ग्रहपीडां विजित्याशु सर्वसौख्यसमन्वितः । अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः ॥ १०३ ॥
(८) कया न इति मन्त्रस्य वामदेव ऋषिः स्मृतः । गायत्री च्छन्द आख्यातं देवता राहुरीरितः ॥१०४॥
कया नो हृदयं चित्र आभुवद् शिर ईरितम् । ऊती सदावृधः शिखा सखा कवचमीरितम् ॥ १०५ ॥
कया नेत्रं तथास्त्रं च ततः शचिष्ठया वृता । षडङ्गमेवं विन्यस्य पदन्यासमथाचरेत् ॥ १०६ ॥
कया शिरसि नो भाले चित्र इत्यास्यदेशके । आभुवद् हृदये ऊती नाभौ कट्यां सदावृधः ॥ १०७ ॥
सखा ऊर्वोः कया जान्वोर्गुल्फयोश्च शचिष्ठया । वृतेति पादयोर्न्यस्य ध्यानं कुर्यात्समाहितः ॥ १०८ ॥

नीलाम्बरो नीलवपुः किरीटी करालवक्त्रः करवालशूली ।
चतुर्भुजश्चक्रधरश्च राहुः सिंहासनस्थो वरदोऽस्तु मह्यम् ॥ १०९ ॥

एवं ध्यात्वा स्वपुरतो मण्डलं तु समालिखेत् । शूर्पाकारं लिखेन्मध्ये बहिः षट्कोणमालिखेत् ॥ ११० ॥
तद्बहिर्वसुपत्राब्जं तद्बहिर्भूपुरं लिखेत् । मध्ये देवं समावाह्य पूजयेदुपचारकैः ॥ १११ ॥
षट्कोणेषु षडङ्गानि पद्मे केत्वादिकान् ग्रहान् । भूपुरे लोकपालांश्च वज्रादीनि ततो बहिः ॥ ११२ ॥
एवं यः पूजयेद्भक्त्या सर्वान् कामानवाप्नुयात् । ग्रहपीडां विजित्याशु दीर्घमायुरवाप्नुयात् ॥ ११३ ॥
अरोगी दीर्घजीवी च पुत्रवान् धनवान् सुखी । अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः ॥ ११४ ॥
(९) केतुं कृण्वन्निति मनोर्मधुच्छन्दा इति स्मृतः । गायत्री च्छन्द आख्यातं देवता केतुरीरितः ॥ ११५ ॥
सर्वाभीष्टार्थसिद्ध्यर्थं विनियोगः प्रकीर्तितः । केतुं कृण्वन्निति हृद्यऽकेतवे शिर ईरितम् ॥ ११६ ॥
पेशो मर्या शिखा प्रोक्ता वर्म प्रोक्तमपेशसे । समुषद्भिरिति नेत्रमजायथा इत्यस्त्रकम् ॥ ११७ ॥
षडङ्गमेवं विन्यस्य पदन्यासं समाचरेत् । केतुं शिरसि कृण्वंश्च ललाटेऽकेतवे मुखे ॥ ११८ ॥
पेशो हृदि च मर्या चापेशसे कटिदेशके । समूर्वोश्च उषद्भिश्च जान्वोश्चाजायथाः पदोः ॥ ११९ ॥

धूम्रो द्विबाहुर्वरदो गदाधरो गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषितो यः स चास्तु मे केतुगणः प्रशान्त्यै ॥ १२० ॥

इति ध्यात्वा स्वपुरतो मण्डलं विलिखेत्सुधीः । प्राग्वन्मण्डलमालिख्य ध्वजं मध्ये समालिखेत् ॥ १२१ ॥
पूजनादिविसर्गान्तं पूर्ववच्च समापयेत् । आदित्याद्या दले पूज्या अन्यत्सर्वं च पूर्ववत् ॥ १२२ ॥
यो भक्त्या पूजयेद्देवं सर्वान् कामानवाप्नुयात् । ग्रहपीडां विजित्याशु नीरोगी सुखमेधते ॥ १२३ ॥
पुत्रवान् धनवांश्चैव जायते भुवि मानवः । अन्ते सद्गतिमाप्नोति यत्र देवो महेश्वरः ॥ १·४ ॥

इति । अथैतेषामाकृष्णेनेत्यादिसूर्यादिनवग्रहमन्त्राणां प्रयोगविधिर्लिख्यते—तत्र प्रातःकृत्यादियोगपीठ-न्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि हिरण्यस्तूपऋषये नमः। मुखे त्रिष्टुप्छन्दसे नमः। हृदये

श्रीसूर्याय देवतायै नमः। इति विन्यस्य ममेष्टकाम्यार्थे विनियोगः इति कृताञ्जलिरुक्त्वा, ॐभूर्भुवःस्वः आकृष्णेन हृदयाय नमः। एवं रजसा शिरसे स्वाहा। वर्तमानो निवेशयन् शिखा०। अमृतं मर्त्यं च कवचाय०। हिरण्ययेन सविता रथेन नेत्रत्र०। आदेवो याति भुवनानि पश्यन् अस्त्राय०। एवमंगुष्ठादिकरतलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत्। तत आकृष्णेन शिरसि। रजसा ललाटे। वर्तमानो निवेशयन्मुखे। अमृतं हृदये। मर्त्यं च नाभौ। हिरण्ययेन कट्यां। सविता जङ्घयोः। रथेन ऊर्वोः। आदेवो याति जान्वोः। भुवनानि पश्यन् पादयोः। इति विन्यस्य ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना वृत्तगर्भं षट्कोणं तदुपरि वृत्तं तदुपर्य्यष्टदलं तदुपरि वृत्त तदुपरि भूपुरं चतुर्द्वारोपशोभितमिति पूजायन्त्रं विलिख्य, स्वपुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठमभ्यर्च्य जयादिपीठशक्तिः समभ्यर्च्य, ह्रींसर्वशक्तिकमलासनाय नमः, इति समस्तं पीठं सम्पूज्य मूलेन मूर्तिं परिकल्प्य मध्ये सूर्यमावाहयेत्। यथा—किरीटिनं पद्मासनं पद्मकरं पद्मगर्भसमाकृतिं सप्ताश्वं द्विभुजं कलिङ्गदेशजं काश्यपसगोत्रं विश्वामित्रार्षं त्रिष्टुप्छन्दसं रक्ताम्बरधरं रक्ताभरणभूषितं रक्तगन्धानुलेपिनं रक्तध्वजच्छत्रपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताग्निसहितं प्रत्यधिदेवतेश्वरसहितं रक्तवृत्तमण्डले पूर्वमुखमावाहयामि, इत्यावाह्यावाहनादिमुद्राः प्रदर्श्य, ॐभूर्भुवःस्वः श्रीसूर्याय नमः इति मन्त्रेण षोडशोपचारपूजां कुर्यात्। तत्रासनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि प्राग्वत् सम्पूज्य, अष्टपत्रेषु देवाग्रादिप्रादक्षिण्येन—सोमाय नमः। भौमाय०। बुधाय०। बृहस्पतये०। शुक्राय०। शनैश्चराय०। राहवे०। केतुगणेभ्यो नमः। इति सम्पूज्य, चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य पुनर्धूपदीपादिकं निवेद्य मूलमन्त्रं यथाशक्ति जपित्वा जपं समर्प्य स्तोत्रं पठेत। श्रीसूर्य उवाच

साधु साम्ब महाबाहो शृणु जाम्बवतीसुत। जपन्नामसहस्रेण पठस्वेमं स्तवं शुभम्॥ १॥
यानि नामानि गुह्यानि पवित्राणि शुभानि च। तानि ते कथयिष्यामि प्रयत्नादवधारय॥ २॥
विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः। लोकप्रकाशकः श्रीमान् लोकचक्षुर्ग्रहेश्वरः॥ ३॥
लोकसाक्षी त्रिलोकेशः कर्ता हर्ता रविग्रहः। तपनः पवनश्चैव शुचिः सप्ताश्ववाहनः॥ ४॥
शुभदः कामदः पुण्यो वरेण्यो लोकपावनः। सुभगो निर्भगो भानुः शुभाशुभनिदर्शनः॥ ५॥
गभस्तिहस्तो ब्रह्मण्यः सर्वदेवनमस्कृतः। एवं त्रिंशन्नामधेयः स्तव इष्टः सदा मम॥ ६
आरोग्यश्रीकरश्चैव कुलवृद्धियशस्करः। य एतेन महाबाहो मध्याह्नास्तमयोदिते॥ ७॥
स्तौति मां प्रयतो भूत्वा सर्वपापैः प्रमुच्यते। मानसं वाचिकं वापि कर्मजं वापि दुष्कृतम्॥ ८॥
एष जाप्यश्च होम्यश्च सन्ध्योपासनयोस्तथा। धूपमन्त्रोऽर्घ्यमन्त्रश्च बलिमन्त्रस्तथैव च॥ ९॥
अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे। पूजितोऽयं महामन्त्रः सर्वकर्मणि साधकैः॥ १०॥
एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः। आमन्त्र्य कृष्णतनयं तत्रैवान्तरधीयत॥ ११॥
साम्बोऽपि स्तवराजं च श्रुत्वा सप्ताश्ववाहनात्। प्रीतात्मा विजयी श्रीमान् तस्माद्रोगात् प्रमुक्तवान्॥१२॥
पुत्रान् पौत्रान् धनं कामांल्लभते नात्र संशयः। सर्वशत्रून् निहन्त्याशु नीहारमिव भास्करः॥ १३॥

इति हरिसुतरोगध्वंसनं स्तोत्रमेतत् पठति यदि हि भक्त्या प्रातरुत्थाय नित्यम्।
स भवति गतरोगः सर्वसम्पत्तिवाप्तस्तपनसहशतेजाः सूर्यलोकं प्रयाति॥ १४॥

इति सूर्यस्तोत्रम्॥

अथ चन्द्रमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि गौतमाय ऋषये नमः। मुखे विराट्छन्दसे नमः। हृदये श्रीसोमाय देवतायै नमः। इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, व्याहृतित्रयपूर्वकं सर्वत्र इमं देवा असपत्नं सुवध्वं हृदयाय नमः। महते क्षत्राय शिरसे०। महते

ज्यैष्ठयाय शिखायै० । महते जानराज्याय कवचाय० । इममुष्य पुत्रं नेत्रत्र० । अस्यै विशे अस्त्रा० । इति करषडङ्गन्यासं विधाय, इमं देवा शिरसि । असपत्नं ललाटे । सुवध्वं मुखे । महते क्षत्राय हृदये । महते ज्यैष्ठयाय ऊर्वोः । महते जानराज्याय जान्वोः । इममुष्य पुत्रं गुल्फयोः । अस्यै विशे पादयोः । इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना चतुरस्रगर्भं षट्कोणं तदुपरि वृत्तं तल्लग्नमष्टदलं तदुपरि वृत्तं तदुपरि भूपुरं चतुर्द्वारोपशोभितं पूजामण्डलं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापना-द्यात्मपूजान्ते प्राग्वत् पीठं सम्पूज्य, मध्ये मूलेन मूर्तिं परिकल्प्य तत्र सोममावाहयेत् । यथा— किरीटिनं श्वेताम्बरधरं दशाश्वं श्वेतभूषणं पाशपाणिं द्विबाहुं वनायुदेशजमत्रिगोत्रमात्रेयार्षमनुष्टप्छन्दसं श्वेताभरण-भूषितं श्वेतगन्धानुलेपनं श्वेतध्वजच्छत्रपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवता (वरुण) सहितं प्रत्यधिदेवतोमासहितं चतुरस्रमण्डले प्रत्यङ्मुखं सोममावाहयामि, इत्यावाह्यावाहनादिमुद्राः प्रदर्श्य, प्राग्वत् षोडशोपचारपूजां कुर्यात् । तत्रासनादिपुष्पोपचारान्ते प्राग्वत् षट्कोणे षडङ्गानि, पत्रेषु पूर्वादिभौमाद्यष्टौ ग्रहान्, चतुरस्रे लोकपालांस्तद्बाह्ये वज्राद्यायुधानि च प्राग्वत् सम्पूज्य धूपदीपादिजपान्तं कर्म समाप्य स्तोत्रं पठेत् ।

सोमो हिमांशुः सर्वात्मा सर्वज्ञोऽथ दयानिधिः । श्रीभ्रातात्र्यक्षिसम्भूत ओषधीशो निशाकरः ॥ १ ॥
दुग्धाब्धिनन्दनश्चन्द्रः कुमुदाप्तः कलानिधिः । इन्दुर्जैवात्रिको नक्षत्रेशश्च मृगलाञ्छनः ॥ २ ॥
द्विजराजो विभुः श्रीमान् महादेवप्रियङ्करः । अमृतात्मा मनोजातश्चन्द्रमाश्च सुधाकरः ॥ ३ ॥
पञ्चविंशतिनामानि प्रातरुत्थाय यः पठेत् । आयुरारोग्यमैश्वर्य्यं लभते नात्र संशयः ॥ ४ ॥
विपरीतोऽपि शुभ्रांशुः प्रीतस्तस्य सदा भवेत् । महादेव जातिमल्लीपुष्पगोक्षीरसन्निभ ॥ ५ ॥
सोम सौम्यो भवास्माकं सर्वदा ते नमो नमः ।··· ....॥

इति चन्द्रस्तोत्रम् ।

अथ भौममन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि विरूपाक्षाय ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीभौमाय देवतायै नमः । इति विन्यस्य प्राग्वद्-विनियोगमुक्त्वा, अग्निर्मूर्धा हृदयाय नमः । दिवः ककुत् शिरसे० । पतिः पृथिव्या अयं शिखायै० । अपां कवचाय० । रेतांसि नेत्रत्र० । जिन्वति अस्त्राय० । इति करषडङ्गन्यासं विधाय, अग्निः शिरसि । मूर्धा ललाटे । दिवः मुखे । ककुत् हृदये । पतिर्नाभौ । पृथिव्याः कट्यां । अयं ऊर्वोः । अपां जान्वोः । रेतांसि गुल्फयोः । जिन्वति पादयोः । इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना त्रिकोणषट्कोणाष्टदल-भूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपरतत्त्वान्तं पीठं सम्पूज्य, मूलेन मूर्तिं परिकल्प्य तत्र भौममावाहयेत् । तथा–किरीटिनं रक्तमाल्याम्बरधरं रक्तशूलगदाधरं चतुर्भुजं मेषगमनमवन्तिदेशोद्भवं वरिष्ठगोत्रजं जमदग्न्यार्षं जगतीच्छन्दसं रक्ताम्बरधरं रक्ताभरणभूषितं रक्तमाल्यानुलेपनं रक्तच्छत्रध्वजपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताभूमिसहितं प्रत्यधिदेवतास्कन्दसहितं त्रिकोणरक्तमण्डले दक्षिणमुखमङ्गारकमावाहयामि, इत्यावाह्यावाहनादिमुद्राः प्रदर्श्य, प्राग्वदासनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, पत्रेषु पूर्वादिबुधाद्यष्टौ ग्रहांश्चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिजपान्तं कर्म समाप्य स्तोत्रं पठेत् ।

मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः । स्थिरासनो महाकायः सर्वकर्मावबोधकः ॥ १ ॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः । धरात्मजः कुजो भौमो भूतिदो भूतिदायकः ॥ २ ॥
अङ्गारको यमश्चैव सर्वरोगापहारकः । सृष्टिकर्तापहर्ता च सर्वकामफलदः ॥ ३ ॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत् । आयुरारोग्यमैश्वर्य्यं लभते नात्र संशयः ॥ ४ ॥

यः शृणोति कुजस्तोत्रं चिरं जीयात् स मानवः । गोसहस्रफलं तस्य विष्णुर्वचनमब्रवीत् ॥ ५ ॥
भौमपीडां विजित्याशु ग्रहपीडाश्च दारुणाः । भौमप्रसादादिष्टं स्यात्सत्यं सत्यं न संशयः ॥ ६ ॥
कुज कुप्रभवो नित्यं मङ्गल्यः परिपठ्यसे । अमङ्गलं निहत्याशु सर्वदा यच्छ मङ्गलम् ॥ ७ ॥

इति भौमस्तोत्रम् ॥

अथ बुधमन्त्रप्रयोगः——तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि परमेष्ठिने ऋषये नमः । मुखे त्रिष्टुप्छन्दसे नमः । हृदये श्रीबुधाय देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, उद्बुध्यस्वाग्ने प्रति जागृहि त्व हृदयाय नमः । इष्टापूर्ते शिरसे० । संसृजेथामयं च शिखा० । अस्मिन्त्सधस्थे कवचाय० । अध्युत्तरस्मिन्विश्वेदेवो नेत्रत्र० । यजमानश्च सीदत अस्त्राय० । इति करषडङ्गन्यासं विधाय, उद्बुध्यस्व शिरसि । अग्ने प्रति ललाटे । जागृहि त्वं मुखे । इष्टापूर्ते हृदये । संसृजेथामयं च नाभौ । अस्मिन्त्सधस्थे कट्यां । अध्युत्तरस्मिन् ऊर्वोः । विश्वेदेवो जान्वोः । यजमानश्च गुल्फयोः । सीदत पादयोः । इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना बाणाकारमण्डलगर्भषट्कोणाष्टदलभूपुरात्मकं मण्डलं विलिख्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते प्राग्वत् पीठपूजां विधाय, मध्ये मूलेन मूर्तिं परिकल्प्य बुधमावाहयेत् । यथा—किरीटिनं पीतमाल्याम्बरधरं पीतवर्णकर्णिकारसमद्युतिं खड्गचर्मगदापाणिं सिंहस्थं वरदं मगधदेशजं अत्रिगोत्रं भरद्वाजार्षं बृहतीच्छन्दसं पीताम्बरधरं पीताभरणभूषितं पीतगन्धानुलेपनं पीतच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताविष्णुसहितं प्रत्यधिदेवताविष्णुसहितं बाणाकारमण्डले दक्षिणामुखं बुधमावाहयामि, इत्यावाह्य, आवाहनादिमुद्राः प्रदर्श्य, प्राग्वदासनपूजादिपुष्पोपचारान्ते षट्कोणे तु षडङ्गानि, अष्टदलेषु प्राग्वद् बृहस्पत्याद्यष्टौ ग्रहान्, चतुरस्रे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिजपान्तं कर्म समाप्य स्तोत्रं पठेत ।

प्रियंगुकलिकाश्यामः पीतवर्णमहाद्युतिः । बोधनः शशिपुत्रश्च सौम्यः सौम्यग्रहो बुधः ॥ १ ॥
परतन्त्रः स्वतन्त्रश्च भगवान् भक्तवत्सलः । हरिप्रियश्च सिंहस्थो बुद्धिमान् बुद्धिवर्धनः ॥ २ ॥
खड्गचर्मगदापाणिः पीतभूषणभूषितः । विद्यावान् सात्त्विकः शुद्धो निर्मलज्ञानदायकः ॥ ३ ॥
विश्वात्मा विश्वयोनिश्च विश्वो विश्वैकवन्दितः । पञ्चविंशतिनामानि प्रातरुत्थाय यः पठेत ॥ ४ ॥
आयुरारोग्यमैश्वर्यं ज्ञानं वित्तं महद्यशः । लभते नात्र सन्देहो ग्रहपीडाविवर्जितः ॥ ५ ॥

इति बुधस्तोत्रम् ।

अथ बृहस्पतिमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रय कृत्वा, शिरसि गृत्समदाय ऋषये नमः, मुखे त्रिष्टुप्छन्दसे नमः । हृदये श्रीबृहस्पतये देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, बृहस्पते अति यदर्यो हृदयाय नमः । अर्हाद् द्युमत् शिरसे० । विभाति क्रतुमत् शिखायै० । जनेषु कवचाय० । यद् दीदयच्छवसर्तप्रजात नेत्रत्र० । तदस्मासु द्रविणं धेहि चित्रं अस्त्राय० । इति करषडङ्गन्यासं विधाय, बृहस्पते शिरसि । अतियदर्यो ललाटे । अर्हाद्द्युमत् मुखे । विभाति क्रतुमद् हृदि । जनेषु नाभौ । यद्दीदयत् कट्यां । शवसर्तप्रजात तत् ऊर्वोः । अस्मासु जान्वोः । द्रविणं गुल्फयोः । धेहि चित्रं पादयोः । इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना दीर्घचतुरस्रगर्भषट्कोणाष्टदलभूपुरात्मकं यन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्य अर्घ्यादिस्थापनध्यानमानसपूजान्ते प्राग्वत् पीठपूजां विधाय, मूर्तिं मूलेन परिकल्प्यावाहयेत् । यथा—किरीटिनं पीतमाल्याम्बरधरं दण्डवरदसाक्षसूत्रकमण्डलुधरं सिन्धुदेशोद्भवं आङ्गिरसगोत्रं वसिष्ठार्षमनुष्टुप्छन्दसं पीताम्बरधरं पीताभरणभूषितं पीतगन्धानुलेपनं पीतच्छत्रध्वजपताकिनं मुकुटकेयूरमणिभूषितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवतेन्द्रसहितं प्रत्यधिदेवताब्रह्मसहितं पीतदीर्घचतुरस्रमण्डले उदङ्मुखं गुरुमावाहयामि, इत्यावाह्यावाहनादिमुद्राः प्रदर्श्य,

आसनादिषडङ्गपूजान्ते अष्टदलेषु पूर्वादिशुक्राद्यष्टौ ग्रहान्, भूपुरे लोकपालान् बहिर्वज्राद्यायुधानि च सम्पूज्य, धूपदीपादिकं प्राग्वत् समाप्य स्तोत्रं पठेत् ।

बृहस्पतिः सुराचार्यो दयावान् शुभलक्षणः । लोकप्रियो गुरुः श्रीमान् सर्वज्ञः सर्वगो विभुः ॥ १ ॥
सर्वेशः सर्वदातुष्टः सर्वदः सर्वतोमुखः । अक्रोधनो मुनिश्रेष्ठो नीतिकर्ता जगत्पतिः ॥ २ ॥
विश्वात्मा विश्वकर्ता च विश्वयोनिरयोनिजः । भूर्भुवःस्वःपिता चैव भर्ता जीवो महाबलः ॥ ३ ॥
पञ्चविंशतिनामानि पुण्यानि शुभदानि च । प्रातरुत्थाय यो नित्यं कीर्तयेत् सुसमाहितः ॥ ४ ॥
अभीष्टफलदः श्रीमाञ्छुभग्रह नमोऽस्तु ते । यः शृणोति गुरोः स्तोत्रं चिरं जीवेन्न संशयः ॥ ५ ॥
गोसहस्रफलं तस्य विष्णुर्वचनमब्रवीत् । ....॥

इति गुरुस्तोत्रम् ॥

अथ शुक्रमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि प्रजापत्यश्विनसरस्वतीन्द्रेभ्य ऋषिभ्यो नमः । मुखे अतिजगतीच्छन्दसे नमः । हृदये श्रीशुक्राय देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, अन्नात्परिस्रुतः हृदयाय नमः । रस ब्रह्मणा व्यपिबत् शिरसे० । क्षत्रं पयःशिखा० । सोमं प्रजापतिः कवचाय० । ऋतेन सत्यमिन्द्रियं नेत्र० । विपानं शुक्रमन्धस अस्त्रा० । इति करषडङ्गन्यासं विधाय, अन्नात्परिस्रुतः शिरसि । रसं ब्रह्मणा ललाटे । व्यपिबत्क्षेत्रं मुखे । पयः सोमं हृदये । प्रजापतिः नाभौ । ऋतेन सत्यं कटयां । इन्द्रियं विपानं गुह्ये । शुक्रं वृषणयोः । अन्धस ऊर्वोः । इन्द्रस्येन्द्रियं जान्वोः । इदं पयः गुल्फयोः । अमृतं मधु पादयोः । इति विन्यस्य, ध्यानमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना पञ्चकोणगर्भषट्कोणाष्टदलभूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपीठमन्वन्तं सम्पूज्य, मूलेन मूर्ति परिकल्प्य शुक्रमावाहयेत् । यथा—किरीटिनं श्वेतवर्णं चतुर्भुजं दण्डिनं वरदं काव्यं साक्षसूत्रकमण्डलुं कीकटदेशजं भार्गवसगोत्रं शौनकार्षं पंक्तिच्छन्दसं श्वेताम्बरधरं श्वेताभरणभूषितं श्वेतगन्धानुलेपनं श्वेतच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवतेन्द्राणीसहितं प्रत्यधिदेवतेन्द्रसहितं पञ्चकोणमण्डले प्राङ्मुखं भगवन्तं शुक्रमावाहयामीत्यावाह्य आवाहनादिमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, दलेषु प्रागादिशन्याद्यष्टौ ग्रहान्, भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं प्राग्वत् समाप्य स्तोत्रं पठेत् ।

दैत्यमन्त्री दीर्घदर्शी उशना भार्गवः कविः । शुक्रो भृगुर्भृगुसुतश्चान्यजिद् दैत्यपूजितः ॥ १ ॥
श्वेतोऽर्धमण्डलो काव्यो निधिमान्निगमस्तथा । सर्वज्ञः सर्वदः श्रीमान् नीतिज्ञो रक्षसां विभुः ॥ २ ॥
विश्वकर्ता च विश्वात्मा दैत्याचार्यः प्रतापवान् । चतुर्विंशतिनामानि प्रातरुत्थाय यः पठेत् ॥ ३ ॥
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः । प्रतिशुक्रो न तस्यास्ति सर्वसौभाग्यभाग्भवेत् ॥ ४ ॥
दैत्यमन्त्रिन् महाप्राज्ञ सर्वासुरनमस्कृत । अभीष्टफलद श्रीमन् दैत्यग्रह नमोऽस्तु ते ॥ ५ ॥

इति शुक्रस्तोत्रम् ॥

अथ शनिमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि दध्यङ्ङाथर्वणाय ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये शनैश्चराय देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा,शन्नो देवीः हृदयाय नमः । अभीष्टये शिरसे० । आपो भवन्तु शिखा० । पीतये कवचाय० । शंयोरभि नेत्र० । स्रवन्तु नः अस्त्राय० । एवं करषडङ्गन्यासं विधाय, शन्नः शिरसि । देवीः ललाटे । अभीष्टये मुखे । आपो भवन्तु नाभौ । पीतये कटयां । शंयो ऊर्वोः० । अभि जान्वोः । स्रवन्तु नः पादयोः । इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना धनुराकारगर्भं षट्कोणाष्टदल-

भूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते मण्डूकादिपीठमन्वन्तं सम्पूज्य, मूलेन मूर्तिं परिकल्प्यावाहयेत्। यथा—किरीटिनमिन्द्रनीलसमद्युतिं शूलधरं वरदं गृध्रवाहनं सबाणबाणासनधरं सौराष्ट्रदेशजं काश्यपसगोत्रं भृग्वार्षं गायत्रीच्छन्दसं कृष्णाम्बरधरं कृष्णाभरणभूषितं कृष्णगन्धानुलेपनं कृष्णच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवताप्रजापतिसहितं प्रत्यधिदेवतायमसहितं कृष्णधनुर्मण्डले प्राङ्मुखं शनैश्चरमावाहयामीत्यावाह्य, आवाहनादिमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि अष्टदले पूर्वादितो राह्वाद्यष्टौ ग्रहान् भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिसर्वं प्राग्वत् समाप्य स्तोत्रं पठेत्—

क्रूरावलोकनवशाद्भुवनं नाप्नोति यो ग्रहो रुष्टः।
तुष्टो धनकनकसुखं ददाति सोऽस्माञ्छनैश्चरः पातु ॥ १ ॥

यः पुनर्नष्टराज्याय नराय परितोषितः। स्वप्ने ददौ निजं राज्यं स मे सौरिः प्रसीदतु ॥ २ ॥
कोणं नीलाञ्जनप्रख्यं मन्दचेष्टाप्रसारिणम्। छायामार्तण्डसम्भूतं नमस्यामि शनैश्चरम् ॥ ३ ॥

नमोऽर्कपुत्राय शनैश्चराय खञ्जाय नीलोत्पलमेचकाय।
श्रुत्वा रहस्यं भव कामदस्त्वं फलप्रदो मे भव सूर्यपुत्र ॥ ४ ॥

नमोऽस्तु प्रेतराजाय कृष्णदेहाय वै नमः। शनैश्चराय क्रूराय शुद्धबुद्धिप्रदायिने ॥ ५ ॥
य एभिर्नामभिः स्तौति तस्य तुष्टिं ददात्यसौ। तदीयं तु भयं तस्य स्वप्नेऽपि न भविष्यति ॥ ६ ॥
श्रावणे मासि संजाते शोभने शनिवासरे। लोहरूपं शनिं कृत्वा स्नाप्यं पञ्चामृतैर्नवैः ॥ ७ ॥
पुष्पैरष्टविधैर्धूपैः फलैश्चैव विशेषतः। नामभिः पूजयेदेतैः क्रमेण ग्रहसत्तमम् ॥ ८ ॥
कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः। सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥९॥
एतानि शनिनामानि प्रातरुत्थाय यः पठेत्। शनैश्चरकृता पीडा न भवेत्तु कदाचन ॥ १० ॥

इति शनैश्चरस्तोत्रम् ॥

अथ राहुमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं विधाय, शिरसि वामदेवाय ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदये श्रीराहवे देवतायै नमः। इति विन्यस्य विनियोगमुक्त्वा, कया नः हृदयाय नमः। चित्र आभुवत् शिरसे स्वाहा। ऊती सदावृधः शिखायै०। सखा कवचाय०। कया नेत्रत्र०। शचिष्ठया वृता अस्त्राय०। एवं करषडङ्गन्यासं विधाय, कया शिरसि। नो भाले। चित्र मुखे। आभुवत् हृदये। ऊती नाभौ। सदावृधः कटयां। सखा ऊर्वोः। कया जान्वोः। शचिष्ठया गुल्फयोः। वृता पादयोः। इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना शूर्पाकारगर्भं षट्कोणाष्टदलभूपुरात्मकं मण्डलं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यस्थापनाद्यात्मपूजान्ते प्राग्वत् पीठपूजां विधाय, मूलेन मूर्तिं परिकल्प्य तत्र राहुं ध्यायेत्। यथा किरीटिनं करालवक्त्रं खड्गचर्मशूलधरं सिंहासनस्थं पूर्वदेशजं पाटलीगोत्रमाङ्गिरसार्षमनुष्टुप्छन्दसं कृष्णाम्बरधरं कृष्णाभरणभूषितं कृष्णगन्धानुलेपनं कृष्णच्छत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमण्डले प्रविष्टमधिदेवतासर्पसहितं प्रत्यधिदेवताकालसहितं कृष्णशूर्पमण्डले दक्षिणामुखं राहुमावाहयामीति आवाह्य, आवाहनादिमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, अष्टदले केत्वाद्यष्टौ ग्रहान्, भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं प्राग्वन्निवेद्य स्तोत्रं पठेत्—

ॐनमो राहवे महाग्रहाय ॐनमः सत्त्वाय महाग्रहाय। ॐनमो रजसे महाग्रहाय ॐनमस्तमसे महाग्रहाय ॥ ॐनमो जैमिनये महाग्रहाय ॐभूर्भुवःस्वःपालयित्रे महाग्रहाय। ॐनमः क्षणदृष्टाय महाग्रहाय ॐनमः

कुटिलभ्रुकुटये महाग्रहाय ॥ ॐनमो विकटदंष्ट्राय महाग्रहाय ॐनमश्चन्द्रादित्यभयप्रदाय महाग्रहाय ।
सैंहिकेयः सुरारिश्च यमदंष्ट्रो महाबलः । सुर्भानुर्भानुमर्दी च चन्द्रमर्द्यमृतप्रियः ॥ १ ॥
तमोग्रहः शिरस्कं च तमोऽगुश्चैव दुर्जयः । विधुन्तुदो विधुग्रासी पौर्णमासीकुहूप्रियः ॥ २ ॥
पातः पातयिता विश्वं पाताङ्गश्चाष्टमो ग्रहः । एकविंशतिनामानि राहोर्नित्यं पठेन्नरः ॥ ३ ॥
अष्टमे द्वादशे रन्ध्रे (रिफ्फे) द्विचतुष्के च सप्तमे । पञ्चमे वाञ्छितं तस्य दद्यादेकादशात्फलम् ॥ ४ ॥
राहोः प्रसादात्कूष्माण्डा डाकिन्यो घातका ग्रहाः । पीडां तस्य न कुर्वन्ति वाञ्छितार्थस्य सिद्धिदाः ॥५॥
धनापत्यकलत्राणां वृद्धिं प्राप्नोति मानवः । इन्द्रियाणां पटुत्वं च वाञ्छितार्थस्य चागमः ॥ ६ ॥
बलिदानं जपं होमं कृत्वा तर्पणभोजनम् । दानं दद्याद् गृहस्थाय रत्नं गोमेदकादिकम् ॥ ७ ॥
विषमस्थे नृणां राहावपि राज्ञां जयप्रदः । एतत्स्तोत्रं तु राजानो जपन्तो जयकांक्षिणः ॥ ८ ॥
रणे शत्रून् क्षणाज्जित्वा प्राप्नुवन्ति वसुन्धराम् । प्रातः पठेन्नरो नित्यं पक्षं पक्षार्धमेव वा ॥ ९ ॥
त्यक्तः सर्वभयेभ्योऽपि सर्वान् कामानवाप्नुयात् । ....॥

इति राहुस्तोत्रम् ॥

अथ केतुमन्त्रप्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि मधुच्छन्दसे ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीकेतवे देवतायै नमः । इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा, ॐ केतुं कृण्वन् हृदयाय नमः । अकेतवे शिरसे० । पेशोमर्या शिखायै० । अपेशसे कवचाय० । समुषद्भिः नेत्रत्र० । अजायथा अस्त्राय० । इति करषडङ्गन्यासं विधाय, केतुं शिरसि । कृण्वन् ललाटे । अकेतवे मुखे । पेशः हृदये । मर्या नाभौ । अपेशसे कट्यां । सं ऊर्वोः । उषद्भिः जान्वोः । अजायथाः पादयोः । इति विन्यस्य, ध्यानादिमानसपूजान्ते स्वर्णादिपट्टे कुंकुमादिना ध्वजाकारगर्भषट्कोणाष्टदलभूपुरात्मकं पूजायन्त्रं विलिख्य, पुरतः संस्थाप्याभ्यर्च्यार्घ्यादिस्थापनाद्यात्मपूजान्ते प्राग्वत् पीठपूजां विधाय, मूलेन मूर्तिं परिकल्प्यावाहयेत् । यथा—धूम्रान् द्विबाहून् पाशधरान् गृध्रवाहनान् किरीटिनो मध्यदेशजाञ्जैमिनि गोत्रजान् गौतमार्षान् नानाच्छन्दसश्चित्राम्बरधरांश्चित्राभरणभूषितान् चित्रगन्धानुलेपनान् कृष्णपिङ्गलध्वजपताकिनो मुकुटकेयूरमणिभूषितानारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणान् ग्रहमण्डले प्रविष्टान् अधिदेवताब्रह्मसहितान् प्रत्यधिदेवताचित्रगुप्तसहितान् कृष्णपिङ्गलध्वजमण्डले दक्षिणमुखान् केतून् आवाहयामीत्यावाह्य, आवाहनादिमुद्राः प्रदर्श्य, आसनादिपुष्पोपचारान्ते षट्कोणे षडङ्गानि, अष्टदलेषु पूर्वादितो रव्याद्यष्टौ ग्रहान्, भूपुरे लोकपालांस्तदायुधानि च सम्पूज्य, धूपदीपादिकं दत्वा समाप्य स्तोत्रं पठेत्—

मृत्युपुत्रः शिखी केतुश्चानलोत्पातरूपधृक् । बहुपुत्रोऽथ धूम्राभः श्वेतः कृष्णश्च पीतदृक् ॥ १ ॥
छायारूपो ध्वजः पुच्छो जगत्प्रलयकृत्सदा । अदृष्टरूपो दृश्यश्च जन्तूनां भयकारकः ॥ २ ॥
नामान्येतानि केतोश्च यः प्रयतः पठेत् । केतुपीडा न तस्यास्ति सर्पचौराग्निभिर्भयम् ॥ ३ ॥
दानं दद्याद् गृहस्थाय वैडूर्यं केतवे सदा । यः पठेत् प्रयतो नित्यं पक्षं पक्षार्धमेव वा ॥ ४ ॥
त्यक्तः सर्वभयेभ्यो हि सर्वान् कामानवाप्नुयात् । ....

इति केतुस्तोत्रम् ॥ अथ नवग्रहसाधारणं स्तोत्रम् ।

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् । तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥
दधिशङ्खतुषाराभं क्षीरोदार्णवसंभवम् । नमामि सततं सोमं शम्भोर्मुकुटभूषणम् ॥ २ ॥
धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् । कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ३ ॥
प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम् । सौम्यं सौम्यगुणोपेतं नमामि शशिनः सुतम् ॥ ४ ॥

देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम् । बन्धुभूतं त्रिलोकज्ञं प्रणमामि बृहस्पतिम् ॥ ५ ॥
हिमकुन्दतुषाराभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥
नीलाञ्जनसमाभासं रविपुत्रं महाग्रहम् । छायामार्तण्डसम्भूतं प्रणमामि शनैश्चरम् ॥ ७ ॥
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् । सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥
तमालनालसङ्काशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥
इदं व्यासमुखोत्पन्नं ये पठन्ति समाहिताः । दिवा वा यदि वा रात्रौ शान्तिस्तेषां भविष्यति ॥ १० ॥
ऐश्वर्यमतुलं चैवमारोग्यं बुद्धिवर्धनम् । नरनारीनृपाणां च भवेद् दुःस्वप्ननाशनम् ॥ ११ ॥
ग्रहनक्षत्रपीडाश्च राक्षसाग्निसमुद्भवाः । ते सर्वे प्रशमं यान्ति सत्यं सत्यं न संशयः ॥ १२ ॥
नमः सूर्याय सोमाय मङ्गलाय बुधाय च । गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः ॥ १३ ॥[3]

इति नवग्रहस्तोत्रम् ॥ अथ रुद्रयामले—मङ्गलकल्पः ।

अथातः सम्प्रवक्ष्यामि कल्पं भौमस्य सुव्रते । यज्ज्ञात्वा तु वरारोहे ऋणान्मुच्येत साधकः ॥ १ ॥
मन्त्रोद्धारं शृणु प्राज्ञे सर्वसिद्धिप्रदायकम् । श्रीबीजं कामराजं तु भुवनेशीं समालिखेत् ॥ २ ॥
नमो भौमाय च ततो वह्निजायां च चोच्चरेत् । दशाक्षरो महामन्त्रो भौमस्य कथितः प्रिये ॥ ३ ॥
श्रीमन्मङ्गलमन्त्रस्य विरूपाक्ष ऋषिः स्मृतः । गायत्री छन्द आख्यातं देवता भूमिनन्दनः ॥ ४ ॥
श्रीबीजं च भवेच्छक्तिः कामबीजं च कीलकम् । बीजं च मायाबीजं स्यात् सर्वकामार्थसिद्धये ॥ ५ ॥
विनियोगः समाख्यातो ह्यङ्गषट्कं च कथ्यते । दीर्घषट्स्वरयोगेन स्वबीजेनाङ्गकं न्यसेत् ॥ ६ ॥
त्रिबीजाद्यं न्यसेद्देहे चांगुलीषु तथा न्यसेत् ! दशरन्ध्रेषु देवेशि दशवर्णान् प्रविन्यसेत् ॥ ७ ॥
मूलेन व्यापकं न्यसेत् कुर्याच्च धनवृद्धये । अथ ध्यानं प्रवक्ष्यामि मङ्गलस्य सुलोचने ॥ ८ ॥
रक्तमाल्याम्बरधरं रक्तगन्धानुलेपनम् । कुमारं शक्तिहस्तं च भौमं वन्दे सदानघम् ॥ ९ ॥
अथ यन्त्रं शृणु प्राज्ञे सर्वसम्पत्तिदायकम् । वह्नीशवारुणाशाग्रं त्रिकोणं विलिखेत्सुधीः ॥ १० ॥
प्रतिरेखं पञ्चचिह्नं षडंशेन प्रकल्पयेत् । मध्ये त्रिपञ्च वह्नेस्तु रेखाः सम्पातयेत्सुधीः ॥ ११ ॥
त्रिपञ्चसूत्रैर्देवेशि सम्यग्वै चिह्नयोगतः । षट्त्रिंशत्कोणता साम्यात्कृतेयं वीरवन्दिते ॥ १२ ॥
वारुणाग्रेषु कोणेषु सैकविंशतिषु त्रिधा । भौमनामानि विलिखेदग्निकोणादितः क्रमात् ॥ १३ ॥
ॐकारादिनमोन्तास्तु विलिखेत्सर्वदेवताः । प्रादक्षिण्यक्रमेणैव तद्बहिर्वृत्तमुत्तमम् ॥ १४ ॥
नागपत्रं ततः पद्मं बहिर्वृत्तं मनोहरम् । तद्बहिर्भूपुरं देवि चतुर्द्वारसमन्वितम् ॥ १५ ॥
न प्रकाश्यं सदा यन्त्रमृणघ्नं धनदायकम् । तव स्नेहेन कथितं साधकानां हिताय च ॥ १६ ॥
गोपनीयं प्रयत्नेन निधानमिव चोरतः । अथ पूजां प्रवक्ष्यामि मन्त्रराजस्य तत्त्वतः ॥ १७ ॥
रक्तालङ्कारसुभगो रक्तगन्धानुलेपनः । रक्तवस्त्रपरीधानो गृहे रक्तारुणे स्थितः ॥ १८ ॥
गुरुं संस्थाप्य शिरसि भूतान् संत्रासयेत्सुधीः । भूतशुद्धिं विधायादौ प्राणानायम्य देशिकः ॥ १९ ॥
विनियोगं पुरा कृत्वा करन्यासं षडङ्गकम् । मन्त्रेण व्यापकं चैव ध्यानं पूर्वोदितं कुरु ॥ २० ॥
अर्घ्यं च वह्निमन्त्रेण पूजयेत्तदनन्तरम् । शङ्खं तत्र तु संस्थाप्य पूजयेद्रक्तपुष्पकैः ॥ २१ ॥
सूर्यमन्त्रेण देवेशि जलैरापूरयेत्ततः । चन्द्रमन्त्रेण देवेशि पूजयेत्तदनन्तरम् ॥ २२ ॥
मूलेन सप्तधा जप्त्वा धेनुमुद्रां प्रदर्शयेत् । तेनोदकेन संसिच्य यन्त्रे पुष्पैस्तथात्मनि ॥ २३ ॥
पलत्रयसमग्राहि पात्रं ताम्रमयं कुरु । त्रिकोणाकाररूपं च देवतापात्रमुत्तमम् ॥ २४ ॥
पूर्ववत् स्थापयेद्विप्र प्रजपेदुपदेशतः । ततः पुष्पैस्तथा गन्धैरक्षतैर्लोहितैस्तथा ॥ २५ ॥
दक्षभागे निधायाथ पूजयेत्सर्वदेवताः । यन्त्रस्य दक्षवामस्थं गणपं यक्षनायकम् ॥ २६ ॥

आवाहयेद्विभुं भौमं ध्यानोक्तं सर्वसिद्धिदम् । आवाहनादिमुद्रास्तु क्रमेणैवात्र दर्शयेत् ॥ २७ ॥
ऊर्ध्वाञ्जलिमधः कुर्यादियमावाहनी भवेत् । इयं तु विपरीता स्यात्तदा संस्थापनी मता ॥ २८ ॥
ऊर्ध्वांगुष्ठं मुष्टियुगं तदेयं संनिधापनी । अन्तरांगुष्ठमुष्टिभ्यां तदेयं संनिरोधनी ॥ २९ ॥
तर्जनीभ्यां परिभ्राम्य सकलीकरणं भवेत् । परिवृत्तकरो मन्त्री तर्जनिके कनिष्ठिके ॥ ३० ॥
मध्यमेऽनामिकायुग्मे श्लेषयेच्च परस्परम् । अमृतीकरणं देवि मुद्रेयं धेनुरूपिणी ॥ ३१ ॥
एताः सामान्यमुद्रास्तु दर्शयित्वा यजेत्प्रिये । अग्नीशासुरवायव्यमध्ये दिक्ष्वङ्गपूजनम् ॥ ३२ ॥
केसरेषु प्रकर्तव्यं तथा वर्णैश्च देशिकः । प्रथमावरणं देवि कथितं वीरवन्दिते ॥ ३३ ॥
मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः । स्थिरासनो महाकायः सर्वकर्मावबोधकः ॥ ३४ ॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः । धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः ॥ ३५ ॥
अङ्गारको यमश्चैव सर्वरोगापहारकः । वृष्टिकर्तापहर्ता च सर्वकामफलप्रदः ॥ ३६ ॥
एकविंशतिकोष्ठेषु प्रादक्षिण्येन तत्त्वतः । अग्रत्रिकोणमारभ्य पूजयेत् सर्वदेवताः ॥ ३७ ॥
द्वितीयावरणे देवाः पूर्वोक्तास्त्वेकविंशतिः । आदित्यादिग्रहानष्टौ पूजयेदष्टपत्रके ॥ ३८ ॥
तृतीयावरणे देवि पूजयेद् भौममर्चयेत् । ब्राह्म्यादिभिश्चतुर्थी स्यादसिताङ्गादिभैरवैः ॥ ३९ ॥
पञ्चमी तु भवेद्देवि पत्राग्रेषु प्रपूजयेत् । वामावर्तक्रमेणैव षष्ठी स्याल्लोकनायकैः ॥ ४० ॥
भूबिम्बे पूजयेद्देवि इन्द्रादीन् सर्वसिद्धये । तदायुधैः सप्तमी स्याद् भूबिम्बे च बहिर्यजेत् ॥ ४१ ॥
मूलेन पूजयेन्मध्ये रक्तपुष्पाञ्जलित्रयैः । उपचारैः षोडशभिः पूजयेत् परमेश्वरम् ॥ ४२ ॥
रक्तगन्धैश्च पुष्पैश्च धूपैर्दीपादिभिस्तथा । मङ्गलं पूजयेद् भक्त्या मङ्गलेऽहनि सर्वदा ॥ ४३ ॥
ऋणरेखाः प्रकर्तव्या अङ्गारेण तदग्रतः । तास्तु प्रमार्जयेत् पश्चाद् वामपादेन बुद्धिमान् ॥ ४४ ॥
पूजयेन्मूलमन्त्रेण शतमष्टोत्तरं प्रिये । दशांशं तर्पयेद्देवि होमं तस्य दशांशतः ॥ ४५ ॥
मार्जनं तद्दशांशेन मन्त्री मन्त्रस्य सिद्धये । पूजादिमार्जनान्तं तु भौमाय तु निवेदयेत् ॥ ४६ ॥
स्तुत्वा स्तोत्रेण देवेशि साधकस्तु स्थिरासनः । स्थिरासनाय नम इति वाचा मन्त्रं समुच्चरेत् ॥ ४७ ॥
शङ्खोदकैः परिभ्राम्य परिभ्रम्य स्वयं ततः । नमस्कारं प्रकुर्वीत पञ्चाङ्गं प्रणवेन तु ॥ ४८ ॥
यन्त्रात् पुष्पं समाघ्राय शुचौ देशे च निःक्षिपेत् । संहारमुद्रया देवि विसृजेत् परमेश्वरम् ॥ ४९ ॥
पूर्वक्रमात्र सन्देहः ऋणं हन्याद् धनं लभेत् । नित्यार्चको जपेल्लक्षं दशांशं तर्पयेत्ततः ॥ ५० ॥
होमयेत्तद्दशांशेन जपापुष्पैश्च सुव्रते । रक्ताश्वमारपुष्पैर्वा घृताक्तैर्वापि गुग्गुलैः ॥ ५१ ॥
त्रिमध्वक्तैर्हुनेद्देवि पुरश्चरणसिद्धये । गुरवे दक्षिणां दद्यात् सालङ्कारां पयस्विनीम् ॥ ५२ ॥
आरक्तवस्त्रयुग्मेन धेनुं दद्याद् विधानतः ।.... ....

इति रुद्रयामलोक्तमङ्गलपूजाविधानम् ॥ अथ भविष्योत्तरपुराणोक्तयन्त्रम्——

अथ यन्त्रं प्रवक्ष्यामि येन संपद्यते धनम् । येन विज्ञानमात्रेण ऋणत्रयं विमुञ्चति ॥ २ ॥

पूर्वेद्युः कर्ता हविष्यं भुक्त्वा ब्रह्मचारी अधःशयीत, नियमेन तिष्ठेत्, भौमवासरेऽरुणोदयसमये समुत्थायापामार्गेण दन्तधावनं विधायाचम्य पश्चात्तिलामलककल्केन नद्यादौ गृहे वा स्नात्वा धौतरक्तवाससी परिधाय प्रवालरक्तपुष्पादिकं विभृयात् । रक्तचन्दनमूर्ति विधाय ताम्रे त्रिकोणमण्डलं च, ततः शुचौ देशे लोहितानुडुहे त्रिकोणमण्डले धनार्थी पुत्रार्थी वा सह पत्न्या पूजामारभेत् । ॐनमो मङ्गलाय नमः । अनेन मन्त्रेण द्वादश प्राणायामान् कृत्वा, अस्य मङ्गलमन्त्रस्य व्यास ऋषिरनुष्टुप्छन्दः मङ्गलो देवता मं बीजं नमः शक्तिः ऋणापनुत्त्यर्थे जपे विनियोगः । ततो व्याहृतिद्विरावृत्त्या करषडङ्गन्यासं विधाय ध्यायेत्—

रक्तमाल्याम्बरं देवं खड्गशूलगदाधरम् । चतुर्भुजं मेषवाहं वरदं च धरासुतम् ॥

ध्यायेदिति शेषः । इति ध्यात्वा यथाविधि जपं पूजां समारभेत् । अद्येत्यादि० अमुकोऽहं धनार्थी पुत्रार्थी वा भौमपूजनं करिष्ये, इति संकल्प्य प्रार्थनां कुर्यात् ।

अथ देवेश ते भक्त्या करिष्ये व्रतमुत्तमम् । दुःखव्याधिविनाशार्थमृणनाशाय भूमिज ॥

पुत्रसन्तानहेतवे यथाकामं वा इति । ततस्ताम्रपात्रे त्रिकोणे भौमं संस्थाप्य ताम्रमयार्घ्यपात्रे रक्तचन्दनरक्ताक्षतरक्तपुष्पादि निःक्षिप्य "अग्निर्मूर्धे'ति मन्त्रेणाष्टोत्तरशतार्घ्याणि दद्यात् । ततोऽङ्गन्यासः ॐह्रां हृदयाय नमः । ॐशिरसे० । ॐह्रौं शिखायै० । ॐह्रांह्रीं कवचाय० । ॐहंसः नेत्रत्र० । ॐखंखः अस्त्राय० । एवं करषडङ्गन्यासं विधाय पुष्पाञ्जलिं गृहीत्वा तमावाहयेत् ।

सर्वग्रहेष्वतिबलं तीक्ष्णाङ्गारसमप्रभम् । नित्यं मन्दारुणाभासं भौममावाहयाम्यहम् ॥

इत्यावाह्यावाहनमुद्राः प्रदर्श्य, ॐह्रां इति मन्त्रेण पात्रं प्रक्षाल्योदकेनापूर्य कवचेनावगुण्ठ्यास्त्रेण संरक्ष्य धेनुमुद्रया वमित्यमृतीकृत्य, तेनोदकेनात्मानं पूजोपकरणानि च सम्प्रोक्ष्य, ॐह्रींह्लंह्लं खंखः इति मन्त्रेन षोडशोपचारैः सम्पूज्यारात्रिकादर्शचामरादिकं प्रदर्श्य सफलार्घ्यं दद्यात ।

ॐभूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः । धनार्थी त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तु ते ॥
रक्तप्रवालसङ्काश जपाकुसुमसन्निभ । महीसुत महाबाहो गृहाणार्घ्यं नमोऽस्तु ते ॥

ततो मूलमन्त्रेण पुष्पाञ्जलित्रयं दत्त्वा एकविंशतिनामभिर्गायत्रीसहितैरेकविंशतिकोष्ठेषु पूजयेत् । अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात् ॥ मङ्गलाय नमः । एवं भूमिपुत्राय० । ऋणहर्त्रे० । धनप्रदाय० । स्थिरासनाय० । महाकायाय० । सर्वकर्मविबोधकाय० । लोहिताय० । लोहिताङ्गाय० । सामगानां कृपाकराय० । धरात्मजाय० । कुजाय० । भौमाय० । भूतिदाय० । भूमिनन्दनाय० । अङ्गारकाय० । यमाय० । सर्वशोकापहारकाय० । वृष्टिकर्त्रे० । वृष्टयपहर्त्रे० । सर्वकामफलप्रदाय० । एतैर्नामभिर्गायत्रीसहितैः पूजयेत् । ततस्ताम्बूलं दत्त्वा प्रदक्षिणनमस्कारान् कुर्यात् । "धरणीगर्भसम्भूतं विद्युत्तेजःसमप्रभम् । कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥" खादिराङ्गारेण रेखात्रयं कृत्वा "दुःखदौर्भाग्यनाशाय पुत्रसन्तानहेतवे । कृतं रेखात्रयं वामपादेन मार्जयाम्यहम्" ॥ अथ प्रार्थनम्—

ऋणहर्त्रे नमस्तेऽस्तु दुःखदारिद्र्यनाशन । सौभाग्यसुखभाङ् नित्यं भवामि धरणीसुत ॥
तप्तकाञ्चनसंकाश तरुणार्कसमप्रभ । सुखसौभाग्यधनद ऋणदारिद्र्यनाशक ॥
ग्रहराज नमस्तुभ्यं सर्वकल्याणकारक । प्रसादात्तव देवेश सदा कल्याणभाजनम् ॥
देवदानवगन्धर्वयक्षराक्षसपन्नगाः । प्राप्नुवन्ति शिवं सर्वं सदा पूर्णमनोरथाः ॥
प्रसादं कुरु मे देव प्रसादं मङ्गलप्रद । बालः कुमारको यस्तु स भौमः प्रार्थितो मया ॥
एवं सम्प्रार्थ्य नामानि शरीरे तानि विन्यसेत् । ....॥

पादयोः मङ्गलाय नमः । जान्वोः भूमिपुत्राय नमः । ऊर्वोः ऋणहर्त्रे० । कट्यां धनप्रदाय० । गुह्ये स्थिरासनाय० । हृदये महाकायाय० । वामबाहौ सर्वकर्मविबोधकाय० । दक्षबाहौ लोहिताय० । कण्ठे लोहिताङ्गाय० । आस्ये सामगानां कृपाकराय० । नासिकयोः धरात्मजाय० । नयनयोः कुजाय० । ललाटे भौमाय० । भ्रुवोः भूतिदाय० । मूर्ध्नि भूमिनन्दनाय० । शिखायां अङ्गारकाय० । कवचे यमाय० । अस्त्रं सर्वरोगापहारकाय० । ऊर्ध्वे वृष्टिकर्त्रे० । अधः वृष्टयपहर्त्रे० । सर्वाङ्गेषु सर्वकामफलप्रदाय नमः । ततो भौमपूजनविधेः पूर्णतां कृत्वा स्तोत्रं पठेत ।

ऋणमोचनभौमस्य स्तोत्रं वक्ष्ये शृणुष्वथो । ऋषिरस्य भवेद्गाधिश्छन्दोऽनुष्टुप् प्रकीर्तितम् ॥ १ ॥
अङ्गारको देवतात्र ऋणमोचनपूर्वकः । विनियोगः समाख्यातो विशेषऋणमोचने ॥ २ ॥
रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः । चतुर्भुजो मेषगमो वरदश्च धरासुतः ॥ ३ ॥

ऋणग्रस्तनराणां च ऋणमुक्तिप्रदायकः । मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ॥ ४ ॥
स्थिरासनो महाकायः सर्वकर्मविबोधकः । लोहितो लोहिताङ्गश्च सामगानां कृपाकरः ॥ ५ ॥
धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः । अङ्गारको यमश्चैव सर्वरोगापहारकः ॥ ६ ॥
वृष्टिकर्तापहर्ता च सर्वकामफलप्रदः । अङ्गारको महीपुत्रो भगवान् भक्तवत्सलः ॥ ७ ॥
नमोऽस्तु ते ममाशेषमृणमाशु विनाशय । एतानि कुजनामानि नित्यं यः प्रयतः पठेत् ॥ ८ ॥
ऋणं न जायते तस्य धनप्राप्तिस्तु जायते । भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः ॥ ९ ॥
धनार्थी त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तु ते । रक्तगन्धैश्च पुष्पैश्च धूपदीपैर्गुडौदनैः ॥ १० ॥
मङ्गलं पूजयित्वा तु मङ्गलेऽहनि सर्वदा । ऋणरेखाः प्रकर्तव्याः खादिराङ्गारकेण तु ॥ ११ ॥
अंगुष्ठाग्रेण वामांघ्रे रानुपूर्वीकृताः पठेत् । एकविंशतिनामानि पठित्वा तु तदन्तिके ॥ १२ ॥
तास्तु प्रमार्जयेत्पश्चाद्वामपादेन संस्पृशन् । एवं स्तुतो महातेजा ऋणं मे नाशय प्रभो ॥ १३ ॥
एवं भक्तिः कुजे यस्य न ऋणघ्नो धनी भवेत् । ....॥

ॐनमो भगवते अङ्गारकाय भूमिपुत्राय ऋणहर्त्रे धनप्रदाय भक्तवत्सलाय धनं मे देहि शीघ्रं हुं फट् स्वाहा । ॐआंऐंह्रींश्रींक्लींग्लौं मङ्गलाय मम ऋणविमोचनं कुरु २ स्वाहा धनं देहि २ स्वाहा । गुडौदनोपहारं दत्त्वा पूजनान्ते गोधूमान्नं भुञ्जीयात् । इति मङ्गलपूजनं व्रतं च ॥ अथ कथा—सूत उवाच ।

पूजितो देवदेवेश देवैस्तु मङ्गलप्रदः । गौतमेन पुरा पृष्टो लोहिताङ्गो महीसुतः ॥ १ ॥

गौतम उवाच ।

कथयस्व महाभाग गुह्यं पूजनमुत्तमम् । मन्त्रमाराधनं सर्वं सर्वपापप्रणाशनम् ॥ २ ॥
रूपं सुवर्णसङ्काशं वाहनायुधसंयुतम् । येन पूजितमात्रेण जायते सुखमुत्तमम् ॥ ३ ॥
धर्मार्थकाममोक्षाणां कालेनैव फलप्रदम् । सर्वपापप्रशमनं सर्वव्याधिविनाशनम् ॥ ४ ॥
सर्वसौख्यप्रदं देवं हत्यापातकनाशनम् । सर्वयज्ञफलं प्रोक्तं सर्वकामफलप्रदम् ॥ ५ ॥
तपसा जपदानानां फलं चैवं तु लभ्यते । तद्व्रतं ब्रूहि मे देव लोहिताङ्ग महाग्रह ॥ ६ ॥
यस्मिन्नाराधिते मर्त्यः सर्वसौभाग्यवान् भवेत् ।.... ....॥

श्रीमङ्गल उवाच ।

शृणु विप्र महाभाग धर्मज्ञ ऋषिगौतम । व्रतं च पूजनं दानं यत्कृतं भुवनत्रये ॥ ७ ॥
आसीत्पूर्वं महाप्राज्ञो ब्राह्मणो वेदपारगः । तस्य भार्या सुनन्दीका नाम्ना ख्याता सुलोचना ॥ ८ ॥
तस्यापत्यं च सञ्जातं वन्ध्यत्वान्न कदाचन । तेनान्यस्य सुता जातु सुशीला रूपसंयुता ॥ ९ ॥
ब्राह्मणस्य कुले जाता गृहीता पोषिता ध्रुवम् । सर्वलक्षणसम्पन्ना मद्व्रतेनैव गौतम ॥ १० ॥
पुरा जन्मनि तेनाहं चैकभावेन पूजितः । सा पुत्री स्वगृहे नीता ब्राह्मणेनैव पालिता ॥ ११ ॥
नित्यं हि पुष्पितं तस्या अष्टाङ्गं कनकेन वै । तत्सुवर्णेन विप्रोऽसौ धनसौभाग्यगर्वितः ॥ १२ ॥
कोटीश्वरो महर्षिस्तु जातोऽस्मिन् भूमिमण्डले । दृष्ट्वा नन्दकविप्रेण दशवर्षा वरार्थिनी ॥ १३ ॥
विवाहार्थं च विप्रस्य दत्ता सौम्येश्वरस्य च । वेदोक्तविधिना तेन विवाहमकरोत्तदा ॥ १४ ॥
वर्षैः कतिपयैर्विप्रस्तां कन्यां प्रौढयौवनाम् । आदाय श्वशुरगृहान्निर्गतः शुभवासरे ॥ १५ ॥
स्वदेशोपरि मार्गेण व्रजंश्चौरैस्त्वहर्निशम् । निशान्ते गह्वरे घोरे अरण्ये पर्वतोत्तमे ॥ १६ ॥
सर्वशून्ये व्रजन् तस्मिन्महालोभेन भावितः । मार्गे चलति विप्रोऽसौ चौरैश्च विनिपातितः ॥ १७ ॥
तं पतिं मृतमालोक्य सा नारी शोकपीडिता । पतिना सह विप्रेण मरणे समकल्पत ॥ १८ ॥
स्वपतिं तन्मयं विश्वं चिन्तयन्ती पदे पदे । पतिं प्रदक्षिणीकृत्य चितायाश्च समीपतः ॥ १९ ॥

तेनाहं तस्य तुष्टो हि वरार्थं च प्रणोदिता। ब्राह्मण्युवाच। यदि तुष्टोऽसि मे देव तदा जीवतु मे पतिः॥

मङ्गल उवाच।

देव इवाजरामरस्तव भर्ता भविष्यति। अन्यद्ब्रूहि मयाख्यातं वरं त्रिभुवनोत्तमम्॥२१॥

ब्राह्मण्युवाच।

यदि तुष्टोऽसि मे देव ग्रहाणामधिपेश्वर। ये त्वां स्मरन्ति देवेश रक्तचन्दनचर्चितम्॥२२॥
रक्तपुष्पैश्च सम्पूज्य प्रत्यूषे भौमवासरे। बन्धनं व्याधिरोगाश्च कदाचिन्नोपजायते॥२३॥
न सर्पाग्निभयं मित्रवियोगो ब्राह्मणस्य वै। मा कुरुष्व महीपुत्र भक्तानां सौख्यदो भव॥२४॥

मङ्गल उवाच।

एकविंशति भौमाश्च मद्भक्ता विजितेन्द्रियाः। एकान्ते ह्यर्चितास्ते च चतुर्दीपाङ्किते गृहे॥२५॥
अर्घ्यैश्च सकलैर्मन्त्रैर्वेदपौराणिकैस्तथा। स्वशक्त्या भोजयेद्विप्रान् दातव्यं च हिरण्यकम्॥२६॥
युवानं रक्तवृषभं सर्वोपस्करसंयुतम्। दत्त्वा वै ग्रहपीडा तु न स्यात्तेषां कदाचन॥२७॥
भूतवेतालडाकिन्यो न भवन्तीह हिंसकाः। एवमुक्त्वा तदा तत्र मङ्गलोऽपि दिवं गतः॥२८॥
इदं व्रतं तदाख्यातं सर्वसौख्यप्रदायकम्। इदं व्रतं करिष्यन्ति तेषां पीडा न जायते॥२९॥
स्त्रीभिर्व्रतं प्रकर्तव्यं पुरुषैश्च विशेषतः। तेषां भुक्तिश्च मुक्तिश्च भवत्येव न संशयः॥३०॥

इति भविष्योत्तरे भौमव्रतम्॥ अथ भौमव्रतोद्यापनम्—पूर्वोक्तप्रकारेणैकविंशतिभौमाः कर्तव्याः द्वाविंशतितमे उद्यापनं कार्यम्। तद्यथा—दन्तधावनादिकं पूर्ववत् कृत्वा गृहमागत्य शुद्धायां भूमौ गोधूमैस्त्रिकोणमध्ये एकविंशतिभिः कोष्ठैर्विरचितं मण्डलं कृत्वा, तत्र नानावर्णरजोभिः पूरणं प्रतिकोष्ठे च वस्त्रेणाच्छाद्य तत्तत्प्रतिमाः संस्थाप्य पूर्ववत् पूजां कुर्यात्। केचित्—एतत् सर्वं प्रथमदिने सन्ध्याकालमागत्य कृत्वा रात्रौ जागरणं दीपदानं च कुर्वन्ति

कुंकुमं सोदकं दद्याद्वस्त्रं दीपं तथैव च। रक्तचन्दनलिप्ताङ्गाः पञ्चरत्नविभूषिताः॥१॥
रक्तवस्त्रपरिच्छन्ना नानाविधफलान्विताः। त्रिसप्तकलशाः कार्या रक्तवर्णाश्च निर्व्रणाः॥२॥

रक्तचन्दनगोरोचनैर्भौमं सम्पूज्य रक्तपुष्पैर्मालाभिः सर्जरसधूपेन गुडौदनेन नैवेद्येन च पूजयेत्। फलार्घं दद्यात्। ततो भौमादिभिर्मन्त्रैः प्रतिकुम्भं पूजां कुर्यात्। प्रदक्षिणनमस्काराश्च कर्तव्याः। होमं घृततिलैः कुर्यात्।

अग्निर्मूर्धेति मन्त्रेण समिधोऽष्टोत्तरं शतम्। अष्टोत्तरसहस्रं वा अष्टाविंशतिरेव वा॥३॥
होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन च। गृह्योक्तविधिना चैव होमं कुर्याज्जितेन्द्रियः॥४॥
समिधः खादिरा ज्ञेया होमे चाष्टोत्तरं शतम्। भौमप्रीत्यै च विप्रेभ्यः सवस्त्रान् कलशान् दिशेत्॥५॥
प्रतिमां दक्षिणायुक्तामाचार्याय निवेदयेत्। रथं रक्तमनुड्वाहं सर्वोपस्करसंयुतम्॥६॥
दद्याद् व्रतसमाप्त्यर्थं सहेम प्रतिपद्य च। अन्येभ्योऽपि यथाशक्त्या दद्याद्विप्रांश्च भोजयेत्॥७॥

ततोऽच्छिद्रव्रतवाचनम्। इति भविष्योत्तरे भौमव्रतोद्यापनम्॥

अथ ऋग्विधानम्। अग्निरुवाच।

ऋग्यजुःसामकाथर्वविधानं पुष्करोदितम्। भुक्तिमुक्तिकरं जप्याद्धोमाद्रामाय तद्वदे॥८॥

पुष्कर उवाच

प्रतिवेदं तु कर्माणि कार्याणि प्रवदामि ते। प्रथमं ऋग्विधानं वै शृणु त्वं भुक्तिमुक्तिदम्॥९॥
अन्तर्जले तथा होमे जपतो मनसेप्सितम्। कामं करोति गायत्री प्राणायामाद्विशेषतः॥१०॥
गायत्र्या दशसाहस्रो जपो नक्ताशिनो द्विज। बहुस्नातस्य तत्रैव सर्वकल्मषनाशनः॥११॥

दशायुतानि जप्त्वाथ हविष्याशी स मुक्तिभाक् । प्रणवो हि परं ब्रह्म तज्जपः सर्वपापहा ॥ १२ ॥
ॐकारशतजप्तं तु नाभिमात्रोदके स्थितः । जलं पिबेत् स सर्वैस्तु पापैर्वै विप्र मुच्यते ॥ १३ ॥
मात्रात्रयं त्रयो वेदास्त्रयो देवस्त्रयोऽग्नयः । महाव्याहृतयः सप्त लोकाः होमोऽखिलाघहा ॥ १४ ॥
गायत्री परमा जाप्या महाव्याहृतयस्तथा । अन्तर्जले तथा राम प्रोक्तश्चैवाघमर्षणः ॥ १५ ॥
अग्निमीळे[1] पुरोहितं सूक्तोऽयं वह्निदैवतः । शिरसा धारयन् वह्निं यो जपेत् परिवत्सरम् ॥ १६ ॥
होमं त्रिषवणं भैक्ष्यमनग्निज्वलनं चरेत् । अतः परमृचः सप्त वायवाद्याः[2] प्रकीर्तिताः ॥ १७ ॥
ता जपन् प्रयतो नित्यमिष्टान् कामान् समश्नुते । मेधाकामो जपेन्नित्यं सदसस्पतिमित्यृचम्[3] ॥ १८ ॥
अम्बयो[4] यन्तीमाः प्रोक्ता नवर्चो मृत्युनाशनाः । शुनः[5] शेपमृचं बद्धः सन्निरुद्धोऽथवा जपेत् ॥ १९ ॥
मुच्यते सर्वपापेभ्यो गदी वाप्यगदी भवेत् । य इच्छेच्छाश्वतं कामं मित्रं प्राज्ञं पुरन्दरम् ॥ २० ॥
ऋग्भिः षोडशभिः कुर्यादिन्द्रस्येति[6] दिने दिने । हिरण्यस्तूपमित्येतज्जपञ्छत्रून् प्रबाधते ॥ २१ ॥
क्षेमी भवति चाध्वन्यो ये ते पन्था[7] जपन् नरः । रौद्रीभिः षड्भिरीशानं[8] स्तूयाद्यो वै दिने दिने ॥२२॥
चरुं वा कल्पयेद्रौद्रं तस्य शान्तिः परा भवेत् । उदित्युद्यन्तमादित्यमुपतिष्ठन्[9] दिने दिने ॥ २३ ॥
क्षिपेज्जलाञ्जलीन् सप्त मनोदुःखविनाशनम् । द्विषन्तमित्यथार्धर्चं[10] यद्विप्र तं जपन् स्मरेत् ॥ २४ ॥
आगस्कृत् सप्तरात्रेण विद्वेषमधिगच्छति । आरोग्यकामी रोगी वा प्रस्कण्वस्योत्तमं जपेत् ॥ २५ ॥
उत्तमस्तस्य चार्धर्चो जपेद्वै विविधासने । उदयत्यायुरक्षय्यं तेजो मध्यन्दिने जपेत् ॥ २६ ॥
अस्तं प्रतिगते सूर्ये द्विषन्तं प्रतिबाधते । उप[11] प्र चेति सूक्तानि जपञ्छत्रून् नियच्छति ॥ २७ ॥
एकादश[12] सुपर्णस्य सर्वकामान् विनिर्दिशेत् । आध्यात्मिकीः क इत्येता[13] जपन् मोक्षमवाप्नुयात् ॥२८॥
आ नो भद्रा[14] इत्यनेन दीर्घमायुरवाप्नुयात् । त्वं सोमेति[15] च सूक्तेन नवं पश्येन्निशाकरम् ॥ २९ ॥
उपतिष्ठेत् समित्पाणिर्वासांस्याप्नोत्यसंशयम् । आयुरीप्सन्निभमिति[16] कौत्सं सूक्तं सदा जपेत् ॥ ३० ॥
अप[17] नः शोशुचदिति स्तुत्वा मध्ये दिवाकरम् । यथा मुञ्चति चेषीकां तथा पापं प्रमुञ्चति ॥ ३१ ॥
जातवेदस[18] इत्येतज्जपेत् स्वस्त्ययनं पथि । भयैर्विमुच्यते सर्वैः स्वस्तिमानाप्नुयात् गृहान् ॥ ३२ ॥
व्युष्टायाञ्च तथा रात्र्यामेतद् दुःस्वप्ननाशनम् । प्रमन्दिनेति[19] सूयन्त्यां जपेद्गर्भविमोचनम् ॥ ३३ ॥
जपन्निन्द्रमिति[20] स्नातो वैश्वदेवं तु सप्तकम् । मुञ्चत्याज्यं तथा जुह्वत्सकलं किल्विषं नरः ॥ ३४ ॥
इमा[21] इति जपन् शश्वत्कामानाप्नोत्यभीप्सितान् । मानस्तोक[22] इति द्वाभ्यां त्रिरात्रोपोषितः शुचिः ॥
औडम्बरीश्च जुहुयात् समिधश्चाज्यसंस्कृताः । छित्त्वा सर्वान् मृत्युपाशाञ्जीवेद्रोगविवर्जितः ॥ ३६ ॥
ऊर्ध्वबाहुरनेनैव स्तुत्वा शम्भुं तथैव च । मानस्तोकेति च ऋचा शिखाबन्धे कृते नरः ॥ ३७ ॥
अधृष्यः सर्वभूतानां जायते संशयं विना । चित्रमित्युपतिष्ठेत[23] त्रिसन्ध्यं भास्करं तथा ॥ ३८ ॥
समित्पाणिर्नरो नित्यमीप्सितं धनमाप्नुयात् । अध[24] स्वप्नेति च जपन् प्रातर्मध्यन्दिने दिने ॥ ३९ ॥
दुःस्वप्नं चार्दते कृत्स्नं भोजनञ्चाप्नुयाच्छुभम् । उभे पुनामीति[25] तथा रक्षोघ्नः परिकीर्तितः ॥ ४० ॥

---

१ (१ म० । १ सू० । १ ऋ०) । २ (१ । २ । १) । ३ (१ । १८ । ६) । ४ (१ । २३ । १६) । ५ (१ । २४ । १३) । ६ (१ । ३२ ।) । ७ (१ । ३५ । ११) । ८ (१ । ४३ । १) । ९ (१ । ५० । १) । १० (१ । ५० । १३) । ११ (१ । ७१ । १) । १२ (१ । ७४ । १) । १३ (१ । ८८ । १६) । १४ (१ । ८९ । १) । १५ (१ । ९१ । १) । १६ (१ । ९४ । १) । १७ (१ । ९७ । १) । १८ (१ । ९९ । १) । १९ (१ । १०१ । १) । २० (१ । १०६ । १) । २१ (१ । ११४ । १) । २२ (१ । ११४ । ८) । २३ (१ । ११५ । १) । २४ (१ । १२० । १२) । २५ (१ । १३३ । १) ।

ये देवास[1] इति ऋचो जपन् कामानवाप्नुयात् । न मा[2] गरन्निति जपन् मुच्यते चाततायिनः ॥ ४१ ॥
कया[3] शुभेति च जपञ्ज्ञातिश्रैष्ठ्यमवाप्नुयात् । इमं नु[4] सोममित्येतत्सर्वान् कामानवाप्नुयात् ॥ ४२ ॥
पितुं न्वित्युपतिष्ठेत[5] नित्यमन्नमुपस्थितम् । अग्ने[6] नयेति सूक्तेन घृतहोमाच्च मार्गगः ॥ ४३ ॥
वीरान्नयमवाप्नोति सुश्लोकं यो जपेत्सदा । कङ्कतो[7] नेति सूक्तेन विषान् सर्वान् व्यपोहति ॥ ४४ ॥
यो जात[8] इति सूक्तेन सर्वान् कामानवाप्नुयात् । गणानामिति[9] सूक्तेन स्निग्धमाप्नोत्यनुत्तमम् ॥
यो मे राजन्नितीमान्तु[10] दु:स्वप्नशमनीमृचम् । अध्वनि प्रस्थितो यस्तु पश्येच्छत्रुं समुत्थितम् ॥ ४६ ॥
अप्रशस्तं प्रशस्तं वा कुविन्मां[11] गो इमं जपेत् । द्वाविंशकं[12] जपन् सूक्तमाध्यात्मिमकनुत्तमम् ॥ ४७ ॥
पर्वसु प्रयतो नित्यमिष्टान् कामान् समश्नुते । कृणुष्वेति[13] जपन् सूक्तं जुह्वदाज्यं समाहितः ॥ ४८ ॥
आरातीनां हरेत् प्राणान् रक्षांस्यपि विनाशयेत् । उपतिष्ठेत् स्वयं वह्निं परीत्यृचा[14] दिने दिने ॥ ४९ ॥
त रक्षति स्वयं वह्निर्विश्वतो विश्वतोमुखः । हंसः[15] शुचिषदित्येतच्छुचिरीक्षेद् दिवाकरम् ॥ ५० ॥
कृषिं प्रपद्यमानस्तु स्थालीपाकं यथाविधि । जुहुयात् क्षेत्रमध्ये तु शुनं वाहास्तु[16] पञ्चभिः ॥ ५१ ॥
इन्द्राय च मरुद्भ्यस्तु पर्जन्याय भगाय च । यथालिङ्गं तु विहरेल्लाङ्गलं तु कृषीवलः ॥ ५२ ॥
युक्तो धान्याय सीतायै सुनासीरावथोत्तरम् (४।५७।५) । गन्धमाल्यैर्नमस्कारैर्यजेदेताश्च देवताः ॥५३॥
प्रवापने प्रलवने खलसीतापहारयोः । अमोघं कर्म भवति वर्धते सर्वदा कृषिः ॥ ५४ ॥
समुद्रादिति[17] सूक्तेन कामानाप्नोति पावकात् । विश्वानि[18] न इति द्वाभ्यां य ऋग्भ्यां वह्निमर्हति ॥५५॥
स तरत्यापदः सर्वा यशः प्राप्नोति चाव्ययम् । विपुलां श्रियमाप्नोति जयं प्राप्नोत्यनुत्तमम् ॥ ५६ ॥
अग्ने[19] त्वमिति च स्तुत्वा धनमाप्नोति वाञ्छितम् । प्रजाकामो जपेन्नित्यं वरुणदैवतत्रयम् ॥ ५७ ॥
स्वास्त्यात्रेयं[20] जपेत् प्रातः सदा स्वस्त्ययनं महत् । स्वस्ति[21] पन्था इति प्रोच्य स्वस्तिमान् व्रजतेऽध्वनि।
विजिहीष्व[22] वनस्पते शत्रूणां व्याधितं भवेत् । स्त्रिया गर्भप्रमूढाया गर्भमोक्षमुत्तमम्[23] ॥ ५९ ॥
अच्छावदेति[24] सूक्तं च वृष्टिकामः प्रयोजयेत् । निराहारः क्लिन्नवासा न चिरेण प्रवर्षति ॥ ६० ॥
मनसः काममित्येतां पशुकामो नरो जपेत् । कर्दमेन इति स्नायात् प्रजाकामः शुचिव्रतः ॥ ६१ ॥
अश्वपूर्वामिति स्नायाद्राज्यकामस्तु मानवः । रोहिते चर्मणि स्नायाद्ब्राह्मणस्तु यथाविधि ॥ ६२ ॥
राजा चर्मणि वैयाघ्रे छागे वैश्यस्तथैव च । दशसाहस्रिको होमः प्रत्येकं परिकीर्तितः ॥ ६३ ॥
आगाव[25] इति सूक्तेन गोष्ठे गां लोकमातरम् । उपतिष्ठेद् व्रजेच्चैव यदीच्छेताः सदाक्षयाः ॥ ६४ ॥
उपेति[26] तिसृभि राज्ञो दुन्दुभिमभिमन्त्रयेत् । तेजो बलं च प्राप्नोति शत्रुं चैव नियच्छति ॥ ६५ ॥
तृणपाणिर्जपेत् सूक्तं रक्षोघ्नं[27] दस्युभिर्वृतः । ये के च[28] ज्मेत्यृचं जप्त्वा दीर्घमायुरवाप्नुयात् ॥ ६६ ॥
जीमूतसूक्तेन[29] तथा सेनाङ्गान्यभिमन्त्रयेत् । यथालिङ्गं ततो राजा विनिहन्ति रणे रिपून् ॥ ६७ ॥

---

१ (१ । १३९ । ११) । २ (१ । १५८ । ५) । ३ (१ । १६५ । १) । ४ (१ । १७९ । ५) । ५ (१ । १८७ । १) । ६ (१ । १८९ । १) । ७ (१ । १९१ । १) । ८ (२ । १२ । १) । ९ (२ । २३ । १) । १० (२ । २८ । १०) । ११ (३ । ४३ । ५) । १२ (३ । ४५ । १) । १३ (४ । ४ । १) । १४ (४ । १० । ८) । १५ (४ । ४० । ५) । १६ (४ । ५७ । ४) । १७ (४ । ५८ । १) । १८ (५ । ४ । ९) । १९ (५ । :४ । १) । २० (५ । ५१ । ११) । २१ (५ । ५१ । १५) । २२ (५ । ७८ । ५) । २३ (५ । ७८ । ७) । २४ (५ । ८३ । १) । २५ (६ । २८ । १) । २६ (६ । ४७ २९) । २७ (४ । ४ । १) । २८ (६ । ५२ । १५) २९ (६ । ७५ । १) ।

आग्नेयेति[१] त्रिभिः सूक्तैर्धनमाप्नोति चाक्षयम् । अमीवहेति[२] सूक्तेन भूतानि स्वापयेन्निशि ॥ ६८ ॥
सम्बाधे विषमे दुर्गे बन्धो (द्धो) वा निर्गतः क्वचित् । पालयन् वा गृहीतो वा सूक्तमेतत्तथा जपेत् ।६९।
त्रिरात्रं नियतोऽपोष्य श्रपयेत् पायसं चरुम् । तेनाहुतिशतं पूर्णं जुहुयात् त्र्यम्बकेत्यृचा[३] ॥ ७० ॥
समुद्दिश्य महादेवं जीवेदब्दशतं सुखम् । तच्चक्षुरित्यृचा[४] स्नात उपतिष्ठेद् दिवाकरम् ॥ ७१ ॥
उद्यन्तं मध्यगं चैव दीर्घमायुर्जिजीविषुः । (सूक्ताभ्यां पर एताभ्यां महतीं भूतिमाप्नुयात् ॥ ७२ ॥
इन्द्रासोमेति[५] सूक्तं तु कथितं शत्रुनाशनम् । यस्य लुप्तं व्रतं मोहाद् व्रात्यैर्वा संसृजेत्सह ॥ ७३ ॥
उपोष्याज्यं स जुहुयात्त्वमग्ने व्रतपा[६] इति । आदितीत्यृक्[७] च साम्राजं जप्त्वा वादे जयी भवेत् ॥ ७४ ॥
नहीति[८] च चतुष्केण मुच्यते महतो भयात् । ऋचं जप्त्वा यदीत्येतत्सर्वान्[९] कामानवाप्नुयात् ॥ ७५ ॥
द्वाचत्वारिंशतं[१०] चैन्द्रं जप्त्वा नाशयते रिपून् । ऋचं[११] महीति जप्त्वा च प्राप्नोत्यारोग्यमेव च ॥७६॥
शन्नो[१२] भवेति द्वाभ्यां तु भुक्त्वान्नं प्रयतः शुचिः । हृदयं पाणिना स्पृष्ट्वा व्याधिभिर्नाभिभूयते ॥ ७७ ॥
उत्त्वा[१३] मन्दन्त्विति स्नातो हुत्वा शत्रुं प्रमापयेत् । त्वन्नोऽग्ने[१४] इति सूक्तेन हुतेनान्नमवाप्नुयात् ॥७८॥
कन्या[१५] वारिति सूक्तेन त्वग्दोषाद्विप्र मुच्यते । यदद्य[१६] केच्चत्युदिते जप्ते वश्यं जगद्भवेत् ॥ ७९ ॥
यद्वागिति[१७] च जप्तेन वाणी भवति संस्कृता । वचोविदमिति[१८] त्वेता जपन् वाचं समश्नुते ॥ ८० ॥
पवित्राणां पवित्रं तु पावमान्यो ह्यृचो मताः । वैखानसा[१९] ऋचस्त्रिंशत् पवित्राः परमा मताः ॥ ८१ ॥
ऋचो द्विषष्टिः प्रोक्ताश्च पवस्वेत्यृषिसत्तम[२०] । सर्वकल्मषनाशाय पावनाय शिवाय च ॥ ८२ ॥
स्वादिष्ठयेति[२१] सूक्तानां सप्तषष्टिरुदाहृता । दशोत्तरा ऋचां चैताः पावमान्यः शतानि षट् ॥ ८३ ॥
एतज्जपं जुहुच्च घोरं मृत्युभयं जयेत् । आपो[२२] हि ष्ठेति वारिस्थो जपेत्पापभयार्दने ॥ ८४ ॥
प्र[२३] देवत्रेति नियतो जपेच्च मरुधन्वसु । प्राणान्तिके भये प्राप्ते क्षिप्रमायुस्तु विन्दति ॥ ८५ ॥
प्रावेषा[२४] मेत्यृचमेकां जपेच्च मनसा निशि । व्युष्टायामुदिते सूर्ये द्यूते जयमवाप्नुयात् ॥ ८६ ॥
मा[२५] प्र गामेति मूढश्च पन्थानं पथि विन्दति । क्षीणायुरिति मन्येत यं कञ्चित्सुहृदं प्रियम् ॥ ८७ ॥
यत्ते[२६] यममिति स्नातस्तस्य मूर्धानमालभेत् । सहस्रकृत्वः पञ्चाहं तेनायुर्विन्दते महत् ॥ ८८ ॥
इदमित्थेति[२७] जुहुयाद् घृतं प्राज्ञः सहस्रशः । पशुकामो गवां गोष्ठे अन्नकामश्चतुष्पथे ॥ ८९ ॥
वयः[२८] सुपर्णा इत्येतां जपन्वै विन्दते श्रियम् । हविष्पान्तीयमभ्यस्य[२९] सर्वपापैः प्रमुच्यते ॥ ९० ॥
तस्य रोगा विनश्यन्ति कायाग्निर्वर्धते तथा । या[३०] ओषधीः स्वस्त्ययनं सर्वव्याधिविनाशनम् ॥ ९१ ॥
बृहस्पते[३१] प्रतीत्येतद् वृष्टिकामः प्रयोजयेत् । सर्वत्रेति परा शान्तिर्ज्ञेयाऽप्रतिरथं[३२] तथा ॥ ९२ ॥
भूतांशं[३३] काश्यपं नित्यं प्रजाकामस्य कीर्तितम् । अहं[३४] रुद्रेति च जपेद्वाग्मी भवति मानवः ॥ ९३ ॥
न योनौ जायते विद्वान् जपन्रात्रीति रात्रिषु । रात्रिसूक्तं[३५] जपन् रात्रौ रात्रिं क्षेमी नयेन्नरः ॥ ९४ ॥

---

१ (७ । १ । १) । २ (७ । ५५ । १) । ३ (७ । ५९ । १२) । ४ (७ । ६६ । १६) । ५ (७ । १०४ । १) । ६ (८ । ११ । १) । ७ (८ । १८ । ६) । ८ (८ । ३० । १) । ९ (८ । ३२ । ६) । १० (८ । ४५ । १) । ११ (८ । ४७ । १) । १२ (८ । ४८ । ४) । १३ (८ । ६४ । १) । १४ (८ । ७१ । १) । १५ (८ । ९१ । १) । १६ (७ । ९३ । ४) । १७ (८ । १०० । १०) । १८ (८ । १०२ । १६) । १९ (९ । ६६ । १) । २० (९ । २५ । १) । २१ (९ । १ । १) । २२ (१० । ९ । १) । २३ (१० । ३० । १) । २४ (१० । ३४ । १) । २५ (१० । ५७ । १) । २६ (१० । ५८ । १) । २७ (१० । ६१ । १) । २८ (१० । ७३ । ११) । २९ (१० । ८८ । १) । ३० (१० । ९७ । १) । ३१ (१० । ९८ । १) । ३२ (१० । १०३ । १) । ३३ (१० । १०६ । १) । ३४ (१० । १२५ । १) । ३५ (१० । १२७ । १) ।

कल्पयन्तीति[1] च जपेन्नित्यं कृत्वारिनाशनम् । आयुष्यं चैव वर्चस्यं सूक्तं दाक्षायणं महत् ॥ ९५ ॥
उत देवा[2] इति जपेदामयघ्न धृतव्रतः । आमयघ्न[3] जरित्येतज्जपेदग्निभये सति ॥ ९६ ॥
अरण्यानीत्यरण्येषु[4] जपेत्तद्भयनाशनम् । ब्राह्मीमासाद्य सूक्ते द्वे वचां ब्राह्मी शतावरीम् ॥ ९७ ॥
पृथगद्भिर्घृतैर्वापि मेधां लक्ष्मीं च विन्दति । शास[5] इत्यसपत्नघ्नं संग्रामं विजिगीषतः ॥ ९८ ॥
ब्रह्मणाग्निः[6] संविदानं गर्भमृत्युनिवारणम् । अपेहीति[7] जपेत् सूक्तं शुचिर्दुःस्वप्ननाशनम् ॥ ९९ ॥
तुभ्येदमिति[8] वै जप्त्वा समाधिं विन्दते परम् । मयोभूर्वात[9] इत्येतद्गवा स्वस्त्ययनं महत् ॥ १०० ॥
शाम्बरीमिन्द्रजालं वा मायामेतेन वारयेत् । महि त्रीणामवोऽस्त्विति[10] पथि स्वस्त्ययनं जपेत् ॥ १०१ ॥
प्राग्नयेति[11] द्विपन्नेवं जपेच्च रिपुनाशनम् । वास्तोष्पत्येन[12] मन्त्रेण यजेत गृहदेवताः ॥ १०२ ॥
जपस्यैष विधिः प्रोक्तो हुते ज्ञेयो विशेषतः । होमान्ते दक्षिणा देया पापशान्तिर्हुतेन तु ॥ १०३ ॥
हुतं शाम्यति चान्नेन अन्नं हेमप्रदानतः । विप्राशिषस्त्वमोघाः स्युर्बहिः स्नानं तु सर्वतः ॥ १०४ ॥
सिद्धार्थका यवा धान्यं पयो दधि घृतं तथा । क्षीरवृक्षास्तथेध्मं तु होमा वै सर्वकामदाः ॥ १०५ ॥
समिधः कण्ठकिन्यश्च राजिका रुधिरं विषम् । अभिचारे तथा शैलमशनं सक्तवः पयः ॥ १०६ ॥
दधि भैक्ष्यं मूलमृग्विधानमुदाहृतम् ।···· ···· ···· ···· ···· ····॥

इति ऋग्विधानम् ॥ अथ यजुर्विधानम्—

यजुर्विधानं वक्ष्यामि भुक्तिमुक्तिप्रदं शृणु । ॐकारपूर्विका राम महाव्याहृतयो मताः ॥ १ ॥
सर्वकल्मषनाशिन्यः सर्वकामप्रदास्तथा । आज्याहुतिसहस्रेण देवानाराधयेद् बुधः ॥ २ ॥
मनसः कांक्षितं राम मनसेप्सितकामदम् । शान्तिकामो यवैः कुर्यात्तिलैः पापानुत्तये ॥ ३ ॥
धान्यैः सिद्धार्थकैश्चैव सर्वकामकरैस्तथा । औडुम्बरीभिरिध्माभिः पशुकामस्य शस्यते ॥ ४ ॥
दध्ना चैवान्नकामस्य पयसा शान्तिमिच्छतः । अपामार्गसमिद्भिस्तु कामयन् कनकं बहु ॥ ५ ॥
कन्याकामो घृताक्तानि युग्मशो ग्रथितानि तु । जातीपुष्पाणि जुहुयाद् ग्रामार्थी तिलतण्डुलान् ॥ ६ ॥
वश्यकर्मणि शाखोटं वासापामार्गमेव च । विषासृङ्मिश्रसमिधो व्याधिघातश्च भार्गव ॥ ७ ॥
क्रुद्धस्तु जुहुयात् सम्यक् शत्रूणां वधकाम्यया । सर्वव्रीहिमयीं कृत्वा राज्ञः प्रतिकृतिं द्विज ॥ ८ ॥
सहस्रशस्तु जुहुयाद्राजा वशगतो भवेत् । वस्त्रकामस्य पुष्पाणि दूर्वा व्याधिविनाशिनी ॥ ९ ॥
ब्रह्मवर्चसकामस्य वासोग्रं च विधीयते । प्रत्यङ्गिरेषु जुहुयात् तुषकण्टकभस्मभिः ॥ १० ॥
विद्वेषणे च पक्षाणि काककौशिकयोस्तथा । कापिलं च घृतं हुत्वा तथा चन्द्रग्रहे द्विज ॥ ११ ॥
वचाचूर्णेन सम्पातान् समानीय च तां वचाम् । सहस्रमन्त्रितां भुक्त्वा मेधावी जायते नरः ॥ १२ ॥
एकादशांगुलं शंकुं लौहं खादिरमेव च । द्विषतो बधोऽसीति जपन्निखनेद्रिपुवेश्मनि ॥ १३ ॥
उच्चाटनमिदं कर्म शत्रूणां कथितं तव । चक्षुष्या इति जप्त्वा च विनष्टं चक्षुराप्नुयात् ॥ १४ ॥
उपयुञ्जत इत्येतदनुवाकं तथान्नदम् । तनूपा अग्ने सदिति (३ । १७) दूर्वा हुत्वार्तिवर्जितः ॥ १५ ॥
भेषजमसीति[13] दध्याज्यैर्होमः पशूपसर्गनुत् । त्रियम्बकं यजामहे[14] होमः सौभाग्यवर्धनः ॥ १६ ॥
कन्यानाम गृहीत्वा तु कन्यालाभकरः परः । भयेषु तु जपन्नित्यं भयेभ्यो विप्र मुच्यते ॥ १७ ॥
धत्तूरपुष्पं सघृतं हुत्वा स्यात्सर्वकामभाक् । हुत्वा तु गुग्गुलं राम स्वप्ने पश्यति शङ्करम् ॥ १८ ॥

---

१ (१० । १३० । ५६) । २ (१० । १३७ । १) । ३ (१० । १४२ । १) । ४ (१० । १४६ । १) ।
५ (१० । १५२ । १) । ६ (१० । १६२ । १) । ७ (१० । १६४ । १) । ८ (१० । १६७ । १) ।
९ (१० । १६९ । १) । १० (१० । १८५ । १) । ११ (१० । १८७ १) । १२ (७ । ५४ । १) ।
१३ (३ । ५९) । १४ (३ । ६०) ।

युञ्जते मनोऽनुवाकं[१] जप्त्वा दीर्घायुराप्नुयात् । विष्णो रराटमित्येतत्[२] सर्वबाधाविनाशनम् ॥ १९ ॥
रक्षोघ्नं च यशस्यं च तथैव विजयप्रदम् । अयन्नो अग्निरित्येतत्संग्रामे[३] विजयप्रदम् ॥ २० ॥
इदमापः प्रवहत[४] स्नाने पापापनोदनम् । विश्वकर्मन् हविषेति[५] सूचीं लौहीं दशांगुलाम् ॥ २१ ॥
कन्याया निखनेद् द्वारि साऽन्यस्मै न प्रदीयते । दवे सवितरेतेन[६] हुतेनान्नेन चान्नवान् ॥ २२ ॥
अग्ने स्वाहेति[७] जुहुयाद्बलकामो द्विजोत्तम् । तिलैर्यवैश्च धर्मज्ञ तथापामार्गतण्डुलैः ॥ २३ ॥
सहस्रमन्त्रितां कृत्वा तथा गोरोचनां द्विज । तिलकं च तया कृत्वा जनस्य प्रियतामियात् ॥ २४ ॥
रुद्राणां च तथा जप्यं सर्वाघविनिसूदनम् । सर्वकर्मकरो होमस्तथा सर्वत्र शान्तिदः ॥ २५ ॥
अजाविकानामश्वानां कुञ्जराणां तथा गवाम् । मनुष्याणां नरेन्द्राणां बालानां योषितामपि ॥ २६ ॥
ग्रामाणां नगराणां च देशानामपि भार्गव । उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च ॥ २७ ॥
मरके समनुप्राप्ते रिपुजे च तथा भये । रुद्रहोमः परा शान्तिः पायसेन घृतेन च ॥ २८ ॥
कूष्माण्डघृतहोमेन सर्वान् पापान् व्यपोहति । सक्तुयावकभैक्षाशी नक्तं मनुजसत्तम ॥ २९ ॥
बहिः स्नानरतो मासान्मुच्यते ब्रह्महत्यया । मधु वातेति[८] मन्त्रेण होमादितोऽखिलं लभेत् ॥ ३० ॥
दधि क्राव्णेति[९] हुत्वा तु पुत्रान् प्राप्नोत्यसंशयम् । तथा घृतवतीत्येतदायुष्यं[१०] स्याद् घृतेन तु ॥३१ ॥
स्वस्ति[११] न इन्द्र इत्येतत्सर्वबाधाविनाशनम् । इह गावः प्रजायध्वमिति पुष्टिविवर्धनम् ॥ ३२ ॥
घृताहुतिसहस्रेण तथाऽलक्ष्मीविनाशनम् । स्रुवेण देवस्य[१२] त्वेति हुत्वापामार्गतण्डुलम् ॥ ३३ ॥
मुच्यते विकृताच्छीघ्रमभिचारान्न संशयः । रुद्र यत्ते पलाशस्य समिद्भिः कनकं लभेत् ॥ ३४ ॥
शिवो[१३] भवेत्यग्न्युत्पाते व्रीहिभिर्जुहुयान्नरः । याः[१४] सेना इति चैतच्च तस्करेभ्यो भयापहम् ॥ ३५ ॥
योऽस्मभ्यमरातीयाद्[१५] हुत्वा कृष्णतिलान्नरः । सहस्रशोऽभिचाराच्च मुच्यते विकृताद् द्विज ॥ ३६ ॥
अन्नेनान्नपतेत्येवं[१६] हुत्वा चान्नमवाप्नुयात् । हंसः शुचिषदित्येतज्जप्तं[१७] तोयेऽघनाशनम् ॥ ३७ ॥
चत्वारि शृङ्गेत्येतत्तु[१८] सर्वपापहरं जले । देवा यज्ञेति[१९] जप्त्वा तु ब्रह्मलोके महीयते ॥ ३८ ॥
वसन्तेति[२०] च हुत्वाज्यमादित्याद्वरमाप्नुयात् । सुपर्णोऽसीति[२१] चेत्यस्य कर्म व्याहृतिवद्भवेत् ॥ ३९ ॥
नमः सुतेति[२२] त्रिर्जप्त्वा बन्धनान्मोक्षमाप्नुयात् । अन्तर्जले त्रिरावर्त्य द्रुपदा[२३] सर्वपापनुत् ॥ ४० ॥
इह गावः प्रजायध्वं मन्त्रोऽयं बुद्धिवर्धनः । हुतस्तु सर्पिषा दध्ना पयसा पायसेन वा ॥ ४१ ॥
शतं व इति (१२।७६) वैतेन हुत्वा पर्णफलानि च । आरोग्यं श्रियमाप्नोति जीवितञ्च चिरं तथा ।४२।
ओषधीः प्रतिमोदध्वं[२४] वपने लवनेऽर्थकृत् । अश्वावतीं[२५] पायसेन होमाच्छान्तिमवाप्नुयात् ॥ ४३ ॥
उच्छुष्मा[२६] इति मन्त्रेण बन्धनस्थो विमुच्यते । युवा सुवासा इत्येव वासांस्याप्नोत्यनुत्तमम् ॥ ४४ ॥
मुञ्चन्तु मा शपथ्येति[२७] सर्वान्तकविनाशनम् । मा मा[२८] हिंसीस्तिलाज्येन हुतं रिपुविनाशनम् ॥ ४५ ॥
नमोस्तु सर्वसर्पेभ्यो[२९] घृतेन पायसेन च । कृणुष्व पाज[३०] इत्येतदभिचारविनाशनम् ॥ ४६ ॥
दूर्वाकाण्डायुतं हुत्वा काण्डात्काण्डेति[३१] मानवः । ग्रामे जनपदे वापि मरकं तु शमं नयेत् ॥ ४७ ॥
रोगार्तो मुच्यते रोगात् तथा दुःखात्तु दुःखितः । औडुम्बरीश्च समिधो मधुमान्नो[३२] वनस्पतिः ॥ ४८ ॥

---

१ (५ । १४) । २ (५ । २१) । ३ (५ । ३७) । ४ (६ । १७) । ५ (८ । ४६) । ६ (५ । ३९) । ७ (२७ । २२) । ८ (१३ । २७) । ९ (२३ । ३२) । १० (३४ । ४५) । ११ (२५ । २१) । १२ (५ । २२) । १३ (११ । ४५) । १४ (११ । ७७) । १५ (११ । ८०) । १६ (११ । ८३) । १७ (१० । २४) । १८ (१७ । ९१) । १९ (१९ । १२) । २० (२४ । २०) । २१ (१२ । ४) । २२ (१२ । ६३) । २३ (२० । २०) । २४ (१२ । ७७) । २५ (१२ । ८१) । २६ (१२ । ८२) । २७ (१२ । ९०) । २८ (१२ । १०२) । २९ (१३ । ६) । ३० (१३ । ९) । ३१ (१३ । २०) । ३२ (१३ । २९) ।

हुत्वा सहस्रशो राम धनमाप्नोति मानवः । सौभाग्यं महदाप्नोति व्यवहारे तथा जयम् ॥ ४९ ॥
अपां गम्भनिति[1] हुत्वा देवं वर्षापयेद् ध्रुवम् । अयां त्वेमेति (१३।८३) च तथा हुत्वा दधि घृतं मधु।५०।
प्रवर्तयति धर्मज्ञ महावृष्टिमनन्तरम् । नमस्ते रुद्र[2] इत्येतत् सर्वोपद्रवनाशनम् ॥ ५१ ॥
सर्वशान्तिकरं प्रोक्तं महापातकनाशनम् । अध्यवोचदित्यनेन[3] रक्षणं व्याधितस्य तु ॥ ५२ ॥
रक्षोघ्नं च यशस्यं च चिरायु पुष्टिवर्धनम् । सिद्धार्थकानां क्षेपेण पथि चैतज्जगत् सुखी ॥ ५३ ॥
असौ यस्ताम्र[4] इत्येतत् पश्यन्नित्यं दिवाकरम् । उपतिष्ठेत धर्मज्ञ सायं प्रातरतन्द्रितः ॥ ५४ ॥
अन्नमक्षयमाप्नोति दीर्घमायुश्च विन्दति । प्र मुञ्च धन्वनेत्येतत्[5] षड्भिरायुधमन्त्रणम् ॥ ५५ ॥
रिपूणां भयदं युद्धे नात्र कार्या विचारणा । मा नो महान्त[6] इत्येव बालानां शान्तिकारकम् ॥ ५६ ॥
नमो हिरण्यबाहवे[7] इत्यनुवाकसप्तकम् । राजिकां कटुतैलाक्तां जुहुयाच्छत्रुनाशिनीम् ॥ ५७ ॥
नमो व किरिकेभ्यश्च पद्मलक्षाहुतैर्नरः । राज्यलक्ष्मीमवाप्नोति तथा बिल्वैः सुवर्णकम् ॥ ५८ ॥
इमा रुद्रायेति[9] तिलैर्होमाच्च धनमाप्यते । दूर्वाहोमेन चान्येन सर्वव्याधिविवर्जितः ॥ ५९ ॥
आशुः शिशान[10] इत्येतदायुधानां च रक्षणे । संग्रामे कथितं राम सर्वशत्रुनिवर्हणम् ॥ ६० ॥
वाजश्च[11] मेति जुहुयात्सहस्रं पञ्चभिर्द्विज । आज्याहुतीनां धर्मज्ञ चक्षूरोगाद्विमुच्यते ॥ ६१ ॥
शन्नो वनस्पते गेहे होमः स्याद्वास्तुदोषनुत् । अग्न आयूंषि[12] हुत्वाज्यं द्वेषं नाप्नोति केनचित् ॥ ६२ ॥
अयां फोति (१६।७१) लाजाभिर्हुत्वा जयमवाप्नुयात् । भद्रा[13] इतोन्द्रियैर्हीनो जपन् स्यात्सकलेन्द्रियः॥
अग्निश्च[14] पृथिवी चेति वशीकरणमुत्तमम् । अध्वनेति[15] जपन्मन्त्रं व्यवहारे जयी भवेत् ॥ ६४ ॥
ब्रह्म[16] राजन्यमिति च कमारम्भे तु सिद्धिकृत । संवत्सरोऽसीति[17] घृतैर्लक्षहोमादरोगवान् ॥ ६५ ॥
केतुं कृण्वन्नित्येतच्च[18] संग्रामे जयवर्धनम् । इन्द्रोऽग्निर्वर्म इत्येतद्रणे वर्मनिबन्धनम् ॥ ६६ ॥
धन्वना[19] गेति मन्त्रश्च धनुर्ग्रहणकः परः । ऋजीतेति[20] तथा मन्त्रो विज्ञेयो ह्यभिमन्त्रणे ॥ ६७ ॥
मन्त्रश्चाहिरिवेत्येतच्छराणां[21] मन्त्रणे भवेत् । बह्वीनां पिता[22] इत्येतत्तूणमन्त्रः प्रकीर्तितः ॥ ६८ ॥
युञ्जन्तीति[23] तथाश्वानां योजने मन्त्र उच्यते । आशुः शिशान् इत्येद्यात्रारम्भमुच्यते ॥ ६९ ॥
विष्णोः[24] क्रमेति मन्त्रश्च रथारोहणिकः परः । आजङ्घन्तीति[25] चाश्वानां ताडनोयमुदाहृतम् ॥ ७० ॥
याः[26] सेना अभीत्वरीति परसैन्यमुखे जपेत् । दुन्दुभ्य इति चाप्येतद् दुन्दुभीताडनं भवेत् ॥ ७१ ॥
एतैः पूर्वैर्हुतैर्मन्त्रैः कृत्वैवं विजयी भवेत् । यमेन दत्तामित्यस्य[27] कोटिहोमाद्विचक्षणः ॥ ७२ ॥
रथमुत्पादयेच्छीघ्रं संग्रामे विजयप्रदम् । आ कृष्णेन[28] तथैतस्य कर्म व्याहृतिवद्भवेत् ॥ ७३ ॥
शिवसंकल्पजापेन[29] समाधिं मसनो लभेत् । पञ्चनद्यः[30] पञ्चलक्षं हुत्वा लक्ष्मीमवाप्नुयात् ॥ ७४ ॥
यदाबध्नन् दाक्षायणा[31] मन्त्रेणानेन मन्त्रितम् । सहस्रकृत्वः कनकं धारयेद्रिपुवारणम् ॥ ७५ ॥
इमं जीवेभ्य[32] इति च शिलां लोष्टं चतुर्दिशम् । क्षिपेद् गृहे तदा तस्य न स्याच्चोरभयं निशि ॥ ७६ ॥

---

१ । (१३ । ३०) । २ (१६ । १) । ३ (१६ । ५) । ४ (१६ । ६) । ५ (१६ । ९) । ६ (१६ । १५) । ७ (१६ । १७) । ८ (१६ । ४६) । ९ १६ । ४८) । १० (१७ । ३३) । ११ (१८ । १) । १२ (१९ । ३८) । १३ (२५ । २६) । १४ (२६ । १) । १५ (२६ । १) । १६ (२६ । २) । १७ (२७ । ४५) । १८ (२९ । ३७) । १९ (२९ । ३९) । २० (२९ । ४९) । २१ (२९ । ५१) । २२ (२९ । ४२) । २३ (२३ । ५) २४ (१२ । ५) । २५ (२९ । ५०) । २६ (११ । ७७) । २७ (२९ । १३) । २८ (३३ । ४३) । २९ (३४ । १) । ३० (३४ । ११) । ३१ (३४ । ५२) । ३२ (३५ । १५) ।

पशी मे गामनेषेति [1]वशीकरणमुत्तमम् । हन्तुमभ्यागतस्तत्र(स्य) वशी भवति मानवः ॥ ७७ ॥
भक्ष्यताम्बूलपुष्पाद्यं मन्त्रितं तु प्रयच्छति । यस्य धर्मज्ञ वशगः सोऽस्य शीघ्रं भविष्यति ॥ ७८ ॥
शन्नो मित्रः[2] शमित्येतत्सदा सर्वत्र शान्तिदम् । गणानां त्वा गणपतिं कृत्वा होमं चतुष्पथे ॥ ७९ ॥
वशीकुर्याज्जगत्सर्वं सर्वधान्यैरसंशयम् । हिरण्यवर्णाः शुचयो मन्त्रोऽयमभिषेचने ॥ ८० ॥
शन्नो देवीरभिष्टये[3] तथा शान्तिकरः परः । एकचक्रेति मन्त्रेण हुतेनाज्येन भागशः ॥ ८१ ॥
ग्रहेभ्यः शान्तिमाप्नोति प्रसादं च न संशयः । गावो भग इति द्वाभ्यां हुत्वाज्यं गा अवाप्नुयात् ॥८२॥
प्रवादांशः सोपदिति ग्रहयज्ञे विधीयते । देवो वनस्पतिरिति[4] द्रुमयज्ञे विधीयते ॥ ८३ ॥
गायत्री वैष्णवी ज्ञेया तद्विष्णोः[5] परमं पदम् । सर्वपापप्रशमनं सर्वकामकरं तथा ॥ ८४ ॥

इति यजुर्विधानम् ॥ अथ सामविधानम्——

यजुर्विधानं कथितं वक्ष्ये साम्नां विधानकम् । संहितां वैष्णवीं जप्त्वा हुत्वा स्यात्सर्वकामभाक् ॥ १ ॥
संहिता छान्दसीं साधु जप्त्वा प्रीणाति शङ्करम् । स्कान्दीं पैत्र्यां संहितां च जप्त्वा स्यात्तु प्रसादवान् ॥
यत इन्द्र भयामहे हिंसादोषविनाशनम् । अवकीर्णी मुच्यते च अग्निस्तिग्मेति वै जपन् ॥ ३ ॥
सर्वपापहरं ज्ञेयं परितोषिश्वता सुतम् । अविक्रेयं च विक्रीय जपेद् घृतवतीति च ॥ ४ ॥
अद्या नो देव सवितुर्ज्ञेयं दुःस्वप्ननाशनम् । अबोध्यग्निरिति मन्त्रेण घृतं राम यथाविधि ॥ ५ ॥
अभ्युक्ष्य घृतशेषेण मेखलाबन्ध इष्यते । स्त्रीणां यासां तु गर्भाणि पतन्ति भृगुसत्तम ॥ ६ ॥
मणिं जातस्य बालस्य बध्नीयात्तदनन्तरम् । सोमं राजानमेतेन व्याधिभिर्विप्र मुच्यते ॥ ७ ॥
सर्पसाम प्रयुञ्जानो नाप्नुयात्सर्पजं भयम् । माद्य त्वा वाद्यतेत्येतद् हुत्वा विप्र सहस्रशः ॥ ८ ॥
शतावरिमणिं बद्ध्वा नाप्नुयाच्छत्रुतो भयम् । दीर्घतमसोऽर्क इति हुत्वान्नं प्राप्नुयाद् वसु ॥ ९ ॥
समिन्यायन्तीति जपन् न म्रियेत पिपासया । त्वमिमा औषधी ह्येतज्जप्त्वा व्याधिं न चाप्नुयात् ॥१०॥
पथि देवव्रतं जप्त्वा भवेभ्यो विप्र मुच्यते । यदिन्द्रो अनयदिति हुतं सौभाग्यवर्धनम् ॥ ११ ॥
भगो न चित्र इत्येवं नेत्रयोरञ्जनं हितम् । सौभाग्यवर्धनं राम नात्र कार्या विचारणा ॥ १२ ॥
जपेदिन्द्रेति वर्गं च तथा सौभाग्यवर्धनम् । परि[6] प्रिया दिवाः कविः काम्यां संश्रावयेत्स्त्रियम् ॥ १३ ॥
सा तं कामयते राम नात्र कार्या विचारणा । रथन्तरं वामदेवं ब्रह्मवर्चसवर्धनम् ॥ १४ ॥
प्राशयेद्बालकं नित्यं वचाचूर्णं घृतप्लुतम् । इन्द्रमिहासिनं जप्त्वा भवेच्छ्रुतिधरस्त्वसौ ॥ १५ ॥
हुत्वा रथन्तरं जप्त्वा पुत्रमाप्नोत्यसंशयम् । मयि श्रीरिति मन्त्रोऽयं जप्तव्यः श्रीविवर्धनः ॥ १६ ॥
वैरूप्यस्याष्टकं नित्यं प्रयुञ्जानः श्रियं लभेत् । सप्ताष्टकं प्रयुञ्जानः सर्वान् कामानवाप्नुयात् ॥ १७ ॥
गव्येषु णेति यो नित्यं सायं प्रातरतन्द्रितः । उपस्थानं गवां कुर्यात्तस्य स्युस्ताः सदा गृहे ॥ १८ ॥
घृताक्तं तु यवद्रोणं वात[7] आवातु भेषजम् । अनेन हुत्वा विधिवत्सर्वां मायां व्यपोहति ॥ १९ ॥
प्रदेवो दासेन तिलान् हुत्वा कामंणकृन्तनम् । अभि त्वा[8] पूर्वपीतये वषट्कारसमन्वितम् ॥ २० ॥
वासकेध्मसहस्रं तु हुतं युद्धे जयप्रदम् । हस्त्यश्वपुरुषान् कुर्याद्बुधः पिष्टमयान् शुभान् ॥ २१ ॥
परकीयानथोद्दिश्य प्रधानपुरुषांस्तथा । सुस्विन्नान् पिष्टकवरान् क्षुरेणोत्कृत्य भागशः ॥ २२ ॥
अभि त्वा[9] शूर नो नुमो मन्त्रेणानेन मन्त्रवित् । कृत्वा सर्षपतैलाक्तान् प्रोक्तेन जुहुयात्ततः ॥ २३ ॥
एतत्कृत्वा बुधः कर्म संग्रामे जयमाप्नुयात् । गारुडं वामदेव्यं च रथन्तरबृहद्रथौ ॥ २४ ॥
सर्वपापप्रशमनः कथितः संशयं विना । ....॥

---

१ (३५ । १८) । २ (३६ । ९) । ३ (३६ । १२) । ४ (२८ । ४३) । ५ (६ । ५) । ६ (५ । १ । १०) । ७ (२० । ७ । ४ । १) । ८ (१६ । १ । १ । १) । ९ (४ । १ । १)

इति सामविधानम् ॥ अथाथर्वविधानम्—

साम्नां विधानं कथितं वक्ष्ये चाथर्वणमथ । शान्तातीयं गणं हुत्वा शान्तिमाप्नोति मानवः ॥ १ ॥
भैषज्यं च गणं हुत्वा सर्वान् रोगान् व्यपोहति । त्रिसप्तीयं गणं हुत्वा सर्वपापैः प्रमुच्यते ॥ २ ॥
क्वचिन्नाप्नोति च भयं हुत्वा चैवाभयं गणम् । न क्वचिज्जायते राम गणं हुत्वापराजितम् ॥ ३ ॥
आयुष्यं च गणं हुत्वा अपमृत्युं व्यपोहति । स्वस्तिमाप्नोति सर्वत्र हुत्वा स्वस्त्ययनं गणम् ॥ ४ ॥
श्रेयसा योगमाप्नोति हुत्वाथर्वगणं तथा । वास्तोष्पत्यं गणं हुत्वा वास्तुदोषान् व्यपोहति ॥ ५ ॥
तथा रौद्रगणं हुत्वा सर्वान् दोषान् व्यपोहति । एतैर्दशगणैर्होमो ह्यष्टादशसु शान्तिषु ॥ ६ ॥
वैष्णवी शान्तिरैन्द्री तु ब्राह्मी रौद्री तथैव च । वायव्या वारुणी चैव कौबेरी भार्गवी तथा ॥ ७ ॥
प्राजापत्या तथा त्वाष्ट्री कौमारी वह्निदेवता । मारुद्गणा च गन्धर्वी शान्तिर्नैर्ऋतकी तथा ॥ ८ ॥
शान्तिराङ्गिरसी याम्या पार्थिवी सर्वकामदा । यस्त्वां मृत्युरिति ह्येतज्जप्तं मृत्युविनाशम् ॥ ६ ॥
सुपर्णस्त्वेति हुत्वा च भुजगैर्नैव बाध्यते । इन्द्रेण वृत्तमित्येतत् सर्वबाधाविनाशनम् ॥ १० ॥
इमा देवीति मन्त्रश्च सर्वशान्तिकरः परः । देवा मरुत इत्येतत् सर्वकामकरं भवेत् ॥ ११ ॥
यमस्य लोकादित्येतद् दु स्वप्नशमनं परम् । इन्द्रं वयं वणिजेति पण्यलाभकरं परम् ॥ १२ ॥
कामो मे राजेति हुतं स्त्रीणां सौभाग्यवर्धनम् । तुभ्यमेव जरिमन्नित्ययुतं तु हुतं भवेत् ॥ १३ ॥
अग्ने गोभिर्न इत्येतत् मेधावृद्धिकरं परम् । ध्रुवं ध्रुवेणेति हुतं स्थानलाभकरं भवेत् ॥ १४ ॥
युनक्तिसीरा वियुगा कृषिलाभकरं भवेत् । अयं ते योनिरित्येतत् पुत्रलाभकरं भवेत् ॥ १५ ॥
अहन्ते भग इत्येतद्भवेत् सौभाग्यवर्धनम् । ये मे पाशास्तथाप्येतद् बन्धनान्मोक्षकारणम् ॥ १६ ॥
अहन्नहन्निति रिपून्नाशयेद्धोमजाप्यतः । त्वमुत्तममिति वैतद् यशोवृद्धिविवर्धनम् ॥ १७ ॥
यथा मृगवतीत्येतत् स्त्रीणां सौभाग्यवर्धनम् । येन देही त्विदं चैव गर्भलाभकरं भवेत् ॥ १८ ॥
शिवः शिवाभिरित्येतत् क्रुद्धं भूपं प्रसादयेत् । बृहस्पतिर्नः परिपातु पथि स्वस्त्ययनं भवेत् ॥ १६ ॥
मुञ्चामि त्वेति च जपादपमृत्युनिवारणम् । अथर्वसिरसोऽध्येता सर्वपापैः प्रमुच्यते ॥ २० ॥
प्राधान्येन तु मन्त्राणां किञ्चित्कर्म तवेरितम् । वृक्षाणां यज्ञियानां तु समिधः प्रथमं हविः ॥ २१ ॥
आज्यं च व्रीहयश्चैव तथा वै गौरसर्षपाः । अक्षतानि तिलाश्चैव दधिक्षीरे च भार्गव ॥ २२ ॥
दर्भास्तथैव दूर्वाश्च बिल्वानि कमलानि च । शान्तिपुष्टिकराण्याहुर्द्रव्याण्येतानि सर्वतः ॥ २३ ॥
तैलं कणानि धर्मज्ञ राजिका रुधिरं विषम् । समिधः कण्टकोपेता अभिचारेषु योजयेत् ॥ २४ ॥
आर्षं वै दैवतं छन्दो विनियोगज्ञ आचरेत् । ....॥

इत्यथर्वविधानम् ॥ अथ मृत्युञ्जयप्रयोगो ग्रन्थान्तरे—

चतुरस्रं चतुर्द्वारं त्रिरेखं पद्मगर्भितम् । हस्तत्रयप्रमाणं तु तण्डुलैर्मण्डलं लिखेत् ॥ १ ॥
भैरवीर्भैरवान् सिद्धीर्दिशो नागानुपग्रहान् । पीठोपपीठसंयुक्तदिक्पालादिसमन्वितम् ॥ २ ॥
देवतानां चतुष्षष्टिं लिखेत् पद्मे सुशोभने । एकैकपद्मपत्रेषु वसुसंख्या दलेदले ॥ ३ ॥
प्रणवादिनमोन्तैस्तु नाममन्त्रैः प्रपूजयेत् । गन्धपुष्पाक्षतैर्धूपदीपनैवेदनादिकैः ॥ ४ ॥
अर्चयेत् पद्मपत्रेषु सर्वकार्यप्रसादकान् । सौवर्णं त्र्यम्बकं कुर्यात्पलेनार्धपलेन वा ॥ ५ ॥
गोमयेन गुडेनापि तथा वित्तानुसारतः । मृत्युञ्जयेन मन्त्रेण पूजयेदुपचारकैः ॥ ६ ॥
सौम्यद्वारे महाभाग देवदेवं घटे न्यसेत् । जपेन्मृत्युञ्जयं मन्त्रं तदग्रे तु सहस्रकम् ॥ ७ ॥
देवीसूक्तं जपेतावद्रुद्राध्यायं विशेषतः । अथवा बहुभिर्विप्रैः कोटिलक्षायुतादिकम् ॥ ८ ॥
जप्त्वा पूर्वं विघ्नराजं सर्वकार्यप्रसाधनम् । षण्मासं राज्यकामस्तु पुत्रकामस्तथैव च ॥ ६ ॥

शत्रुनाशनकामस्तु वर्षान्तमपि कारयेत् । षण्मासं पूजयेद्विद्वान् महारोगैः प्रपीडितः ॥ १० ॥
मासमेकं तु मासार्धं कुर्याद्रोगाकुलीकृतः । बन्दीवेश्मनि दुर्गे वा बद्धो मुच्येत बन्धनात् ॥ ११ ॥
षाण्मासिकप्रयोगाच्च द्विगुणान्नात्र संशयः । महारिष्टभयग्रस्तः प्रयोगमिममाचरेत् ॥ १२ ॥
नचारिष्टभयं घोरं प्राप्नुयादार्तिमेव च । महापापसमुद्भूतं दृढकर्मसमर्जितम् ॥ १३ ॥
प्रयोगात्त्र्यम्बकाख्याच्च नत्वारिष्टभयं क्वचित् । एतन्मण्डलमध्यस्थोऽभिषिक्तः पुरुषो यदा ॥ १४ ॥
ततः प्रभृति युद्धेषु शत्रूञ्जयति निश्चितम् । राज्यभ्रष्टो लभेद्राज्यं क्षीणायुर्म्रियते नच ॥ १५ ॥
मुक्त्वा पीडां ग्रहाः सर्वे शान्तिं कुर्वन्ति नित्यशः । प्रयोगस्य प्रभावेन नात्र कार्या विचारणा ॥ १६ ॥
प्रयोगमपरं वक्ष्ये रहस्यं त्र्यम्बकाभिधम् । सर्वार्थसाधनं पुण्यं सर्वोपद्रवनाशनम् ॥ १७ ॥
यत्कृते सर्वराजानो राजपुत्राश्च मन्त्रिणः । राष्ट्रस्थाः सर्वलोकाश्च तत्क्षणात् तद्वचोनुगाः ॥ १८ ॥
अवश्या वश्यतां यान्ति दुष्टस्त्रीक्षुद्रजन्तवः । वैरिणो वशगास्तस्य प्रयोगस्य प्रभावतः ॥ १९ ॥
सिध्यन्त्यखिलकार्याणि दुर्लभान्यपि तस्य तु । तत्रादौ पूजयेद्देवं गणेशं विधिवत्सुधीः ॥ २० ॥
लिङ्गानेकादशमितान् पूजयेद्गुडसम्भवान् । पार्थिवान् वा प्रयत्नेन तदलाभे प्रयोजयेत् ॥ २१ ॥
रक्तवस्त्रैस्तथा गन्धैरुपचारैः समन्त्रकैः । पूजयेच्च तथा देवीं पठेच्चण्डीं विधानतः ॥ २२ ॥
कोटिलक्षार्धकं जप्त्वा मन्त्रं मृत्युञ्जयाभिधम् । ॐजूंसः इति वै मन्त्रं त्र्यम्बकाख्यं सनातनम् ॥ २३ ॥
कुण्डे षडस्रसंयुक्ते त्र्यस्रे वा विधिवत्कृते । स्वगृह्योक्तविधानेन स्थाप्य तत्र हुताशनम् ॥ २४ ॥
होमयेत्तद्दशांशेन मध्वाज्यतिलसर्षपैः । आलिखेन्मण्डलं तत्र तण्डुलैः शोभनः बुधः ॥ २५ ॥
चतुरस्रं चतुर्द्वारं त्रिरेखं पद्मगर्भितम् । साधकस्य त्रिभिर्हस्तैर्मितं हीनाधिकं न तत् ॥ २६ ॥
तन्मध्ये शोभनं पद्मं कृत्वा चाष्टदलान्वितम् । एकैकपद्मपत्रे तु वसुसंख्या दलेदले ॥ २७ ॥
भैरवीर्भैरवान् सिद्धीर्दिशो नागानुपग्रहान् । पीठोपपीठसंयुक्तान् दिक्पालैरष्टभिर्युतान् ॥ २८ ॥
चतुष्षष्टिमितान् देवान् विधिना स्थाप्य तण्डुलैः । गन्धपुष्पोपचारैश्च नैवेद्यैर्विविधैस्तथा ॥ २९ ॥
प्रणवादिनमोन्तैश्च नाममन्त्रैः प्रपूजयेत् । पूर्वद्वारे गणेशेन्द्रौ शिवमुत्तरतस्तथा ॥ ३० ॥
वरुणं पश्चिमे देवं यमं याम्ये विभुं तथा । ईशान्यां कलशं स्थाप्य तीर्थवारिसमन्वितम् ॥ ३१ ॥
मृत्युञ्जयेन मन्त्रेण शतवाराभिमन्त्रितम् । सम्पूज्य विधिवद्राजा विसर्जनमथाचरेत् ॥ ३२ ॥
यान्तु देवगणाः सर्वे पूजामादाय मामकीम् । इष्टकामफलार्थाय पुनरागमनाय च ॥ ३३ ॥
अभिषिञ्चेत् ततो वीरं संग्रामे विजयी भवेत् । श्रद्धयापि कृते ह्यस्मिन् प्रयोगे त्र्यम्बकाभिधे ॥ ३४ ॥
यथेप्सितमवाप्नोति फलं रुद्रप्रभावतः । अश्रद्धयालंकरणात् फलमल्पं प्रजायते ॥ ३५ ॥
यथाविभवतश्चापि महदैश्वर्य्यमाप्नुयात् । ऋत्विग्भ्यो दक्षिणां दद्यात्प्रयोगस्य प्रसिद्धये ॥ ३६ ॥
यथाशक्त्या तथा दद्यादाचार्याय विशेषतः । ब्राह्मणान् भोजयेच्छक्त्या स्वयं भुञ्जीत वाग्यतः ॥ ३७ ॥

इति मृत्युञ्जयप्रयोगविशेषः ॥ अथ पार्थिवपूजाविशेषो ग्रन्थान्तरे—

कार्तिके मार्गशीर्षे वा माघे वैशाख एव च । श्रावणे बहुले पक्षे व्रतस्याचरणंशुभम् ॥ १ ॥
लिङ्गं पार्थिवसंज्ञं तु कुर्यात्सम्पत्प्रदायकम् । शुभेऽह्नि प्रातरुत्थाय शिवं ध्यात्वा विधानतः ॥ २ ॥
गत्वा प्राचीदिशं तत्र पठित्वा मन्त्रमुत्तमम् । नमो गणेभ्य इति च मृदं ग्राह्य प्रयत्नतः ॥ ३ ॥
ये पृथिव्यामित्येतच्च स्नात्वा पञ्चाक्षरं जपेत् । ततस्तु तर्पणं कार्यं शिवमन्त्रैः पृथक्पृथक् ॥ ४ ॥
शिवं शर्वं तथा चोग्रं मृडं च भवमेव च । शशिशेखरसंज्ञं च शङ्करं च महेश्वरम् ॥ ५ ॥
नवमं विश्वरूपं च दशमं च कपर्दिनम् । त्रियम्बकं तर्पयामि प्रणवादींश्च तर्पयेत् ॥ ६ ॥
ततो नित्यक्रियां कृत्वा ध्यात्वा देवं महेश्वरम् । लिङ्गान्येकादशाष्टौ वा पञ्च वा कारयेत्सुधीः ॥ ७ ॥

मन्त्रमुच्चार्य देवेभ्यो ये दिवीति विधानतः । मा नस्तोकेति मन्त्रेण तानि सम्प्रोक्ष्य वारिणा ॥ ८ ॥
ये पृथिव्यामिति पठन् आसनानि प्रकल्पयेत् । ॐ नमो भगवत्यै च उमादेव्यै च शङ्कर- ॥ ९ ॥
प्रियायै नम इत्यम्बां वामदेशे नियोजयेत् । ततश्च स्वशरीरे तु न्यासं कुर्यात्समाहितः ॥ १० ॥
ललाटे तु शिवं न्यस्येत्कण्ठे रुद्रं ततः परम् । ईशानं नाभिदेशे तु जान्वोः शङ्करमेव च ॥ ११ ॥
गुह्ये सर्वव्यापिनं च पश्चाङ्गेषु ततः परम् । पञ्चब्रह्ममनूंश्चैव तेषु लिङ्गेषु वै द्विजः ॥ १२ ॥
मङ्गलायतनं देवं युवानमतिसुन्दरम् । ध्यायेत्कल्पतरोर्मूले समासीनं सहोमया ॥ १३ ॥
एवं ध्यात्वा सहस्राणि सहस्रश इतीरयन् । हिरण्यबाहवे वस्त्रं भूषणं शम्भवाय च ॥ १४ ॥
घृष्णवे चोत्तरीयं किरिकेभ्य उपवीतकम् । गन्धं दद्यान्नमः श्वभ्यः पुष्पं पार्याय मन्त्रतः ॥ १५ ॥
नमः कपर्दिने धूपं दीपं च नम आशवे । बभ्लुशाय च नैवेद्यं पर्णाय चेति पर्णकम् ॥ १६ ॥
आरार्तिकं ते तेजांसि एषते च प्रदक्षिणम् । नमोऽस्त्विति नमस्कारं एष रुद्रार्चनाविधिः ॥ १७ ॥
अथवा ह्यसुसमये ह्युपचाराष्टकं भवेत् । पञ्चाक्षरेण मन्त्रेण दशाक्षरेण वा पुनः ॥ १८ ॥
नमः शिवायेति मन्त्रः पञ्चाक्षर इति स्मृतः । ॐनमो भगशब्दान्ते वते रुद्राय वै भवेत् ॥ १९ ॥
मन्त्रो दशाक्षरः प्रोक्तः सर्वाभीष्टफलप्रदः । गन्धं पुष्पं च नैवेद्यं धूपं दीपं तथैव च ॥ २० ॥
ताम्बूलं च नमस्कारं प्रादक्षिण्यं तथैव च । उपचारांस्ततो दत्त्वा गौरीश वै क्षमापयेत् ॥ २१ ॥
अष्ट मूर्तीस्ततः पूज्याः शर्वाय क्षितिमूर्तये । नमोन्तेन च सम्पूज्य भवाय जलमूर्तये ॥ २२ ॥
नमो रुद्राय तत्राग्निमूर्तये नम ईरितः । उग्राय वायुमूर्तिं ङे नमो भीमाय तत्परम् ॥ २३ ॥
आकाशमूर्तये पश्चान्नमः पशुपतिं तथा । ङेन्तं च यजमानेति मूर्तये तदनन्तरम् ॥ २४ ॥
ततो नमो महादेवं ङेन्त सोमादिमूर्तये । नम ईशानाय सूर्यमूर्तये नम ईरितः ॥ २५ ॥
अष्ट मूर्तीः शङ्करस्य वामावर्तेन पूजयेत् । लिङ्गस्तवं प्रवक्ष्यामि शृणु पापहरं परम् ॥ २६ ॥
सर्वज्ञ ज्ञानविज्ञानप्रदानैकमहात्मने । नमस्ते देवदेवेश सर्वभूतहिते रत ॥ २७ ॥
अनन्तकीर्तिसम्पन्न अनन्तासनसंस्थिते । अनन्तकान्तिसम्भोग परमेश नमोऽस्तु ते ॥ २८ ॥
बहुरूप महारूप सर्वरूपोत्तमोत्तम । पशुपाशार्णवासीन दृढव्रत नमोऽस्तु ते ॥ २९ ॥
परापर परातीत उत्पत्तिस्थितिकारक । सर्वार्थसाधनोपाय विश्वेश्वर नमोऽस्तु ते ॥ ३० ॥
स्वभावनिर्मलाकार सर्वव्याधिविनाशन । योगियोगमहायोग योगीश्वर नमोऽस्तु ते ॥ ३१ ॥
कृत्वा लिङ्गप्रतिष्ठां तु स्तवमेनमुदीरयेत् । लिङ्गस्तवं महापुण्यं यः शृणोति सदा नरः ॥ ३२ ॥
नोत्पद्यते हि संसारे स्थानं प्राप्नोति शाश्वतम् । तस्मात्सर्वप्रयत्नेन शृणुयाल्लिङ्गसंस्तवम् ॥ ३३ ॥
पापकञ्चुकनिर्मुक्तः प्राप्नोति परमं पदम् । इति स्तुत्वा चिरं प्रार्थ्य मन्त्रमेनमुदीरयेत् ॥ ३४ ॥
अङ्गहीनं क्रियाहीनं विधिहीनं महेश्वर । पूजितोऽसि मया देव तत्क्षमस्व भ्रमात्कृतम् ॥ ३५ ॥
यद्यप्युपहतैः पुष्पैरपास्तैर्भावदूषितैः । केशकीटादिविद्धैश्च पूजितोऽसि मया प्रभो ॥ ३६ ॥
अन्यत्रासक्तचित्तेन क्रियाहीनेन वा प्रभो । मनोवाक्कायदुष्टेन पूजितोऽसि त्रिलोचन ॥ ३७ ॥
यच्चोपहतपात्रेण कृतमर्घ्यादिकं मया । तामसेन च भावेन तत् क्षमस्व मम प्रभो ॥ ३८ ॥
मन्त्रेणाक्षरहीनेन पुष्पेण विह्वलेन च । पूजितोऽसि महादेव तत्सर्वं क्षम्यतां मम ॥ ३९ ॥
व्रतं सम्पूर्णतां यातु फलं चाक्षयमस्तु मे । ....॥

इति ॥ अथ भयनाशनम्—

गौरीवल्लभ कामारे कालकूटविषाशन । मामुद्धरापदम्भोधेस्त्रिपुरघ्नान्तकान्तक ॥ १ ॥
पाहि पाहि महादेव भक्तवर्गकपोषक । भयं दूरीकुरुष्वाद्य किमेतदनुवर्तते ॥ २ ॥

इति स्मरणेन भयनाशनं भवति ॥ अथापद्विनाशनम्—

सर्वार्थसाधनोपाय सर्वैश्वर्यप्रदायक। समस्तापत्प्रतीकार चन्द्रशेखर ते नमः ॥ १ ॥

इत्यापद्विनाशनम् ॥ अथ बालरक्षायन्त्रम्—

तारादिल्द्वयजलद्विठवर्णवीता रा(ठा)न्तान्तरे विलिखिता विधिनैव माया ॥
साध्यावृता बहिरथो वदनार्धचन्द्रैर्यन्त्रं शिशो रुरुदिषां विनिहन्ति सद्यः ॥ १ ॥

इति बालरक्षायन्त्रम् ॥ अथ कुबेरयन्त्रम्—

कर्णिकायां साध्यगर्भं तारं पत्रेषु चाष्टसु। वर्णान् कुबेरमन्त्रस्य चतुरश्चतुरो बहिः ॥ १ ॥
अया ते अग्ने समिधा ४।४।२५ मातृकार्णैश्च वेष्टयेत्। भूपुरास्त्रिषु ठंबीजं दिक्षु वंबीजमेव च ॥ २ ॥
एतद्यन्त्रं कुबेरस्य रक्षाकरमनुत्तमम्। चातुर्थिकादिविषमज्वरानाशु निहन्ति च ॥ ३ ॥

इति कुबेरयन्त्रम् ॥ ॐह्रींक्लींकालिके अमुकस्य बन्दीमोक्षं कुरु २ स्वाहा। "गौरीवल्लभ कामारे कालकूटनिषूदन। त्रिपुरध्वान्तकर्त्रे च निगडध्वंसकारिणे ॥" इति मन्त्रद्वयं जपेत बन्दीमोक्षो भवति ॥

अथ भूरिविजयमन्त्रः—भगे भगे क्षोभय मोहय छेदय क्लेदय क्लिन्नस्य शरीरे हुंफट् स्वाहा। २६ वर्णाः।

एष मन्त्रवरः श्रीमान् त्रिषु लोकेषु विश्रुतः। नाम्ना भूरिजय इति स्वयं देवेन भाषितः ॥ १ ॥
दुर्भगानां च लोकानां निर्द्रव्याणां वरानने। बुद्धितेजोविहीनानां विद्यागुणविवर्जिनाम् ॥ २ ॥
एतज्जपेन तत् सर्वं सम्प्राप्नोति च मानवः। यद्यद्विहीनो जपते तत्तत् प्राप्नोति मानवः ॥ ३ ॥

इति ॥ अथ रत्नधारामन्त्रः—रत्नरत्नमहारत्नधाराय स्वाहा। अस्य प्रजापतिर्ऋषिर्गायत्री च्छन्दः रत्नधाराख्यो देवता रत्नधारालाभे विनियोगः। साधकाय रत्नधारावर्षन्तं हस्ताभ्यां हारमुकुटमणिभूषितं ध्यायन् जपेत्, महती रत्नसमृद्धिः ॥ अथ कुबेरमन्त्रः [होमप्रकारः] वैश्रवणाय स्वाहा, यक्षेशाय०, पिङ्गलाय०, विटिदाय०, कुबेराय०, धनदाय०, राजराजाय०, भूः स्वाहा, भुवः स्वाहा, भूर्भुवःस्वाहा। एते दशमन्त्रा धनप्रदाः। हेमपीठे कनकवर्णं करपुटे करण्डविलसितकरद्वयवृहदुदररत्नमण्डितशङ्खपद्मनिधिवृतं कुबेरं वटवृक्षाधो ध्यात्वा, वैश्वदेवावसाने अग्निमावाह्य तन्मुखे आज्याक्तवटसमिद्भिर्दशभिन्त्रैर्जुहुयात्, बहुतरधनलाभः। घृताक्तपायसैर्घृताक्तबिल्वसमिद्भिर्वा जुहुयाद्धनलाभः। "घण्टाकर्ण विरुपाक्ष व्यात्तानन भयङ्कर। विस्फोटकरुजं हृत्वा रक्ष रक्ष महाबल" ॥ द्वात्रिंशद्वारं जलमभिमन्त्र्य पेयं विस्फोटकहरणं भवति ॥

अथ हनुमत्प्रकरणम्। तत्र पञ्चमुखहनुमन्मन्त्रविधिस्तत्र हनुमद्गह्वरे—अस्य पञ्चमुखहनुमन्मन्त्रस्य, ब्रह्मा ऋषिः, गायत्री छन्दः, पञ्चमुखविराड्रूपी हनुमान् परमात्मा देवता, ह्रां बीजं, ह्रीं शक्तिः, हूं कीलकम्, ममाभीष्टसिद्धये विनियोगः। षड्दीर्घमायया षडङ्गं विधाय ध्यायेत्।

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुन्दरि। मत्कृतं देवदेवस्य ध्यानं हनुमतः परम् ॥ १ ॥
पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम्। बाहुभिर्दशभिर्युक्तं सर्वकाम्यार्थसिद्धिदम् ॥ २ ॥
पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम्। दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥ ३ ॥
अत्रैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम्। अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥ ४ ॥
पश्चिमं गारुडं वक्त्रं वज्रतुण्डं महाबलम्। सर्वरोगप्रशमनं विषरोगनिवारणम् ॥ ५ ॥
उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोनिभम्। पातालानिलभेत्तारं ज्वररोगनिकृन्तनम् ॥ ६ ॥
ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम्। एकवक्त्रेण विप्रेन्द्र तारकाख्यं महाबलम् ॥ ७ ॥
कुर्वन्तं शरणं तस्य सर्वशत्रुहरं परम्। खङ्गं त्रिशूलं खट्वाङ्गं पाशमंकुशपर्वतम् ॥ ८ ॥
ध्रुवमुष्टिगदामुण्डं दशभिर्मुनिपुङ्गव। एतान्यायुधजालानि धारयन्तं यजामहे ॥ ९ ॥
प्रेतासनोपविष्टं तं सर्वाभरणभूषितम्। दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ॥ १० ॥

सर्वाश्चर्यमयं देवमनन्तं विश्वतो मुखम् ।···· ···· ··· ···· ···· ····॥

पञ्चास्यमच्युतमनेकविचित्रवीर्यवक्त्रं सुशंखविधृतं कपिराजवर्यम् ।
पीताम्बरादिमुकुटैरभिशोभिताङ्गं पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥ ११ ॥

मर्कटेश महोत्साह सर्वलोकविनाशन । शत्रुसंहार मां रक्ष श्रियं दापय देहि मे ॥ १२ ॥

इति प्रार्थ्य । (१) ॐनमः पञ्चवदनाय पूर्वकपिमुखेन सकलशत्रुसंहरणाय महाबलाय स्वाहा । (२) ॐनमः पञ्चवदनाय दक्षिणमुखेन करालनृसिंहाय सकलभूतप्रमथनाय स्वाहा (३)। ॐनमः पञ्चवदनाय पश्चिममुखेन वीरगरुडाय सकलविषहराय स्वाहा । (४) ॐनमः पञ्चवदनाय उत्तरमुखेनादिवराहाय स्वाहा । (५) ॐनमः पञ्चवदनाय ऊर्ध्वमुखेन हनुमद्देवाय सकलजनवशीकराय महादेवाय स्वाहा । इति पञ्च मन्त्रान्जपेत्, सर्वकार्यसिद्धिर्भवति ॥ विभीषण उवाच ।

भगवंस्ताक्ष्र्य पक्षीन्द्र वद कल्पं हनूमतः । साङ्गोपाङ्गस्य मन्त्रस्य श्रीमद्धनुमतः स्मृतम् ॥ १ ॥

ताक्ष्र्य उवाच ।

पवनात्मजमन्त्राणां वदामि गह्वरं परम् । येन विज्ञानमात्रेण हनुमान् सुप्रसीदति ॥ २ ॥
प्रणवाद्यामर्ककलां विन्दुनोर्ध्वविभूषिताम् । रमां मायां च संभिद्य मनुतुर्यरसस्वरैः ॥ ३ ॥
सबिन्दुभिः पुनश्चाथ शिवाद्यमस्त्रवर्णकम् । एतद्गतं जयारूढं शिवस्वरेण संयुतम् ॥ ४ ॥
बिन्दुमद्वा तदग्रे च खमस्त्रेण युतं वदेत् । वह्नियुक्तं शूलपाणिस्वरयुक्तं च बिन्दुमत् ॥ ५ ॥
ततो वदेच्छिवं चान्द्रसंयुतं वह्निसंस्थितम् । मनुस्वरेण संयुक्तं भूषितं बिन्दुनोपरि ॥ ६ ॥
ततः साद्यं च शशिना संयुतं शून्यवर्णयुक् । पान्त्यवह्निसमायुक्तं वागादिसंयुतं वदेत् ॥ ७ ॥
सबिन्दुकं ततः शैवं शशिसंस्थं च बिन्दुमत् । शक्रस्वरयुतं वाच्यं रुद्रबीजादिको मनुः ॥ ८ ॥
ततो नतिं समुच्चार्य ङेन्तं हनुमतः पदम् । अस्मच्छब्दं च षष्ठ्यन्तं परं षष्ठीयुतं ततः ॥ ९ ॥
चकारः क्षयकुष्ठेति गण्डमाला च स्फोटकः । क्षतज्वरेति च ततः एकाहिकपदं ततः ॥ १० ॥
द्व्याहिकं त्र्याहिकं चेति चातुर्थिकं च सन्ततम् । ज्वरेति च ततो वाच्यं सान्निपातिकमीरयेत् ॥ ११ ॥
ज्वरभूतज्वरमन्त्र-ज्वरशूल-भगन्दराः । मूत्रकृच्छ्रकपालेति शूलकर्णेति शूलकम् ॥ १२ ॥
अक्षिशूलोदरशूल-हस्तशूलपदं ततः । पादशूलादि प्रवदेत्सर्वव्याधीन् क्षणेन च ॥ १३ ॥
भिन्धियुग्मं छिन्धियुग्मं नाशयेति द्विधा वद । निकृन्तययुगं चैव छेदयेति द्विधा वद ॥ १४ ॥
भेदयेति द्विधा वाच्यं महावीरपदं ततः । हनूमन् हाक्षरं द्वेधा द्विधा तु कवचं द्विधा ॥ १५ ॥
घेशब्दयुगलं चोक्त्वा बीजानि च ततो वदेत् । द्वितीयपञ्चषष्ठैश्च कवचास्त्राग्निवल्लभा ॥ १६ ॥
पञ्चषष्ट्युत्तरशतवर्णा मन्त्रे प्रकीर्तिताः । अयं रोगप्रशान्त्यर्थं जप्तव्यः सततं नृभिः ॥ १७ ॥

ॐऐंश्रींह्लौंह्लींह्रूं सफ्रें खफ्रें हस्रौं हसखफ्रें हसौं नमो हनुमते मम परस्य च क्षयकुष्ठगण्डमालास्फोटकक्षतज्वरैकाहिकद्व्याहिकत्र्याहिकचातुर्थिकसन्ततज्वरसान्निपातिकज्वरभूतज्वरमन्त्रज्वरशूलभगन्दरमूत्रकृच्छ्र--- कपालशूलकर्णशूलाक्षिशूलोदरशूलहस्तशूलपादशूलादिसर्वव्याधीन् क्षणेन भिन्धि २ छिन्धि २ नाशय २ निकृन्तय २ च्छेदय २ भेदय २ महावीरहनूमन् हाहाहुंहुंघेघेह्लांह्लुंह्रूं फट् स्वाहा (१६५ वर्णाः) इत्युद्धारः ।

भस्मादाय त्रिधा ह्येवं मन्त्रयित्वा ददेत्सुधीः । मन्त्रे ये गदिता रोगास्ते नश्यन्त्यस्य चाज्ञया ॥ १ ॥

इति । तथा मन्त्रान्तरम्—

आनिलियस्यान्यमन्त्रं प्रवदामि समासतः । सर्वलोकहितार्थाय सद्यः प्रत्ययकारकम् ॥ १ ॥
वेदादि च ततो वाचं लक्ष्मीं मायां त्रिधोच्चरेत् । द्वितीयतुर्यषष्ठैश्च स्वरैः समनुवर्तिनीम् ॥ २ ॥
शशिपान्त्यं वह्निसंस्थमेकारेण विभूषितम् । बिन्दुमच्च ततः शून्यं पान्त्ययुक्तं सवह्निकम् ॥ ३ ॥

एकादशकलाढ्यं च बिन्दुनोर्ध्वविभूषितम् । शिवचन्द्राग्निसंरूढमौयुक्तं बिन्दुभूषितम् ॥ ४ ॥
भार्गं सोमं शून्यसंस्थमस्त्रर्णाग्निसमन्वितम् । अर्कादिककलायुक्तं बिन्द्वाढ्यं विजयप्रदम् ॥ ५ ॥
हंसयुक्तं मनुकलायुक्तं बिन्दुविभूषितम् । बीजकूटे त्विमे वर्णा एकादश निवेशिताः ॥ ६ ॥
हृदयं हनुमच्छब्दं चतुर्थ्यन्तं समुच्चरेत् । महाबल ततश्चाथ पराक्रम ममेति च ॥ ७ ॥
परस्य च चतुर्वर्णान् भूतप्रेतपिशाचकान् । शाकिनी डाकिनो चाथ यक्षिणी पूतनेति च ॥ ८ ॥
मारी ततो महामारी कृत्या यक्षेति राक्षस । ततो भैरववेतालग्रहब्रह्मग्रहेति च ॥ ९ ॥
ब्रह्मराक्षसादिकेति जातक्रूरेति चोच्चरेति । बाधाः क्षणेन च हन द्विधा भञ्जययुग्मकम् ॥ १० ॥
विनाशय द्विधा वाच्यं वारयेति द्विधा वदेत् । वन्धयेति युगं चैव नुदेति च तथोच्चरेत् ॥ ११ ॥
सुन्देति च द्विधा प्रोक्तं धुनेति च द्विधा वदेत् । तथोच्चरेन्मोचयेति मामेनं च ततः परम् ॥ १२ ॥
रक्षेति युगलं वाच्यं महामहेश्वरं पदम् । ततो रुद्रावतारेति हा त्रिधा कवचं त्रिधा ॥ १३ ॥
घेऽक्षरं च त्रिवारं स्यात् कवचास्त्राग्निवल्लभा । एकषष्ट्युत्तरशतं (?) वर्णा मन्त्रे प्रकीर्तिताः ॥ १४ ॥

अथोद्धारः—ॐऐंश्रींह्रांह्रींह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं नमो हनुमते महाबलपराक्रम मम परस्य च भूतप्रेतपिशाचकशाकिनीडाकिनीयक्षिणीपूतनामारीमहामारीकृत्यायक्षराक्षसभैरववेतालग्रहब्रह्मग्रह-ब्रह्मराक्षसादिकजातक्रूरबाधाः क्षणेन हन २ भञ्जय २ विनाशय २ वारय २ बन्धय २ नुद २ सुन्द २ धुन २ मोचय २ मामेनं च रक्ष २ महामहेश्वर रुद्रावतार हाहाहा हुंहुंहुं घेघेघे हुं फट् स्वाहा ।

सर्वत्र सर्वभूतानां नाशको हनुमन्मनुः । भस्म वारि सर्षपांश्च सिकताश्चाभिमन्त्रयेत् ॥ १५ ॥
यत्र क्वापि भयं शङ्का विकिरेत्तत्र तत्र तु । एकैकं वा समूहं वा दशदिक्षु इतस्ततः ॥ १६ ॥
विकीर्य भस्म वारिभ्यो भीतस्य प्रक्षिपेत्तनौ । पानार्थं वारि दातव्यं भस्म चाङ्गे निवेशयेत् ॥ १७ ॥

इति तथा मन्त्रान्तरम्—

अपरं चाञ्जनेयस्य मन्त्रं वच्मि समासतः । कलौ जप्तं तु सर्वत्राभयदं सर्वसिद्धिदम् ॥ १ ॥
ॐकारवाग्भवरमा ह्रांह्रींह्रूं च ततः परम् । पूर्ववत् पञ्चकूटानि बीजानि च तथोच्चरेत् ॥ २ ॥
एकादशेति कूटानि प्रोच्चार्य च ततः परम् । हनुमते चतुर्वर्णान् मम शब्दं परस्य च ॥ ३ ॥
महाभयानि पञ्चार्णान् सर्वव्याघ्रादितस्कर । जलाग्निविषजङ्गमस्थावरसहजेति च ॥ ४ ॥
कृत्रिमोपविषं चेति महासांग्रामिकं तथा । अरण्यवादविवादशस्त्राण्यस्त्रादिकानि च ॥ ५ ॥
संहरेति द्विधोच्चार्यं विनाशय तथा पुनः । तथोच्चरेद् ग्रसयुगं ग्रासय त्रोटय द्विधा ॥ ६ ॥
भञ्ज द्विधा भञ्जयाथ द्विधा स्तम्भय वै द्विधा । कुण्ठयेति द्विधा वाच्यं मोहयेति द्विधोच्चरेत् ॥ ७ ॥
कवचं च त्रिधोच्चार्यं घेक्षरं च त्रिधा वद । क्रोधमस्त्रं वह्निजायासंयुतो मनुरीरितः ॥ ८ ॥
एकषष्ट्युत्तरशतं (?) मन्त्रे वर्णा निवेशिताः । शस्त्रास्त्रविषसर्पादिव्यथाभयविनाशनः ॥ ९ ॥
मन्त्रोऽयं रामदूतस्य चिन्तितेप्सितसाधकः ।.... ....॥

अथोद्धारः—ॐऐंश्रींह्रांह्रींह्रूंस्फ्रेंख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं हनुमते मम परस्य च महाभयानि सर्व-व्याघ्रतस्करजलाग्निविषजङ्गमस्थावरसहजकृत्रिमोपविषमहासंग्रामिकारण्यवादविवादशस्त्रास्त्रादिकानि संहर २ विनाशय २ ग्रस २ ग्रासय २ त्रोटय २ भञ्ज २ भञ्जय २ स्तम्भय २ कुण्ठय २ मोहय २ हुं ३ घे ३ हुं फट् स्वाहा ॥ तथा—मन्त्रान्तरम् ।

मारुतेमन्त्रमन्यं च ब्रुवे सर्वमनोहरम् । सद्यः फलति भक्तानां कार्यप्रत्ययकारकम् ॥ १ ॥
तारं वागिन्दिरां देवीं हृल्लेखां च त्रिधा वद । आद्यस्वरैस्त्रिभिश्चाथ बिन्दुनाङ्कितमस्तकाम् ॥ २ ॥
सपान्तं वह्निसंस्थं च ईशानस्वरसंयुतम् । बिन्दुनादं ततः प्रोक्तमितरं कूटकं शृणु ॥ ३ ॥

द्वितीयं तु कवर्गस्य पवर्गस्य तदेव हि । यवर्गस्य द्वितीयेन संयुक्तमेयुतं कुरु ॥ ४ ॥
बिन्दुना भूषितं मूर्ध्नि ततोऽन्यच्छृणु बीजकम् । शिवेन्दुवह्निमच्छकस्वराढ्यं बिन्दुभूषितम् ॥ ५ ॥
प्राणजीवशून्यपान्तमनलेशस्वरान्वितम् । बिन्द्वन्तिकशिरस्कं च कूटं पंक्त्यभिधं महत् ॥ ६ ॥
शिवशक्तियुतं चान्यदिन्द्रस्वरसमन्वितम् । बिन्द्वन्तिकं विद्धि कूटमेकादशमतिध्रुवम् ॥ ७ ॥
नतिर्हनुमते चेति पश्चाद्राक्षसकुलेति वै । दावानल द्वादशार्ककोटिसूर्यप्रभा-पदम् ॥ ८ ॥
ज्वलत्तनूरुह-पदं भीमनादं ममोच्चरेत् । परस्य च दुष्टपदं दुर्जनस्य महा-पदम् ॥ ९ ॥
पकारक-पदं वादि-विवादद्वेषकारक । ततः कार्यभञ्जकेति क्रूरप्रकृतिकं पदम् ॥ १० ॥
प्रवृद्धकोपावेशक हन्तु चेति ततः परम् । कामुकादीन् पदं वाच्यं दूरस्थेति पदं ततः ॥ ११ ॥
समीपस्थान् भूतभविष्यद्वर्तमानानथोच्चरेत् । पुंस्त्रीनपुंसकांश्चातुर्वर्णान् क्षणेन सत्वरम् ॥ १२ ॥
हन द्विधा दह द्विधा संहारय द्विधा वदेत् । मोहयेति द्विधा वाच्यं मर्दयेति द्विधा वदेत् ॥ १३ ॥
द्वेषयेति पुनश्चोक्त्वा मार्जारमूषकेति च । (तथा) वत्सद्यः प्राणैश्च वियोजय द्विधोच्चरेत् ॥ १४ ॥
विध्वंसय द्विधा झिलि द्विधा मूकय च द्विधा । पौनरुक्त्या जारयेति बन्धयेति द्विधा वदेत् ॥ १५ ॥
जृम्भयेति द्विधा प्रोक्त्वा पातयेति द्विधा वदेत् । ततो ममपदं चोक्त्वा परस्य च ततः परम् ॥ १६ ॥
पादतलाक्रमितांश्च कुरुद्वन्द्वं ततो वदेत् । दासीभूतान् सम्पादय द्विधा हा च त्रिधोच्चरेत् ॥ १७ ॥
त्रिः कोपं च त्रिधा घे च कवचास्त्राग्निवल्लभा । वर्णानां द्विशतं प्रोक्तं पञ्चषष्ट्युत्तरं मनौ ॥ १८ ॥
विद्वेषे वैरिदुष्टानां क्रूरबुद्धिविनाशने । मन्त्रोऽयं गदितः सत्यं मुनिभिर्मन्त्रपारगैः ॥ १९ ॥
विशेषतो कलौ सद्य प्रत्ययश्चाल्पबुद्धिभिः । महारुद्रावतारस्य जगत्प्राणात्मजस्य हि ॥ २० ॥
मनुं विद्धि वरिष्ठं च सर्वसिद्धिप्रदं नृणाम् । वारि भस्माभिमन्त्र्याथ सिकताः सर्षपास्तथा ॥ २१ ॥
अभिमन्त्र्य प्रविकिरेत्सर्वत्र च इतस्ततः । तल्लङ्घनाद्भवन्त्येव सर्वे दुष्टास्तु सेवकाः ॥ २२ ॥

अथोद्धारः——ॐऐंश्रींह्रांह्रींह्रूं स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौ नमो हनुमते राक्षसकुलदावानल द्वादशार्ककोटिसूर्यप्रभाज्वलत्तनूरुह भीमनाद मम परस्य च दुष्टदुर्जनमहापकारकवादिविवादद्वेषकारककार्यभञ्जक क्रूरप्रकृतिकवृद्धकोपावेशकहन्तुकामुकादीन् दूरस्थसमीपस्थान् भूतभविष्यद्वर्तमानान् पुंस्त्रीनपुंसकांश्चातुर्वर्णान् क्षणेन सत्वरं हन २ दह २ संहारय २ मोहय २ मर्दय २ द्वेषय २ मार्जारमूषिकवत् सद्यः प्राणैर्वियोजय २ विध्वंसय २ झिलि २ मूकय २ जारय २ बन्धय २ जृम्भय २ पातय २ मम परस्य च पादतलाक्रमितान् कुरु २ दासीभूतान् सम्पादय २ हा ३ हुं ३ घे ३ हुं फट् स्वाहा ॥ तथा——मन्त्रान्तरम्——

वेदमूर्धा तथा वार्णा रमा बिन्दुविभूषिता । माया मुखेन वामाक्षिवामश्रुतिविभेदिना ॥ १ ॥
बिन्दुना भूषितं मूर्ध्नि षड्बीजानि ततः परम् । चान्द्रं चास्त्रार्णयुक् कृत्वा दहनारूढमेव च ॥ २ ॥
शिवस्वरेण संयुक्तमपरं संयुक्तमपरं कूटकं शृणु । शून्यं पान्त्यसमायुक्तमग्निनाधोयुतं तथा ॥ ३ ॥
एकादशकलायुक्तं बिन्दुमत्तदनन्तरम् । ततो वदेच्छिवं चान्द्रसंयुतं वह्निसंस्थितम् ॥ ४ ॥
मनुस्वरेण संयुक्तं बिन्दुनापि ततः शिवम् । जीवं शून्यं पान्त्ययुक्तं वह्निनाधो युतं तथा ॥ ५ ॥
वाण्यादिकेन संयुक्तं बिन्दुभूषितमस्तकम् । शिवमिन्दुयुतं कुर्यात्दशतमन्युकलान्वितम् ॥ ६ ॥
मस्तके बिन्दुसंयुक्तं तदेतद्बीजपञ्चकम् । नतिर्हनुमते चोक्त्वा त्रैलोक्याक्रमणेति च ॥ ७ ॥
पराक्रमेति श्रीरामभक्त मम परस्य च । सर्वशत्रूंश्चतुर्वर्णसम्भवानिति वै वदेत् ॥ ८ ॥
पुंस्त्रीनपुंसकान् भूतभविष्यद्वर्तमानकान् । दूरस्थ च समीपस्थान् राज्ञो नाना ततो वदेत् ॥ ९ ॥
नामधेयांस्ततो नाना सुकरेति च कीर्तिजान् । कलत्रपुत्रमित्रेति भृत्यबन्धुसुहृज्जनान् ॥ १० ॥
समेतान् प्रभुशक्तीति सहितान् क्षित्यतः परम् । धनधान्यादिसम्पत्तियुक्तान् राज्ञस्तत परमः ॥ ११ ॥

राजसेवकान् मन्त्रीति पदं मन्त्रिसखानिति । आत्यन्तिकं क्षणेनेति वारयेति द्विधा वद ॥ १२ ॥
नानोपायैः पदं चैव ततो मारययुग्मकम् । शस्त्रैश्छेदययुग्मं च अग्निना ज्वालय द्विधा ॥ १३ ॥
दाहयेति द्विधा वाच्यं घातयेति द्विधा वद । कुमारवत् पादतलाक्रमणेन ततो वद ॥ १४ ॥
आत्रोटय द्विधा वाच्यं घातयेति द्विधा तथा । बन्धयुग्मं भूतसंघैः सह भक्षययुग्मकम् ॥ १५ ॥
क्रुद्धचेतसेति नखैर्विदारय द्विधा वद । देशादस्मादिति तत उच्चाटय द्विधा वद ॥ १६ ॥
पिशाचवद् भ्रंशयेति द्विधा भ्रामय च द्विधा । भयातुरान् विसंज्ञांश्च सद्यः कुरुयुगं वद ॥ १७ ॥
भस्मीभूतान् द्विधा वाच्यमुन्मूलय पुनर्वद । भक्तजनवत्सलेति सीताशोकापहारक ॥ १८ ॥
सर्वत्र मां तथैनं च रक्षयुग्मं च हात्रयम् । क्रोधत्रयं घे-त्रयं च कवचास्त्राग्निवल्लभा ॥ १९ ॥
एकचत्वारिंशोत्तरत्रिशतान्यपि च स्फुटम् । वर्णानां गणना ज्ञेया दुष्टारिद्वेषणे तथा ॥ २० ॥
हनुमन्मन्त्रसामर्थ्याद् दुर्जयो मन्त्रविद्भवेत् ।.... ....॥

अथोद्धारः—ॐऐंश्रींह्रांह्रींह्रूं स्फ्रें ख्फ्रें हसौं हसख्फ्रें हसौं नमो हनुमते त्रैलोक्याक्रमणपराक्रम श्रीरामभक्त मम परस्य च सर्वशत्रूंश्चतुर्वर्णसम्भवान् पुंस्त्रीनपुंसकान् भूतभविष्यद्वर्तमानकान् दूरस्थसमीपस्थान् राज्ञो नानानामधेयान् नानासुकरकीर्तिजान् कलत्रपुत्रमित्रभृत्यबन्धुसुहृज्जनसमेतान् प्रभुशक्तिसहितान् क्षितिधनधान्यादिसम्पत्तियुक्तान् राज्ञो राजसेवकान् मन्त्रिमन्त्रिसखानात्यन्तिकं क्षणेन वारय २ नानोपायैर्मारय २ शस्त्रैश्छेदय २ अग्निना ज्वालय २ दाहय २ घातय २ कुमारवत् पादतलाक्रमणेन आत्रोटय २ घातय २ बन्ध २ भूतसंघैः सह भक्षय २ क्रुद्धचेतसा नखैर्विदारय २ देशादस्मादुच्चाटय २ पिशाचवद् भ्रंशय २ भ्रामय २ भयातुरान् विसंज्ञांश्च सद्यः कुरु २ भस्मीभूतानुन्मूलय २ भक्तजनवत्सल सीताशोकापहारक सर्वत्र मामेनं च रक्ष २ हा ३ घे ३ हुं फट् स्वाहा ॥ तथा मन्त्रान्तरम्—

वेदमूर्धा ततो वाणी लक्ष्मीर्बीजत्रयं ततः । द्वितुर्य्यषष्ठभिन्ना च हृल्लेखा समुदीरिता ॥ १ ॥
बीजान्येतानि षड्विद्धि सबिन्दूनि महान्त्यपि । शिवः शशी पान्त्यवह्निर्विन्दुयुक्तं ततः परम् (?) ॥ १ ॥
(सफरेणादिसंयुक्तं बिन्दुमद्बैन्दवे ततः । कान्त्यपान्त्यसमारूढं बृहद्भानुस्फुटं युतम् ॥ ३ ॥
ईश्वरेण समायुक्तं बिन्दुभूषितमस्तकम् । शिवः शक्तिश्च वह्निश्च शतमन्युकलायुतम् ॥ ४ ॥)
जीवान्त्यं चन्द्रसंयुक्तं गादिमेन तथा युतम् । अस्त्रवर्णसमोपेतमेवर्णानलसंयुतम् ॥ ५ ॥
बिन्दुना भूषितं पूर्वं सहाद्यं समुदीरितम् । शक्त्यारूढः शिवो ज्ञेयो बिन्दुभूषितमस्तकः ॥ ६ ॥
चतुर्दशस्वरोपेतमेतत् कूटमनुक्रमात् । पञ्चकूटानि बीजानि एकादश क्रमेण च ॥ ७ ॥
पुनर्वेदादि सम्प्रोक्तं नतिर्हनुमते ततः । प्रकटेति ततश्चान्ते पराक्रमपदं ततः ॥ ८ ॥
आक्रान्तदिङ्मण्डलेति यशोवितानधवलीकृत वै ततः ।
जगत्त्रितय वज्रदेहेति ज्वलदग्निसूर्यकोटिसमप्रभ ॥ ९ ॥
तनूरुहपदं रुद्रावतार लङ्कापुरीदहनेति च । उदधिलङ्घनपदं दशग्रीवशिरःकृतान्तक ॥ १० ॥
सीतासमाश्वासनतस्ततो वायुसुतेति च । अञ्जनीगर्भसम्भूत श्रीरामेति पदं ततः ॥ ११ ॥
लक्ष्मणानन्दकरेति कपिसैन्यपदं ततः । प्राकारपदमुच्चार्य ततो द्रोणपदं वदेत् ॥ १२ ॥
पर्वतोच्चाटनपदं सुग्रीवसख्यकारण । वालिनिर्हरणकारण ततो द्रोणपदं वदेत् ॥ १३ ॥
पर्वतोत्पाटनाशोकवनमुक्त्वा विदारणे । अक्ष चेति कुमारेति च्छेदनेति पदं वदेत् ॥ १४ ॥
वनरक्षाकरसमूहविभञ्जन ब्रह्मास्त्रमुच्चरेत् । ब्रह्मशक्तिपदस्यान्ते ग्रसनेति ततो वदेत् ॥ १५ ॥
तथोद्धरेल्लक्ष्मणेति शक्तिभेदनिवारणे । शल्यविशल्यौषधीति समानयन वै ततः ॥ १६ ॥
बालोदितभानुपदं मण्डलग्रसनेति च । मेघनादहोमपदं विध्वंसन ततः परम् ॥ १७ ॥

इन्द्रजिद्वधकारणेति सीतारक्षक वै पदम् । ततश्च राक्षसीसङ्घविदारणपदं ततः ॥ १८ ॥
कुम्भकर्णादिवधेति परायणपदं वदेत् । श्रीरामभक्तितत्पर समुद्रेति पदं वदेत् ॥ १९ ॥
व्योमद्रुमलङ्घनेति महासामर्थ्य वै पदम् । महातेजःपुञ्जपदं विराजमान वै पदम् ॥ २० ॥
स्वामिवचनसम्पादितार्जुनेति पदं वदेत् । संयुगेति पदं चोक्त्वा सहायेति पदं वदेत् ॥ २१ ॥
कुमारब्रह्मचारिश्च गम्भीरशब्द वेति च । उदयेति दक्षिणाशामार्तण्ड मेरुपर्वत ॥ २२ ॥
पोठिकार्चन सकलमन्त्रागमपदं तथा । आचार्यपदमुच्चार्य मम सर्वग्रहेति च ॥ २३ ॥
विनाशन सर्वपदं ज्वरोच्चाटन सर्वं च । विषविनाशनपदं सर्वापत्तिनिवारण ॥ २४ ॥
सर्वदुष्टादीति पदं निवर्हणपदं ततः । सर्पव्याघ्रादिभयेति निवारणपदं ततः ॥ २५ ॥
सर्वशत्रुच्छेदनेति पदं मम परस्य च । ततस्त्रिभुवनं पुंस्त्रीनपुंसकात्मकं पदम् ॥ २६ ॥
ततः सर्वजीवजातं वशयेति द्वयं वदेत् । ममाज्ञाकारकं चेति सम्पादय द्विधा वद ॥ २७ ॥
ततो नानानामधेयान् सर्वराज्ञः पदं वद । ततः सपरिवारांश्च तथैव मम सेवकान् ॥ २८ ॥
कुरुयुग्मपदं सर्वशस्त्रास्त्रेति विषाणि च । विध्वंसय द्विधोच्चार्य मायां पूर्ववदुच्चरेत् ॥ २९ ॥
हा त्रिधा च समुच्चार्य तद्वदेव हि चोच्चरेत् । पूर्वोदितं पञ्चकूटं वैपरीत्येन चोच्चरेत् ॥ ३० ॥
सर्वशत्रून् हनद्वन्द्वं परबलानि ततः परम् । परसैन्यानि क्षोभय द्विधा ममपदं ततः ॥ ३१ ॥
ततः सर्वं सर्वकार्यजातं साधयेति द्विधा वद । सर्वदुष्टदुर्जनेति मुखानि कीलय द्विधा ॥ ३२ ॥
घे त्रिधोच्चर हाकारं त्रिधा ततः । त्रिधा चास्त्रं वह्निजायासंयुतोऽयं मनुः स्मृतः ॥ ३३ ॥
मन्त्रे वर्णाः समाख्याता द्विनवत्युत्तराः खलु । पञ्चशत्यर्णकाः सत्यं मन्त्रविद्भिः पुरातनैः ॥ ३४ ॥
मन्त्रेण वायुपुत्रस्य महाबलयशस्विनः । एकादशोग्ररूपस्य रामचन्द्रपदात्मनः ॥ ३५ ॥
सर्वकार्यार्थसिद्धिश्च गदितः सर्वसिद्धिदः । रक्षाविधौ प्रयोक्तव्यः क्षते शस्त्रामये तथा ॥ ३६ ॥
वश्ये च विजये वादे स्तम्भे सर्वत्र चोदितः । राजगृहे च संग्रामे राजचौरभये क्षते ॥ ३७ ॥
विषबन्धविमोक्षे च क्रोधस्तम्भे विशेषतः । रिपुदुर्जनदुष्टानां निग्रहोच्चाटने तथा ॥ ३८ ॥
प्रयोक्तव्यो विशेषेण सत्वरं फलते ध्रुवम् । किमत्र बहुनोक्तेन भाषणेन पुनः पुनः ॥ ३९ ॥
यदीच्छेत्प्रत्ययं द्रष्टुं प्रोक्तोऽयं मनुरद्भुतः । कार्ये सम्मोहनेऽस्त्यर्थं सत्यं सत्यं नचान्यतः ॥ ४० ॥

अथोद्धारः—ॐऐंश्रींह्रांह्रींह्रूं स्फ्रें खफ्रें ह्स्रौं हसखफ्रें हसौं ओं नमो हनुमते प्रकटपराक्रमाक्रान्त-दिङ्मण्डलयशोवितानधवलीकृतजगत्त्रितय वज्रदेह ज्वलदग्निसूर्यकोटिसमप्रभतनूरुह रुद्रावतार लङ्कापुरीदहन उदधिलङ्घन दशग्रीव(शिरः)कृतान्तक सीतासमाश्वासन वायुसुताञ्जनीगर्भसम्भूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार (द्रोणपर्वतोच्चाटन) सुग्रीवसख्यकारण वालिनिर्हरणकारण द्रोणपर्वतोत्पाटन अशोकवन-विदारण अक्षकुमारकच्छेदन वनरक्षाकरसमूहविभञ्जन ब्रह्मास्त्रब्रह्मशक्तिग्रसन लक्ष्मणशक्तिभेदनिवारण शल्यविशल्यौषधिसमानयन बालोदितभानुमण्डलग्रसन मेघनादहोमविध्वंसन इन्द्रजिद्वधकारण सीतारक्षक-राक्षसीसङ्घविदारण कुम्भकर्णादिवधपरायण श्रीरामभक्तितत्पर समुद्रव्योमद्रुमलङ्घन महासामर्थ्य महातेजः-पुञ्जविराजमान स्वामिवचनसम्पादितार्जुनसंयुगसहाय कुमारब्रह्मचारिन् गम्भीरशब्दोदय दक्षिणाशामार्तण्ड मेरुपर्वतपीठिकार्चन सकलमन्त्रागमाचार्य्य मम सर्वग्रहविनाशन सर्वज्वरोच्चाटन सर्वविषविनाशन सर्वापत्ति-निवारण सर्वदुष्टादिनिवर्हण सर्पव्याघ्रादिभयनिवारण सर्वशत्रुच्छेदन मम परस्य च त्रिभुवनं पुंस्त्रीनपुंसकात्मकं सर्वजीवजातं वशय २ ममाज्ञाकारकं सम्पादय २ नानानामधेयान् सर्वराज्ञः सपरिवारान् मम सेवकान् कुरु २ सर्वशस्त्रास्त्रविषाणि विध्वंसय २ ह्रांह्रींह्रूं हाहाहा हसौं हसखफ्रें ह्स्रौं खफ्रें स्फ्रें सर्वशत्रून् हन २ परबलानि परसैन्यानि क्षोभय २ मम सर्वकार्यजातं साधय २ सर्वदुष्टदुर्जनमुखानि कीलय २ घे ३ हा ३

हुं ३ फट् ३ स्वाहा ॥

अथ द्वादशाक्षरमन्त्रः—

द्वादशाक्षरविद्याया उद्धारः क्रियतेऽधुना । शैवं मनुस्वराक्रान्तं बिन्दुभूषितमस्तकम् ॥ १ ॥
पूर्वोदितं पञ्चकूटं बीजषट्कमिदं विदुः । हनुमांश्चतुर्थ्या संयोज्य ततो नतिपुरःसरम् ॥ २ ॥
द्वादशार्णा महाविद्या यस्य कस्यापि मा वद । रहस्यं ते मयाख्यातं वाल्मीकिमुनिनोदितम् ॥ ३ ॥

ह्रौं स्फ्रें ख्फ्रें ह्स्रौं हसख्फ्रें ह्सौं हनुमते नमः ।

रामचन्द्र ऋषिः प्रोक्तो गायत्रं छन्द ईरितम् । महावीरो हनुमांश्च देवतात्र समीरितः ॥ ४ ॥
मारुतात्मजशब्दादि ह्स्रौंबीजं तु बीजकम् । अञ्जनीसूनुशब्दान्ते स्फ्रेंबीजं शक्तिरुच्यते ॥ ५ ॥
कीलकं हात्रयं प्रोक्तं श्रीरामभक्तिरादितः । ह्रांप्राणश्चापि श्रीरामलक्ष्मणानन्दकारि च ॥ ६ ॥
ह्रांह्रींह्रूंमिति जीवः स्यात्तत्तत्कामे नियोजनम् । एवं हि सर्वमन्त्राणां ज्ञातव्यो मुनिवित्तमैः ॥ ७ ॥
विशेषोऽत्र षडङ्गानि षट्कूटैः कुरुते बुधः । करांगुलीषु विन्यासं कुर्यादिष्टशुभोदयम् ॥ ८ ॥
एवमङ्गेषु विन्यस्य मन्त्रवर्णांस्ततो न्यसेत् । मूर्ध्नि भाले दृशोरास्ये गले दोर्हृदयाम्बुजे ॥ ९ ॥
कुक्षौ नाभौ ध्वजे जानुद्वये पादद्वये न्यसेत् । मन्त्रपादैरष्टभिश्च देहाङ्गेष्वेव संस्मृतः ॥ १० ॥
मूर्ध्नि भाले मुखे कण्ठे नाभौ चोर्वोस्तु जङ्घयोः । पादयोश्चैव ध्यानं कुर्यात्समाहितः ॥ ११ ॥

ध्यायेद्बालदिवाकरप्रतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखैः प्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बरालंकृतम् ॥ १२ ॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ १३ ॥

वानरेया च मुद्रेयं तां शृणुष्व बदाम्यहम् । करौ सम्पुटितौ कृत्वा समाश्लिष्टांगुलि स्फुटम् ॥ १४ ॥
अंगुष्ठौ द्वौ प्रलुपितौ (?) अन्तर्गर्भे स्थिरीकुरु । हृदयोपरि संस्थाप्य मुकुलाकारसम्पुटम् ॥ १५ ॥
स्वामिपादे स्थिता दृष्टिर्मुद्रोपरि समास्थिता । ज्ञेयेयं वानरीमुद्रा चैतन्मन्त्रं जपेद् ध्रुवम् ॥ १६ ॥
तर्जन्यग्रेऽङ्गुष्ठमूले कृत्वा त्वंगुलयोरपि [?] । तत् स्यात् पुटितयोः पाण्योर्मुद्रा वानरिसंज्ञिका ॥ १७ ॥

अरे मल्लवटजेत्युक्त्वा, वातोऽरमल्लवटजेत्युक्त्वा कपिमुद्रां प्रदर्शयेत् ।

पुरश्चर्यास्य मन्त्रस्य प्रोक्ता चार्कसहस्रिका । भौमस्य वासरे पूजा कार्या हनुमतो ध्रुवम् ॥ १८ ॥
ततश्चार्कास्तमारभ्य यावत् सूर्योदयो भवेत् । तावन्मन्त्रं जपेद्रात्रौ कार्यमुद्दिश्य मन्त्रवित् ॥ १९ ॥
प्रियङ्गवो व्रीहयोऽथ दध्याज्यक्षीरसंयुता । कदलीमातुलुङ्गाम्रफलैर्नानाविधैर्हुनेत् ॥ २० ॥
दशांशेन ततो ब्रह्मचारिणो भोजयेद् ध्रुवम् । द्वाविंशति च संख्याभिर्हनुमत्प्रीतये सुधीः ॥ २१ ॥
अष्टोत्तरशतेनाभिमन्त्रयेद्भस्म वारि च । ग्रहदोषे विषे चैव मार्जयेत् पयसा तनुम् ॥ २२ ॥
हनूमत्प्रतिमा कार्या ततो भूतांकुशस्य च । पूर्वोत्तरगतेनैव मूलेनांगुष्ठमात्रता [?] ॥ २३ ॥
सर्वावयवसम्पूर्णा चित्तप्राशस्त्यकारिणी । प्राणसंस्थापनं तस्याः कृत्वा वै मारुतेर्ध्रुवम् ॥ २४ ॥
सिन्दूरर्चार्चितां कृत्वा तथाभ्यर्च्योपचारकैः । मन्त्रिता तेन मन्त्रेण ततस्तां द्वारदेशके ॥ २५ ॥
खनित्वा निक्षिपेद्भूमौ गृहस्याभिमुखं निशि । भूतजा विषजा बाधा ग्रहजा कूटमन्त्रजा ॥ २६ ॥
चेटकाभयजा व्याधिज्वरजा चाभिचारजा । चोराग्निबाधा च तथा न भवेत्तद्गृहेऽरिजा ॥ २७ ॥
तद्गृहं नन्दते सर्वसमृद्धिधनसंयुतम् । रात्रौ रात्रौ जपेन्मन्त्रं षट्शतं त्रिशतं तथा ॥ २८ ॥

दशवासरपर्यन्तं राजशत्रुभयं हरेत् । अभिचारज्वरे भूतज्वरे च भस्मना तनुम् ॥ २९ ॥
मन्त्रितेनाम्भसा वाथ ताडयेद्रोषपूर्वकम् । त्रिदिनाज्ज्वरमुक्तिः स्यान्नात्र कार्या विचारणा ॥ ३० ॥
औषधे च रसे मन्त्रं दशवारं जपेद् बुधः । तेनाभिमन्त्रित दत्तं सर्वं सफलतां व्रजेत् ॥ ३१ ॥
शस्त्रधाराग्निसंस्तम्भे दशवारं जपेद् बुधः । तेनाभिमन्त्रितं तोयं भस्म तस्य प्रदापयेत् ॥ ३२ ॥
भस्मना चर्चितं देहं पयश्च प्राशयेद् ध्रुवम् । शस्त्रस्तम्भो भवेत्तस्य सत्यं सत्यं न संशयः ॥ ३३ ॥
शस्त्रक्षतेषु लूतासु रक्तग्रन्थ्यादिसंभवे । भस्मना पयसा तत्र त्रिवारं चाभिमन्त्रयेत् ॥ ३४ ॥
न व्यथा नच पूयं स्यात् संशोषयति तद्व्रणम् । सप्तवासरपर्यन्तं विद्वेषोच्चाटने जपः ॥ ३५ ॥
सूर्यास्तं च समारभ्य कुर्यादित्थं बुधोत्तमः । अरुणोदयपर्यन्तं भस्म कीलाभिमन्त्रितम् ॥ ३६ ॥
तद्द्वारे पूरितं गेहे रोपितं वापि तत्क्षणात् । ततस्तस्योच्चाटनं स्यात् परिवारयुतस्य च ॥ ३७ ॥
पुत्रादिभिः सर्वलोकैः पौरैर्जानपदैस्तथा । विद्वेषणप्राणघातः सत्यं सत्यं वचो मम ॥ ३८ ॥
भस्माम्बु मन्त्रितं यस्य देहे चन्दनमिश्रितम् । चर्चितं यत्तु खाद्यादियोजितं यत्र दापितम् ॥ ३९ ॥
स वश्यो जायते नूनं प्राणैरपि धनैरपि । दासतां याति देवोऽपि मनुष्येषु च का कथा ॥ ४० ॥
क्रूरसत्त्वानि सर्वाणि वशयेदमुना खलु । प्रकारेण महावीर ज्वलनं शीततामियात् ॥ ४१ ॥
दिव्यस्थाने च कर्तव्यं निःशक्तिश्च हुताशनः । भवत्येव न सन्देहो लोहतैलेषु संस्थितः ॥ ४२ ॥
मारणे क्रुद्धचित्तेन श्मशाने निशि भूतले । रिपोः प्रतिकृतिं कृत्वा भस्मना वाथवा मृदा ॥ ४३ ॥
पूर्ववत् प्राणसंस्थां च कृत्वा यत्नेन मन्त्रवित् । प्रतिमाहृदि तन्नाम लेख्यं चैव प्रयत्नतः ॥ ४४ ॥
शस्त्रेण च्छेदनं कुर्यान्मन्त्रोच्चारणपूर्वकम् । छिन्धि भिन्धि मारयेति तन्नामान्ते समुच्चरेत् ॥ ४५ ॥
एवं सप्तदिनं कुर्याद् दन्तैरोष्ठं निपीड्य च । कृत्वा प्रपीडितं पाणितलयोर्दृढमात्मनः ॥ ४६ ॥
होमः कार्यस्तत्र वाथ राजिकालवणैः सहः । उन्मत्तफलपुष्पैश्च श्लेष्मान्तकविभीतकैः ॥ ४७ ॥
विषरोमनखैश्चैव काककौशिकगृध्रकैः । पक्वैः कटुकतैलाक्तैरर्धचन्द्राकृतौ हुनेत् ॥ ४८ ॥
स्थण्डिले मुक्तकेशस्तु सूकर्य्या मुद्रया बुधः । दक्षिणाशामुखो भूत्वा पल्लवोच्चारणं कुरु ॥ ४९ ॥
त्रिशतावृत्तिभेदेन सप्तवासरमध्यतः । शत्रुर्मृत्युमवाप्नोति रुद्रेणापि सुरक्षितः ॥ ५० ॥
दिनत्रयं रात्रिभागे श्मशाने षट्शतं जपेत् । प्रेतमुत्थापयेत् सत्यं वेतालः किंकरो भवेत् ॥ ५१ ॥
शुभाशुभं च वदति मन्त्रिणा सह निश्चयात् । ददाति भावां सत्यां च कारयेति करोति च ॥ ५२ ॥
भस्माम्बु मन्त्रितं रात्रौ सहस्रावृत्तिकं कुरु । दिनत्रयं ततश्चैव निक्षिपेत् प्रतिमासु च ॥ ५३ ॥
यासु कासु च स्थूलासु लघुष्वपि विशेषतः । मन्त्रप्रभावाच्चलनं भवत्येव न संशयः ॥ ५४ ॥
मन्त्रेणानेन सिद्धेन यदसाध्यं च साधयेत् । विषे भये विवादे च शस्त्रसंग्रामसङ्कटे ॥ ५५ ॥
द्यूते दिव्यस्तम्भने च विशेषो मारणे तथा । मृतकोत्थापने चैव प्रतिमाचलने तथा ॥ ५६ ॥
विषे ज्वरे भूतज्वरे ग्रहे कृत्यादिमोचने । क्षते ग्रन्थौ महारण्ये दुर्गे व्याघ्रे च दन्तिनि ॥ ५७ ॥
क्रूरसत्त्वेषु सर्वेषु शस्त्रस्तम्भविमोक्षणे । बन्धमोक्षे मारणे च मोहे शान्तौ नियोजयेत् ॥ ५८ ॥
मन्त्रमेनं हनुमतो नानाकार्यप्रसाधनम् । बन्धमुक्तौ जपेन्मन्त्रं रात्रौ रात्रौ च निर्भयः ॥ ५९ ॥
लिखित्वा प्रतिमां भूमौ मारुतेरस्खलन् नरः । स्वनामाक्षरसंघं तु द्वितीयान्तं समालिखेत् ॥ ६० ॥
मन्त्रस्यान्ते तथा मां च विमोचय विमोचय । मार्जयेद्वामहस्तेन पुनस्तथैव लेखयेत् ॥ ६१ ॥
एवमष्टाधिकशतं लेखयेन्मार्जयेन्नरः । एवं कुर्वन् सुबद्धोऽपि शृङ्खलाभिर्दृढं नरः ॥ ६२ ॥
महापराधसंयुक्तः प्राणहानर्थकारकः । स सप्तदिनमध्ये तु बन्धनान्मुच्यते सुखम् ॥ ६३ ॥

हनुमांस्तु समागत्य स्वयं स मोक्षयेन्नरम् । नतु दण्डयितुंशक्ता राजानो विभवो जनाः ॥ ६४ ॥
हवनान्यपि सन्त्यत्र दशांशेन निबोधय । स्तम्भने चणका माषा न्यग्रोधस्य फलानि च ॥ ६५ ॥
हरिद्रा च तथा प्रोक्ता तालकं सल्लकीफलम् । शाल्मलीकुसुमान्याहुर्मधुत्रययुतानि च ॥ ६६ ॥
उच्चाटे गदितान्यत्र श्लेष्मान्तकविभीतकाः । वश्यार्थे सर्षपा लाक्षा मधुकाण्डं च गुग्गुलम् ॥ ६७ ॥
विद्वेषे करवीराणां पत्राणि समिधस्तथा । श्लेमान्तकविभीतानां समिधो जीरकं तथा ॥ ६८ ॥
मधुरं रामठं चैव कटुतैलसमन्वितम् । ज्वरे तापे च शूले च गण्डमालाभगन्दरे ॥ ६९ ॥
दूर्वागुडूचीखण्डानि साज्यक्षीरदधीनि च । शूलेष्वेरण्डसमिधः कुबेराक्षस्तथैव च ॥ ७० ॥
निर्गुण्डीसमिधश्चैव तिलतैलसमन्विताः । लक्ष्मीप्राप्त्यै सरोजानि बिल्वपत्राणि चैव हि ॥ ७१ ॥
समिधस्तस्य होतव्या मधुत्रयसमन्विताः । पक्व खाद्यं नारिकेलद्राक्षेक्षुकदलीफलम् ॥ ७२ ॥
सौभाग्यसर्वसंपत्तिसाधनं हवनं शृणु । कर्पूरं केसरं नाभि चन्दनं रोचनां तथा ॥ ७३ ॥
तजपत्रं वीरणं च लवलैलागरु तथा । मांसीं नखं जातिपत्रं त्वक्फलं लोहवालुकाम् ॥ ७४ ॥
साज्यान्येतानि सर्वत्र विज्ञेयानि मनीषिभिः । पुष्पैः सुगन्धिभिर्वासः प्राप्यते चोत्तमोत्तमम् ॥ ७५ ॥
द्रोहे च मारणे ज्ञेयं विषं स्याद्राजिकास्तथा । कङ्ककौशिकगृध्राणां पक्षाश्च विजया तथा ॥ ७६ ॥
गृहधूमकराश्चैव लवणं कटुतैलकम् । पादपांशुस्तथा राजी लवणं कर्षणे स्मृतम् ॥ ७७ ॥
उन्मत्तफलपुष्पाणि समिधो मोहने स्मृताः । धान्यैः सम्प्राप्यते धान्यमन्नैरन्नसमृद्धयः ॥ ७८ ॥
तिलाज्यक्षीरधिभिर्महिषीगोसमृद्धयः । एवं नानाप्रयोगांश्च साधयेन्मन्त्रवित्तमः ॥ ७९ ॥
पुरश्चर्याजपेच्चैव हनुमन्तं च सेवयेत् ।.... ....॥

इति श्रीमहामहोपाध्यायाचार्यवर्य्य—भगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य—श्रीभगवच्छङ्कराचार्य-शिष्य—श्रीविष्णुशर्माचार्यशिष्य—श्रीप्रगल्भचार्यशिष्य—श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे त्रयस्त्रिंशः श्वासः ॥ ३३ ॥

अथ

चतुस्त्रिंशः श्वासः

अथ हनुमत्पूजायन्त्रम्—

अथ पूजाविधानार्थं यन्त्रं वै कथ्यतेऽधुना । षट्कोणं वसुपत्रं च चतुरस्रं च बाह्यतः ॥ १ ॥
बीजयुक्तं लिखेत्सम्यक् नाम लेख्यं हनूमतः । षट्कोणेषु षडङ्गानि बीजयुक्तानि संलिखेत् ॥ २ ॥
बीजत्रयं च कोणाग्रे लिखेत्सम्यक् पुनस्ततः । अञ्जनीपुत्राय तथा ततो वै रुद्रमूर्तये ॥ ३ ॥
तथा वायुसुतायेति जानकीजीवनाय च । रामदूताय ब्रह्मास्त्रनिवारणाय ततः परम् ॥ ४ ॥
षट्कोणस्यान्तरालेषु संलेख्यं नामषट्कम् । वसुकोणेषु बीजानि नामानि च समालिखेत् ॥ ५ ॥
सुग्रीवायाङ्गदायाथ सुशीलाय ततः परम् । नलायाथ च नीलाय तथा जाम्बवते पदम् ॥ ६ ॥
प्रहस्ताय सुषेणाय दलमध्येषु संलिखेत् । रामभक्तो महातेजाः कपिराजो महाबलः ॥ ७ ॥
द्रोणाद्रिधारको मेरुपीठिकार्चनकारकः । दक्षिणाशाभास्करश्च सर्वविघ्ननिवारकः ॥ ८ ॥
दलान्तरालेषु लिखेन्नामान्यष्टौ प्रयत्नतः । लोकपालान् सायुधांश्च चतुरस्रे च संलिखेत् ॥ ९ ॥
रक्षोघ्नाय द्वि(वि)षघ्नाय रिपुघ्नाय तथैव च । व्याधिघ्नाय ज्वरघ्नाय भूतघ्नाय ततः परम् ॥ १० ॥
पाशशस्त्रमन्त्रघ्नाय यन्त्रघ्नाय विशेषतः । सर्पव्याघ्रमहोत्पातभयघ्नाय जितात्मने ॥ ११ ॥
ब्रह्मग्रहमहाराजकोपघ्नाय तदुत्तरम् । कृत्याक्षतग्रहघ्नाय बलघ्नाय च सर्वतः ॥ १२ ॥
रामप्रियाय रुद्राय रामभक्तिरताय च । भक्तप्रियाय जगतीदुर्भिक्षार्तिविदारिणे ॥ १३ ॥
पर्योग्रसङ्गरानन्तशक्तिविक्रमवर्धिने । अनन्तनगरग्रामपुरपट्टनरक्षिणे ॥ १४ ॥
स्वामिभक्ताय शूराय वीरभद्राय योगिने । स्वभक्तवादसंग्रामविजयाप्तिविवर्धिने ॥ १५ ॥
इत्येतद्दिक्षु संलेख्यं स्तुत्याख्यं नामसंघकम् । एवं यन्त्रवरे सम्यक् पूजा कार्या हनूमतः ॥ १६ ॥
अप्राप्तं वाञ्छितं सर्वं प्रापयत्येव निश्चितम्, । अथ यन्त्रं प्रवक्ष्यामि धारणार्थं विशेषतः ॥ १७ ॥
भूर्जे ताम्रेऽथवा वस्त्रे भित्तौ पट्टे शिलातले । तालपत्रेऽथवा लेख्यं रोचनानाभिकेसरैः ॥ १८ ॥
श्रीखण्डैश्चैव कर्पूरैः सर्वं यन्त्रं समालिखेत् । वृत्तत्रयं समालेख्यं वलयेन सुपुच्छवत् ॥ १९ ॥
साध्यनाम लिखेन्मध्ये वहिरष्टदलं लिखेत् । दलेष्वष्टसु संलेख्यं हुंकारं संमुखं तथा ॥ २० ॥
बहिः संवेष्टयेत्तत्र वलयेन ठठं तथा । तद्बहिश्चतुरस्रं स्याद् रेखाग्रैश्च सुविस्तृतैः ॥ २१ ॥
तद्रेखासु त्रिशूलानि लेखयेच्छोभनानि च । मूलमन्त्रेण तत् सर्वं वेष्टयेन्मण्डलक्रमैः ॥ २२ ॥
पुनर्बहिस्तथैवापि त्रिरेखाभिश्च वेष्टयेत् । रेखान्ते च त्रिवलयं कारयेदेककोणकम् ॥ २३ ॥
तन्मध्ये स्वंकुशं लेख्यं ह्सौंबीजं च समालिखेत् । वज्राष्टकेषु संयोज्यं मूलबीजं तथाष्टधा ॥ २४ ॥
मर्कटस्य च तद्यन्त्रे प्राणारोपं च कारयेत् । पाशादित्र्यक्षरस्यान्ते स्यादमुष्यपदं पुनः ॥ २५ ॥
क्रमात् प्राणा इह प्राणास्तथा जीव इहस्थित. । अमुष्य सर्वेन्द्रियाणि भूयोऽमुष्य-पदं वदेत् ॥ २६ ॥
वाङ्मनोनयनश्रोत्रघ्राणप्राणपदान्यथ । पश्चादिहागत्य सुखं चिरं तिष्ठन्तु ठद्वयम् ॥ २७ ॥
अयं प्राणमनुः प्रोक्तः सर्वजीवप्रदायकः । षट्शतैस्त्रिशतैर्वापि तद्यन्त्रमभिमन्त्रयेत् ॥ २८ ॥

मर्कटेश्वरसंयोगं प्राणबुद्धया च कारयेत् । निष्कल्मषब्रह्मचर्याव्रतधारी जितेन्द्रियः ॥ २९ ॥
त्यक्ताशनो महाभागो हनूमन्तं च पूजयेत् । कदलीमातुलुङ्गादिफलैलादिमनोहरैः ॥ ३० ॥
पुष्पैर्नानाविधैस्तं च सोपचारैः समाहितः । ततो यन्त्रं सुधार्यं स्यात् सर्वबाधाविनाशकृत् ॥ ३१ ॥
सर्वरक्षाकरं नृणां बालानां योषितामपि । पशूनां च मृगाणां च हयानां सर्वजीविनाम् ॥ ३२ ॥
ज्वरमारीस्फोटकादिचोररोगभयापहम् । राजद्वारे वने घोरे संग्रामे रिपुसङ्कटे ॥ ३३ ॥
शस्त्रपाते महाभीमे दिव्याग्निजलसंप्लवे । जनवश्ये राजवश्ये रिपुविद्वेषणे वधे ॥ ३४ ॥
दधतामनिशं यन्त्रं प्राणस्थानपूर्वकम् । सर्वकार्यं सुसिद्धं स्यान्नात्र कार्या विचारणा ॥ ३५ ॥
अन्यद्यन्त्रं धारणाख्यं कथ्यते शृणु सुन्दरम् । षट्कोणं विलिखेद्यन्त्रं भूर्जपत्रे च सुन्दरे ॥ ३६ ॥
वस्त्रे पट्टे कागदे वा भित्त्यां द्रव्यैः सुगन्धकैः । हसौंमध्यगतं साध्यनाम लेख्यं विशेषतः ॥ ३७ ॥
ततस्तद्वेष्टयेत् तेन मायाबीजेन वै पुनः । हनूमान् रक्षरक्षेति षट्कोणेषु लिखेत्ततः ॥ ३८ ॥
अन्तराले त्रिशूलानि मायाबीजान्तराणि च । एतद्यन्त्रं महाश्रेष्ठं सर्वसिद्धिकरं नृणाम् ॥ ३९ ॥
साधयेत् सर्वकार्याणि नात्र कार्या विचारणा । अधुना प्रतिमायन्त्रं कथ्यते तन्निशामय ॥ ४० ॥
कपीश्वरस्य रूपं च समालेख्यं प्रयत्नतः । वस्त्रे व कागदे वाथ मस्या चालक्तकेन वा ॥ ४१ ॥
हिंगुलेनाथवा चान्यैर्लेख्यं द्रव्यैः सुशोभनैः । तत्रैव क्रमयोगेन साध्यनामाक्षराणि च ॥ ४२ ॥
प्रथमं हृदये लेख्यं द्वितीयं मस्तके तथा । तृतीयं दक्षिणे बाहौ चतुर्थं वामके भुजे ॥ ४३ ॥
पञ्चमं च तथा षष्ठं पाण्योर्दक्षिणवामयोः । उदरे सप्तमं चैव दक्षोरौ चाष्टमं तथा ॥ ४४ ॥
वामोरौ नवमं चैव दशमं दक्षपत्तले । एकादशं च संलेख्यं वामपादतले तथा ॥ ४५ ॥
एवं क्रमेण संलेख्यं वर्णानां च समूहकम् । वश्ये द्वेषे स्तम्भने च मारणे मोहने तथा ॥ ४६ ॥
आकर्षणे बन्धमुक्तौ विजये च विशेषतः । द्वादशाक्षरविद्यायास्तदक्षरयुतं लिखेत् ॥ ४७ ॥
मन्त्राद्यं बीजषट्कं च चतुर्थ्यन्तं नमोन्तकम् । तन्नाम कथिता विद्या द्वादशाक्षरवर्णिका ॥ ४८ ॥
वशमानय संलेख्यं वश्ये चाम्रेडितान्वितम् । विद्वेषयाम्रेडितं च विद्वेषे समुदीरितम् ॥ ४९ ॥
आम्रेडितं स्तम्भयेति स्तम्भने समुदीरितम् । आम्रेडितं मारयेति मारणे समुदीरितम् ॥ ५० ॥
आम्रेडितं मोहयेति मोहने समुदीरितम् । आम्रेडितं मोक्षयेति बन्धमोक्षे समीरितम् ॥ ५१ ॥
एवंविधं तु संलेख्यं प्रतिमायन्त्रमुत्तमम् । साध्याकृतिं वस्त्रमयीं कृत्वा पूर्ववदुत्तमाम् ॥ ५२ ॥
रक्ताञ्जनेन संलेख्य सान्द्रां कृत्वा प्रयत्नतः । क्षीरेण नवनीतेन दध्ना चान्येन केनचित् ॥ ५३ ॥
प्राणानां स्थापनं कृत्वा रोषेणोच्चाटनं कृतम् । नामोद्देशेन तु रिपोः पीडयेदाकृतिं स्थिताम् ॥ ५४ ॥
तद्रसस्य तु पानं वै कारयेन्मृत्युहेतवे । अथवाग्नौ क्षिपेत् तत्तु चैत्ये मारणहेतवे ॥ ५५ ॥
एवं कृत्वा रिपोः सत्यं मृत्युर्भवति नान्यथा । प्राणप्रतिष्ठापूर्वं तु सम्पूज्य निक्षिपेद् भुवि ॥ ५६ ॥
साध्यस्य द्वारदेशे निखनेच्च महामतिः, । अथवा भूतले लेख्यं प्रतिमायन्त्रमुत्तमम् ॥ ५७ ॥
तत्रेत्थं श्लोकसन्दर्भं साध्यनाम लिखेद् ध्रुवम् । संमार्ज्य पुनरालेख्यं तथैव च पुनः पुनः ॥ ५८ ॥
एवमष्टोत्तरशतं लेखनावृत्तिपूर्वकम् । यत्तत्कामं समासाद्य तदा पल्लवयोजना ॥ ५९ ॥
कार्यस्य पूर्वयोगे तु ज्ञातव्या मन्त्रिणा ध्रुवम् । ....॥

हरिमर्कटमर्कट मन्त्रमिमं यदि लिखति लिखति भूमितले ।
यदि नश्यति नश्यति वामकरात् परिमुञ्चति मुञ्चति शृंखलिका ॥ ६० ॥

इति लेखनप्रकारः ॥ अथ द्वादशाक्षरस्य प्रयोगः—तत्र प्रातःकृत्यादियोगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा, शिरसि श्रीरामचन्द्राय ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदये श्रीहनुमते देवतायै

नमः। गुह्ये मारुतात्मजबीजाय नमः। पादयोः अञ्जनीहृदयानन्दशक्तये नमः। कृपाप्लवङ्गमेति प्राणाः। श्रीरघुवरकपिश्रेष्ठेति कीलकम्। मत्कार्यकर्ता वानरो रामकिङ्करः, इति कवचम्। हरिर्वज्राङ्गवान् इति शस्त्रम्। धनुर्धरध्वजवासीति ध्यानम्। ममाभीष्टसिद्धये विनियोगः इति कृताञ्जलिरुक्त्वा, ॐमारुतात्मज हृदयाय नमः। अञ्जनीहृदयानन्द शिरसे स्वाहा। लक्ष्मणप्राणदात्रे प्लवङ्गमाय शिखायै०। हनूमान् रामदूत कवचाय हुं। श्रीरघुवरकपिश्रेष्ठ नेत्रत्रयाय०। श्रीवानरो रामकिङ्करः अस्त्राय०। एवं करषडङ्गं विधाय ॐहरिर्वज्राङ्गवानिति मणिबन्धयोः। ॐऐंश्रींह्रांह्रींह्रूं हनुमते नमः इति सर्वाङ्गे व्यापकम्। ॐऐंश्रींह्रांह्रींह्रूं हनुमते नमः हृदयाय०। ६ रामदूताय शिरसे०। ६ रामप्रियाय शिखायै०। ६ सीताशोकविनाशनाय कवचाय०। ६ अञ्जनीसूनवे नेत्राभ्यां०। ६ श्रीरामकिङ्करायास्त्राय०॥ ॐऐं नमः शिखायां। एवं श्रीं नेत्रयोः। ह्रां मुखे। ह्रीं कण्ठे। ह्रूं बाह्वोः। हं हृदये। नुं कुक्षौ। मं नाभौ। तें गुह्ये। न जान्वोः। मः पादयोः। इत्यक्षरन्यासः॥ ह्रौं नमो मूर्ध्नि। ऐं ललाटे। श्रीं मुखे। ह्रां कण्ठे। ह्रीं नाभौ। ह्रूं ऊर्वोः। हनुमते जङ्घयोः। नमः पादयोः॥ ध्यानम्—

वामे करे वैरिभिदं वहन्तं शैलं तदन्ये घनरन्ध्रटङ्कम्।
बभार ? (विशाल)पुच्छाग्रसुवर्णवर्णं ध्यायेज्ज्वलत्कुण्डलमाञ्जनेयम्॥ १॥
अशोकवनपान्दोलं स्वामिमुद्राङ्कितााधरम्। जपन्तं रामचन्द्रं च क्रीडादेवारिमर्दनम्॥ २॥

ॐऐंश्रींह्रांह्रींह्रूं हनुमते नमः, इत्येकः। (ह्रौंऐंश्रींह्रांह्रींह्रूं हनुमते नमः) इति द्वादशाक्षरोऽन्यः॥

अथ हनुमन्मालामन्त्रः—

ॐऐंश्रींह्रांह्रींह्रूं नमो हनुमते प्रकटपराक्रमाक्रान्तदिङ्मण्डल–यशोवितानधवलीकृतजगतित्रतयाय वज्रदेहज्वलदग्निसूर्यकोटिसमप्रभतनूरुह रुद्रावतार लङ्कापुरीदहन उदधिलङ्घन दशग्रीवशिरःकृतान्तक सीताश्वासनवायुसुत अञ्जनीगर्भसम्भूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार द्रोणपर्वतोत्पाटन अशोकवनविदारण अक्षकुमारच्छेदन राक्षसेश्वरसमूहविभञ्जन ब्रह्मास्त्रब्रह्मशक्तिग्रसन लक्ष्मणशक्तिभेदनिवारण शल्यविशल्यौषधिसमानयन वालोदितभानुमण्डलग्रसन मेघनादहोमविध्वंसन इन्द्रजिद्वधकारण सीतारक्षक राक्षसीसङ्घविदारण कुम्भकर्णवधपरायण श्रीरामभक्तितत्पर समुद्रव्योमद्रुमलङ्घन महासामर्थ्य महातेजःपुञ्जविराजमान स्वामिवचनसम्पादितार्जुनसंयुगसहाय कुमारब्रह्मचारिन् गम्भीरशब्दोदय दक्षिणाशामार्तण्ड मेरुपर्वतपीठिकार्चन सर्वज्वरोच्चाटन सर्वविषविनाशन सर्वापत्तिनिवारण सर्वदुष्टनिवर्हण सर्वव्याघ्रादिभयनिवारण सर्वशत्रुच्छेदन मम परस्य च त्रिभुवनपुंस्त्रीनपुंसकात्मकं सर्वजीवजातं वशय २ ममाज्ञाकरं सम्पादय २ नानानामधेयान् सर्वराज्ञः सपरिवारान् कुरु २ सर्वशस्त्रास्त्रविषादि विध्वंसय २ ॐऐंश्रींह्रांह्रींह्रूं हाहाहा घेघेघे हुंहुंहुं ह्रूंह्रींह्रांश्रींऐंॐ एह्येहि सर्वशत्रून् हन २ परबलानि परसैन्यानि क्षोभय २ मम कार्यजातं साधय २ सर्वदुर्जनदुष्टमुखानि कीलय २ घेघेघे हुं फट् स्वाहा॥

जपेन्मन्त्रमष्टवारं त्रिवारं वा दिने दिने। जपेद् द्वादशसाहस्रं मन्त्रसिद्धिर्भवेद् ध्रुवम्॥ १॥
अर्घ्यं दशांशतः कुर्याद् दशांशेनैव होमयेत्। मार्जनं तद्दशांशेन तद्दशांशेन भोजनम्॥ २॥
प्रियंगुतिलश्यामाकयवव्रीहिसमन्वितम्। पुष्पफलविशेषैस्तु शर्करामधुसंयुतम्॥ ३॥
सघृतं शुभखाद्यं च जुहुयाद् भक्तिसंयुतः। करवीरैर्जातिपुष्पैर्बकुलैश्चम्पकैः शुभैः॥ ४॥
शतपत्रैश्च कह्लारैः पङ्कजैश्च सुशोभनैः। दाडिमीमातुलुङ्गैश्च नारिकेलफलाम्बुना॥ ५॥
पनसद्राक्षाखर्जूरैः शुभैर्वस्त्रैर्हविर्भुजे। राजद्वारे सभामध्ये सम्वादे रिपुसङ्कटे॥ ६॥
बन्धमोक्षे च संग्रामे विषयोगे विशेषतः। असाध्यसाध्यकामे च विद्यारम्भे प्रयत्नतः॥ ७॥
क्षुद्रप्रयोगनाशार्थे प्रसूतिनिग्रहस्थले। भूतवेतालसर्पादिव्याघ्रचोरभयाकुले॥ ८॥

यात्राप्रयाणकाले च पठेन्मन्त्रं स्वमानसे । नेत्रदुःखे च मोक्षे च शिरोदुःखे तथैव च ॥ ९ ॥
ज्वरादिसर्वव्याधिश्च ग्रहपीडा न जायते । कानने जलमध्ये च जपेन्मन्त्रं स्वमानसे ॥ १० ॥
चिताभस्म वचा कुष्ठं तगरं कुंकुमं समम् । चूर्णं स्त्रीशिरसि क्षिप्त्वा पुरुषाणां च पादयोः ॥ ११ ॥
अदासो दासतां याति यावज्जीवं न संशयः । ....॥

इति विधिः ॥ अथ मन्त्रान्तरम्--

आञ्जनेयमनुं वक्ष्ये भुक्तिमुक्त्येकसाधनम् । प्रकाशितं शङ्करेण लोकानां हितकाम्यया ॥ १ ॥
भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसाः । दृष्ट्वा च प्रलयं यान्ति मन्त्रानुष्ठानतत्परम् ॥ २ ॥
प्रधानश्चाङ्गभूतोऽयं मन्त्रराजो ह्यनुत्तमः । पूर्वं नमःपदं चोक्त्वा ततो भगवते-पदम् ॥ ३ ॥
आञ्जनेयपदं ङेन्तं महाबलपदं तथा । वह्निजायान्त एव स्यान्मन्त्रो हनुमतः परः ॥ ४ ॥

"नमो भगवते आञ्जनेयाय महाबलाय स्वाहा (१८) ॥"

मूर्ध्नि भाले भ्रुवोर्मध्ये नेत्रयोः कर्णनासयोः । आस्ये कण्ठे च दोर्मूले हृदयेऽप्यथ नाभिके ॥ ५ ॥
लिङ्गमूले तथाधारे कट्यां जान्वोश्च जङ्घयोः । पादयोश्च समस्तेन व्यापकं विन्यसेन्मनोः ॥ ६ ॥
सर्वसिद्धिकरः प्रोक्तो मन्त्रश्चाष्टादशाक्षरः, । मालाख्योऽपरमन्त्रोऽपि मारुतेः सर्वसिद्धिदः ॥ ७ ॥

एतन्मन्त्रस्यार्ष्यादिध्यानपुरश्चरणप्रयोगादिविधिः पूर्वोक्तवत् ॥ अथापरो मालामन्त्रः-ॐनमो हनुमते प्रकटपराक्रमाय आक्रान्तदिङ्मण्डलाय यशोवितानधवलीकृतजगत्त्रितयाय वज्रदेहाय रुद्रावताराय लङ्कापुरीदहन उदधिलङ्घन दशग्रीवकृतान्तक सीताश्वासन अञ्जनीगर्भसंभव रामलक्ष्मणानन्दकर कपिसैन्यप्राकार सुग्रीवसाधारण पर्वतोत्पाटन बालब्रह्मचारिन् गम्भीरशब्द सर्वग्रहविनाशन सर्वज्वरहर डाकिनीविध्वंसन ॐ ह्रां ह्रीं ह्रूं भस्मन्येव सर्वविषहर परबलं क्षोभय २ मम सर्वकार्याणि साधय २ हुं फट् स्वाहा ॥ उद्धारस्तु--

प्रणवं पूर्वमुच्चार्य नमो हनुमते पदम् । ङेन्तं प्रकटसंयुक्तं पराक्रमपदं तथा ॥ १ ॥
तथाक्रान्तपदोपेतं दिङ्मण्डलमुदीरयेत् । यशोवितानधवलीकृतजगत्त्रितयाय च ॥ २ ॥
वज्रदेहाय चेत्युक्त्वा रुद्रावतारपदं तथा । संबुद्ध्यन्तं पदं लङ्कापुरीदहनमीरयेत् ॥ ३ ॥
उदधिलङ्घनपदं दशग्रीवकृतान्तक । सीताश्वासनपदोपेतमञ्जनीगर्भसंभव ॥ ४ ॥
श्रीरामलक्ष्मणनन्दकर कपिसैन्यप्राकार च । सुग्रीवसाधारणपदं पर्वतोत्पाटनं तथा ॥ ५ ॥
तथा बालब्रह्मचारिस्तथा गम्भीरशब्द च । सर्वग्रहविनाशन सर्वज्वरहरं तथा ॥ ६ ॥
डाकिनीविध्वंसनपदं ततस्तारमुदीरयेत् । मायात्रितयमुच्चार्य भस्मन्येव वदेत् ततः ॥ ७ ॥
सर्वविषहर परबलं क्षोभय क्षोभय । मम च सर्वकार्याणि साधयेति द्विरुच्चरेत् ॥ ८ ॥
हुंफट् स्वाहेति मन्त्रोऽयं मालाख्यः सर्वकामधुक् । ऋषिरीश्वर एव स्यादनुष्टुप्छन्द ईरितम् ॥ ९ ॥
हनुमान् देवता प्रोक्तो हुंबीजं शक्तिरन्तजा । कीलकं ह्रात्रयं प्रोक्तं वेधकं तु हसौं पुनः ॥ १० ॥
हनूमत्प्रीतये चैव फलमाद्यमुदीरितम् । नमो भगवते चाञ्जनेयायांगुष्ठयोर्न्यसेत् ॥ ११ ॥
रुद्रमूर्तये च तथा तर्जनीभ्यामनन्तरम् । वायुसुतायेति तथा मध्यमाभ्यामपि स्फुटम् ॥ १२ ॥
अग्निगर्भाय च तथानामिकाभ्यां प्रविन्यसेत् । रामदूताय च पुनः कनिष्ठाभ्यां विचक्षणः ॥ १३ ॥
ब्रह्मास्त्रनिवारणाय चास्त्रमन्त्रः समीरितः । षडङ्गं चामुना कृत्वा ततो ध्यायेदनन्यधीः ॥ १४ ॥
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम् । कुण्डलद्वयसंशोभिमुखाम्भोजं मुहुर्मुहुः ॥ १५ ॥
अयुतं तु पुरश्चर्या रामस्याग्रे शिवस्य वा । पूजां तु वैष्णवे पीठे शैवे वा विदधीत वै ॥ १६ ॥
आवृतिभिर्विना नित्यं नियताशी जितेन्द्रियः । क्षुद्ररोगनिवृत्त्यर्थमष्टोत्तरशतं मुने ॥ १७ ॥
पूजयेत् तद्भयान्मुक्तो भवत्येव न संशयः । महारोगादिशान्त्यर्थमष्टोत्तरसहस्रकम् ॥ १८ ॥

जप्त्वा तस्मात्प्रमुच्येत निशोथे नियताशनः। जयाभिकांक्षिणो राज्ञस्तस्मादन्यन्न विद्यते ॥ १९ ॥
ध्यायेद्राक्षसहन्तारमयुतं नियताशनः। जपन्नियमतश्चैव जयेदजेयमप्यरिम् ॥ २० ॥
संदधानं तु सुग्रीवं सन्धानाय स्मरन्नपि। अयुतेनापि बलिना सन्धिमाप्नोत्यसंशयम् ॥ २१ ॥
लङ्कायां दाहनं ध्यायन् जपन्नयुतमञ्जसा। शत्रुराष्ट्रं दहेदेव विभवेन सहारिणः ॥ २२ ॥
जयार्थे रिपुसंघानामस्मादन्यन्न विद्यते। यस्तु ग्रहे हनूमन्तं सर्वदैव प्रपूजयेत् ॥ २३ ॥
सर्वदैतस्य मन्त्रेण तस्य लक्ष्मीरचञ्चला। दीर्घमायुर्लभेदेव सर्वतो विजयी भवेत् ॥ २४ ॥
सर्पादिभूतसंरक्षा तद्देशे चैव जायते। सर्वतः सर्वदा मित्रं भवत्येव न संशयः ॥ २५ ॥
शैवानां वैष्णवानां च षट्कर्मात्र प्रदर्शितम्। नान्यसाधनमस्त्येव मन्त्रादस्मादनुत्तमम् ॥ २६ ॥
वैरिव्याघ्रादिभीतीनामयमेव परायणः। संनाहे भूरियुद्धेषु रुद्धानां परिसैनिकैः ॥ २७ ॥
यात्राकाले हनूमन्तं स्मरन् यस्तु स्वाकाद्‌गृहात्। इच्छया याति वेगेन इष्टार्थमधिगच्छति ॥ २८ ॥
स्वापकाले स्मरेन्नित्यं चोरभूतादिकांस्त्यजेत्। पदं च वासुदेवाद्यं हनुमते पदं पुनः ॥ २९ ॥
कलद्वन्द्वं घघद्वन्द्वं खत्रयं वह्निवल्लभा। चतुर्विंशतिवर्णोऽन्यो सप्लीहोदररोगहृत् ॥ ३० ॥

ॐनमो भगवते हनुमते कल २ घघ २ खखख स्वाहा ॥ (२४) ॥

नागवल्लीदले चैवमष्टप्रगुणितं शुभम्। वंशजं शंकुकं स्थाप्य क्रमात् प्लीहोदरोपरि ॥ ३१ ॥
सप्तारण्योपलाग्रे वै बन्धयष्टिं प्रतापयेत्। मन्त्रेणानेनाभिमन्त्र्य सप्तवारं तथा पुनः ॥ ३२ ॥
तथैव मन्त्रयेदेनं सप्तभिस्तु विचक्षणः (?)। स्फोटद्वारा भवेत् प्लीहो भस्मीभूतो न संशयः ॥ ३३ ॥
कर्पूराद्यष्टगन्धेन पुच्छाकारं पटे लिखेत्। कोकिलाक्षस्य लेखिन्या रूपं हनुमतो मनुम् ॥ ३४ ॥
उद्यदष्टादशार्णं तु मन्त्रमध्ये निधारयेत्। मूर्ध्नि बद्धेन तेनैव त्रैलोक्यं जयति ध्रुवम् ॥ ३५ ॥
महासैन्यपताकायां मन्त्रं यन्त्रं समालिखेत्। चन्द्रसूर्यग्रहे जाप्यो मन्त्रस्तन्मोक्षणावधि ॥ ३६ ॥
होमयेच्च दशांशेन तिलसर्षपकादिभिः। युद्धकाले पताकां तां गजाश्वोपरि संस्थिताम् ॥ ३७ ॥
दर्शयेत्परसैन्यस्य तद्भङ्गं स्यात्सुनिश्चितम्। मालामन्त्रं जपेद्यस्तु हनूमन्तं स्मरन् रणे ॥ ३८ ॥
वज्राङ्गो जायते युद्धे हनूमत्समविक्रमः। अथ रक्षां प्रवक्ष्यामि सर्वसिद्धिप्रदायिनीम् ॥ ३९ ॥
स्तम्भनीं परसैन्यानां भूतानां च वशङ्करीम्। रोचनाकुंकुमाभ्यां च भूर्जपत्रे सुशोभने ॥ ४० ॥
सुवर्णस्य च लेखिन्या यन्त्रमष्टदलं लिखेत्। साध्यनाम च तन्मध्ये मूलमन्त्रं दलाष्टके ॥ ४१ ॥
मालामन्त्रं च तन्मध्ये त्रिधा हुंकारवेष्टितम्। त्रिलोहवेष्टितं कृत्वा कटिबाहुशिरःस्थितम् ॥ ४२ ॥
धारयेद्बाहुना विद्यां विघ्नस्तस्य न जायते। रणे राजकुले द्यूते व्यवहारे पराभवे ॥ ४३ ॥
शस्त्रैर्नाक्रम्यते तस्य सर्वेषां चातिवल्लभः। तस्य पीडां न कुर्वन्ति ग्रहाश्चोराद्युपद्रवाः ॥ ४४ ॥
जलवह्निभयं नास्ति व्याघ्रतस्करजं तथा। ज्वराः सर्वे विनश्यन्ति व्याह्निकाद्या महाबलाः ॥ ४५ ॥
अक्षिजादिमहारोगा मन्त्रराजप्रभावतः। तारो हकारोऽग्नियुतः षड्दीर्घस्वरबिन्दुना ॥ ४६ ॥
प्रणवान्तोऽष्टाक्षरको मूलमन्त्र उदाहृतः। ....॥

"ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः ॐ" इति ॥ (८) ॥

चन्दनागरुकर्पूरतमालजल कुंकुमम्। उशीरकुष्ठसंयुक्तमेतद् गन्धाष्टकं स्मृतम् ॥ ४७ ॥
ताराद्यं वज्रकायेति वज्रतुण्ड समुद्धरेत्। कपिल पिङ्गल प्रोच्य ऊर्ध्वकेश महाबल ॥ ४८ ॥
रक्तमुख तडिज्जिह्वामहारौद्रपदं ततः। दंष्ट्रोत्कट कहकह करालिन् पदमुद्धरेत् ॥ ४९ ॥
महादृढप्रहारिश्च लङ्केश्वरवधोद्यत। महासेतुबन्धपदं महाशैलप्रवाह च ॥ ५० ॥
गगनचर एह्येहि भगवंश्च महापदम्। ततो बलपराक्रम भैरवाज्ञा जयेति च ॥ ५१ ॥

एह्येहि च महारौद्र दीर्घपुच्छेन वेष्टय । वैरिणं भञ्जय-पदं द्विरुक्तं हुंफडन्तकम् ॥ ५२ ॥
स्वाहान्तकः शतं पञ्चविंशदक्षरको मनुः । मालाख्योऽयं ज्वरादीनां रोगाणामन्तकः स्मृतः ॥ ५३ ॥

(१) ॐवज्रकाय वज्रतुण्ड कपिलपिङ्गलोर्ध्वकेश महाबल रक्तमुख तडिज्जिह्वामहारौद्रदंष्ट्रोत्कट कह २ करालिन् महादृढप्रहारिन् लंकेश्वरवधोद्यत महासेतुबन्धमहाशैलप्रवाह गगनचर एह्येहि भगवान् महाबलपराक्रम भैरवाज्ञाजय एह्येहि महारौद्रदीर्घपुच्छेन वेष्टय वैरिणं भञ्जय २ हुफट् स्वाहा ॥ (२) ॐह्रौं स्फ्रें ख्फ्रें ह्स्रौं हस्ख्फ्रें ह्सौं हनुमते नमः ॥ (३) ॐ नमो हनूमान् सर्वग्रहान् भूतभविष्यवर्तमानान् दूरस्थान् समीपस्थान् सर्वकालमुच्चाटय २ परबलानि क्षोभय २ सर्वकार्याणि साधय २ ह्रांह्रींह्रूं घेघेघे हुंफट् स्वाहा ॥ (४) ॐशिवं ॐशिवं ॐॐसिद्धिं ॐहरं ॐहरिं ॐहरायै ओंरांॐ स्वाहा परमन्त्रपरयन्त्रपराहङ्कार-भूतप्रेतपिशाचसर्वज्वरपरदृष्टिसर्वदुर्जनचेटककरणसर्वविद्यासर्पाग्निनिवारण नाशय २ इलु २ बुबु २ खिलि २ विलय सर्वकुयन्त्राणि सर्वदुष्टवाचं हुंफट् स्वाहा ॥ (५) ॐऐंश्रींह्रांह्रीं ह्सौं स्फ्रें ख्फ्रें हस्ख्फ्रें ह्सौं हनुमते नमः । इति षोडशाक्षरमन्त्रः ॥ (६) ॐस्फ्रें ख्फ्रें ह्सौं स्ह्रौं । इति पञ्चाक्षरमन्त्रः ॥ सर्वेषां रामचन्द्र ऋषिः, नानाछन्दांसि, महावीरो हनुमान् देवता, मारुतात्मज ह्सौं बीजं । अञ्जनीसूनु स्फ्रें इति शक्तिः, श्रीरामद्र ह्रां इति प्राणाः, ॐह्रां इति कीलकम्, श्रीरामलक्ष्मणानन्दकर ह्रांह्रींह्रूं इति जीवः, मम इष्टसिद्धये विनियोगः । द्वादशाक्षरवत् षडङ्गन्यासध्यानानि ज्ञेयानि इति हनूमत्प्रकरणम् ॥

अथोक्तानां काम्यहोमकर्मणां तन्त्रोक्तप्रकारेणाग्निचक्रमविज्ञाय कृतानां नैष्फल्यं प्रत्यवायश्च भवतीति श्रुतेस्तत्परिज्ञानस्यावश्यकत्वात् परिज्ञानं प्रकाश्यते । श्रीरुद्रयामले—

अथ वक्ष्ये महादेवि होमकर्मसु सिद्धिदम् । अग्निचक्रं वरारोहे सर्वतन्त्रेषु गोपितम् ॥ १ ॥
नवग्रहमयो वह्निस्ते च वह्निमया ग्रहाः । वह्नौ हुतं हविर्देवि ग्रहाणां प्रविशेन्मुखम् ॥ २ ॥
तृप्यन्ति देवताः सर्वास्तेषु तृप्तेषु पार्वति । फलं वापि प्रयच्छन्ति सर्वदेवमया ग्रहाः ॥ ३ ॥
अतस्तेषां स्थितिं वह्नौ ज्ञात्वा होमं समाचरेत् । शान्तिके पौष्टिके वृद्धौ क्रूरेष्वपि च कर्मसु ॥ ४ ॥
तेषां स्थितिक्रमं वक्ष्ये नक्षत्रेषु यथा स्थिताः । सूर्यो बुधो भृगुश्चैव शनिश्चन्द्रो महीसुतः ॥ ५ ॥
जीवो राहुश्च केतुश्च नवैते दिवि खेचराः । त्रीणि त्रीणि च ऋक्षाणि रव्यादीनि च दापयेत् ॥ ६ ॥
सूर्यभाच्चन्द्रभं यावद्गणयेच्च महेश्वरि । सूर्यादीनां फलं देवि शृणु वक्ष्ये यथाक्रमम् ॥ ७ ॥
आदित्ये तु भवेच्छोको बुधे चैव धनागमः । शुक्रे लाभं विजानीयाच्छनौ पीडा न संशयः ॥ ८ ॥
चन्द्रे लाभो महादेवि भौमे चैव तु बन्धनम् । गुरुणा च धनप्राप्तिः राहौ हानिस्तथैव च ॥ ९ ॥
केतुना जायते मृत्युः फलमेवं महेश्वरि । एवं ज्ञात्वा महेशानि होमकर्म समाचरेत् ॥ १० ॥
सौम्यग्रहमुखे यस्मिन् दिने विंशति चाहुतिः । आरम्भं सौम्यहोमस्य दिने तस्मिन् विधीयते ॥ ११ ॥
क्रूरहोमस्तथा देवि क्रूरग्रहमुखे भवेत् । इति ज्ञात्वा महादेवि काम्यहोमं समाचरेत् ॥ १२ ॥
अन्यथा क्रियमाणे तु नैष्फल्यं चात्मनाशनम् । ....॥

इति ॥ ब्रह्मयामले—

अथ वह्नेः स्थितिं वक्ष्ये होमकर्मसु सिद्धये । स्वर्गलोके च पाताले भूमौ तिष्ठति हव्यवाट् ॥ १ ॥
तत्प्रकारमहं वक्ष्ये साधकानां हिताय च । धृतिं च तिथिवारांश्च सप्तद्वीपं चतुर्युगम् ॥ २ ॥
एकीकृत्य हरेद्भागं त्रिभिः शेषेण पावकः । एकेन वसति स्वर्गे द्वये पाताल एव च ॥ ३ ॥
शून्ये च मर्त्यलोके स्यादेवं वसति पावकः । उत्पातः स्वर्गलोकस्थे पातालस्थे धनक्षयः ॥ ४ ॥
मर्त्यलोकस्थिते वह्नौ होमोऽभीष्टफलप्रदः । इत्थं विज्ञाय मन्त्रज्ञो होमकर्म समारभेत् ॥ ५ ॥

धृतिरष्टादश । तिथयः पञ्चदश प्रतिपदादयः होमारम्भतिथिपर्यन्ताः, वाराः सूर्यवारादिहोमारम्भ-

वारान्ताः । अन्यत्सुगमम् ॥

अथारिमन्त्रपरित्यागविधिस्तत्र श्रीरुयामले--

अरिमन्त्रपरित्यागविधिं वक्ष्ये महेश्वरि । यज्ज्ञात्वा मोचयेच्छिष्यं शत्रुमन्त्रभयाद् गुरुः ॥ १ ॥
अज्ञानाद्यत्र कुत्राप्तमरिमन्त्रं महेश्वरि । जप्त्वा मूढा महादुःखं प्राप्नुवन्तीह तत्कृतम् ॥ २ ॥
गुरुस्तद् रक्षयेद्येन विधिना तद्वदामि ते । शुचिः समाहितो भूत्वा प्रारभेत् प्रवरे दिने ॥ ३ ॥
अशेषदुःखनाशाय देशिकप्रवरो विधिम् । तत्रादौ रम्यभवने कुम्भं दीक्षाविधानतः ॥ ४ ॥
मण्डले स्थापयेद्देवि पूरयेत् तं शुभैर्जलैः । विधिना मन्त्रपाठेन तत्रावाह्येष्टदेवताम् ॥ ५ ॥
सकलीकृत्य सम्पूज्यावरणानि प्रपूजयेत् । एवं सावरणामिष्ट्वा देवि मन्त्रस्य देवताम् ॥ ६ ॥
हुत्वा विलोममन्त्रेण गोघृतेन महेश्वरि । अष्टोत्तरसहस्रं वा शतं चाष्टोत्तरं प्रिये ॥ ७ ॥
ब्रह्मार्पणेन मनुना तथान्ते तर्पयेत् प्रभुम् । ततो यावन्नदुग्धान्नैर्देवताभ्यो बलिं हरेत् ॥ ८ ॥
विदिक्षु दिक्षु च तथाधश्चोर्ध्वे मनुवित्तमः । आयाहीन्द्र सुराधीश शतमन्यो शचीपते ॥ ९ ॥
नमस्तुभ्यं गृहाणेमं पुष्पधूपादिकं बलिम् । आयाहि तेजसां नाथ हव्यवाह वरप्रद ॥ १० ॥
गृहाण पुष्पधूपादिबलिमेनं प्रयोजितम् । प्रेतनाथ त्वमायाहि भिन्नाञ्जनसमायुधैः ॥ ११ ॥
बलिं दत्तं गृहीत्वेमं सुप्रीतो वरदो भव । नमस्ते रक्षसां नाथ निर्ऋते त्वमिहागतः ॥ १२ ॥
गृहाण बलिपूजादि मया भक्त्या निवेदितम् । एहि पश्चिमदिक्पाल जलनाथ नमोऽस्तु ते ॥ १३ ॥
भक्त्या निवेदितां पूजां गृहीत्वा प्रीतिमाप्नुहि । प्रभञ्जन प्राणपते त्वमेहि सपरिच्छद ॥ १४ ॥
मया प्रयुक्तं विधिवद्गृहाण बलिमादरात् । कुबेरतारकाधीशावागच्छेतां सुरेश्वरौ ॥ १५ ॥
पुष्पधूपादिभिः प्रीतौ भवेतां वरदौ मम । ईश त्वमेहि भगवन् सर्वविद्याश्रय प्रभो ॥ १६ ॥
पूजितः पुष्पधूपादिप्रीतो भव विभूतये । आयाहि सर्वलोकानां नाथ ब्रह्मन् समर्चनम् ॥ १७ ॥
गृहाण सर्वविघ्नान् मे निवर्तय नमोऽस्तु ते । आगच्छ वरदाव्यक्त विष्णो विश्वस्य नायक ॥ १८ ॥
पूजितः परया भक्त्या भव त्वं सुखदो मम । ततः सपरिवारां च पूजयेन्मन्त्रदेवताम् ॥ १९ ॥
मन्त्रेण विपरीतेन पुष्पधूपोपचारकैः । ततस्तु प्रार्थयेद्विद्वान् पूजितां मन्त्रदेवताम् ॥ २० ॥
आनुकूल्यमनालोच्य मया तरलबुद्धिना । यदुपात्तं विप्रभावमरिमन्त्रस्वरूपकम् ॥ २१ ॥
तेन मे मनसः क्षोभमशेषं विनिवर्तय । पापं प्रतिहतं मेऽस्तु भूयाच्छ्रेयः सनातनम् ॥ २२ ॥
तनोतु मम कल्याणं पावनी भक्तिरेव च । इति सम्प्रार्थ्य मन्त्रेण मन्त्रे यन्त्रे विलोमतः ॥ २३ ॥
विलिख्यामलकर्पूरचन्दनेन समर्चयेत् । कलशोपरि संस्थाप्य भक्त्या परमया युतः ॥ २४ ॥
तद्यन्त्रं देवि मतिमान् बद्ध्वा निजशिरस्यथ । स्नायात्पूजितकुम्भस्थैर्जलैर्मन्त्रमयैः शिवैः ॥ २५ ॥
पुनश्चान्येन तोयेन कुम्भमापूर्य संयतः । तन्मध्ये मन्त्रं यन्त्रं च निक्षिप्याथ प्रपूजयेत् ॥ २६ ॥
तत्कुम्भं निम्नगातीरे शुद्धे वान्यजलाशये । विसृजेदथ विप्रांश्च यथाशक्त्या प्रपूजयेत् ॥ २७ ॥
इत्थं कृतविधानस्य रिपुमन्त्रोद्भवा रुजः । विनश्यन्ति न सन्देहः क्रमाच्चित्तप्रसन्नता ॥ २८ ॥
जायतेऽतीवसंपन्ना वर्धते तत्कुलं क्रमात् । ....॥

इत्यरिमन्त्रपरित्यागविधिः ॥ अथ गुरोरभावे दीक्षाविधिस्तत्र श्रीरुद्रयामले--

गुरोरभावे विप्रेन्द्र मन्त्रग्रहणमुच्यते । कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसंनिधौ ॥ १ ॥
तालपत्रे मनुं लिख्य स्थापयेच्च तदग्रतः । सम्पूज्य दक्षिणामूर्तिमुपचारैः प्रयत्नतः ॥ २ ॥
पायसं विनिवेद्याथ प्रणमेद् दण्डवत् ततः । तालपत्रं समालोक्य पठेदष्टोत्तरं शतम् ॥ ३ ॥

एवं गृहीतो मन्त्रः स्याद्गुरोरपि विशिष्यते । गुरोः सम्भाविता दोषाः प्रायेण च कलौ युगे ॥ ४ ॥
एवं गृहीतमन्त्रः स्यात्सर्वसिद्धिप्रदो नृणाम् । ....॥

इति ॥ अथ मुद्रालक्षणम् । तन्त्रराजे—

कनिष्ठानामयोः पृष्ठे स्यादंगुष्ठस्तु तर्जनी । कुटिला ऋजुमध्यस्था मुद्रासावंकुशाभिधा ॥ १ ॥

इति । नारदपञ्चरात्रे—

दक्षांगुष्ठं परांगुष्ठे क्षिप्त्वा हस्तद्वयेन तु । सावकाशं त्वेकमुष्टिं कुर्यात्कुम्भाख्यमुद्रिका ॥ १ ॥

इति । प्रयोगसारे—

त्रिशूलाग्रौ करौ कृत्वा व्यत्यस्तावभितो नयेत् । अस्त्रमुद्रेयमाख्याता वह्निप्राकारलक्षणा ॥ १ ॥

इति । सारसंग्रहे—"ऋषिच्छन्दोदेवतानां न्यासे त्वंगुलयः स्मृताः । चतस्रोऽङ्गुष्ठरहिताः" इति । नारदपञ्चरात्रे—

मन्त्राभिमृष्टयोः पाण्योः षळवेऽङ्गानि विन्यसेत् । अंगुष्ठेनाचरेन्न्यासमन्यांगुलिसमाश्रयम् ॥ १ ॥
अंगुष्ठविषयं न्यासं तर्जनीशिरसैव हि । अंगुष्ठवर्जमंगुल्यश्चतस्रो हृदि विन्यसेत् ॥ २ ॥
शिखायां मुष्टिरेव स्यादंगुष्ठकृतनामिका । सर्वांगुलय आनाभेः पाण्योः कवचबन्धने ॥ ३ ॥
तर्जनीमध्यमानामाः प्रोक्ता नेत्रत्रये क्रमात् । अंगुष्ठतर्जन्यग्राभ्यां हस्तयोरभिशब्दयेत् ॥ ४ ॥

इति । चतस्रः प्रसारिताः । "प्रसारिततलेनैव पाणिना हृदयं शिरः" इति । दक्षिणामूर्तिसंहितायाम्—

कनिष्ठांगुष्ठरहितैस्त्रिभिस्तु हृदि विन्यसेत् । मध्यमानामिकाभ्यां तु न्यसेच्छिरसि मन्त्रवित् ॥ १ ॥
शिखांगुष्ठेन विन्यस्य दशभिः कवचं न्यसेत् । हृद्गतैर्नेत्रविन्यासं विन्यसेत्परमेश्वरि ॥ २ ॥
तर्जनीमध्यमाभ्यां तु ततोऽस्त्रं विन्यसेत्प्रिये । मुष्टिं कृत्वोच्चलेन्मन्त्री तर्जनी दण्डवत्तदा ॥ ३ ॥
सौभाग्यदण्डिनी नाम रिपून् दण्डयतीक्षणात् । अंगुष्ठे मुष्टिकं कुर्याद्रिपुजिह्वाग्रहा भवेत् ॥ ४ ॥

इति । ज्ञानार्णवे—"त्रिद्व्येकदशत्रिद्विमितांगुलिभिरीरिताः" । इति । अस्यार्थः—कनिष्ठांगुष्ठरहितांगुलित्रयेण हृदयमुद्रा । मध्यमानामाभ्यां शिरोमुद्रा । अंगुष्ठेन शिखामुद्रा । दशांगुलिभिः कवचमुद्रा । हृदयस्थाभिर्नेत्रमुद्रा । तर्जनीमध्यमाभ्यां तालत्रयेणास्त्रमुद्रा । आनाभेः स्कन्धान्ताधोभूताभ्यां पाणिभ्यां वर्म । "वर्म स्कन्धादिनाभिग"मिति तन्त्रराजवचनात् । शैवमन्त्राणां तु शैवागमे षडङ्गमुद्राविशेष उक्तः—

कृतमुष्टिपुटौ हस्तौ कृत्वांगुष्ठौ हृदि न्यसेत् । हृन्मुद्रेयं समाख्याता शिरोमुद्रा प्रकीर्त्यते ॥ १ ॥
ललाटाग्रे समाधाय कृतमुष्टिपुटौ करौ । कुर्यादूर्ध्वप्रसक्ताग्रे तर्जन्यौ ज्येष्ठबाह्यतः ॥ २ ॥
करौ शिखायां संयोज्य कृतमुष्टिपुटाकृती । ज्येष्ठादधः प्रसक्ताग्रौ कारयेदूर्ध्वतस्तथा ॥ ३ ॥
कुर्यात्सेयं तथा मुद्रा सर्वोपद्रवनाशिनी । कृत्वांगुष्ठौ प्रसक्ताग्रौ तर्जन्यौ च त्रिकोणवत् ॥ ४ ॥
मूर्ध्नि पश्चान्मुखं कृत्वा न्येदुभयपार्श्वतः । करं हृदयमुद्रेयं कवचस्याभयप्रदा ॥ ५ ॥
कृत्वा नेत्रोन्मुखं हस्तं सक्तांगुष्ठकनिष्ठकम् । प्रसार्य मध्यमाः किञ्चिन्नमयेदितरांगुलीः ॥ ६ ॥
नेत्रमुद्रेयमुद्दिष्टा रक्षोभूतार्तिभञ्जनी । परस्परतलद्वन्द्वं पुनरास्फोटयेद् भृशम् ॥ ७ ॥
तर्जन्या शब्दयेत् ताभ्यां ज्येष्ठाग्रवलिताग्रया । ....॥

इति । ताभ्यां कराभ्यां ॥ मन्त्रतन्त्रप्रकाशे—

कनिष्ठांगुष्ठकौ भुग्नौ करयोरितरेतरम् । तर्जनीमध्यमानामाः संहता भुग्नवर्जिताः ॥ १ ॥
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता ।.... ....॥

संहताः परस्परसंयुक्ताः । भुग्नवर्जिताः अकुटिलाः । लक्षणसंग्रहे—

वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना । कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसारयेत् ॥ १ ॥
वामांगुल्यस्तथा श्लिष्टाः संयुक्ताः सम्प्रसारिताः । दक्षिणांगुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका ॥ २ ॥
अधोमुखं वामहस्तं तादृशं दक्षहस्तकम् । विन्यस्यांगुष्ठयुग्मं तु पार्श्वयोः सम्प्रसार्य च ॥ ३ ॥
दर्शयेदर्घ्यपात्रे तु मत्स्यमुद्रेयमीरिता ।···· ···· ···· ···· ···· ····॥

इति । पद्मवाहिन्यां--"अञ्जल्यनामातर्जन्यकनिष्ठाग्राख्ययोगतः । मुद्रेयं त्रिशिखा प्रोक्ता" ॥
इति । अथावाहनादिमुद्राः लक्षणसंग्रहे--

हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्वणोः । अंगुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता ॥ १ ॥
अधोमुखी त्वियं चेत्स्यात् स्थापनीति निगद्यते । उच्छ्रितांगुष्ठमुष्ट्योश्च संयोगात् संनिधापनी ॥ २ ॥
अन्तःप्रवेशितांगुष्ठा सैव संरोधनी मता । उत्तानमुष्टियुगला सम्मुखीकरणी भवेत् ॥ ३ ॥
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः । सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी ॥ ४ ॥
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता । अन्योन्याभिमुखा श्लिष्टा कनिष्ठानामिका पुनः ॥ ५ ॥
तथैव तर्जनी मध्या धेनुमुद्रा प्रकीर्तिता । अमृतीकरणं कुर्यात्तया साधकसत्तमः ॥ ६ ॥
अन्योन्यग्रथितांगुष्ठा प्रसारितपरांगुली । महामुद्रेयमुदिता परमीकरणे प्रिये ॥ ७ ॥
प्रयोजयेदिमा मुद्रा देवताह्वानकर्मणि । अङ्गन्यासस्य मुद्राणां लक्षणं प्राक् समीरितम् ॥ ८ ॥

इति ॥ तन्त्रराजे--(४ प० ३३. ४१)

कृताञ्जली करौ कृत्वा व्यत्यस्येत् तदनामिके । तन्नखे तर्जनीग्रस्ते त्रिखण्डा ललितावहा ॥ १ ॥
कनिष्ठानामिकामध्या नखैरन्योन्यसङ्गताः । कृत्वांगुष्ठौ कनिष्ठास्थौ ऋजू कुर्याच्च तर्जनी ॥ २ ॥
सर्वसंक्षोभणी मुद्रा त्रैलोक्यक्षोभकारिणी । एतस्या मध्यमे देवि तर्जनीवक्रते सति ॥ ३ ॥
सर्वविद्राविणी मुद्रा सर्वासामपि योषिताम् । ताभ्यामंकुशरूपाभ्यां संश्लिष्टाकर्षिणी मता ॥ ४ ॥
परिवृत्तांगुली कृत्वा नखाश्लिष्टतलौ करौ । अंगुष्ठौ तर्जनीश्लिष्टौ नखैरावेशकारिणी ॥ ५ ॥
कराग्रे प्रसृते कृत्वा व्यत्यस्येत् तत्कनिष्ठिके । तदग्राश्लेषतो भुग्ने मध्यमेऽनामिके ऋजू ॥ ६ ॥
तन्नखस्थे तु तर्जन्यावंगुष्ठौ मध्यमोपरि । इयमुन्मादिनी मुद्रा सर्वोन्मादनकारिणी ॥ ७ ॥
अस्यास्त्वनामिके भुग्ने तर्जन्यावंकुशाकृती । एषा महांकुशामुद्रा स्तम्भनाकर्षकारिणी ॥ ८ ॥
सव्यदक्षकरौ सम्यग् व्यत्यस्येत् कूर्परोपरि । मणिबन्धे च बध्नीयादञ्जलिं मध्यपृष्ठयोः ॥ ९ ॥
विधाय भुग्ने तर्जन्यावंगुष्ठौ कारयेदधः । कनिष्ठानामिके कुर्याद् व्यत्यस्ते करपृष्ठगे ॥ १० ॥
इयं सा खेचरीमुद्रा ललिताप्रीतिकारिणी । अस्या विरचनेनैव सर्वाः सिध्यन्ति देवता ॥ ११ ॥

इति ॥ अस्यामुक्तमुद्रायामीषद्भेदउक्तो वामकेश्वरतन्त्रे--

सव्यं दक्षिणदेशे तु दक्षिणं सव्यदेशके । बाहुं कृत्वा महादेवि हस्तौ सम्परिवर्त्य च । १ ॥
कनिष्ठानामिके देवि युक्तानेन क्रमेण तु । तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्यमे ॥ २ ॥
अंगुष्ठौ तु महेशानि कारयेत्सरलावपि । इयं सा खेचरी नाम्ना मुद्रा सर्वोत्तमा प्रिये ॥ ३ ॥
रचितैव महेशानि सर्वतेजोपहारिणी । बद्धयैवैतया देवि दृश्यते साधकोत्तमः ॥ ४ ॥
योगिनीसर्ववृन्दैस्तु ज्वलत्पावकसन्निभः । डाकिनीराकिणीवृन्दैर्लाकिनीकाकिनीगणैः ॥ ५ ॥
साकिनीहाकिनीवृन्दैर्दृश्यते परमेश्वरि । एतया ज्ञातया देवि योगिनीनां प्रियो भवेत् ॥ ६ ॥
अतः समयमुद्रेयं सर्वासां परिकीर्तिता । प्रयतोऽप्रयतो वापि शुचौ देशेऽथवाऽशुचौ ॥ ७ ॥
उत्थितश्चोपविष्टश्च चङ्क्रमन् निश्चलोऽपि वा । उच्छिष्टो वा शुचिर्भूत्वा भुञ्जानो मैथुने रतः ॥ ८ ॥
मुद्रया मध्यमांगुल्यौ परिवर्त्य क्रमो मनुः । पार्थिवस्थानके युक्तः सद्यः खेचरतां लभेत् ॥ ९ ॥

इति ॥ तन्त्रराजे—(४ प० ५१ श्लो०)

मध्यमा मध्यपार्श्वाधः कनिष्ठाग्रे विपर्ययात् । अनामिकेऽधो व्यत्यस्ते तर्जन्यावंकुशाकृती ॥ १ ॥
इतरे तन्नखाग्राग्रे बीजमुद्रेयमीरिता । कनिष्ठांगुष्ठसंश्लेषान्महायोनिस्त्रिखण्डिका ॥ २ ॥
कनिष्ठानामिकामध्या व्यत्यस्ताः पृष्ठतः क्रमात् । वलितावूर्ध्वयोगेन ऋतुतर्जनिकौ करौ ॥ ३ ॥
शक्त्युत्थापनमुद्रैषा जपपूजासमाधिषु । मूर्तीकरणमेतस्या रचनेन समीरितम् ॥ ४ ॥
बाणकोदण्मुद्रा स्यादृज्वंगुष्ठेन मुष्टिना । (४-३८) पाशमुद्रा तु तेनैव तर्जन्यंगुष्ठयोगतः ॥ ५ ॥
कनिष्ठानामयोः पृष्ठे स्यादंगुष्ठस्तु तर्जनी । कुटिला ऋजुमध्यस्था मुद्रासावंकुशाभिधा ॥ ६ ॥
खेचर्या वक्ष्यमाणाया मध्यमे करपृष्ठगे । तर्जन्यौ ऋजुसंश्लिष्टे मुद्रैषोक्ता नमस्कृतौ ॥ ७ ॥

इति ॥ अथ गणेशमुद्रा लक्षणसंग्रहे—

ततो गणेशमुद्राणामुच्यन्ते लक्षणान्यथ । उत्तानोर्ध्वमुखी मध्या सरला बद्धमुष्टिका ॥ १ ॥
दन्तमुद्रा समाख्याता सर्वागमविशारदैः । वाममुष्टेस्तु तर्जन्या दक्षमुष्टेस्तु तर्जनीम् ॥ २ ॥
संयोज्यांगुष्ठकाग्राभ्यां तर्जन्यग्रे स्वके क्षिपेत् । एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्तिता ॥ ३ ॥
ऋज्वीं च मध्यमां कृत्वा तर्जनीं मध्यपर्वणि । संयोज्याकुञ्चयेत् किञ्चिन्मुद्रैषांकुशसंज्ञिका ॥ ४ ॥
तर्जनीमध्यमासन्धिनिर्गतांगुष्ठमुष्टिका । अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ॥ ५ ॥
तले तलं तु करयोस्तिर्यक् संयोज्य चांगुलीः । संहताः प्रसृताः कुर्यान्मुद्रा परशुसंज्ञिता ॥ ६ ॥
ऊर्ध्वास्यं दक्षिणं हस्तमानम्रविरलांगुलिम् । किञ्चिन्निम्नतलं कुर्यान्मुद्रैषा लड्डुकाभिधा ॥ ७ ॥
उत्तानवाममुष्टिस्तु बीजपूराह्वया मता । दन्तपाशांकुशविघ्नपरशुलड्डुकाह्वयाः ॥ ८ ॥
बीजपूराह्वया चेति गणेशस्य प्रिया मताः ।, शाक्तेयानां च मुद्राणां कथ्यन्ते लक्षणानि तु ॥ ९ ॥
पाशांकुशवराभीतिखड्गचर्मधनुःशराः । मौसली मुद्रिका दौर्गी मुद्राः शक्तिप्रिया मताः ॥ १० ॥
लक्ष्मीमुद्रार्चने लक्ष्म्या वाग्वादिन्यास्तु पूजने । अक्षमाला तथा व्याख्या वीणा पुस्तकमुद्रिका ॥ ११ ॥
मातङ्गिन्यास्तु वीणाख्या मुद्रा चातिप्रिया भवेत् । योनिमुद्रा तु सर्वासां शक्तीनां प्रीतिदा मता ॥१२॥
पाशांकुशाख्ये प्रोक्ते च कथ्यन्ते ता यथाक्रमम् । उत्तानं दक्षिणं हस्तं कृत्वाधो नमयेच्छनैः ॥ १३ ॥
संहतांगुलिका तु मुद्रा वराख्या परिकीर्तिता । पराङ्मुखं वामहस्तमुच्छ्रितांगुलिकं भवेत् ॥ १४ ॥
अभयस्य तु मुद्रैषा कथिताभयदायिनी । कनिष्ठानामिके बद्ध्वा स्वांगुष्ठेनैव दक्षतः ॥ १५ ॥
शिष्टांगुली तु प्रसृते संसृष्टे खड्गमुद्रिका । वामहस्तं तथा तिर्यक् कृत्वा चैव प्रसार्य च ॥ १६ ॥
आकुञ्चितांगुलिं कुर्याच्चर्ममुद्रेयमीरिता । दक्षमुष्टेस्तु तर्जन्या दीर्घया बाणमुद्रिका ॥ १७ ॥
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम् । कुर्यान्मुसलमुद्रेयं सर्वविघ्नविनाशिनी ॥ १८ ॥
मुष्टिं कृत्वा कराभ्यां च वामस्योपरि दक्षिणम् । कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता ॥ १९ ॥
दक्षिणांगुष्ठतर्जन्यौ वक्त्रलग्ने करांगुलीः । प्रसार्य दर्शयेदेषा मुद्रा स्यादक्षमालिका ॥ २० ॥
एषैव संहतोत्ताना व्याख्यामुद्रा समीरिता । वीणावादनवद्धस्तौ कृत्वा संचालयेत् ततः ॥ २१ ॥
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी । वाममुष्टिं स्वाभिमुखे कुर्यात् पुस्तकमुद्रिका ॥ २२ ॥

इति ॥ अथ गायत्र्या द्वात्रिंशन्मुद्रास्तत्रैव—

सुमुखं संपुटं चैव विततं विस्तृतं तथा । द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा ॥ १ ॥
षण्मुखोऽधोमुखं चैव व्यापकाञ्जलिकं तथा । शकटं यमपाशं च ग्रथितं संमुखोन्मुखम् ॥ २ ॥
विलम्बं मुष्टिकं चैव मत्स्यः कूर्मवराहकौ । सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ॥ ३ ॥
एता मुद्राश्चतुर्विंशद् गायत्र्याः सुप्रतिष्ठिताः । वृथा मन्त्रजपश्चैव स्नानं भोजनमेव च ॥ ४ ॥

तथा वै तीर्थयात्रा च मुद्राहीने वृथा हि सा । यज्ञश्च निष्फलस्तेषां होमो देवार्चनं तथा ॥ ५ ॥
तस्मान्मुद्रा महाज्ञेया विद्वद्भिर्यत्नमास्थितैः । आकुञ्चितांगुलिकरौ संमुखो सुमुखं भवेत् ॥ ६ ॥
कोशाकारौ तु सांगुष्ठौ तत् सम्पुटमुदाहृतम् । विरलांगुलिकौ तौ तु विततं परिकीर्तितम् ॥ ७ ॥
विस्तीर्ण विस्तृतौ हस्तावन्योन्याञ्जलिसंयुतौ । कनिष्ठेऽनामिके युक्ते चेति तद् द्विमुखं भवेत् ॥ ८ ॥
तदेव मध्यमायुक्तं त्रिमुखं परिकीर्तितम् । तदेव तर्जनीयुक्तं चतुर्मुखमुदीरितम् ॥ ९ ॥
तदेव स्यात् पञ्चमुखं मिलितांगुष्ठकं यदि । तदेव षण्मुखं प्रोक्तं तथा व्यस्तकनिष्ठिकम् ॥ १० ॥
अधोमुखयुतौ हस्तावधोमुखमुदीरितम् । व्यापकाञ्जलिका सा स्याद् व्यस्तांगुलिकरौ युतौ ॥ ११ ॥
अंगुष्ठकद्वययुतं मुष्टिद्वयमधोमुखम् । भवेद्यदि तदा प्रोक्तं शकटं मुनिसत्तमैः ॥ १२ ॥
मुष्टिं कृत्वा करौ योज्य तर्जनीं च प्रसार्य च । आकुञ्च्याग्रौ तु संयोज्य यमपाशं विदुर्बुधाः ॥ १३ ॥
अन्योन्यान्तरसाश्लिष्टदशांगुलिकरावुभौ । अन्योन्यमपि बध्नीयाद् ग्रथितं परिकीर्तितम् ॥ १४ ॥
चुलुकाग्रौ करौ कृत्वा चोर्ध्वं वामकरे सुधीः । अधोमुखेन दक्षेण योजयेत्सम्मुखोन्मुखम् ॥ १५ ॥
अधःकोशाकृतिकरौ विलम्बं विदुषो विदुः । युतं मुष्टिद्वयं चैव सम्यग् मुष्टिकमीरितम् ॥ १६ ॥
अन्योन्यानामिकामध्यामन्योन्येन च संस्पृशेत् । कनिष्ठिकायुगेनैव मत्स्यमुद्रा समीरिता ॥ १७ ॥
अधोमुखे करे वामे तादृशो दक्षिणः करः । पृष्ठदेशसमाक्रान्तः कूर्ममुद्रा समीरिता ॥ १८ ॥
मुष्टिं कृत्वा वामहस्तं मध्यमां तां प्रसार्य्य च । निवेशयेद् वामकक्षे वराहस्य समीरिता ॥ १९ ॥
प्रसारितांगुलिकरौ समीपं कर्णयोर्नयेत् । सिंहाक्रान्तं समुद्दिष्टं गायत्रीजपतत्परैः ॥ २० ॥
दर्शयेच्छ्रोत्रयोर्हस्तौ संयुक्तांगुलिपञ्चकौ । महाक्रान्तं भवेन्मुद्रा गायत्रीहृदयङ्गता ॥ २१ ॥
तर्जनीं दक्षहस्तस्य वामे करतले न्यसेत् । बध्नीयाद्वामहस्तेन मुद्गरं समुदीरितम् ॥ २२ ॥
दक्षिणेन करेणैव चालितांगुलिना शिरः । बदनाभिमुखेनैव पल्लवं मुनिभिः स्मृतम् ॥ २३ ॥
सुरभिर्ज्ञानसिंहौ च योनिः कूर्मोऽथ पङ्कजम् । लिङ्गं निर्याणमुद्रेति जपान्तेऽष्टौ प्रदर्शयेत् ॥ २४ ॥

निर्याणं प्रयाणं तेन प्रयाणकाले दर्शनीया संहारमुद्रा लक्ष्यते । अन्याः सप्त मुद्राः प्रसिद्धाः ।

मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके । अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ॥ २५ ॥
अंगुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता । ....॥

इति ॥ अथ वैष्णवमुद्रास्तत्रैव—

एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः । शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥ १ ॥
वनमाला तथा ज्ञानमुद्रा बिल्वाह्वया तथा । गरुडाख्या परा मुद्रा विष्णोः संतोषवर्धिनी ॥ २ ॥
नारसिंही च वाराही हायग्रीवी धनुस्तथा । बाणमुद्रा च परशुर्जगन्मोहनिका परा ॥ ३ ॥
काममुद्रा समाख्याता तासां लक्षणमुच्यते । वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना ॥ ४ ॥
कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसारयेत् । वामांगुल्यस्तथा शिष्टाः संयुक्ताः सम्प्रसारिताः ॥ ५ ॥
दक्षिणांगुष्ठसंस्पृष्टा मुद्रैषा शङ्खसंज्ञिता । विपर्यस्ते तले कृत्वा वामदक्षिणहस्तयोः ॥ ६ ॥
अंगुष्ठौ ग्रथयेच्चैव कनिष्ठानामिकान्तरे । चक्रमुद्रेयमुद्दिष्टा सर्वसिद्धिकरी शुभा ॥ ७ ॥
हस्तौ तु सम्मुखौ कृत्वा संलग्नौ सम्प्रसारितौ । अंगुल्यौ मध्यमे भूयः संलग्ने सम्प्रसारिते ॥ ८ ॥
गदामुद्रेयमाख्याता विष्णोः सन्तोषकारिणी । हस्तौ तु सम्मुखौ कृत्वा संनतप्रोन्नतांगुली ॥ ९ ॥
तलान्तर्मिलितांगुष्ठौ मुद्रैषा पद्मसंज्ञिका । ओष्ठे वामकरांगुष्ठो लग्नस्तस्य कनिष्ठिका ॥ १० ॥
दक्षिणांगुष्ठसंलग्ना तत्कनिष्ठा प्रसारिता । तर्जनीमध्यमानामाः किञ्चित्संकोच्य चालिताः ॥ ११ ॥
वेणुमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः । अन्योन्यपृष्ठकरयोर्मध्यमानामिकांगुली ॥ १२ ॥

अंगुष्ठेन तु बध्नीयात् कनिष्ठामूलसंश्रिते । तर्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिता ॥ १३ ॥
अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका । कनिष्ठयान्यया बद्धा तर्जन्या दक्षया तथा ॥ १४ ॥
वामानामां च बध्नीयाद्दक्षिणांगुष्टमूलके । अंगुष्ठमध्यमे वामे संयोज्य सरलाः पराः ॥ १५ ॥
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका । स्पृशेत् कण्ठादिपादान्तं तर्जन्यांगुष्ठनिष्ठया ॥ १६ ॥
करद्वयेन मालावन्मुद्रेयं वनमालिका । उन्नतं वाममंगुष्टं दक्षांगुष्ठेन वेष्टयेत् ॥ १७ ॥
दक्षिणांगुष्ठकं चैव तदीयाभिर्निपीड्य च । अंगुलीभिर्वामहस्तांगुलिभिस्ताश्च पीडयेत् ॥ १८ ॥
गाढं हृदि क्षिपेदेषा बिल्वाख्या मुद्रिका परा । हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके ॥ १९ ॥
मिथस्तर्जनिके श्लिष्टे श्लिष्टावंगुष्ठकौ तथा । मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत् ॥ २० ॥
एषा गरुडमुद्रा स्याद्विष्णोः प्रीतिविवर्धिनी । तर्जन्यंगुष्ठकौ सक्तावग्रतो हृदि विन्यसेत् ॥ २१ ॥
वामहस्ताम्बुजं चैव वामजानुनि विन्यसेत् । ज्ञानमुद्रा भवेदेषा रामचन्द्रप्रियङ्करी ॥ २२ ॥
जानुमध्ये करौ कृत्वा चिबुकोष्ठौ समावुभौ । हस्तौ तु भूमिसंलग्नौ कम्पमानः पुनः पुनः ॥ २३ ॥
मुखं च विततं कुर्याल्लेलिहानां च जिह्विकाम् । नारसिंही भवेन्मुद्रा ह्येषा तत्प्रीतिवर्धिनी ॥ २४ ॥
दक्षोपरि करं वामं कृत्वोत्तानमधः सुधीः । नामयेदिति सम्प्रोक्ता मुद्रा वाराहसंज्ञिता ॥ २५ ॥
वामहस्ततले कृत्वा दक्षांगुलीरधोमुखीः । संरोप्य मध्यमां तासामुन्नम्याधो विकुञ्चयेत् ॥ २६ ॥
हयग्रीवप्रिया मुद्रा तन्मूर्तेरनुकारिणी । ....॥

धनुर्बाणमुद्रे प्रागेवोक्ते । परशुमुद्रापि प्रागुक्ता ।

मूर्ध्नि सांगुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी । हस्तौ तु सम्पुटौ कृत्वा प्रसृतांगुलिकौ तथा ॥ २७ ॥
तर्जन्यौ मध्यमापृष्ठे अंगुष्ठौ मध्यमास्थितौ । काममुद्रेयमुदिता सर्वदेवप्रियङ्करी ॥ २८ ॥

इति ॥ अथ सौरमुद्रे नारायणीये—

पद्माकारौ करौ कृत्वा प्रतिश्लष्टे तु मध्यमे । अंगुल्यौ धारयेत्तस्मिन् बिम्बमुद्रेति सोच्यते ॥ १ ॥
दर्शयेदग्रतः पद्मबिम्बमुद्रे यथोदिते । ....॥

इति ॥ अथ शैवमुद्रास्तत्र शिवरहस्ये—

शैवीनामथ मुद्राणां दशानां षण्मुख शृणु । महादेवप्रियाणां ते कथ्यन्ते लक्षणानि वै ॥ १ ॥
उच्छ्रितं दक्षिणांगुष्टं वामांगुष्ठेन बन्धयेत् । वामांगुलीर्दक्षिणाभिरंगुलीभिश्च वेष्टयेत् ॥ २ ॥
लिङ्गमुद्रा समाख्याता शिवसांनिध्यकारिणी । मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके ॥ ३ ॥
अनामिकाद्वयाश्लिष्टदीर्घमध्यमयोरधः । अंगुष्ठाग्रद्वयं न्यस्येद् योनिमुद्रेयमीरिता ॥ ४ ॥
अंगुष्ठेन कनिष्ठाग्रं बद्ध्वा शिष्टांगुलित्रयम् । प्रसारयेत् त्रिशूलाख्या मुद्रैषा परिकीर्तिता ॥ ५ ॥
अंगुष्ठतर्जन्यग्रं तु ग्रथयित्वांगुलित्रयम् । प्रसारयेद् अक्षमालामुद्रेयं गुह कीर्तिता ॥ ६ ॥
अधःकृतो दक्षहस्तः प्रसृतो वरमुद्रिका । ऊर्ध्वीकृतो वामहस्तः प्रसृतोऽभयमुद्रिका ॥ ७ ॥
मिलित्वानामिकांगुष्ठमध्यमाग्राणि योजयेत् । शेषांगुल्यावुच्छ्रिताग्रे मृगमुद्रेयमीरिता ॥ ८ ॥
पञ्चांगुल्यो दक्षिणास्तु मिलितास्तूर्ध्वमुच्छ्रिताः । खट्वाङ्गमुद्रा षड्वक्त्र शिवस्यातिप्रिया मता ॥ ९ ॥
पात्रवद्वामहस्तं च कृत्वाङ्के वामके तथा । निधायोच्छ्रितवत् कुर्यान्मुद्रा कापालिनी मता ॥ १० ॥
मुष्टिं च शिथिलां बद्ध्वा ईषदुच्छ्रितमध्यमाम् । दक्षिणां तूर्ध्वमुन्नम्य कर्णदेशे प्रचालयेत् ॥ ११ ॥
एषा मुद्रा डमरुका सर्वविघ्नविनाशिनी । लिङ्गयोनित्रिशूलाक्षमालेष्टाभीमृगात्मिकाः ॥ १२ ॥
खट्वाङ्गा च कपालाख्या डमरुः शिवतोषदाः । ....॥

इति ॥ लक्षणसंग्रहे—

आसने पद्ममुद्रा स्याद् हस्तद्वयमधोमुखम् । मुद्रैषा कुशलप्रश्ने तदेवोर्ध्वमुखं पुनः ॥ १ ॥
मुद्रा स्यात्स्वागते पाद्यमुद्रा चाञ्जलिरुच्यते । अनामांगुष्ठसंयोगात्प्रोक्ता चार्घ्यस्य मुद्रिका ॥ २ ॥
उत्तानं दक्षहस्तं तु कृत्वा निम्नतलं सुधीः । कनिष्ठिहीना संयुक्ताश्चतस्रोऽगुलिकास्तथा ॥ ३ ॥
मुद्रैषाचमनी प्रोक्ताऽधोमुखी सा त्वनामया । स्पष्टांगुष्ठा भवेन्मुद्रा मधुपर्के वरानने ॥ ४ ॥
अधोमुखी दक्षहस्तकृता मुष्टिः कनिष्ठया । वियुक्ता स्नानमुद्रैषा गदिता परमेश्वरि ॥ ५ ॥
उत्तानं दक्षिणं हस्तं कृत्वा तन्मध्यमां पुनः । अंगुष्ठेन स्पृशेदेषा मुद्रा वस्त्रस्य कीर्तिता ॥ ६ ॥
एषैवानामिकास्पर्शान्मुद्रा भूषणसंज्ञिता । कनिष्ठास्पर्शतो ह्येषा उपवीतस्य मुद्रिका ॥ ७ ॥
ज्येष्ठाग्रेण कनिष्ठाग्रं स्पृशेद् गन्धस्य मुद्रिका । अधोमुखं करं कृत्वा तर्जन्यग्रे तु योजयेत् ॥ ८ ॥
अंगुष्ठाग्रं तु मुद्रेयं पुष्पाख्या परमेश्वरि । अंगुष्ठाग्रेण तर्जन्याः स्पृशेदग्रं महेश्वरि ॥ ९ ॥
धूपमुद्रेयमाख्याता सर्वदेवप्रियङ्करी । ज्येष्ठाग्रेण स्पृशेदग्रं मध्यमायाः सुरार्चिते ॥ १० ॥
दीपमुद्रेयमुदिता सर्वदेवप्रिया शिवे । अनामाग्रं स्पृशेद् देवि ज्येष्ठाग्रेण तु देशिकाः ॥ ११ ॥
नैवेद्यमुद्रा कथिता देवानां तृप्तिदायिनी । ....॥

इति ॥ नारदपञ्चरात्रे—

ग्रासमुद्रां सव्यहस्ते प्रफुल्लकमलाकृतिम् । दर्शयेत्पञ्चवायूनामन्यहस्तेन दर्शयेत् ॥ १ ॥
कनिष्ठानामिके सम्यगंगुष्ठाग्रेण योजयेत् । प्राणमुद्रा समाख्याता प्रथमं दर्शयेदिमाम् ॥ २ ॥
योजयेत् तर्जनीमध्यामपानस्याथ मुद्रिका । मध्यमानामिके तद्वद्व्यानमुद्रा प्रकीर्तिता ॥ ३ ॥
तर्जनीमध्यमानामा तद्वन्मुद्रा तुरीयका । सर्वाभिरंगुलीभिश्च पञ्चमी मुद्रिका मता ॥ ४ ॥
स्वकीयैर्मनुभिर्युक्ता पञ्च मुद्राः प्रकीर्तिताः । प्राणसंज्ञस्तथापानो व्यानोदानमनुस्तथा ॥ ५ ॥
समानो ङेयुताः सर्वे प्रणवाद्या द्विठान्तकाः । पञ्च मुद्रा भवन्तीह क्रमेणैव समीरिताः ॥ ६ ॥

इति लक्षणसंग्रहे—

मणिबन्धस्थितौ कृत्वा प्रसृतांगुलिकौ करौ । कनिष्ठांगुष्ठयुगलं मिलित्वान्तः प्रसारयेत् ॥ १ ॥
सप्तजिह्वाख्यमुद्रेयं प्रिया वैश्वानरस्य हि ।.... ....

इति । कुलार्णवे—"सर्वाभिरंगुलीभिश्च दद्याद्भूतबलिं प्रिये ।" इति पद्मवाहिन्याम्—

वृद्धाभ्यामंगुलीर्बद्धा तर्जन्यौ दण्डवत् सृजेत् । अग्रं वामं ततः पृष्ठे दक्षमाकर्षयेच्छनैः ॥ १ ॥
नाराचमुद्रा संप्रोक्ता योज्या बलिविसर्जने ।.... ....॥

इति । लक्षणसंग्रहे—

अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम् । क्षिप्त्वांगुलीरंगुलीभिः संयोज्य परिवर्तयेत् ॥ १ ॥
एषा संहारमुद्रा स्याद्विसर्जनविधौ मता । ऊर्ध्वास्यवामतर्जन्या मध्ये वक्रां परां न्यसेत् ॥ २ ॥
तिर्यङ्मध्ये भवेदेषा सृणिमुद्रारिमर्दिनी । अंगुष्ठावुन्नतौ मुष्ट्योः कृत्वा संलग्नयोर्द्वयोः ॥ ३ ॥
तावेवाभिमुखे कुर्यान्मुद्रैषा कालकर्णिका । दक्षिणा निबिडा मुष्टिर्नासिकार्पिततर्जनी ॥ ४ ॥
मुद्रा विस्मयसंज्ञा स्याद्विस्मयावेशकारिणी । मुष्टिरूर्ध्वीकृतांगुष्ठा दक्षिणा नादमुद्रिका ॥ ५ ॥
तर्जन्यंगुष्ठसंयोगादग्रतो विन्दुमुद्रिका ।.... ....॥

इति ॥ अथ कालविहितासनानि गोरक्षसंहितायाम्—

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे । ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते ॥ १ ॥
गुल्फौ च वृषणास्याधः सीवन्याः पार्श्वयोः क्षिपेत् । पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलः ॥२॥
सिद्धासनं भवेदेतत् सर्वव्याधिविषापहम् । एकपादमथैकस्मिन् विन्यस्योपरि संस्थितम् ॥ ३ ॥

इतरस्मिंस्तथा चोरौ वीरासनमुदाहृतम् । वामपादमुपादाय दक्षिणोरौ प्रविन्यसेत् ॥ ४ ॥
तथैव दक्षिणं पादं सव्योरौ परिविन्यसेत् । पद्मासनं भवेदेतत् सर्वेषामपि पूजितम् ॥ ५ ॥
स्वस्तिकं पद्मकं वीरं सिद्धं चेति चतुष्टयम् । जपे प्रशस्तमन्येषां प्रसङ्गादेव कीर्तितम् ॥ ६ ॥

इति ॥ गौतमे तन्त्रे——

प्राङ्मुखोदङ्मुखो वापि स्वस्तिकासनमास्थितः । रात्रावुदङ्मुखः कुर्याद्देवकार्यं सदैव हि ॥ १ ॥
शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः ।.... ....॥

इति । दक्षिणामूर्तिपरमिदम् । उदङ्मुखः प्राङ्मुखो वा भूत्वा प्रयतमानसः । स्वस्तिकासनमासीनः पद्मासनमथापि वा ॥" इति स्वयमेवोभयविधानादिति ॥ अथ (षट्शाम्भवपूजायाः श्रीचक्रे आवरणत्वेनावश्यकत्वात्) षट्शाम्भवरश्मिपूजाक्रमः, लक्ष्मीकुलार्णवे——

प्रातरुत्थाय शान्तात्मा सहस्रारवराटके । षट् प्रेतान ब्रह्मविष्ण्वादीन् हेमगर्भानिमान् स्मरेत् ॥ १ ॥
पद्मस्य कर्णिकामध्ये द्वादशान्ते गुरूक्तितः । पदत्रयमनुस्मृत्य गुरुस्मृतिपुरःसरम् ॥ २ ॥
शुक्लं रक्तं च मिश्रं च प्रेतोपरि रहस्यवित् । चरणद्वयसंभूतौ स्वेच्छाविग्रहधारिणौ ॥ ३ ॥
प्रातःप्रभृति सायान्तं सायादि प्रातरन्ततः । यत् करोमि जगन्नाथ तदस्तु तव पूजनम् ॥ ५ ॥
इति सम्प्रार्थनापूर्वं प्रणम्य गुरुपादुकाम् । बहिर्निर्गत्य शुद्धात्मा पुण्यदेशं तु दूरतः ॥ ६ ॥
कृत्वावश्यकमास्थाय शौचाचमनपूर्वकम् । गण्डूषं दन्तकाष्ठं च कृत्वा वाचम्य वाग्यतः ॥ ७ ॥

क्लींकामदेवाय सर्वजनप्रियाय नमः इति । चतुर्वारं मुखक्षालनम् ।

स्नात्वा सन्ध्यामुपासीत यथाविधि विचक्षणः । स्नानप्रकारं द्विविधं बाह्याभ्यन्तरभेदतः ॥ ८ ॥
आन्तरं स्नानमत्यन्तं रहस्यमपि पार्वति । कथयामि भवध्वस्त्यै चतुर्वर्गाप्तयेऽपि च ॥ ९ ॥

इति । अथाभ्यन्तरस्नानम्——

सरित्त्रयमुपस्मृत्य चरणत्रयमध्यतः । स्रवन्तं सच्चिदानन्दप्रभावं भावगोचरम् ॥ १० ॥
विमुक्तिसाधनं पुंसां स्मरणादेव योगिनाम् । तेनाप्लावितमात्मानं भावयेद् भवशान्तये ॥ ११ ॥

तत्रैव——

इडा गङ्गेति विख्याता पिङ्गला यमुनानदी । मध्ये सरस्वती ज्ञेया प्रयाग इति संस्मृतः ॥ १२ ॥
बाह्यं पञ्चविधं स्नानं पञ्चभूतात्मकं यतः । मन्त्रस्नाने कृते तस्मात् सर्वस्नानकृतो भवेत् ॥ १३ ॥
पञ्चभूतात्मबीजानि लवरयहेतीरिताः । सबिन्दुकास्तैः संमन्त्र्य दक्षहस्ते स्थिते जले ॥ १४ ॥
वामांगुलिच्छदायोगात् प्रोक्षयेच्छिरसि त्रिधा । वामनासिकयाऽऽपूर्य शिष्टं ज्योतिर्मयं जलम् ॥ १५ ॥
दक्षनासिकयान्त स्थमलक्षालनपूर्वकम् । विरेच्यास्त्रमनुं जप्त्वा प्रक्षिपेच्च शिलोपरि ॥ १६ ॥
अघमर्षणमेतद्धि सकलाघनिवारणम् । इति स्नानं च सर्वापन्निवारणं निर्वर्त्य च ॥ १७ ॥
ततः सन्ध्यामुपासीत यथाविधि विचक्षणः । प्रातः सन्ध्यामुपासीत धर्मकामार्थसिद्धये ॥ १८ ॥
मूलाधारे वसाब्जे तु ह्लांबीजं पीतसप्रभम् । ध्यात्वा वहत्पुटान्तःस्थं बहिर्निस्सार्य मण्डले ॥ १९ ॥
सौरे विभाव्य पीताभां त्रिनेत्रां च चतुर्भुजाम् । बिभ्राणामभयं शूलं कपालाही च बाहुभिः ॥ २० ॥
बालसूर्यासनां ज्येष्ठां ध्यात्वैवं संजपेन्मनुम् ।.... ....॥

ऐंह्रीश्रीं हसखफ्रें हसौं ह्रां हसौं ह्रां ज्येष्ठासंध्यायै ह्रां हसौं ह्रां ऐंह्रींश्रीं हसौं श्रीपादुकां पूजयामि तर्पयामि नमः, इति त्रिरर्घ्यं दत्त्वा,

आदित्याभिमुखस्तिष्ठन् गायत्रीं च शतं जपेत् । गायत्र्याभिनियुक्तस्य ज्ञानमुत्पद्यतेऽचिरात् ॥ २१ ॥

५ षडाननाय विद्महे चित्रपादाय धीमहि तन्नो रुद्रः प्रचोदयात् ५ ॥

अथ माध्यन्दिनी सन्ध्या मणिपूरे डफाब्जके । ह्लींबीजं श्यामसंकाशं ध्यात्वा निःसार्य पूर्ववत् ॥ २२ ॥
सोममण्डलमध्यस्थां त्रिनेत्रां श्यामविग्रहाम् । आरूढयौवनां जाप्यां पुस्तं वामे तथेतरे ॥ २३ ॥
बिभ्राणां च तथा वामां ध्यात्वैवं संजपेन्मनुम् । ....॥

५ ह्लीं हसौं ह्लीं वामासन्ध्यायै ह्लीं हसौं ह्लीं ५ श्रीपादुकां पूजयामि तर्पयामि नमः । इति त्रिरर्घ्यं दत्त्वा प्राग्वद्गायत्रीं जपेत् ॥

अथ सायन्तनी सन्ध्या स्वाधिष्ठाने बलाब्जके । ह्लौंबीजं रक्तवर्णं तु ध्यात्वा निःसार्य पूर्ववत् ॥ २४ ॥
वह्निमण्डलमध्यस्थां रक्तवर्णां चतुर्भुजाम् । शूलाभये करे दक्षे कपालं तर्जनीं तथा ॥ २५ ॥
वामभागे ज विभ्राणां वृद्धां नेत्रत्रयान्विताम् । विचित्रभरणां रौद्रीं ध्यात्वैवं संजपेन्मनुम् ॥ २५ ॥

५ ह्लौं हसौं ह्लौं रौद्रीसन्ध्यायै ह्लौं हसौ ह्लौं ५ श्रीपादुकां पूजयामि तर्पयामि नमः, इति त्रिरर्घ्यं दत्त्वा तां देवीं तन्मनुं पश्चान्मूलतेजसि संयोजयेत् । इति सन्ध्याविधिः ॥

अथ प्रायश्चितखण्डः—

संध्यालोपो न कर्तव्यः शम्भोराज्ञैवमेव हि । दीक्षितः संध्यया हीनो न दीक्षितफलं लभेत् ॥ १ ॥
न कुर्यात् यदि तां सन्ध्यां पतिते दशधा जपेत् । अन्यसंध्यासमे काले सौत्रकण्टकिविद्यया ॥ २ ॥
कृत्वा षडङ्गं मन्त्रेण ध्यायेत्तां सौत्रकण्टकीम् ।.... ....॥

अथ ध्यानम्—

षड्वक्त्रां द्वादशभुजां त्रिनेत्रां परमेश्वरीम् । गलादूर्ध्वं शुक्लवर्णां पीतां गलतलादधः ॥ ३ ॥
कट्यादिपादपर्यन्तं नीलाभां च ततः स्मरेत् । द्विरष्टवर्षां रक्ताङ्गीं सर्वशृङ्गारचर्चिताम् ॥ ४ ॥
स्वर्णरक्तभाभिश्च मण्डितालिसहस्त्रिकाम् । मोचनीं सर्वपापानां रत्नसिंहासने स्थिताम् ॥ ५ ॥
तदूर्ध्वं श्वेतपद्मं तदूर्ध्वं श्वेतकेसरम् । तत्पृष्ठे संस्थितां देवीं त्रिखण्डां गुणभण्डिताम् ॥ ६ ॥
रत्नमुकुटोज्ज्वलां दिव्यां सन्ततानन्दपूरिताम् । हसद्वक्त्रां महादेवीं दक्षिणोदयगामिनीम् ॥ ७ ॥
महासमययागाय नित्यनिष्कलगामिकाम् ।.... ....॥

अथ मन्त्रः—५ ऐंपरदुष्करकर्मच्छेदनकरि अघोरे वरदे विच्चे मायात्रैलोक्यरूपसहस्रपरिवर्तिनि मातृगणे हस्रः ५ ॥

अथ सौरपूजा—

उषस्युत्थाय यत् कर्म श्रीनाथस्मृतिपूर्वकम् । बाह्यमावश्यकं कृत्वा शौचं दन्तविशोधनम् ॥ १ ॥
श्रौतागमात्मकं स्नानं संध्यातर्पणमेव च । सर्वं निवर्त्य पूतात्मा निःशङ्कः शान्तमानसः ॥ २ ॥
यथा विभक्तिः स्वच्छाच्छो विशेत् पूजागृहं प्रति । आगत्य तत्सपर्यार्थं साधनाशेषसंयुतम् ॥ ३ ॥
समीक्ष्य षट्क्रमावेच्छां (?) यदि तत्प्राङ्गणे यजेत् । मार्तण्डं तदशक्तश्चेन्न कुर्याच्चापराद्धयोः (?) ॥४॥

इति । तथाचोक्तं शम्भुनिर्णये—

चतुरन्वयिनामेव सौरपूजेत्थमीरिता । तद्विचार्य चिदादिदित्यपूजां कर्तुं सुखासने ॥ १ ॥
प्राङ्मुखः प्रत्यगासीनः समस्निग्धमहीतले । भूभूतशुद्धिश्वसनसंयमादिविचक्षणः ॥ २ ॥
सामान्यार्घ्यं स्वपुरतः प्रणवान् पञ्च चोचरेत् । मण्डलोश्चा(द्धा)रणं कार्यमिति साधारणो मतः ॥ ३ ॥
भूतांगुलं च वेदास्त्रं षट्कोणं चोर्ध्वरेखकम् । विलिख्य तस्मिन् साधारपात्रमस्त्रविशोधितम् ॥ ४ ॥
संस्थाप्य पयसापूर्याधारपात्रजलेषु च । वह्न्यर्कसोमबीजैस्तु तदात्मकविभावनम् ॥ ५ ॥
सर्वं निष्पाद्य षड्दीर्घद्वितीयप्रणवात्मकम् । अङ्गं तस्य विधायेत्थं पात्रं संस्थाप्य दक्षिणे ॥ ६ ॥

कृत्वा सामान्यवत् पात्रस्थापनान्तं विधाय च । सद्वितीयं निधानेनं संपूज्याभ्यर्च्य(पूर्य) बिन्दुना ॥ ७ ॥
सामान्ये योजयेत्तत्र स्वदेहं यागमण्डपम् । सौरं संभृत्य संभारान् सर्वं सम्प्रोक्षयेदथ ॥ ८ ॥
वहच्छ्वासकराग्रेण पुरतः सौरमण्डले । वक्ष्यमाणेन मन्त्रेण कस्तूरीचन्दनादिभिः ॥ ९ ॥

"५ ऐं चन्द्रसूर्याग्निगर्भं स्फुर २ धर्मार्थकाममोक्षलाभं कुरु २ महासमयखेचरीमुद्रां प्रकटय २ शाम्भवान्वयिनां सिद्धिं सामर्थ्यं दद २ फ्रें किचि २ फ्रें किलि २ फ्रें मण्डलब्रह्माण्डमण्डल हस्रूं महाचण्डशिवे हसखफ्रें ५" । अनेन मन्त्रेणाभ्यर्च्य वृत्ताष्टदलपद्मं लिखेत्, अथ मण्डलं चतुरस्रं कृत्वा संस्थाप्य तद्दक्षिणे,
"सामान्यवद् विशेषार्घ्यमण्डलं विलिखेद्बुधः । मध्ये सौरार्घ्यपूजार्थं मण्डलं चतुरस्रकम् ॥ १० ॥
कृत्वाधारं तु संस्थाप्य पूजयेदमुनाणुना ।"

५ ऐं पात्रसनाय नमः ऐं ५ । "तत्रास्त्रक्षालितपात्रं प्रतिष्ठाप्य" ५ क्लीं ५ इति मन्त्रेण सामान्यार्घ्यविशेषार्घ्यौ सौः इत्यापूर्याथ षडङ्गकम्

कुर्यात्प्रोक्तद्वितीयेन षट्स्वरैर्भेदितेन च । अष्टगन्धान् विनिक्षिप्य रक्तपुष्पैः समर्चयेत् ॥ ११ ॥
अस्त्रेण रक्षां संकल्प्य स्वात्मानन्तादिभिर्यजेत् । अथाष्टदलपद्मस्य मध्ये प्रेतस्वरूपिणम् ॥ १२ ॥
अनन्तमर्चयेत्तत्र शयानममुनाणुना ।.... ....॥

५ अं अनन्ताय अं ५ ।

तल्पीकृतस्वयंदेहं छत्रीकृतफणात्रयम् । फणिनामीश्वरं ध्यात्वा सम्पूजयेदथ ॥ १३ ॥
मध्यादारभ्य वायव्याद्यस्त्रिषु क्रमतो यजेत् ।.... ....॥

५ अंहुंफ्रें प्रभूताय फ्रेंहुंअं ५ श्रीपादु० । मध्ये ५ रं विमलाय रं ५ । ५ लं साराय लं ५ । ५ यं आराध्याय यं ५ । ५ हं परमसुखाय हं ५ । इति कोणपूजा । मण्डले आवाहनम् ।

दहराकाशमध्यस्थं ह्रौंबीजं रक्तसंनिभम् । वहत्पुटाद्विनिःसार्यानन्तं प्रेतात्मकासनम् ॥ १४ ॥
आवाह्य तद्बीजमयं ध्यायेन्मार्तण्डभैरवम् । रक्तवर्णं स्थूलदेहं षड्वक्त्रं चोर्ध्वकेशिकम् ॥ १५ ॥
भुजद्वादशसंयुक्तं सर्पास्थिरत्नचर्चितम् । क्रोधिनं चोर्ध्वलिङ्गं च ज्वलद्रश्मिसमाकुलम् ॥ १६ ॥
व्याघ्रचर्मपरीधानं मुण्डमालाविभूषणम् । हुंहुंकारान् प्रमुञ्चन्तं संहरन्तं महाशिनम् ॥ १७ ॥
त्रिशूलासिचक्रघण्टासृणीवरदपाणिकम् । तर्जाशोकगदाचापपाशाभयकरालिनम् ॥ १८ ॥
आवाहनादिमुद्रांश्च संदर्श्याभ्यर्च्य साधकः । ह्रामादिक्रमतश्चाङ्गं कृत्वा मार्तण्डभैरवे ॥ १९ ॥
समन्त्रं साक्षतं सर्वं चन्दनं च निवेदयेत् ।.... ....॥

५ ह्रौं हसौं श्रीकुलमार्तण्डभैरवाय हसौं ह्रौं ५ श्रीपादुकां पूजयामि नमः ।

पश्चात् सम्प्रोक्ष्य चात्मानं जपेन्मन्त्रमिमं पुनः । पुष्पाञ्जलिं क्षिपेत्सम्यक् सवित्रे सर्वसाक्षिणे ॥ २० ॥

५ स्रौंक्ष्रौंहसौं ५ फट् खफ्रेंभां फट् हसौंक्ष्रौंस्रौं ५ श्रीपा० । तथा द्वितीयमन्त्रः—५ स्रौंक्ष्रौंह्रौंद्रौंहसौं फट् खफ्रेंभां फट् हस्रौंक्ष्रौंस्रौं ५ श्रीपा० । इति पुष्पाञ्जलिमन्त्रः ।

मुद्रे च शूलतर्जन्यौ त्रिधाङ्कां हालिनीमपि । काधांगुलीः प्रदर्श्याथ पूर्वाद्यष्टदलेषु च ॥ २१ ॥
मध्ये च शूलतर्जन्यौ दधानाश्चण्डरोचिषः । नव शक्तीर्यजेत् तत्र भैरवानपि पूजयेत् ॥ २२ ॥

५ जुं ज्वालायै जुं ५ श्रीपा० । ५ क्षं मित्रायै क्षं ५ श्री० । ५ फट् चण्डमालिन्यै फट् ५ श्री० । ५ षौं भीषिण्यै षौं ५ श्री० । ५ इं नारसिंह्यै इं ५ श्री० । ५ ह्रीं कामदेव्यै ह्रीं ५ श्री० । ५ फ्रें मार्तण्डायै फ्रें ५ श्री० । ५ फ्रें कापालिन्यै फ्रें ५ श्री० । ५ हसौं कौलिन्यै हसौं ५ श्री ॥ अथ भैरवमन्त्राः—फ्रें ५ चण्डाय फ्रें ५ श्रीपा० । ५ फ्रें प्रचण्डाय फ्रें ५ श्री० । ५ फ्रें विश्वेशाय फ्रें ५ श्री० । ५ फ्रें महादेवाय फ्रें ५ श्री० । ५ फ्रें महाकालाय फ्रें ५ श्री० । ५ फ्रें गभस्तये फ्रें ५ श्री० । ५ फ्रें चण्डीशाय फ्रें ५ श्री० । ५ फ्रें तेजेशाय

फ्रें ५ श्रीपादुकां पूजयामि नमः ।

सर्वत्र खेचरीमुद्रा लयभोगाङ्गकल्पनाम् । ह्रामादिना विधायाथ दूर्वाक्तकुसुम्भकैः ॥ २३ ॥
सम्पूज्य धूपदीपादिनैवेद्यान्तेऽर्घ्यमन्त्रकम् । यथाशक्ति जपित्वा तु अर्घ्यमन्त्रेण तज्जपः ॥ २४ ॥
पूर्वोक्तमर्घ्यमन्त्रं च चिदादित्य हृदम्बुजे । दहराकाशकूटात्मा बिन्दावेव समुद्धरेत् ॥ २५ ॥
नाथायार्घ्यं निवेद्यान्ते जुहुयाच्च ततो बहिः । वामभागे विलिख्यं च चतुरस्रं च शोभनम् ॥ २६ ॥
मण्डलं तु विधानेन तस्मिन् साधारपात्रके । पशुमार्तण्डमभ्यर्च्य तन्मन्त्रेणैव देशिकः ॥ २७ ॥

५ ह्रांह्रींसः पशुमार्तण्डभैरवाय नमः ५ श्रीपादुकां पूजयामि ।

सपर्यां शेषनिर्माल्यं स तस्मै विनिवेदयेत् ।.... ....॥

इति सौरपूजा ।

आरभ्य शाम्भवीपूजा मध्ये शङ्काकलङ्किता । बहिर्निगत्य तन्नत्वा सर्वेशस्य महात्मनः ॥ १ ॥
तस्मात् सौरसपर्यान्ते कृतसावश्यकः शुचिः । ततः षडन्वयाधीशसाधकाधीश उत्सुकः (?)॥ २ ॥
साधकः साधिताशेषसामग्रीपूर्णमन्दिरम् । बहच्छ्वासपदा पूर्वं प्रविशेन्नतिमुद्रया ॥ ३ ॥
निजनाथान् गणपतिं दुर्गां चैव सरस्वतीम् । क्षेत्रपं परमात्मानं स्वस्वबीजपुरःसरम् ॥ ४ ॥
शिरोदक्षांसवामांस ऊरुद्वयहृदि न्यसेत् । अभ्यर्च्य पुण्डरीकत्वगाद्यासनवरं ततः ॥ ५ ॥
ईशानादिमुखो वाथ यथोचितदिशामुखः । आसीन आसने सम्यगर्चयेदादिभैरवम् ॥ ६ ॥
आसनं कल्पयेत् स्वस्य मन्त्रेणानेन मन्त्रवित् । मन्त्रासनविहीनस्तु नाधिकारी शिवार्चने ॥ ७ ॥

ॐनमो भगवति नीलवज्रासने मम बीजं रक्षरक्ष हुंफट् स्वाहा ५ । इति मन्त्रेणासने उपविश्य,

शिवशक्त्यात्मकौ हस्तौ भावयेद्दक्षवामगौ । तयोः समरसीभावं तालत्रयमथाचरेत् ॥ ८ ॥
दिग्बन्धं कल्पयेत् पश्चात्तदुत्थेनैव वह्निना । प्रागादीशान्तमूर्ध्वान्तः परिवेषं त्रिधाचरेत् ॥ ९ ॥
पञ्चप्रणवमुच्चार्य पञ्चभूतांल्लयं नयेत् । क्रमात्सर्वात्मके शम्भुपदे शक्तिशिवात्मके ॥ १० ॥
योनिमुद्रां समाबध्य मूलात्कुण्डलिनीं पुनः । उत्थाप्य शक्तिबीजेन हस्रौमिति न्यसेत्तदा ॥ ११ ॥
मूलाधारे वसाब्जं स्यान्मणिपूरे डफाब्जकम् । स्वाधिष्ठाने स्मरेदब्जं बादिलान्ताक्षरावृतम् ॥ १२ ॥
कठात्मकं रविदलं षोडशारं स्वरात्मकम् । विशुद्धिमाज्ञाद्विदलं हक्षरूपं क्रमेण तु ॥ १३ ॥
निर्भिद्य मात्रात्रितयं विभेदेन परे शिवे । परिपूर्णे चिदानन्दे सत्तात्रितयरूपिणि ॥ १४ ॥
संयोज्य शोषयेद् देहं पवनायामपूर्वकम् । दाहनप्लावने चैव कृत्वा नित्यं क्षणं शिवे ॥ १५ ॥
विलीनचित्तवृत्तिस्तु प्रतिलोमक्रमेण तु । हादिशक्तिसमायुक्तं साक्षरं षट्सरोरुहम् ॥ १६ ॥
विभाव्य शाम्भवे देहे स्वात्मानं योजयेत्पुनः । ....॥

अस्यायमर्थः । योनिमुद्रां समाबध्य मूलात् कुण्डलिनीं शनैरुत्थाप्य, हस्रौमित्युच्चरन् अकुलात्मना शिवेन सह संयोज्य, तस्मात् हस्रौमिति स्मरन् मनसैवानाहतस्थानाद्वायुना योनिमुद्रया सहैवाक्रम्य मूलेन शक्त्या सह योजयेत् ।

कुलाकुलानुसन्धानमित्येवं प्राणसंयमात् । यः करोति स वै योगी स मुक्तः स च कौलिकः ॥ १७ ॥
षडन्वयमहारत्ने प्राणसंयमितस्ततः । एवमेव त्रिशः पश्चान्न्यासजालं समाचरेत् ॥ १८ ॥
न्यासजालं प्रकुर्वीत यथाशास्त्रं यथाक्रमम् । पञ्चप्रणवमुच्चार्य पश्चान्मन्त्रं समुच्चरेत् ॥ १९ ॥
विलोमप्रणवं पश्चान्न्यासजालं समाचरेत् । न्यासजालं प्रकुर्वीत इति शास्त्रस्य निर्णयः ॥ २० ॥

इति । तथाच—

श्रीशासनेऽत्र ये सन्ति मन्त्रास्ते समुदीरिताः । अनुलोमविलोमाभ्यामङ्गन्यासमतः परम् ॥ १ ॥

बीजन्यासं ततः कुर्याद्रत्नन्यासमनन्तरम् । परादित्रिविधं न्यासं कृत्वा ध्यानं समाचरेत् ॥ २ ॥
अङ्गमन्त्रैः कनिष्ठादिष्वंगुलीषु यथाक्रमम् । तलयोरपि विन्यस्य करन्यास उदाहृतः ॥ ३ ॥
हृदयादिष्वथो न्यस्य स्थानेष्वस्त्रान्तमादरात् । चोरकूपे तथा वामे दक्षश्रुतिमुखेषु च ॥ ४ ॥
वक्त्रन्यासं तथा कुर्यात्स्वमूर्ध्नि द्वादशान्तके । आज्ञाविशुद्धिहृन्नाभिस्वाधिष्ठानेषु देशिकः ॥ ५ ॥
विन्यस्य पूर्ववत्कृत्वा परादिन्यासमास्तिकः । ··· ···· ···· ···· ····

तथा कनिष्ठाद्यंगुलीषु तारादिरत्नानि च विन्यस्य मूलेन व्यापकम् ऐं फ्रें ह्सौं हसखफ्रें श्रीं ह्लीं ऐं इति मन्त्रः । ५ स्ह्लां फ्रां ५ इत्यादिषड्दीर्घक्रमेणाङ्गन्यासं कृत्वा, अथ बीजषोढान्यासः कर्तव्यः । ५ सजूं ५ चूलीमूले । ५ जं ५ ब्रह्मरन्ध्रे । ५ रखदसहवरयूं ५ भाले । ५ सहक्षरयूं ५ दक्षशंखे । ५ क्षराऊअं ५ वामशंखे । ५ सहफ्रें ५ दक्षभ्रूमध्ये । ५ स्ह्लौं ५ वामभ्रूमध्ये । ५ स्रूं ५ भ्रूमध्ये । ५ सह्लीं ५ तालुनि । ५ क्ष्रूं क्ष्रौं ५ घण्टिकायां । ५ फट् ५ दक्षकर्णबिले । ५ सह ५ वामकर्णबिले । ५ लमदरूं ५ चोरकूपे । ५ हस्रूं ५ गले । ५ डरयूं ५ गलाधः । ५ जयरूंऔं ५ दक्षप्रस्फुरे । ५ डयरूं ५ वामप्रस्फुरे । ५ हसौं ५ दक्षप्रस्फुरवेष्टने । ५ जूं ५ वामप्रस्फुरवेष्टने । ५ सक्लीं ५ दक्षकक्षमूले । ५ ऐं ५ वामकक्षमूले । ५ हसौं ५ नाभौ । ५ फः ५ दक्षपाणितले । ५ फ्रें ५ वामपाणितले । ५ सह्लीं ५ लिङ्गरन्ध्रे । ५ ह्लौं ५ लिङ्गमूले । ५ हस्रौं ५ मेदसि । ५ फें ५ दक्षाण्डे । ५ सहक्षमलवयूं ५ वामाण्डे । ५ हं ५ ब्रह्मसूत्रे । ५ हसफरयूं ५ गुदे । ५ हसफ्रें ५ दक्षगुदफलकसन्धौ । ५ हक्ष्रौं ५ वामगुदफलकसन्धौ । ५ ह्लौं ५ गुदोर्ध्वे । ५ हसौं ५ दक्षजानुचक्रे । ५ हुं ५ वामजानुचक्रे । ५ हउऔं ५ दक्षचक्राधः । ५ ह्वःक्षं ५ वामचक्राधः । ५ व्रें ५ वामगुल्फे । ५ प्रं ५ वामगुल्फे । ५ हरक्षफट् ५ दक्षगुल्फाधः । ५ अं ५ वामगुल्फाधः । ५ नफयरीं ५ दक्षयमद्वारे । ५ जरक्षहरीं ५ वामयमद्वारे । ५ हसूं ५ दक्षपादतले । ५ हुंफट् ५ वामपादतले । ५ वलमह्लीं ५ पृष्ठवंशे । ५ जसहसजूं ५ दक्षपार्श्वे । ५ क्षं ५ वामपार्श्वे । ५ ह्लःफट् ५ दक्षकूर्परे । ५ सह्लीं ५ वामकूर्परे । ५ गलमपलं ५ दक्षमणिबन्धे । ५ लवरयहसूं ५ वाममणिबन्धे । ५ हसखफ्रें ५ दक्षांसे । ५ क्षःफट्क्षं ५ वामांसे । ५ फ्रें ५ दक्षचूलके । ५ क्षमयमरुं ५ वामचूलके । ५ ह्लेंफट् ५ दक्षनेत्रमध्ये । ५ ह्लींहसौंयरुं ५ वामनेत्रमध्ये । ५ हसूं ५ नासिकाग्रे । ५ हूं ५ दक्षवृद्धतर्जनीमध्ये । ५ हसकलह्लीं ५ वामवृद्धतर्जनीमध्ये । ५ अकक्षूंहसकहलह्लीं ५ दक्षनासिकायां । ५ अकक्षूंसकलह्लीं ५ वामनासिकायां । ५ आदिक्षान्तैर्मातृकाक्षरैर्मूर्धादिपादान्तं पुनः पादादिमूर्धान्तं व्यापकं कुर्यात्, हृदि सकलमातृकया । इति बीजषोढान्यासः ॥ अथ पञ्चरत्नन्यासः—५ ग्लूं गगनरत्नगगनपीठगगनलोकवासिन्यम्बागगननाथगगनगर्भगामिनीचतुःषष्टिकोटियोगिनी ग्लूं ५ श्रीपा० आज्ञाचक्रे । ५ स्लूं स्वर्गरत्नस्वर्गपीठस्वर्गलोकगामिन्यम्बास्वर्गनाथस्वर्गलोक(गर्भ)व्यापिनी—द्वात्रिंशत्कोटियोगिनी स्लूं ५ श्रीपा० विशुद्धौ । ५ म्लूं मर्त्यरत्नमर्त्यपीठमर्त्यलोकवासिन्यम्बामर्त्यनाथमर्त्यलोकगर्भगामिनी—षोडशकोटियोगिनी म्लूं ५ श्रीपा० अनाहते । ५ प्लूं पातालरत्नपातलपीठपाताललोकवासिन्यम्बापातालनाथपाताललोकगर्भगामिनी—अष्टकोटियोगिनी प्लूं ५ श्रीपा० मणिपूरके । ५ न्लूं नागरत्ननागपीठनागलोकवासिन्यम्बानागनाथनागलोकगामिनी—चतुष्कोटियोगिनी न्लूं ५ श्रीपा० स्वाधिष्ठाने ॥ इति रत्नन्यासः ॥ अथ परादिन्यासः । ५ ऐं परायै ऐं ५ अंगुष्ठाभ्यां नमः । ५ ह्लूं इच्छायै ह्लूं ५ तर्जनी० । ५ ऐं ज्ञानायै ऐं ५ मध्यमा० । ५ श्रीं क्रियायै श्रीं ५ अनामिका० । ५ ह्लीं कुण्डलिन्यै ह्लीं ५ कनिष्ठिकाभ्यां० । ५ फ्रें मातृकायै फ्रें ५ करतलकरपृष्ठाभ्यां नमः ॥ एभिरेव षडङ्गन्यासक्रमः ॥ ५ ऐं परायै ऐं ५ पश्चान्मुखे चूलीमूले । ५ ह्लूं इच्छायै ह्लूं ५ उत्तरमुखे वामकर्णे । ५ ऐं ज्ञानायै ऐं ५ दक्षमुखे दक्षकर्णे । ५ श्रीं क्रियायै श्रीं ५ पूर्ववक्त्रे मुखे । ५ ह्लीं कुण्डलिन्यै ह्लीं ५ ऊर्ध्ववक्त्रे ललाटे । ५ फ्रें मातृकायै फ्रें ५ अपरवक्त्रे ब्रह्मरन्ध्रे । इति षड्वक्त्रन्यासः ॥

इमं न्यासं विधायेत्थं पश्चाद् ध्यानं समाचरेत् । सहस्रसूर्यसङ्काशो मनादीप्तिधरो गुरुः ॥ १ ॥

षडन्वयेश्वरः श्रीमान् परशम्भुरजोऽव्ययः। षडाननः स्फुरन्नेत्रैरष्टादशभिरन्वितः ॥ २ ॥
द्वीपिचर्मकटिस्फारो मुण्डमालाविभूषणः। नरास्थिरत्नपारिजातपुष्पमालासमावृतः ॥ ३ ॥
ब्रह्मनाभिकजांगुष्ठो दंष्ट्राविश्रुतलापनः। विचित्राभरणैर्युक्तः सर्वतः पशुपाशहृत् ॥ ४ ॥
शूलासीषुशक्तिसृणिवरधारी महातनुः। कपालफलचापारिपाशाभयकरोद्यतः ॥ ५ ॥
देवावृतः पितृवने क्रीडाक्रान्मानसोत्तरे। एवं परेश्वरीं ध्यायेत्कन्यागणसमावृताम् ॥ ६ ॥

वामोर्ध्वद्वामाधः पर्यन्तमायुधध्यानम्।

इति ध्यात्वाभिसञ्जप्य मूलविद्याद्वयं पुनः। समभ्यस्य विशेषार्घ्यं चरणद्वयमन्त्रितम् ॥ ७ ॥
तेन सन्तर्पयेद् धीमान् स्वशिरसि गुरुक्रमम्। श्रीनाथपूर्वनिर्वाणचरणं परपावकम् ॥ ८ ॥
कुलकामगवीशुक्लरक्तौ निष्कलरूपकौ। सकलौ च तदात्मानावुपचारपदौ ततः ॥ ९ ॥
सितरक्तैश्च कुसुमैः स्वमूर्ध्नि ब्रह्मरन्ध्रके। सहस्रदलराजीवकर्णिकोदरसंस्थिता. ॥ १० ॥
ब्रह्मादिहेमगर्भान्ताधिष्ठिताः कुलनायिकाः। स्वस्वमन्त्रैर्यजेत् पश्चाद्युगनाथचतुष्टयम् ॥ ११ ॥
निर्वाणचरणध्यानकरणैकपरायणः। चर्यादिमानवौघं च यजेच्च परितः क्रमात् ॥ १२ ॥
तत्रैव हेमगर्भादिप्रेतनाभ्यम्बुजेष्वधः। परेशादिनवेशान्तकूटान्तक्रममादरात् ॥ १३ ॥
स्मरंस्तत्तत्कूटभवं देवीं समावृतोः। आत्मनैक्यमनुध्यायन् पूजयेदथ साधकः ॥ १४ ॥

इति ॥ तद्यथा—ऐं ह्रीं श्रीं ह्स्रैं श्रीं ह्रीं ऐं श्रीपादुकां पूजयामि तर्पयामि नमः। ५ अः हंसः सोहं अः शौं सौं ज्योतिष्परम्बानिर्वाणानन्दनाथ सौः शौः अः हंसः सोहं अः ५ निर्वाणचरणपादुकां पूजयामि०। इति निर्वाणविद्येयं तुरीयातीतस्था ॥ ५ ह्यूं हसक्षमलवयराँ हसक्षमलवयरूं हसक्षमलवयरूं श्रीपरपावक सर्वाराध्य सर्वगुरुनाथ सर्वगुरुगुरुश्रीनाथ गुरुनाथ रहसक्षमलवयरूं ह्स्त्रूं हसक्षमलवयरीं हसक्षमलवयरूं सहक्षमलवयराँ एकशम्भु ५ श्रीपरमपावक शम्भु श्रीपा० ॥ श्रीशम्भुगुरु ५ हसक्षमलवयराँ हसक्षमलवयरं हसक्षमलवयरीं हसूं हसक्षमलवयरूं ५ ॐह्रीं कामदुघे अमोघे वरदे विच्चे स्फुर २ श्रां श्रीं श्रूं श्रैं श्रौं श्रः ५ श्रीकामधेनुचरण श्रीपा० ॥ ५ हसूं शुक्लपाद हसूं ५ शुक्लनिष्कलपाद श्रीपा० ॥ ५ सहूरूं रक्तपाद सहरूँ ५ रक्तनिष्कलपाद श्रीपा० ॥ इति निष्कलपादौ ॥ ५ ह्स्रौं शर्वोर्व्वे वशं देहि ह्स्रौं ५ शुक्लसकलपाद श्रीपा०। ५ सह्रीं सत्ये श्रियं देहि सह्रीं ५ रक्तसकलपाद श्रीपा०। इति सकलपादौ ॥ ५ ह्स्रौं शुक्लविद्यामहापीठ-शुक्लपुष्पशुक्लमण्डलमहापीठ शुक्लचरुक शुक्लार्णवमहापीठ शुक्लनदी शुक्लमन्त्रमहापीठ शुक्लदीपमहापीठ शुक्लमुद्रामहापीठ शुक्लनति शुक्लमहाप्रकाशानन्दनाथपाद ह्स्रौं ५ शुक्लचरणश्रीपादुकां पू० ॥ ५ सहरौं रक्तविद्यामहापीठ रक्तपुष्प रक्तमण्डलमहापीठ रक्तचरुक रक्तार्णवमहापीठ रक्तनदी रक्तमन्त्रमहापीठ रक्त-दीपमहापीठ रक्तमुद्रामहापीठ रक्तनति श्रीरक्तमहाविमर्शपराम्बापाद सहरौं ५ परापररक्तचरणश्रीपा०। ५ हसरौं सहरौं मिश्रविद्यामहापीठ मिश्रपुष्प मिश्रमण्डलमहापीठ मिश्रचरुक मिश्रार्णवमहापीठ मिश्रनदीमिश्र-मन्त्रमहापीठ मिश्रदीपमहापीठ मिश्रमुद्रामहापीठ मिश्रनति मिश्रमहाप्रकाशविमर्शानन्दनाथपराम्बापाद सह्रौं ह्स्रौं ५ श्रीपरापरमिश्राम्बाचरणश्रीपा० ॥ ५ लं ब्रह्ममहाप्रेतासनाय लं ५ श्रीपा०। ५ वं विष्णुमहाप्रेता-सनाय वं ५ श्री०। ५ रं रुद्रमहाप्रेतासनाय रं ५ श्री०। ५ यं ईश्वरमहाप्रेतासनाय यं ५ श्री०। ५ हं सदाशिवमहाप्रेतासनाय हं ५ श्री०। ५ हं हिरण्यगर्भमहाप्रेतपद्मासनाय हं ५ श्री०। तच्छक्तयः—५ ऐं परायै ऐं ५ श्रीपा०। ५ हुं इच्छायै हुं ५ श्री०। ५ ऐं ज्ञानायै ऐं ५ श्री०। ५ श्रीं क्रियायै श्रीं ५ श्री०। ५ ह्रीं कुण्डलिन्यै ह्रीं ५ श्री०। ५ फ्रें मातृकायै फ्रें ५ श्री०। इति दिव्यौघाः ॥ ५ आं आदिगुरुनाथ आद्याम्बा आं ५ श्रीपा०। ५ अं अचिन्त्यगुरुनाथ अचिन्त्याम्बा अं ५ श्री०। ५ अं अव्यक्तगुरुनाथ अव्यक्ताम्बा अं ५ श्रीपा०। ५ कुं कुलेश्वरनाथ कुलेश्वर्य्यम्बा कुं ५ श्रीपा०। इति युगनाथ चतुष्टयं सिद्धौघाः ॥ बिन्दुमध्ये।

७ श्रीचर्य्यातूष्णीशानन्दनाथ सिद्धापराम्बा चामुण्डापराम्बा ७ श्रीपा० । ७ श्रीचिञ्चिणि मित्रेश कुब्जेशानन्दनाथ मंदनापराम्बा ७ श्री० । ७ श्रीगगनानन्दनाथ चाटुलीपराम्बा आडलीपराम्बा ७ श्री० । ७ श्रीचन्द्रगर्भानन्दनाथ भगीयापराम्बा लालीयापराम्बा ७ श्री० । ७ श्रीमुक्तानन्दनाथ महिलापराम्बा ७ श्री० । ७ श्रीललितानन्दनाथ शङ्खापराम्बा श्रीकरुणापराम्बा ७ श्री० । ७ श्रीकण्ठानन्दनाथ श्रीकण्ठापराम्बा ७ श्री० । ७ श्रीपरेश्वरानन्दनाथ श्रीपरेश्वरीपराम्बा ७ श्री० । ७ श्रीकूर्मानन्दनाथ सहजापराम्बा श्रीरत्नदेवीपराम्बा ७ श्री० । ७ श्रीरत्नेशानन्दनाथ ज्ञातीपराम्बा ७ श्री० । ७ श्रीवर्मेशानन्दनाथ सदाख्यापराम्बा अम्बिकापराम्बा ७ श्री० । ७ श्रीउमाकान्तेशानन्दनाथ योगापराम्बा योगीश्वरीपराम्बा ७ श्री० । ७ श्रीब्रह्मेशानन्दनाथ वज्रेश्वरीपराम्बा ७ श्रीपा० । ७ श्रीभुजङ्गेशानन्दनाथ सहजापराम्बा ७ श्री० । ७ श्रीक्रोधीशानन्दनाथ सहजापराम्बा ७ श्री० । ७ श्रीविश्वानन्दनाथ सहजापराम्बा ७ श्री० । ७ श्रीदिगेश्वरानन्दनाथ सहजापराम्बा श्रीपार्वतीपराम्बा ७ श्री० । ७ श्रीसर्वेश्वरानन्दनाथ सहजापराम्बा ७ श्री० । ७ श्रीअनन्तानन्दनाथ सहजापराम्बा ७ श्री० । ७ श्रीकपिलेशानन्दनाथ अचलापराम्बा ७ श्री० । ७ श्रीएकाम्बरानन्दनाथ सहजापराम्बा ७ श्री० । ऐं ह्रीं श्रीं हसखफ्रें हसौं हसौं हसखफ्रें सहखफ्रें श्रीअमृतानन्दनाथ सहजापराम्बा ७ श्रीपा० ॥ इति मानवौघाः ॥ अथ मूलमन्त्राः—५ सहखफ्रें ऐं फ्रें ५ श्रीपरेश्वरानन्दनाथ श्रीपरेश्वरीपराम्बा ७ श्री० । ५ हसं ऐं कुब्जिके फ्रें हसमईऐं कुब्जिकायै फ्रें ५ श्रीविच्चेश्वरानन्दनाथ श्रीविच्चेश्वरीपराम्बा ५ श्री० ॥ हसयंइऐं कुब्जिकायै हसखफ्रें विच्चे ५ श्रीहंसेश्वरानन्दनाथ श्रीहंसेश्वरीपराम्बा ५ श्रीपा० । ५ ह्रां ह्रां ह्रीं ह्रीं हस्रां हस्रीं ५ हस्रूं हस्रीं क्ष्रीं क्ष्रूं क्ष्रीं किणि किणि हसखफ्रां हसखफ्रूं हसखफ्रीं विच्चे ह्रौं हसः २ हसखफ्रें हसक्षमलवयरूं औं हसक्षमलवयरूं औं ५ श्रीसंवर्तकेश्वरानन्दनाथ संवर्तकेश्वरीमहासमयापराम्बा ५ श्री० ॥ ५ हसूं ऐं रिगिटि पिगिटि डुक डुक कण्टापि विच्चे ५ श्रीद्वीपेश्वरानन्दनाथ श्रीद्वीपेश्वरीपराम्बा ५ श्रीपा० ॥ ५ हसक्षमलवयरं नमो भगवति हसखफ्रें कुब्जिकायै ह्रां ह्रूं ह्रीं ङञणनमे अघोरमुखि छां छूं छीं किणि २ श्रीविच्चे ५ नवात्मकेश्वरानन्दनाथ श्रीनवात्मकेश्वरीपराम्बा ५ श्री० ॥ इति गुरुक्रमः ॥ अथ मानसरश्मिपूजा—शिरसि षट्कोणे ईशानादिवायव्यान्तकोणेषु क्रमशो द्वात्रिंशत्क्रमरश्मिकान् पूजयेत् । ५ ऐं परानन्दनाथ परापराम्बा ऐं ५ श्रीपा० । ५ ऐं भानन्दनाथ भापराम्बा ऐं ५ श्री० । ५ ऐं चिदानन्दनाथ चित्पराम्बा ऐं ५ श्री० । ५ ऐं महामायानन्दनाथ महामायापराम्बा ऐं ५ श्री० ॥ (४) इतीशानकोणे ॥ ५ हुं इच्छानन्दनाथ इच्छापराम्बा हुं ५ श्री० । ५ हुं सृष्ट्यानन्दनाथ सृष्टिपराम्बा हुं ५ श्री० । ५ हुं स्थित्यानन्दनाथ स्थितिपराम्बा हुं ५ श्री । ५ हुं तिरोधानन्दनाथ तिरोधापराम्बा हुं ५ श्री० । ५ हुं मुक्त्यानन्दनाथ मुक्तिपराम्बा हुं श्री० ॥ (५) इति पूर्वदिग्रश्मयः ॥ ५ ऐं ज्ञानानन्दनाथ ज्ञानापराम्बा ऐं ५ श्री० । ५ ऐं सदानन्दनाथ सतीपराम्बा ऐं ५ श्री० । ५ ऐं असदानन्दनाथ असतीपराम्बा ऐं ५ श्री० । ५ ऐं सदसदानन्दनाथ सदसतीपराम्बा ऐं ५ श्री० ॥ (४) इत्यग्निकोणे ॥ ५ श्रीं क्रियानन्दनाथ क्रियापराम्बा श्रीं ५ श्री० । ५ श्रीं आत्मेश्वरानन्दनाथ आत्मेश्वरीपराम्बा श्रीं ५ श्री० । ५ श्रीं इन्द्रियानन्दनाथ इन्द्रियापराम्बा श्रीं ५ श्री० । ५ श्रीं गोचरानन्दनाथ गोचरापराम्बा श्रीं ५ श्री० । ५ श्रीं लोकमुख्यानन्दनाथ लोकमुख्यापराम्बा श्रीं ५ श्री० । ५ श्रीं वेदानन्दनाथ वेदापराम्बा श्रीं ५ श्री० । ५ श्रीं सच्चिदानन्दनाथ सच्चित्पराम्बा श्रीं ५ श्री० ॥ (७) इति नैर्ऋत्यकोणे ॥ ५ ह्रीं कुण्डल्यानन्दनाथ कुण्डलिनीपराम्बा ह्रीं ५ श्री० । ५ ह्रीं सौषुम्नानन्दनाथ सौषुम्नापराम्बा ह्रीं ५ श्री० । ५ ह्रीं प्राणसूत्रानन्दनाथ प्राणसूत्रापराम्बा ह्रीं ५ श्री० । ५ ह्रीं स्पन्दानन्दनाथ स्पन्दापराम्बा ह्रीं ५ श्री० ॥ (४) इति पश्चिमे ॥ ५ फ्रें मातृकानन्दनाथ मातृकापराम्बा फ्रें ५ श्री० । ५ फ्रें शब्दानन्दनाथ शब्दापराम्बा फ्रें ५ श्री० । ५ फ्रें वर्णानन्दनाथ वर्णापराम्बा फ्रें ५ श्री० । ५ फ्रें स्वरोद्भवानन्दनाथ स्वरोद्भवापराम्बा फ्रें

५ श्री०। ५ फ्रें वर्णजानन्दनाथ वर्णजापराम्बा फ्रें ५ श्री०। ५ फ्रें वर्गजानन्दनाथ वर्गजापराम्बा फ्रें ५ श्री०। ५ फ्रें संयोगानन्दनाथ संयोगापराम्बा फ्रें ५ श्री०। ५ फ्रें मन्त्रविग्रहानन्दनाथ मन्त्रविग्रहापराम्बा फ्रें ५ श्री० ॥ (८) इति वायव्यकोणे ॥ अथ रश्मिध्यानम्—

चतुष्कं सूर्यसङ्काशं पञ्चकं चन्द्रसन्निभम् । तृतीयं च चतुष्कं च धूम्राभं सप्तकं पुनः ॥ १ ॥
अञ्जनाभं कुङ्कुमाभं चतुष्कं पञ्चमं पुनः । षष्ठं तथाष्टकं चेति शुद्धतालकसंनिभम् ॥ २ ॥
वरदाभयहस्ताश्च सर्वे वामार्धविग्रहाः । तेजोरूपाश्च वा ध्येयाः केवलं मोक्षकांक्षिभिः ॥ ३ ॥

इति ध्यानम् । इति रश्मि—आवरणम् ।

हिरण्यगर्भनाभिस्थसरसीरुहमध्यतः । कूटं परेश्वरस्याथ चिन्तयेदर्कसंनिभम् ॥ १ ॥
स्वगुरुं मूर्ध्नि संचिन्त्य मूलाधारे परेश्वरीम् । तिथिसंख्याफणोद्भिन्नभोगिमध्यफणे स्थिताम् ॥ २ ॥
तेजोरूपां पुनर्देवीमामस्तकमनुस्मरेत् । परेश्वरेण संयोज्य ध्यायन्नैक्येन मान्त्रिकः ॥ ३ ॥
देवं देवीं च संयोज्य पुनरेकीकृतेन च । तन्मन्त्रेण च तावेव त्रिधा सम्पूज्य साधकः ॥ ४ ॥
नुत्वा स्तुत्वा मनुं जप्त्वा मानसक्रममाचरेत् ।.... ....॥

पुनः स्हां फ्रां इत्याद्यङ्गन्यासः। "सहस्रसूर्यसङ्काश:" इत्यादि ध्यानं, मूलमन्त्रेण यथाशक्ति जपं कुर्यात् । पञ्चाङ्गं नमस्कारं कुर्यात् । "वक्त्रशून्या हृदाप्यूना करादृते हरेज्जपम् । कादृते सर्वहानिस्तु मरणं वचनादृते" ॥ इति लक्षयुक्त्वा नमस्कारं कृत्वा,

नमो द्रुहिणवैकुण्ठशक्तिप्रसवधारिणे । आधारस्वाधिष्ठानाभिहृत्कण्ठबिन्दुवासिने ॥ ५ ॥
विलषोडशपर्यन्तचारुसंचारवर्ष्मणे । जन्मभोगलयव्याधिदुःखकर्मविनाशिने ॥ ६ ॥
भूतवर्तभविष्याख्य–जगज्जातकथाविदे । षडूर्मिभेदिने सत्ताशून्यवादविनाशिने ॥ ७ ॥
षड्भतित्रासंत्रस्तलोके भयक्षयात्मने । पौनःपुन्यसलोकाख्यसत्ताविध्वंसकात्मने ॥ ८ ॥
वलीपलितनाशैकमूर्तयेऽमृतधारिणे । सर्वज्ञस्कारणोपेतजीवन्मुक्तिप्रदायिने ॥ ९ ॥
इदं गुप्ततमं स्तोत्रं पावनं श्लोकपञ्चकम् । पठेन्नित्यं भुक्तिमुक्ति साधकाय परेश्वरः ॥ १० ॥
संस्तूय मानसे भक्त्या पञ्चाङ्गं प्रणमेद्भुवि । मन्त्रदेवगणैः सार्धं तं मण्डलगतं पुनः ॥ ११ ॥
देवं चरणमध्यस्थं ब्रह्मरन्ध्रे लयं नयेत् ।.... ....॥

इति मानसगुरुक्रमः ॥ तदनन्तरं गुरुक्रमं शिरसि विन्यस्य, सर्वतीर्थानि समुद्रसहितानि तीर्थमन्त्रेणां कुशमुद्रयाकृष्य तस्मिन्नावाह्य तज्जले धेनुमुद्रां प्रदर्श्य, संस्कृतेनाभ्युक्ष्य तज्जलेनात्मानं पूजोपकरणानि च सम्प्रोक्ष्य सामान्यार्घ्यमाच्छादयेत् । "भूतांगुलं च वेदास्रं षट्कोणं चोर्ध्वरेखकम् । विलिख्य तस्मिन् साधारं पात्रमस्त्रविशोधितम् ॥ संस्थाप्य पयसापूर्याधारपात्रजलेषु च ।" ५ रं वह्निमण्डलाय धर्मप्रददशकलात्मने सामान्यार्घ्यपात्रासनाय नमः । ५ हं सूर्यमण्डलाय वसुप्रदद्वादशकलात्मने सामान्यार्घ्यपात्राय नमः । ५ सं सोममण्डलाय मोक्षप्रदषोडशकलात्मने सामान्यार्घ्यामृताय नमः । ५ श्रीविद्याखण्डत्रयेण त्रिरभिपूज्य परेश्वरेण त्रिवारं सम्पूज्य परेश्वर्या सप्तवारमभिमन्त्र्य गन्धपुष्पाक्षतैरभ्यर्च्य, इति सामान्यार्घ्यविधिः ॥ तद्दक्षिणे पात्रं प्रतिष्ठाप्य तदनु पञ्चभिर्वीदिक्षण्यादिभिः कृतोत्पवनं कृत्वा घटसूत्रपठनं "समुद्रे मथ्यमाने तु" इत्यादि पठन् सामान्यार्घ्यवदर्चयेत् । तद्बिन्दुं सामान्यार्घ्ये निःक्षिप्यात्मानं पूजोपकरणानि सम्प्रोक्ष्य मण्डलोद्धारणं कुर्यात् ।

चतुरस्रमर्धचन्द्रं त्र्यस्रं षट्कोणवृत्तके । त्र्यस्रं पुनश्चन्द्रखण्डं नादबिन्दुनवात्मकम् ॥ १ ॥
श्रीभैरवीविशेषार्घ्यमण्डलानां यथा भवेत् । अवकाशस्तथा साधु लिखेदेतन्नवात्मकम् ॥ २ ॥
शाम्भवागमपूजार्थं तत्रोर्ध्वे मण्डलं लिखेत् । तस्मिन् प्रागादिङ्मध्ये ऊर्ध्वदेशे गुरूक्तितः ॥ ३ ॥
आद्यन्तप्रणवैर्युक्त्या बीजषट्कं क्रमात् पठेत् । लंवंरंयंहंसमित्यादि चतुरस्रार्धचन्द्रकम् ॥ ४ ॥

त्रिकोणमथ षट्कोणं वृत्तं नादं बहिः पुनः । पञ्चप्रणवमुच्चार्य वृत्तत्रयमथो लिखेत् ॥ ५ ॥
श्रीभैरवसपर्यार्थं पद्मस्याधो विचक्षणः । अथ भूजानुको भूत्वा षोडशांगुलमानतः ॥ ६ ॥
चतुर्विंशांगुलं वाथ द्वादशांगुलमेव च । चतुरस्रं समालिख्य मध्ये पट्टं विधाय च ॥ ७ ॥
राजतं स्वर्णमन्यद्वा तत्राष्टदलमालिखेत् । पद्मं वृत्तत्रयोपेतं तन्मध्ये मण्डलत्रयम् ॥ ८ ॥
कर्पूरचन्दनादीनि कस्तूरीकुंकुमादयः । सान्द्रश्लक्ष्णेन पङ्केन हेमपट्टादि लेखयेत् ॥ ९ ॥
प्रकृत्यष्टलसत्पत्रं परप्रकृतिकर्णिकम् । पुण्डरीकवरं सम्यक् सूच्या सौवर्णया लिखेत् ॥ १० ॥
हेमपट्टाद्यभावे तु वस्त्रोपर्यथवा भुवि । पद्मस्याधःप्रदेशे तु सामान्यार्घ्यस्य वा पुनः ॥ ११ ॥
सामान्यवद्विशेषार्घ्यमण्डलं विलिखेद्बुधः । पद्मस्य पार्श्वयोः सौम्ययाम्योर्मण्डलद्वयम् ॥ १२ ॥
वेदांगुलप्रमाणं स्यात्लिखेत् प्राक्प्रत्यगायतम् । त्रयाणां द्वारपालानां गुरूणां पञ्चकस्य तु ॥ १३ ॥
क्रमात् सौम्ये च याम्ये च पञ्चमस्थानकल्पना । द्वारपालोत्तरे कुर्याद् बलीनां मण्डलानि च ॥ १४ ॥
अथ पुष्पाक्षतैः सार्घ्यविशेषार्घ्यस्य पूजनम् । कृत्वा सामान्यवत् पात्रस्थापनान्तं विधाय च ॥ १५ ॥
सद्वितीयं विधानेन सम्पूज्यापूर्य पूर्ववत् । आबध्य कमठीमुद्रां कुसुमाक्षतगर्भिताम् ॥ १६ ॥
मूलकुण्डलिमुत्थाप्य उद्यच्चन्द्रसमप्रभाम् । षट्चक्रमण्डलं भित्त्वा सुषुम्नाकाशवाहिनीम् ॥ १७ ॥
सोमसूर्यपदं भित्त्वा विश्रान्तां शाम्भवेन तु । ध्यात्वा समरसोद्भूतमिश्ररक्तसितामृतैः ॥ १८ ॥
चरणत्रयसम्भूतैर्नयनद्वयनिर्गतैः । आपूरितं विशेषार्घ्यममृतीकृत्य वीक्षणैः ॥ १९ ॥
ज्वलदग्निनिभं ध्यात्वा धेनुमुद्रां प्रदर्शयेत् ।.... ....॥

"ब्रह्माण्डखण्डसम्भूतमित्यादि पठन् "मयि विस्फुरणं कुरु" इति सम्प्रार्थ्यैवं वक्ष्यमाणमन्त्रैरपि समर्चयेत् । ५ हसरौं हसर अमृतेशोद्भवाय ह्ल हसरौं, ५ ऐं परामृतेशोद्भवायै ऐं, ५ ओंजूंसः अमृतेशभैरवाय सःजूं ॐ अमृतेशभैरव्यै ॐजूंसः ५ हसक्षमलवयरूं यं सहक्षमलवयरीं यीं सुरादेव्यै अर्धनारीश्वर्यै वौषट् ५ । ५ सहक्षमलवरयईं हसक्षमलवयरउं असंषः आनन्दभैरवानन्दनाथ नवात्मकापराम्बा ५ श्रीपा० । आवाहनादिमुद्राः प्रदर्श्य, अकथादि पात्रमध्ये संचिन्त्य, त्रिकोणे षोडशस्वरान् विचिन्त्य, कोणेषु पीठमन्त्रैः सम्पूज्य मूलविद्यानित्याषोडशकं विचिन्त्य विन्यस्य, श्रीविद्यागुरूक्तमन्त्रं विन्यस्य, ५ अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय श्रींश्रींश्रूं अमृते अमृतेश्वर्यै नमः ५ । इत्यमृतेश्वरीं त्रिवारं पठित्वा, ५ आनन्दभैरवाय वषट् ५, इति संशोध्य, ततो गुरुमन्त्रः । असिताङ्गाद्यष्टौ पात्राञ्चले सम्पूज्य नवात्मकविद्याभ्यां त्रिः सन्तर्पयेत् । परेश्वरेण त्रिवारं परेश्वर्या सप्तवारमभिमन्त्र्याङ्गानि देव्योर्विन्यस्य रक्षामन्त्रेण संकल्पयेत् । सौभाग्यविद्या श्रीमूर्त्यादिविद्याः निर्वाणविद्याः । ५ हंसः सोऽहं ओं हांहौं सौः निर्वाणानन्दनाथ अहंस्वात्मप्रकाशानन्दनाथ ५ श्रीपा० । तथा सप्तधोच्चारात् । इति श्रीमूर्तिविधिः ॥ विशेषार्घ्यस्य तादात्म्यं भावयित्वा पञ्चोपचारान् परिकल्प्य विशेषदक्षिणे मण्डले चतुरस्रके भोगपात्राधारकं ऐमेति संस्थाप्य, तत्र पात्रं क्लीमिति निःक्षिप्य, आद्येन सौरित्यापूर्य, विशेषोदकेन संस्कृत्य श्रीनाथादिपराषट्कान्तं शिरसि गुरुमन्त्रं पूजयेत् ।

कृत्वा पञ्चोपचारांश्च शेषं स्वात्मानले हुनेत् । सुगन्धतिलकाद्यैश्च नानाभरणसंयुतैः ॥ २० ॥
स्वात्मानं समलंकृत्य यथाविभवविस्तरम् । वक्ष्यमाणैस्तथा मन्त्रैर्यजेदागमण्डलम् ॥ २१ ॥
वहत्पुटनासिकया प्रणवैश्च समर्चयेत् ।.... ....॥

५ अष्टाविंशतिक्रममण्डलेभ्यो नमः ५ हसरौं महाप्रेतपद्मासनाय हसरौं श्रीपा० । ५ ऐं प्रणवमण्डलव्यापिपादाय विच्चे ऐं श्री० ।

एतान् साक्षतपुष्पैश्च यजेदर्घ्याम्बुबिन्दुभिः । संस्थाप्य मण्डले तत्र यजेच्छाम्भवमण्डलम् ॥ २२ ॥

दक्षिणादग्दक्षिणोदङ्मध्यदेशे गुरूक्तितः । तारसम्पुटितैस्तारैर्यष्टव्या मन्त्रदेवताः ॥ २३ ॥

५ ऐं मन्त्रदेवतायै ऐं । ५ ह्रीं मन्त्रदेवतायै ह्रीं । ५ श्रीं मन्त्रदेवतायै श्रीं । ५ हसखफ्रें मन्त्रदेवतायै हसखफ्रें । ५ हसौं मन्त्रदेवतायै हसौं ।

मध्ये पद्मासने देव्यै पूजयेदेकयोगतः । आवाहनादिमुद्राश्च योनिमुद्रां प्रदर्शयेत् ॥ २४ ॥
धूपं दीपं च नैवेद्यं दद्यात्तदुक्तमन्त्रतः । एवमागममभ्यर्च्य ततोऽष्टदलपङ्कजे ॥ २५ ॥
मण्डलत्रितयं चैव परितो देशमध्यतः । वक्ष्यमाणैस्तथा मन्त्रैः पूजयेदुक्तमार्गतः ॥ २६ ॥

५ हं सूर्यमण्डलाय हं नमः । ५ रं वह्निमण्डलाय रं नमः । ५ सं सोममण्डलाय सं नमः । ५ अष्टाविंशति-मण्डलेभ्यो नमः । ५ हस्रौं महाप्रेतपद्मासनाय हस्रौं नमः ।

मद्ममध्ये प्रतिष्ठाप्य शिवलिङ्गं सुलक्षणम् । साध्यं पुष्पाक्षतैस्तस्मिन् दक्षिपादोत्तराननम् ॥ २७ ॥
वह्निप्रेतं तथा स्वाहां दक्षे वामे समर्चयेत् ।.... ....॥

५ ह्रीं जातवेदसे ह्रीं ५ । ५ ॐह्रीं स्वहायै ह्रींॐ ५ नमः ।

वरशक्तिधरौ ध्यात्वा तयोर्नाभ्यम्बुजे सिते । एकारपरमं व्योम ध्यात्वा एमिति पूजयेत् ॥ २८ ॥
देवदेव्यौ च तन्मध्ये समावाह्य प्रपूजयेत् । आवाहनादिका मुद्रा ध्यात्वा त्वङ्गं विधाय च ॥ २९ ॥
गन्धपुष्पाक्षतैरर्घ्याद्युपचारान् प्रकल्पयेत् । पूर्वादिपद्मपत्रेषु मङ्गलाष्टकमर्चयेत् ॥ ३० ॥

५ हूं मङ्गलमहाभैरवानन्दनाथ हूं ५ श्रीपा० । ५ ह्रीं ब्रह्माणीदेव्यम्बा ह्रीं ५ श्रीपा० । ५ सूं वर्चकम-हाभैरवानन्दनाथ सूं ५ श्रीपा० । ५ सीं माहेश्वरीदेव्यम्बा सीं ५ श्रीपा० । ५ क्षूं योगमहाभैरवानन्दनाथ क्षूं ५ श्रीपा० । ५ क्षीं कौमारीदेव्यम्बा क्षीं ५ श्रीपा० । ५ मूं हरसिद्धमहाभैरवानन्दनाथ मूं ५ श्रीपा० । ५ मीं वैष्णवीदेव्यम्बा मीं ५ श्रीपा० । ५ लूं भटमहाभैरवानन्दनाथ लूं ५ श्रीपा० । ५ लीं वाराहीदेव्यम्बा लीं ५ श्रीपा० । ५ वूं किलिकिलिभैरवानन्दनाथ वूं ५ श्रीपा० । ५ वीं इन्द्राणीदेव्यम्बा वीं ५ श्रीपा० । ५ यूं काल-रात्रिमहाभैरवानन्दनाथ यूं ५ श्रीपा० । ५ यीं चामुण्डादेव्यम्बा यीं ५ श्रीपा० । ५ रूं भीषणमहाभैरवानन्द-नाथ रूं ५ श्रीपा० । ५ रीं कमलादेव्यम्बा रीं ५ श्रीपा० । अथ ध्यानम्—

वर्वरकेशहस्ताश्च देव्यो ललितविग्रहाः । कपालशूलहस्तश्च देव्यो(व,वामाङ्कसंस्थिताः ॥ ३१ ॥
रक्तवर्णास्त्रिनेत्राश्च सर्वाभरणभूषिताः । सर्वे षोडशवर्षाश्च मदघूर्णितलोचनाः ॥ ३२ ॥
अष्टौ बीजविभिन्नांश्च कृत्वा नवमयोजितान् । सानुस्वारान् नवेशस्य कूटस्येतत् पुरो यजेत् ॥ ३३ ॥
पश्च तेषां शक्तयश्चानन्ताद्योऽनुग्रहात्मिकाः । अध ऊर्ध्वमधोऽर्वान्तःप्रदेशक्रमतोऽर्चयेत् ॥ ३४ ॥

यथा—....(?) ५ आं आदिनाथगुरु आद्यम्बा आं ५ श्रीपा० । ५ अं अनादिगुरुनाथ अनाद्यम्बा अं ५ श्री० । ५ कुं कुलेश्वरगुरुनाथ कुलेश्वर्यम्बा कुं ५ श्री० । ५ अं अचिन्त्यगुरुनाथ अचिन्त्यम्बा अं ५ श्री० ।

एवं गुरुक्रमं पश्चात् परितो देवयोर्यजेत् । देवी श्रीगुरवो देवो यथा पीठे तथाविधाः ॥ ३५ ॥
पुनर्देव्याः समभ्यर्च्य लयाङ्गं हृदयादिषु । अङ्गषट्कं समभ्यर्च्य, वह्नीशासुरवायुषु ॥ ३६ ॥
कोणेषु नेत्रं मध्ये च दिक्षु चास्त्रमिति क्रमात् । भोगाङ्गमिति धूपादि हृदयेन प्रकल्पयेत् ॥ ३७ ॥
यथाशक्ति जपं कुर्याद् विद्याद्वयमनन्यधीः ।

नुत्वा स्तुत्वा "नमो द्रुहिणवैकुण्ठ" इत्यादिश्लोकपञ्चकैः स्तवीत । अथ पूर्ववत्तत्तेजो वाह्ये पूजये-न्मजण्डलत्रये ।

इन्दुं प्रत्यग्रकुदाभं शशपृष्ठसमावृतम् । शूलासितर्जनीकाधंकरक्रमविभूषणम् ॥ ३८ ॥
साधकानुग्रहायान्तं त्र्यक्षमेतेन पूजयेत् ।.... ....॥

५ ह्रौं निशाटननाथय ह्रौं ५ श्री० ।

मण्डले प्राच्यां तपनं पूर्वोक्तायुलक्षणम् । अश्वपृष्ठे समासीनं पीतवर्णतनुं यजेत् ॥ ३९ ॥

५ ह्रौं सौराय ह्रौं ५ श्री० ।

मध्ये च मण्डले बह्निं पूर्वोक्तायुधलक्षणम् । कुंकुमक्षोदसङ्काशं यजेन्मेषाधिरोहणम् ॥ ४० ॥

५ क्ष्रौं कालानलाय क्ष्रौं ५ श्री० । श्रीनाथादिपरापट्कपर्यन्तं पूजयेत् ।

ततो विघ्नविनाशाय हेरम्बं स्वस्य वामतः । आवाहयेद् हृदि स्थितं मण्डले चतुरस्रके ॥ ४१ ॥

ग्लामित्यादिना षडङ्गं विधाय ध्यायेत् ।

सितो गजास्यः परशुं दन्तकार्ध त्रिशूलकम् । भुजैश्चतुर्भिर्बिभ्राणो मूषकोपरि संस्थितः ॥ ४२ ॥

लक्षैकाद्विघ्नसंघातं हरतीति राजवचः ? (गजाननः) ।

५ ग्लौं हेरम्बाय ग्लौं ५ श्री० ॥ ततः परेश्वरं ध्यायेत् । आद्यं मन्त्रं निवेदयेत् । ततो गुरुक्रमं । हेरम्बमण्डलाधःस्थत्रिकोणे मण्डले साधारे पात्रं प्रतिष्ठाप्य पञ्चप्रणवैर्गन्धपुष्पाक्षतैरभ्यर्च्य प्रथमद्वितीयसहितमर्घ्याम्बुपूर्णसलिलं बलिं "५ ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा" अनेन पङ्क्त्याकारेण बलिं दद्यात् । खेचरीमुद्रां योनिमुद्रां प्रदर्श्याज्ञापुरःसरं भूतानि वेष्टितं पात्रं तर्जन्या सम्प्रदर्शयेत् । हुंहुंहुं तदीयं मन्त्रं तु वृद्याकलय्य बलिं क्षिपेत् । ततोऽर्घ्यजलेनावाह्य च सम्प्रोक्ष्य तत् स्वात्मनि जुहुयात् ॥ लिङ्गागमात्मनामैक्यबुद्ध्या कुर्यात् यथेच्छया पुनः शिरसि गुरुक्रमम् ।

महाश्मशानमभ्यर्च्य क्षेत्रं पीठमनन्तरम् । वृक्षं वल्लीं समभ्यर्च्य पालकानपि मण्डले ॥ ४३ ॥

ततोऽर्चयेच्छिरीषादीन् वृक्षांश्चण्डादिभैरवान् । अनन्ताद्यांस्तथा नागान् पूर्वादीशान्तमादरात् ॥४४॥

असिचर्मधरानष्टौ मानुषोत्तमविग्रहान् ।... ....

तद्यथा—५ महाश्मशानाय नमः । ५ प्रयागक्षेत्राय नमः । ५ परापरपीठाय नमः । ५ कल्पवृक्षाय नमः । ५ ज्योतिष्मतीवल्ल्यै नमः । ५ पालकेभ्यो नमः । अग्निकोणमारभ्य–५ शिरीषाय नमः । ५ करञ्जाय नमः । ५ अश्वत्थाय नमः । ५ प्लक्षाय नमः । ५ अशोकाय नमः । ५ रक्ताशोकाय नमः । ५ चूताय नमः । ५ वटकाय नमः । ५ चण्डभैरवाय नमः । ५ क्रोधभैरवाय नमः । ५ गं गह्वरभैरवाय नमः । ५ बालामालाकुलभैरवाय नमः । ५ भीषणाट्टहासभैरवाय नमः । ५ घोरान्धकारभैरवाय नमः । ५ लक्ष्मीभैरवाय नमः । ५ करालभैरवाय नमः । ५ अनन्ताय नमः । ५ वासुकये नमः । ५ तक्षकाय नमः । ५ कर्कोटाय नमः । ५ शङ्खाय नमः । ५ महाशङ्खाय नमः । ५ पद्माय नमः । महापद्माय नमः ॥ अथ ध्यानम्—

दृश्योर्ध्वाङ्गान् भीषणाभान् वृक्षस्कन्धसमाश्रितान् । त्रिशूलकर्तृमुण्डाग्रान् ध्वजं चासृक्कपालकम् ॥१॥

बिभ्राणांस्तर्जितकरान् जानुन्यस्तमुखाम्बुजान् । विलम्बितैकचरणान् महाश्मशानपालकान् ॥ २ ॥

पीतरक्तनीलसितहरित्कृष्णारुणप्रभान् । श्वेतोष्ठभान् हरिव्याघ्रशिवेभतुरगाननान् ॥ ३ ॥

भल्लूकवृषभव्याघ्रहरिवक्त्रांश्च भैरवान् । असिचर्मधरान् नागान् मानुषोत्तमविग्रहान् ॥ ४ ॥

एवं सम्यक् समभ्यर्च्य क्षेत्ररक्षां विधाय च । एतानेव स्वदेहस्थान् सञ्चिन्त्यान्नं निवेदयेत् ॥ ५ ॥

अथ तिरस्करिणीं प्रपूजयेत् । ततो गुरुक्रमम् । हसक्लीं नमः अंगुष्ठाभ्यां नमः । भगवति तर्जनीभ्यां नमः । माहेश्वरि मध्यमाभ्यां नमः । सर्वपशुजनचक्षुस्तिरस्करणं अनामिकाभ्यां नमः । कुरुकुरु कनिष्ठिकाभ्यां नमः । स्वाहा करतलकरपृष्ठाभ्यां नमः । एवमेव हृदयादि व्यापकं विन्यस्य ध्यायेत् ।

मुक्तकेशीं विवस्त्राङ्गीं सर्वालङ्कारभूषिताम् । स्वयोनिदर्शनान्मुह्यत्पशुवर्गामनुस्मरेत् ॥ १ ॥

ततो हृत्पद्ममध्यस्थां त्रिकोणान्तर्निवासिनीम् । तिरस्करणिकां ध्यायेद्भक्तसंरक्षणोत्सुकाम् ॥ २ ॥

श्यामवर्णां मदाघूर्णरक्तनेत्रत्रयान्विताम् । कृष्णाम्बरां गदां खड्गं दधतीं च भुजद्वये ॥ ३ ॥

दोर्भ्यां मनोहराभ्यां च खर्जूरीकुम्भधारिणीम् । ....॥
नीलं तुरङ्गमधिरुह्य सुशोभमाना नीलांशुकाभरणमाल्यविभूषणाढ्या ।
निद्रादटेन भुवनानि तिरोदधाना खड्गायुधा भगवती परिपातु चास्मान् ॥४॥

इति पञ्चोपचारान् परिकल्प्य हेतुपुष्पाक्षतादिभिः पूजागृहाद्बहिः परिपूज्यान्धो रक्षां विधाय, ५ हसक्लीं नमो भगवती माहेश्वरि सर्वपशुजनचक्षुस्तिरस्करणं कुरु २ स्वाहा । पुनः शिरसि गुरुक्रमम् ।

मानसादिपृथिव्यन्तं षडन्वयसुधोदधेः । मरीचिविचिनिचये चचार चतुरान्तरः ॥ १ ॥

इति मानसक्रमपूजापद्धति ॥ श्रीशांभवगुरवे नमः । अथ नाभसरश्मिक्रमः ।

कूटं विच्चेश्वरस्याथ विशुद्धौ स्फटिकोपमम् । तदुद्भवं तथा देवमात्मानं हृदि भावयेत् ॥ १ ॥
शुद्धस्फटिकसङ्काशं षड्वक्त्रं द्वादशांघ्रिकम् । भैरवाभं शूलचक्रांकुशपाशशरान् वरम् ॥ २ ॥
दक्षे वामे तथा शङ्खध्वजाहिनृमुखं दधत् । चापाभये च बिभ्राणस्तद्वद् देवीं कुलेश्वरीम् ॥ ३ ॥

ध्यायेदिति शेषः । दक्षोर्ध्ववामोर्ध्वक्रमत आयुधध्यानम् ।

देवी च देववर्णाभा तत्प्रभावा तथास्थिता । खड्गकार्धचापशरपाशांकुशाभयवरान् ॥ ४ ॥
पुस्तजाप्यशूलकादीन् संदधत्यङ्कमण्डले ।.... ....

इति ध्यात्वा, ५ ह्स्रां फ्रां ५ इत्यादिनाङ्गन्यासं विधाय, शिरसि षट्कोणे पूर्वादीशान्तं षट्त्रिंशद्रश्मीन् भावयेत् । ५ ह्वं हृदयानन्दनाथ कौलिनीपराम्बा ह् ५ श्रीपा० । ५ धं धरानन्दनाथ धात्रीपराम्बा धं ५ श्री० । ५ भां भावानन्दनाथ विश्वात्मिकापराम्बा भां ५ श्री० । ५ भं भवानन्दनाथ योगिनीपराम्बा भं ५ श्री० । ५ मं महानन्दनाथ ब्रह्मपराम्बा मं ५ श्री० । ५ सं सर्वानन्दनाथ शाम्भवीपराम्बा सं ५ श्री० । (६) इति पूर्वकोणे ॥ ५ द्रं द्रवानन्दनाथ कालिकापराम्बा द्रं ५ श्री० । ५ रं रमानन्दनाथ दुष्टचाण्डालीपराम्बा रं ५ श्री० । ५ मं मोहानन्दनाथ अघोरापराम्बा मं ५ श्री० । ५ मं मनोभवानन्दनाथ हेलापराम्बा मं ५ श्री० । ५ सं सेकानन्दनाथ महारक्तापराम्बा सं ५ श्री० । ५ जं ज्ञानानन्दनाथ कुब्जिकापराम्बा जं ५ श्री० । (६) इत्याग्नेयकोणे ॥ ५ खं खेटानन्दनाथ डाकिनीपराम्बा खं ५ श्री० । ५ ज्वं ज्वालानन्दनाथ राकिणीपराम्बा ज्वं ५ श्री० । ५ मं महांकुशानन्दनाथ लाकिनीपराम्बा मं ५ श्री० । ५ शं श्रयोज्वालानन्दनाथ काकिनीपराम्बा शं ५ श्री० । ५ तं तेजसानन्दनाथ शाकिनीपराम्बा तं ५ श्री० । ५ मं मूर्धानन्दनाथ हाकिनीपराम्बा मं ५ श्री० । (६) इति नैर्ऋत्यकोणे ॥ ५ वं वायव्यानन्दनाथ पद्मापराम्बा वं ५ श्री० । ५ कुं कुलानन्दनाथ लिंहापराम्बा कुं ५ श्री० । ५ सं संहारानन्दनाथ कुलाम्बिकापराम्बा सं ५ श्री० । ५ वं विश्वम्भरानन्दनाथ कामापराम्बा वं ५ श्री० । ५ कं कौटिकानन्दनाथ कूर्ममातापराम्बा कं ५ श्री० । ५ गं गालवानन्दनाथ ककालीपराम्बा गं ५ श्री० । (६) इति पश्चिमकोणे ॥ ५ वं व्योमानन्दनाथ व्योमापराम्बा वं ५ श्री० । ५ शं श्वासानन्दनाथ नादापराम्बा शं ५ श्री० । ५ खं खेचरानन्दनाथ महिमापराम्बा खं ५ श्री० । ५ बं बहुलानन्दनाथ महामायापराम्बा बं ५ श्री० । ५ ज्ञां ज्ञानानन्दनाथ कुण्डलीपराम्बा ज्ञां ५ श्री० । ५ वं विश्वानन्दनाथ उन्मनीपराम्बा वं ५ श्री० । (६) इति वायव्यकोणे ॥ ५ आं आज्ञानन्दनाथ इन्धिकापराम्बा आं ५ श्री० । ५ मं मदनानन्दनाथ दीपिकापराम्बा मं ५ श्री० । ५ यं यशानन्दनाथ रेचिकापराम्बा यं ५ श्री० । ५ शं शंखोदयानन्दनाथ मोचिकापराम्बा शं ५ श्री० । ५ वं वरानन्दनाथ चित्तिपराम्बा वं ५ श्री० । ५ पं परानन्दनाथ परापराम्बा पं ५ श्री० । (६) इतिशानकोणे ॥ अथ रश्मिध्यानम्—

शुक्लं रक्तं श्यामलं च धूम्राभं च रविप्रभम् । षट्कं स्फटिकसङ्काशं षटकं षट्कं क्रमेण तु ॥ १ ॥
वराभययुताः सर्वा नाभसक्रमदेवताः । नत्वा स्तुत्वा मनुं जप्त्वा नामसक्रममाचरेत् ॥ २ ॥

इति विच्चेश्वरक्रमः । हस्रीं हसरफ्रामित्यादिनाङ्गन्यासः ।

कूटं हंसेश्वरस्याथ धूम्राभं हृदि भावयेत् । तदुद्भवं तथा देवमात्मानं परिभावयेत् ॥ १ ॥

ध्यानं विच्चेश्वरवत् । पुनर्गुरुक्रमम् । शिरसि षट्कोणे पूर्वादीशान्तं सप्तविंशतिरश्मीन् भावयेत् । ५ लमयरूं खगेश्वरानन्दनाथ भद्रापराम्बा लमयरूं ५ श्री० । ५ लमयरूं कूर्मानन्दनाथ माधवीपराम्बा लमयरूं ५ श्री० । ५ लमयरूं मेघानन्दनाथ केशापराम्बा लमयरूं ५ श्री० । ५ लमयरूं मीनानन्दनाथ मल्लीपराम्बा लमयरूं ५ श्री० । (४) इति पूर्वकोणे ॥ ५ वमयरूं ज्ञानानन्दनाथ विमलापराम्बा वमयरूं ५ श्री० । ५ वमयरूं महानन्दनाथ शाम्बरीपराम्बा वमयरूं ५ श्री० । ५ वमयरूं तीव्रानन्दनाथ लीलापराम्बा वमयरूं ५ श्री० । ५ वमयरूं प्रियानन्दनाथ कुमुन्दापराम्बा वमयरूं ५ श्री० । ५ वमयरूं कौलिकानन्दनाथ मेनकापराम्बा वमयरूं ५ श्री० । (५) इत्यग्निकोणे ॥ ५ रमयरूं डामरानन्दनाथ डाकिनीपराम्बा रमयरूं ५ श्री० । ५ रमयरूं रामरानन्दनाथ राकिणीपराम्बा रमयरूं ५ श्री० । ५ रमयरूं लामरानन्दनाथ लाकिनीपराम्बा रमयरूं ५ श्री० । ५ रमयरूं कामरानन्दनाथ काकिनीपराम्बा रमयरूं ५ श्री० । ५ रमयरूं सामरानन्दनाथ शाकिनीपराम्बा रमयरूं ५ श्री० । ५ रमयरूं हामरानन्दनाथ हाकिनीपराम्बा रमयरूं ५ श्री० । (६) इति नैर्ऋत्यकोणे ॥ ५ यमयरूं आधारेशानन्दनाथ रक्तापराम्बा यमयरूं ५ श्री० । ५ यमयरूं चक्रेशानन्दनाथ बिन्दुपराम्बा यमयरूं ५ श्री० । ५ यमयरूं कुरङ्गीशानन्दनाथ कुलापराम्बा यमयरूं ५ श्री० । ५ यमयरूं समुद्रेशानन्दनाथ कुब्जिकापराम्बा यमयरूं ५ श्री० । (४) इति पश्चिमकोणे ॥ ५ हमयरूं हृदीशानन्दनाथ कमलापराम्बा हमयरूं ५ श्री० । ५ हमयरूं गिरिशानन्दनाथ कुटिकदीधितिकापराम्बा हमयरूं ५ श्री० । ५ हमयरूं शिखेशानन्दनाथ कर्बुरापराम्बा हमयरूं ५ श्री० । ५ हमयरूं वर्मीशानन्दनाथ बहुरूपापराम्बा हमयरूं ५ श्री० । ५ हमयरूं आम्रेशानन्दनाथ महत्तारीपराम्बा हमयरूं ५ श्री० । (५) इति वायव्यकोणे ॥ ५ समयरूं परगुर्वानन्दनाथ मङ्गलापराम्बा समयरूं ५ श्री० । ५ समयरूं पराधिकारगुर्वानन्दनाथ कौसलीपराम्बा समयरूं ५ श्री० । ५ समयरूं पूज्यगुर्वानन्दनाथ समानीपराम्बा समयरूं ५ श्री० । (३) इतीशानकोणे रश्मित्रयं पूजयेत् ॥ अथ रश्मिध्यानम्—

पीतं चतुष्कं श्यामं तु पञ्चकं रक्तसन्निभम् । षट्कं चतुष्कं श्यामं तु धूम्राभं पञ्चकं पुनः ॥ १ ॥
चन्द्रप्रभं त्रिकं सर्वे बालसूर्यसमप्रभाः । वरदाभयहस्ताश्च मदघूर्णितलोचनाः ॥ २ ॥
नत्वा स्तुत्वा मनुं जप्त्वा वायव्यक्रममाचरेत् ।.... ....॥

पुनर्गुरुक्रममिति हंसेश्वरक्रमः ॥ अथ संवर्तकेश्वरक्रमः । ध्यानम्—

कूटं सप्तमकं ध्यात्वा संवर्तेशस्य सादरात् । उदयार्कसमप्रख्यं स्वाधिष्ठाने तदुद्भवम् ॥ १ ॥
देवं विभावयेत् पश्चात्सम्यक् सूत्रोक्तमार्गतः । भिन्ननीलाञ्जनप्रख्यं तिथिनेत्रं दशाङ्घ्रिकम् ॥ २ ॥
लसद्दंष्ट्राकरालास्यं वर्बरोर्ध्वशिरोरुहम् । द्विरष्टवर्षदेशीयं रत्नसर्पास्थिचर्चितम् ॥ ३ ॥
यावद्भूषणसंयुक्तमेकपादकजास्थितम् । पञ्चासनासने वह्निनाभिपद्मांगुलीयकम् ॥ ४ ॥
मुण्डमालाचर्चिताङ्गं गन्धादिकुसुमाञ्चितम् । आन्त्रालिबद्धकट्टारकटिकाञ्चीपदाञ्चितम् ॥ ५ ॥
अस्य दक्षिणदोर्दण्डे शस्त्राणि विविधानि च । शूलं चक्रं ध्वजं दानं दधद्वामे परं शृणु ॥ ६ ॥
पारिजातं जाप्यमालां पुस्तकं चाभयं प्रिये । शेषाभ्यां चैव बाहुभ्यां ब्रह्मचर्मविदारणे ॥ ७ ॥
ततो रक्तनिभं श्लोकं (कूटं) तुरीयं योनिमध्यतः । ध्यात्वा तद्रश्मिसंभूतं देवीरूपमनन्यधीः ॥ ८ ॥
स्वात्मानं मूलसूत्रोक्तक्रमात् सम्यग् विभावयेत् । सहस्रभेदसंभिन्ना नित्येयं श्रीमहाचितिः ॥ ९ ॥
तेभ्यः सारतरा मूर्तिः समयाख्या निगद्यते । अतसीपुष्पसङ्काशशरीरांशुधरा चितिः ॥ १० ॥
दशास्या वा षडास्या वा विंशत्यास्या शतोन्मुखी । सहस्ररश्मिसंघातसम्पूर्णस्फुरदीक्षणा ॥ ११ ॥

शूलकार्ध चापशरखड्गवरधरा चितिः । सृणिपाशचक्रशंखगदारत्नविभूषिता ॥ १२ ॥
डिण्डीडमरुवज्राख्यभुशुण्डीशूलपाणिनी । शक्तिशल्यलसत्कुन्तसर्पजाध्यं(ख्य)धारिणी ॥ १३ ॥

इति ध्यानम् ॥ अथ संवर्तेश्वरन्यासः—५ हं व्योमानन्दनाथ रजनीपराम्बा हं ५ करतलाभ्यां नमः । ५ सं चिदानन्दनाथ चितिपराम्बा स ५ करपृष्ठाभ्यां नमः । ५ क्षं अहङ्कारानन्दनाथ क्रोधिनीपराम्बा क्षं ५ अंगुष्ठाभ्यां नमः । ५ मं बुद्ध्यानन्दनाथ कुलवागीश्वरीपराम्बा मं ५ तर्जनीभ्यां नमः । ५ लं ऋध्यानन्दनाथ मातृकापराम्बा लं ५ मध्यमाभ्यां नमः । ५ वं अमृतानन्दनाथ देवद्रवीपराम्बा वं ५ अनामिकाभ्यां नमः । ५ यं अचलानन्दनाथ चलापराम्बा यं ५ कनिष्ठिकाभ्यां नमः । ५ रं दीप्तानन्दनाथ ज्वालिनीपराम्बा रं ५ करपृष्ठाभ्यां नमः । ५ ऊं प्रकृतीशानन्दनाथ प्रकृतीपराम्बा ऊं ५ करतलाभ्यां नमः । इति करन्यासः ॥ ५ हंसं विशुद्धानन्दनाथ शंखिनीपराम्बा हंसं ५ हृदयाय नमः । ५ क्षमं प्राणानन्दनाथ योगीश्वरीपराम्बा क्षमं ५ शिरसे स्वाहा । ५ लवं ज्ञानानन्दनाथ बिन्दुपराम्बा लवं ५ शिखायै वषट् । ५ यरं व्यापकानन्दनाथ इन्धिकापराम्बा यरं ५ कवचाय हुं । ५ ऊं विस्तारानन्दनाथ विस्तारापराम्बा ऊं ५ नेत्रत्रयाय वौषट् । ५ अंअः शूरानन्दनाथ प्रीतवतीपराम्बा अंअः ५ अस्त्राय फट् । इत्यङ्गन्यासः ॥ ५ हंसं कालवक्त्रानन्दनाथ योगीश्वरीपराम्बा संहं ५ पश्चिमवक्त्राय नमः । ५ क्षमं रौद्रवक्त्रानन्दनाथ संहारिणीपराम्बा मक्षं ५ उत्तरवक्त्राय नमः । ५ लवं विश्वग्रसनानन्दनाथ दहनीपराम्बा वलं ५ दक्षिणवक्त्राय नमः । ५ यरं प्रकाशानन्दनाथ ज्योतिष्पराम्बा रयं ५ पूर्ववक्त्राय नमः । ५ ऊं हर्षानन्दनाथ अमृतवाहिनीपराम्बा ऊं ५ ऊर्ध्ववक्त्राय नमः । ५ अंअः परानन्दनाथ परापराम्बा अःअं ५ परापरवक्त्राय नमः । इति वक्त्रन्यासः ॥ अथ करन्यासः—५ ऐं नित्ये भगवति हसखफ्रें कुलेश्वरि ५ कनिष्ठिकाभ्यां नमः । ५ ह्रांह्रूंह्रींह्लांह्लूंह्लींह्यैंहंहौं ङञणनमे ५ अनामिकाभ्यां नमः । क्ष्रांक्ष्रूंक्ष्रींश्रीफट् हस्रौं फ्रें अघोरमुखि कुब्जिकायै ५ मध्यमाभ्यां० । ५ छ्रांछ्रूंछ्रीं घोरे अघोरे ५ तर्जनीभ्यां० । ५ यंरंलंवंहंसं ५ अंगुष्ठाभ्यां० । ५ किणिकिणि महाकिणिकिणि विच्चे ५ करतलकरपृष्ठाभ्यां नमः । एभिरेव हृदयाद्यङ्गन्यासः ॥ ५ ऐं नित्ये भगवति ५ पश्चिमवक्त्राय नमः । ५ हसखफ्रें कुलेश्वरि ५ उत्तरवक्त्राय नमः । ५ ह्रींह्रूंह्रींह्लांह्लूंह्लींह्यैंहंहौं ५ दक्षिणवक्त्राय नमः । ५ ङञणनमे ५ पूर्ववक्त्राय नमः । ५ क्ष्रांक्ष्रूंक्ष्रींश्रींफट् हस्रौं फ्रें ५ वायव्यवक्त्राय नमः । ५ अघोरमुखि कुब्जिकायै ५ नैर्ऋत्यवक्त्राय नमः । ५ छ्रांछ्रूंछ्रीं ५ ईशानवक्त्राय नमः । ५ घोरे अघोरे ५ आग्नेयवक्त्राय नमः । ५ यंरंलंवंहंसं ५ ऊर्ध्ववक्त्राय नमः । ५ किणिकिणि महाकिणिकिणि विच्चे ५ परापरवक्त्राय नमः । इति महाशक्तिन्यासः ॥ शिरसि षट्कोणे नैर्ऋत्याद्याग्नेयान्तमेकत्रिंशद्रश्मीन् भावयेत् । ५ सहलां परापरानन्दनाथ चण्डीश्वरीपराम्बा सहलां ५ । ५ सहलां परानन्दनाथ गुह्यकालिकापराम्बा सहलां ५ । ५ सहलां अपरानन्दनाथ संवर्तापराम्बा सहलां ५ । ५ सह्लां परमानन्दनाथ उच्छुष्मापराम्बा सह्लां ५ । ५ सहलां पैचिकानन्दनाथ नीलकुब्जिकापराम्बा सहलां ५ । (५) इति नैर्ऋत्यकोणे ॥ ५ सह्वीं अघोरानन्दनाथ गन्धापराम्बा सह्वीं ५ । ५ सह्वीं डामराघोरानन्दनाथ रसापराम्बा सह्वीं ५ । ५ सह्वीं ललितानन्दनाथ रूपापराम्बा सह्वीं ५ । ५ सह्वीं स्वच्छानन्दनाथ स्पर्शापराम्बा सह्वीं ५ । ५ सह्वीं भूतेश्वरानन्दनाथ शब्दापराम्बा सह्वीं ५ श्रीं० । (५) इति पश्चिमकोणे ॥ ५ सह्रूं आनन्दानन्दनाथ डाकिनीपराम्बा सह्रूं ५ श्री० । ५ सह्रूं आलस्यानन्दनाथ रत्नडाकिनीपराम्बा सह्रूं ५ श्री० । ५ सह्रूं ब्रह्मानन्दनाथ चक्रडाकिनीपराम्बा सह्रूं ५ श्री० । ५ सह्रूं योम्यानन्दनाथ पद्मडाकिनीपराम्बा सह्रूं ५ । ५ सह्रूं अतीतानन्दनाथ कुब्जडाकिनीपराम्बा सह्रूं ५ । ५ सह्रूं पादेश्वरानन्दनाथ प्रचण्डडाकिनीपराम्बा सह्रूं ५ । (६) इति वायव्यकोणे ॥ ५ सहयैं योगेश्वरानन्दनाथ प्रचण्डापराम्बा सहयैं ५ । ५ सह्यैं पीठेश्वरानन्दनाथ कौलिनीपराम्बा सह्यैं ५ । ५ सह्यैं कुलकौलेश्वरानन्दनाथ पावनीपराम्बा सह्यैं ५ । ५ सह्यैं कुब्जेश्वरानन्दनाथ महासमयापराम्बा सह्यैं

५। (४) इतीशानकोणे ॥ ५ सहौं श्रीकण्ठानन्दनाथ कामापराम्बा सहौं ५। ५ स्हौं अनन्तानन्दनाथ चर्चिकापराम्बा स्हौं ५। ५ स्हौं शङ्करानन्दनाथ ज्वालापराम्बा स्हौं ५। ५ स्हौं पिङ्गलानन्दनाथ कलारावापराम्बा स्हौं ५। ५ स्हौं सदाख्यानन्दनाथ नागापराम्बा स्हौं ५। (५) इति पूर्वकोणे ॥ ५ स्हः कालगुर्वानन्दनाथ परापराम्बा स्हः ५। ५ स्हः सिद्धगुर्वानन्दनाथ शान्त्यतीतापराम्बा स्हः ५। ५ स्हः रत्नगुर्वानन्दनाथ शान्तिपराम्बा स्हः ५। ५ स्हः शिवगुर्वानन्दनाथ विद्यापराम्बा स्हः ५। ५ स्हः मैनाकगुर्वानन्दनाथ प्रतिष्ठापराम्बा स्हः ५। ५ स्हः समयगुर्वानन्दनाथ निवृत्तिपराम्बा स्हः ५। (६) इत्यग्निकोणे ॥

पञ्चकाद्याः क्रमात् पीतश्यामकृष्णारुणप्रभाः। शुक्लस्फटिकवर्णाभा वरदाभयसंयुताः ॥ १४ ॥
कार्य्यादाकारिताः सर्वा निराकारा निरामयाः। पञ्चकं पञ्चकं षट्कं चतुष्कं पञ्चकं पुनः ॥ १५ ॥
षट्कमिति क्रमाद्भिन्नास्तैजसक्रमरश्मयः। नत्वा स्तुत्वा मनुं जप्त्वा तैजसक्रममाचरेत् ॥ १६ ॥

पुनर्गुरुक्रमः ॥ इति संवर्तकेश्वरः ॥

अथ द्वीपेश्वरक्रमः। ध्यानम्—

कूटं द्वीपेश्वरस्याथ मणिपूरे सितप्रभम्। ध्यात्वा तदुद्ध्वं देवमात्मानं परिभावयेत् ॥ १ ॥
श्यामवर्णो दशभुजो पञ्चैकाम्बकचर्चितः। दंष्ट्राकरालवदनो भैरवाभरणो विभुः ॥ २ ॥
महाशवासनस्थोऽयं मातृमण्डलमध्यगः। सर्वतत्त्वेश्वरः श्रीमान् सर्वाश्रमसुपूजितः ॥ ३ ॥
शूलं खड्गं तथा चक्रमंकुशं वरदं तथा। बिभ्रद् दक्षे तथा वामे खट्वाङ्गं परशुं तथा ॥ ४ ॥
गदां पाशं चाभयाख्यं बाहुभ्यां गजचर्मकम्। द्वीपेश्वरं विभाव्याथ ततस्तुर्याक्षरं स्मरेत् ॥ ५ ॥
देवीं च देववर्णाभां स्थितां च शयनोपरि। शङ्खचक्रगदापद्मशूलं पाशं वराभये ॥ ६ ॥

दधतीमितिशेषः। इति ध्यानम्। आं इत्यादि ह्स्रांह्स्रीं ऐं इत्याद्यङ्गन्यासं विधाय, शिरसि षट्कोणे ईशानादिवायव्यान्तं षड्विंशतिरश्मीन् भावयेत्। ५ लं सद्यानन्दनाथ मायापराम्बा लं ५। ५ लं वामानन्दनाथ श्रीपराम्बा लं ५। ५ लं अघोरानन्दनाथ पद्मापराम्बा लं ५। ५ लं तत्पुरुषानन्दनाथ अम्बिकापराम्बा लं ५। (४) इतीशानकोणे ॥ ५ वं अनन्तानन्दनाथ निवृत्तिपराम्बा व ५। ५ वं अनाथानन्दनाथ प्रतिष्ठापराम्बा वं ५ श्री०। ५ वं अनाश्रितानन्दनाथ विद्यापराम्बा वं ५ श्री०। ५ वं अचिन्त्यानन्दनाथ शान्तिपराम्बा व ५। (४) इति पूर्वकोणे ॥ ५ रं शेखरानन्दनाथ शान्त्यतीतापराम्बा रं ५। ५ रं तीव्रानन्दनाथ गङ्गापराम्बा रं ५। ५ रं मणिवाहानन्दनाथ सरस्वतीपराम्बा रं ५। ५ रं अम्बुवाहानन्दनाथ कमलापराम्बा रं ५। ५ रं जालेश्वरानन्दनाथ यमुनापराम्बा रं ५। ५ रं तेजोधीशानन्दनाथ पार्वतीपराम्बा रं ५। (६) इत्यग्निकोणे ॥ ५ यं विद्यावागीश्वरानन्दनाथ चित्रापराम्बा यं ५। ५ यं चतुर्विद्येश्वरानन्दनाथ सुकमलापराम्बा यं ५। ५ यं उमाङ्गेश्वरानन्दनाथ मन्मथापराम्बा यं ५ श्री०। ५ यं कृष्णेश्वरानन्दनाथ श्रीपराम्बा यं ५ श्री०। (४) इति नैर्ऋतकोणे ॥ ५ हं श्रीकण्ठानन्दनाथ लयापराम्बा हं ५ श्री०। ५ हं अनन्तानन्दनाथ वसन्तापराम्बा हं ५। ५ हं शङ्करानन्दनाथ रत्नमेखलापराम्बा हं ५। ५ हं पिङ्गलानन्दनाथ यशोवतीपराम्बा हं ५। ५ हं सदाख्यानन्दनाथ कुब्जिकापराम्बा हं ५। (५) इति पश्चिमकोणे ॥ ५ सं सर्वदेवेशानन्दनाथ वामापराम्बा सं ५। ५ सं परमदिव्यौघानन्दनाथ ज्येष्ठापराम्बा सं ५। ५ सं पीठेश्वरानन्दनाथ रौद्रीपराम्बा सं ५। (३) इति वायव्यकोणे ॥

पीतं श्यामं रक्तकृष्णं शुक्लं भास्करसन्निभम्। चतुष्कं च चतुष्कं च षट्कं भूयश्चतुष्ककम् ॥ ७ ॥
पञ्चकं त्रिकमित्येव भिन्ना जलमरीचयः। नत्वा स्तुत्वा मनुं जप्त्वा ह्याथाप्य–क्रममाचरेत् ॥ ८ ॥

पुनर्गुरुक्रमः। इति द्वीपेश्वरक्रमः ॥

अथ पार्थिवक्रमस्तत्र न्यासः। ५ हंसं अंगुष्ठाभ्यां नमः। ५ क्षमं तर्जनीभ्यां नमः। ५ लंवं मध्यमा-

भ्यां नमः । ५ यरं अनामिकाभ्यां नमः । ५ ऊं कनिष्ठिकाभ्यां नमः । ५ अंअः करतलकरपृष्ठाभ्यां नमः । एभिरेव हृदयाद्यङ्गन्यासः ॥ ५ हसखफ्रां नमो भगवति कमलायै हसखफ्रां ५ कनिष्ठिकाभ्यां नमः । ५ हसखफ्रीं कुब्जिकायै कुलदीपिकायै हसखफ्रीं ५ अनामिकाभ्यां नमः । ५ हसखफ्रूं ह्रांह्रींह्रौं ङञणनमे ववंरायै हसखफ्रूं ५ मध्यमाभ्यां नमः । ५ हसखफ्रैं अघोरमुखि बहुरूपायै हसखफ्रैं ५ तर्जनीभ्यां नमः । ५ हसखफ्रौं छ्रांछ्रींछ्रौं महातारायै हसखफ्रौं ५ अंगुष्ठाभ्यां नमः । ५ हसखफ्रः किणिकिणि विच्चे कोकणायै हसखफ्रः ५ करतलकर-पृष्ठाभ्यां नमः । एवमेव हृदयादिन्यासः ॥ तथा वक्त्रन्यासः । अथ ध्यानम्—

विभाव्यं देवकूटं तु मूलाधारेऽरुणप्रभम् । तदुद्ध्र्वं तथा देवमात्मानं परिभावयेत् ॥ १ ॥
संवर्तेश्वरतुल्यस्तु देवो ललितविग्रहः ।···· ···· ···· ···· ···· ····॥

संवर्तेश्वरप्रथमध्यानम् । अथ शक्तिध्यानम्

नीलाञ्जनचयप्रख्यां कुब्जरूपां महोदरीम् । षड्वक्त्रां द्वादशभुजां रत्नसर्पास्थिचर्चिताम् ॥ २ ॥
मुण्डमालाधरां रौद्रीं दंष्ट्राकालानलाननाम् । अष्टादशाम्बकां देवीं बर्बरोर्ध्वशिरोरुहाम् ॥ ३ ॥
व्याघ्रचर्मपरीधानां सिंहचर्मोत्तरच्छदाम् । दिव्याभरणभूषाङ्गीं ध्यायेदट्टाट्टहासिनीम् ॥ ४ ॥
अस्याः पीतमाद्यवक्त्रामुत्तरं सोमसन्निभम् । दक्षिणं कृष्णवर्णं च यत्प्राग् दर्शितमम्बिके ॥ ५ ॥
पूर्ववक्त्रं भवेद्रक्तमीशानं स्फटिकोपमम् । सहस्रसूर्यसङ्काशमूर्ध्ववक्त्रं महाचितेः ॥ ६ ॥
दंष्ट्राकरालान्यखिलवक्त्राण्युक्तानि शम्भुना । त्रिशूलचक्रवज्राणि अंकुशं शरकर्तरीः ॥ ७ ॥
दक्षिणे वामतो देवी नीलोत्पलशताकर(तच्छद)म् । अन्यत्समुण्डखट्वाङ्गं घण्टापुस्तधनुस्तथा ॥ ८ ॥
कपालं वामके हस्ते सिंहासनभवासनम् । ···· ···· ···· ···· ···· ····॥

इति ध्यात्वा, पार्थिवशाम्भवेनाङ्गन्यासं विधाय शिरसि षट्कोणे पश्चिमादिनैर्ऋत्यन्तमष्टाविंशति-रश्मीन् भावयेत् । ५ लमयरूं उड्याणमहापीठ उड्येश्वरानन्दनाथ उड्येश्वरीपराम्बा लमयरूं ५ श्री० । वमयरूं जालन्धरमहापीठ जालेश्वरान्दनाथ जालेश्वरीपराम्बा वमयरूं ५ । ५ रमररूं पूर्णगिरिमहापीठ पूर्ण-गिरिजानन्दनाथ पूर्णेश्वरीपराम्बा रमयरूं ५ । ५ मयरूं कामेश्वरमहापीठ कामेश्वरानन्दनाथ कामेश्वरी-पराम्बा मयरूं ५ । (४) इति पश्चिमकोणे ॥ ५ ग्लूं श्रीकण्ठानन्दनाथ गगनापराम्बा ग्लूं ५ । ५ स्लूं अनन्तानन्दनाथ स्वर्गापराम्बा स्लूं ५ । ५ म्लूं शङ्करानन्दनाथ मर्त्यापराम्बा म्लूं ५ । ५ प्लूं पिङ्गलानन्द-नाथ पातालापराम्बा प्लूं ५ । ५ न्लूं सद्योजानन्दनाथ नागापराम्बा न्लूं ५ । ५ (५) इति वायव्यकोणे ॥ ५ डमयरूं आनन्दानन्दनाथ डाकिनीपराम्बा डमयरूं ५ । ५ रमयरूं आवल्यानन्दनाथ राकिणीपराम्बा रमयरूं ५ । ५ लमयरूं पूजानन्दनाथ लाकिनीपराम्बा लमयरूं ५ । ५ कमयरूं योगानन्दनाथ काकिनी-पराम्बा कमयरूं ५ । ५ शमयरूं अतीतानन्दनाथ शाकिनीपराम्बा शमयरूं ५ । ५ हमयरूं पादानन्दनाथ हाकिनीपराम्बा हमयरूं ५ । ५ (६) इतीशानकोणे ॥ ५ लं आधारशानन्दनाथ रक्तापराम्बा लं ५ । ५ वं चक्रेशानन्दनाथ चण्डिकापराम्बा वं ५ । ५ रं कुरङ्गेशानन्दनाथ करालापराम्बा रं ५ । ५ यं मदध्नेशानन्द-नाथ महोच्छुष्मापराम्बा यं ५ । (४) इति पूर्वकोणे ॥ ५ गं अनादिविमलानन्दनाथ शावरीपराम्बा गं ५ । ५ सं सर्वज्ञविमलानन्दनाथ पुलन्दिनीपराम्बा सं ५ । ५ यं योगविमलानन्दनाथ शवरीपराम्बा यं ५ । ५ यं सिद्धिविमलानन्दनाथ पराम्बिकापराम्बा यं ५ । ५ नं समयविमलानन्दनाथ कुलिकापराम्बा नं ५ । (५) इत्यग्निकोणे ॥ ५ लमयरूं मित्रेशानन्दनाथ कुब्जिकापराम्बा लमयरूं ५ श्री० । ५ वमयरूं उड्डीशानन्दनाथ लम्बीपराम्बा वमयरूं ५ । ५ रमयरूं षष्ठीशानन्दनाथ कुलेश्वरीपराम्बा रमयरूं ५ । ५ यमयरूं चर्यानन्द-नाथ कुलकौलेश्वरीपराम्बा यमयरूं ५ । (४) इति नैर्ऋत्यकोणे ॥ अथ ध्यानम्—

पीतं श्यामं कृष्णरक्तं शुक्लं भास्करसन्निभम् । चतुष्काद्याः क्रमात्सर्वे वरदाभयसंयुताः ॥ १ ॥
चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चकं पुनः । चतुष्कमिति संभिन्नाः क्रमात् पार्थिवरश्मयः ॥ २ ॥

पुनर्देवदेव्यौ त्रिधा सम्पूज्य, पुनर्गुरुक्रमं नत्वा स्तुत्वा मनुं च जप्त्वा पार्थिवक्रममाचरेत्। इति नवात्मेश्वरक्रमः॥ अथायुधपूजा—"आयुधानि यजेत् पश्चात् कराग्रेषु च मन्त्रवित्।" ५ हं ब्रह्मकपालाय हं नमः। एवं ५ सं त्रिशूलाय सं० ५। क्षं चक्राय क्षं। मं ध्वजाय मं। लं वराय लं। वं ब्रह्मपादाय वं। यं पारिभद्रप्रसूनाय यं। रं जाप्यमालायै रं। उं पुस्तकाय उं। अं अभयाय अं। श्रीपादुकां पूजयामि तर्पयामि नमः सर्वत्र। मानसादिपृथिव्यन्तं रश्मीन् भावयेत् पुंसः स्त्रियस्तथा क्रमादानन्दनाथ पराम्बेत्याद्युदीरिताः। श्रीपादुकां तर्पयामि नमो वदेत्, अर्चयेदर्चकेन्द्रः पूजयामीति, निर्वाणगुरुसम्प्रदायमवलम्ब्य कल्पिते ललितेश्वरविरचिते शिवषडन्वयार्चने।

श्रीनाथादिमुखाम्भोजात् पारम्पर्ययुतं जपेत्। उपदिष्टं मन्त्रजातमूर्ध्वाम्नायादिगोचरम्॥ १॥
तत् सर्वमस्मिन् समये पीठपूजादिकं विना। पारम्पर्यगुरुनाथमूलविद्याङ्गसन्ततिः॥ २॥
अङ्गपूजासमर्चान्ते बहिः पूजां तु बाह्यतः। नवात्ममण्डले तत्र महापूर्वश्मशानके॥ ३॥
अनेककोटियोगीन्द्रयोगिनीभैरवादिभिः। सेव्यमाने द्वारपेन्द्रविधिब्रह्माग्निमूर्तिभिः॥ ४॥
त्रिभिर्निशाटनाद्यैश्च पालकैर्द्वारमण्डले। प्रयागाख्ये शुचिक्षेत्रे सद्रज्योतिष्मतीयुते॥ ५॥
परापरमहापीठं संश्रितं श्रीनवात्मकम्। देवेशमर्चयेद्देवं गन्धपुष्पाक्षतादिभिः॥ ६॥
श्रीमहार्थं तथान्यं च श्रीविद्याक्रमेण च। एतत्सर्वं समानं स्याच्छ्रीशम्भोस्तु नवात्मकम्॥ ७॥
धूपदीपौ प्रदर्श्याथ बहुव्यञ्जनसंयुतम्। नैवेद्यं षड्रसोपेतं पुरतः स्थाप्य देशिकः॥ ८॥
अन्नपूर्णेश्वरीन्यासं ध्यानं कुर्याद्यजेत् पुनः।.... ....॥

ह्रीं भुवनायै नमः। श्रीं कमलायै नमः। क्लीं सुभगायै नमः। ॐ परविद्यायै नमः। मूलाधारहृद्भ्रूमध्यब्रह्मरन्ध्रेषु विन्यसेत्।

ब्रह्मरन्ध्रादिब्रह्म्यादिन्यासं कुर्यात्स्वदेहके। नैवेद्यं भावयेत्पद्मे वसुपत्रे सकर्णिके॥ १॥
त्रिकोणं चाथ तन्मध्ये परदेवीं विभावयेत्। भुवनाद्यास्तथा कोणेष्वथ दक्षेतरेषु च॥ २॥
ब्राह्म्याद्याश्चाष्टपत्रेषु न्यासवत् सर्वमर्चयेत्। नैवेद्यं सपरिवाराया देवदेव्योः समर्पयेत्॥ ३॥
सौभाग्यदेवतायास्तु स्वनैवेद्यं समर्चयेत्।.... ....॥

तदीयबलिं वृत्तचतुरस्रमण्डले, व्यापकमण्डलाय नम इत्यभ्यर्च्य, ॐह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा, अनेन बलिं दत्त्वा गण्डूषादिराजोपचारान्। "तत्त्वत्रयविशुद्धात्मा स्वीकुर्याद्विधिपूर्वकम्"॥ ५ ऐंह्रीं अघोरे ह्रींस ५ आत्मतत्त्वं शोधयामि स्वाहा। ५ ह्रां परमघोरे हुं घोररूपे ह्रौं घोरमुखि भीमभीषणे वमपिव हेरुरुहःरर ह्रींह्रःफ्रें हसरौं विद्यातत्त्वं शोधयामि स्वाहा। ५ सर्वतत्त्वसमष्टिसर्व (शिव) तत्त्वं शोधयामि स्वाहा।

तत्त्वत्रयविशुद्धात्मा पूर्णपात्रत्रयं पुनः। गुरुभैरवशक्तिभ्यो निवेद्याथ स्वयं पुनः॥ १॥
स्वकीयानाहूतान्यांश्च पूजयेच्च यथाविधि।.... ....॥

इति सृष्टिपूजा॥

अथ संहारपूजार्थं श्रीनाथं पूजयेत् त्रिशः। तदनुज्ञामवाप्याथ पूर्ववत् पार्थिवादितः॥ १॥
मानसान्तं क्रमान् कृत्वा तत्तत्क्रमफलं लभेत्। आज्ञाद्याधारषट्केषु चतुष्कादिक्रमार्चनम्॥ २॥
तत्तत्स्थानेषु सम्पूज्य यतः पञ्चक्रमात्ततः। अर्चयेदुक्तमार्गेण श्रीगुरोरुपदेशतः॥ ३॥
चूलीमूले परशम्भुः शाम्भवी योनिमध्यतः। षोडशान्ते परा पूज्या भा पूज्या चूलिमूलके॥ ४॥
चिन्मनोमन्दिरोद्देशे महा नाभितले स्मृता। कन्दे चेच्छा मेढ्रे सृष्टिः स्थितिर्मेदसि संस्थिता॥ ५॥
तिरोधा नासिकाग्रे तु मुक्ति शूलत्रये श्रयेत्। ज्ञाना पृष्ठाग्रके पूज्या सती योनिबिले स्मृता॥ ६॥

असती लम्बिामूले सदसती नसाश्रये। क्रियां च लिङ्गमूले तु अण्डे आत्मावतीं श्रयेत्॥ ७॥
लिङ्गाधो विषयेच्छा तु गोचरी चर्ममालके। लोका नेत्रान्तरे वेदा संचिन्त्योदरमध्यतः॥ ८॥
कुण्डली नाभिमूले तु सौष्मणमुष्मणाबिले(?)। जीववायुप्राणसूत्रास्पदकोदण्डमध्यतः॥ ९॥
मातृका कर्णिकासूत्रे जिह्वायां स्यादनामिका। वर्णावती च जिह्वाग्रे स्वरवर्णाश्च तालुके॥ १०॥
वर्गजा ओष्ठयोः पूज्याः संयोगा दन्ततालुके। कण्ठोर्ध्वे मन्दरवती नित्यं पूज्या प्रकीर्तिता॥ ११॥
ततः परं वामभागे मण्डलं चतुरस्रकम्।···· ··· ···· ···· ···· ····॥

चतुर्दलपद्मं विभाव्य,

तन्मध्ये चिन्तयेद्देवीं ललितां श्यामविग्रहाम्। कराभ्यां दक्षवामाभ्यां पद्मं नीलोत्पलं तथा॥ १२॥
बिभ्राणां कुलचण्डं च ध्यात्वानेन प्रपूजयेत्।···· ···· ···· ···· ···· ····॥

५ श्रीं कुलचण्डाय श्रीं ५, इति चण्डबलिं दद्यात्।

तर्पयेन्मूलविद्याभ्यां प्रत्येकं सप्तसप्तधा। श्रीगुरोः पादुकां स्मृत्वा सप्तवारं च तर्पयेत्॥ १॥
ततः पात्रं समुद्धृत्य कराभ्यां मस्तकावधि। अहन्तेदन्तयोरैक्यप्रतिपत्त्या निवेदयेत्॥ २॥
सर्वावरणमध्यस्थं ब्रह्मरन्ध्रे लयं नयेत्।···· ···· ···· ···· ···· ····॥

नानागोत्रजातिश्रीचर्य्याधिकार—श्रीपदाधिष्ठानाधिकार-एकद्विनवद्वादशषोडशपञ्चाशच्चतुरशीतिसिद्ध-भूतवर्तमानभविष्यतादिगुरुनाथपादुकाः, इत्यादिस्थाने लयः।

सर्वं व्याहृतिसंस्थानो भूदेव्याः शम्भुशक्तयः।···· ···· ···· ···· ···· ····॥

नमो मम मनसि स्थिताय नाथाय यत्कर्मकार्यपराय स्वाहा।

चरणं पवित्रमित्यादिवेदमागममेत्र च। शाम्भवं ध्यात्वा सच्चिदानन्दलक्षणम्॥ १॥
पवित्रं परमं साक्षात्पुराणं परमामृतम्। येन पूता महात्मानः क्षणात् संसारसागरात्॥ २॥
समुत्तीर्य परानन्दं भुञ्जते परशाम्भवम्। तस्मिंश्चित्तलयं कृत्वा तद्भूयोऽहमिति स्मरन्॥ ३॥
एतद्रहस्यमत्यन्तं वैदिके शाम्भवेऽपि च। एतद्गुरुमुखाज्ज्ञात्वा न भूयो भुवि जायते॥ ४॥
आबध्य कमठीमुद्रां पुनर्योगं समभ्यसेत्। इत्यानन्दयतः पूर्वं प्राणबुद्धिलयो भवेत्॥ ५॥

इति श्रीषडन्वयशाम्भवरश्मिपूजाक्रमः॥

अथ नवदुर्गाविधानं रुद्रयामले। श्रीईश्वर उवाच।

अथ वक्ष्ये सुरेशानि नवदुर्गाविधानकम्। यज्ज्ञात्वा साधकः सर्वः षट् कर्माणि प्रसाधयेत्॥ १॥
शान्तिः पुष्टिस्तथा वश्यं मारणोच्चाटकर्मणी। आकर्षणं तथा केचित् षट् कर्माणि नियोजयेत्॥ २॥
मार्कण्डेयपुराणोक्तं देवीमहात्म्यमुत्तमम्। मूलमन्त्रेण पुटितं जपन् वाञ्छितमाप्नुयात्॥ ३॥

अत्र मूलमन्त्रं प्रागदुर्गाप्रकरणोक्तनवार्णकं श्रीविद्यासंवलितं यथा—ऐंह्रींश्रीं कएईलह्रीं चामुण्डायै हसकहलह्रीं विच्चे सकलह्रीं। एवं श्रीविद्यासंवलितनवार्णमन्त्रं देवीमहात्म्यस्याद्यन्ते संपुटत्वेन संयोज्य देवीमहात्म्यं पठेदित्यर्थः। तथा—

शतमादौ शतं चान्ते जपेन्मन्त्रं नवाक्षरम्। चण्डीसप्तशतीजाप्ये सम्पुटोऽयमुदाहृतः॥ ४॥
सकामं सम्पुटं जाप्यं निष्कामं सम्पुटं विना। आश्विनस्य सिते पक्षे तृतीयायामुपक्रमेत्॥ ५॥
आमध्यरात्रं प्रजपेद्रवेरुदयतः क्रमात्। एवं मूलमनुं जप्त्वा ततः सप्तशतो पठेत्॥ ६॥

मूलमनुं विद्यायुक्तं, पाठोऽपि विद्यायुक्तनवार्णमन्त्रसंपुटितदेवीमाहात्म्यस्य। संपुटक्रमस्तु प्रागुक्तः "शतमादौ शतं चान्ते" इत्यादि ज्ञेयम्। तथा—

अष्टम्यन्ते जपेल्लक्षं निराहारो जितेन्द्रियः । सम्पूज्य दिनशो देवीं ततो होमं समाचरेत् ॥ ७ ॥

अत्र षड्दिनेषु यथालक्षं पूर्णं भवेत्तथा जपेदिति ।

दशांशतो भक्तियुतः पायसैः सर्पिषा तिलैः । ब्राह्मणान् भोजयेत्पश्चात् कुमारीश्च प्रभोजयेत् ॥ ८ ॥
इष्टार्थं लभते मन्त्री नात्र कार्या विचारणा । प्रथमं चरितं प्रोक्तं मधुकैटभनाशनम् ॥ ९ ॥
द्वितीयं चरितं प्रोक्तं महिषासुरघातनम् । तृतीयं चरितं शुंभनिशुंभहरणं तथा ॥ १० ॥
प्रथमस्य चरित्रस्य मुनिर्ब्रह्मा समीरितः । गायत्रं छन्द आख्यातं महाकाली तु देवता ॥ ११ ॥
वाग्भवं बीजमाख्यातमग्निस्तत्त्वं महेश्वरि । धर्मार्थे विनियोगः स्याद्वाग्बीजोक्तं समाचरेत् ॥ १२ ॥

षडङ्गं ध्यानमिति शेषः ।

द्वितीय चरित्रस्य मुनिर्विष्णुरुदीरितः । छन्द उष्णिग्महालक्ष्मीर्देवतात्र समीरिता ॥ १३ ॥
हृल्लेखा बीजमुदितं वायुस्तत्त्वं महेश्वरि । विनियोगोऽर्थसम्प्राप्त्यै हृल्लेखोक्तं समाचरेत् ॥ १४ ॥
उत्तरस्य चरित्रस्य ऋषी रुद्रः समीरितः । त्रिष्टुप्छन्दो महत्वपूर्वा देवतात्र सरस्वती ॥ १५ ॥
बीजं तु कामराजं स्याद्रविस्तत्त्वं समीरितम् । कामाप्त्यै विनियोगः स्यात्कामराजोक्तमाचरेत् ॥ १६ ॥
एवमृष्यादिकं स्मृत्वा प्राग्वद् ध्यात्वा समाहितः । ध्यानपूर्वं पठेच्चण्डीं सुस्पष्टपदवर्णकाम् ॥ १७ ॥
एवं यः कुरुते देवि न दुःखं प्राप्नुयात् क्वचित् । धनैर्धान्यैर्यशोभिश्च सुभगैः पुत्रपौत्रकैः ॥ १८ ॥
संयुक्तः सुचिरं जीवेद्विद्यावान् स शतं समाः । प्रथमं चरितं देवि सृष्टिरूपं न संशयः ॥ १९ ॥
द्वितीयं स्थितिरूपं स्यात् तृतीयं लयरूपकम् । पूर्वोक्तविधिना साध्वि साधकस्तु सुबुद्धिमान् ॥ २० ॥

अत्र सृष्टचन्तता स्थित्यन्तता संहारान्तता । तत्फलानि चाश्रमभेदेन प्राग्वद्बोध्यानि ।

असाध्यं साधयेच्छीघ्रं यदि कार्यं न सिध्यति । पाठमात्रेण सिध्यन्ति नात्र कार्या विचारणा ॥२१॥
देव्यालये शिवागारे पठेद्देवि यजेत्तदा । दीपं दत्त्वा घृतेनैव जपेन दशकेन च ॥ २२ ॥
धूपयेद् गुग्गुलैर्देवीं मनसा चिन्तयन् सदा । दशावृत्त्या सदा नित्यं शुचिर्भूत्वा समाहितः ॥ २३ ॥
अधःशायी हविष्याशी पुरश्चरणरूपतः । शतावर्तं जपेदादौ पुरश्चरणसिद्धये ॥ २४ ॥
तद्दशांशेन जुहुयान्मूलमन्त्रेण साधकः । नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ २५ ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् । अनेन वा प्रजुहुयाद् द्रव्यैः प्राक् समुदीरितैः ॥ २६॥

अत्र केचित् "जयन्ती मङ्गला महाकाली" इति श्लोकरूपमन्त्रेण वा दशांशं जुहुयादिति । अत्र शतचण्डीविधानस्य मूलमन्त्रेण श्लोकरूपमन्त्रेण वा, दशांशहोमस्तु अयुतसंख्याकः । "प्रतिश्लोकेन जुहुयात् पायसं तिलसर्पिषा" इति विधौ प्राग्वत् शतमादौ शतं चान्ते सम्पुटक्रमेण मूलमन्त्रहोम आवश्यकः । अत्रापि तर्पणब्राह्मणसंतर्पणादिकं पूर्ववदशांशेन कृत्वा पुरश्चरणं समाप्य काम्यकर्माणि कुर्यात् ॥ तथा—

अनुलोमैर्यदा जाप्यं शुभकर्म प्रसिद्ध्यति । विलोमेन तदा देवि क्रूरकर्म प्रसिद्ध्यति ॥ २७ ॥
चरित्रं प्रथमं देवि नित्यं जपति साधकः । द्वितीयं वा तृतीयं वा सम्पूर्णं वापि पठ्यते ॥ २८ ॥
तस्य सिद्धिर्न सन्देहो ध्रुवं चेति वरानने । अक्षराणां पदानां च पादानामर्धरूपिणम् ॥ २९ ॥
श्लोकानां च तथा प्रोक्तमध्यायानां विलोमतः । निधनोच्चाटने द्वेषः स्तम्भनं मोहनं तथा ॥ ३० ॥
वश्यादीनि च कर्माणि प्रसिद्ध्यन्ति क्रमेण वै । ग्रथनादिप्रभेदं तु प्राक प्रोक्तं विधिना चरेत् ॥ ३१ ॥
अक्षराणि यथा मन्त्रे तथा श्लोकाः शुभे ।.... ....॥

शुभे स्तवे देवीमाहात्म्ये । अत्रायमर्थः—मन्त्राणान्तरितसाध्यनामार्णं ग्रथनं मन्त्रेषु । अत्र तु श्लोकान्तरितसाध्यनामाक्षरं ग्रथनमित्यर्थः । श्लोकद्वयान्तरितसाध्यनामार्णो विदर्भः । संपुटक्रमस्तु—देवीमहात्म्यमनुलोमेन पठित्वा अमुकं स्तम्भय स्तम्भय इत्युच्चार्य पुनर्देवीमहात्म्यमक्षरप्रतिलोमेन पठेदित्येकावृत्तिः । एव-

मग्रेऽपि । रोधनप्रकारस्तु । अर्धं देवीमाहात्म्यस्य पठित्वाऽनुलोमेन अमुकामुकयोर्विद्वेषणं कुरुकुरु इत्युच्चार्योत्तरार्धमक्षरार्धप्रतिलोमेन पठेदित्येकावृत्तिः । एवमग्रेऽपि ॥ "आदौ योगो भवेदन्ते पल्लवसंपुटयो" रित्यत्रोच्चटने योगो मारणे पल्लवः इति संप्रदायः । तेन "अमुकमुच्चाटय उच्चाटय फट्" । ततः पादप्रतिलोमेन देवीमाहात्म्यं पठेदित्येकावृत्तिः । एवमग्रेऽपि । कार्मणे तु अक्षरप्रतिलोमेन देवीमाहात्म्यं पठित्वा अन्ते "अमुकं हनहन हुं फट्" इति पठेदित्येकावृत्तिरेवमग्रेऽपि । ग्रथनक्रमरीत्या विदर्भक्रमो वक्ष्ये ।

तथा—

संहारसृष्टिस्थित्यन्तं कर्मणोत्कीलनं स्मृतम् । एतस्य वैपरीत्येन स्तम्भनोत्कीलनं भवेत् ॥ ३२ ॥
स्थितिसंहारसृष्ट्यन्तमुच्चाटोत्कीलनं स्मृतम् । सृष्टिसंहारस्थित्यन्तं विद्वेषोत्कीलनं तथा ॥ ३३ ॥
उत्कीलनक्रमो देवी तवाग्रे कथितो ध्रुवम् । येन ज्ञातेन देवेशि त्रैलोक्यविजयो भवेत् ॥ ३४ ॥
उत्कीलनं विना कान्ते स्थितिः क्वापि न जायते । जपित्वोत्कीलनं चाद्यं त्रिखण्डं भ्रंशितं भवेत् ॥३५॥

त्रिखण्डं चरित्रयम् । भ्रंशितं प्रोक्तसृष्टयन्तता स्थित्यन्तता संहारान्तता । अयमर्थः—चरितत्रितयं क्रमेण सृष्टिस्थितिलयरूपं प्रोक्तक्रमेणोत्कीलन नामपल्लवादिकं विना प्रथमतो जपित्वा ततः प्रयोगरूपेण जपेत् । संपुटकार्मणादौ प्रयोगमध्येऽनुग्रहं कर्तुमिच्छति तदानुग्रहप्रोक्तनामपल्लवादिकं संयोज्य यावत् स्वास्थ्यं तावदुत्कीलनमेव जपेदित्यर्थः । केचिदुत्कीलनादौ नामपल्लवादिकं न योज्यमिति वदन्ति, यथागुरूपदेशं कार्यमिति । तथा—

साध्यं कार्मणकर्मादौ वक्ष्येऽहं शृणु पार्वती । सर्वभूतस्य चोरारिहिंसकाः पिशुनाः शठाः ॥ ३६ ॥
ते साध्याः कर्मणे प्रोक्ताः कर्मारम्भदिनं शृणु । भूताष्टम्यां चतुर्दश्यां साधयेत्साधकोत्तमः ॥ ३७ ॥
दशधा पञ्चधा वापि सप्तधा वा त्रिधापि च । देव्यालये पठेद्देवि विलयः सिद्धयति क्षणात् ॥ ३८ ॥
विना न्यासं विना ध्यानं विना भूतविशोधनम् । पाठमात्रेण सिद्धयन्ति मन्त्रिणो नात्र संशयः ॥ ३९ ॥
सिन्दूररेणुभिर्देवि पूजां कुर्यात् समाहितः ।.... ....॥

इति । वाराहीतन्त्रे—

चण्डीपाठफलं देवि शृणुष्व गदतो मम । एकावृत्त्यादिपाठानां यथावत् कथयामि ते ॥ १ ॥
संकल्प्य पूर्वं सम्पूज्य न्यस्याङ्गेषु मनून् सकृत् । पाठाद् बलिप्रदानाद्धि सिद्धिमाप्नोति मानवः ॥ २ ॥
उपसर्गोपशान्त्यर्थं त्रिरावर्तं पठेन्नरः । ग्रहोपशान्तौ कर्तव्यं पञ्चावर्तं वरानने ॥ ३ ॥
महाभये समुत्पन्ने सप्तावर्तमुदीरयेत् । नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं भवेत् ॥ ४ ॥
राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत् । अर्कावृत्त्या कार्यसिद्धिर्वैरिहानिश्च जायते ॥ ५ ॥
मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री वश्यतामियात् । सौख्यं पञ्चदशावृत्त्या श्रियं चाप्नोति मानवः ॥ ६ ॥
कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः । राज्ञां भीतिविनाशाय वैरिप्रोच्चाटनाय च ॥ ७ ॥
कुर्यात् सप्तदशावृत्तिं तथाष्टादशकं प्रिये । महाव्रणविनाशाय विंशावर्तं पठेत्सुधीः ॥ ८ ॥
पञ्चविंशावर्तनात्तु भवेद्बन्धविमोक्षणम् । सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ॥ ९ ॥
जातिध्वंसे कुलोत्सादेऽप्यायुषो नाश आगते । वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥ १० ॥
तथैव त्रिविधोत्पाते तथा चैवातिपातके । कुर्याद्यतात्मा शतावृत्तिं तया संपद्यते सुखम् ॥ ११ ॥
श्रियो वृद्धिः शतावृत्त्या राज्यवृद्धिस्तथा परा । मनसा चिन्तितं देवि सिध्येदष्टोत्तराच्छतात् ॥ १२ ॥
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते । सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥ १३ ॥
भुक्त्वा मनोरमान् कामान् नरो मोक्षमवाप्नुयात् । यथाश्वमेधः क्रतुराट् देवानां च यथा हरिः ॥ १४ ॥
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः । (नातः परतरं किञ्चित् स्तोत्रमस्ति वरानने ॥ १५ ॥

भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ।) अथवा बहुनोक्तेन किमनेन वरानने ॥ १६ ॥
चण्डयाः शतावृत्तिपाठात् सर्वा सिद्ध्यन्ति सिद्धयः ।···· ···· ···· ···· ····॥

इति । अत्र प्रयोगस्तु—क्वचिद् देव्यालये शिवालये वा प्रागुक्तक्रमेण स्वासनोपरि प्राङ्मुख उदङ्मुखो वा उपविश्याचम्य, श्रीविद्यासंवलितनवार्णमन्त्रेण प्राणानायम्य ऋष्यादिकरषडङ्गन्यासध्यानानि प्राक्प्रोक्तक्रमेण विधाय संकल्पं कुर्यात् । अद्यामुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रोऽमुकदेवशर्म्मा श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीतिपूर्वकमुककामनासिद्धिकामोऽद्यारभ्यामुकदिनं यावत् प्रत्यहं द्वादशावृत्त्या नवावृत्त्या त्रिरावृत्त्या वा नियमतः शतसहस्रावृत्तिसंख्याकं "सावर्णिः सूर्यतनयो" इत्यादि "सावर्णिर्भविता मनुः" इत्यन्तं मार्कण्डेयपुराणान्तर्गतदेवीमाहात्म्यपाठं नवार्णसम्पुटत्वेन करिष्ये इति संकल्प्य, पुस्तकं सम्पूज्य पुस्तकं दृष्ट्वा हस्ते धृत्वा पाठं कुर्यात् । प्राणायामर्ष्यादिकरषडङ्गन्यासध्यानपूर्वकं नवार्णमन्त्रमाद्यन्तेऽष्टोत्तरशतमष्टोत्तरशतं जपेत् । मौनी ध्यानपरायणो मध्येऽन्यत्र वार्तालापमकुर्वन्नस्खलिताक्षरं स्पष्टपदोच्चारणं कुर्वन् यथासंख्यया नियमतः प्रत्यहं तावत्संख्याकपाठं कुर्यात् प्रोक्तसिद्धिर्भवेत् । इति सप्तशतीपाठविधिः ॥ अत्र ग्रथनादिभेदक्रमेणानुलोमपाठादपि तत्तत्प्रयोगाः सिद्ध्यन्ति । अथवा प्रोक्तक्रमेण वर्णप्रतिलोम–पदप्रतिलोम–पादप्रतिलोमार्धश्लोकप्रतिलोम–श्लोकप्रतिलोमाध्यायप्रतिलोमानां च ग्रथनादियोगात् तत्तत्प्रयोगाः सिध्यन्त्येव, ग्रथनादिकं विनापि सिध्यन्त्येव । एवमुभयथा विलोमक्रमाणां सिद्धिः । अनुलोमक्रमस्य ग्रथनादिकं विना प्रयोगा न सिध्यन्ति, तत्र ग्रथनादिक्रम आवश्यकः । विलोमपाठानामुभयथानुलोमपाठानामेकधा इति सर्वं गुरुतः शास्त्रतश्च सम्यग् ज्ञात्वा प्रयोगादिकं कुर्यात् । प्रथमादिचरित्रत्रयस्य पृथक् पृथक् पाठस्य धमार्थकामा यथाक्रमं फलानि बोध्यानि । चरितत्रयपाठस्य चतुर्वर्गफलसिद्धिः । केवलं मोक्षकामस्य सम्पुटं विना पाठः । "गृहि ससम्पुटं कुर्यान्मोक्षार्थं सम्पुटं विना" । इति वाराहीतन्त्रोक्तत्वात् गृहस्थः सम्पुटं विना न पठेदिति । अत्र "सार्वर्णिः सूर्यतनयः" इत्यादि सावर्णिर्भविता मनुरित्यन्तं पाठक्रमः ॥

इति श्रीमहामहोपाध्यायवर्य्यभगवत्पूज्यपाद–श्रीगोविन्दाचार्यशिष्य–श्रीभगवच्छङ्कराचार्य–शिष्य–श्रीविष्णुशर्माचार्यशिष्य–श्रीप्रगल्भाचार्यशिष्य–श्रीविद्यारण्ययतिविरचिते श्रीविद्यार्णवाख्ये तन्त्रे चतुस्त्रिंशः श्वासः ॥ ३४ ॥

अथ

पञ्चत्रिंशः श्वासः

तत्र श्रीतन्त्रराजे-- (२७ शे पटले)

अथ षोडशनित्यानां कालेन प्राणतोच्यते । मातृकाभूतनाथाद्यैः श्रीचक्रेण च शक्तिभिः ॥ १ ॥

अत्र कालेनाहोरात्ररूपकालेन । प्राणता श्वासरूपतोच्यते इत्यर्थः । क्रममाह—मातृकेति, मातृकया पञ्चभूतैर्नाथाद्यैर्नवनाथैरादिपदेन नवग्रहराश्यादीनां संग्रहः । श्रीचक्रेण शक्तिभिरावरणदेवताभिः सहोच्यते इत्यन्वयः । तथा—

लवादीनां तु कालस्य दुर्लक्ष्यत्वात्तदीरितम् । तेनैकश्वासमारभ्य तत्संख्याभिः क्रमेण वै ॥ २ ॥
अहोरात्रस्य तद्व्याप्तिमुक्त्वा तेनान्यदूहयेत् । विशेषांश्चान्तराद् बाह्यात्तत्तत्सिद्ध्युपपादकान् ॥ ३ ॥

अत्र कालस्यातीन्द्रियत्वात् तत्रापि लवादीनां दुर्लक्ष्यत्वादनुमानेनापि निश्चेतुमशक्यत्वात् तदुदीरितं श्वासक्रम इत्यर्थः । वक्ष्यमाणरीत्याहोरात्रस्य तद्व्याप्तिं श्वासक्रमं ज्ञात्वा, विशेषांश्चान्तरान् बाह्यान् तत्तत्सिद्ध्युपपादकांश्च वक्ष्यमाणदिशा ऊहयेदित्यर्थः ।

मूलाधारोद्भवो वायुः प्राणाद्याख्यां समश्नुते । स तु पञ्चविधो भूतभेदादुद्भवदेशतः ॥ ४ ॥

एक एव वायुः प्राणापानव्यानोदानसमानसंज्ञां लभते । उद्भवदेशमाह—

नासायाः पुटयोः पार्श्वतुङ्गमध्याधरंध्रगाः । प्राणाग्नीलाम्बुखात्मानः पवनाः स्युर्यथाक्रमम् ॥ ५ ॥

अत्र नासायाः पुटयोः पार्श्वस्पर्शेन वायुतत्त्वोदयः, ऊर्ध्वभागस्पर्शेनाग्नितत्वोदयः, मध्ये दण्डे स्पर्शेन इलातत्त्वोदयः, अधःस्पर्शेनाम्बुतत्त्वोदयः, रन्ध्रयोः परितः स्पर्शेन खतत्त्वोदयः । एवं यथाक्रमं बोद्धव्यमित्यर्थः । तथा—

गुरुकेतू भृगुकुजौ बुधार्कौ चन्द्रसूर्यजौ । क्रमाच्चतुर्षु भूतेषु व्योम सर्वात्मकं भवेत् ॥ ६ ॥
उभयस्थो भवेद्राहुश्चन्द्रसूर्यौ पुटौ क्रमात् । वामदक्षौ तयोस्तस्य प्रवेशो निर्गमस्तथा ॥ ७ ॥
जीवश्चन्द्रो रविः शून्यो भागः स्त्रीपुरुषौ तथा । पृथिवी सलिलं चन्द्रो रविरन्यत् त्रयं भवेत् ॥ ८ ॥
ग्रहेषु चन्द्रो भृग्विन्दुगुरुज्ञा भास्कराः परे । मातृकां च तथा विद्यात्स्वरव्यञ्जनभेदतः ॥ ९ ॥
अधः पृष्ठं च चन्द्रः स्यादूर्ध्वाग्रे दिनकृद्भवेत् । शरीरेऽपि कटेरूर्ध्वं चन्द्रोऽधो रविरीरितः ॥ १० ॥
अस्तीति वाक्यं चन्द्रः स्यान्नस्तीत्युक्तो रविः स्मृतः । शुक्लकृष्णौ तथा पक्षाविति चन्द्रा दशान्तराः॥११॥
एवं सूर्या दश प्रोक्ता बाह्याभ्यान्श्च यशस्विनि । एकादशविधौ चान्द्रभास्करौ सम्यगीरितौ ॥ १२ ॥

ऐतेषां श्लोकानां स्पष्टोऽर्थः । तथा—

तयोश्चन्द्राः प्रीतिकरा भास्कराः क्लेशकारिणः । राहुः शून्यं च सर्वत्र नाशाय भवति क्षणात् ॥ १३ ॥
सूर्येषु शस्तः सर्वत्र मृधभोजनमैथुनैः । संग्रहश्चान्यदखिलं चन्द्रे सिद्ध्यत्ययत्नतः ॥ १४ ॥
जीवेषु कथितं तथ्यमेष्यदर्थश्च सिध्यति । निश्चित्य भगवतीत्युक्तन्यथा चेत्तदन्यथा ॥ १५ ॥
अनिश्चिते विधौ कन्या गर्भप्रश्नेऽन्यतः पुमान् । शून्ये गर्भविपत्तिःस्यादित्याद्यूह्य वदेद् दृढम् ॥ १६ ॥
शून्ये नभसि राहौ च शुभान्येवाशुभान्यपि । शुभानि तत्र सर्वाणि नश्यन्ति परमेश्वरि ॥ १७ ॥

वामे वहति वायौ तु वदेद्देशिकशिष्ययोः । तत्स्थाने स्थापयित्वा तं तत्कर्णे कथयेन्मनुम् ॥ १८ ॥
अथवा जीवगस्थाने तत्कर्णे मन्त्रमादिशेत् । अन्यथा शून्यराहोस्तु नाशाय गुरुशिष्ययोः ॥ १९ ॥
षष्ट्या युतैस्तु त्रिशतैर्निश्वासैर्नाडिका मता । तासां षष्ट्या दिनं तद्दिनं स्यात्पुनः पुनः ॥ २० ॥
एकस्मिंस्तु दिने श्वासाः सहस्राण्येकविंशतिः । षट्शतं च ततस्तेषां स्वरूपं शृणु सुन्दरि ॥ २१ ॥
आरभ्यार्कोदयं प्रातः सप्तत्या द्विशतं क्रमात् । प्राणाग्नीलाम्बुखानि स्युर्नवत्यान्यत्र संक्रमः ॥ २ ॥
तत्राप्येवमतोऽन्यत्राप्येवं पञ्चदश क्रमात् । दिनमेकं व्रजेदादौ दर्शप्रतिपदं प्रति ॥ २३ ॥
एवं क्रमेण सर्वेषां प्राणोदय उदीरितः । एतत्क्रमविपर्यासादभव्यानि भवन्ति हि ॥ २४ ॥

अस्यायमर्थः—शुक्लप्रतिपदमारभ्य दिनत्रयं सूर्योदयकाले वामनासापुटे वायुर्वहति, तदुत्तरं त्रीणि दिनानि दक्षिणे, ततस्त्रीणि दिनानि वामे, ततस्त्रीणि दिनानि दक्षिणे, पुनस्त्रीणि दिनानि वामे, ततः कृष्ण-पक्षे प्रतिपदमारभ्य त्रीणि दिनानि दक्षे, ततस्त्रीणि दिनानि वामे, तदुत्तरं दक्षे, ततस्त्रीणि दिनानि वामे, ततो दक्षिणे, एवं क्रमेण ज्ञातव्यानि । तत्रापि प्रतिनाडी पञ्चघटिकास्थितिर्बोद्धव्येति । तत्रैकैकघटिकास्थिति-रेकैकभूतस्य । तत्र क्रमस्तु—प्राणाग्नीलाम्बुखात्मान इति । एकघटिकायामपि सप्तत्युत्तरद्विशतश्वासकाल-स्थितिः, नवतिः श्वासाः संक्रमणे लगन्ति । एवं पञ्चभूतेषु श्वासानां स्थितिसंक्रमौ ज्ञेयौ । इत्थं दिवा एकैकनाड्यां वारत्रयं वारत्रयं रात्रावपि तथैव, वारत्रयस्य पञ्चदशघटिकाक्रमेणाहोरात्रमध्ये द्वादशावृत्त्या षष्टिघटिकाभिर्दिनमेकं व्रजेदित्यर्थः । प्रागुक्तपक्षक्रमविपर्यासादभव्यानि भवन्तीत्यर्थः । तथा—

बलाधिकाश्चरा वामे बलिनो दक्षिणे स्थिराः । उभयत्रोभयात्मानः शुभाशुभपरीक्षणे ॥ २५ ॥
सार्धद्वाविंशतिश्वासक्रमाद् द्वादश राशयः । तत्र सार्धचतुष्केण भूतानि स्युरिति क्रमात् ॥ २६ ॥
घटिकार्णेषु सर्वत्र वाय्वाद्येकान्तरोदये । तत्तदर्णभवाः श्वासाः षष्ठ्या त्रिशतमीरितम् ॥ २७ ॥
तेषु तद्भूतवर्णानां दशानामादितो दश । सप्तावृत्त्या ततः शेषाः प्राणाग्नीलाम्बुखाक्षरैः ॥ २८ ॥

अस्यार्थः— पञ्चभूतेषु पृथिवी जलं च सौम्यं, तेजो वायुराकाशं च क्रूरं । वामनाड्यां पृथिवीतत्त्वं जलतत्त्वं च बलवच्चरं च । दक्षनाड्यां तेजस्तत्त्व वायुतत्त्वमाकाशतत्त्वं च बलवत् स्थिरं च । उभयत्र साङ्कर्यश्वासेषु सर्वे उभयात्मानो द्विस्वभावा इत्यर्थः । एकस्यां नाड्यां पञ्चघटिकात्मककालस्थितायां पञ्चघटि-कासु पञ्चभूतोदयश्चेदेकैकस्य भूतस्यैकैकघटिकास्थितौ एकस्या घटिकायाः षष्ठ्युत्तरत्रिशतं श्वासानां (३६०) नवतिश्वासाः संकराः । एवमेकस्य भूतस्य सप्तत्युत्तरद्विशतश्वासा (२७०) निजास्तेषु श्वासेषु राशिक्रम-माह—सार्धद्वाविंशतिश्वासक्रमादिति । अत्र राशिष्वपि बलाधिका इत्याद्यूह्यम् । एकस्मिन् राशौ भूतक्रम-माह—तत्र सार्धेत्यादिना । घटिकार्णेष्विति अकारस्योदये अकारस्य प्रथमतः सप्तदश श्वासा अन्येषाम-क्षराणां सप्त सप्त श्वासाः । एवमेकघटिकामध्ये सप्तावृत्तिर्मातृकाया भवतीत्यर्थः । द्वितीयघटिकायामाकार-स्याप्येवमूह्यम् । तथा—

संख्याभिर्वासनाव्याप्तिं श्वासानां शृणु सुन्दरि । यया विहितया मन्त्री सदा भजनवान् भवेत् ॥ २९ ॥
नित्यातत्त्वाप्तिविद्यानां संख्याः स्युः पूर्वमेकशः । ततो दिनार्णाः संध्याः स्युस्ततश्च घटिकार्णकाः ॥ ३० ॥
राशयो द्वादश ततो ग्रहा भूतानि पञ्च वै । मातृकाश्चापि पञ्चाशच्छ्रीचक्रस्थाश्च शक्तयः ॥ ३१ ॥
सैका नवतयः प्रोक्ता देवी सर्वात्मना स्थिता । एवंविधां वासना यो भावयेत् स महेश्वरः ॥ ३२ ॥

इति । अस्यार्थः— नित्याः १६ तत्त्वाः ३६ आप्तिविद्याः युगत्वेन पर्यायत्वेन दिनत्वेन तिसृणां विद्यानां त्र्यक्षरत्वेन ९ दिनार्णाः ५७६ संध्यारूपाः ६१ घटिकार्णाः ६० राशयः १२ ग्रहाः ९ भूतानि ५ मातृकाः ५० श्रीचक्रशक्तयः ९१ कालनित्या २०७३६ सर्वं मिलित्वा २१६०० श्वासरूपा इत्यर्थः । तथा—

नाडीचक्रं च मर्माणि देहान्तर्मरुतां क्रियाम् । योगाभ्यासं तदङ्गैश्च स्वेच्छोत्क्रान्तिविधानकम् ॥ ३३ ॥

परकायप्रवेशं च योगसिद्धस्य लक्षणम् । ....॥

अस्यार्थः—नाडीचक्रस्य ज्ञानं मर्माणि शरीरे यावन्ति तावतां ज्ञानं, देहान्तर्मरुतां प्राणादिदशवायूनां स्थितेः क्रियायाश्च ज्ञानं, अङ्गैः सह योगाभ्यासस्तज्ज्ञानं च, तदङ्गानि यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधय इति । स्वेच्छोत्क्रान्तिविधानकं स्वेच्छया मरणविधानम् । परकायप्रवेशनं चेतत्सर्वं प्राक्प्रोक्तश्वासक्रमं गुरुतः शास्त्रतश्च सम्यग् विज्ञाय तदभ्यासदार्ढ्यानुभूतस्य योगसिद्धस्य लक्षणमित्यर्थः ॥

मातृकार्णवे—

नेच्छन्ति काम्यपूजां ये चक्रस्थाभिश्च शक्तिभिः । तेषां काम्यविधिं वक्ष्ये पूर्णमण्डलशक्तिभिः ॥ १ ॥
चतुष्षष्टिश्चतुष्षष्टिः प्रत्यावरणदेवताः । नित्यपूजां विधायादौ काम्यपूजां ततश्चरेत् ॥ २ ॥
तासां नामानि वक्ष्यामि पूर्णमण्डलवर्णकैः । साध्यसाधककर्माणि प्रत्यावृति नियोजयेत् ॥ ३ ॥
अथवा प्रतिवर्गं च प्रतिशक्ति प्रयोजयेत् । अमृता च तथानन्दा इच्छा चैव तथेश्वरी ॥ ४ ॥
उमोर्मिका तथा ऋद्धिवृद्धिर्ऋषा तथैव च । ल्रकारा चैव लृकारा एकनाथा तथैव च ॥ ५ ॥
ऐश्वर्या च तथोङ्कारिण्यौषधात्मिकया तथा । अंबा अःकाररूपा च कमला कामिका तथा ॥ ६ ॥
किराता कीर्तिविभवा कुमारी कूर्मरूपिणी । कृपावती च कृकारा क्लृप्ता क्लृरूपिणी तथा ॥ ७ ॥
केशिनी कैतवा कोला कौमारी कम्बुवादिनी । कःकारा च खरूपा च खातीता खिन्नपालिनी ॥ ८ ॥
खीरूपिणी खुरूपा च खूरूपा खृस्वरूपिणी । खॄरूपाखॢस्वरूपाचखॣरूपा खेचरप्रिया ॥ ९ ॥
खैरूपा खोस्वरूपा च खौरूपा खण्डितेन्दुधृक् । खःस्वरूपा गणेशी च गायत्री गिरिनन्दना ॥ १० ॥
गीर्वाणवन्द्या गुणपा गूरगा गृञ्जनप्रिया । गॄस्वरूपा गॢकारा च गॣरूपा गेस्वरूपिणी ॥ ११ ॥
गैरूपा गोस्वरूपा च गौतमी गण्डकी तथा । गःस्वरूपा घना घाता घिरूपा घीस्वरूपिणी ॥ १२ ॥
घुर्घुरा घूर्णरूपा च घृतामोदा च घॄकला । घॢरूपाघॣस्वरूपा च घेरूपा घैस्वरूपिणी ॥ १३ ॥
घोटरूपा घौस्वरूपा घण्टानादा च घोऽक्षरी । ङरूपा ङास्वरूपा च ङिरूपा ङीस्वरूपिणी ॥ १४ ॥
ङुरूपा ङूस्वरूपा च ङृरूपा ङॄस्वरूपिणी । ङॢरूपा ङॣस्वरूपा च ङेरूपा ङैस्वरूपिणी ॥१५ ॥
ङोरूपा ङौस्वरूपा च ङंकारा ङःस्वरूपिणी । चपला चारुचरिता चित्रणी चीरधारिणी ॥ १६ ॥
चुचुंरा चूर्णरूपा च चृरूपा चॄस्वरूपिणी । चॢस्वरूपा ततः प्रोक्ता चॣस्वरूपा ततः परम् ॥ १७ ॥
चेतना चैस्वरूपा च चोदयित्री च चौर्यहा । चण्डा च चःस्वरूपा च छत्रा छाया छिरूपिणी ॥ १८ ॥
छीत्कारी छुरिकाहस्ता छूरूपा छृस्वरूपिणी । छॄरूपा छॢस्वरूपा च छॣकारा छेदिनी तथा ॥ १९ ॥
छैरूपिणी च छोरूपा छौरूपा छंस्वरूपिणी । छःस्वरूपा जया जाड्या जिता जीर्णस्वरूपिणी ॥ २० ॥
जुरूपा जूर्तिहन्त्री च जृरूपा जॄस्वरूपिणी । जॢरूपा जॣस्वरूपा च जेरूपा जैत्ररूपिणी ॥ २१ ॥
जोरूपा जौस्वरूपा च जङ्गला जःस्वरूपिणी । झरणा झास्वरूपा च झिरूपा झीस्वरूपिणी ॥ २२ ॥
झुरूपा झूस्वरूपा च झृकारा झॄस्वरूपिणी । झॢरूपा झॣस्वरूपा च झेरूपा झैस्वरूपिणी ॥ २३ ॥
झोरूपा झौस्वरूपा च झंरूपा झःस्वरूपिणी । ञकारा ञार्णरूपा च ञिरूपा ञीस्वरूपिणी ॥ २४ ॥
ञुरूपा ञूस्वरूपा च ञृरूपा ञॄस्वरूपिणी । ञॢरूपा ञॣस्वरूपा च ञेरूपा ञैस्वरूपिणी ॥ २५ ॥
ञोरूपा ञौस्वरूपा च ञंरूपा ञःस्वरूपिणी । टकाररूपा टकारा टिकारा टीस्वरूपिणी ॥ २६ ॥
टुकारा टूस्वरूपा च टृकारा टॄस्वरूपिणी । टॢकारा टॣस्वरूपा च टेकारा टैस्वरूपिणी ॥ २७ ॥
टोकारा टौस्वरूपा च टंकारा टःस्वरूपिणी । ठकारा ठास्वरूपा च ठिकारा ठीस्वरूपिणी ॥ २८ ॥
ठुकारा ठूस्वरूपा च ठृकारा ठॄस्वरूपिणी । ठॢकारा ठॣस्वरूपा च ठेकारा ठैस्वरूपिणी ॥ २९ ॥
ठोकारा ठौस्वरूपा च ठंकारा ठःस्वरूपिणी । डकारा डास्वरूपा च डिकारा डीस्वरूपिणी ॥ ३० ॥

डुकारा डूस्वरूपा च डृकारा डृस्वरूपिणी । ड्लृकारा ड्लृस्वरूपा च डेकारा डैस्वरूपिणी ॥ ३१ ॥
डोकारा डौस्वरूपा च डंकारा डःस्वरूपिणी । ढकारा ढास्वरूपा च ढिकारा ढीस्वरूपिणी ॥ ३२ ॥
ढुकारा ढूस्वरूपा च ढृकारा ढृस्वरूपिणी । ढ्लृकारा ढ्लृस्वरूपा च ढेकारा ढैस्वरूपिणी ॥ ३३ ॥
ढोकारा ढौस्वरूपा च ढंकारा ढःस्वरूपिणी । णकारा णास्वरूपा च णिरूपा णीस्वरूपिणी ॥ ३४ ॥
णुरूपा णूस्वरूपा च णृरूपा णृस्वरूपिणी । ण्लृरूपा ण्लृस्वरूपा च णेरूपा णैस्वरूपिणी ॥ ३५ ॥
णोरूपा णौस्वरूपा च णंरूपा णःस्वरूपिणी । तरुणी तामसी चैव तिलनासा च तीरपा ॥ ३६ ॥
तुलसी तूर्णरूपा च तृष्णा तृकाररूपिणी । त्लृकारा त्लृस्वरूपा च तेजोरूपा च तैतिला ॥ ३७ ॥
तोमरा तौलिनी तन्द्रा तस्करान्तककारिणी । थरूपा थानरूपा च थिरूपा थीस्वरूपिणी ॥ ३८ ॥
थुरूपा थूस्वरूपा च थृरूपा थृस्वरूपिणी । थ्लृरूपा थ्लृस्वरूपा च थेरूपा थैस्वरूपिणी ॥ ३९ ॥
थोरूपा थौस्वरूपा च थंरूपा थःस्वरूपिणी । दया च दानशीला च दिरूपा दीनपालिनी ॥ ४० ॥
दुर्मदा दूनहन्त्री च (दृकारा दृस्वरूपिणी । द्लृकारा द्लृस्वरूपा च) देवी दैत्यनिसूदिनी ॥ ४१ ॥
दोषहन्त्री च दौर्भाग्यनाशिनी दम्भवर्जिता । दःस्वरूपा च धर्मज्ञा धारुणी धिस्वरूपिणी ॥ ४२ ॥
धीरा धुरीणा धूमावत्यथ पश्चाद् धृतिस्तथा । धृरूपा ध्लृस्वरूपा च ध्लृरूपा धेस्वरूपिणी ॥ ४३ ॥
धैर्या च धोरणी धौर्या धंरूपा धःस्वरूपिणी । नदी नारायणी नित्या नीतिज्ञा च नुतिप्रिया ॥ ४४ ॥
नूतना नृपवन्द्या च नृरूपा न्लृस्वरूपिणी । न्लृकाररूपिणी पश्चात् सम्प्रोक्ता नेत्रसुन्दरी ॥ ४५ ॥
नैमित्तिका नोदयित्री नौकास्था नंदजा तथा । नःस्वरूपा च परमा पाविनी पिलिपिच्छिका ॥ ४६ ॥
पीता पुण्या पूर्णरूपा पृथ्वी पृकाररूपिणी । प्लृकार प्लृस्वरूपा च पेशला पैस्वरूपिणी ॥ ४७ ॥
पोतरूपा पौरसेव्या पण्डिता पःस्वरूपिणी । फट्कारिणी कालरूपा फिटिशब्दनिनादिनी ॥ ४८ ॥
फीरूपा फुस्वरूपा च फूत्कार फृस्वरूपिणी । फृस्वरूपा फ्लृरूपा च फ्लृरूपा फेरवीरवा ॥ ४९ ॥
फैरूपा फोस्वरूपा च फौरूपा फंस्वरूपिणी । फःस्वरूपा च बगला बाला बिलनिवासिनी ॥ ५० ॥
बीजरूपा बुधाराध्या बूरूपा च बृहत्कुचा । बृरूपा ब्लृस्वरूपा च ब्लृस्वरूपा बेस्वरूपिणी ॥ ५१ ॥
बैरूपिणी बोधरूपा बौद्धवन्ध्या च बंधिनी । बःस्वरूपा भवाराध्या भाग्यदा भिल्लरूपिणी ॥ ५२ ॥
भीतिहन्त्री भुजङ्गाढ्यभूषणा भूरिविक्रमा । भृरूपा भृस्वरूपा च भ्लृकारा भ्लृस्वरूपिणी ॥ ५३ ॥
भेदाभेदविहीना च भैरवी भोगदायिनी । भौमसेव्या भंजिका च भःस्वरूपा महोदया ॥ ५४ ॥
मानिनी मित्रबिम्बा च मीनाक्षी मुसलायुधा । मूर्तिधृग् मृत्युहारिणी मृकाराक्षररूपिणी ॥ ५५ ॥
म्लृरूपा म्लृस्वरूपा च मेनका मैथिली तथा । मोदिनी मौढ्यरहिता मङ्गला मःस्वरूपिणी ॥ ५६ ॥
यमुना यादवप्रीता यिरूपा यीस्वरूपिणी । युवती यूथिकाप्रीता यृकारा यृस्वरूपिणी ॥ ५७ ॥
य्लृरूपा य्लृस्वरूपा च येरूपा यैस्वरूपिणी । योधना यौस्वरूपा च यंरूपा यःस्वरूपिणी ॥ ५८ ॥
रमणी रागशीला च रिरंसा रीतिदायिनी । रुधिराक्ता च रूपा च ऋंरूपा ॠंस्वरूपिणी ॥ ५९ ॥
ऌंरूपा ॡंस्वरूपा च रेवती रैवतात्मजा । रोगघ्नी रौरवघ्नी च रंकिनी रःस्वरूपिणी ॥ ६० ॥
लज्जा च लाभदा लिङ्गा लीला लुप्ता च लूनहा । लृरूपा लृस्वरूपा च ल्लृरूपा ल्लृस्वरूपिणी ॥६१॥
लेरूपा लैस्वरूपा च लोकधात्री च लौल्यहा । लंबोष्ठी लःस्वरूपा च वरदा वारिजानना ॥ ६२ ॥
विपुला वीतशोका च वुरूपा वूस्वरूपिणी । वृकोदरी वृस्वरूपा व्लृरूपा व्लृस्वरूपिणी ॥ ६३ ॥
वेदगर्भा वैनतेया वोरूपा वौस्वरूपिणी । वंजरा वःस्वरूपा च शशिखण्डावतंसिनी ॥ ६४ ॥
शाकम्भरी शिवा शीला शुष्कमांसा च शूलिनी । शृरूपा शृस्वरूपा च श्लृरूपा श्लृस्वरूपिणी ॥६५॥
शेरूपा शैत्यरूपा च शोभना शौर्यसम्पदा । शङ्करी शःस्वरूपा च षडङ्गा षास्वरूपिणी ॥ ६६ ॥

षिङ्का षीरूपिणी चैव षुरूपा षूस्वरूपिणी । षृरूपा षॄस्वरूपा च ष्लृरूपा ष्लॄस्वरूपिणी ॥ ६७ ॥
षेरूपा षैस्वरूपा च षोरूपा षौस्वरूपिणी । षंडा च षःस्वरूपा च सर्वदा सामगप्रिया ॥ ६८ ॥
सिरात्सारतरा चैव सीरपाणिसमर्चिता । सुभगा सूरशक्तिश्च सृष्टिदा सॄस्वरूपिणी ॥ ६९ ॥
स्लृरूपा स्लॄस्वरूपा च सेरूपा सैस्वरूपिणी । सोरूपिणी च सौभाग्या संगता सःस्वरूपिणी ॥ ७० ॥
हव्यवाहा हारिणी च हिरण्या हीनवर्जिता । हुरूपा हूस्वरूपा च हृद्या हॄकाररूपिणी ॥ ७१ ॥
ह्लृरूपा ह्लॄस्वरूपा च हेतुदा हैहयान्वया । होरूपा हौस्वरूपा च हंरूपा हःस्वरूपिणी ॥ ७२ ॥
ळरूपिणी च ळारूपा ळिरूपा ळीस्वरूपिणी । ळुरूपा ळूस्वरूपा च ळृरूपा ळॄस्वरूपिणी ॥ ७३ ॥
ळ्लृरूपा ळ्लॄस्वरूपा च ळेरूपा ळैस्वरूपिणी । ळोरूपा ळौस्वरूपा च ळंरूपा ळःस्वरूपिणी ॥ ७४ ॥
क्षमारूपा तथा क्षामा क्षित्यादिपञ्चधारिणी । क्षीणमध्या क्षुधारूपा क्षूरूपा क्षृस्वरूपिणी ॥ ७५ ॥
क्षॄरूपा क्ष्लृस्वरूपा च क्ष्लॄरूपा क्षेत्रपालिनी । क्षैकाररूपा च तथा क्षोभिणी क्षौस्वरूपिणी ॥ ६७ ॥
क्षंकाररूपिणी चैव क्षःकाररूपिणी तथा । इति ते कथितं भद्रे रहस्यातिरहस्यकम् ॥ ७७ ॥
प्रत्यावृत्ति चतुर्वर्गं पूजयेत्साधकोत्तमः । सर्वान् कामानवाप्नोति पूजनात्साधकोत्तमः ॥ ७८ ॥
प्राणाग्नीलाम्बुखात्मानो वर्णशक्तय ईरिताः । तत्तत्प्रयोगसिद्ध्यर्थं तत्तच्छक्तीः प्रपूजयेत् ॥ ७९ ॥
एकैकस्य च भूतस्य शतं पञ्चदशोत्तरम् । शक्तयः पूजनीयास्ता नवावरणभागशः ॥ ८० ॥
शेषास्तु बिन्दुचक्रे तु तत्तन्मण्डलके शुभे । उच्चाटे वायुवर्णानां शक्तयः समुदीरिताः ॥ ८१ ॥
विद्वेषे निधने चैव प्रशस्ताः स्युः खशक्तयः । वश्ये च मोहने चैव पावकाक्षरशक्तयः ॥ ८२ ॥
कार्मणे केचिदिच्छन्ति स्तम्भने लार्णशक्तयः । शान्तिके पौष्टिके रोगनाशादिशुभकर्मसु ॥ ८३ ॥
जलार्णशक्तयो ज्ञेयास्तत्तन्मण्डलसंयुताः । अथ वक्ष्ये सुरेशानि षट्शाम्भवघृणिक्रमम् ॥ ८४ ॥
श्रीचक्रक्रममभ्यर्च्य मोक्षार्थी रश्मिपूजनम् । विदध्यात्तत्क्रमं ज्ञात्वा स्मृत्वा प्रागुक्तमार्गतः ॥ ८५ ॥
प्रत्यावरणपूजायां चत्वारिंशच्च भागशः । तदन्ते बिन्दुचक्रे तु यष्टव्याः सर्वरश्मयः ॥ ८६ ॥
सषट्त्रिंशत्सप्तशतं सहस्राणि च विंशतिः । नाथावृत्तिक्रमेणैव नवावरणपूजनम् ॥ ८७ ॥
प्रत्यावृत्ति यजेन्नित्या द्विसहस्रं शतत्रयम् । चत्वारि च समाख्याता देवताभावसिद्धये ॥ ८८ ॥
श्वासक्रमेण पूजायां पूर्वोक्तगणनाविधौ । प्रत्यावृत्ति सहस्रे वै चतुःशतमुदीरितम् ॥ ८९ ॥
द्वयमात्माणुनित्यान्ते शक्तिसप्ताक्षरीयुतम् । प्रतिश्वासं यजेदेनं बिन्दुचक्रे समग्रकम् ॥ ९० ॥
नानया सदृशी पूजा त्रिषु लोकेषु विद्यते । गुह्याद् गुह्यतरं ह्येतत्तवाग्रे प्रकटीकृतम् ॥ ९१ ॥

इति ॥ तन्त्रराजे—(२७ प० ३४ श्लो०)

आसन्नमृत्युचिह्नानि कथयामि यथाक्रमम् । प्राक्प्रोक्तमूलाधारस्य मध्यस्थत्र्यस्रमध्यतः ॥ १ ॥
सुषुम्ना पृष्ठवंशाख्यवीणादण्डस्य मध्यगा । मूलादिब्रह्मरन्ध्रान्ता नासाग्राद् द्वादशांगुले ॥ २ ॥
तदग्रात्पायुगा प्रोक्तालम्बुषाख्या तु नाडिका । त्र्यस्राग्रादुत्थिता नाडी कुहूनाम ध्वजान्तिका ॥ ३ ॥
तद्वामदक्षपार्श्वाभ्यां सविश्वोदरवारणे । जठरान्ता सर्वगा च प्रोक्ते तद्वदनन्तरे ॥ ४ ॥
हस्तिजिह्वायशस्विन्यौ तत्तदंगुष्ठगे पदोः । तथैवेडापिङ्गले च नासारन्ध्रद्वयान्तगे ॥ ५ ॥
गान्धारी च तथा पूषा नेत्रद्वयगते क्रमात् । तथा कर्णगते शङ्खयशस्विन्यौ क्रमेण वै ॥ ६ ॥
सरस्वती तु या नाडी सा तु जिह्वाग्रगामिनी । एवं चतुर्दश प्रोक्ता नाड्यो देहे प्रधानकाः ॥ ७ ॥
तासां सन्धिषु तत्सन्धिष्वेवं नाड्यः स्थितास्तनौ । तासां प्रधाननाडीनां संख्या सार्धत्रिलक्षकम् ॥ ८ ॥
अप्रधानाः शिरा देहे स्वसंख्या याभिरेव वै । चेष्टतेऽङ्गैर्नरः सर्वः स्वकीयैरिच्छयाऽनिशम् ॥ ९ ॥

नाडयः सुषिरा रक्तमरुत्पूर्णाश्च सर्वगाः । सुषुम्नामध्यगा वज्रनाडी तन्मध्यगा परा ॥ १० ॥
चित्राभिधाना तन्ममध्ये स्थिता सा कुण्डली परा । मर्माण्यंगुष्ठगुल्फांघ्रिपृष्ठजङ्घाख्यजानुषु ॥ ११ ॥
ऊरुसीवनिकामुष्कमेढ्रनाभिषु पार्श्वयोः । हृदयस्तनकण्ठांसककाटीकर्णमूर्धसु ॥ १२ ॥
शङ्खयोः पक्ष्मनासादिमध्यान्तास्यकपोलतः । अष्टात्रिंशदिति प्रोक्तान्येषु वायोस्तु धारणात् ॥ १३ ॥
परकायप्रवेशश्च स्वेच्छोत्क्रान्तिश्च सिध्यति । दशानामपि वायूनां देहस्थानां क्रियाः शृणु ॥ १४ ॥
ऊर्ध्वाधोगमनासक्तौ प्राणापानौ सदा तनौ । नाग उद्गारकृत्प्रोक्तः क्षुत्कृत् कृकरसंज्ञकः ॥ १५ ॥
देवदत्तो जृम्भणकृत् रवकृच्च धनञ्जयः । कूर्मं उन्मेषकृत्प्रोक्त उदानोऽपि तथा हिक्कृत् ॥ १६ ॥
समानवायुः कायाग्निं संधुक्षयति पाचितुम् । व्यानाख्यो रसमादाय व्यापयेदखिलां तनुम् ॥ १७ ॥
एषां दशानामंशास्तु मारुताः स्युरनन्तकाः । तेषां प्रसाराद् देहस्य समीचीना स्थितिर्भवेत् ॥ १८ ॥
वैलोम्ये विकृताङ्गत्वाल्लोकैर्नाशाय कल्प्यते । जीवात्मा भेदरूपेण मनसा परमात्मनः ॥ १९ ॥
योगो योगस्तु विज्ञेयस्तस्याङ्गानि तथाष्ट वै । यमोऽथ नियमः पश्चादासनं तदनन्तरम् ॥ २० ॥
प्राणायामस्तथा प्रत्याहारस्तदनु धारणा । ध्यानं समाधिरित्युक्तान्यष्टाङ्गानि यथाक्रमम् ॥ २१ ॥
कथयामि शृणु प्राज्ञे यैर्मर्त्यो मत्समो भवेत् । आत्मापरोक्षप्रत्यूहकर्मणस्तु यमो यमः ॥ २२ ॥
तथैकादशरूपः स्यान्नियमः परिकीर्तितः । अहिंसा सत्यमास्तिक्यमार्जवं समता धृतिः ॥ २३ ॥
क्षमा दया त्रिधा शौचं संतोषो गुरुसेवनम् । तत्प्रत्यूहाः षडाख्याताः कामक्रोधौ ततस्तथा ॥ २४ ॥
लोभमोहौ मानमदौ वह्निवत् सर्वनाशकः । पद्मस्वस्तिकवीराख्यभद्राण्युक्तानि वै क्रमात् ॥ २५ ॥
आसनानि मनःस्थैर्यकरणे साधकानि वै । ऊर्वोरुपरि विन्यस्येद् व्यत्यासात् पादयोस्तले ॥ २६ ॥
बाह्यपार्श्वद्वयस्पर्शात्तत्पद्मासनमीरितम् । तथा तयोरधोभागे तदन्तः पार्श्वसङ्गमात् ॥ २७ ॥
स्वस्तिकाकारतः प्रोक्तं तद्भद्रासनमीश्वरि । नलान्तः पार्श्वगं कुर्यादेकमन्यत् तु बाह्यगम् ॥ २८ ॥
ऊर्वोरधस्तथोर्ध्वं च द्विधा भद्रासनं स्मृतम् । व्यत्यस्ततलयोरूर्ध्वसंस्पर्शाद्दुच्चजङ्घयोः ॥ २९ ॥
पादयोर्जानुदेशे वै वीराख्यं योगपट्टतः । प्राणायामस्त्रिधा प्रोक्त उत्तमाधममध्यतः ॥ ३० ॥
लाघवो भूतलत्याग उत्तमे चित्तनिर्वृतिः । सर्वाङ्गे स्वेदसंवृद्धिरधमे मध्यमे तथा ॥ ३१ ॥
सर्वाङ्गकम्पनं प्रोक्तमभ्यासात्कालसंयुतात् । तेऽप्युत्तमगुणा भूयुरभ्यासात्कालयोगतः ॥ ३२ ॥
तस्मात्समभ्यसेत् प्रातः सायं च नियमेन वै । वामेन नासारन्ध्रेण पूरयेदमृतात्मना ॥ ३३ ॥
स्मरन्नम्बु मरुत्पश्चाद् दक्षिणेनापसारयेत् । एवं सुसाधिते पश्चाद् द्वात्रिंशन्मात्रयाहरेत् ॥ ३४ ॥
धारयेतच्चतुःषष्ट्या रेचयेत्ततुरीयतः । कम्पश्च पुलकानन्दौ वैमल्यस्थैर्यलाघवाः ॥ ३५ ॥
तद्वत्कान्तिप्रकाशौ च योगसिद्धस्य लक्षणम् । मूलाधारे मनः कृत्वा वायुमापूर्य मूलतः ॥ ३६ ॥
नाडीचक्रान्तरं नीत्वा सर्वाङ्गानि च धारयेत् । एवं संसाधिते वायावष्टत्रिंशत्सु मर्मसु ॥ ३७ ॥
धारयेच्चारयेदिच्छावशेनाङ्गानि सर्वतः । तथाधारगतं कृत्वा मनः पवनसंयुतम् ॥ ३८ ॥
रसाम्बुदाहव्याप्तस्वैः सहंसैर्व्यापयेत्तनुम् । एवं तैरक्षरैर्देहे वायुना तन्मयीकृते ॥ ३९ ॥
त्रिकालज्ञो विशुद्धात्मा सुखी जीवेच्चिरं भुवि । स्वेच्छाचारी व्योमगश्च व्रजेद् देवैश्च सङ्गमम् ॥ ४० ॥
स्वेच्छया देहमध्यस्थः क्रीडन् गृहगतो यथा । एवं संसिद्धयोगस्तु स्वेच्छया देहमात्मनः ॥ ४१ ॥
प्राणानाकृष्य मध्यस्थसुषुम्नारन्ध्रतस्तथा । ब्रह्मरन्ध्राद्विनिर्गत्य भूयात्सर्वान्मनात्मवान् ॥ ४२ ॥
अथवोत्तरसम्प्रोक्तचूर्णास्वादनतो वशी । विरक्तचित्तः स्वं देहं तेनोपायेन संत्यजेत् ॥ ४३ ॥
स्वेच्छोत्क्रान्तिरिति प्रोक्ता योगयुक्तात्मना प्रिये । परकायप्रवेशं तु वक्ष्ये देवि महादद्भुतम् ॥ ४४ ॥
कलौ तु दुष्करं प्रायो मर्त्यैः सर्वैरपीश्वरि । अक्लेशतः परित्यज्य प्राणान् स्वकतुनुं तथा ॥ ४५ ॥

परिपूर्णाङ्गसंयुक्तामग्रतो वीक्ष्य योगतः । प्रविशेत्तत्तनुं प्राणप्रतिष्ठोक्तविधानतः ॥ ४६ ॥
(स्वां तनुं गोपयेत्स्वीयैस्ततस्तां च तथा व्रजेत्) । सिद्धस्य लक्षणान्यष्टौ योगाभ्यासेन सर्वदा ॥ ४७ ॥
शृणु तानि महादेवी यैरन्यैर्जायते गुणैः । द्वन्द्वहानिः सुखावाप्तिरारोग्यं वश्यवृत्तिता ॥ ४८ ॥
जितेन्द्रियत्वमक्रोधः कृपया जनसेवता । आसन्नमृत्योश्चिह्नानि कथयामि शृणु प्रिये ॥ ४९ ॥
यैः साध्यसाधकौ ज्ञात्वा देहत्यागमतन्द्रितौ । देवतास्वात्मभजनपरौ स्यातां ततस्तु तौ ॥ ५० ॥
सुगतिं प्राप्य सिद्धौ तु भवतो जातमात्रतः । (अकारणं निजां पूर्वां विमुच्य प्रकृतिं नरः ॥ ५१ ॥
समाश्रयेत्ततस्त्वब्दान्मृतिस्तस्य सुनिश्चितम्) । अरुन्धतीं ध्रुवं व्योम्नि नेक्षते चेत्तदर्धतः ॥ ५२ ॥
दृशौ नासान्तिकाक्रान्त्या चन्द्रकेऽपाङ्गयोर्न चेत् । विलोकयति तस्यार्धान्मृतिस्तस्य सुनिश्चितम् ॥ ५३ ॥
(गुल्फाधः स्फुरणं नाड्योः पादयोश्चेन्न जायते) । तस्याशु नाशो गदितो भानौ रुण्डं च पश्यतः ॥५४॥
निरुद्धकर्णरन्ध्रस्य न चेत्कुण्डलिनीध्वनिः । धूमो वा दृश्यते मूर्ध्नि गृहक्षेत्रादितोऽपि वा ॥ ५५ ॥
मूर्ध्नि वा विहगा लीनाः परासुं तं न को वदेद् । पश्चात्कृतार्को गण्डूषे न पश्येच्छक्रचापकम् ॥ ५६ ॥
सद्यः परासुमात्मानं जानीयात्सर्वथा नरः । मस्तकस्थकरः पश्येत्प्रकोष्ठं स्थूलमात्मानः ॥ ५७ ॥
अंगुल्योरन्तरा दृग्भ्यां पश्येन्न तौ विनश्यतः । श्लेष्मशुक्रमलानि स्युर्निमग्नानि जले यदा ॥ ५८ ॥
तस्मिन् पक्षे प्रयात्येव यमं संत्यक्तजीवितः । हाटकां प्रतिमां पश्यन् ध्रुवं याति यमालयम् ॥ ५९ ॥
भास्करं भगणैः पश्यन्नपि याति यमालयम् । जलादिषु तनुच्छायां विकृतां वीक्ष्य मासतः ॥ ६० ॥
प्रयाति निधनं छिद्रं पश्यन् भानोश्च मण्डले । स्नातानुलिप्तगात्रस्य पूर्वं शुष्यति चेदुरः ॥ ६१ ॥
स पक्षाद्याति निधनं सर्वैरपि सुरक्षितः । गुरुमातृगणान् विप्रान् चन्द्रसूर्यौ च देवताः ॥ ६२ ॥
आस्तिकान् सततं निन्दन्नकारणत एव च । स्वेर्ष्यावैरस्य वलने परित्यागे स्वरोषतः ॥ ६३ ॥
गुरुमन्त्रद्विजत्यागेऽप्यचिराज्जायते मृतिः । गुरुं विद्यां च जनकं जननीं सर्वदेवताः ॥ ६४ ॥
सदाधिक्षेपशापाभ्यां न्यक्कुर्वन्नाशु नश्यति । पुस्तकं निजगेहं वा विष्टरं शयनं तु वा ॥ ६५ ॥
निष्कारणं निराकुर्वन्नाशु नश्यति मानवः । दृग्देहचक्रबालानां वैवर्ण्ये मासतो मृतिः ॥ ६६ ॥
ध्याने स्वदेववैरूप्ये मासतो निधनं भवेत् । ··· ....॥

इति ॥ वाराहीतन्त्रे——ईश्वर उवाच ।

आश्विनस्य सिते पक्षे श्रीविद्योपासकैरिह । प्रतिपत्तिथिमारभ्य नवम्यन्तं महेश्वरि ॥ १ ॥
श्रीचक्रपूजनं देवि कर्तव्यं विधिपूर्वकम् । क्रमार्चनं पुरा कृत्वा देवीमाहात्म्यशक्तयः ॥ २ ॥
यष्टव्या यत्नतो काम्यमिच्छद्भिरादरात् । तच्छक्तीः सम्प्रवक्ष्यामि शृणु त्वं शैलसम्भवे ॥ ३ ॥
बद्वानां (?) मन्दभाग्योऽपि भवेद्वैश्रवणोपमः । नित्या चैव जगन्मूर्तिर्देवी भगवतीति च ॥ ४ ॥
महामाया प्रसन्नात्र वरदा मुक्तिदायिनी । परमा हेतुभूता च तथैव च सनातनी ॥ ५ ॥
संसारबन्धहेतुश्च तथा सर्वेश्वरीश्वरी । योगनिद्रा ततश्चैव हरिनेत्रकृतालया ॥ ६ ॥
विश्वेश्वरी जगद्धात्री स्थितिसंहारकारिणी । निद्राभगवती चैव ह्यतुला तेजसां निधिः ॥ ७ ॥
स्वाहा स्वधा वषट्कारा स्वरात्मा च स्वधाक्षरा । त्रिधामात्रात्मिका चार्धमात्रा स्वरस्वरूपिणी ॥ ८ ॥
अनुच्चार्या ततः सन्ध्या सावित्री जननी परा । सृष्टिरूपा जगद्योनिः स्थितिरूपा ततः परम् ॥ ९ ॥
तथा संहृतिरूपा च ततश्चैव जगन्मया । महाविद्या महामाया महामेधा महास्मृतिः ॥ १० ॥
महामोहा च भवती महादेवी महासुरी । प्रकृतिश्चैव सत्त्वादिगुणत्रयविभाविनी ॥ ११ ॥
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा । सुरेश्वरी तथा ह्रीश्च बुद्धिर्बोधसुलक्षणा ॥ १२ ॥
लज्जा पुष्टिस्ततस्तुष्टिः शान्तिः क्षान्तिस्तथैव च । खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ १३ ॥

शङ्खिनी चापिनी बाणभुसुण्डीपरिघायुधा। सौम्या सौम्यतरा चैव सुन्दरी च परा तथा॥ १४॥
परमा परमेशी च सदसच्चाखिलात्मिका। नारी शिवा सिंहवाहिन्यम्बिका भद्रकालिका॥ १५॥
चण्डिका च जगन्माता महिषासुरघातिनी। आत्मशक्तिः सर्वदेवमयी श्रद्धा गुणात्मिका॥ १६॥
सर्वाश्रयाऽव्याकृताऽऽद्या ततः शब्दात्मिका तथा। वार्तार्तिहन्त्री मेधा च दुर्गा भवसमुद्रनौः॥ १७॥
असङ्गा कैटभारातिहृदयैककृतालया। गौरी सदार्द्रचित्ता च गीर्वाणवरदायिनी॥ १८॥
देवी चैव महादेवी शिवा भद्रा ततः परम्। रौद्रा धात्री तथा ज्योत्स्ना तथा चैवेन्दुरूपिणी॥ १९॥
सुखा चैव तु कल्याणी ऋद्धिः सिद्धिश्च कूर्मिका। नैर्ऋती भूभृतां लक्ष्मीः शर्वाणी च ततः परम्॥ २०॥
दुर्गा च दुर्गपारा च सारा च सर्वकारिणी। क्षान्तिः कृत्स्ना च धूम्रा वै यातिसौम्यातिरौद्रिणी॥ २१॥
जगत्प्रतिष्ठा कृष्णा च विष्णुमाया ततः परम्। चेतना बुद्धिरूपा च निद्रारूपा क्षुधा तथा॥ २२॥
छायारूपा शक्तिरूपा तृष्णारूपा ततः परम्। क्षान्तिरूपा जातिरूपा लज्जारूपा तथैव च॥ २३॥
शान्तिरूपा तथा श्रद्धारूपा कान्तिस्वरूपिणी। लक्ष्मीरूपा वृत्तिरूपा धृतिरूपा ततः परम्॥ २४॥
स्मृतिरूपा दयारूपा तुष्टिरूपा ततः परम्। पुष्टिरूपा मातृरूपा भ्रान्तिरूपा तथैव च॥ २५॥
शुभहेतुः पार्वती च कौशिकी कालिका तथा। उग्रचण्डा च कृष्णा च हिमाचलकृतालया॥ २६॥
धूम्रलोचनहन्त्री च असिनी पाशिनी तथा। विचित्रखट्वाङ्गधरा नरमालाविभूषणा॥ २७॥
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा। अतिविस्तारवदना जिह्वाललनभीषणा॥ २८॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा। भीमाक्षी भीमरूपा च चण्डमुण्डविनाशिनी॥ २९॥
चामुण्डा लोकविख्याता ब्रह्माणी ब्रह्मवादिनी। माहेश्वरी वृषारूढा त्रिशूलवरधारिणी॥ ३०॥
महाहिवलया चैव चन्द्ररेखाविभूषणा। कौमारी शक्तिहस्ता च मयूरवरवाहना॥ ३१॥
गुहरूपा वैष्णवी च गरुडोपरि संस्थिता। शङ्खचक्रगदाशार्ङ्गखड्गहस्ता तथैव च॥ ३२॥
वाराही नारसिंही च नृसिंहसदृशी तथा। घोररावा सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥ ३३॥
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता। सहस्रनयना चैव शक्ररूपा तथैव च॥ ३४॥
भीषणाशक्तिरत्युग्रा शिवाशतनिनादिनी। तथापराजिता चैव शिवदूती तथैव च॥ ३५॥
कात्यायनी रक्तबीजनाशिनी चण्डघण्टिका। अष्टादशभुजा चोग्रा निशुम्भासुरघातिनी॥ ३६॥
शुम्भहन्त्री प्रपन्नार्तिहरा विश्वेश्वरी तथा। आधारभूता च तथा महीरूपा तथैव च॥ ३७॥
अपां स्वरूपा च तथाप्यायिनी च ततः परम्। अलंघ्यवीर्या चान्तवीर्या बीजस्वरूपिणी॥ ३८॥
सम्मोहिनी च विद्या च स्वर्गमुक्तिप्रदायिनी। अशेषजनहृत्संस्था तथा नारायणी शिवा॥ ३९॥
कलाकाष्ठादिरूपा च परिणामप्रदायिनी। सर्वमङ्गलमाङ्गल्या शिवा सर्वार्थसाधिका॥ ४०॥
शरण्या त्र्यम्बिका गौरी सृष्टिस्थितिलयात्मिका। शक्तिः सनातनी चैव तथा चैव गुणाश्रया॥ ४१॥
ततो गुणमया चैव नारायणस्वरूपिणी। शरणागतदीनार्तपरित्राणपरायणा॥ ४२॥
सर्वस्यार्तिहरा देवी विष्णुरूपा परात्परा। हंसयुक्तविमानस्था ब्रह्माणीरूपधारिणी॥ ४३॥
कौशाम्भःक्षुरिकाशूलचन्द्राहिवरधारिणी। महावृषभसंरूढा तथा माहेश्वरीति च॥ ४४॥
त्रैलोक्यत्राणसहिता किरीटवरधारिणी। वृत्रप्राणहरा चैव शिवदूतीस्वरूपिणी॥ ४५॥
हतदैत्या महासत्त्वा घोररूपा महारवा। दंष्ट्राकरालवदना शिरोमालाविभूषणा॥ ४६॥
चामुण्डा मुण्डमथना लक्ष्मीर्लज्जा तथैव च। महाविद्या तथा श्रद्धा पुष्टिश्चैव सदा ध्रुवा॥ ४७॥
महारात्रिर्महाविद्या मेधा सरस्वती वरा। भूतिदा तामसी चैव नियतेशा तथैव च॥ ४८॥
सर्वतः पाणिपादान्ता सर्वतोऽक्षिशिरोमुखा। सर्वतः श्रवणघ्राणा तथा सर्वस्वरूपिणी॥ ४९॥

सर्वेशा सर्वरूपा च सर्वशक्तिसमन्विता । समस्तरोगहन्त्री च समस्ताभीष्टदायिनी ॥ ५० ॥
विश्वात्मिका च विश्वेशवन्द्या पापापहारिणी । उत्पातपाकजनितोपसर्गचयनाशिनी ॥ ५१ ॥
विश्वार्तिहारिणी चैव त्रैलोक्यवरदायिनी । नन्दगोपगृहे जाता यशोदागर्भसंभवा ॥ ५२ ॥
विन्ध्याद्रिवासिनी रौद्ररूपिणी रक्तदन्तिका । दाडिमीकुसुमप्रख्याऽयोनिजा शतलोचना ॥ ५३ ॥
भीमा शाकम्भरी दुर्गा दानवेन्द्रविनाशिनी । महाकाल्या महाकाली महामारी ततस्त्वजा ॥ ५४ ॥
लक्ष्मीवृद्धिप्रदा नित्या पुत्रपौत्रप्रवर्धिनी । शैलपुत्री ततो ब्रह्मचारिणी च ततः परम् ॥ ५५ ॥
चण्डघण्टा विशालाक्षी कूष्माण्डा वेदमातृका । स्कन्दमाता गणेशी च त्रिरूपाक्षी ततोऽम्बिका ॥ ५६ ॥
महागौरी महावीर्या महाबलपराक्रमा । षष्ट्युत्तरं च त्रिशतं शक्तयः संख्यया शिवे ॥ ५७ ॥
प्रत्यावरणपूजायां चत्वारिंशच्च शक्तयः । सम्पूज्य बिन्दुचक्रे तु सर्वा एव प्रपूजयेत् ॥ ५८ ॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यचन्दनैः । कुमारीपूजनैर्योगियोगिनीपूजनैः शुभैः ॥ ५९ ॥
बलिप्रदानैर्होमैश्च तथा ब्राह्मणतर्पणः । तोषयेन्मूलविद्यां च जपेदुत्तरवृद्धितः ॥ ६० ॥
देवीमाहात्म्यपाठं तु कुर्यादिकोत्तरं शतम् । एवं यः पूजयेद्भक्त्या प्रतिवर्षं निरन्तरम् ॥ ६१ ॥
भुक्त्वा भोगांस्ततश्चान्ते देवीसायुज्यमाप्नुयात् ।.... ....॥

इति ॥ श्रीतन्त्रराजे–(२८ प०)

अथ षोडशनित्यानां लोकात्मत्वं वदामि ते । यन्मयं विश्वमखिलं वर्तते सचराचरम् ॥ १ ॥
कालमातृकयोर्व्याप्तिः प्रागेवोक्ता मया तव । वाच्यवाचकयोगेन मातृकालोकयोरपि ॥ २ ॥
व्याप्तिमद्य प्रवक्ष्यामि सम्यक् ते काललोकयोः । यदायत्तमिदं विश्वं नित्यास्तत्कालविग्रहाः ॥ ३ ॥
कालस्य षोडशाकारो रूपो दृश्यत एव हि । वृद्धिक्षयाभ्यां चन्द्रस्य चाद्यया कलया तथा ॥ ४ ॥
लोकरूपं तत्प्रमाणं कालचक्रं च तादृशम् । तयोरन्योन्यनित्यत्वं व्याप्तिं तद्वत् स्थितिं तयोः ॥ ५ ॥
नित्यालोकस्थितिं मानं नित्याकवचविग्रहम् । ग्रहाणां मातृकारूपं शृणु प्रोक्तक्रमेण वै ॥ ६ ॥
हेमरूपो भुवो मध्ये मेरुस्तिष्ठति पर्वतः । तस्याभितो मही पार्श्वे पञ्चाशच्छतयोजना ॥ ७ ॥
लवणेक्षुसुरासर्पिर्दधिक्षीरजलात्मभिः । सिन्धुभिः सप्तभिर्द्वीपैस्तत्संख्यैर्द्विगुणोत्तरैः ॥ ८ ॥
आवृता बाह्यसलिलजलधेर्बाह्यपार्श्वयोः । मध्यविस्तारमानं तु बहिरावृत्य तत्पुनः ॥ ९ ॥
कालचक्रं पराशक्तिमारुतेन सदैव तु । नूनं परिभ्रमत्येव पश्चिमाधोऽपसव्यतः ॥ १० ॥
तच्च तन्मानवीथीभिर्युतमष्टभिरद्भुतैः । तेजोमयैर्द्वादशारैर्युक्तं मेषादिविग्रहैः ॥ ११ ॥
तेषु वीथिषु पूर्वाशामुखाः सप्त ग्रहाः स्थिताः । राशिभुक्तेन कालेन प्रोत्तेनोपर्यधस्तथा ॥ १२ ॥
प्रयान्ति तेषां चारेण लोकानां भवति स्थितिः । मध्यस्थमेरौ ललिता सदैवास्ते महाद्युतिः ॥ १३ ॥
तस्याभितो जलान्तःस्थाः शेषास्ताः स्युश्चतुर्दश । तद्बहिः परमे व्योम्नि त्वन्त्या चित्रा तु संस्थिता ॥१४॥
कृतादिवर्षादारभ्य प्रतिवर्षमिति स्थिताः । द्वितीयादिषु वर्षेषु क्रमात् ताः परिवृत्तिभिः ॥ १५ ॥
षोडशाब्दे परे व्योम्नि ललिता सलिलाम्बुधौ । चित्रा च भवतीत्थं हि भजन्ते परिवर्तनम् ॥ १६ ॥
एवं युगेषु चान्येषु वर्तन्ते प्रोक्तरूपतः । कालेष्वपि च मध्यादिरव्योमान्तमीश्वरि ॥ १७ ॥
परिवृत्तिं भजन्ते ता मध्यस्था स्वांशतश्चरेत् । अन्याः सर्वास्तत्र तत्र चरन्ति स्वयमेव वै ॥ १८ ॥
तथा कालक्रमात् तास्तु भजन्ते परिवर्तनम् । कालतो देशतश्चाकादैक्यं संजायते यदा ॥ १९ ॥
तदा भवन्ति भूपाला धार्मिकाः कालवर्षतः । प्रजाश्च सुखिनो भूयुररोगाः कालमृत्यवः ॥ २० ॥
कालचक्रस्य बाह्यस्थवीथ्यां तिष्ठन्ति तारकाः । तद्बहिः परमव्योम स्थितिस्तत्र तदन्तिका ॥ २१ ॥
तासामपि च नित्यानां षोडशानां च तत्क्रमात् । एवं देशं च कालं च तन्मयं समुदीरितम् ॥ २२ ॥

देशवर्षतिथीनां च सम्पातादैक्यमागताम् । पूजयेत् सविशेषं तां प्रजपेच्चाखिलाप्तये ॥ २३ ॥
तेषु विद्योपदेशात्तु तस्यास्तत्संनिधिर्भवेत् । महाशक्तिश्च जायेत त्रयाणामैक्यवैभवात् ॥ २४ ॥
कालप्राप्तां यजेत् स्वाब्दजन्मवासरके तु ताम् । देशप्राप्तां तु तन्मासपूर्णायां पूजयेच्छिवे ॥ २५ ॥
प्रत्यब्दमेवं कुर्वाणं न मुञ्चति रमा यशः । कदाचिदपि दीर्घायुररोगो ज्ञानवान् सुखी ॥ २६ ॥
राजभिर्मनुजैः स्त्रीभिरन्यैः प्राणिभिरप्यसौ । मान्यते सर्वमन्त्राश्च सिद्धाः स्युस्तत्र पूजनात् ॥ २७ ॥
जम्बूः प्लक्षः शाल्मली च कुशक्रौञ्चौ यथाक्रमम् । शाकश्च पुष्करश्चेति सप्तद्वीपेषु भूरुहाः ॥ २८ ॥
तेषां नामभिरेव स्युस्तत्तन्नामानि तन्मुखात् । तत्तन्नामभिरभ्यर्च्य तद्द्वीपं तत्र पूजयेत् ॥ २९ ॥
तां तां नित्यां तत्र तत्र काले काले तु साधकः । एवं पूजयितुर्लोके न समोऽस्ति न चाधिकः ॥ ३० ॥
मध्ये भूमिं तामभितः कालचक्रं ततो बहिः । महाव्योम च निःसीमं तत्रैतद्द्वयसंस्थितिः ॥ ३१ ॥
सुस्थिराया भुवो मध्ये चक्रस्य भ्रमतोऽनिशम् । ग्रहाणामत्र संवासः प्रचारनियतात्मनाम् ॥ ३२ ॥
कारणं परमेशानि तवेच्छैव तु केवलम् । नत्वन्यदवलम्बाय तयोः कुत्रापि विद्यते ॥ ३३ ॥
तयोर्बहिः परे व्योम्नि क्वचिदब्धिचतुष्टयम् । प्रागुक्तरूपां तत्तीरे कोलवक्त्रां तु पञ्चमीम् ॥ ३४ ॥
सलिले कुरुकुल्लां च पोतारूढां शुचिस्मिताम् । तन्मध्ये नवरत्नात्ममहाद्वीपं च तत्र वै ॥ ३५ ॥
कल्पकोद्यानमृतुभिः षड्भिः सेवितविग्रहम् । तन्मध्येऽसंख्यरूपाभिर्वृतां सङ्गीतशक्तिभिः ॥ ३६ ॥
गीतवादित्रनृत्यादिसंसक्ताभिरनारतम् । विनोद्यमानां विलसन्मदमन्थरवीक्षणाम् ॥ ३७ ॥
रत्नमण्डपमध्यस्थरत्नसिंहासनोपरि । शुचिस्मितां शक्तिवृन्दगीताकर्णननन्दिताम् ॥ ३८ ॥
सहजासवसम्भोगैः संजातानन्दविग्रहाम् । दयामदारुणापाङ्गविलोकितसुसाधकाम् ॥ ३९ ॥
परितो भूषणैश्चित्रैः कर्णचामरकादिभिः । विराजमानान् द्विरदानश्वानपि तथाविधान् ॥ ४४ ॥
शक्तिभिर्दर्शितानग्रे पश्यन्तीममितोत्सवाम् । स्वसमानाभिरभितो नित्याभिः सेवितां तथा ॥ ४१ ॥
प्रयाति तत्पूजयिता तत्समाकारतां शनैः । तद्विनोदस्तत्समीपनिवासी स्यात्सुनिश्चितम् ॥ ४२ ॥
कोटियोजनविस्तीर्णसमायामं महाद्भुतम् । नवरत्नमयं द्वीपं तन्मानाब्धिभिरावृतम् ॥ ४३ ॥
तत्तृतीयांशमानस्य सहस्रादित्यतेजसः । रत्नद्वीपस्य मध्यस्थतृतीयांशे तु मण्डपे ॥ ४४ ॥
कोट्यादित्यद्युतिप्रान्तेष्वभितोऽसंख्यशक्तिभिः । तथा समन्वितां ध्यायन्नरो भवति सत्तमः ॥ ४५ ॥
एवं ध्यात्वार्चयेद् देवीं भक्त्या परमयोक्तया । नरो निरस्तसंसारमूलाज्ञानो जितेन्द्रियः ॥ ४६ ॥
निपुणश्च कलादक्षः सुखी निःसङ्गचित्तवान् । अपापः पुण्यशीलश्च सत्यार्जवसमन्वितः ॥ ४७ ॥
देशिकः स्वकुलोत्तुङ्गः सर्वसम्भावितात्मवान् । जायते तस्य परितो योजनं पावनं भवेत् ॥ ४८ ॥
तदालोकनसंलापसंस्पर्शादिकृतां नृणाम् । पापकर्मक्षयात्तेन रहिताः स्युश्च तत्समाः ॥ ४९ ॥
कालचक्रस्य नित्याया लोकस्य च बहिःस्थितम् । व्योमरूपमनाद्यन्तं यत्तच्चिन्मयमावयोः ॥ ५० ॥
यो वेत्त्येवमशेषं तु नित्यावैभवमीरितम् । स जीवन्मुक्त एवेति प्रोक्तं तल्लक्षणं च ते ॥ ५१ ॥

इति ॥ मातृकार्णवे--

शृणु देवि प्रवक्ष्यामि श्रीविद्यापूजनं महत् । रमादिषोडशी विद्या तथा परादिषोडशी ॥ १ ॥
कामादिषोडशी चैव तथा वागादिषोडशी । शक्त्यादिषोडशी प्रोक्ता पञ्चधा वै कुलागमे ॥ २ ॥
तत्तद्विद्योपासनायां तत्तत्पूजाविधिः स्मृतः ।.... ....॥

अत्र यथोक्तषोडशीविद्यादौ तत्तद्बीजस्थापनेन तत्तत्षोडशीति सिद्धान्तः । तथा--

(१) रमादिषोडशीविद्यापूजने शक्तयः स्मृताः । ताः शक्तीः सम्प्रवक्ष्यामि शृणु देवि यथाक्रमम् ॥ ३ ॥
अनन्ता चाप्रमेया च कमला कामिनी कला । कान्ता च कामगा चैव कलिकल्मषनाशिनी ॥ ४ ॥

सिद्धलक्ष्मी राज्यलक्ष्मीः सिद्धिस्थाने यजेत्तुताः । क्षोभिणीं द्राविणीं चैवोन्मादिनीं वशिनीं तथा ॥ ५ ॥
आकर्षिणीं खेचरीं च ततश्च मदनातुराम् । सर्वबीजमयीं सर्वयोनिरूपां मनोन्मनीम् ॥ ६ ॥
एताः शक्तीर्दशैवात्र मुद्रास्थानेषु पूजयेत् । रञ्जनीं रागशीलां च राजसीं रतिरागिणीम् ॥ ७ ॥
तामसीं सात्त्विकीं सौम्यां क्रूरां चैवाष्टमातृकाः । पूजयेन्मातृकास्थानेष्वेवमाद्यावृतिं यजेत् ॥ ८ ॥
षोडशारे यजेत्प्रोक्तकलाः सोमस्य षोडश । अष्टारे तु मन्दोन्मत्तां मन्मथार्तां मनस्विनीम् ॥ ९ ॥
मातङ्गीं मदनां मत्तां पश्चाच्च मदविह्वलाम् । मनोवेगां च सम्पूज्य ततश्चतुर्दशारके ॥ १० ॥
इन्द्राणीं चैव शर्वाणीं शाङ्करीं शशिशेखराम् । इच्छावतीं कामचारां ततश्च गगनावतीम् ॥ ११ ॥
लास्यप्रियां ललामां च चन्द्रहासां ततः परम् । चार्वङ्गीं चारुचरितां चपलां चारुभूषणाम् ॥ १२ ॥
यजेद् दशारयुग्मे तु जीवनां रतिसुन्दरीम् । हावरूपां भावरूपां वीणापुस्तकधारिणीम् ॥ १३ ॥
खड्गिनीं बाणिनीं चैवाह्लादिनीं कुसुमप्रियाम् । बालामम्बां विशालाक्षीं सुखोन्मुखाम् ॥ १४ ॥
भक्तिप्रियां वेदगर्भां विचित्रां सुरसुन्दरीम् । हंसिनीं कोलवक्त्रां च ततोऽष्टारे यजेदिमाः ॥ १५ ॥
ब्राह्मीं सरस्वतीं वाणीं तथा वाग्वादिनीं तथा । भारतीं नकुलीं भाषां श्रुतिस्मृतिविबोधिनीम् ॥ १६ ॥
अन्तराले तु सम्पूज्याः प्राग्वदायुधदेवताः । वामां ज्येष्ठां च रौद्रीं च त्रिलोणाग्रेषु पूजयेत् ॥ १७ ॥
एवं ते कथितं भद्रे श्रीचक्रार्चनमुत्तमम् । क्रमपूजां विधायादौ प्रोक्तपूजां समाचरेत् ॥ १८ ॥
रमादिषोडशीविद्योपासकानामयं क्रमः । य एवं कुरुते नित्यं श्रीचक्रक्रममुत्तमम् ॥ १९ ॥
भुङ्क्त्वेह भोगानखिलान् देवीसायुज्यमाप्नुयात् । (२) अथ वक्ष्ये महेशानि पराद्यायाश्च पूजनम् ॥२०॥
माया लज्जा प्रभा ज्योत्स्ना महोच्छुष्मा महानिशा । कमनीया कला कान्ता कम्बुकण्ठी कलावती ॥२१॥
वरेण्या वरदा बाला पावनी च परात्परा । भवानी भावुका भव्या भवबन्धविमोचिनी ॥ २२ ॥
पाशिनी पाशविच्छेदा वाणिनी शारदा शिवा । अचिन्त्यानन्दचरिता तारिणी धर्मविक्रमा ॥ २३ ॥
ईश्वरी कौतुकप्रीता दुर्गा कात्यायनी परा । उर्वशी दैत्यहन्त्री च पद्मा पद्मावती शिवा ॥ २४ ॥
स्वाहा स्वधा वषट्कारा श्रद्धा प्रीतिर्मनोरमा । मनोहरा महामाया मानिनी मानपोषणा ॥ २५ ॥
अजिता चोर्जितानन्ता ओंकारा सामगप्रिया । अभेद्या नीतिरक्षा च ज्ञानदा भक्तवत्सला ॥ २६ ॥
निरवद्या विशोका च वरदा कामरूपिणी । कौलिनी कौलिकप्रीता कुलीना कूर्मरूपिणी ॥ २७ ॥
आधाराधेयरूपा च कुलमार्गप्रबोधिनी । लिङ्गत्रयस्थानगता लिङ्गिनी लिङ्गरूपिणी ॥ २८ ॥
अज्ञानहन्त्री घोरास्या मङ्गला मङ्गलप्रदा । भावाभावविनिर्मुक्ता गुणातीता गुणात्मिका ॥ २९ ॥
धारुणी धर्मतनया दानशीला दयापरा । त्रिवर्णस्था च षट्कोणनिलया बिन्दुवासिनी ॥ ३० ॥
योगिनी योगगम्या च योगाङ्गा योगरूपिणी । वेदान्तगोचरा वेद्या कालहन्त्री कुलान्तका ॥ ३१ ॥
वज्रेश्वरी च कामेशी महाविद्या महाभया । त्रिपुरा त्रिपुरेशी च सुन्दरी भगमालिनी ॥ ३२ ॥
नवकोणालया नित्या त्रिगुणा त्रिगुणात्मिका । प्राग्वत्प्रपूजयेदेता नवावरणगाः क्रमात् ॥ ३३ ॥
(३) कामादिषोडशीविद्याशक्तीराकर्णयाम्बिके । कामेशी कामरूपा च कुलकान्ता कलावती ॥ ३४ ॥
कौमोदिनी रतिर्ज्येष्ठा श्रद्धा प्रीतिर्धृतिर्मतिः । काली कलालिका काम्या काम्यदा कामगा सती ॥ ३५ ॥
सारा सर्वेश्वरी सौम्या साध्वी सत्या सनातनी । ऋद्धिः सिद्धिस्ततः शुद्धिर्बुद्धिस्तन्द्रा क्षुधा जरा ॥३६ ॥
जलजा जातिशीला च जागरा रागवर्जिता । जया च विजया चापराजिता कुसुमायुधा ॥ ३७ ॥
आद्या विद्या महाविद्या महावेगा मदोद्धता । भुजङ्गभूषणा रौद्री नरमालाविभूषणा ॥ ३८ ॥
आर्या हिमाचलसुता विन्ध्यशैलनिवासिनी । पीठगा पीठनिलया कामरूपकृतालया ॥ ३९ ॥
कौमारी कर्कशा क्रुद्धा गणेशी गणवन्दिता । भद्रा भद्रावती भव्या भैरवी भैरवप्रिया ॥ ४० ॥

भावगम्या भवध्वंसिन्यचिन्त्याचिन्त्यवैभवा । नारायणी भद्रकाली वैष्णवी विष्णुपूजिता ॥ ४१ ॥
वाराही नारसिंही च भीमा भीमाट्टहासिनी । विशाला विमला बाला परा त्रैलोक्यमातृका ॥ ४२ ॥
भगवत्यप्रधृष्या च भगमाला भगोदरी । मदिरा मदिरानन्दा महिषी महिषान्तकी ॥ ४३ ॥
कदम्बवनमध्यस्था किराती कीर्तिशालिनी । अभंगुरा विश्वभूतिर्विश्वा विश्वैकवन्दिता ॥ ४४ ॥
वीरा वीरेश्वरी वीरवन्दिता विमलप्रभा । कपालिनी कामचारा कामिनी कामदायिनी ॥ ४५ ॥
इच्छा ज्ञाना क्रिया चैव पूजनीयाः प्रयत्नतः । (४) वागादिषोडशीशक्तीर्वक्ष्ये देवि यथाक्रमम् ॥ ४६ ॥
वाग्भवा वरदा वाणी शान्तिः क्षान्तिः क्रिया दया । मरीचिरङ्गिरा प्रज्ञा सृष्टिः श्रद्धा च सन्नतिः ॥४७॥
गुणप्रिया गुणाराध्या वाणी भाषा सरस्वती । ब्रह्माणी ब्रह्मवन्द्या च ब्राह्मणी ब्रह्मवादिनी ॥ ४८ ॥
श्वेतमाल्याम्बरधरा सुश्वेता श्वेतभूषणा । इन्दुमण्डलमध्यस्था चन्द्रखण्डविराजिता ॥ ४९ ॥
चन्द्रिका चारुभूषा च कौवेरी कालकल्पदा । वाच्यवाचकरूपा च ज्ञानगम्या गुणोत्कटा ॥ ५० ॥
गेयाद्या गेयरूपा च गीर्बाणवरवन्दिता । भोगिनी भोगिरूपा च भूतेशी भूतरूपिणी ॥ ५१ ॥
भुवनानन्दिनी भूमिर्भुवनव्यापिनी ह्यजा । प्रगल्भा प्रौढचरिता वेदशास्त्रार्थगोचरा ॥ ५२ ॥
वेदान्तवेद्या सीमन्तिन्यंकुशिन्यखिलात्मिका । शुकहस्ता शुकाराध्या श्यामला चण्डविक्रमा ॥ ५३ ॥
चामुण्डा चण्डिका दुर्गा भावनी भावगोचरा । जृम्भिणी मोहिनी चण्डा रञ्जिनी वशिनी तथा ॥ ५४ ॥
वन्धिनी बुद्धिरक्षा च बुधरूपा बुधार्चिता । सामगानरता नित्या चतुरा चतुरानना ॥ ५५ ॥
जाड्यहन्त्री जनाराध्या तारा नीलसरस्वती । कुरुकुल्ला च वाग्वादिन्यानन्दा नन्दगोपजा ॥ ५६ ॥
नन्दिनी नादरूपा न नलिनी नलिनप्रिया । पाविनी परमाह्लादिन्यासुरी सुरपूजिता ॥ ५७ ॥
सुमना उन्मना गानप्रिया कल्याणदायिनी । महनीयगुणा रत्नभूषणा जनरञ्जिनी ॥ ५८ ॥
मुनिसेव्या मोदमाना मानिनी मलवर्जिता । मन्दारकुसुमप्रीता बन्धूककुसुमारुणा ॥ ५९ ॥
वृन्दा वृन्दारकनुता बृंहिताश्वमुखी तथा । प्राग्वत्पूजा प्रकर्तव्या नवस्वावरणेषु च ॥ ६० ॥
(५) शक्त्यादिषोडशीशक्तीः प्रवक्ष्यामि समासतः । याभिरेतज्जगद् व्याप्तं त्रैलोक्यं सचराचरम् ॥ ६१ ॥
शक्तिः परा वसुमती विश्वाद्या विश्वमातृका । पञ्चभूतात्मिका प्राणदायिनी भूतदायिनी ॥ ६२ ॥
विश्वेश्वरी विश्वहन्त्री सृष्टिस्थित्यन्तकारिणी । विश्वयोनिर्जगन्माता भावाभावविवर्जिता ॥ ६३ ॥
व्याप्तिदेवी जगज्जैत्री विवेका वीर्यवर्धिनी । मेयरूपा प्रमेया च प्रमागम्या प्रहेलिका ॥ ६४ ॥
ज्ञातृज्ञानज्ञेयरूपा ज्ञानविज्ञानदायिनी । प्रतीता प्रकृतिः प्रज्ञा प्रामाण्यमतिसंस्थिता ॥ ६५ ॥
शून्यरूपाऽशून्यरूपा शून्याशून्यविवर्जिता । चित्स्वरूपा चिदंशा च निर्विकल्पा निरीहिका ॥ ६६ ॥
निराधारा निराकारा गुणातीता गुणोदया । सूर्यमण्डलमध्यस्था वह्निमण्डलवासिनी ॥ ६७ ॥
चन्द्रमण्डलमध्यस्था ह्याज्ञाचक्रनिवासिनी । अत्यन्तगहनातीता दिव्यमार्गविबोधिनी ॥ ६८ ॥
सुधापानरता सौधी सुधासारा सुधात्मिका । परमात्मस्वरूपा च कुण्डलिन्यमितप्रभा ॥ ६९ ॥
दिव्यस्थानत्रयातीता स्थानत्रयनिवासिनी । स्थानदा स्थानगम्या च स्थानास्थानविवेकिनी ॥ ७० ॥
संभ्रमा भ्रमरूपा च विभ्रमा भ्रमवर्जिता । विश्रान्तिरूपा शृङ्गाटनिलयाऽकथवर्णिनी ॥ ७१ ॥
निर्मला निर्मलज्ञेया मलत्रयविशोषिणी । अव्यक्ता व्यक्तरूपा च व्यक्ताव्यक्तविवर्जिता ॥ ७२ ॥
तुरीया च त्वराकारा कुमारी पूजकप्रिया । गिरिजा गिरिशाराध्या गीर्बाणगणसेविता ॥ ७३ ॥
जाग्रद्रूपा स्वप्नरूपा तथा सुषुप्तिरूपिणी । अवस्थात्रयनिर्मुक्ता चिदानन्दस्वरूपिणी ॥ ७४ ॥
हंसिनी हंसरूपा च मुण्डमालाविभूषणा । आरक्तनयना रक्तभूषणा निरुपद्रवा ॥ ७५ ॥
भक्तप्रिया मुक्तिदात्री भुक्तिदा भुवनात्मिका । जन्मसंसारबन्धघ्नी जननी जनकात्मिका ॥ ७६ ॥

जरामरणविध्वंसिन्यम्बुजाक्षी शिवप्रिया । प्राणशक्तिर्भूतमाता सुकेशिन्यथ कौशिकी ॥ ७७ ॥
कोशरूपा भूरिगणा पूर्णरूपा पुरातनी । अकलङ्कशशाङ्काभा मुद्रापुस्तकधारिणी ॥ ७८ ॥
त्रिनेत्रा त्रिपुरा चैव त्रिस्थाना त्रिकविग्रहा । त्रिभूतिस्त्रिपुराम्बा च महात्रिपुरसुन्दरी ॥ ७९ ॥
पञ्चप्रकारयजनं प्रोक्तं तेऽतिरहस्यगम् । गोप्यं गोप्यं पुनर्गोप्यं गोपनीयं प्रयत्नतः ॥ ८० ॥
एवं पूजयिता मर्त्यो मत्समो भवति ध्रुवम् ।.... ....॥

इति ॥ श्रीतन्त्रराजे—(३० प० ४३ श्लो०)

ततः सूक्ष्मैः पराख्यैश्च होमैः सिद्धिं शृणु प्रिये । स्वमूलाधारके वह्नौ कुण्डलिन्यग्रगामिनि ॥ १ ॥
वाच्यवाचकरूपं तु प्रपञ्चं जुहुयात्तथा । येनावयोः समो देवि जायते हवनेन च ॥ २ ॥
तद्विधानं वद प्राज्ञ शम्भो सम्यंममाधुना । आधारे वह्निसंस्थानं कुण्डलिन्याः स्थितिं ततः ॥ ३ ॥
तद्रूपं तत्क्रियां सर्वं वद मे विशदं प्रभो । शृणु वक्ष्ये विधानं ते सम्यग्विस्तरतोऽधुना ॥ ४ ॥
प्राणाग्निहोत्रविद्येति यत् त्रय्यां श्रूयते परम् । यज्ज्ञात्वा वनितागर्भं न प्रयाति नरो ध्रुवम् ॥ ५ ॥
यद्व्ययायासरहितमनन्यापेक्षनिर्वहम् । यन्मनःक्लेशविश्रान्तेः स्थानं निःशेषकल्मषम् ॥ ६ ॥
सुखास्पदं स्वगं विश्वमयं चिद्वेद्यवेदनात् । अत्रोक्तशेषमखिलं षट्त्रिंशे पटले स्फुटम् ॥ ७ ॥
प्रदर्श्यते ततस्तत्र वर्णयामि च किञ्चन । नित्यानित्योदिते मूलाधारमध्येऽस्ति पावकः ॥ ८ ॥
सर्वेषां प्राणिनां तद्वद् हृदये च प्रभाकरः । मूर्धनि ब्रह्मरन्ध्राधश्चन्द्रमाश्च व्यवस्थितः ॥ ९ ॥
तत्त्रयात्मकमेव स्यादाद्यानित्यात्रिखण्डकम् । तेषां त्रयाणामैक्यं तु मनसा भावयेत्तथा ॥ १० ॥
गमागमाभ्यां तेजोभिस्तेषामन्योन्यजैः शिवे । तथा समिद्धं तत्तेजस्त्रयं बुद्ध्वाथ तन्मयम् ॥ ११ ॥
विश्वं विकल्पविधुरं भावयेदद्भुतं च तम् । तेषां त्रयाणां वर्णानां प्रागुक्तानां क्रमेण वै ॥ १२ ॥
द्वाभ्यामन्यतमं कृत्वा पुटितं जुहुयाच्च तैः । पुटितान् भानुहृद्वर्णैः स्वरांस्तारेण हुंकृतैः ॥ १३ ॥
कुण्डलीमुखमार्गाग्नौ जुहुयान्निश्चलाशयः । वह्निभानुपुटान्तःस्थैश्चान्द्रैस्तद्वद् हुनेत्क्रमात् ॥ १४ ॥
चन्द्रभानुपुटान्तःस्थैर्वह्नयर्णैर्जुहुयात्तथा । भानुचन्द्रपुटान्तःस्थैर्वह्नयर्णैर्जुहुयात्तथा ॥ १५ ॥
चन्द्रवह्निपुटान्तःस्थैर्भान्वर्णैर्जुहुयादपि । वह्निचन्द्रपुटान्तःस्थैरपि तद्वद् हुनेत्तथा ॥ १६ ॥
तथा तेषां प्रातिलोम्यात् षोडशानां हुनेदपि । एवं द्वादशधा होममक्षरैः स्यादुदीरितैः ॥ १७ ॥
कृत्वा तद्वाच्यमखिलमर्थरूपं च तैः समम् । तेजस्त्रयात्मरूपं स्यादावयोरपि तद्वपुः ॥ १८ ॥
अन्यानि चावयोरिच्छागृहीतानि वपूंषि वै । तान्यन्यदेवतादेहसमानीच्छावशानि च ॥ १९ ॥
मुक्तिश्च तन्मयीभावस्थैर्यमेव समीरितम् । तत्र कुण्डलिनीं ब्रूहि स्फुटं मे परमेश्वर ॥ २० ॥
तां वदामि शृणु प्राज्ञे रहस्यं परमाद्भुतम् । मूलाधारस्थवह्न्यात्मतेजोमध्ये व्यवस्थिता ॥ २१ ॥
जीवशक्तिः कुण्डलाख्या प्राणाकारेण तेन सा । प्रसुप्तभुजगाकारा त्रिरावर्ता महाद्युतिः ॥ २२ ॥
मायाशीर्षा नदन्ती तामुच्चरन्त्यनिशं स्वगे । सुषुम्नामध्यदेशे सा यदा कर्णद्वयस्य तु ॥ २३ ॥
पिधाय न शृणोत्यस्या ध्वनिं तस्य तदा मृतिः । एवं सा जीवशक्तिस्तु यदा कुण्डलिनीस्थितिम् ॥ २४ ॥
विहाय ऋतुजां याति स्वेच्छादण्डाहता सती । तदा विश्वप्रतीतिःस्यात् प्राणिनामन्यदा पुनः ॥ २५ ॥
निशान्धकारे भुवनस्थितिवत्स्वात्मनः स्थितिः । एवं तां वेत्ति यो देहे (देशिकादेशदर्शिताम् ॥ २६ ॥
स वेत्ति ब्रह्म परमं मां त्वामपि च साधकः । जीवन्मुक्तः स विज्ञेयः शुद्धात्मासक्तमानसः ॥ २७ ॥
अस्पृष्टपुण्यपापश्च शोकहर्षातिभूमिगः । रागद्वेषविनिर्मुक्त)स्त्यक्तसर्वक्रियाफलः ॥ २८ ॥
निरुपाधिकसन्तुष्टः स्वेच्छाधीनेच्छया युतः । स्वदेहमात्रयात्रश्च समश्च स्तुतिनिन्दयोः ॥ २९ ॥

समारिमित्रः कल्याणगुणशीलदयान्वितः । एवं स कथितो जीवन्मुक्तो लोकेषु साधकः ॥ ३० ॥
इतरः पूजने देव्या भजने च सकौतुकः । कालेन सिद्धिभाग्यभूयादितरो दुःखभाजनम् ॥ ३१ ॥

पूर्वप्रोक्तो जीवन्मुक्तो, द्वितीयःकालेन सिद्धिभाग्जीवन्मुक्तसदृशो भूयादित्यर्थः । तदितरः प्रोक्तद्वयातिरिक्तो दुःखभाजनं भवतीति । तथा—

जन्मभिर्बहुभिः क्लिष्टो मूर्खो विद्याधनोद्भवैः । मदैरुन्मदचित्तः सन्नधोऽधो याति योनिषु ॥ ३२ ॥
नित्यासु भक्तिर्भुवने प्रक्षीणे पापकर्मणि । जायते यद्बलाल्लोके भवेत्प्रागुक्तलक्षणः ॥ ३३ ॥
नरो, भवन्ति तां भक्ति प्राप्य लोकेषु देवताः । दृश्यन्ते भानुचन्द्रारबुधजीवसितासिताः ॥ ३४ ॥
अन्ये च लोकपालाद्यास्तद्भक्तिप्राप्तसंपदः । बहुना किं परं देवि नित्याभिः सदृशानघे ॥ ३५ ॥
न सन्ति देवता विद्यास्तस्मात्ता एव देवताः । भावयाम्यहमद्यापि त्रिकाले विग्रहान्वितः ॥ ३६ ॥
तद्वर्णव्याप्तचक्रस्था ग्रहाश्च तव दर्शिताः । विधिविष्णुशिवात्मत्वं तासामेव निजेच्छया ॥ ३७ ॥
अन्याश्च देवता या यास्तास्तास्तन्मयविग्रहाः । ....॥

प्रागुक्तमन्त्रभेदा देवताभेदाश्च सर्वे नित्याभेदा एवेत्यर्थः । तत्प्रदर्शनमेतज्ज्ञानार्थमिति । तथा—

पररूपं तु वक्ष्यामि होमं ते महदद्भुतम् । यत्सिद्धिः सिद्धरूपाणां प्रागुक्तानां भवेत्सदा ॥ ३८ ॥
अन्येषां न भवेद्भावस्तथा सर्वाश्रयो महान् । प्रक्षीणाशेषपापानां भक्तिः स्याद्भक्तजीविनाम् ॥ ३९ ॥
नित्याविद्यासु भक्तानां लक्षणं शृणु सुन्दरि । आमुष्मिकासंशयत्वं सन्तोषो नित्यपूर्णता ॥ ४० ॥
सुखिता त्यागिता ज्ञानं कृतज्ञत्वमलुब्धता । अकार्पण्यमदीनत्वं परचिन्तानिरुद्यमः ॥ ४१ ॥
दयालुता मनस्वित्वमवैषम्यं मनःस्थितौ । लाभहान्योः प्रीतिरोषाभावः कल्याणशीलता ॥ ४२ ॥
कल्याणाभिनिवेशित्वं सदा कल्याणकीर्तनम् । अकल्याणकथालापवैमुख्यं स्वेच्छया स्थितिः ॥ ४३ ॥
सदैश्वर्यं च भोक्तृत्वं नैष्ठिकत्वमजिह्मता । सर्वानुकूल्यं सङ्गीतप्रियत्वं वाञ्छिताप्तयः ॥ ४४ ॥
राजयोषित्प्रभुप्राज्ञबहुमानममत्सरः । सर्वोत्तरत्ववाञ्छा च लक्षणानीरितानि ते ॥ ४५ ॥
यद्विकल्पस्वरूपं तु मनस्तन्निर्विकल्पके । निधानं परहोमं तु स्थूलसूक्ष्मं च यन्मयम् ॥ ४६ ॥
उच्चावचविकल्पानां वस्तूनामग्निदाहतः । तन्मयत्वादैकरूप्यं स्थूलहोममुदीरितम् ॥ ४७ ॥
सूक्ष्महोमं तथा शब्दैर्नानारूपैस्तु वाचकैः । वाच्यार्थानामशेषेण वेद्यवेतृविदात्मना ॥ ४८ ॥
स्थितिः परो भवेद्धोमः सर्वभेदविलापनात् । स्वात्मरूपमहावह्निज्वालारूपिषु सर्वदा ॥ ४९ ॥
निरिन्धनेद्धरूपेषु परमार्थात्मनि स्थिरे । निर्व्युत्थानविलापस्तु परहोमः समीरितः ॥ ५० ॥

इति ॥ लक्ष्मीकुलार्णवे । श्रीदेव्युवाच—

अतिदारिद्र्यसिन्धौ तु मग्ननां परमेश्वर । उद्धारक्रमतो देव पूजां वद विधानतः ॥ १ ॥
दारिद्र्यध्वंसनीं पूजां ललितायाः सविस्तराम् । शीघ्रसम्पत्तिसिद्धिभूतां कृपया वद मे प्रभो ॥ २ ॥

श्रीईश्वर उवाच ।

शीघ्रसम्पत्प्रसिद्ध्यर्थं भार्गवेण कृता पुरा । श्रीमत्त्रिपुरसुन्दर्याः सा पूजा कथ्यते मया ॥ ३ ॥
ययातिमन्दभाग्योऽपि कुबेरसदृशो भुवि । जायते नात्र संदेहस्तां पूजां शृणु वल्लभे ॥ ४ ॥
चक्रपूजां विधायादौ नैमित्तिकमथाचरेत् । तत्तदावरणस्थानेष्वियं पूजा विधीयते ॥ ५ ॥
ताः शक्तीः सम्प्रवक्ष्यामि राज्यसम्पत्प्रदायिकाः । हारनूपुरसंयुक्ता कमलद्वयधारिणी ॥ ६ ॥
लक्ष्मीः परशिवमयी शुद्धजाम्बूनदप्रभा । तेजोरूपा च कमलवर्सार्तविश्वमोहिनी ॥ ७ ॥
सर्वभूषोज्ज्वलाङ्गी च बीजापूरधरा तथा । आद्या शक्तिश्च सकलजननी कलशधारिणी ॥ ८ ॥
विष्णुवामाङ्कसंस्था च ततश्च कमलालया । श्रीमत्सौभाग्यजननी भार्गवी च सनातनी ॥ ९ ॥

सर्वकामफलावाप्तिसाधनैकसुखावहा । हिरण्यवर्णा हरिणी सुवर्णललितस्रजा ॥ १० ॥
समस्तसम्पत्सुखदाऽखिलसौभाग्यदायिनी । समस्तकल्याणकरी ज्ञानदा च हरिप्रिया ॥ ११ ॥
विज्ञानसम्पत्सुखदा ह्यश्वपूर्णा हिरण्मयी । विचित्रवाग्भूतिकरी रथमध्या मनोहरा ॥ १२ ॥
हस्तिनादप्रमोदा चानन्तसौभाग्यदायिनी । सर्वभूतान्तरस्था च स्वर्णप्राकारमध्यगा ॥ १३ ॥
समस्तभूतेश्वरी च विश्वरूपा प्रभामयी । दारिद्र्यदुःखौघतमोपहन्त्री पद्मिनी तथा ॥ १४ ॥
दीनार्तिविच्छेददक्षा कृपाकलितलोचना । प्रणतस्वान्तशोकघ्नी शरणागतरक्षणा ॥ १५ ॥
शान्तिः कान्तिः पद्मसंस्था कमनीयगुणाश्रया । क्षान्तिर्दान्तिश्च दुरितक्षयकारिण्यतः परम् ॥ १६ ॥
शशिशेखरसंस्था च धनधान्यसमृद्धिदा । शक्ती रतिर्नित्यपुष्टा रजनीकरसोदरा ॥ १७ ॥
करीषिणी च भक्तिश्च भवसागरतारिणी । मतिः सिद्धिर्धृतिश्चैव मधुसूदनवल्लभा ॥ १८ ॥
पुष्टिर्हिरण्यमाला च शुभलक्षणलक्षिता । अतिदुर्गतिहन्त्री च वरसद्गतिदायिनी ॥ १९ ॥
दिवि देवगणाराध्या भुवनार्तिविनाशिनी । आर्द्रा पुष्करिणी पुष्टिर्धरणीधरवल्लभा ॥ २० ॥
दारिद्र्यदुःखहन्त्री च भयविध्वंसिनी तथा । श्रीविष्णुवक्षःस्थलगा ह्यशेषसुविभूतिदा ॥ २१ ॥
लक्षणालक्षिताङ्गी च पद्मा पद्मासनार्चिता । विद्या सम्पत्करी चैव देवसङ्घाभिपूजिता ॥ २२ ॥
भद्रा च भाग्यरूपा च नित्या निर्मलबुद्धिदा । सत्या च सर्वभूतस्था रत्नगर्भान्तरस्थिता ॥ २४ ॥
रम्या शुद्धा च कान्ता च कान्तिमद्भासिताङ्गका । सर्वसौख्यप्रदा देवी भक्तौघाभयदायिनी ॥ २४ ॥
श्वेतद्वीपकृतावासा जगन्माता जगन्मयी । रत्नगर्भस्थिता सौम्या क्षीराम्बुधिकृतालया ॥ २५ ॥
प्रसन्नहृदया चैव परिपूर्णा हिरण्मयी । वसुन्धरा श्रीधरा च वसुदोग्ध्री कृपामयी ॥ २६ ॥
विष्णुप्रिया रत्नगर्भा समस्तफलदा तथा । रसातलगता चैव सुव्रता च हरिप्रिया ॥ २७ ॥
धरणीगर्भसंस्था च समुन्नतमुखी तथा । समस्तपुरसंस्था च परिपूर्णमनोरथा ॥ २८ ॥
करुणारसनिःष्यन्दनेत्रद्वयविलासिनी । सर्वराजगृहावासा महालक्ष्मीर्गुणान्विता ॥ २९ ॥
वैकुण्ठनगरस्था च क्षीरसागरकन्यका । योगिहृत्पद्मसंस्था च कल्पवल्ली दयावती ॥ ३० ॥
भक्तचिन्तामणिश्चैव ह्यादिमायेन्दिरा रमा । निराकारा च साकारा ब्रह्माण्डचयधारिणी ॥ ३१ ॥
एकनाथाद्यलक्ष्मीश्चाज्ञानहन्त्री गुणातिगा । प्रज्ञानलोचनाशेषवाग्जाड्यमलहारिणी ॥ ३२ ॥
सुस्पृष्टवाक्प्रदा चैव सर्वसम्पद्विराजिता । प्रभालावण्यसुभगा दोग्ध्री स्वर्णपदा तथा ॥ ३३ ॥
समस्तविघ्नौघहन्त्री भोगदा च विचक्षणा । देवाधिनाथवन्द्या च दीनपोषणतत्परा ॥ ३४ ॥
माङ्गल्यबीजमहिमा निधिरूपिण्यनन्तगा । आद्यादिलक्ष्मीश्च महासिद्धलक्ष्मीस्ततः परम् ॥ ३५ ॥
राज्यलक्ष्मीर्दिव्यलक्ष्मीः सुश्रीर्मङ्गलदेवता । भक्तिदा मुक्तिदा चैव भुक्तिदा सङ्गतिप्रदा ॥ ३६ ॥
कीर्तिदा धनदा चैव पुत्रपौत्रविवर्धिनी । पद्मानना च पद्मोरुः पद्माक्षी पद्मसम्भवा ॥ ३७ ॥
अश्वदायी च गोदायी धनदायी महाधना । चन्द्रसूर्याग्निसर्वाभा जातवेदास्त्रसंस्थिता ॥ ३८ ॥
दिग्गजेन्द्रसमाराध्या दिव्यभूषणभूषिता । सर्वसम्पत्प्रदा चैव तथा सर्वार्थसाधिनी ॥ ३९ ॥
एताश्च शक्तयो देव्याः पूजनीयाः प्रयत्नतः । सर्वसम्पत्समृद्धिः स्यादचिरेण न संशयः ॥ ४० ॥
सर्वदा पूजयेद्देवीं कृत्वा चक्रसमर्चनम् । तस्य गेहे स्थिरा लक्ष्मीः पुत्रपौत्रानुगामिनी ॥ ४१ ॥
शक्तयः शतसंख्याताश्चाशीतिश्चतुरुत्तरम् । आदौ संहृतिपूजां च कृत्वा सृष्टिक्रमं भजेत् ॥ ४२ ॥
स्थितिक्रमेण पूजां वै केचिदिच्छन्ति तान्त्रिकाः । अथ वक्ष्ये महादेवि षट्सु चक्रेषु पूजनम् ॥ ४३ ॥
मूलाधारे यजेच्चक्रं वृतं पार्थिवरश्मिभिः । रविवारे च सौभाग्यभाजनं जायते नरः ॥ ४४ ॥
इन्दुवारे च नाभिस्थमणिपूरकचक्रके । पूजयेच्चक्रमध्यस्थां जलरश्मिभिरावृताम् ॥ ४५ ॥

भौमवारे लिङ्गदेशे स्वाधिष्ठाने तथा यजेत् । तेजसां रश्मिभिर्वीतां बुधे हृत्पद्मसंस्थिते ॥ ४६ ॥
अनाहते वायुरश्मिवृतां तद्वद्यजेत्क्रमम् । विशुद्धिचक्रके चैव गुरोर्वारे समाहितः ॥ ४७ ॥
आकाशांशुभिरावीतां यजेत् सर्वार्थसिद्धये । आज्ञाचक्रे भृगोर्वारे मानसांशुभिरावृताम् ॥ ४८ ॥
यजेच्छ्रीचक्रमध्यस्थां यजेत्सौभाग्यसिद्धये । ब्रह्मरन्ध्रे सहस्रारे शनिवारे विशेषतः ॥ ४९ ॥
पूजयेच्च जगद्धात्रीं सर्वरश्मिभिरावृताम् । मनसा पूजयेद्देवमन्वहं च समाहितः ॥ ५० ॥
न कदापि भवेद्रोगो दारिद्र्यं नोपजायते । ग्रहपीडां विजित्याशु पुत्रपौत्रैः समेधते ॥ ५१ ॥

अत्र प्रोक्तचक्रेषु प्रोक्तवारेषु श्रीचक्रक्रममभ्यर्च्य, ततो लक्ष्मीशक्तीः समभ्यर्च्य तत्तद्रश्मीनां पूजनं तत्तन्नामाकं कुर्यात् । तत्तन्नामानि षट्शाम्भवरश्मिक्रमे ज्ञेयानि ॥ मातृकार्णवे—

शक्तिकूटप्रभेदोत्थशक्तयोऽत्र प्रपूजिताः । शक्तिकूटोपासनायाः फलं दास्यत्ययत्नतः ॥ १ ॥

तत्फलं तु प्रागेव दर्शितम् ।

बीजद्वयं च तत्कूटरूपिणीशक्तिसंयुतम् । सप्ताक्षरीं समुच्चार्य पूजयेत्तत्र तत्र वै ॥ २ ॥

अत्र चतुरस्रेऽष्टादश, षोडशारे षोडश, अष्टदलेऽष्टौ, चतुर्दशारे चतुर्दश, दशारद्वये विंशतिः, अष्टारेऽष्टौ, अन्तरालेऽष्टौ त्रिकोणे तिस्रः, शेषं बिन्दुचक्रे, एवं क्रमेण पूजयेत् । पूजाक्रमस्तु—ह्रींश्रीं सकलह्रीं रूपिणीशक्तिपादुकां पूजयामीति तत्तत्कूटमुच्चार्य पूजयेदित्यर्थः । प्रथमतः क्रमपूजां विधाय तत एवं पूजयेत् । केचित्तु क्रमपूजायामेव "अणिमासिद्धिपादुकां पूजयामि, प्रोक्तकूटरूपिणीशक्तिपादुकां पूजयामि" इत्येकदैव पूजा कार्येति वदन्ति, तत्र यथागुरूपदेशं कार्यमिति । तत्र लक्ष्मीशक्तिपूजायामपि पृथग्वा सहैव वा कर्तव्या । एकदैव चेत् "हारनूपुरसंयुक्तारूपिणी अणिमासिद्धिपादुकां पूजयामि" इति क्रमं गुरुतः शास्त्रतश्च विज्ञायाचरेत् । तथा—

तथा वाग्भवकूटोत्थाः शक्तयः सम्प्रपूजिताः । वाग्भवोपासनोक्तं हि फलं दास्यन्त्ययत्नतः ॥ ३ ॥
कामराजमहाकूटसम्भवाः शक्तयः क्रमात् । पूजिताः सम्प्रयच्छन्ति ह्यनायासेन तत्फलम् ॥ ४ ॥

इति । त्रिपुरार्णवे—

मध्यत्रिकोणे रेखासु नित्यानां मण्डलत्रयम् । पञ्च पञ्च विभागेन मध्ये श्रीललितां यजेत् ॥ १ ॥
यद्दिने यां यजेत्तां तु सर्वावरणसंवृताम् । पूजयेत्सर्वसौभाग्यहेतवे ज्ञानसिद्धये ॥ २ ॥

इति । श्रीतन्त्रराजे (३६ प०)—

अथ षोडशनित्यानां विधानानीत्वयाधुना । कथितानि मया तानि श्रुतानि च महेश्वर ॥ १ ॥
तासां तव तथान्येषां देवतानां यथार्थतः । स्वरूपं किं कथं विश्वं किमाकारं च दृश्यते ॥ २ ॥
प्राणिनां पुण्यपापानि किंरूपाणि च कैस्तथा । तेषां जन्मानि केन स्युः का मुक्तिः संसृतिश्च का ॥ ३ ॥
कस्य मुक्तिः कथं बन्धः केन तस्य च मोचनम् । किं मूलं संसृतेरस्याः कानि तत्त्वानि का च धीः ॥४॥
कानीन्द्रियाणि के प्राणाः को जीवः कः परस्तथा । कः कालः के ग्रहाः सर्वं यथावन्मे वद प्रभो ॥ ५ ॥
येन वेदैश्च शास्त्रैश्च पुराणैरागमैरपि । कथ्यते तत् स्फुटं ब्रूहि नातिसङ्कोचविस्तरम् ॥ ६ ॥
यत् त्वया विंशतिविधः कृतः प्रश्नः शिवेऽधुना । तेषामुक्तक्रमेणैव कथयामि तवोत्तरम् ॥ ७ ॥
यैरुत्तरैः स्वस्वरूपं लभ्यते सम्यगञ्जसा । यदितोऽन्यत्र सर्वत्र प्रोक्तं निह्नवचक्रतः ॥ ८ ॥
अत्राञ्जसा प्रोच्यते तद् दुर्वचं तु निदर्शनैः । तैर्मयोक्तक्रमाज्ज्ञित्वा दुर्जयां वासनां शनैः ॥ ९ ॥
सत्यशुद्धस्फुटाशेषस्फुरत्तात्मा भवेद् ध्रुवम् । गुह्यं रहस्यं परमं गोपयेत् सर्वतः सदा ॥ १० ॥
यज्ज्ञानमिदमो ज्ञानं यज्ज्ञानमहमस्तथा । द्वयोरपि च यज्ज्ञानं तज्ज्ञानं विद्धि मे वपुः ॥ ११ ॥
तासां तव तथान्येषां चैतन्यात्मा यथार्थतः । लाभादेवं वासनाया विनाशादन्यथा तथा ॥ १२ ॥

साद्दश्यबुद्धेर्द्वैरूप्यात् प्रपञ्चस्य च दृश्यते । द्वैरूप्यमनयोरुक्तं सत्यासत्यमयत्वतः ॥ १४ ॥
तेनैव प्राणिनां पुण्यपापकर्मसु वर्तनम् । यथात्मज्ञानतोऽर्थेषु व्यापारः पुण्यसंज्ञकः ॥ १५ ॥
अनर्थेष्वर्थसंकल्पः पापाख्यो मनसा तथा । जन्मानि नानारूपाणि यैर्नित्यं क्लेशभाजनम् ॥ १६ ॥
यथार्थज्ञानमर्थानां मुक्तिस्तद्विपरीततः । संसृतिर्मोचनं बुद्धेर्वासना बन्ध ईरितः ॥ १७ ॥
कर्मक्षयात्सद्गुरोस्तु कटाक्षोक्तिविमर्शतः । मोचनं सर्वजन्तूनां नेतरैश्च कदाचन ॥ १८ ॥
संसृतेः कन्दमुदितमविवेकः परो महान् । यदायत्तमिदं जीवभुवनं परिकीर्तितम् ॥ १९ ॥
तत्त्वानि तत्त्वान्युक्तानि सर्वैः सर्वत्र सर्वदा । ज्ञातृज्ञानज्ञेयमयान्यन्यथान्यानि सर्वदा ॥ २० ॥
का च धीरिति यत्पृष्टं तद् दुर्वचमपि स्फुटम् । (कथयामि शृणु प्राज्ञे यदायत्ता च विंशतिः ॥ २१ ॥
मनो बुद्धिरहङ्कारश्चित्तमित्यादिनामभिः । वस्तुभेदादभेदाच्च यदुक्तं सर्वतः सदा ॥ २२ ॥
तदेकमक्षयं स्थूलं सूक्ष्मं दुर्ज्ञमतिस्फुटम् ।) विषमं च समं विश्वं विश्वातीतमनामयम् ॥ २३ ॥
अरूपं सर्वरूपं च सर्वक्लेशकरं हरम् । सर्वतृष्णाकरहरं सर्वेषां सर्वतः सदा ॥ २४ ॥
सत्त्वरूपं रजोरूपं तमोरूपमतन्मयम् । संसाररूपमुत्तीर्णविग्रहं सुस्थिरं चलम् ॥ २५ ॥
अपापं पापरूपं च जीवरूपं परात्मकम् । अतीन्द्रियं चेन्द्रियात्मा निर्देवं सर्वदैवतम् ॥ २६ ॥
सर्वक्षोभात्मकं सर्वशान्तिरूपं च निर्दयम् । सदयं चाविवेकात्मा विवेकपरमार्थकम् ॥ २७ ॥
उत्तारकं पातनकृद् भङ्गरूपं जयात्मकम् । शोकात्मकं च निःशोकं सकौतुकमकौतुकम् ॥ २८ ॥
निरुद्यमं सदोद्युक्तं सावलेपमगर्वकम् । अमर्षरूपमक्षोभ्यं सर्वक्षोभ्यं सुखासुखम् ॥ २९ ॥
क्रोधलोभमदद्रोहमात्सर्यकामविग्रहम् । अस्पृष्टषड्गुणं षण्डं वनिता पुरुषस्तथा ॥ ३० ॥
अपकृष्टं तथोत्कृष्टं स्वच्छाकारं तथाबिलम् । अगाधमतिगम्भीरमुदारं कृपणं तथा ॥ ३१ ॥
भाग्यरूपमभाग्यात्म निर्भयं सभयं तथा । अनिच्छमिच्छारूपं च कातरं वीरविग्रहम् ॥ ३२ ॥
निर्दोषं सर्वदोषात्मा सर्वविन्मूढविग्रहः । सङ्कोचरूपः सर्वेषां तथा सर्वप्रकाशकः ॥ ३३ ॥
अस्तेयरूपः स्तेयात्मा वश्योऽवश्यश्चरो मृदुः । सरसं विरसं क्रूरं सौम्यं तैर्बहुभिस्तु किम् ॥ ३४ ॥
त्वन्मयी धीः समाख्याता मन्मयी चिदुदीरिता । उभयैक्याद्विवेकात्मा जीवोऽन्यस्तद्विवेकवान् ॥ ३५ ॥
तस्यास्तु बुद्धेर्यो वेत्ति याथात्म्यं विकृतीरपि । सामर्थ्यं स्वाविभेदित्वं सिद्धेः प्राप्यफलानि च ॥ ३६ ॥
योगी स ब्रह्मविज्ज्ञानी शिवयोगी तथात्मवित् । तेनैव विहितं सर्वं प्रपञ्चात्मैक्यविग्रहम् ॥ ॥ ३७ ॥
स्वात्मनस्तु मनोवृत्त्या विषयग्रहणाय वै । सृष्टानि भूतशक्त्यात्मविग्रहाणीन्द्रियाणि तु ॥ ३८ ॥
भूतात्मबुद्धिसंघातशक्तिचैतन्यजृम्भणम् । प्राणास्तत्साक्षिभूतो हि जीवस्तत्त्वात्मकः परः ॥ ३९ ॥
कालस्तु पूर्वं बुद्धेर्यदुक्तं गुणसमस्तवान् । काल इत्यक्षरं द्वन्द्वाद् यद्वाच्यं यद्वपुर्मम ॥ ४० ॥
न शक्यतेऽञ्जसा वक्तुं तथा दर्शयितुं तव । तथापि तव यत्किञ्चिद् व्याकरोमि समञ्जसम् ॥ ४१ ॥
अहोरात्रादिभेदस्तु चन्द्रार्कादिसमन्वयात् । तेन तन्मयतारूपकथनं नोचितं ततः ॥ ४२ ॥
लवत्रुट्यादयो यत्तद् भाष्यन्ते खण्डकास्तुतत् । कालस्य रूपं तत् प्रोक्तं यदनाद्यन्तविग्रहम् ॥ ४३ ॥
लवत्रुट्यादिकं ब्रूहि यैः कालो ज्ञायते मया । नलिन्या पत्रनिचये सूचीविद्धेऽथ तस्य वै ॥ ४४ ॥
एकैकदलभेदोत्थावस्था लव उदाहृतः । तत् त्रिंशद्गुणितं प्रोक्तं त्रुटीत्यादिशरीरवान् ॥ ४५ ॥
काल इत्युदितं तस्य स्वरूपं किं कथं भवेत् । इति पृष्टेन तद्वक्तुं शक्यते सुस्फुटं मया ॥ ४६ ॥
स्वबुद्धया प्रोक्तमात्रस्य भावनाद् यत्तु लभ्यते । ततस्य वपुरुद्दिष्टं नान्यास्ति गतिरस्य वै ॥ ४७ ॥
ग्रहास्तुः चिन्मयाः काले क्वापि चक्रभ्रमात् पुनः । भूतादीनि समस्तानि विकृतानि वितन्वते ॥ ४८ ॥
नानाविधास्तद्विकाराः प्रपञ्चो दृश्यते सदा । तैरेव तेषां नाशश्च मरुतेव हविर्भुजः ॥ ४९ ॥

प्रश्नानामुत्तरं देव त्वया च कथितं विभो । तथापि मे प्रपञ्चात्मविवेकोऽभून्न मेऽधुना ॥ ५० ॥
जननं मरणं चेति द्वयं कस्य कथं भवेत् । अरूपस्य विभोस्तस्य जीवश्चेत् तत्कथं स्थितिः ॥ ५१ ॥
कुतः स्थितिः कथंवा स्यात्तत्कालपरमात्मनो । मुक्तो वा जायते किन्तु परे वा सम्भवन्ति किम् ॥५२॥
कथं वा पञ्चभूतानां स्थितिर्देहेषु वान्यतः । देहेषु जोवसम्प्राप्तिः कीदृशीत्यादि मे वद ॥ ५३ ॥
येन श्रुतेन चित्ते मे शुश्रूषान्यस्य नो भवेत् । तथा मे सर्वसन्देहांश्छिन्धि पूर्णोपदेशतः ॥ ५४ ॥
प्रागुक्तबुद्धिवैविध्यारब्धकर्मविपाकतः । जननं मरणं चेति द्वयं देहपरिग्रहात् ॥ ५५ ॥
प्रतप्तलोहपिण्डेऽग्निस्थितिवत् परविश्वयोः । अवस्था कालपरयोस्तादात्म्यादेव वर्तनम् ॥ ५६ ॥
मुक्तास्तु जीवा न कदाप्याविर्भूयुः कुतश्चन । न वापूर्वाः सम्भवन्ति बुद्धेः कृत्यमशेषतः ॥ ५७ ॥
मुद्रिकारूपमुद्रेव मधूच्छिष्टादिविग्रहम् । जीवादिरूपतो बुद्धिर्विशेषयति तत्परम् ॥ ५८ ॥
भूमेरेवास्फुटं स्थानं कुतश्चित्सुस्थिरं सदा । जलाग्न्योस्तत्र चान्यत्र व्यक्ताव्यक्ता स्थितिः सदा ॥ ५९ ॥
वायोः सर्वत्र सततमवस्थानं त्वनेकधा । व्योम सर्वगमेव स्यात्कालताद्रूप्यतः सदा ॥ ६० ॥
देहेषु सुस्फुटं तेषामवस्थानं च पञ्चधा । जीवानामागतिर्देहे मातापित्रोस्तु वीर्यतः ॥ ६१ ॥
तादात्म्यं सङ्गतं तत्र जृम्भते सा चिदात्मना । तत्र प्रारब्धविरमान्मरणं निद्रया समम् ॥ ६२ ॥
सिद्धानां सर्वदा देहत्यागे भेदो न विद्यते । प्रागेव तस्य देहात्मत्रिवेकान्मनसि स्वगे ॥ ६३ ॥
नेतरेषां तु साध्यानां साधकानां च कालतः । पौषादिषु तु मासेषु षट्सु राकोपकण्ठतः ॥ ६४ ॥
मरणं सुगतित्वस्य ज्ञापकं भवति स्फुटम् । सिद्धस्तु सर्वतो मुक्तो देहेन्द्रियमनःस्थिरः ॥ ६५ ॥
यतस्तेनास्य निधनं सर्वदा सवतस्तथा । सुगतित्वं व्यनक्त्येव जीवन्मुक्तो यतस्त्वयम् ॥ ६६ ॥
देहवत्त्वे समानेऽपि प्राणिनां सर्वतः सदा । बुद्धेर्वैविध्यरूपस्य कारणं किं वद प्रभो ॥ ६७ ॥
भूमिष्ठत्वे समानेऽपि तोयानां रसभेदवत् । जायते स्वाश्रयवशात् स च कर्मभिरेव वै ॥ ६८ ॥
यथाश्वत्थगतो वह्निरुपायैरितरैः क्वचित् । नोपलभ्यो भवेत्शुष्कमथनव्यापृतिं विना ॥ ६९ ॥
तथात्मज्ञानसम्प्राप्तिः सद्गुरुप्राप्तितो विना । न कस्यापि भवेदेषा प्रतिज्ञा विश्वतोऽनिशम् ॥ ७० ॥
खननाद्भूगतं तोयं यथा समुपलभ्यते । तथा सद्गुरुसंसेवां सम्प्राप्य स्वस्वरूपकम् ॥ ७१ ॥
सद्गुरोः पादसेवातः सम्प्राप्तात्मस्वरूपिणः । विशेषः को भवेदन्यदुर्लभः सत्यविग्रहः ॥ ७२ ॥
आभिरूप्यमसन्देहः सन्तोषः परिपूर्णता । दयार्द्रचित्तता रागद्वेषाविषयचित्तता ॥ ७३ ॥
सुलभत्वमगर्वित्वं सदा नियतशीलता । कृतज्ञता सत्यता च परचिन्तानिवर्तनम् ॥ ७४ ॥
आर्जवं चावित्तलौल्यं विषयानतिसङ्गिता । अदैर्घ्यसूत्र्यमक्षौद्र्यं नातिगाधाशयात्मता ॥ ७५ ॥
वृथालापेष्वसक्तिश्च वृथाव्यापारवर्जनम् । वृथाविनोदराहित्यं जिह्मचित्तैरसङ्गतिः ॥ ७६ ॥
पुरुषार्थार्थकथनचिन्ताकरणकौतुकम् । अस्तेयशाक्तरास्तिक्यं परलोकानुचिन्तनम् ॥ ७७ ॥
देवतापूजनस्तोत्रवैभवालापशीलता । पापानां वर्जनं पुण्यकरणे कौतुकं सदा ॥ ७८ ॥
परस्तवननिन्दासु विरतिर्वीतरागिता । निःस्पृहत्वमलोलत्वमनाक्षेपोऽजडात्मता ॥ ७९ ॥
अगोपनं स्वभक्तानामभक्तानां च गोपनम् । गुरुविद्यागमाचारस्तत्रनं तत्प्रवर्तनम् ॥ ८० ॥
सिद्धचिह्नानि चैतानि भवन्त्यात्मवतां ध्रुवम् । न भवन्तीतरेषां तु प्रद्विषन्त्येव तांश्च ते ॥ ८१ ॥
तत्कृत्यं शृणु वक्ष्येऽहं यो लब्धस्वात्मवैभवः । निरस्ताशेषसंसारमौर्ख्याज्ञानाविवेकवान् ॥ ८२ ॥
देशकालकुलाचारान् गुरुराजादिकल्पितान् । पालयन् सुस्मितमुखः पूज्यपूजनकौतुकी ॥ ८३ ॥
देहास्थैर्यं तथाज्ञानव्यापारान् कालतः क्षणात् । पतितान् बन्धुचित्ताज्ञादुर्लङ्घ्यान् स्वचयस्थितीन् ॥८४॥
स्वेन्द्रियाणां च सामर्थ्यं स्वकर्माणि कृतानि च । मुहुर्मुहुश्च विमृशोद्विरमेदशुभात्मनः ॥ ८५ ॥

वृथा न कालं गमयेद् द्यूतस्त्रीस्वापवादतः । गमयेद् देवतापूजाजपयोगत्तवादिना ॥ ८६ ॥
गुरोः कृपालापकथास्तोत्रागमविलोकनैः । गमयेदनिशं कालं न वदेत्परदूषणम् ॥ ८७ ॥
प्रत्यक्षे च परोक्षे च स्तुवीत प्रणमेद्गुरुम् । सद्गुणैस्तत्कृपाधिक्यैः पुण्यैः स्थैर्यैश्च सत्यतः ॥ ८८ ॥
रागलोभमदक्रौर्यपापपैशुन्यवर्जनैः । सन्तोषज्ञाननियमशान्तिज्ञानादिभिस्तथा ॥ ८९ ॥
मिताहारो मितालापी विविक्तः सर्ववर्जितः । नित्याचिन्ता स्वात्मशुद्धिः कृत्यमात्मवतां सदा ॥ ९० ॥
पूर्वोक्तद्वादशास्रस्य मध्ये कृत्वा यथाविधि । योनिं तन्मध्यतो देवीं ललितां पृष्ठतो गुरून् ॥ ९१ ॥
पार्श्वयोरायुधान्यष्टौ कोणेषु परितः क्रमात् । कामेश्वर्यादिकास्तिस्रस्तद्बहिर्द्वादशस्वपि ॥ ९२ ॥
द्वादशान्या यजेत् तत्तन्नित्याविद्याभिरेव वा । तन्नामविद्याभिर्वा ताः पूजयेत्साद्यर्घकल्पनम् ॥ ९३ ॥
सन्ध्यात्रयं षष्टिसंख्यं जपेत्तद्दिनविद्यया । नान्यत्कृत्यं भवेत्तस्य नित्यनैमित्तिकादिकम् ॥ ९४ ॥
तन्मध्ये नवयोनिं वा विधायात्र स्वशक्तिभिः । पूजयेत्प्राग्वदुभयप्रकारादेकयोगतः ॥ ९५ ॥
यावज्जीवं विधिस्त्वेष गदितः सिद्धये सदा । सिद्धानामपि सर्वेषां येयासौ स्वात्मवानभूत् ॥ ९६ ॥
समस्तमेतत्तन्त्रं ते कथितं परमेश्वरि । यत्परामर्शतो भावस्त्वावयोरैक्यमश्नुते ॥ ९७ ॥
तद्द्यात्तन्त्रमेतत्तु नाभक्ताय कदाचन । नाशिष्याय न दम्भाय प्रच्छन्नानयशीलिने ॥ ९८ ॥
नायाचते नास्तिकाय न लुब्धाय न मानिने । न पापाय न वित्ताय नादक्षाय च भेदिने ॥ ९९ ॥
यस्तन्त्रमेतत् सफलं नित्याविद्यास्तु षोडश । शक्त्या संगृह्य विधिवद्भजते स मदंशकः ॥ १०० ॥
शिवतत्त्वमयी व्याप्तिरिति सम्यक् समीरिता । अस्या निकालनाच्चित्ते तत्तत्त्वं स्वात्मसात्कृतम् ॥ १०१ ॥

अत्र अस्यार्थतत्त्वं गुरुतो बोद्धव्यम् ॥ अथ यन्त्रविधिर्नानातन्त्रोक्तः प्रदर्श्यते । तत्र श्रीमातृकार्णवे—

अथ यन्त्रविधिं वक्ष्ये दृष्टादृष्टफलप्रदम् । शुभेऽह्नि पूजयेद्देवं स्वेष्टदेवं यतात्मवान् ॥ १ ॥
प्रत्यहं मन्त्रजपवान् हविष्याशी जितेन्द्रियः । इदं यन्त्रं विलिख्य, मे भवेदिष्टमिति स्फुटम् ॥ २ ॥
स्वप्ने मे कथय क्षिप्रमिति सम्प्रार्थ्य यत्नतः । अध शायी त्रिरात्रं तु स्वप्ने यद्वदति स्फुटम् ॥ ३ ॥
तद्यन्त्रं विलिखेन्मन्त्री तत् कार्यं भवति ध्रुवम् । सिद्धारिकोष्ठके सम्यग्विचार्य च पुनः पुनः ॥ ४ ॥
अरियन्त्रं परित्यज्य विलिखेत्सिद्धकोष्ठगम् । तदा सिद्धिर्भवेन्नूनं नात्र कार्या विचारणा ॥ ५ ॥
प्रागुक्तयन्त्रमन्त्राणां विधिरेष प्रकीर्तितः ।.... ....॥

इति । अस्यार्थः—प्रथमतः शुभे दिने हविष्याशी जितेन्द्रियः स्वेष्टमन्त्रमष्टोत्तरसहस्रं जपित्वा रात्रौ शुचिर्भूत्वा अधःशायी स्वप्येत, स्वापसमये भो देवाऽमुककार्यमुद्दिश्यामुकदेवतायन्त्रं लेखिष्यामि तदिष्टं भवति वा नवेति स्वप्ने मे तथ्यं कथयेति प्रार्थयेत् । ततः स्वप्ने यत्किञ्चित् यथा कथयति तथा विधेयम् । अथवा सिद्धसाध्यादिकोष्ठे विचार्य सिद्धसुसिद्धस्थाने यदायाति, तत् कर्तव्यं, अरिकोष्ठगं न कर्तव्यमित्यर्थः । तथा—

यन्त्रे यदुक्तं यद्द्रव्यं तत् संपाद्य प्रयत्नतः । स्नातः शुक्लाम्बरधरो लिखेद् यन्त्रं रहस्यके ॥ ६ ॥
बीजस्योपरि षष्ठ्यन्तां साधकाख्यां समालिखेत् । पार्श्वयोः कुरुयुग्मं च मध्ये कार्यमधस्तथा ॥ ७ ॥
साध्यस्याख्यां द्वितीयान्तां सर्वयन्त्रेष्वयं क्रमः ।.... ....॥

अत्रायमर्थः—यद्देवतायन्त्रं मध्ये तद्देवताबीजं लेखनीयं, तद्बीजशिरसि षष्ठ्यन्तं साधकनाम अमुकस्येति, बीजाधः साध्यनाम द्वितीयान्तं अमुकमिति, बीजगर्भे वशमाकर्षणम् इत्यादिकर्म, बीजपार्श्वयोः कुरु २ एवं लिखेदित्यर्थः । तथा—

तत्प्रासादपराबीजं बीजस्याधो लिखेत्पुनः । ईशान्यादिषु कोणेषु हंसःसोऽहमिति न्यसेत् ॥ ८ ॥
एतत्प्राणमयं बीजं नेत्रे श्रोत्रे च विन्यसेत् ।.... ....॥

हंस इति ईशाने आग्नेये च, सोऽहमिति वायव्ये नैर्ऋत्ये च लिखेदित्यर्थः । तथा—

लिखेद् दिक्पालबीजानि पूर्वादिदशदिक्षु च । तास्वेव यन्त्रगायत्रीवर्णान् न्यस्येत्त्रिशः क्रमात् ॥ १० ॥
तद्बहिर्मन्त्रगायत्रीवर्णांस्तु क्रमतस्तथा । यन्त्रराजाय शब्दान्ते विद्महे पदमीरयेत् ॥ ११ ॥
वरप्रदाय चाभाष्य धीमहीति पदं वदेत् । तन्नो यन्त्रं समुच्चार्य ततश्चैव प्रचोदयात् ॥ १२ ॥
प्रोक्ता तु यन्त्रगायत्री तत्तत्कल्पेषु मन्त्रगा । प्राणप्रतिष्ठामन्त्रं तु बहिः सर्वत्र वेष्टयेत् ॥ १३ ॥
भूर्जपत्रे तथा क्षौमे तालपत्रेऽथवा लिखेत् । स्वर्णपत्रे तारपत्रे ताम्रपत्रे च सुन्दरि ॥ १४ ॥
यन्त्रं विलिख्य गुटिकां कृत्वा लोहत्रयेण च । लाक्षया तु समावेष्ट्य जप्त्वा होमं समाचरेत् ॥ १५ ॥
सम्पातसिक्तं संवेष्ट्य लाक्षया स्वर्णरूप्यके । निक्षिप्य तत्तन्मन्त्रेण सम्पूज्य विधिवत्ततः ॥ १६ ॥
गले वा मूर्ध्नि बाहौ वा धारयेदिष्टमाप्नुयात् । अथ वश्यकरं यन्त्रं प्रोच्यते शैलसम्भवे ॥ १७ ॥
कांस्यपात्रे लिखेदष्टदलं कर्णिकया युतम् । रोचनाचन्दनेनैव जातीकाष्ठसमुत्थाय ॥ १८ ॥
लेखन्या कर्णिकामध्ये साध्यनाम समालिखेत् । अष्टपत्रेष्वष्टवर्गान् केसरेषु स्वरांल्लिखेत् ॥ १९ ॥
वृत्तत्रयेण संवेष्ट्य चान्तरालद्वये तथा । मातृकां त्रिलिखेत्तद्वदनुलोमविलोमगाम् ॥ २० ॥
एवं विलिख्य यन्त्रं तु पूजयेदुपचारकैः । सप्ताहाद्वशमायान्ति नरनारीनराधिपाः ॥ २१ ॥
भूर्जपत्रे समालिख्य लोहत्रयसुवेष्टितम् । धारयेद् बाहुमूले वै पूर्वोक्तफलभाग्भवेत् ॥ २२ ॥
अथ वक्ष्येऽन्ययन्त्रं तु भूपुरं विलिखेद्बुधः । रेखाद्वयेन मध्ये तु साध्यनाम समालिखेत् ॥ २३ ॥
हृल्लेखापुटितं चाथ तदुपर्यध आलिखेत् । मायाबीजचतुष्कं तु भूर्जे गन्धाष्टकेन च ॥ २४ ॥
अनामारक्तयुक्तेन पूजयेद् वश्यकृद् भवेत् । कुमारीपूजनं कृत्वा रक्तपुष्पान्नसंयुतम् ॥ २५ ॥
बलिं दद्याच्छागमांसं ततः सिद्धिर्भवेद् ध्रुवम् । यन्त्रधारणमात्रेण क्रोधस्तम्भं भवेत्क्षणात् ॥ २६ ॥
अन्यद् यन्त्रं प्रवक्ष्यामि दक्षिणोत्तरगं तथा । रेखाद्वयं समालिख्य तदुपर्यध आलिखेत् ॥ २७ ॥
तथैव रेखायुग्मं तु मध्ये साध्यं समालिखेत् । तारलक्ष्मीपुटं वामे दक्षिणे कोष्ठके तथा ॥ २८ ॥
क्षकारं सर्गसंयुक्तं विलिख्योपर्यधस्तथा । कोष्ठत्रयं समालिख्य मध्यकोष्ठे क्षकारकम् ॥ २९ ॥
सविसर्गं लिखेदेवं पार्श्वयोस्तु रमां लिखेत् । भूर्जे रोचनयालिख्य शरावद्वयसम्पुटे ॥ ३० ॥
दग्ध्वा तद्भस्म चादाय पिबेद् दुग्धेन चैव हि । स्वामी वश्यो भवेदस्य यावज्जीवं न संशयः ॥ ३१ ॥
अथान्यदपि वक्ष्यामि यन्त्रं परमदुर्लभम् । षट्कोणं विलिखेन्मध्ये बहिर्भूबिम्बमालिखेत् ॥ ३२ ॥
मध्ये साध्यं च तत्कर्म मायागर्भं लिखेत्ततः । मायाबीजं समालिख्य भूबिम्बे चाष्टदिक्षु च ॥ ३३ ॥
षट्कोणस्यान्तरालेषु कोणाग्रेष्वथ संलिखेत् । भूर्जपत्रे लिखेदेवं रोचनाकुंकुमेन च ॥ ३४ ॥
शरावसम्पुटे क्षिप्त्वा पूजयित्वोपचारकैः । तदग्रे तु जपेन्मायां सहस्रं यतमानसः ॥ ३५ ॥
तद्यन्त्रं धारयेन्मूर्ध्नि दिव्यस्तम्भनमुत्तमम् । अथान्यदपि वक्ष्यामि यन्त्रं सुमहदद्भुतम् ॥ ३६ ॥
लिखेदष्टदलं पद्मं भूर्जपत्रे मनोहरे । चतुरस्रेण संवेष्ट्य माया भृगुर्विसर्गवान् ॥ ३७ ॥
एतद्बीजद्वयेनैव पुटितं साध्यमालिखेत् । कर्णिकायां ततश्चाष्टदले च विलिखेत्पुनः ॥ ३८ ॥
मायासम्पुटितां बालातार्तीयं तच्छरावयोः । निक्षिप्त सर्वोपचारैः पूजयेत्प्रजपेत्तथा ॥ ३९ ॥
राजानं मोहयेत्सप्तरात्रादर्वाक् च साधकः । मृत्युञ्जयाख्यं यन्त्रं तु वक्ष्ये रक्षाकरं परम् ॥ ४० ॥
भूर्जपत्रद्वये चैव लिखेद्यन्त्रं पृथक्पृथक् । प्रथमं विलिखेन्मध्ये कर्णिकायां समाहितः ॥ ४१ ॥
उपर्युपरिभागेन भूपुराणां च सप्तकम् । वृत्तं तदुपरि न्यस्य तल्लग्नं रविपत्रकम् ॥ ४२ ॥
बहिर्भूपुरमालिख्य मध्ये साध्याख्यकर्म च । विलिख्य द्वादशदले षण्डस्वरविवर्जितान् ॥ ४३ ॥
द्वादशस्वरसंयुक्तान् लकारान् क्रमशो लिखेत् । तद्बहिश्चतुरस्रस्य कोणेषु त्रिशिखं न्यसेत् ॥ ४४ ॥
एतद्यन्त्रद्वयं योज्य क्वचित्संस्थाप्य यत्नतः । उपरिष्टाच्छिलां स्थाप्य तदुर्य्युपविश्य च ॥ ४५ ॥

चतुर्दलं कर्णिकायां साध्याख्यायुक्तकर्म च । दलेषु मायां संलिख्य तद्यन्त्रं पयसि न्यसेत् ॥ ४८ ॥
विवादे जयमाप्नोति सर्वथा नात्र संशयः । धनिकस्य वशीकृत्यै यन्त्रमन्यद्वदाम्यहम् ॥ ४९ ॥
रोचनाकुंकुमाभ्यां तु भूर्जपत्रे समालिखेत् । षट्कोणं तु समालिख्य साध्याख्यां मध्यदेशके ॥ ५० ॥
कोणान्तराले काम्यांश्च कोणाग्रेषु च संलिखेत् । बहिर्वृत्तद्वयं कृत्वा मायया वेष्टयेद्बहिः ॥ ५१ ॥
पूजयेत् सप्तदिवसैर्देवीमाहात्म्यमुत्तमम् । पठेत् तदग्रतो नित्यं कुमारीपूजनं चरेत् ॥ ५२ ॥
होमं कृत्वा तु तद्यन्त्रं धारयेद्बाहुमूलके । यद्यद्धि याचते द्रव्यं तद्ददाति धनी पुनः ॥ ५३ ॥
न याचते पुनर्द्रव्यं यन्त्रराजप्रभावतः । राजान्तिके स्थितो दुष्टः पैशुन्यं कुरुते यदा ॥ ५४ ॥
तदा तन्मोहनार्थं तु यन्त्रं कुर्वीत बुद्धिमान् । भूर्जे लिखेद्वसुदलं रक्तेन भुजगस्य च ॥ ५५ ॥
कर्णिकायां साध्यनाम मायां वसुदलेष्वपि । अर्घीशयुग्भृगुं कोणचतुष्के संविलिख्य च ॥ ५६ ॥
बहिर्वृत्तद्वयं कृत्वा पूजयित्वा जले क्षिपेत् । एकविंशद्दिनं यावद् दुष्टवश्यं भवेद् ध्रुवम् ॥ ५७ ॥
अथाभिधास्ये जयदं यन्त्रं मानप्रदं शिवे । भूर्जपत्रे रोचनया चतुरस्रं तु मध्यके ॥ ५८ ॥
तल्लग्नमष्टपत्राणि तद्बहिर्भूपुरं लिखेत्सुधीः । मध्ये लिखेद्रमां ह्स्रीं दिग्दलेषु क्रमाल्लिखेत् ॥ ५९ ॥
रोहरोधस्तम्भयेति कोणेषु विलिखेत्सुधीः । सविसर्गं च संवर्तं मध्ये मायाख्यया युतम् ॥ ६० ॥
शरावद्वयमध्यस्थं पूजयेदुपचारकैः । इन्द्रादिलोकपालेभ्यो बलिं दद्यात् समाहितः ॥ ६१ ॥
विवादे व्यवहारे च राजद्वारे भयापहम् । मानदं तत् समाख्यातं यन्त्रमेतत् सुदुर्लभम् ॥ ६२ ॥
अन्यद्यन्त्रं प्रवक्ष्यामि यावज्जीववशप्रदम् । अलक्तकैरनामासृग्रोचनेभमदैः सह ॥ ६३ ॥
भूर्जे च जातिलेखन्या चतुरस्रं तु संलिखेत् । आद्यपंक्तौ सप्त लिखेद् बीजानि भुवनेशितुः ॥ ६४ ॥

मायाबीजानीत्यर्थः ।

साध्यनामपुटत्वेन सृणिमायामनोभवैः । द्वितीयपंक्त्यामथ च पुटिता रत्नबीजतः ॥ ६३ ॥
माया तत्पुटितानङ्गस्तृतीयायां ततः परम् । मायाबीजचतुष्कं च चतुर्थ्यां विलिखेत्सुधीः ॥ ६४ ॥
चतुरस्राद्बहिर्दिक्षु त्यक्त्वा याम्यं गणेशितुः । क्षिप्रप्रसादनस्यापि दशबीजानि संलिखेत् ॥ ६५ ॥

गं क्षिप्रप्रसादनाय नमः इति ।

एवं यन्त्रं समालिख्य कृष्णमृत्त्रिर्मितस्य च । गणेशस्योदरे क्षेप्यं पूजयेदुपचारकैः ॥ ६६ ॥
तदग्रे प्रजपेन्मन्त्रं सहस्रं यतमानसः । देवदेव गणाध्यक्ष सुरासुरनमस्कृत ॥ ६७ ॥
देवदत्तं ममायत्तं यावज्जीवं कुरु प्रभो । एवं मन्त्रं प्रजप्याथ हस्तमात्रेऽवटे तथा ॥ ६८ ॥
संस्थाप्य च गणाध्यक्षं गर्तं सम्पूरयेन्मृदा । यावज्जीवं वशीभूयात् स नरो नात्र संशयः ॥ ६९ ॥
अथान्यदपि वक्ष्यामि यन्त्रं सुमहदद्भुतम् । कर्पूररोचनाभ्यां च श्रीखण्डागुरुसंयुतम् ॥ ७० ॥
चतुर्दलाब्जं विलिखेद् भूर्जपत्रे मनोहरे । कर्णिकायां लिखेत्साध्यं ईकारं च ततः परम् ॥ ७१ ॥
ॐनमश्च तथा लेख्यं पूर्वपश्चिमपत्रयोः । अजिते इत्यपि लिखेद्दक्षिणोत्तरपत्रयोः ॥ ७२ ॥
त्रिदिनं पूजयेद्यन्त्रं चतुर्थेऽह्नि समाहितः । ब्राह्मणं भोजयित्वैवं यन्त्रं बाहौ च धारयेत् ॥ ७३ ॥
दर्शनादेव साध्योऽस्य वश्यो भवति निश्चितम् । भृत्यवश्यकरं यन्त्रं भूर्जे रोचनया लिखेत् ॥ ७४ ॥
चतुर्दलं कर्णिकायां साध्यं मायोदरे लिखेत् । हृल्लेखां तु दलेष्वेवं पूजयेद्विधिपूर्वकम् ॥ ७५ ॥
दधिमध्ये क्षिपेद्यन्त्रं भृत्यवश्यकरं भवेत् । दुष्टं प्रभुं वशीकर्तुं चतुरस्रं विरच्य च ॥ ७६ ॥
साध्यनाम लिखेन्मायागर्भे मध्ये च यत्नतः । लिखेद्रोचनया भूर्जे दुष्टप्रभुवशंकरम् ॥ ७७ ॥
राजिकासाध्यपांशूत्थप्रतिमाया हृदि क्षिपेत् । उपचारैः सुसम्पूज्य चुल्लीपार्श्वे निखातयेत् ॥ ७८ ॥

दिक्पालेभ्यो बलिं दद्यान्महाकालाय वै पुनः । अजारक्तेन संमिश्रं दुष्टभूपं वशं नयेत् ॥ ७९ ॥
भर्तृवश्यकरं यन्त्रं स्त्रीणां दौर्भाग्यनाशनम् । रोचनाकुंकुमाभ्यां च भूर्जपत्रे मनोरमे ॥ ८० ॥
चतुरस्रं लिखेन्मध्ये तल्लग्नाष्टदलानि च । कोणेषु विलिखेन्मायाबीजानां च त्रयं त्रयम् ॥ ८१ ॥
मध्ये नामार्णपुटितं मायाबीजत्रयं लिखेत् । पत्रेषु विलिखेन्मायाबीजानां च त्रयंत्रयम् ॥ ८२ ॥
यजेच्छुक्लत्रयोदश्यामुपचारैरुदङ्मुखः । निशि सप्ताहमेवं तु कृत्वान्ते भोजयेन्मुदा ॥ ८३ ॥
सुवासिनीः सप्तसंख्या ललिताप्रीतये पुनः । यन्त्रं धातुगतं धार्यं नारीणां भाग्यदायकम् ॥ ८४ ॥
अथान्यदपि वक्ष्यामि भर्तृवश्यकरं परम् । रोचनाकुंकुमाभ्यां तु भूर्जपत्रे सुशोभने ॥ ८५ ॥
लिखेदष्टदलं पद्मं साकारपुटितं तथा । साध्यनाम च तन्मध्ये हृल्लेखां पत्रमध्यतः ॥ ८६ ॥
निशि सम्पूज्य यन्त्रं तु त्रिदिनं भोजयेत्ततः । सुवासिनीत्रयं पश्चाद्धारयेद् गलदेशके ॥ ८७ ॥
भर्तृवश्यकरं स्त्रीणां क्षिप्रमेव न संशयः । लिखेदष्टदलं पद्मं कर्णिकायां समालिखेत् ॥ ८८ ॥
ह्स्त्रीं क्लीं भुवनेशी च बीजत्रयमतन्द्रितः । दलेष्वपि लिखित्वैव बीजानां च त्रयं त्रयम् ॥ ८९ ॥
भूर्जे रोचनयालिख्य पूजयेच्च दिनत्रयम् । हेममध्यगतं कृत्वा धारयेद्बाहुमूलके ॥ ९० ॥
स्त्रीणां सौभाग्यदं प्रोक्तं भवेद् दौर्भाग्यनाशनम् । निजरक्तकुशीताभ्यां लिखेद्भूर्जे चतुर्दले ॥ ९१ ॥
क्रोधबीजं साध्यनामयुतं मध्ये दलेष्वपि । पूजयित्वा क्षिपेद्यन्त्रमाज्ये चाकृष्टिकारकम् ॥ ९२ ॥
अथाकृष्टिकरं यन्त्रं त्रिपुराया वदाम्यहम् । भूर्जपत्रे रोचनया षट्कोणं विलिखेद् बुधः ॥ ९३ ॥
वाक्कामपुटितं साध्यनाम मध्ये समालिखेत् । बालातृतीयबीजं च कोणमध्येषु संलिखेत् ॥ ९४ ॥
पूजयेदुपचारैश्च घृतमध्ये निवेशयेत् । साध्यस्याकर्षणं भूयात् सप्ताहान्नात्र संशयः ॥ ९५ ॥
शिलायां विलिखेद्यन्त्रं हरिद्राया रसैः पुनः । कर्णिकायां साध्यनाम भूबीजोदरगं लिखेत् ॥ ९६ ॥
दलेष्वष्टसु भूबीजं पूजयेदुपचारकैः । पीतैरुपर्य्यधश्चापि शिलाभ्यां सम्पुटीकृतम् ॥ ९७ ॥
भूमौ खनित्वा संस्थाप्य शिलाभिः पूरयेन्मृदा । मुखस्तम्भो वादिनां च भवेत् क्षिप्रं न संशयः ॥ ९८ ॥

अत्र भूबीजं ग्लौमिति पिण्डबीजम् ।

गोरोचनाचन्दनाभ्यां भूर्जपत्रे समालिखेत् । वृत्तं कृत्वा च तन्मध्ये साध्यनाम समर्चयेत् ॥ ९९ ॥
तद्बहिर्विलिखेद् दिक्षु वकाराणां चतुष्टयम् । तद्बहिर्भूपुरं लेख्यं लोहत्रयसुवेष्टितम् ॥ १०० ॥
पूजितं धारयेद्बाहौ भयादग्नेर्निवर्तते । यस्मिन् गृहे स्थापयेत्तदग्निनाक्रम्यते नच ॥ १०१ ॥
अथ विद्वेषणं यन्त्रं वक्ष्यामि शृणु शैलजे । नक्षत्रयोनिक्षतजैर्लेखन्या काकपक्षया ॥ १०२ ॥
श्मशानखर्परे लेख्यं वृत्तं तन्मध्यतो न्यसेत् । मायया पुटितं चैवमकारं बिन्दुसंयुतम् ॥ १०३ ॥
तद्गर्भे विलिखेत् साध्यनाम कर्मसमन्वितम् । चतुर्दलेष्वपि तथा लेख्यं निशि च पूजयेत् ॥ १०४ ॥
छागरक्तेन सम्मिश्रमोदनं विनिवेद्य च । सुवासिनीं प्रपूज्याथ श्मशाने वा शिवालये ॥ १०५ ॥
निखातयेत्तदा शत्रोर्विद्वेषं जायते मिथः । नृकपाले लिखेद्यन्त्रं मेषरक्तविमिश्रितैः ॥ १०६ ॥
विषैरष्टभिरालेख्यं लेखन्या काकपिच्छया । अस्त्रसम्पुटितं साध्यं कर्णिकायां दलेष्वपि ॥ १०७ ॥
दिग्गतेषु च हुंकारं कोणपत्रेषु फड्युतम् । तद्बहिर्वृत्तमालेख्यं वर्मणावेष्टयेच्च तत् ॥ १०८ ॥
श्मशानभस्मनाच्छाद्य वह्निना ज्वालयेदमुम् । एकविंशद्दिनं यावच्छत्रुर्मृत्युप्रियो भवेत् ॥ १०९ ॥
काककौशिकरक्तेन भौमाहे भूर्जपत्रके । चतुर्दलं लिखेत्पद्मं कर्णिकागतसाध्यकम् ॥ ११० ॥
मारुतं सर्गिसंयुक्तं दलेषु विलिखेद् बुधः । रक्तस्रग्गन्धभूषाद्यैर्निशि सम्पूज्य यत्नतः ॥ १११ ॥
रक्तोपचारैराराध्य कुमारीं भोजयेत्तदा । एवं विंशद्दिनं कृत्वा चरमेऽह्नि तु यन्त्रकम् ॥ ११२ ॥
उच्छिष्टभक्ते संक्षेप्यं चूर्णीकृत्य प्रयत्नतः । तदोदनं वायसेभ्यो दद्याद् विकिरणेन च ॥ ११३ ॥

उच्चाटो जायते शत्रोः क्षिप्रमेव न संशयः । चन्द्रचन्दनकस्तूरीरोचनाकुंकुमैः शुभे ॥ ११४ ॥
दिने भूर्जे लिखेद्यन्त्रं जातीकाष्ठसमुत्थया । लेखन्योदङ्मुखो भूत्वा प्राक्प्रत्यग्दक्षिणोत्तरम् ॥ ११५ ॥
रेखाष्टकेन चैकोनपञ्चाशत्कोष्ठानि च । बहिः प्राक्कोष्ठमारम्भ प्रादक्षिण्यक्रमेण तु ॥ ११६ ॥
अकारादिजकारान्तान् तदन्तःकोष्ठकादितः । झकारादिभकारान्तान् तदन्त.कोष्ठकादितः ॥ ११७ ॥
मकारादिसकारान्तान् हकारं मध्यकोष्ठके । प्रतिरेखं त्रिशूलानि प्रतिशूलमुपर्य्यधः ॥ ११८ ॥
अभ्यन्तरविभागेन हृल्लेखासप्तकं लिखेत् । एवं विलिख्य यन्त्रं तु देवीमाहात्म्यमुत्तमम् ॥ ११९ ॥
पठन् यजेच्च त्रिदिनं ब्राह्मणान् भोजयेत्ततः । लोहत्रयगतं कृत्वा बाहुमूले तु धारयेत् ॥ १२० ॥
उपसर्गादिका दोषा न भवन्ति कदाचन । पूर्वोक्तैर्विलिखेद् द्रव्यैर्यन्त्रं भूर्जे मनोरमे ॥ १२१ ॥
कर्णिकायां लिखेत्साध्यं दलेषु सर्गवान् भृगुः । पूर्ववत्पूजयेद्यन्त्रं कण्ठे बद्धं भुजे शिशोः ॥ १२२ ॥
ग्रहभूतपिशाचादिभयेभ्यो मुच्यते क्षणात् । श्मशानखर्परे लेख्यं धत्तूरस्य रसेन च ॥ १२३ ॥
कृष्णाष्टम्यां चतुर्दश्यामष्टकोणं मनोहरम् । मध्ये साध्यं समालिख्य कोणाग्रेष्वन्तरालके ॥ १२४ ॥
रेफान् षोडश चालिख्य चतुरस्रं लिखेद्बहिः । दिक्षु कोणेषु विलिखेद्रेफांस्तत्पूजयेन्निशि ॥ १२५ ॥
निखातं पितृभवने ज्वरः सद्यो विमुञ्चति । सुगन्धैर्विलिखेद् भूर्जे पद्मं वसुदलं ततः ॥ १२६ ॥
कर्णिकायां साध्यनाम दलेष्वजपया युतम् । पूजितं विधृतं बाहौ सर्पभीतिः कदापि न ॥ १२७ ॥
अष्टगन्धैर्लिखेद् भूर्जे षोडशच्छदकाम्बुजम् । स्वरान् दलेषु संलिख्य द्वात्रिंशद्दलमम्बुजम् ॥ १२८ ॥
बहिर्विलिख्य पत्रेषु द्वात्रिंशद्व्यञ्जनानि च । विलिख्य भूपुरेणैव वेष्टयेद् दिग्विदिक्षु च ॥ १२९ ॥
हक्षौ विलिख्य तन्मध्ये साध्यं मायोदरे लिखेत् । अथवा कांस्यपात्रे तु लिखित्वा सप्तवासरान् ॥ १३० ॥
पूजयेद् धारयेद्वापि बन्धमोक्षप्रदं भवेत् । ....॥

इति ॥ शारदातिलके—(९४ प०)

अथ वक्ष्यामि यन्त्राणां भेदांस्तन्त्रेषु गोपितान् । यैः साधयन्ति सततं मन्त्रिणो निजवाञ्छितम् ॥ १ ॥

मार्णं लिखेत् सार्णयुतं स्वसाध्यं वर्गाष्टपत्रे स्वरकेसराब्जे ।
बहिः सदीर्घैर्गगनैः प्रवीतं रक्षाकरं यन्त्रमिदं प्रदिष्टम् ॥ २ ॥

अस्यार्थः—भूर्जपत्रे प्राक्तद्रव्यैरष्टदलकमलं विलिख्य, तत्कर्णिकायां मकारोदरे सकारं विलिख्य, तद्गर्भे साध्यनाम विलिख्य, पत्रेष्वष्टवर्गान् केसरेषु द्वन्द्वशः स्वरान् विलिख्य, बहिर्वृत्तं कृत्वा हांकारेण वेष्टयेद् । एतद्यन्त्रमुक्तफलदं भवति । तथा—

पुटीकृते भूमिपुरस्य युग्मे मायां लिखेन्मध्यगसाध्यसंज्ञाम् ।
वकारकोणेन महीपुरेण संवेष्टितं वश्यकरं तदुच्चैः ॥ ३ ॥

अस्यार्थः—अष्टकोणं विलिख्य मध्ये मायोदरे साध्यनाम विलिख्य, कोणेषु वकारं विलिख्य तदुपरि भूपुरेणावेष्टयेत् उक्तफलदं भवति । तथा—

(मध्ये सार्णविदर्भितं प्रपुटितं मृत्युञ्जयत्र्यक्षरैः
क्षान्तःस्थं निजसाध्यनाम विलिखेत् किञ्जल्कसंस्थान् स्वरान् ।
पत्रेष्वष्टसु नाम मन्त्रपुटितं वर्गास्तदग्रेष्वथो
यन्त्रं पद्मपुटीकृतं निगदितं मृत्युञ्जयाख्यं परम् ॥ ४ ॥

विषज्वरशिरोरोगनाशनं श्रीजयप्रदम् । कान्तिपुष्टिप्रदं वश्यं सर्वकामार्थसाधकम् ॥ ५ ॥

अस्यार्थः—अष्टदलकमलं विलिख्य तत्कर्णिकायां साध्यनाम सकारेण विदर्भितं कृत्वा, मृत्युञ्जयत्र्यक्षरैः सम्पुटितं कृत्वा सर्वं क्षकारोदरे यथा भवति तथा विलिख्य, केसरेषु स्वरान् विलिख्य पत्रेषु पत्राग्रेषु च नाम

मन्त्रपुटितं वर्गाष्टकं द्विधा विलिख्य, बहिर्वृत्तं कृत्वा पद्मद्वयपुटितं कुर्यादुक्तफलदं भवति । तथा—

साध्याक्र्यचिन्तामणिमग्निगेहे विलिख्य वाह्येऽनलगेहवीतम् ।
प्रवेष्टयेत् तद्बहिरष्टवर्णान् मन्त्रेण यन्त्रं ज्वरशान्तिदं स्यात् ॥ ६ ॥

संप्लवसः प्लावयेसा मन्त्रोऽष्टाक्षर ईरितः । एव एव भवेद्रक्षो विषज्वरविनाशने ॥ ७ ॥

अस्यार्थस्तु सुगम एव । तथा—

तारठद्वययुतं कुरुकुल्ले मन्त्रमत्र हुतभुग्गृहयुग्मे ।
मध्यकोणविवरेषु लिखेत्तद्यन्त्रमाशु विनिहन्ति भुजङ्गान् ॥ ८ ॥
ओंकारमायादिकमेखलेऽग्निवधूमनुं वह्निगृहस्य युग्मे ।
मध्यादिकोणेषु विलिख्य भूर्जे यन्त्रं विदध्याद् रिपुनागहारि ॥ ९ ॥
शूलाङ्किते वह्निगृहस्य युग्मे धूमावतीमत्र लिखेत्क्रमेण ।
मध्यादिकोणेषु मरुद्गृहस्थं यन्त्रं हुताशानिलवर्णवीतम् ॥ १० ॥

दान्तौ सार्घीशबिन्द्वन्तौ बीजे धूमावती द्विठः । धूमावतीमनुः प्रोक्तः शत्रुनिग्रहकारकः ॥ ११ ॥
विषेण कनकाम्भोभिः प्रेतकर्पटकल्पितम् । श्मशाने निखनेदेतच्छत्रूनुच्चाटयेद् ध्रुवम् ॥ १२ ॥

हुताशगेहद्वितये लिखित्वा वैवस्वताय द्विठमन्त्रवर्णान् ।
मध्यान्तमाकल्पितमिन्दुबिम्बे यन्त्रं महाभूतपिशाचवैरि ॥ १३ ॥

अत्र षट्कोणं विलिख्य मध्यादिषट्कोणेषु "वैवस्वताय स्वाहा" इति सप्ताक्षराणि विलिख्य, बहिरिन्दुबिम्बेन वृत्तेन वेष्टयेत् इति ॥ तथा—

नामालिख्य मकारकोष्ठयुगले कोणेषु तस्यां लिखेत्
मन्त्रज्ञो ङञणान् नकारसहितान् धूमावतीपत्रगान् ।
वीतं घर्मटिकादिना वरमिदं वायुत्रिगेहावृतं
यन्त्रं प्रान्तपरेतभूमिनिहितं विद्वेषणं स्याद् द्विषाम् ॥ १४ ॥

पूर्वं घर्मटिकेयुग्मं ततो मर्कटिके युगम् । घोरे विद्वेषकारिणि विद्विषो द्वेषकारिणि ॥ १५ ॥
अथ घोराघोरयोः स्यादमुकामुकयोस्ततः । विद्वेषयद्वयं हुंफट् विद्या घर्मटिकेरिता ॥ १६ ॥

मन्त्रोद्धारः सुगमः । अत्र षट्कोणं विलिख्य तन्मध्ये पूर्वकोष्ठे चाग्नेयकोष्ठे च मकारमन्यकोष्ठचतुष्टयेङञणनान् विलिख्य, तद्बहिर्वृत्तं विरच्य तल्लग्नान्यष्टपत्राणि विलिख्य, पत्रेषु धूमावतीमन्त्रस्यैकैकमक्षरं प्रतिपत्रं विलिख्य तद्बहिर्वृत्तद्वयान्तराले घर्मटिकाविद्यया वेष्टयेत्, उक्तफलदं भवति । तथा—

प्राक्प्रत्यक्दक्षिणोदग्विधिवदभिलिखेत् स्पष्टरेखाचतुष्कं
कोणोद्यच्छूलयुक्तं वलययुगयुतं मध्यपूर्वं तदन्तम् ।
मन्त्रस्यार्णान् परस्ताद् वसुपदविवरेष्वष्टवर्णांल्लिखित्वा
शूलोद्यद्द्वादशार्णं विधिवदभिहितं प्रेतराजस्य यन्त्रम् ॥ १७ ॥

यमराजसदामेय यमेदासजरामय । यदयोनिरपक्षेप पक्षेपरनियोदय ॥ १८ ॥
उक्तो धूमान्धकाराय स्वाहेत्यष्टाक्षरो मनुः । प्रणवोग्रं ततो दंष्ट्रा तत्परं विकृतं ततः ॥ १९ ॥
आननाय वधूर्वह्नेर्मन्त्रोऽयं द्वादशाक्षरः । विषवृक्षस्य फलके नृचर्मणि पटेऽथवा ॥ २० ॥
आलिख्याष्टविषैरेतत् श्मशाने निखनेन्निशि । ज्वरेण महताविष्टो मूर्छाकुलितमानसः ॥ २१ ॥
रिपुर्गच्छति पक्षेण यमलोकं न संशयः । ··· ....॥

अस्यार्थः—तत्र प्राक्प्रत्यग्दक्षिणोदक् च चतुःसूत्रनिपातनेन नवकोष्ठात्मकं चक्रं निर्माय, मध्यकोष्ठे साध्यनामयुक्तं यमराजेति वर्णचतुष्टयं विलिख्य, प्रागाद्यष्टसु कोष्ठेषु यममन्त्रस्य वर्णचतुष्टयं क्रमेण विलिख्य, चतुष्कोणेषु चत्वारि शूलानि मध्यगतरेखाग्रद्वये शूलद्वमिति सम्भूय द्वादश शूलानि निष्पाद्य, शूलाग्रेषु द्वादशाक्षरमन्त्रस्यैकैकं वर्णमालिख्य, तदुपरि वृत्तद्वयं निष्पाद्य तल्लग्नमष्टपत्राणि विरच्य, प्रतिदलमेकमेकं वर्णमष्टाक्षरमन्त्रस्य विलिखेत्, उक्तफलदं भवति ॥ तथा—

एकाशीतिपदेषु मध्यदहने साध्यं लिखेत् ह्रूं पुनः
छ्रूंक्ष्रूं भ्रूंमिति दिग्दलेषु विलिखेद् बीजानि पंक्तिष्वथ ।
शिष्टेष्वीशनिशाचरादि विलिखेत् कालीमनुं पंक्तिश-
स्तद्बाह्ये यमवीतमग्निपवनावीतं च यन्त्रं लिखेत् ॥ २२ ॥

कालीमार रमालीका लीनमोक्ष क्षमोनली । मामोदेत तदेमोमा रक्षतत्व त्वतक्षर ॥ २३ ॥
कालीमनुरयं प्रोक्तः कालरात्रि स्ववैरिणाम् । यमावाट टवामाय माटमोट टमोटमा ॥ २४ ॥
वामोभूरि रिभूमोवा टटरीत्व त्वरीटट । यमात्मकोऽयमाख्यातः श्लोको वैरिविनाशनः ॥ २५ ॥
लिखेदष्टविषाङ्गारनिम्बनिर्यासकज्जलैः । निग्रहाख्यमिदं यन्त्रं काकपक्षेण कर्पटे ॥ २६ ॥
विभीतवृक्षे वल्मीके श्मशाने वा चतुष्पथे । दक्षिणस्थेऽनिले मन्त्री निखनेदर्धरात्रके ॥ २७ ॥
सर्वथा शत्रुरेतेन सप्ताहान्मरणं व्रजेत् । निगृह्यये महारोगैः पतितो वा भवेदसौ ॥ २८ ॥
शिलायामिष्टकायां वा चक्रमेतत् प्रकल्पितम् । मर्कटीविषदण्डीभिः समालिप्तमधोमुखम् ॥ २९ ॥
यन्त्रं रात्रौ खनेत्तत्र भूयोभूयोऽशुभं भवेत् । ....॥

लिखेच्चतुष्षष्टिपदेषु कालीमीशादिकान्यादि यमात्मकेन ।
श्लोकेन संवेष्ट्य कृशानुवायुबीजावृतं यन्त्रमिदं विदध्यात् ॥ ३० ॥

लिप्तं विषमषीदण्डीमर्कटीभिरधोमुखम् । निखनेद्यत्र तत्र स्यान्नृणामुच्चाटनं सदा ॥ ३१ ॥
सस्यहानिमनावृष्टिं गवां नाशं करोति तत् ।

एतद्यन्त्रद्वयोद्धारस्त्वरिताप्रकरणे (२१ शे श्वासे) द्रष्टव्यः ॥ तथा—

आख्यां तुम्बुरुमध्यतः स्मरगतामालिख्य जृम्भादिकां
विद्यां दिग्गतपत्रकेष्वथ लिखेद् देवीं दलेषु स्मरम् ।
कोणस्थेषु सनामकं बहिरधः पाशांकुशाभ्यां वृतं
यन्त्रं वश्यकरं ग्रहादिभयहृत् क्षुद्राभिचारापहम् ॥ ३२ ॥

जृम्भे जृम्भिनि ठद्वन्द्वं मोहे मोहिनि ठद्वयम् । अन्धे अन्धिनि ठद्वन्द्वं रुन्धे रुन्धिनि ठद्वयम् ॥ ३३ ॥
हित्वा कामं लिखेच्छान्ति यन्त्रेऽस्मिन् नृकपालके । संध्यासु तापयेदेतदुच्चैः साध्यं वशं नयेत् ॥ ३४ ॥
हित्वा शान्ति लिखेद्वर्म फट् च वा नरचर्मणि । वह्निवायुगृहावीतं श्मशानस्थं रिपून् दहेत् ॥ ३५ ॥
त्यक्त्वा वर्मालिखेदस्त्रं फलकेऽक्षतरूद्भवे । वह्निवायुयुतं नाम मेषोत्थरुधिरेण तत् ॥ ३६ ॥
चत्वरे निखनेज्जप्तं विद्वेषं कुरुते मिथः । हित्वा रेफयकारौ द्वौ लकारं मध्यतो लिखेत् ॥ ३७ ॥
(धरापुरेण वीतं तदिष्टकान्तर्निवेशितम् । सर्वेषां स्तम्भनं कुर्यान्नात्र कार्या विचारणा ॥ ३८ ॥
हित्वा लकारं तन्मध्ये वायुबीजं समालिखेत् । विषरक्तमषीकाकपुरीषैर्ध्वजवाससि ॥ ३९ ॥
श्मशाने निहितं कुर्यात्कुलोत्सादं स्ववैरिणाम् । मुक्त्वा वायुमयं बीजं तत्र फट्कारमालिखेत् ॥ ४० ॥
परेतवस्त्रे काकस्य रुधिरेण यथाविधि । ईप्सिते निखनेत्स्थाने विद्वेषं कुरुते द्विषाम् ॥ ४१ ॥
अस्त्रबीजमपास्यास्मिन् ल्कारं मार्णसंयुतम् । विलिखेद् यन्त्रमेतत्तु लोहत्रयसमावृतम् ॥ ४२ ॥

सर्वरोगप्रशमनं कृत्याद्रोहादिशान्तिदम् । विहाय बीजं लंकारं ग्लौंकारं तत्र संलिखेत् ॥ ४३ ॥
क्षकारेणावृतं बाह्ये पाशांकुशवृतं पुनः । डकारेणावृतं भूयो भूमिमण्डलमध्यगम् ॥ ४४ ॥
लकारैर्बिन्दुसंयुक्तैर्वेष्टितं तद्बहिः क्रमात् । सर्गान्तमातृकावीतं सर्वं वृत्तेन वेष्टितम् ॥ ४५ ॥
कौशेयकर्पटे क्लृप्तमिष्टकाद्वयमध्यगम् । सेनाग्रे निखनेदेतत्स्तम्भनं कुरुते ध्रुवम् ॥ ४६ ॥

उद्धारः सुगमः । तथा—

मध्ये श्रीनरसिंहबीजमथ तद्बाह्ये स्वरान् केसरे
बारीट्चन्द्रयमेन्द्रदिक्षु विलिखेन्मध्ये मनुं गारुडम् ।
अन्तःस्थान् मरुदग्निनिर्ऋतिशिवेष्वालिख्य वर्णावृतं
यन्त्रं सर्गिभिरष्टभिः परिवृतं संवर्तकैर्गारुडम् ॥ ४७ ॥

संवर्तको नेत्रयुतः पार्श्वस्तारोऽग्निसुन्दरी । गारुडो मनुराख्यातो विषद्वयविनाशनः ॥ ४८ ॥
स्मरन् गरुडमात्मानं मन्त्रमेनं जपेन्नरः । विषमालोकनेनैव हन्यान्नागकुलोद्भवम् ॥ ४९ ॥

मध्ये वर्णान् भृगुस्थान् विलिखतु विधिवत् साध्यनाम्ना समेतान्
किञ्जल्केषु स्वराः स्यु वसुदलविवरेष्वालिखेन्मध्यबीजम् ।
काद्यार्णान् केसरेषु द्विगुणवसुदलेषु द्वयं मध्यबीजं
यन्त्रं सञ्जीवनाख्यं सलिलपुरगतं क्षुद्ररोगापहारि ॥ ५० ॥

मध्ये पिण्डमचो दलादिषु लिखेद्वारीशताराधिप
प्रेताधीश्वरशक्रदिक्षु विवरे मध्ये च वर्णाल्लिखेत् ।
यादीन् मारुतवह्निराक्षसशिवेष्वर्णान् बहिर्वेष्टयेत्
कार्यैर्वामविलोचनेन कलितं पिण्डाख्ययन्त्रं परम् ॥ ५१ ॥

मनुस्वरेन्द्वजेशाग्निसंयुतश्चतुराननः । पिण्डबीजमिदं प्रोक्तं पुंसां सर्वार्थसाधनम् ॥ ५२ ॥
बीजेनानेन संजप्तं यन्त्रं रक्षाकरं परम् । आयुरारोग्यजननं लक्ष्मीसौभाग्यवश्यदम् ॥ ५३ ॥
चोरसर्पमृगव्याघ्रभूतामयनिकृन्तनम् । गर्भरक्षाकरं स्त्रीणां पुत्रदं क्षुद्रनाशनम् ॥ ५४ ॥
धृतं मूर्ध्नि करोत्येव लोकवश्यमनुत्तमम् ।.... ....॥

मध्ये तोयगृहे लकारविवरे सार्णाढ्यसाध्यं लिखेत् ।
पत्रेष्वष्टसु हंसमन्त्रमभितो हंसार्णसम्वेष्टितम् ।
यन्त्रं भूमिगृहेग वेष्टितमिदं मूर्ध्ना सदा धारितं
हन्यात् क्षुद्रमहाज्वरामयरिपून् दद्याद्यशःसम्पदः ॥ ५५ ॥
ईकारगर्भे विलिखेत्स्वसाध्यं तमष्टपत्रेषु पुनर्विलिख्य ।
संवेष्टयेत् तेन धरापुरस्थं यन्त्रं भवेद्वश्यकरं नराणाम् ॥ ५६ ॥

ताम्रपत्रे समालिख्य यन्त्रमेतत् प्रपूजयेत् । वशयेत् सकलान् मर्त्यान् नात्र कार्या विचारणा ॥ ५७ ॥

मध्ये भान्तं भृगुविनिहितं नामवर्णैः प्रवीतं
टान्तं लान्तान्वितमथ लिखेदष्टपत्रेषु भूयः ।
भूबिम्बस्थं निगदितमिदं साधु सञ्जीवनाख्यं
शस्त्रोद्भूतं भयमपहरेद्धार्यमाणं भुजेन ॥ ५८ ॥
वर्णावृतं साध्ययुतं जकारं टान्ते लिखेदष्टदलेषु हंसम् ।
आवेष्टयेदम्बुगृहेण बाह्ये लान्तावृतं यन्त्रमिदं ज्वरघ्नम् ॥ ५९ ॥

टान्ते नाम लिखेत् क्षकारविवरे मृत्युञ्जयत्र्यक्षरैः
रुद्धं तद्बहिरष्टपत्रविवरे साध्याह्वयं पूर्ववत् ।
अच्किञ्जल्कयुते वसुद्वयदले पद्मे तथैवाह्वयं
द्वात्रिंशद्दलपङ्कजेऽपि च तथा काद्यार्णयुक्केसरे ॥ ६० ॥

ईकारेण समावीतं यन्त्रं मृत्युञ्जयाह्वयम् । सर्वरोगाभिचारघ्नं सर्वसौभाग्यसिद्धिदम् ॥ ६१ ॥

ग्लौंरुद्धं प्रणवद्वयं प्रविलिखेत् साध्यस्य नामान्वितं
बाह्ये भूपुरमष्टवज्रविलसत्तारं लिखित्वा पुनः ।
क्षं कोणेषु दिशासु लं प्रविलिखेत् पाशांकुशत्र्यक्षरै-
र्वीतं स्तम्भनयन्त्रमावृतिलसज्जृम्भादिविद्याष्टकैः ॥ ६२ ॥

जृम्भे वह्निवधूः पूर्वं पश्चाज्जृम्भिनि ठद्वयम् । मोहे पावकजाया स्यात्पश्चान्मोहिनी ठद्वयम् ॥ ६३ ॥
अन्धे हुतभुजो जाया ततोऽप्यन्धिनि ठद्वयम् । रुन्धे कृशानुपत्नी स्याद्रुन्धिनि द्विठसंयुतम् ॥ ६४ ॥

उद्धारः सुगमः । तथा—

लान्ते नाम विलिख्य दिक्षु विलिखेद् भूयस्तमेवाष्टसु
क्षोणीबिम्बमथो नगेन्द्रभुजगावन्योन्यबद्धौ लिखेत् ।
आख्यां तन्मुखयोर्विभीतफलके यन्त्रं समापादितं
निर्माल्य निहितं सदा वितनुते वाचां द्विषां स्तम्भनम् ॥ ६५ ॥

साध्याढ्यं कवचं लिखेद् बहिरथो दिक्पत्रमध्येषु तद्
ग्लौमन्येषु महीपुरस्य विलिखेत् कोणेषु रान्तान्वितम् ।
वज्रेष्वष्टसु वमं तोयपुरगं भूबिम्बमध्यस्थितं
यन्त्रं रात्रिविनायकान्तरगतं न्यस्येच्छरावद्वये ॥ ६६ ॥

रहस्यस्थाननिक्षिप्तं पूजितं प्रतिवासरम् । स्तम्भनं कुरुते वाचां सेनादीनां च वैरिणाम् ॥ ६७ ॥

कृत्वा रेखाष्टकमृजु पुनस्तिर्यगालिख्य षट्कं
बाह्यावृत्या लिखतु विधिवद् बिन्दुयुक्तं क्षकारम् ।
अन्तःपंक्तौ लिखतु धरणीं शिष्टकोष्ठत्रयान्तः
कृत्वा नाम प्रथितमुदितं यन्त्रमेतज्ज्वरघ्नम् ॥ ६८ ॥

यन्त्रमेतत् समभ्यर्च्य दत्त्वा भूतबलिं ततः । साध्यस्य मूर्ध्नि बध्नीयात् सर्वज्वरविमुक्तये ॥ ६९ ॥

तारं लिखेद् वह्निपुरस्य युग्मे तत्पार्श्वयोर्लार्णमथाग्निबीजम् ।
कोणेषु पूर्वापरयोश्च यन्त्रं पाशांकुशावीतमिदं ज्वरघ्नम् ॥ ७० ॥

यन्त्रमभ्यर्च्य मन्त्रेण तारपाशांकुशात्मना । निबध्नीयाज्ज्वरार्तस्य हस्तादौ ज्वरशान्तये ॥ ७१ ॥

पिण्डे लिखेन्नाम ससर्गटान्तविदर्भितं सस्वरकेसराढ्यम् ।
टान्ताष्टपत्रं वसुधापुरस्थं कान्तिप्रदं यन्त्रमिदं ज्वरघ्नम् ॥ ७२ ॥

तारादिलुद्वयजलद्विठवर्णवीता टान्तान्तरे विलिखिता विधिनैव माया ।
साध्यावृता बहिरथो वदनार्धचन्द्रैर्यन्त्रं शिरोर्तिनिचयं विनिहन्ति सद्यः ॥ ७३ ॥

व्योमार्णमालिख्य सबिन्दुमाख्याविदर्भितं यन्त्रमयुग्मकोणे ।
वसुन्धरागेहयुगे निबद्धं यन्त्रं समस्तज्वरनाशनं स्यात् ॥ ७४ ॥

सार्णं नामविदर्भितं परिलिखेद् बाह्येऽष्टपत्रे भृगुं

पद्मं स्यादथ कादिषान्तलिपिमत् त्रिंशद्दलं बाह्यतः ।
वीतं तोयपुरेण यन्त्रमुदितं भूर्जोदरे कल्पितं
भूतव्याधिमहाज्वरप्रशमनं कृत्यापहं श्रीप्रदम् ॥ ७५ ॥
चक्रे चतुःषष्टिपदे सबिन्दूनन्तःस्थवर्णान् क्रमशो विलिख्य ।
रेखाशिरःकल्पितशूलयुक्ते यन्त्रे शयीत ज्वरशान्तिहेतोः ॥ ७६ ॥
पुटितभूमिपुरद्वयमध्यतः प्रविलिखेद् वनितां गिरिजापतेः ।
प्रणवमस्य लिखेद्वसुकोणगं ज्वरहरं परमेतदुदीरितम् ॥ ७७ ॥
वार्णे लिखेन्नाम शशाङ्कमध्ये टान्तं बहिर्भूमिपुरं परस्तात् ।
वृत्तावृतं यन्त्रमिदं समुक्तं वश्याय नृणां सकलार्तिशान्त्यै ॥ ७८ ॥
स्वस्तिके दहनगेहयुगे ससाध्यां मायां लिखेल्ललितनागलतादलान्तः ।
पाशांकुशावृतमिदं निशि तोयमध्ये मन्त्रं जपन् व्रजति तं स्वयमेव साध्यः ॥७९॥
षट्कोणे निजसाध्यनामसहितां मायां लिखेन्मध्यत-
स्तत्कोणेषु विदर्भितामभिलिखेच्छक्तिं स्वसाध्याख्यया ।
बाह्ये भूमिपुरं सकोणमदनं ताम्बूलपत्रे कृतं
जप्तं खादयितुः प्रियां निशि भवेत्सा तस्य वश्या चिरम् ॥ ८० ॥
शक्तौ नाम लिखेच्चतुर्भिरभितो बीजैः समावेष्टयेद्
वीतं शक्तिमनोभवांकुशमनुं ह्लींबीजकैः पिष्टजे ।
रूपे साध्यनरस्य जप्तपवने त्रिस्वादुनाभर्ज्यं तत्
खादेत् तस्य वशं प्रयाति नियतं साध्यः सदा दासवत् ॥ ८१ ॥
कामं लिखेत्साध्ययुतं सरोजे स्वरोल्लसत्केसरवर्गपत्रे ।
उदीरितं मन्मथयन्त्रमेतत् सौभाग्यलक्ष्मीविजयप्रदायि ॥ ८२ ॥
काश्मीररोचनालाक्षामृगेभमदचन्दनैः । विलिखेद् हेमलेखन्या यन्त्राण्येतानि देशिकः ॥ ८३ ॥
भूमिस्पृष्टं शवस्पृष्टं दग्धं निर्लियसङ्कुतम् । विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न धारयेत् ॥ ८४ ॥

इति ॥ मातृकार्णवे--

विंशत्या शतखण्डानि शक्तिकूटोद्भवानि च । तेषां तावन्ति यन्त्राणि जायन्ते तत्फलानि च ॥ १ ॥
शृणु वक्ष्ये समासेन समाहितमनास्ततः । रोगकृत्याग्रहादीनां निरासो वश्यकर्म च ॥ २ ॥
जलार्णोद्भवखण्डानां फलं ज्ञेयं ततः पुनः । द्वितीयार्णसमुत्थानामुच्चाटनफलं स्मृतम् ॥ ३ ॥
तृतीयार्णसमुत्थानां स्तम्भनं फलमीरितम् । चतुर्थाक्षरसम्भूतखण्डानां कार्मणं फलम् ॥ ४ ॥
पञ्चमार्णसमुत्थानां विद्वेषणमुदाहृतम् । चतुर्विंशतिसंख्यानि खण्डानि स्युः पृथक्पृथक् ॥ ५ ॥

तन्त्रराजे तु--"नव षोडशकोष्ठानि संवर्ध्य विषमं समं" (३३, ९६ इति । अत्र नव-पञ्चविंशति-ऊनपञ्चाशत्-एकाशीतिपदानि यन्त्राणि विषमाणि, अग्रेऽपि तथैव विषमरीत्या योजनीयानि, समानि तु षोडशषट्त्रिंशच्चतुष्षष्टिपदक्रमेण योजितानि समयन्त्राणि ज्ञेयानि । अग्रेऽपि तथैवोपर्युपरि समरीत्या योजनीयानीत्यर्थः । तथा तत्रैव--

तेष्वङ्कानि समं कृत्वा पंक्तौ तेषु समालिखेत् । विद्यातृतीयभेदोत्थांस्तत्तदङ्कानुगुण्यतः ॥ १ ॥
मनीषितं च संलिख्य तेषां मध्यस्थकोष्ठत । विदध्यात् शान्तिकं सर्वं तैर्यन्त्रैः कल्पितैस्तथा ॥ २ ॥
वश्याकर्षणविद्वेषस्तम्भनोच्चाटनादिकम् । आयुरारोग्यविजयविभूत्याद्यं च सिद्ध्यति ॥ ३ ॥

स्थापनाद्धारणाच्चान्यैरुपायैः साधकोऽनिशम् ।.... ....॥

तैः कल्पितैः संवर्ध्य विषम सममित्यादिरीत्या कल्पितैर्यन्त्रैरङ्कैश्च, अङ्कप्रकारस्तु, प्राणाग्नीलाम्बखात्मानः" इत्यादिना प्रतिभूतं दशदशवर्णक्रमेण क्रमागतवर्णजनिताङ्को ज्ञेयः। अङ्कवृद्धिक्रमस्तु मातृकार्णवे—

नवकोष्ठात्मके यन्त्रे वदाम्यङ्कक्रमं शृणु । शक्तिकूटाद्यखण्डस्य प्रोक्तं व्यञ्जनपञ्चकम् ॥ १ ॥
तस्याद्याद्ये क्रमोक्तानि ज्ञातव्यानि मनीषिभिः । प्राक्प्रत्यग्दक्षिणोदक्च चतुःसूत्रनिपातनात् ॥ २ ॥
कोष्ठानि नव जायन्ते पंक्तित्रयविभेदतः । द्विनवाब्धिगिरीषुत्रिषट्चन्द्रवसुकोष्ठकैः ॥ ३ ॥
एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनव क्रमात् । पदसंख्यां विजानीयाद्वर्णाङ्कानां तु योजने ॥ ४ ॥
आद्यार्णोत्थचतुर्विंशत्खण्डानां परमेश्वरि । चतुर्विंशतिसंख्या स्यात् क्रमेणैकादितोऽम्बिके ॥ ५ ॥
एकाङ्कमाद्यकोष्ठे तु चाद्यखण्डस्य वै भवेत् । तथा द्वितीयखण्डस्य द्वयमाद्यपदे भवेत् ॥ ६ ॥
एवं तृतीयखण्डादौ त्र्यङ्कादि विलिखेत्तथा । चतुर्विंशतिकूटानां चतुर्विंशतिसंख्यया ॥ ७ ॥
यन्त्राणि देवि जायन्ते चाद्यवर्णोद्भवानि च । एवं द्वितीयवर्णोत्थभेदानां परमेश्वरि ॥ ८ ॥
पञ्चविंशतितोऽप्यष्टाचत्वारिंशत्तमावधि । ततोऽप्येवं क्रमेणैव तृतीयादिषु चोन्नयेत् ॥ ९ ॥
एवं प्रोक्तमहायन्त्रैर्नासाध्यं विद्यते भुवि । अथ षोडशकोष्ठानां यन्त्राणां च विधिं शृणु ॥ १० ॥
प्राक्प्रत्यग्दक्षिणोदक्च पञ्चसूत्रनिपातनात् । कोष्ठानि देवि जायन्ते शोडशात्र क्रमाल्लिखेत् ॥ ११ ॥
व्यञ्जनेष्वन्त्यवर्णानां सप्त सप्त समीरिताः । आदिमध्यस्थवर्णानां दश क्रमगताङ्ककम् ॥ १२ ॥
विषमे विषमाङ्कं स्यात्समे चैव समाङ्ककम् । प्रतिपंक्ति यथासाम्यमङ्कसंकलनं तथा ॥ १३ ॥
सम्यग्विचार्य संलेख्यं चतुस्त्रिंशत्समन्ततः । आद्यखण्डस्य विज्ञेयं षट्त्रिंशच्च ततः परम् ॥ १४ ॥
अष्टत्रिंशत्ततश्चत्वारिंशदेव क्रमोत्तरम् । द्विवृद्ध्या च द्वितीयादिखण्डानां योजयेत्प्रिये ॥ १५ ॥
विंशोत्तरं शततमं खण्डं यावच्च वर्धयेत् । एवं साम्येषु यन्त्रेषु सर्वेषु च समुन्नयेत् ॥ १६ ॥
द्वित्र्यादिखण्डसम्भूतवर्णाङ्कानां च मेलने । स्थूलयन्त्राणि कल्प्यानि फलानि प्राग्वदुन्नयेत् ॥ १७ ॥
चतुर्विंशतिसंख्यानि खण्डान्याद्यार्णजानि च । शृणु वक्ष्ये क्रमेणैव यथावद्गिरिसम्भवे ॥ १८ ॥
एकद्वित्रिचतुष्पञ्च चैकत्रिद्विचतुःशराः । एकाब्धिद्वित्रिबाणाश्च एकद्व्यब्धित्रिपञ्च च ॥ १९ ॥
एकत्र्यब्धिद्विपञ्चैव एकवेदत्रियुक्शराः । एकद्वित्रिशराब्धिश्च एकत्रिद्विशराब्धयः ॥ २० ॥
एकेषुत्रिद्विवेदाश्च एकत्रीषुद्विवेदकाः । एकेषुद्वित्रिवेदाश्च एकद्वीषुगुणाब्धयः ॥ २१ ॥
एकद्विवेदेषुगुणा एकाब्धिद्विशरत्रयः । एकेषुद्व्यब्धिदोषाश्च एकद्वीषुश्रुतित्रयः ॥ २२ ॥
एकाब्धीषुद्वित्रयश्च एकेष्वब्धिद्विकालकाः । एकत्र्यब्धीषुयुगलमेकाब्धित्रीषुयुग्मकम् ॥ २३ ॥
एकेषुत्र्यब्धियुगलमेकत्रीष्वब्धियुग्मकम् । एकेष्वब्धित्रियुगलमेकाब्धीषुत्रियुग्मकम् ॥ २४ ॥
एवं प्रोक्तानि खण्डानि चाद्यार्णदुद्भवानि च । द्वितीयार्णसमुत्थानि खण्डानि शृणु पार्वति ॥ २५ ॥
द्व्येकत्र्यब्धिशराश्चैव द्वित्र्येकाब्धिशरास्तथा । द्व्यब्धित्र्येकशराश्चैव द्वित्र्यब्ध्येकशरास्तथा ॥ २६ ॥
द्व्येकाब्धित्रीषवश्चैव द्व्यब्ध्येकत्रिशरास्तथा । द्विपञ्चैकत्रिवेदाश्च युग्मैकेषुत्रिसागराः ॥ २७ ॥
द्वित्रीष्वेकाब्धयश्चैव द्विपञ्चत्र्येकसागराः । द्विचन्द्रत्रीषुवेदाश्च द्विवह्न्येकेषुसागराः ॥ २८ ॥
द्व्येकाब्धीष्वनलाश्चैव द्व्यब्ध्येकेषुगुणास्तथा । द्विपञ्चवेदैकगुणा द्व्यब्धीष्वेकत्रयस्तथा ॥ २९ ॥
द्विपञ्चैकश्रुतिगुणा द्विचन्द्रेष्वब्धिवह्नयः । द्वित्र्यब्धिशरचन्द्राश्च द्व्यब्धित्रीष्वेककास्तथा ॥ ३० ॥
द्विपञ्चवेदवह्नीन्दु द्विवेदेषुगुणेन्दवः । द्विवह्नीष्वब्धिचन्द्राश्च द्वीषुत्र्यब्धिसुधांशवः ॥ ३१ ॥
एवं प्रोक्तानि खण्डानि द्वितीयार्णोद्भवानि च । तृतीयार्णसमुत्थानि खण्डानि शृणु शैलजे ॥ ३२ ॥

त्रिचन्द्रद्वयब्धिभूतानि त्रिद्वयेकाब्धिशरास्तथा । त्रिवेदैकद्विभूतानि त्रिवेदद्वयेकसायकाः ॥ ३३ ॥
वह्निद्विवेदचन्द्रेषु वह्न्येकाब्धिद्विसायकाः । त्रिद्विचन्द्रेषुवेदाश्च त्रिद्विभूतेन्दुसागराः ॥ ३४ ॥
त्रिरन्ध्रद्वयेकवेदाश्च त्रिपञ्चैकद्विसागराः । वह्निचन्द्रेषुयुग्माब्धिर्वह्नीन्दुद्वीषुसागराः ॥ ३५ ॥
त्रिवेदेषुद्विचन्द्राश्च त्रिवेदद्विशरेन्दवः । त्रिद्वीषुवेदचन्द्राश्च त्रिद्वयब्धीषुधरास्तथा ॥ ३६ ॥
त्रिपञ्चाब्धिद्वीन्दवश्च त्रिपञ्चद्वयब्धिचन्द्रकाः । त्रिवेदेष्वेकयुग्मानि त्रिपञ्चाब्धीन्दुयुग्मकम् ॥ ३७ ॥
त्रिचन्द्रवेदेषुयुग्मं त्रिवेदेन्दुशरद्विकम् । त्रिपञ्चेन्द्वब्धियुग्मानि त्र्येकेष्वब्धियुगं तथा ॥ ३८ ॥
एवं प्रोक्तानि खण्डानि तृतीयार्णोद्भवानि च । चतुर्थार्णसमुत्थानि खण्डानि शृणु पार्वति ॥ ३९ ॥
वेदत्रिद्वयेकभूतानि वेदद्वित्रीन्दुसायकाः । वेदैकद्वित्रिभूतानि वेदद्वयेकत्रिसायकाः ॥ ४० ॥
वेदैकत्रिद्विभूतानि वेदत्र्येकद्विसायकाः । वेदेष्विन्दुद्वयग्नयश्च वेदैकेषुद्विवह्नयः ॥ ४१ ॥
वेदद्वयेकेषुवह्निश्च वेदैकद्वीषुवह्नयः । वेदद्विसाथकेन्द्वग्निर्वेदेषुद्वयेकवह्नयः ॥ ४२ ॥
वेदेष्विन्दुत्रियुग्मं च वेदैकेषुत्रियुग्मकम् । वेदेषुत्रीन्दुयुग्मं च वेदत्रीष्विन्दुयुग्मकम् ॥ ४३ ॥
वेदैकत्रीषुयुग्मं च वेदत्र्येकेषुयुग्मकम् । वेदद्वित्रीषुचन्द्राश्च वेदत्रिद्वीषुचन्द्रमाः ॥ ४४ ॥
वेदेषुत्रिद्विचन्द्राश्च वेदत्रीषुद्विचन्द्रमाः । वेदद्वीषुत्रिचन्द्राश्च वेदेषुद्वित्रिचन्द्रमाः ॥ ४५ ॥
एवं प्रोक्तानि खण्डानि चतुर्थार्णोद्भवानि च । पञ्चमार्णोत्थखण्डानि शृणु वक्ष्ये समासतः ॥ ४६ ॥
इषुवेदत्रियुग्मैकं भूतत्र्यब्धि द्विचन्द्रमाः । भूताब्धिद्वित्रिचन्द्राश्च भूतद्वयब्धित्रिचन्द्रमाः ॥ ४७ ॥
भूतत्रिद्वयब्धिचन्द्राश्च भूतद्वित्र्यब्धिचन्द्रमाः । भूताब्धित्र्येकयुग्मं च भूतत्र्यब्ध्येकयुग्मकम् ॥ ४८ ॥
भूताब्ध्येकत्रियुग्मं च भूतैकाब्धित्रियुग्मकम् । भूतत्र्येकाब्धियुग्मं च भूतैकत्र्यब्धियुग्मकम् ॥ ४९ ॥
इष्वब्धीन्दुद्विवह्निश्च भूतैकाब्धिद्विवह्नयः । भूताब्धिद्वयेकवह्निश्च भूतद्वयब्धीन्दुवह्नयः ॥ ५० ॥
भूतद्वयेकाब्धिवह्निश्च भूतैकद्वयब्धिवह्नयः । भूतैकद्वित्रिवेदाश्च भूतद्वयेकत्रिसागराः ॥ ५१ ॥
भूतत्रिद्वयेकवेदाश्च भूतद्वित्र्येकसागराः । भूतत्रीन्दुद्विवेदाश्च भूतेन्दुत्रिद्विसागराः ॥ ५२ ॥
एवं प्रोक्तानि खण्डानि पञ्चमार्णोद्भवानि च । ....॥

इति ॥ अत्र षोडशकोष्ठयन्त्रेष्वयं क्रमः—प्रथमार्णोत्थचतुर्विंशतिखण्डानामाद्यखण्डस्य चतुस्त्रिंशद्, द्वितीयस्य षट्त्रिंशत्, तृतीयस्याष्टात्रिंशत्, चतुर्थस्य चत्वारिंशत्, पञ्चमस्य द्विचत्वारिंशत्, षष्ठस्य चतुश्चत्वारिंशदेवं चतुर्विंशति यन्त्राणि द्व्यङ्कवृद्धया शीतिपर्यन्तमूह्यानि । ततो द्वितीयार्णोत्थखण्डानामपि द्व्यशीतिमारभ्य द्व्यङ्कवृद्धय चतुर्विंशति यन्त्राणि ऊह्यानि । एवमुत्तरोत्तरं फलान्यपि प्राक्प्रोक्तानि ज्ञेयानि । तथा वाग्भवकामराजकूटोत्थखण्डानामपि प्राक्प्रोक्तरीत्याङ्कानि कृत्वा विषमसमयन्त्राणामुद्धारं कृत्वा तत्तत्फलेषु योज्यानि । इति यन्त्रप्रकरणम् ॥

ओं अथास्मदाराध्यचरणैरुपदिष्टा श्रीविद्यापद्धतिर्लिख्यते । तत्र

ब्राह्मे मुहूर्ते चोत्थाय ब्रह्मरन्ध्रे सिताम्बुजे । चिच्चन्द्रमण्डले शुद्धस्फटिकाक्षवराभये ॥ १ ॥
दधानं रक्तया शक्त्याश्लिष्टं वामाङ्कसंस्थया । धारयन्त्योत्पलं दीर्घनेत्रत्रयविभूषितम् ॥ २ ॥
प्रसन्नवदनं शान्तं स्मरेत्तन्नामपूर्वकम् । रक्तशुक्लात्मकं तस्य संस्मृत्य चरणद्वयम् ॥ ३ ॥
गुरुं च गुरुपत्नीं च देवं देवीं विभावयेत् । पादुकामन्त्रमुच्चार्य यथास्वस्वगुरूक्तितः ॥ ४ ॥

पादुकाविद्याः प्रागेवोक्ताः, तत्तद्विद्यायुक्तैर्गन्धाद्यैरुपचारैः सम्पूज्य प्रार्थयेत् ॥

प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः । यत्करोमि जगद्योने तदस्तु तव पूजनम् ॥ ५ ॥

इति प्रार्थ्य स्वगुरुं तन्नामपूर्वकं प्रणम्य नमस्कृत्य मूलादिब्रह्मरन्ध्रपर्यन्तम्,

सूर्यकोटिप्रतीकाशां चन्द्रकोटिसमप्रभाम् । उद्यद्दिवाकरोद्द्योतां यावच्छ्वासं हठासनः ॥ ६ ॥

ध्यात्वा तदैकरस्येन किंचित्कालं सुखी भवेत् । ....॥

इत्युक्तरीत्या मूलविद्यां विभाव्य, तदाज्ञयाऽजपादिसंकल्पं कुर्यात् । अस्य श्रीअजपानामगायत्रीमन्त्रस्य० शिरसि हंसऋषये नमः, मुखे अव्यक्तागायत्रीछन्दसे नमः, हृदि परमहंसाय देवतायै नमः, गुह्ये हंबीजाय नमः, पादयोः सः शक्तये नमः, नाभौ सोहं कीलकाय नमः, इति विन्यस्य मम समस्तपापक्षयार्थमद्याहोरात्रमध्ये श्वासोच्छ्वासरूपेण षट्शताधिकैकविंशतिसहस्रसंख्याकमजपानामगायत्रीजपमहं करिष्ये, इति संकल्प्य मूलेन प्राणायामं करशुद्धिमंगुलीन्यासं च कुर्यात् । ह्सां सूर्यात्मने हृदयाय नमः, ह्सीं सोमात्मने शिरसि स्वाहा, ह्सूं निरञ्जनात्मने शिखायै वषट्, ह्सैं निराभासात्मने कवचाय हुम्, ह्सौं अतनुसूक्ष्मप्रबोधात्मने नेत्रत्रयाय वौषट्, ह्सः अव्यक्तप्रबोधात्मने अस्त्राय फट्, इति करषडङ्गन्यासं विधाय हंसरूपं विभावयेत् ।

आत्मानमग्नीषोमाख्यपक्षयुक्तं शिवात्मकम् । हकारेण बहिर्यान्तं विशन्तं च सकारतः ॥ ७ ॥
हंसः सोहमिति स्मृत्वा सोहं व्यञ्जनहीनतः । पक्षौ संहृत्य चात्मानमण्डरूपं विभावयेत् ॥ ८ ॥

तारमभ्यस्य परेऽहन्यप्येवं कुर्यात् । ततः पूर्वेद्युरहोरात्रमध्ये जातश्वासोच्छ्वासरूपषट्शताधिकैकविंशतिसहस्रसंख्याकमजपानामगायत्रीजपं ब्रह्मरन्ध्रे सहस्रदलकमलकर्णिकामध्यवर्तिने श्रीगुरवे निवेदयामीति निवेद्य, स्वस्थाने गुरुमुद्वास्य बहिर्गत्वा यथाविधि शौचाचमनदन्तधावनं च निर्वर्त्य, उत्तराभिमुखो भूत्वा भूमिं गुरुं चाभ्यां मन्त्राभ्यां प्रार्थयेत् ।

"धारणं पोषणं त्वत्तो भूतानां देवि सर्वदा । तेन सत्येन मां पाहि पाशान्मोचय धारुणि ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥"

एताभ्यां नमस्कृत्य वैदिकस्नानं विधाय मन्त्रस्नानं कुर्यात् । नाभिमात्रे जले स्थित्वा तीर्थं सूर्यमण्डलादंकुशमुद्रया "ऐं हृदयाय नमः" इति मन्त्रेणाकृष्य तीर्थे क्षिप्त्वा, शक्तिबीजं समुच्चरन् योनिमुद्रया संस्पृश्य पाणिभ्यां संछाद्यामृतेश्वरीं सप्तशो जपित्वा ध्यात्वा स्नायात् । तद्यथा 'ऐंह्रींक्लीं अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ सांजूंजूंसः अमृतेश्वर्यै स्वाहा'

अमृतामृतरश्म्योघसंतर्पितचराचराम् । भवानि भवशान्त्यै त्वां भावयाम्यमृतेश्वरीम् ॥ ९ ॥
अन्तः शक्तिमभिध्यायन्नाधाराद् ब्रह्मरन्ध्रगाम् । तस्याः पीयूषवर्षेण स्नानमन्तः समाचरेत् ॥ १० ॥

इत्युक्तरीत्या ध्यात्वा निमज्ज्य मूलेन शिरसि पार्श्वयोः सम्प्रोक्ष्य मूलं सप्तवारमुच्चार्य, सप्तधातुस्थकल्मषं शोधयामीति धिया सप्तवारमुन्मृज्य, कुम्भमुद्रया शिरसि मूलेन त्रिवारमभिषिच्य वशिन्याद्याभिरभिषिच्य सम्पत्कर्या चाभिषिच्य, तीरमागत्य दालया प्रोक्षिते धौते वाससी परिधायाचम्य, विभूतिं वामहस्ते निधाय दक्षहस्तेन पिधाय, जातवेदसेन० गायत्र्या० त्र्यम्बकेन० अग्निरिति० मानस्तोके० त्र्यायुषं जमदग्ने० इति षड्भिः । 'अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि भस्मानि भवन्ति' । ततो मूलविद्यया सप्तवारमभिमन्त्र्य, ईशान इति शिरसि । तत्पुरुषायेति वक्त्रे । अघोरेभ्य इति हृदये । वामदेवायेति गुह्ये । सद्योजातमिति पादयोः । श्रीविद्यया शिरसि । ऐं वद वद वाग्वादिनि ऐंक्लीं क्लिन्ने क्लेदिनि क्लेदय क्लेदय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु ह्सौः' अनया दीपिन्या मुखे । 'ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रींह्रींहूं रररररर ज्वालामालिनि हुं फट् स्वाहा' अनया वक्षसि । 'ओं ह्रीं वह्निवासिन्यै नमः' इति नाभौ । 'ओं सहस्रार हुं फट्' इत्यूर्वोः । 'ओंश्रींपशु हुं फट्' इति जङ्घयोः । 'ओं ह्रीं स्फुर स्फुर प्रस्फुर २ घोर घोरतर तनुरूप चट चट प्रचट २ कह २ वम २ बन्धय बन्धय घातय २ हुं फट्' इति पादयोः । 'ओंह्रीं वैष्णव्यै नमः' इति हृदये । अघोरविद्यया पृष्ठे । मातृकया सर्वसंधिषु । 'उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् । नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्' इति बाह्वोः । ओंक्ष्रौं नमो

भगवते नृसिंहाय ज्वालामालिने दीप्तदंष्ट्रायाग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय सर्वज्वरविनाशाय दह दह रक्ष रक्ष हुं फट् स्वाहा । अनया ज्वालानृसिंहविद्यया च वाह्लोः । 'ओं उत्तिष्ठ पुरुषाधार पिङ्गलः लोहिताक्ष देहि मे ददापय स्वाहा' । अनया वडवानलभैरव्या सर्वाङ्गे (भस्म) स्नानमाचरेत् ॥

एता एव महाविद्या विभूतेरभिमन्त्रणे । कथिताः सर्वरक्षार्थं सर्वापन्निवहापहाः ॥ ११ ॥
इति ज्ञात्वा विधानेन भस्मस्नानं समाचरेत् । सर्वाङ्गेष्वथ वा कुर्यात् केवलं मूलविद्यया ॥ १२ ॥

एवं भस्मधारणं विधाय संध्यावन्दनं कुर्यात् । तद्यथा—व्यस्तसमस्तमूलविद्यया बीजसहितैः स्वाहान्तैरात्मतत्त्वादिभिर्जलं पीत्वा द्विरुन्मृज्य सकृत् स्पृष्ट्वा नासिके नयने शिरो हृदयं दक्षिणं कर्णं संस्पृशेत्, अयमाचमः । एवमाचम्य षोडशस्वरैः सबिन्दुभिर्मार्जयित्वा कादिमान्तैः स्पर्शवर्णैर्मूलविद्यासहितैर्जलं पीत्वा यादिवर्णैर्दशभिः पुनर्मार्जयित्वोत्थाय 'ऐं त्रिपुरादेव्यै विद्महे क्लीं कामेश्वर्यै धीमहि सौः तन्नः क्लिन्ना प्रचोदयात्' इति गायत्र्या त्रिरर्घ्यमुत्क्षिप्याचम्य,

यथाशक्ति जपेदेनां गायत्रीं त्रिपुराह्वयाम् । प्रातः संध्याविधिं वक्ष्ये मूलाधारस्थपङ्कजे ॥ १३ ॥
वाग्भवं काञ्चनाकारं मध्ये बीजमनुस्मरेत् । दक्षनासापुटपथा विनिःसार्यार्कमण्डले ॥ १४ ॥
आवाह्य देवतां सन्ध्यां कालरूपां विभावयेत् । पीतलाङ्काम्बरवसनां पुस्तकाक्षस्रगुज्ज्वलाम् ॥ १५ ॥
एवं ध्यात्वा जपित्वा च गायत्रीं प्रणमेद्गुरुम् । वागीश्वरीं नमस्कृत्य संध्या स्वस्थानमानयेत् ॥ १६ ॥
अथ मध्याह्नसंध्यायां मणिपूरे जपारुणम् । कामराजं हृदि ध्यात्वा बहिश्चेत् सूर्यमण्डले ॥ १७ ॥
वराभययुतां रक्तवर्णां यौवनमास्थिताम् । कामेश्वरीं हृदि ध्यात्वा पुनः स्वस्थानमानयेत् ॥ १८ ॥
अथ सायन्तने काले भ्रूमध्ये चन्द्रसंनिभम् । तार्तीयं भावयित्वाथ बाह्येऽप्यावाह्य पूर्ववत् ॥ १९ ॥
भैरवीं श्वेतवर्णाभां वृद्धां मुकुटहारिणीम् । पाशांकुशधरां ध्यात्वा पुनः स्वस्थानमानयेत् ॥ २० ॥
अथार्धरात्रसमये ब्रह्मरन्ध्रे महाप्रभम् । तुरीयं बीजमुच्चार्य ध्यात्वाकाशे पराह्वये ॥ २१ ॥
चिच्चन्द्रमण्डले देवीं ध्यात्वा त्रितयरूपिणीम् । पाशांकुशधनुर्बाणधारिणीं मूलविद्यया ॥ २२ ॥
समाराध्य च चिद्रूपे स्वस्थाने च लयं नयेत् । ....॥

एवमुक्तकालचतुष्टये मार्जनपूर्वकमर्घ्यदानादिगायत्रीजपं कुर्यात । संध्यालोपे द्विगुणं जपमाचरेत् ।

जपेन दुरितं हन्ति सर्वं तत्परमास्तिकः । इति संध्याविधिं कृत्वा ततस्तर्पणमाचरेत् ॥ २३ ॥

यथा—जलान्तिके समुपविश्य प्राङ्मुख उदङ्मुखो वाचम्योपस्थानसहस्राक्षर्योपस्थाय, उपस्थानसहस्राक्षरीमग्रे (१६श्वा०) वक्ष्यामः । ओंऐंह्रींश्रीं वसुभ्यः स्वाहा नमः सूर्यायामितरुद्रेभ्यः, ४ रुद्रेभ्यः स्वाहा नमः सूर्यायामितरुद्रेभ्यः, ४ आदित्येभ्यः स्वाहा नमः सूर्यायामितरुद्रेभ्यः, ४ आङ्गिरसेभ्यः स्वाहा नमः सूर्या०, ४ ब्रह्मणे स्वाहा नमः सू०, ४ विष्णवे स्वाहा नमः सूर्या०, ४ रुद्राय स्वाहा नमः सूर्या०, ४ ग्रहेभ्यः स्वाहा नमः सूर्या०, ४ नक्षत्रेभ्यः स्वाहा नमः सूर्यायामितरुद्रेभ्यः, ४ राशिभ्यः स्वाहा नमः सू०, ४ योगेभ्यः स्वाहा नमः सू०, ४ करणेभ्यः स्वाहा नमः सू०, एतांश्चतुर्थीवह्निजायान्तान् देवतीर्थेन तर्पयेत् ॥ ४ ऋषिभ्यो नमः, ४ मरीचये नमः, ४ अत्रये०, ४ पुलहाय०, ४ पुलस्त्याय०, ४ क्रतवे, ४ वसिष्ठाय, ४ भरद्वाजाय०, ४ गौतमाय०, ४ अगस्त्याय०, ४ लोपामुद्रायै०, ४ अहल्यायै०, ४ अनुसूयायै०, । चतुर्थ्यन्तं नमोन्तं च प्रत्येकं द्विर्द्विस्तर्पयेत् । प्राचीनावीती । ४ अग्निष्वात्तेभ्यः स्वधा नमस्तर्पयामि, ४ बर्हिषद्भ्यः, ४ पितृभ्यः, पित्रादिस्वपितृक्रमं तर्पयेत् । "त्रिःस्वधाहृदयान्तांश्च पितृतीर्थेन तर्पयेत्" । ततः ४ भैरवास्तृप्यन्तु, ४ क्षेत्रपालास्तृप्यन्तु, ४ कुमार्यस्तृप्यन्तु, ४ योगिनीगणास्तृप्यन्तु, ४ सर्वभूतानि तृप्यन्तु, इति तर्पयित्वा, ओंह्रांह्रींसः सूर्याय नमः, इति ।

सूर्यायार्घ्यत्रयं दत्वा मूलबीजचतुष्टयैः । चतुस्तत्त्वान्तिकैः शोधयाम्यन्तैः सलिलं पिबेत् ॥ २४ ॥

चतुर्विशेषाचमोऽयं देहतत्त्वविशोधकः। ....॥

ततः श्रीचक्रावरणदेवतातर्पणं कुर्यात्। तद्यथा—

सकलीकृत्य तां देवीं चित्सुधारसरूपिणीम्। पञ्चशक्तिचतुर्वह्निद्विपद्मत्रिमहीतले ॥ २५ ॥
महाचक्रे सावरणां पूजामार्गेण वारिणि। विभाव्य तर्पयेदद्भिः सुधारूपाभिरन्वहम् ॥ २६ ॥
यद्वा भूगृहरेखादिनवयोन्यां प्रतर्पयेत्। पीठदेवीं यथाशक्ति साङ्गां नीत्वा गुरुक्रमम् ॥ २७ ॥
सकृत्समयविद्याश्च दत्त्वा पञ्चोपचारकम्। ततः समाहितो विद्यां जपेत्तर्पणसंख्यया ॥ २८ ॥
निष्कलीकृत्य हृदये देवीमुद्वास्य तत्कृताम्। सकलीकृत्य संहृत्य तीर्थं मार्तण्डमण्डले ॥ २९ ॥
कृत्वा षडङ्गमुत्तिष्ठेदस्त्रपञ्जरमध्यतः। न बाह्यान् भावमानस्तु न स्पृशन् नावलोकयन् ॥ ३० ॥

यागगृहं गच्छेदिति शेषः। अत्र पञ्चशक्तीत्यादि सृष्टिक्रमेण स्थितिरूपेण च तर्पणमुक्तम्। यद्वेत्यादिना संहारक्रमेणोक्तम्। अत्र येन क्रमेण चक्रपूजा क्रियते तेनैव क्रमेण वक्ष्यमाणावरणदेवताः संतर्प्य यथोक्तसंख्यं मूलदेवीं तर्पयेत्। इति संध्यावन्दनविधिः॥

अथ शुचौ देशे विधिप्रोक्ते मृद्वासने ऐंबीजकर्णिकं स्वरयुग्मकिञ्जल्कं कचटतपयशक्षवर्गाष्टकदलं दिक्षु ठंबीजसहितं मातृकाम्बुजं ध्यात्वा, तत्र आधारशक्तिकमलासनाय नमः इति पुष्पाक्षतादिभिरभ्यर्च्य, प्राङ्मुख उदङ्मुखो वोपविश्य भूमिं प्रार्थयेत्।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ ३१ ॥

इति भूमिं प्रार्थ्य स्वशिरसि मातृकाम्बुजं ध्यात्वा दीपनाथं पूजयेत्। तद्यथा—वाराणस्यां ४ वं मेद आत्मकङ्कणीशाय वर्णेशानन्दनाथायातिरक्तवर्णाय रक्तद्वादशशक्तियुक्तायास्मिन् क्षेत्रे इमां पूजां गृह्ण गृह्ण स्वाहा, इति दीपनाथमभ्यर्च्य गुर्वादिवन्दनं कुर्यात्। तद्यथा—हस्ताभ्यामञ्जलिं विधाय ४ शिवादिगुरुभ्यो नमः इति दक्षवामपार्श्वोर्ध्वाधोभागेषु विन्यस्य, अखण्डमण्डलाकारं० इति, चरणं पवित्रं० इत्यादिवैदिकैर्मन्त्रैर्गुरुपादुकाविद्यामुच्चार्य, अमुकानन्दनाथपादुकां पूजयामीति श्रीगुरुं सम्पूज्य।

अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ ३२ ॥

ओंश्लींपशु हुं फट् इति पाशुपतास्त्रेण नाराचमुद्रया विघ्नानुत्सार्य, सिद्धार्थाक्षतकुसुमैः पातालभूनभोलीनान् विघ्नान् क्रमेण वामपादपार्ष्णिघात—करास्फोट—समुदञ्चितवक्त्रैरुत्सार्य, उक्तपाशुपतास्त्रेण वामहस्ततलं द्विधा।

मणिबन्धं समारभ्य संस्पृष्टं दक्षपाणिना। प्रमृज्य दक्षिणं पाणिं सकृदेवोक्तमार्गतः ॥ ३३ ॥

एव षट् करशोधनं कृत्वा आनाभेरापादं हृदो नाभिपर्यन्तं शिरसो हृत्पर्यन्तं तेनैवास्त्रेण व्यापयित्वा अन्तस्तालत्रयं बहिस्तालत्रयं कृत्वा दशदिग्बन्धनं विधाय, रं अग्निप्राकाराय नमः सुदर्शनाघोरास्त्राभ्यां पूर्वोक्ताभ्यां वादिभरेवाग्निप्राकारत्रयं कृत्वात्मरक्षां कुर्यात्। तदुक्तं लक्ष्मीकौलार्णवे—

त्रिरग्निवेष्टनं कृत्वा गणेशं पञ्चमीं ततः। दुर्गां विघ्नं च शरभमघोरं च सुदर्शनम् ॥ १ ॥
एताः समयविद्याश्च जपेत्प्रत्यूहशान्तये। एवं रक्षां पुरा कृत्वा भूतशुद्धिमथाचरेत् ॥ २ ॥

इति। ओंश्रींह्रींक्लींग्लौंगं गणपतये वरवद सर्वजनं मे वशमानय स्वाहा, (१)। ऐंग्लौंओं नमो भगवति वार्तालि २ वाराहि २ वराहमुखि २ अन्धे अन्धिन्यै नमः रुन्धे रुन्धिन्यै नमः जम्भे जम्भिन्यै नमः मोहे मोहिन्यै नमः स्तम्भे स्तम्भिन्यै नमः सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरु २ शीघ्रं वश्यं कुरु २ ठः ५ हुं फट् स्वाहा ग्लौं ऐं, (२)। उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा, (३) ओं ह्रीं वां वटुकाय आपदुद्धारणाय कुरु २ वटुकाय ह्रीं, (४)। ओं ह्रीं ह्रौं नमः शिवाय महाशरभाय, (५)। ओं ह्रीं ह्रौं नमः शिवायै महाशरभ्यै, (६)। अघोरास्त्र-

सुदर्शनास्त्रे प्रागुक्ते, (७।८) । समयविद्यास्तु प्रागेवोक्ता अग्रेऽपि वक्ष्यामः । एता विद्याः शांभवपाठत्वेन पठित्वा आत्मरक्षां कृत्वा भूतशुद्धिं कुर्यात् । तद्यथा—कुम्भकयोगेन प्रणवद्वादशावृत्त्या नाडीशुद्धिं विधाय हृदिस्थं चैतन्यं हंस इति मन्त्रेण संघट्टमुद्रयोर्ध्वमुन्नीय, द्वादशान्तस्थिते परे तेजसि संयोज्यास्त्रेण रक्षां कृत्वा भूतानि शोधयेत् । पादादिजानुपर्यन्तं पृथिवीमण्डलं पीतवर्णं चतुष्कोणं वज्रलांछितं ब्रह्मदैवत्यं ध्यात्वा, लमिति बीजेन संशोध्याप्सु लयं नयेत् । जान्वादिनाभिपर्यन्तं जलमण्डलं धवलवर्णं धनुराकारं महोत्पललाञ्छितं विष्णुदैवत्यं ध्यात्वा, वमिति बीजेन संशोध्य तेजसि लयं नयेत् । नाभ्यादिवक्षःपर्यन्तं तेजोमण्डलं रक्तवर्णं त्रिकोणाकारं स्वस्तिकलांछितं रुद्रदैवत्यं ध्यात्वा, रमिति बीजेन संशोध्य वायौ लयं नयेत् । हृदयादिभ्रूयुगान्तं वायुमण्डलं कृष्णवर्णं षट्कोणाकारं षड्बिन्दुलाञ्छितमीश्वरदैवत्यं ध्यात्वा, यमिति बीजेन संशोध्याकाशे लयं नयेत् भ्रूयुगादिब्रह्मरन्ध्रान्तमाकाशमण्डलं नीलवर्णं वर्तुलाकारं नादरेखाङ्कितं सदाशिवदैवत्यं ध्यात्वा, हमिति बीजेन संशोध्य परशिवे लयं नयेत् ॥

षष्टिसंख्यां समारभ्य द्वादश द्वादश न्यसेत् । पृथिव्यादीनि भूतानि क्रमेण स्वस्वकारणे ॥ ३ ॥

अस्यार्थः—भूतानां लयक्रमे पृथिवीशोधन तद्बीजं षष्टिवारं जपेत्, तथोत्तरोत्तरं द्वादश द्वादश हित्वा जपेदित्यर्थः । उत्पत्तिक्रमे तथैवाकाशबीजं षष्टिसंख्यं जपेत्, उत्तरोत्तर द्वादश द्वादश हित्वा जपेत् । अयं क्रमः प्राणायामयोगेनेति केचित् । एवं पञ्चमहाभूतानि परे तत्त्वे एकीभूतानि विचिन्त्य, प्राणायाम योगेन योनिमुद्रां बद्ध्वा कुलकुण्डलिनीमुत्थाप्य षट् सरोजानि भित्त्वा जीवप्रदीपस्नेहरूपिणीं तां मातृकासमुदायेन सह परे तेजसि संयोज्य शोषणादि समाचरेत् । अत्र मातृकां तु संहारक्रमेण क्षकारं ळकारे, ळकारं हकारे, हकारं सकारे, एवमाकारमकारे विलाप्य तमकारं नवनीतनिभं कुण्डलिनीद्वारा ब्रह्मरध्रं प्रापयेदित्यर्थः ।

वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभम् । ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् ॥ १ ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् । तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥ २ ॥
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् । खड्गचर्मधरं क्रुद्धं कुक्षौ पापं विचिन्तयेत् ॥ ३ ॥

ततो वामनासापुटे वायुमण्डलं तद्बीजयुक्तं कादिमान्तैः स्पर्शवर्णैः संवीतं धूम्रवर्णं ध्यात्वा मात्रा शोडशकेन सम्पूर्य प्राणापानवायुभ्यां सह संयोज्य, तदुत्थितेनानिलेन च सह पापपुरुषं संशोध्य, चतुष्षष्टिमात्राभिः कुम्भयित्वा द्वात्रिंशन्मात्राभिः रेचयेत् । ततो दक्षनासापुटे वह्निमण्डलं तद्बीजयुक्तं यादिभिर्दशभिः संवीतं रक्तवर्णं संचिन्त्य, प्राणापानवायुभ्यां सह संयोज्य तदुत्थितेनानलेन पापपुरुषं संदह्य प्राग्वत् शोडशमात्राभिः पूरकं चतुष्षष्टिमात्राभिः कुम्भकं द्वात्रिंशन्मात्राभी रेचनम् । ततो वामनासापुटे आप्यमण्डलं तद्बीजयुक्तं षोडशस्वरैः संवीतं धवलवर्णं संचिन्त्य प्राग्वत् पूरकादिकं विधाय, मूलाधारगतेन वायुना वह्निकुण्डलिनीमुत्थाप्य तस्या ज्वालासमुदायेन विगलद्ब्रह्मरन्ध्रेन्दुमण्डलादमृताप्लावनं, पूर्ववत् पूरककुम्भकरेचकाः । एवं शोषणदहनाप्लावनानि कृत्वा, परस्मिन् शांभवे ब्रह्मणि स्वशरीर तत्सारूप्यप्रतिबिम्बितं बुद्बुदाकारं ध्यात्वा, पार्थिवबीजेन कठिनीकृत्य, व्योमबीजेन विभेद्य भूतोत्पत्तिं विचिन्तयेत् ।

अक्षरात् खं ततो वायुर्वायोस्तेजस्ततो जलम् । जलात्प्रसूता जगती जगत्यां जायते जगत् ॥ १ ॥

इति क्रमेण द्वादशसंख्यां समारम्भ षष्टिपर्यन्तं वर्धयन् सोऽहमित्युच्चार्य हसौमिति शिवात्मानं बीजं षट्त्रिंशत्तत्त्वरूपं स्मरेत् । "प्राणप्रतिष्ठां कुर्वीत वक्ष्यमाणप्रकारतः ।"

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य० शिरसि ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नमः, मुखे ऋग्यजुः सामाथर्वेभ्यश्छन्दोभ्यो नमः, हृदि प्राणशक्त्ये देवतायै नमः, गुह्ये आं बीजाय नमः, पादयोः ह्रीं शक्तये नमः, नाभौ क्रों कीलकाय नमः इति विन्यस्य मम प्राणप्रतिष्ठापने विनियोगः इति कृताञ्जलिरुक्त्वा, अं कं ५ आं पृथिव्यप्तेजोवाय्वाकाशात्मने हृदयाय नमः । इं चं ५ ईं शब्दस्पर्शरूपरसगन्धात्मने शिरसे स्वाहा । उं टं ५ ऊं

त्वक्चक्षुःश्रोत्रजिह्वाघ्राणात्मने शिखायै वषट् । एं तं ५ ऐं वाक्पाणिपादपायूपस्थात्मने कवचाय हुं । ओं पं ५ औं वचनादानगतिविसर्गानन्दात्मने नेत्रत्रयाय वौषट् । अं यं १० अः बुद्धिमनोहंकारचित्तात्मनेऽस्त्राय फट्, इति हृदादिषडङ्गन्यासः । एवं करषडङ्गन्यासं विधाय, यं त्वगात्मने नमः । रं असृगात्मने नमः । लं मांसात्मने नमः । वं मेद आत्मने नमः । शं अस्थ्यात्मने नमः । षं मज्जात्मने नमः । सं शुक्रात्मने नमः । हं प्राणात्मने नमः । ळं जीवात्मने नमः । क्षं परमात्मने नमः । इति व्यापकन्यासं कृत्वा, बीजत्रयेणैव व्यापकं कृत्वा ध्यायेत् ।

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यंकुशं पञ्च बाणान् ।
बिभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ १ ॥

इति ध्यात्वा, ओं आं ह्रीं क्रों हंसःसोहं यरलवशषसहों श्रीमहात्रिपुरसुन्दर्याः प्राणा इह प्राणाः २५ जीव इह स्थितः २५ सर्वेन्द्रियाणि २५ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य चिरं सुखं तिष्ठन्तु स्वाहा, इति हृदि हस्तं दत्त्वा त्रिवारं पठेत् । इति प्राणप्रतिष्ठा ॥ अथ मातृकान्यासः—

गुदात्तु द्व्यंगुलादूर्ध्वं सुषुम्नासूक्ष्मरन्ध्रगम् । वादिवेदार्णलसितं पङ्कजं कनकप्रभम् ॥ २ ॥
तत्स्थां विद्युल्लताकारां तेजोरूपामणीयसीम् । कुलकुण्डलिनीमूर्ध्वं नयेत्षट्चक्रभेदतः ॥ ३ ॥
द्वादशान्तस्य मध्यस्थं पूर्वोक्तं मातृकाम्बुजम् । नवनीतनिभं ध्यात्वा द्रुतं कुण्डलिनीत्विषा ॥ ४ ॥
तेजोऽञ्जलौ विनिःसार्य मातृकान्यासमाचरेत् । ....॥

अंआंइंईंउंऊं इति षट् स्वरान् दक्षवामकरतलतत्पृष्ठतत्करभतद्व्याप्तिक्रमेण न्यसेत् । अवशिष्टदशस्वरान् अंगुष्ठादिकनिष्ठान्तं दशस्वंगुलीषु न्यसेत् । दक्षप्रदेशिनीमारभ्य वामकनिष्ठापर्यन्तं पर्वत्रयाग्रेषु चतुरश्चतुरः कादिसान्तान् वर्णान् हलावंगुष्ठयोरन्यमंगुल्यग्रेषु न्यसेदिति मातृकाकरशुद्धिं विधाय, अस्या अन्तर्मातृकायाः शिरसि दक्षिणामूर्तये ऋषये नमः । मुखे गायत्र्यै छन्दसे नमः । हृदये श्रीमातृकासरस्वत्यै देवतायै नमः । गुह्ये हल्भ्यो बीजेभ्यो नमः । पादयोः स्वरेभ्यः शक्तिभ्यो नमः । नाभौ अव्यक्ताय कीलकाय नमः । इति विन्यस्य मम शरीरशुद्ध्यर्थं विनियोगः इति कृताञ्जलिरुक्त्वा, अंकं ५ आं हृदयाय नमः । इंचं ५ ईं शिरसे स्वाहा । उंटं ५ ऊं शिखायै वषट् । एंतं ५ ऐं कवचाय हुं । ओंपं ५ औं नेत्रत्रयाय वौषट् । अंयं १० अः अस्त्राय फट् । इति करषडङ्गन्यासं विधाय, विशुद्धे षोडशदलेषु स्वरान्, हृदये द्वादशदलेषु कादिठान्तान्, नाभौ दशदलेषु डादिफान्तान्, स्वाधिष्ठाने षड्दलेषु वादिलान्तान्, मूलाधारे चतुर्दलेषु वादिसान्तान् विन्यस्य ध्यायेत् ।

आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वेपत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के ।
वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वराणां
हंक्षं तत्त्वार्थयुक्तं सकलमुनिमतं वर्णरूपं नमामि ॥ १ ॥

अथ बहिर्मातृकान्यासः । तत्र प्राग्वदृष्यादिकं विन्यस्य ध्यायेत् ।

पञ्चाशद्वर्णभेदैर्विहितवदनदोष्पादयुक्कुक्षिवक्षो-
देशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां पद्मसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥ २ ॥

दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तमायुधध्यानम्, इति ध्यात्वा,

काननवृत्तद्व्यक्षिश्रुतिनासागण्डोष्ठदन्तमूर्धास्ये। दोष्पत्संध्यग्रेषु च पार्श्वद्वयपृष्ठनाभिजठरेषु ॥ ३ ॥
हृद्दोर्मूलापरगलकक्षेषु हृदादिपाणिपादयुगलेषु। जठराननयोर्व्यापकसंज्ञान् न्यसेदक्षरान् क्रमशः ॥ ४ ॥

अत्र दशधातुषु यादीन् प्राग्वत्न्यसेत्। अयं मातृकान्यासस्त्रिविधः-शुद्धमातृका विन्दुयुक्ता विसर्गयुक्ता चेति।

अन्तर्बहि(ष्ठा ? : स्था)च कलायुता च श्रीकण्ठविष्ण्वादिसमन्विता च।
लज्जारमाकामपृथक्समूहा प्रपञ्चयागो दश मातृकाः स्युः ॥ ५ ॥

इति क्रमेण मातृकावैभवं प्रागेव वर्णितम्, सांप्रतमस्मदाराध्यचरणोपदिष्टक्रमेण संक्षेपतो भ्रमनिरासाय प्रोच्यते इति ॥

अथ कलामातृकान्यासः। अस्य षडङ्गन्यासध्यानानि प्रागेवोक्तानि। ४ अ निवृत्तिकलायै नमः शिरसि। आं प्रतिष्ठाकलायै नमः मुखे। एवं इं विद्या० दक्षनेत्रे। ईं शान्ति० वामनेत्रे। उं इन्धिका० दक्षकर्णे। ऊं दीपिका० वामकर्णे। ऋं रेचिका० दक्षनसि। ॠं मोचिका० वामनसि। लृं सूक्ष्मा० दक्षगण्डे। लॄं सूक्ष्मातीता० वामगण्डे। एं अमृता० ऊर्ध्वोष्ठे। ऐं ज्ञाना० अधरोष्ठे। ओं व्योमरूपा० ऊर्ध्वदन्तेषु। औं आप्यायिनी० अधोदन्तेषु। अं व्यापिनी० ललाटे। अः अनन्तरूपा० जिह्वायां। इति विन्यस्य 'विष्णुर्योनि०' जपेत्। ततः ४ अंआमित्यादि षोडश स्वरान् उच्चार्य भुक्तिमुक्तिप्रदनादजानन्तकलायै नमः इति मुखे व्यापकं न्यसेत्। ततः ४ कं सृष्टि० दक्षबाहुमूले। खं वृद्धि० कुर्परे। गं स्मृति० मणिबन्धे। घं मेधा० अंगुलिमूले। ङं कान्ति० अंगुल्यग्रे। चं लक्ष्मी० वामबाहुमूले। छं धृति० कुर्परे। जं स्थिरा० मणिबन्धे। झं स्थिति० अंगुलिमूले। ञं सिद्धि० अंगुल्यग्रे। इति विन्यस्य हंसः शुचिषदिति जपेत्। ततः कं १० सृष्टिप्रदाकारप्रभवब्रह्मकलायै नमः इति भुजयोर्व्यापकं न्यसेत्। ततः ४ टं जरा० दक्षपादमूले। ठं पालिनी० जानौ। डं शान्ति० गुल्फे। ढं ईश्वरी० अंगुलिमूले। णं रति० अंगुल्यग्रे। तं कामिका० वामपादमूले। थं वरदा० जानौ। दं ह्लादिनी० गुल्फे। धं प्रीति० अंगुलिमूले। नं दीर्घा० अंगुल्यग्रे। इति विन्यस्य प्रतद्विष्णुरिति जपेत्। ततः ४ टं १० स्थितिप्रदोकारप्रभवविष्णुकलाभ्यो नमः इति पादयोर्व्यापकं न्यसेत्। ततः ४ पं तीक्ष्णा० दक्षपार्श्वे। फं रौद्री० वामपार्श्वे। बं माया० पृष्ठे। भं निद्रा० नाभौ। मं तन्द्री० जठरे। यं क्षुधा० हृदि। रं क्रोधिनी० दक्षांसे। लं क्रिया० वामांसे। वं उत्कारी० ककुदि। शं मृत्यु० हृदादिदक्षपाण्यन्तम्। इति विन्यस्य त्र्यम्बकं यजामहे इति जपेत्। ततः पं १० संहृतिप्रदमकारप्रभवरुद्रकलाभ्यो नमः इति हृदयादिमध्ये व्यापकं न्यसेत्। ततः ४ षं पीता० हृदादिवामपाण्यन्तम्। सं श्वेता० हृदादिदक्षपादान्तम्। हं अरुणा० हृदादिवामपादान्तम्। ळं असिता० पादादिनाभ्यन्तरम्। क्षं सिता० नाभ्यादिमूर्धान्तम्। इति विन्यस्य तत्सवितुरिति जपित्वा, ४ षं ५ तिरोधानप्रदबिन्दुप्रभवेश्वरकलाभ्यो नमः इति सर्वाङ्गे व्यापकं न्यसेत्। इति प्रणवोत्थकलामातृकान्यासः ॥

अथ श्रीकण्ठादिन्यासः। तत्रादौ तदङ्गशक्तिषडङ्गन्यासः—ओंह्रीं नमो भगवती ब्राह्मि रक्ष रक्ष पद्महस्तेन मां रक्ष रक्ष अंकं ५ आंह्रौंह्लींह्सौं संजीवनि हृदयाय नमः। ओंह्रीं नमो भगवति माहेश्वरि रक्ष रक्ष त्रिशूलहस्तेन मां रक्ष रक्ष इंचं ५ ईंह्रौंह्लींह्सौं ऊर्ध्वकेशिनि शिरसे स्वाहा। ओंह्रीं नमो भगवति कौमारि रक्ष रक्ष शक्तिहस्तेन मां रक्ष रक्ष उंटं ५ ऊंह्रौंह्लींह्सौं जटिलिनि शिखायै वषट्। ओंह्रीं नमो भगवति वैष्णवि रक्ष रक्ष चक्रहस्तेन मां रक्ष रक्ष एंतं ५ ऐंह्रौंह्लींह्सौं मायात्रैलोक्यरूपसहस्रपरिवर्तिनि कवचाय हुम्। ओंह्रीं नमो भगवति वाराहि रक्ष रक्ष दंष्ट्राहस्तेन मां रक्ष रक्ष ओं पं ५ औंह्रौंह्लींह्सौं तारकाक्षिणि नेत्रत्रयाय वौषट्। ओंह्रीं नमो भगवति ऐन्द्रि रक्ष रक्ष वज्रहस्तेन मां रक्ष रक्ष अंयं १० अःह्रौंह्लींह्सौं मारय मारय अस्त्राय फट्। ओंह्रीं नमो भगवति चामुण्डे रक्ष रक्ष पाशहस्तेन मां रक्ष रक्ष अंअं ५१ अंइंउंएंओं आंईंऊंऐंऔंअः ह्रौंह्लींह्सौं मम सर्वाङ्गं रक्ष रक्ष सर्वाङ्गव्यापिनि स्वाहा, इति व्यापकम्। अस्य श्रीकण्ठादिमातृकान्यासस्य शिरसि अम्बरीष ऋषिः, मुखे अनुष्टुप् छन्दः, हृदि अर्धनारीश्वरो देवता, न्यासे विनियोगः ॥

ॐह्लींह्लींह्सौं मम सर्वाङ्गरक्षकाय अं श्रीकण्ठेशपूर्णोदरीभ्यां नमः, एवं सर्वत्र । आं अनन्तेशविरजाभ्यां० । इं सूक्ष्मेशशाल्मलीभ्यां० । ईं त्रिमूर्तीशलोलाक्षीभ्यां० । उं अमरेशवर्तुलाक्षीभ्यां० । ऊं अर्घीशदीर्घघोणाभ्यां० । ऋं भारभूतीशदीर्घमुखीभ्यां० । ॠं अतिथीशगोमुखीभ्यां० । लृं स्थाण्वीशदीर्घजिह्वा० । ॡं हरेशकुण्डोदरी० । एं झिण्टीशोर्ध्वकेशी० । ऐं भौतिकेशविकृतमुखी० । ओं सद्योजातेशज्वालामुखी० । औं अनुग्रहेशोल्कामुखी० । अं अक्रूरेशश्रीमुखी० । अः महासेनेशविद्यामुखी० । कं क्रोधीशमहाकाली० । खं चण्डीशसरस्वती० । गं पञ्चान्तकेशमर्वसिद्धिगौरी० । घं शिवोत्तमेशत्रैलोक्यविद्या० । ङं एकरुद्रेशमन्त्रशक्ति० । चं कूर्मेशात्मशक्ति० । छं एकनेत्रेशभूतमातृ० । जं चतुराननेशलम्बोदरी० । झं अजेशविद्राविणी० । ञं शर्वेशनागरी० । टं सोमेशखेचरी० । ठं लाङ्गलीशमञ्जरी० । डं दारुकेशरूपिणी० । ढं अर्धनारीश्वरेशवीरिणी० । णं उमाकान्तेशकाकोदरी० । तं आषाढीशपूतना० । थं दण्डीशभद्रकाली० । दं अद्रीश योगिनी० । धं मीनेशशङ्खिनी० । नं मेषेशगर्जिनी० । पं लोहितेशकालरात्री० । फं शिखीशकुर्दिनी० । बं छगलाण्डेशकपर्दिनी० । भं द्विरण्डेशवज्रिणी० । मं महाकालेशजया० । यं त्वगात्मक–कापालीशसुमुखी० । रं असृगात्मक–भुजङ्गीशरेवती० । लं मांसात्मक–पिनाकीशमाधवी० । वं मेदात्मक–खड्गीशवारुणी० । शं अस्थ्यात्मक–बकेशवायवी० । षं मज्जात्मक–श्वेतेशरक्षोपधारिणी० । सं शुक्रात्मक–भृग्वीशसहजा० । हं प्राणात्मक–नकुलीशमहालक्ष्मी० । ळं शक्त्यात्मक–शिवेशव्यापिनीभ्यां नमः । ओंह्लींह्रौं नमः शिवाय क्षं शिवात्मक–संवर्तेशमहामायाभ्यां नमः, इति विन्यस्य ध्यायेत् ।

बन्धूककाञ्चननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निजबाहुदण्डैः ।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्रमर्धाम्बिकेशमनिशं वपुराश्रयामि ॥

इति ध्यायेत् । दक्षाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम् । इति श्रीकण्ठादिमातृकान्यासः ॥

अथ केशवादिमातृकान्यासः । अस्याः केशवादिमातृकायाः शिरसि ब्रह्मा ऋषिः, मुखे गायत्री छन्दः, हृदये श्रीपरमात्मा केशवो देवता, न्यासे विनियोगः । तत्र कामराजबीजेन षड्दीर्घयुक्तेन षडङ्गन्यासं कृत्वा ध्यायेत् ।

हस्तैर्दधानां नवनीरदाभां शङ्खं च चक्रं च गदां च पद्मम् ।
कीर्त्यादिशुक्तामतिसुन्दरीं तां श्रीकेशवीं सन्ततमाश्रयेऽहम् ॥

ओं ऐं ह्रीं श्रीं क्लीं ओं नमो नाराणाय अं केशवकीर्तिभ्यां नमः । एवं सर्वत्र । आं नारायणकान्ति० । इं माधवतुष्टि० । ईं गोविन्दपुष्टि० । उं विष्णुधृति० । ऊं मधुसूदनशान्ति० । ऋं त्रिविक्रमक्रिया० । ॠं वामनदया० । लृं श्रीधरमेधा० ॡं हृषीकेशहर्षा० । एं पद्मनाभश्रद्धा० । ऐं दामोदरलज्जा० । ओं वासुदेवलक्ष्मी० । औं संकर्षणसरस्वती० । अं प्रद्युम्नप्रीति० । अः अनिरुद्धरति० । कं चक्रिजया० । खं गदिदुर्गा० । गं शार्ङ्गिप्रभा० । घं खड्गिसत्या० । ङं शङ्खिचण्डिका० । चं हलिवाणी० । छं मुसलिविलासिनी० । जं शूलिविजया० । झं पाशिविरजा० । ञं अंकुशिविश्वा० । टं मुकुन्दविनदा० । ठं नन्दजसुतदा० । डं नन्दिस्मृति० । ढं नरऋद्धि० । णं नरकजित्समृद्धि० । तं हरिशुद्धि० । थं कृष्णभुक्ति० । दं सत्यबुद्धि० । धं सात्वतमति० । नं० शौरिक्षमा० । पं शूररमा० । फं जनार्दनोमा० । बं भूधरक्लेदिनी० । भं विश्वमूर्तिक्लिन्ना० । मं वैकुण्ठवसुदा० । यं त्वगात्मक–पुरुषोत्तमवसुधा० । रं असृगात्मक–बलिपरा० । लं मांसात्मक–बलानुजपरायणा० । वं मेदआत्मक–बालसूक्ष्मा० । शं अस्थ्यात्मक-वृषघ्नसंध्या० । षं मज्जात्मक वृषभप्रज्ञा० । सं शुक्रात्मक–हंसप्रभा० । हं प्राणात्मक-वराहनिशा० । ळं शिवशक्त्यात्मक-विमलामोघा० । क्षं परात्मक नृसिंहविद्युताभ्यां नमः । इति केशवादिमातृकान्यासः ॥

अथ लज्जाबीजादिमातृकान्यासः। तत्र शक्तिर्ऋषिः, देवीगायत्री छन्दः, सकलप्रपञ्चमूलरूपिणी शक्तिर्देवता न्यासे विनियोगः। ततः षड्दीर्घयुक्तमायाबीजेन करषडङ्गं विधाय ध्यायेत्।

उद्यद्भास्वत्समाभां विजितनवजपामिन्दुखण्डावनद्ध-
द्योतन्मौलिं त्रिनेत्रां विविधमणिलसत्कुण्डलां पद्मगां च।
हारग्रैवेयकाञ्चीगुणमणिवलयाद्यैर्विचित्राम्बराढ्या-
मम्बां पाशांकुशाद्याभयवरदकरामम्बिकां तां नमामि॥

इति ध्यात्वा ह्लींअंह्लीं इत्यादिक्रमेण न्यसेत्। इति शक्तिमातृकान्यासः॥

अथ रमाबीजादिमातृकान्यासः। तत्र भार्गव ऋषिः, गायत्री छन्दः, रमा देवता न्यासे विनियोगः। श्रांश्रीमित्यादिना करषडङ्गन्यासं विधाय ध्यायेत्।

वामे करे तदितरे च तथोपरिष्टात्पात्रं सुधारसयुतं वरमातुलुङ्गम्।
खेटं गदां च दधतीं भवतीं भवानीं ध्यायन्ति येऽरुणनिभां कृतिनस्त एव॥

इति ध्यात्वा श्रींअंश्रीमित्यादि न्यसेत्। इति लक्ष्मीमातृकान्यासः॥

अथ कामबीजादिमातृकान्यासः। तत्र सम्मोहन ऋषिः, गायत्री छन्दः, कामेश्वरी देवता न्यासे विनियोगः। क्लांक्लीमित्यादिना करषडङ्गन्यासं विधाय ध्यायेत्।

त्रिनेत्रां सुस्मितमुखीमरुणाम्बरभूषणाम्। पाशांकुशधनुर्बाणधरां कामेश्वरीं भजे॥

इति ध्यात्वा क्लींअंक्लीमित्यादि न्यसेत्। इति काममातृकान्यासः॥

अथ त्रिशक्तिमातृकान्यासः। तत्र ब्रह्मा ऋषिः, गायत्री छन्दः, त्रिशक्तिर्देवता न्यासे विनियोगः। लज्जारमाकामबीजत्रयद्विरावृत्त्या करषडङ्गन्यासं विधाय प्राग्वत् ध्यात्वा ह्लींश्रींक्लींअं नमः इत्यादि न्यसेत्। इति त्रिशक्तिमातृकान्यासः॥

अथ प्रपञ्चयागमातृकान्यासः।

अथ प्रपञ्चयागस्य विधानमभिधीयते। येन निर्धूतकलुषो ब्रह्मभूयं समश्नुते॥

अस्य परब्रह्म ऋषिः, परमा गायत्री छन्दः, परमात्मा देवता न्यासे विनियोगः। स्वाहा हृदयाय नमः। सोऽहं शिरसे स्वाहा। हंसः शिखा०। ह्रीं कवचा०। ओं नेत्रा०। हरिहर अस्त्राय०। मूलमन्त्रेण त्रिधा व्यापकं कृत्वा ध्यायेत्।

तारादिपञ्चमनुभिः परिचीयमानं मानैरगम्यमनिशं जगदेकमूलम्।
सच्चित्समस्तगमनश्वरमच्युतं तत्तेजः परं भजत सान्द्रसुधाम्बुराशिम्॥

इति ध्यात्वा ॐह्रींअं हंसः सोहं स्वाहा, ॐह्रींआं हंसः सोहं स्वाहा, इत्यादि न्ययेत्। इति प्रपञ्चयागमातृकान्यासः॥ इति साधारणतो दशविधमातृकान्यासः सर्वमन्त्रसाधारणः॥

अथ मातृकाविशेषाः। तत्रादौ बालामातृकान्यासः। तत्र दक्षिणामूर्तिः ऋषिः, पंक्तिः छन्दः, बालावागीश्वरी देवता न्यासे विनियोगः। ततो बालात्रिबीजद्विरावृत्त्या करषडङ्गन्यासं कृत्वा ध्यायेत्।

आधारे तरुणार्कबिम्बरुचिरं हेमप्रभं वाग्भवं
बीजं मान्मथमिन्द्रगोपसदृशं हृत्पङ्कजे संस्थितम्।
चक्रे भालमये शशाङ्कसदृशं बीजं च तार्तीयकं
ये ध्यायन्ति पदत्रयं तव शिवे ते यान्ति सौख्यास्पदम्॥

इति ध्यात्वा ऐंक्लींसौःअं नमः इत्यादि न्यसेत्। इति बालामातृकान्यासः॥

अथ श्रीविद्यामातृकान्यासः। तत्र शिरसि दक्षिणामूर्तिर्ऋषिः, मुखे पंक्तिः छन्दः, हृदि महात्रिपुर-

सुन्दरी देवता न्यासे विनियोगः । ऐंह्लींश्रीऐं सर्वज्ञताशक्त्यै हृदयाय नमः । ३ क्लीं नित्यतृप्तिताशक्त्यै शिरसे स्वाहा । ३ सौः अनादिबोधशक्त्यै शिखायै० । ३ ऐं स्वतन्त्रताशक्त्यै कवचाय० । ३ क्लीं नित्यमलुप्तताशक्त्यै नेत्र० । ३ सौः अनन्तशक्त्यै अस्त्रा० । इति विन्यस्य ध्यायेत् ।

अरुणां करुणातरङ्गिताक्षीं धृतपाशांकुशपुष्पबाणचापाम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥

इति ध्यात्वा मूलविद्यासम्पुटितमातृकां न्यसेत् । इति श्रीविद्यामातृका न्यासः ॥

अथ परामातृकान्यासः । तत्र हंस ऋषिः, अव्यक्तगायत्री छन्दः, परा देवता न्यासे विनियोगः । सौः हृदयाय नमः । सौः शिरसे० । इत्यादि करषडङ्गन्यासं विधाय ध्यायेत् ।

अकलङ्कशशाङ्काभां त्र्यक्षां चन्द्रकलावतीम् । मुद्रापुस्तकलसद्बाहुं प्रणमामि परां कलाम् ॥

इति ध्यात्वा सौःअंसौः इत्यादि न्यसेत् । इति परामातृकान्यासः ॥

अथ कामरतिन्यासः । अस्य ब्रह्म ऋषिः, गायत्रं छन्दः, परमात्मा देवता न्यासे विनियोगः । बालया षडङ्गं विधाय ध्यायेत् ।

श्यामाङ्कान् वरान् सर्वान् सर्वाभरणभूषितान् । सशक्तिकान् स्मरेत्कामान् पञ्चाशद्वर्णभावने ॥

इति ध्यात्वा ॐऐंह्लींश्रींक्लींअं कामेश्वररतिभ्यां नमः, एवं सर्वत्र । आं कामदप्रीति० । इं कान्तकामिनी० । ईं कान्तिमन्मोहिनी० । उं कामगकमला० । ऊं कामचारविलासिनी० । ऋं कामिकल्पलता० । ॠं कामुकश्यामा० । लृं कामवर्धनशुचिस्मिता० । ॡं वामविस्मिता० । एं रामविशालाक्षी० । ऐं रमणलेलिहाना० । ओं रतिनाथदिगम्बरा० । औं रतिप्रियवामा० । अं रात्रिनाथकुब्जिका० । अः रमाकान्तकान्ता० । कं रमणनित्या० । खं निशाचरकुल्या० । गं नन्दकभोगिनी० । घं नन्दनकामदा० । ङं नन्दिसुलोचना० । चं नन्दयितृसुलापिनी० । छं पञ्चबाणमर्दिनी० । जं रतिसखकलहप्रिया० । झं पुष्पधन्ववराक्षी० । ञं महाधनुःसुमुखी० । टं भ्रामणनलिनी० । ठं भ्रमणजटिनी० । डं भ्रममाणपालिनी० । ढं भ्रमशिवा० । णं भ्रान्तमुग्धा० । तं भ्रामकरमा० । थं भृङ्गभ्रमा० । दं भ्रान्तचारलोला० । धं भ्रमावहचञ्चला० । नं मोहनदीर्घजिह्वा० । पं मोहकरतिप्रिया० । फं मोहलोलाक्षी० । बं मोहवर्धनभृङ्गिणी० । भं मदनपाटला० । मं मन्मथमदना० । यं मातङ्गमाला० । रं भृङ्गनायकहंसिनी० । लं गायकविश्वतोमुखी० । वं गीतिजगदानन्दिनी० । शं नर्तकरमणी० । षं खेलककान्ति० । सं उन्मत्तकलकण्ठी० । हं मत्तकवृकोदरी० । ळं विलासिमेघश्यामा० । क्षं लोभवर्धनलोभवर्धनीभ्यां नमः ।

एतान् पौण्ड्रेक्षुकोदण्डपुष्पपञ्चकसायकान् । रतिभिः स्वर्णवर्णाभिस्ताम्बूलं च कुशेशयम् ॥
धारयन्तीभिराश्लिष्टान् सर्वाभरणभूषितान् । सहकारमशोकं च केतकी नवमल्लिका ॥
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ।.... ... ...॥

इति कामरतिन्यासः ॥

अथाष्टात्रिंशत्कलान्यासः । तत्रेशानादिपञ्चब्रह्मणः ईशतत्पुरुषाग्निवामदेवहरा ऋषयः, अनुष्टुब्गायत्र्यनुष्टुप्कृत्यनुष्टुभः छन्दांसि, ईशानादयो देवताः पञ्चब्रह्मन्यासे विनियोगः । ऐंह्लींश्रीं हसखफ्रें हसौं सर्वज्ञाय हृदयाय नमः । बीजपञ्चकं सर्वत्र । ५ अमृते तेजोज्वालामालिने नित्यतृप्ताय शिरसे० । ५ ज्वलितशिखिशिख अनादिबोधाय शिखायै० । ५ वज्रिणे वज्रधराय स्वतन्त्राय कवचाय० । ५ ओं स्हौं हसौं नित्यमलुप्तशक्त्यै नेत्रत्रयाय० । ५ ओंश्लींपशुहुं फट् अनन्तशक्तयेऽस्त्राय० । ततः हों ईशानाय नमः । हें तत्पुरुषाय नमः । हुं अघोराय नमः । हिं वामदेवाय नमः । हं सद्योजाताय नमः । एवं पञ्चब्रह्ममन्त्रान् ऊर्ध्वपूर्वदक्षिणोत्तरपश्चिमवक्त्रेषु विन्यस्याष्टात्रिंशत् कला न्यसेत् । तद्यथा—ओं ईशानः सर्वविद्यानां शशिन्यै नमः ऊर्ध्ववक्त्रे । ईश्वरः

सर्वभूतानां अङ्गदायै नमः पूर्ववक्त्रे । ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः ब्रह्मेष्टदायै नमः दक्षवक्त्रे । ब्रह्मा शिवो मे अस्तु मरीच्यै नमः उत्तरवक्त्रे । सदाशिवों अंशुमालिन्यै नमः पश्चिमवक्त्रे इति समुष्टचं गुष्ठेन न्यसेत् । तत्पुरुषाय विद्महे शान्त्यै नमः पूर्ववक्त्राधः । महादेवाय धीमहि विद्यायै नमः दक्षिणवक्त्राधः । तन्नो रुद्रः प्रतिष्ठायै नमः उत्तरवक्त्राधः । प्रचोदयात् निवृत्त्यै नमः पश्चिमवक्त्राधः । इत्यंगुष्ठतर्जनीयोगेन न्यस्तव्याः ॥ अघोरेभ्यस्तमाकलायै नमः हृदि । अथघोरेभ्यो मोहायै नमो ग्रीवायां । घोर-क्षमायै नमः दक्षांसे । घोरतरेभ्यो निद्रायै नमो वामांसे । सर्वतः सर्व व्याधिकलायै नमः नाभौ । सर्वेभ्यो मृत्युकलायै नमः कुक्षौ । नमस्ते अस्तु क्षुधायै नमः पृष्ठे । रुद्ररूपेभ्यस्तृष्णायै नमः वक्षसि । इत्यंगुष्ठमध्यमायोगेन न्यस्तव्याः ॥ वामदेवाय नमो रजायै नमो गुह्ये । ज्येष्ठाय नमः श्रेष्ठाय नमो रक्षायै नमः लिङ्गे । रुद्राय नमो रत्यै नमः दक्षोरौ । कालाय नमो मालिन्यै नमः वामोरौ । कलविकरणाय नमः काम्यायै नमः दक्षजानुनि । विकरणाय नमः शशिन्यै नमः वामजानुनि । बलविकरणाय नमः क्रियायै नमः दक्षजङ्घायां । विकरणाय नमः सिद्ध्यै नमः वामजङ्घायां । बलाय नमः स्थिरायै नमः दक्षस्फिचि । बलप्रमथनाय नमो रात्र्यै नमः वाम-स्फिचि । सर्वभूनदमनाय नमो भ्रामिण्यै नमः कट्यां । मनोन्मनाय नमो मोहिन्यै नमः दक्षपार्श्वे । उन्मनाय नमो जरायै नमः वामपार्श्वे । इत्यंगुष्ठानामिकायोगेन न्यस्तव्याः ॥ सद्योजातं प्रपद्यामि सिद्ध्यै नमः दक्ष-पादतले । सद्योजाताय वैं नमः ऋद्ध्यै नमः वामपादतले । भवे लक्ष्म्यै नमः दक्षहस्ततले । भवे धृत्यै नमः वामहस्ततले । नातिभवे मेधायै नमः नासिकायां । भवस्व मां प्रज्ञायै नमः शिरसि । ॐ भव प्रभायै नमः दक्षबाहौ उद्भवाय नमः सुधायै नमः वामबाहौ । इत्यंगुष्ठकनिष्ठिकायोगेन न्यस्तव्याः ॥

प्रणवाद्याश्चतुर्थ्यन्ताः कलाः सर्वा नमोन्तिकाः । अष्टात्रिंशत्कलाः प्रोक्ताः पञ्चब्रह्मपरादिकाः ॥
इति विन्यस्तदेहोऽसौ भवेद्गङ्गाधरः स्वयम् । ··· ···· ···· ···· ····॥

इत्यष्टात्रिंशत्कलान्यासः । एवं न्यासान् कृत्वा प्राणायामत्रयं कृत्वा गणेशपञ्चमीदुर्गावटुकक्षेत्रपालान्न-पूर्णाश्वारूढामन्त्रान् क्रमेण पठेत् ॥

इति महामहोपाध्यायवर्यभगवत्पूज्यपाद–श्रीगोविन्दाचार्यशिष्य–श्रीभगवच्छङ्कराचा-र्यशिष्य–श्रीविष्णुशर्माचार्यशिष्य–श्रीप्रगल्भाचार्यशिष्य–श्रीविद्यारण्ययतिवि-रचिते श्रीविद्यार्णवाख्ये तन्त्रे पञ्चत्रिंशत्तमः श्वासः ॥ ३५ ॥

अथ

षट्त्रिंशः श्वासः

अथ मालिनीन्यासः । अस्य श्रीमालिनीन्यासस्य परशंभुः ऋषिः, गायत्री छन्दः, मूलशक्तिर्मालिनी देवता न्यासे विनियोगः । नफक्षमलवरयां हृदयाय नमः, नफक्षमलवरयीं शिरसे, एवं षड्दीर्घयुक्तेन करषडङ्गन्यासं विधाय ध्यायेत् ।

रक्तवस्त्रधरां देवीं पञ्चवक्त्रधरां शिवाम् । निवृत्त्यादिकलायुक्तां प्रतिवक्त्रं त्रिलोचनाम् ॥
पाशांकुशधरां देवीं सुधासिक्तकपालिनीम् । इच्छादित्रयसंयुक्तां शूलं दक्षकरे धराम् ॥
रक्तपङ्कजमध्यस्थां मालिनीं भावयेच्छिवाम् ।.... ....॥

इति ध्यात्वा

परासम्पुटितां कुर्यान्मालिनीं मातृकामपि । मूलादिब्रह्मरन्ध्रान्तं (हृद्बीजं मदनात्मना ॥
ब्रह्मरन्ध्रादिमूलान्तं) स्मरेदात्मपरामपि ।.... ....॥

सौः अं कं ५ आं सौः हृदयाय० । सौः इं चं ५ ईं सौःशिरसे० । सौः उं टं ५ ऊं सौः शिखायै० । सौः एं तं ५ ऐं सौः कवचा० । सौः ओं पं ५ औं सौः नेत्र० । सौः अं यं १० अंः सौः अस्त्राय० । इति करषडङ्गन्यासं विधाय, सौः नं नादिन्यै नमः सौः शिखायां । सौः ऋं निवृत्त्यै नमः सौः पश्चिमवक्त्रे । सौः ॠं प्रतिष्ठायै नमः सौः उत्तरवक्त्रे । सौः लृं विद्यायै नमः सौः दक्षिणवक्त्रे । सौः लॄं शान्तायै नमः सौः पूर्ववक्त्रे । सौः थं प्रसन्यै नमः सौः ऊर्ध्ववक्त्रे । सौः चं चामुण्डायै नमः सौः ललाटनेत्रे । सौः धं प्रियदर्शनायै मनः सौः नेत्रयोः । सौः ईं गुह्यशक्तये नमः सौः नासिकायां । सौः णं नारायिण्यै नमः सौः कर्णयोः । सौः उं मोहिन्यै नमः सौः दक्षकर्णमुद्रायां । सौः ऊं प्रज्ञायै नमः सौः वामकर्णमुद्रायां । सौः बं वज्रिण्यै नमः सौः मुखे । सौः कं कङ्कटायै नमः सौः ऊर्ध्वदन्तेषु । सौः खं कालिकायै नमः सौः अधोदन्तेषु । सौः गं शिवायै नमः सौः ऊर्ध्वोष्ठे । सौः घं घोरघोरायै नमः सौः अधरोष्ठे । सौः ङं खिविरायै नमः सौः (जिह्वाग्रे) । सौः इं मायायै नमः सौः जिह्वायां । सौः अं वागीश्वर्यै नमः सौः वाचि । सौः वं शिखिवाहिन्यै नमः सौः कण्ठे । सौः भं भीषण्यै नमः सौः दक्षस्कन्धे । सौः यं वायुवेगायै नमः सौः वामस्कन्धे । सौः डं लामायै नमः सौः दक्षभुजे । सौः ढं विनायिक्यै नमः सौः वामभुजे । सौः ठं पूर्णिमायै नमः सौः हस्तयोः । सौः झं झङ्कार्यै नमः सौः दक्षहस्तांगुलिषु । सौः ञं कुर्दनायै नमः सौः वामहस्तांगुलिषु । सौः जं जयन्त्यै नमः सौः शूले । सौः रं दीपिन्यै नमः सौः दण्डे । सौः टं कपालिन्यै नमः सौः कपाले । सौः पं पावन्यै नमः सौः हृदये । सौः छं छगल्यै नमः सौः दक्षहस्तेन । सौः लं पूतनायै नमः सौः वामहस्तेन । सौः आं आमोद्न्यै नमः क्षीरे । सौः सं परमायै नमः सौः आत्मनि । सौः अंः इच्छाशक्तये नमः सौः प्राणात्मनि । सौः हं अम्बिकायै नमः सौः प्राणे । सौः षं लम्बिकायै नमः सौः उदरे । सौः क्षं संहारिकायै नमः सौः नाभौ । सौः मं महाकाल्यै नमः सौः नितम्बे । सौः शं कुसुमायुधायै नमः सौः गुह्ये । सौः अं शुक्रादेव्यै नमः सौः दक्षोरौ । सौः तं तारायै नमः सौः वामोरौ । सौः एं ज्ञानशक्तये नमः सौः दक्षजानौ । सौः ऐं क्रियाशक्तये नमः सौः वामजानौ । सौः ओं गायत्र्यै नमः सौः दक्षजङ्घायां । सौः औं सावित्र्यै नमः सौः वामजङ्घायां । सौः दं दहन्यै नमः सौः दक्षपादे । सौः फं फेट्कार्यै नमः सौः वामपादे । सौः नफक्षमलवरयीं सौः श्रीमालिन्यै नमः सौः हृदि । सौः ऐंह्रींश्रीं सौः मातृकायै नमः सौः शिरसि । सौः

नफक्षमलवरयां सौः हृदयायनमः, इत्यादिषड्दीर्घयुक्तेन मालिनीबीजेन करषडङ्गन्यासं कृत्वा प्राग्वद्ध्यायेत् । इति मालिनीन्यासः ॥ ततः प्राणायामत्रयं कृत्वा लिङ्गन्यासं कुर्यात् । ४ ऐं स्वयंभूलिङ्गाय नमः आधारे । ४ ईं बाणलिङ्गाय नमः हृदये । ४ औं इतरलिङ्गाय नमः भ्रूमध्ये । ४ ऐंईंऔं परलिङ्गाय नमः ब्रह्मरन्ध्रे । कनकपटलनिभं तत्समष्टिरूपं तेजो विचिन्त्य वहन्नासापुटाध्वना कराञ्जलौ संक्रम्य, अंआंसौः इति बीजत्रयं मध्यमानामिकाकनिष्ठांगुष्ठतर्जनीकरतलेषु विन्यस्येत् । इति करशुद्धिन्यासः ॥ नाभेरापादं हृदो नाभिपर्यन्तं शिरसो हृत्पर्यन्तं तदेव बीजत्रयं बालया वा व्यस्तसमस्तक्रमेण विन्यस्य, ह्रीँऐंक्लींसौः त्रिपुरसुन्दरि आत्मानं रक्ष रक्ष हृदयाय नमः इति क्रमेण षडङ्गन्यासं कृत्वा, आधारहृत्–शिरसु चतुर्दलद्वादशदलषोडशदलमण्डलानि विभाव्य तेषु क्रमेण वह्निसूर्यसोमात्मकतया मूलविद्याखण्डत्रयं तेजोरूपं विचिन्त्य, करयोर्मूलमध्याग्रेषु मूलहृद्बिन्दुषु च न्यसेत् ।

मूलविद्यात्रयावृत्त्या तुर्येण ब्रह्मरन्ध्रके । द्वादशान्तेन्दुविगलत्पीयूषेणात्मनस्तनुम् ॥
सम्भाव्य तन्मयो भूत्वा न्यसेत्पश्चान्नवासनम् ।···· ···· ···· ···· ···· ····॥

४ अंआंसौः त्रिपुरामृतार्णवासनाय नमः । ४ ऐंक्लींसौः त्रिपुरेश्वरीरक्तपोताम्बुजासनाय नमः । ४ ह्रींक्लींसौः त्रिपुरसुन्दरीदेव्यात्मासनाय नमः । ४ हैं हक्लीं-हसौः त्रिपुरवासिनीसर्वचक्रासनाय नमः । ४ हसैं-हसक्लीं हसौं त्रिपुराश्रीसर्वमन्त्रासनाय नमः । ४ ह्रींक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनाय नमः । ४ ह्रीश्रीं सौः त्रिपुरासिद्धासिताम्बुजासनाय नमः । ४ हस्रैं·हसकलरीं-हस्रौः त्रिपुराम्बापर्यङ्कपीठासनाय नमः । ४ हसकलरडैं·हसकलरडीं·हसकलरडौः त्रिपुरभैरवीसदाशिवमहाप्रेतपद्मासनाय नमः ॥

एतास्तु पादजानूरुजघनापानलिङ्गके । नाभिहृद्ब्रह्मरन्ध्रेषु विन्यसेत्क्रमतः सुधीः ॥

अथ परान्यासः । ब्रह्मरन्ध्रेऽरुणाधोमुखसहस्रदलकमलकर्णिकायामरुणपूर्णचिच्चन्द्रमण्डलं विभाव्य तन्मध्ये उदितादित्यसंकाशं स्वशिखामूलाग्रं शृङ्गाटं ध्यात्वा, तन्मध्ये अकथादिक्रमेण समस्ताक्षरमयमकुलासनं वाग्भवं ध्यात्वा, तन्मध्ये हक्षपार्श्वमादिवर्णकदम्बकं दीप्तमवर्णरूपमनुत्तरमनच्कतरहात्मकं संचिन्त्य, तन्मध्यादुद्यन्तीं हार्धकलारूपाममृतकुण्डलिनीं मूलशृङ्गाटमध्यपर्यन्तमविच्छिन्नां बिसतन्तुनिभां सितां महाकामकलात्मिकां ध्यात्वा, मूलाधारे चतुर्दलपद्मकर्णिकायामपि वह्निमण्डले त्रिकोणस्याग्रकोणाग्रे शृङ्गाटं पूर्ववत् ध्यात्वा, तदन्तः कुलासनं, तत्र च वाग्भवं संचिन्त्य, तत्र प्राग्वत् कामकलां ज्वलदग्निरूपां ध्यात्वा तन्मध्यादुद्यन्तीं सपरार्धकलामयीमग्निकुण्डलिनीं लिङ्गाकारतया योनिरूपसुधाकुण्डलिनीमध्यमार्गमनुप्रवेश्य षड्ग्रन्थिसंचयं भित्त्वा तदकुलपदावध्यूर्ध्वं प्राप्तां ध्यात्वा, अकुलाम्बुधिमध्यगतदण्डाकारतरदण्डलिङ्गेन प्रवेशयित्वा तयोरमृतानलकुण्डलिन्योर्योनिलिङ्गरूपयोर्मंथनसम्भवैर्निरन्तरनिबिडस्रवदरुणामृतवर्षैरात्मानं सिक्तं ध्यात्वा तयोः सामरस्यात् तदेकनादरूपिणीं परां शक्तिं भावयेत् । इति परान्यासः ॥

अथ पश्यन्तीन्यासः । स्वशिरसि अकुलपद्मे आत्माग्रं त्रिकोणं ब्रह्मरसभरितमाद्यवर्णकदम्बकं ध्यात्वा तत्सामरस्यादेकादशशक्त्यात्मकं पश्यन्त्यवस्थारसभरितं संचिन्त्य अग्रादिवामावर्तेन त्रिरेखासु त्रिकं पञ्चकं त्रिकं पश्यन्तीकदम्बकं न्यसेदिति । प्रथमरेखायां ४ वामायै नमः । ४ ज्येष्ठायै नमः । ४ रौद्र्यै नमः । द्वितीयरेखायां ४ अम्बिकायै नमः । ४ इच्छायै नमः । ४ ज्ञानायै० । ४ क्रियायै० । ४ शान्तायै० । तृतीयरेखायां ४ अकारात्मिकायै नमः । ४ हकारात्मिकायै० । ४ अक्षरात्मिकायै० । इति न्यसेत् । इति पश्यन्तीन्यासः ॥

अथ मध्यमान्यासः । ४ अनच्कात्मने अविक्लतनादाय नमो ब्रह्मरन्ध्रे । ४ अकारात्मने शून्यनादाय नमः ललाटे । ४ बिन्दुद्वयात्मने स्पर्शनादाय नमः भ्रूमध्ये । ४ षट्कोणरेखात्मने नादनादाय नमः लम्बिकाग्रे । ४ अर्धचन्द्रात्मने ध्वनिनादाय नमः विशुद्धौ । वृत्तात्मने बिन्दुनादाय नमः अनाहते । एकारात्मने

शक्तिनादाय नमः मणिपूरके इन्द्वात्मने बीजनादाय नमः स्वाधिष्ठाने । हंसरूपात्मने अक्षरनादाय नमः आधारे । इति मध्यमान्यासः ॥

अथ वैखरीन्यासः । षडाधारं गुणत्रयेण त्रिधा विभज्य बीजत्रयसंगतं कृत्वा वस-बलाब्जयोस्तडिदाभं मूलवाग्भवं, डफ-कटाब्जयोरलक्तकनिभं शुद्धकामराजं, स्वरहक्षयोः चन्द्रसंनिभं शुद्धतार्तीयं शिवशक्तिबीज-संगतं कृत्वा न्यसेत् । तद्यथा— मूलाधारे पूर्वादिचतुर्दले (स्वाग्रादिप्रादक्षिण्येन) वंहसैं, शंहसैं, षंहसैं, संहसैं । स्वाधिष्ठाने बंहसैं, भंहसैं, मंहसैं, यंहसैं, रंहसैं, लंहसैं, । मणिपूरे डंहसीं, ढंहसीं, णंहसीं, तंहसीं, थंहसीं, दंहसीं, धंहसीं, नंहसीं, पंहसीं, फंहसीं, । अनाहते द्वादशदलेषु पूर्वादि कंहसीं, खंहसीं, गंहसीं, घंहसीं, ङंहसीं, चंहसीं, छंहसीं, जंहसीं, झंहसीं, ञंहसीं, टंहसीं, ठंहसीं । ततो विशुद्धौ षोडशदलेषु अंहसौः आंहसौः इत्यादि अःहसौः इत्यन्तं विन्यस्य, आज्ञायां हंहसौः, क्षंहसौः इति विन्यसेदिति वैखरीन्यासः ॥ (अन्तःसुधासिक्तं पद्मरागप्रभं वर्णकदम्बकं ध्यायेत)

अथ कामकलान्यासः । तत्र ईंकारोर्ध्वगतविन्दुमात्मनो वक्त्रं परिकल्प्य ऐं परावक्त्राय नमः इति मुखे व्यापकत्वेन विन्यस्य, तदधः सपरार्धरूपं बिन्दुद्वययुक्तं स्तनद्वयं ध्यात्वा क्लीं सपरार्धविन्द्वात्मकस्तन-युग्माय नमः । इति व्यापकं कृत्वा, सौः सपरार्धाभिव्यञ्जकरेखात्मयोन्यै नमः इति लिङ्गे व्यापकं, नासां ललाटं चक्षुषी कर्णौ वदनं च मुखबिन्दौ, भुजचतुष्टयं वक्षोजद्वयं स्तनबिन्दौ, चरणद्वयं योनिविन्दौ ध्यात्वा, समष्टिभूतमकुलाक्षरं सर्वावयवसम्पूर्णं परमसौन्दर्यमयं कामेश्वराङ्कस्थितमात्मानं ध्यात्वायुधन्यासं कुर्यात् । ४ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां शां जृम्भणकामेश्वरकामेश्वरीबाणेभ्यो नमः स्वदक्षिणाधःकरे । ४ धं (थं) सम्मोहनकामेश्वरकामेश्वरीधनुर्भ्यां नमः स्ववामाधःकरे । ४ ॐ आं ह्रीं वशीकरणकामेश्वरकामेश्वरीपाशाभ्यां नमः स्वदक्षिणोर्ध्वकरे । ४ क्रों क्रों स्तम्भनकामेश्वरकामेश्वर्यङ्कुशाभ्यां नमः स्ववामोर्ध्वकरे । एवं तत्तन्मुद्राः प्रदर्श्य पञ्चदश्या त्रिर्व्यापकं कृत्वा (मातृकास्थानेषु) कलालिकान्यासं कुर्यात्— । ४ अं कामिनी त्रिपुरा-श्रीपादुकां पूजयामि नमः, एवं सर्वत्र । आं मोदिनी त्रि० । इं मदना त्रि० । ईं उन्मादिनी त्रि० । उं द्राविणी त्रि० । ऊं खेचरी त्रि० ऋं घण्टिका त्रि० । ॠं कलावती त्रि० । लृं क्लेदिनी त्रि० । लॄं शिवदूती त्रि० । एं सुभगा त्रि० । ऐं भगा त्रि० । ओं विद्येश्वरी त्रि० । औं महालक्ष्मी त्रि० । अं कौलिनी त्रि० । अः सुरेश्वरी त्रि० । कं कुलमालिनी त्रि० । खं व्यापिनी त्रि० । गं भगावहा त्रि० । घं वागीश्वरी त्रि० । ङं वषट्कारिणी त्रि० । चं पिङ्गला त्रि० । छं भगसर्पिणी त्रि० । जं सुन्दरी त्रि० । झं नीलपताका त्रि० । ञं त्रिपुरा त्रि० । टं सिद्धेश्वरी त्रि० । ठं अमोघा त्रि० । डं रत्नमालिनी त्रि० । ढं मङ्गला त्रि० । णं भगमालिनी त्रि० । तं नित्या त्रि० । थं रौद्री त्रि० । दं व्योमेश्वरी त्रि० । धं अम्बिका त्रि० । नं अट्टहासा त्रि० । पं आप्यायिनी त्रि० । फं वज्रेश्वरी त्रि० । बं क्षोभिणी त्रि० । भं शांभवी त्रि० । मं स्तम्भिनी त्रि० । यं अनामा त्रि० ।

---

१ बहिः कामकलान्यासः । तत्र कामकलाभूतस्य सबिन्दुतुर्यस्वरस्यादिबिन्दुं देवीरूपस्यात्मनः केशकर्ण-नेत्रनासाद्यवयवसमेतं वक्त्रं परिकल्प्य तस्याधोबिन्दुद्वयं बाहुचतुष्टयाद्यवयवसमेतं स्तनद्वयं ध्यात्वा तस्याधो हार्धकलां पादद्वयाद्यवयवसमेतां योनिं विचिन्त्य ४ वाग्भवकूटमुच्चार्य ईंकारस्योर्ध्वविन्द्वात्मने श्रीमहात्रिपुर-सुन्दर्याः केशाद्यवयवसमेतवक्त्राय नमः । ४ कामकटमुच्चार्य ईकारस्याधोबिन्दुद्वयात्मने श्रीमहात्रिपुरसुन्दर्याः बाहुचतुष्टयाद्यवयवसहितस्तनद्वयाय नमः । तृतीयकूटमुच्चार्य ईकारस्य हार्धकलात्मने श्रीमहात्रिपुरसुन्दर्याः पदद्वयाद्यवयवसहितयोनये नमः इति मूर्धादिकण्ठपर्यन्तं कण्ठादिनाभिपर्यन्तं नाभ्यादिपादद्वयाग्रपर्यन्तं च व्यापकत्वेन विन्यस्य, ४ मूलविद्यामुच्चार्य समस्तकामकलात्मने श्रीमहात्रिपुरसुन्दर्याः सर्वावयवेभ्यो नमः इति व्यापकं विन्यस्य समष्टिकामकलाभूतपरमाक्षरमयसर्वावयवसम्पूर्णां परमसौन्दर्यवतीं कामेश्वराङ्कनिलयां सर्वाभरणसम्पन्नां देवीं स्वात्मानं ध्यायेदिति । (सौ० र०)

रं रक्ता त्रि० । लं शुक्ला त्रि० । वं अपराजिता त्रि० । शं संवर्तिका त्रि० । षं विमला त्रि० । सं अघोरा त्रि० । हं घोरात्रि० । ळं बिन्दुभैरवी त्रि० । क्षं सर्वाकर्षिणी त्रि० । इति कलालिकान्यासः ॥

अथ कामकलान्यासः । क्लीं श्रद्धायै नमः दक्षपादे । क्लीं प्रीत्यै नमः जङ्घायां । क्लीं रत्यै नमः जानुनि । क्लीं स्मृत्यै नमः ऊरौ । क्लीं कान्त्यै नमः वक्षसि । क्लीं मनोरमायै नमः बाहौ । क्लीं मनोहरायै नमः मुखे । क्लीं मनोरथायै नमः मूर्ध्नि । एवं दक्षभागे विन्यस्य वामभागे विलोमेन । क्लीं मनोन्मन्यै नमः मूर्ध्नि । क्लीं मोदिन्यै नमः आस्ये । क्लीं दीपिन्यै नमः बाहौ । क्लीं शोषिण्यै नमः वक्षसि । क्लीं वंशकर्यै नमः ऊरौ । क्लीं राजस्यै नमः जानौ । क्लीं सुभगायै नमः जङ्घायां । क्लीं प्रियदर्शिन्यै नमः पादे । इति कामकलान्यासः ॥

अथ सोमकलान्यासः । सं पूषायै नमः पृष्ठवंशे । सां यशस्विन्यै नमः अंसपृष्ठे । सिं सुमनसे नमः ग्रीवापृष्ठे । सीं रत्यै नमः कर्णे । सुं प्रीत्यै नमः नेत्रे । सूं धृत्यै नमः नासाबिले सृं ऋद्ध्यै नमः ललाटे । सॄं सौम्यायै नमः मस्तके । एवं दक्षभागे विन्यस्य वामभागे विलोमतः । स्लृं मरीच्यै नमः । मस्तके । स्लॄं अंशुमालिन्यै नमः ललाटे । सें अम्बिकायै नमः नासाबिले । सैं शशिन्यै नमः नेत्रे । सों छायायै नमः कर्णे । सौं सम्पूर्णमण्डलायै नमः ग्रीवापृष्ठे । सं तुष्टयै नमः अंसपृष्ठे । सः अमृतायै नमः पृष्ठवंशे । इति सोमकलान्यासः ॥
"एवं सोमकलान्यासस्त्राणदः परिकीर्तितः ।"

अथ योगपीठन्यासः । तत्रांसद्वयोरुद्वयकल्पितपादचतुष्टयं मुखनाभिपार्श्वद्वयकल्पितगात्रचतुष्टयं योगपीठं निजदेहे ध्यात्वा न्यसेत् । मूलाधारे ४ महाकालाय रक्तवर्णाय मण्डूकाधाराय नमः । उपरि स्वाधिष्ठानपर्यन्तं ४ पञ्चवक्त्रदशभुजाय रक्तकृष्णवर्णवामदक्षिणपार्श्वाय कालाग्निरुद्राय नमः । तदुपरि नाभिपर्यन्तं ४ बन्धूकरुचिरायै मूलप्रकृतये नमः । तदुपरि हृदयपर्यन्तं ४ शरच्चन्द्रप्रभायै पङ्कजकद्वयधारिण्यै आधारशक्त्यै नमः । तदुपरि हृदय एव कूर्माय० । अनन्ताय० । वराहाय० । पृथिव्यै० । अमृतार्णवाय० । ४ अंआं इत्यादिक्षान्तं मातृकामुच्चार्य नवखण्डविराजिताय नवरत्नमयद्वीपाय नमः । तत्रैव नवखण्डेषु नवरत्नानि न्यसेत् ईशानादिमध्यान्तं प्रादक्षिण्यक्रमेण । ३ पुष्परागरत्नाय० । ३ नीलरत्नाय० । ३ वैदूर्यरत्नाय० । ३ विद्रुमरत्नाय० । ३ मौक्तिकरत्नाय० । ३ मरकतरत्नाय० । ३ वज्ररत्नाय० । ३ गोमेदरत्नाय० । ३ मध्ये पद्मरागरत्नाय० । तत्रैव ३ सुवर्णपर्वताय० । ३ नन्दनोद्यानाय० । ३ कल्पकोद्यानाय० । तत्रैव ३ वसन्तादिषडृतुभ्यो नमः । पश्चिमे ३ इन्द्रियाश्वेभ्यो नमः । पूर्वे ३ इन्द्रियार्थगजेभ्यो नमः । ३ विचित्ररत्नभूमिकायै नमः । तत्र पश्चिमादिमध्यान्तं विलोमेन नव चक्राणि न्यसेत् । ३ कालचक्रेश्वरीपादुकां पूजयामि नमः । ३ मुद्राचक्रेश्वरी० । ३ मातृचक्रेश्वरी० । ३ रत्नचक्रेश्वरी० । ३ देशचक्रेश्वरी० । ३ गुरुचक्रेश्वरी० । ३ तत्त्वचक्रेश्वरी० । ३ ग्रहचक्रेश्वरी० । मध्ये ३ मूर्तिचक्रेश्वरी० । (३ कारणतोयपरिधये० । ३ माणिक्यमण्डपाय० । तस्य नैर्ऋत्यादिकोणेषु ३ देशरूपिणीशक्तिश्री० । ३ कालरूपिणीशक्तिश्री० । ३ आकाररूपिणीशक्ति० । ३ शब्दरूपिणीशक्ति० ।) मध्ये ३ संगीतयोगिनीरूपिणीशक्ति० । तन्मध्ये ३ समस्तगुप्तप्रकटयोगिनीशक्ति० । तन्मध्ये ३ कल्पतरुभ्यो० । तदधः ३ रत्नवेदिकायै० । ३ श्वेतच्छत्राय० । ३ रत्नसिंहासनाद० । एवं हृदये विन्यस्य रत्नसिंहासनत्वेन स्वदेहं ध्यानन् सिंहासनदेवता न्यसेत् । दक्षांसे ३ रक्तवर्णाय वृषभरूपाय धर्माय नमः । वामांसे ३ श्यामवर्णाय सिंहरूपाय ज्ञानाय नमः । वामोरौ ३ पीतवर्णाय भूताकाराय वैराग्याय नमः । दक्षोरौ ३ इन्द्रनीलप्रभाय गजरूपाय ऐश्वर्याय नमः । एते सिंहासनपादरूपिणः । मुखे ३ अधर्माय नमः । वामपार्श्वे ३ अज्ञानाय नमः । नाभौ ३ अवैराग्याय नमः । दक्षपार्श्वे ३ अनैश्वर्याय नमः । एते सिंहासनगात्ररूपिणः । मध्ये ३ मायायै नमः । ३ विद्यायै नमः । तदुपरि आनन्दकन्दाय नमः । ३ संविन्नालाय० । ३ प्रकृतिमयपत्रेभ्यः० । ३ विकृतिमयकेसरेभ्यो० । ३ पञ्चाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै० । तस्यां ३

अं अर्कमण्डलाय० । ३ उं सोममण्डलाय० । ३ रं वह्निमण्डलाय० । ३ सं सत्त्वाय० । ३ रं रजसे० । ३ तं तमसे० । तदुपरि पूर्वादिदिक्षु मध्ये च ३ ज्ञानतत्त्वात्मने० । ३ मायातत्त्वात्मने० । ३ कलातत्त्वात्मने० । ३ विद्यातत्त्वात्मने० । मध्ये ३ परतत्त्वात्मने० । तत्र ३ आं आत्मने० । ३ अं अन्तरात्मने० । ३ पं परमात्मने० । ३ ह्रीं ज्ञानात्मने० । ततः केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च प्रादक्षिण्येन नव शक्तीर्न्यसेत् । ३ दूतर्यम्बाश्री० । ३ सुन्दर्यम्बा० । ३ सुमुख्यम्बा० । ३ विरूपाम्बा० । ३ विमलाम्बा० । ३ अन्तर्यम्बा० । ३ बदर्यम्बा० । ३ पुरन्दर्यम्बा० । मध्ये ३ पुष्पमर्दिन्यम्बा० । तदुपरि ३ क्लीं सर्वशक्तिकमलासनाय नमः । इति पीठमन्त्रं विन्यस्य तदुपरि श्रीचक्रं, ध्यात्वा, समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्य-योगिनीश्रीचक्रदेवतापादुकाभ्यो नमः । इति व्यापकत्वेन विन्यस्य, हृदि त्रिकोणं विभाव्य, तन्मध्ये ३ बाला-मूलपञ्चदशीविद्यामुच्चार्य त्रिकोणरक्तवर्णोड्यानपीठश्री० । त्रिकोणस्याग्रे ३ बालामूलयोर्वाग्भवद्वयमुच्चार्य, चतुस्रपीतवर्णकामरूपपीठश्री० । दक्षकोणे ३ कामराजद्वयमुच्चार्य, अर्धचन्द्रनिभश्वेतवर्णजालन्धरपीठश्री० । वामकोणे ३ शक्तिबीजद्वयमुच्चार्य, षड्बिन्दुलाञ्छितवृत्तधूम्रवर्णपूर्णगिरिपीठश्री० । इति चतुष्पीठं विन्यस्य, पुनर्वैन्दवे आग्नेयादिकोणेषु ४ लांह्लां ब्रह्मणे पृथिव्यधिपतये नमो ब्रह्मप्रेतासनश्री० । ४ वांह्वीं विष्णवे अपामधिपतये नमो विष्णुप्रेतासनश्री० । ४ रांह्लूं रुद्राय तेजोधिपतये नमो रुद्रप्रेतासनश्री० । ४ यांह्यैं ईश्वराय वाय्वधिपतये नम ईश्वरप्रेतासनश्री० । ४ ह्सौं वियदधिपतये पञ्चवक्त्राय सदाशिवाय नमः सदाशिवमहाप्रेत-पद्मासनश्री० । इति पञ्चप्रेतासनं विन्यस्य, तदुपरि रक्तपद्मकर्णिकायां चतुरस्रगर्भषट्कोणपीठे षडासनानि विन्यसेत । ४ अंआंसौः त्रिपुरासुधार्णवासनाय नमः । ४ ऐंक्लींसौः त्रिपुरेश्वरीपोताम्बुजासनाय नमः । ४ ह्रींक्लींसौः त्रिपुरसुन्दरीदेव्यात्मासनाय नमः । ४ हैं ह्क्लीं ह्सौः त्रिपुरवासिनीसर्वचक्रासनाय नमः । ४ ह्सैं ह्सक्लीं ह्सौः त्रिपुराश्रीसर्वमन्त्रासनाय नमः । ४ ह्रींक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनाय नमः । इति षडस्रेषु षडासनानि विन्यस्य, मध्ये चतुरस्रे चतुष्पीठसहितं चतुरासनं न्यसेत् । ईशाने ३ वाग्भवद्वयमुच्चार्य, अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मके जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मकरुद्रशक्तिश्रीकामेश्वरीदेवी-ह्रींक्लींसौः त्रिपुरसुन्दरीदेव्यात्मासनाय नमः । वायव्यकोणे ३ कामराजद्वयमुच्चार्य, सूर्यचक्रे जालन्धरपीठे षष्ठेशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्णुशक्तिश्रीवज्रेश्वरी देवी हैंह्क्लींह्सौः त्रिपुरवासिनी-सर्वचक्रासनाय नमः । नैर्ऋतकोणे ३ शक्तिबीजद्वयमुच्चार्य, सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्ति-दशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मकशक्तिश्रीभगमालिनीदेवी ह्सैं ह्सक्लीं ह्सौः त्रिपुराश्रीसर्वमन्त्रा-सनाय नमः । आग्नेये ३ समस्तद्वयमुच्चार्य, ब्रह्मचक्रे श्रीमदुड्यानपीठे चर्यानाथात्मके तुरीयतुरीयातीतदशा-धिष्ठायके परब्रह्मशक्त्यात्मकश्रीत्रिपुरसुन्दरीदेवी ह्रींक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनाय नमः । मध्ये त्रितारबालापञ्चदशीमुच्चार्य, श्रीमहात्रिपुरसुन्दरीसर्वमन्त्रासनाय नमः । इति विन्यस्य, ४ समस्तमातृका-मुच्चार्य, शिवशक्तिसदाशिवेश्वरशुद्धविद्या-मायाकलाविद्यारागकालनियतिपुरुष-प्रकृत्यहंकारबुद्धिमनस्त्वक्चक्षुः-श्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलपृथिव्यात्मने श्रीमहात्रिपुरसुन्द-रीयोगपीठात्मने नमः । इति व्यापकं कृत्वा, मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरीपादुकां पूजयामि नमः । इति षट्त्रिंशत्तत्त्वात्मके देहमये महायोगपीठे स्वेष्टदेवतां हृदि विन्यसेत् । "इति देहमये पीठे चिन्तयेत्परदेवताम् ।" इति योगपीठन्यासः ।

अथ षोढान्यासः— अस्य गणेशन्यासस्य गणक ऋषिः, निचृद्गायत्री छन्दः, श्रीगणेशो देवता, न्यासे विनियोगः । ४ गां शक्त्यानन्दाय हृदयाय नमः । ४ श्रींगीं मुखेन्दुरूपाय शिरसे स्वाहा । ४ ह्रूंगूं राजचन्द्राय शिखायै० । ४ क्लींगैं मदोत्कटाय कवचाय० । ४ ग्लौंगौं प्रमोदाय नेत्र० । गंगः सर्वमन्त्रात्मने आमोदाय

अस्त्राय० । इति करषडङ्गन्यासं कृत्वा ध्यायेत् ।

तरुणारुणसंकाशान् गजवक्त्रांस्त्रिलोचनान् । पाशांकुशवराभीतिलसच्छक्तिसमन्वितान् ॥

एवं ध्यात्वैव पञ्चाशच्छक्तियुग्गणपान् न्यसेत् । ....॥

वामोर्ध्वकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम् । शक्तीनां वामकरे कमलम् ।

(तास्तु सिन्दूरवर्णाभाः सर्वालंकारशोभिताः । एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः ॥)

४ गं अं विघ्नेशनाथश्रीअम्बाभ्यां नमः । एवं सर्वत्र । आं विघ्नराजह्रीभ्यां० । इं विनायकपुष्टि० । ईं शिवोत्तमशान्ति० । उं विघ्नकृत्सरस्वती० । ऊं विघ्नहृद्रति० । ऋं विघ्नराट्स्वाहा० । ॠं गणनायकमेधा० । लृं एकदन्तभूति० । लॄं द्विदन्तकामिनी० । एं गजवक्त्रमोहिनी० । ऐं निरञ्जनजटा० । ओं कपर्दितीव्रा० । औं दीर्घमुखज्वालिनी० । अं शङ्कुकर्णनन्दा० । अः वृषध्वजयशस्विनी० । कं गणनाथकामरूपिणी० । खं गजेन्द्रोग्रा० । गं शूर्पकर्णतेजोवती० । घं त्रिलोचनसती० । ङं लम्बोदरविघ्नेशी० । चं महानन्दस्वरूपिणी० । छं चतुर्मूर्तिकामदा० । जं सदाशिवमदविह्वला० । झं आमोदकान्ति० । ञं दुर्मुखधूम्रा० । टं सुमुखसिता० । ठं प्रमोदरमा० । डं एकपादमहिषी० । ढं द्विजिह्वनाथध्वजिनी० । णं शूरविकर्णा० । तं वीरभ्रूकुटी० । थं षण्मुखलज्जा० । दं वरददीर्घघोणा० । धं मत्तवाहनधनुर्धरा० । नं वक्रतुण्डपाशिनी० । पं द्विरण्डरात्रि० । फं सेनानीकामान्धा० । बं ग्रामणीशशिप्रभा० । भं मत्तलोलाक्षी० । मं विमत्तचञ्चला० । यं मत्तवाहनदिति० । रं जटिसुभगा० । लं मुण्डिदुर्भगा० । वं खड्गिशिवा० । शं वरेण्यदुर्गा० । षं वृषकेतुभगिनी० । सं भक्ष्यप्रियमोगिनी० । हं गणेशगणप्रिया० । ळं मेघनादकालिका० । क्षं गणेश्वरकालजिह्वा० । इति गणेशन्यासः ॥

अथ ग्रहन्यासः । ४ अं १६ माणिक्यात्मने सूर्याय भगवते रेणुकाम्बायै नमः हृदयाधः । ४ यंरंलंवं मुक्तात्मने चन्द्राय भगवते अमृताम्बायै नमः ललाटे । ४ कं ५ विद्रुमात्मने लोहिताय मङ्गलाय भगवते मेधाम्बायै नमः नेत्रत्रये । ४ चं ५ वज्रात्मने शुक्राय भगवते ज्ञानाम्बायै नमः हृदये । ४ टं ५ मरकतात्मने बुधाय भगवते यशस्विन्यम्बायै नमः हृदयोपरि । ४ तं ५ पुष्परागात्मने बृहस्पतये भगवते शांकर्यम्बायै नमः कण्ठे । ४ पं ५ नीलात्मने शनैश्चराय भगवते शक्त्यम्बायै नमः नाभौ । ४ शं ४ गोमेदात्मने राहवे भगवते कृष्णाम्बायै नमः मुखे । ४ ळं क्षं वैडूर्यात्मभ्यः केतुभ्यो भगवद्भ्यो धूम्राम्बायै नमः पादयोः ।

कामरूपधरान् सर्वान् सर्वाभरणभूषितान् । वामोरुन्यस्तहस्तांश्च दक्षहस्ताभयावहान् ॥

(शक्तयोऽपि तथा ध्येया वराभयकराम्बुजाः । स्वस्वप्रियाङ्कनिलयाः सर्वाभरणभूषिताः) ॥

भावयेदिति शेषः । इति ग्रहन्यासः ॥

अथ नक्षत्रन्यासः । ४ अंआं अश्विन्यै नमो भाले । ४ इंईं भरण्यै नमः दक्षनेत्रे । ४ उंऊं कृत्तिकायै नमः वामनेत्रे । ४ ऋंॠंलृंलॄं रोहिण्यै नमः दक्षकर्णे । ४ एं मृगशिरसे नमः वामकर्णे । ४ ऐं आर्द्रायै नमः दक्षनासापुटे । ४ ओंऔं पुनर्वसवे नमः वामनासापुटे । ४ कं पुष्याय नमः कण्ठे । ४ खंगं अश्लेषायै नमः दक्षस्कन्धे । ४ घंङं मघायै नमः वामस्कन्धे । ४ चं पूर्वाफाल्गुन्यै नमः दक्षकूर्परे । ४ छंजं उत्तराफाल्गुन्यै नमः वामकूर्परे । ४ झंञं हस्ताय नमः दक्षमणिबन्धे । ४ टंठं चित्रायै नमः वाममणिबन्धे । ४ डं स्वात्यै नमः दक्षहस्ते । ४ ढंणं विशाखायै नमः वामहस्ते । ४ तंथंदं अनुराधायै नमः नाभौ । ४ धं ज्येष्ठायै नमः दक्षकट्यां । ४ नंपंफं मूलायै नमः वामकट्यां । ४ बं पूर्वाषाढायै नमः दक्षोरौ । ४ भं उत्तराषाढायै नमः वामोरौ । ४ मं श्रवणाय नमः दक्षजानुनि । ४ यंरं धनिष्ठायै नमः वामजानुनि । ४ लं शतभिषायै नमः दक्षजङ्घायां । ४ वंशं पूर्वाभाद्रपदायै नमः वामजङ्घायां । ४ षंसंहं उत्तराभाद्रपदायै नमः दक्षपादे । ४ अंअःळंक्षं रेवत्यै नमः वामपादे ।

ज्वलत्कालानलप्रख्या वरदाभयपाणयः । नतिपाण्योऽश्विनीपूर्वा ध्येया मुक्ताविभूषणाः ॥

दक्षाद्यधःकरयोर्वराभये, ऊर्ध्वयोर्नतिमुद्रे । इत्यायुधध्यानम् । इति नक्षत्रन्यासः ॥

अथ योगिनीन्यासः (१) विशुद्धस्थाने षोडशदलकमलकर्णिकायां ४ डांडींडूं डमलवरयूं डाकिनि मां रक्ष २ मम त्वग्धातुं रक्ष २ सर्वसत्त्ववशंकरि देव्यागच्छागच्छ इमां पूजां गृह्ण २ ऐं घोरे देवि ह्रीँसः परमघोरे हूं घोररूपे एह्येहि नमः चामुण्डे डरलकसहैं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि नमः अं १६ विशुद्धपीठस्थे विशुद्धडाकिनी विशुद्धानाथदेवयुग्मश्रीपादुकां पूजयामि नमः। इत्यंगुष्ठानामिकाभ्यां विन्यस्य, तद्दलेषु ४ अं अमृतायै नमः । एवं आं आकर्षिण्यै । इं इन्द्राण्यै । ईं ईशान्यै । उं उमायै । ऊं ऊर्ध्वकेश्यै । ऋं ऋषायै । ॠं ॠषायै । लृं लृकारायै । ॡं ॡषायै । एं एकपादायै । ऐं ऐश्वर्यात्मिकायै । ओं ओंकारिण्यै । औं औषधात्मिकायै । अं अम्बिकायै । अः अक्षरात्मिकायै । इति प्रादक्षिण्येन विन्यस्य ध्यायेत् ।

ग्रीवाकूपे विशुद्धे नृपदलकमले रक्तवर्णां त्रिनेत्रां
सत्खटवाङ्गं त्रिशूलं चषकमपि महाचर्म संधारयन्तीम् ।
वक्त्रेणैकेन युक्तां पशुजनभयदां पायसान्ने प्रसक्तां
त्वक्स्थां वन्देऽमृताद्यैः परिवृतवपुषं डाकिनीं वीरवन्द्याम् ॥

दक्षोर्ध्वाधः शूलखट्वाङ्गे, वामोर्ध्वाधःखेटचषके । इत्यायुधध्यानम् ।

अथामृतादिशक्तीनां डाकिनीसदृशं वपुः । तत्समानायुधादीनि न्यासपूजनचिन्तने ॥

(२) ततोऽनाहतचक्रे हृदये द्वादशदलकमलकर्णिकायां, ४ रांरींरूं रमलवरयूं राकिणि मां रक्ष २ मम रक्तधातुं रक्ष २ सर्वसत्त्ववशंकरीत्यादि शेषं समानं । कं १२ अनाहतपीठस्थे अनाहतराकिणि अनाहतनाथ-देवयुग्मश्रीपादुकां पूजयामि नमः । इति विन्यस्य, तद्दलेषु ४ कं कालरात्र्यै नमः । एवं खं खातीतायै । गं गायत्र्यै । घं घण्टाधारिण्यै । ङं ङार्णात्मिकायै । चं चण्डायै । छं छायायै । जं जयायै । झं झांकारिण्यै । ञं ञार्णात्मिकायै । टं टंकहस्तायै । ठं ठंकारिण्यै । इति विन्यस्य ध्यायेत् । अथ ध्यानम्—

हृत्पद्मे भानुपत्रे द्विवदनविलसद्दंष्ट्रिणीं श्यामवर्णा-
मक्षं शूलं कपालं डमरुमपि भुजैर्धारयन्तीं त्रिनेत्राम् ।
रक्तस्थां कालरात्रिप्रभृतिपरिवृतां शुद्धभक्ते प्रसक्तां
श्रीमद्वीरेन्द्रवन्द्यामभिमतफलदां भावयेद्राकिणीं ताम् ॥

दक्षाधःकरमारभ्य दक्षोर्ध्वकरपर्यन्तमायुधध्यानम् ।

कालरात्र्यादिका रक्ताश्चतुर्हस्ता नमस्क्रियाम् । द्वाभ्यां भुजाभ्यां दधतीर्द्वाभ्यां हेतिद्वयं क्रमात् ॥
कपालासी वराभीति पुस्तकाक्षरमालिके । घण्टाखङ्गौ सृणिगुणौ खङ्गखेटौ वराभये ॥
कदलीकलशौ शूलवेतालौ वरदाभये । कुठारहरिणौ पश्चात् त्रिशूलडमरू अपि ॥

(३) मणिपूरकचक्रे नाभौ दशदलकमलकर्णिकायां, ४ लांलींलूं लमलवरयूं लाकिनि मां रक्ष २ मम मांसधातुं रक्ष २ सर्वसत्त्ववशंकरि–इत्यादि शेषं प्राग्वत्, डं १० मणिपूरकपीठस्थे मणिपूरकलाकिनि मणिपूरकनाथदेवयुग्मश्रीपादुकां पूजयामि नमः । इति विन्यस्य, तद्दलेषु ४ डं डामर्यै नमः । एवं ढं ढंकारिण्यै० । णं णकारिण्यै० । तं तामस्यै । थं स्थापिन्यै० । दं दाक्षायण्यै० । धं धात्र्यै० । नं नन्दायै० । पं पार्वत्यै० । फं फट्कारिण्यै० । इति विन्यस्य ध्यायेत् ।

नाभौ दिक्पत्रपद्मे त्रिवदनविलसत्त्रीक्षणां कृष्णवर्णां
शक्तिं दम्भोलिदण्डौ वरदमपि भुजैर्धारयन्तीं महोग्राम् ।
डामर्याद्यैश्च वीतां पशुजनभयदां मांसधात्वेकनिष्ठां
गौडान्ने सक्तचित्तां सकलसुखकरीं संस्मरेल्लाकिनीं ताम् ॥

लाकिन्याः कथितायास्तु दशसंख्या मरीचयः । कपालशूलधारिण्यः कृष्णाश्च नतिसंयुताः ॥
किरीटहारकेयूरकाञ्चीनूपुरभूषिताः ।···· ···· ···· ···· ···· ····॥

(४) स्वाधिष्ठानचक्रे षड्दलकमलकर्णिकायां ४ कांकींकूं कमलवरयूं काकिनि मां रक्ष २ मम मेदोधातुं रक्ष २ शेषं पूर्ववत्, बं ६ स्वाधिष्ठानपीठस्थे स्वाधिष्ठानकाकिनि स्वाधिष्ठाननाथदेवयुग्मश्री० इति विन्यस्य, तद्दलेषु ४ वं बन्धिन्यै नमः । एवं भं भद्रकाल्यै० । मं मायायै० । यं यशस्विन्यै० । रं रक्षायै० । लं लम्बोष्ठ्यै० । इति विन्यस्य ध्यायेत् ।

स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां
पीताभां धारयन्तीं त्रिशिखसृणिकपालाभयान्यात्तगर्वाम् ।
मेदोधातुप्रतिष्ठामलिमदमुदितां बन्धिनीत्यादिवीतां
दध्यन्ने सक्तचित्तामभिमतफलदां काकिनीं भावयेत्ताम् ॥

दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तमायुधध्यानम् । "बन्धिन्याद्यास्तु पीताभा वराभीनतिसंयुताः" ॥

(५) मूलाधारचक्रे चतुर्दलकमलकर्णिकायां, ४ सांसींसूं समलवरयूं साकिनि मां रक्ष २ मम अस्थिधातुं रक्ष २ शेषं प्राग्वत्, वंशंषंसं मूलाधारपीठस्थे मूलाधारसाकिनि मूलाधारनाथदेवयुग्मश्री० इति विन्यस्य, तद्दलेषु ४ वं वरदायै नमः । एवं शं श्रियै० । षं षण्डायै० । सं सरस्वत्यै० । इति विन्यस्य ध्यायेत् ।

मूलाधारस्थपद्मे श्रुतिदललसिते पञ्चवक्त्रां त्रिनेत्रां
स्वर्णाभामस्थिसंस्थां सृणिमपि कमलं पुस्तकं ज्ञानमुद्राम् ।
बिभ्राणां बाहुदण्डैः सुललितवरदाद्याभिवीतां मनोज्ञां
मुद्गान्ने सक्तचित्तां मधुमदमुदितां भावयेत् साकिनीं ताम् ।

रक्तपीतासितेश्वेताश्चतस्रो वरदादयः । नत्यक्षमालावरदैर्विराजितचतुर्भुजाः ॥

(६) भ्रूमध्ये आज्ञाचक्रे द्विदलकमलकर्णिकायां, ४ हां हीं हूं हमलवरयूं हाकिनि मां रक्ष २ मम मज्जाधातुं रक्ष २ सर्वसत्त्वेति प्राग्वत्, हं क्षं आज्ञापीठस्थे आज्ञाहाकिनि आज्ञानाथदेवयुग्मश्री० इति विन्यस्य, तद्दलयोः ४ हं हंसवत्यै नमः । ४ क्षं क्षमावत्यै नमः । इति विन्यस्य ध्यायेत् ।

भ्रूमध्ये विन्दुपद्मे द्विदलसुललिते शुक्लवर्णां कराब्जै-
र्बिभ्राणां ज्ञानमुद्रां डमरुकसहितामक्षमालां कपालम् ।
षड्वक्त्रां मज्जसंस्थां त्रिनयनलसितां हंसवत्यादियुक्तां
हारिद्रान्ने प्रसक्तां सकलसुखकरीं हाकिनीं भावयेत्ताम् ॥

दक्षाद्यूर्ध्वयोराद्ये, तदधःस्थयोरग्ये । इत्यायुधध्यानम् ।

श्वेता हंसवती ध्येया त्रिशूलवरधारिणी । रक्ता क्षमा वराभीतिनतिमुद्रालसत्करा ॥

(७) ब्रह्मरन्ध्रे सहस्रदलकमलकर्णिकायां, यां यीं यूं यमलवरयूं याकिनि मां रक्ष २ मम शुक्रधातुं रक्ष २ सर्वसत्त्वेत्यादि पूर्ववत्, ४ अं ५० ब्रह्मरन्ध्रपीठस्थे ब्रह्मरन्ध्रयाकिनि ब्रह्मरन्ध्रनाथदेवयुग्मश्री० इति विन्यस्य, तद्दलेषु ४ अं अमृतायै नमः । इत्यादि क्षमावत्यन्तं न्यसेत् । अथ ध्यानम् ।

मुण्डव्योमस्थपद्मे दशशतदलके याकिनीं भैरवीं ताम्
अक्षान्ताढ्यां समस्तायुधलसितकरां सर्ववर्णां समष्टिम् ।
डादीनां सर्ववक्त्रां सकलसुखकरीं सर्वधातुस्थरूपां
सर्वान्ने सक्तचित्तां परशिवरसिकां भावयेत्सर्वरूपाम् ॥

इति योगिनीन्यासः ॥

अथ राशिन्यासः । ४ अं आं इं ईं मेषराशये नमः दक्षपादे । ४ उं ऊं वृषराशये नमः दक्षवृषणे । ४ ऋं ॠं लृं लॄं मिथुनराशये नमः दक्षकुक्षौ । ४ एं ऐं कर्कटराशये नमः दक्षोरसि । ४ ओं औं सिंहराशये नमः दक्षकरे । ४ अं अः शं षं सं हं कन्याराशये नमः दक्षशिरसि । ४ कं ५ तुलाराशये नमः वामशिरसि । ४ चं ५ वृश्चिकाराशये नमः वामकरे । ४ टं ५ धनूराशये नमः वामोरसि । ४ तं ५ मकरराशये नमः वामकुक्षौ । ४ पं ५ कुम्भराशये नमः वामवृषणे । ४ यं रं लं वं ळं क्षं मीनराशये नमः वामपादे ॥

स्वस्वनामसमाकाराः कन्याकुम्भौ समाकृती । क्रमाद् रक्तश्वेतहरित्पाटलाधूम्रपाण्डुराः ॥
चित्रकृष्णस्वर्णपिङ्गकर्पूरस्वच्छकान्तयः । ....॥

इति राशिन्यासः ॥

अथ पीठन्यासः मातृकास्थानेष्वेव । ४ अं कामरूपपीठाय नमः शिरसि । ४ आं वाराणसी० । इं नेपाल० । ईं पौण्ड्रवर्धन० । उं पुरस्थिर० । ऊं कान्यकुब्ज० । ऋं पूर्णगिरि० । ॠं अर्बुद० । लृं आम्रातकेश्वर० । लॄं एकाम्र० । एं तिस्रोतःपी० । ऐं कामकोट० । ओं कैलास० । औं भृगुनगर० । अं केदार० । अः चन्द्रपुर० । कं श्रीपीठ० । खं एकवीर० । गं जालन्धर० । घं मालव० । ङं कुलान्तक० । चं देवीकोट० । छं गोकर्ण० । जं मारुतेश्वर० । झं अट्टहास० । ञं विरज० । टं राजगृह० । ठं महापथ० । डं कोल्हापुर० । ढं फलापुर० । णं ओंकार० । तं जयन्तिका० । थं उज्जयिनी० । दं विचित्रक० । धं क्षीरपुर० । नं हस्तिनापुर० । पं उड्डीश० । फं प्रयाग० । बं विश्वपुर० । भं मायापुर० । मं जलेश्वर० । यं मलयगिरि० । रं श्रीगिरि० । लं मेरुगिरि० । वं गिरिवर० । शं महेन्द्रगिरि० । षं वामनपुर० । सं हिरण्यपुर० । हं महालक्ष्मीपुर० । ळं उड्यान० । क्षं छायाछत्रपीठाय नमः । इति पीठन्यासः ॥

एते पीठाः समादिष्टा मातृकारूपमास्थिताः । एवं षोढा पुरा कृत्वा श्रीचक्रन्यासमाचरेत् ॥
यः षोढान्यस्तगात्रस्तु स स्वयं परमेश्वरः । षोढान्यासविहीनं यं प्रणमेदेष पार्वति ॥
सोऽचिरान्मृत्युमाप्नोति नरकं प्रतिपद्यते । नास्त्यस्य पूज्यो लोकेषु पितृमातृमुखो जनः ॥

(तथा मत्स्यपुराणे—
प्रयागे ललिता देवी विन्ध्ये विन्ध्यवासिनी । वाराणस्यां विशालाक्षी तारा किष्किन्धपर्वते ॥)

इति षोढान्यासः ॥

अथ श्रीचक्रन्यासः ।

श्रीमत्त्रिपुरसुन्दर्याश्चक्रन्यासं शृणु प्रिये । यन्न कस्यचिदाख्यातं तनुशुद्धिकरं परम् ॥

स्वहृत्पीठे विन्दुमये परितस्त्रिकोणे यथाविधि कामकलोक्तप्रकारेण ध्यात्वा, तत्र देवीं मानसोपचारैः सम्पूज्य, वाङ्मायाकमलाबीजान्ततो बालां समुद्धरेत् । ऐं ह्रीं श्रीं ऐं क्लीं सौं समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनीश्रीपादुकाभ्यो नमः । इति त्रिधा व्यापकं कृत्वा, आत्मानं कामकलास्वरूपमेव भावयन् चक्रन्यासं कुर्यात् । ४ त्रैलोक्यमोहनचक्राय नमः, चतुरस्राद्यरेखायै नमः, इति सर्वाङ्गे व्यापकं । ४ अणिमासिद्धिश्रीपादुकां पूजयामि नमः दक्षांसपृष्ठे । ४ लघिमासिद्धि० दक्षकराग्रे । ४ महिमासिद्धि० दक्षजानुनि । ४ ईशित्वसिद्धि० दक्षपादाग्रे । ४ वशित्वसिद्धि० वामपादाग्रे । ४ प्राकाम्यसिद्धि० वामजानुनि । ४ भुक्तिसिद्धिश्री० वामकराग्रे । ४ इच्छासिद्धि० वामांसपृष्ठे । ४ रससिद्धि० शिरसि । ४ मोक्षसिद्धि० शिरःपृष्ठे । इति सिद्धिदशकं विन्यस्य, चतुरस्रमध्यरेखायै नमः, इति व्यापकं कृत्वा, ४ आं ब्राह्माणीश्री० पादांगुष्ठयोः । ४ ईं माहेश्वरीश्री० दक्षपार्श्वे । ४ ऊं कौमारीश्री० शिरसि । ४ ॠं वैष्णवीश्री० वामपार्श्वे । ४ ॄं वाराहीश्री० वामजानुनि । ४ ऐं इन्द्राणीश्री० दक्षजानुनि । ४ औं चामुण्डाश्री० दक्षांसे । ४ अंः महालक्ष्मीश्री० वामांसे । चतुरस्रान्तरेखायै नमः, इति व्यापकं कृत्वा, ४ द्रां सर्वसंक्षोभिणीमुद्राशक्ति

श्री० पादांगुष्ठद्वये । द्रीं सर्वविद्राविणीमुद्राशक्तिश्री० दक्षपार्श्वे । क्लीं सर्वाकर्षिणीमुद्राशक्तिश्री० शिरसि । ब्लूं सर्ववशंकरीमुद्राशक्तिश्री० वामपार्श्वे । सः सर्वोन्मादिनीमुद्राशक्तिश्री० वामजानुनि । क्रों सर्वमहांकुशा-मुद्राशक्तिश्री० दक्षजानुनि । हसखफ्रें सर्वखेचरीमुद्राशक्तिश्री० दक्षांसे । ऐं क्लीं सौः सर्वत्रिखण्डामुद्राशक्तिश्री० वामांसे । हसौ सर्वबीजमुद्राशक्तिश्री० शिरसि । ऐं सर्वयोनिमुद्राशक्तिश्री० पादयोः । एवं विन्यस्य, ४ अं आं सौः त्रिपुराचक्रेश्वरीनित्याश्रीपादुकां पू० । इति हृदये विन्यस्य, एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजितास्तुष्टाः सन्तु । द्रामिति सर्वसंक्षोभिणीमुद्रां प्रदर्शयेत् । इति प्रथमावरणन्यासः ॥

अथ द्वितीयावरणन्यासः । ४ सर्वाशापूरकचक्राय नमः । ४ षोडशदलकमलचक्राय नमः । इति व्यापकं विन्यस्य, ४ अं कामाकर्षिणीनित्याकलाश्री० दक्षश्रोत्रपृष्ठे । ४ आं बुद्ध्याकर्षिणीनित्या० दक्षांसपृष्ठे । ४ इं अहंकाराकर्षिणीनित्या० दक्षकुर्परे । ४ ईं शब्दाकर्षिणीनित्या० दक्षकरपृष्ठे । ४ उं स्पर्शाकर्षिणीनित्या० दक्षोरौ । ४ ऊं रूपाकर्षिणीनित्या० दक्षजानौ । ४ ऋं रसाकर्षिणीनित्या० दक्षगुल्फे । ४ ॠं गन्धाकर्षिणी-नित्या० दक्षपादे । ४ लृं चित्ताकर्षिणीनित्या० वामपादे । ४ ॡं धैर्याकर्षिणीनित्या० वामगुल्फे । ४ एं स्मृत्याकर्षिणीनित्या० वामजानुनि । ४ ऐं नामाकर्षिणीनित्या० वामोरौ । ४ ओं बीजाकर्षिणीनित्या० वाम-करपृष्ठे । ४ औं आत्माकर्षिणीनित्या० वामकुर्परे । ४ अं अमृताकर्षिणीनित्या० वामांसे । ४ अः शरीरा-कर्षिणीनित्या० वामश्रोत्रपृष्ठे । एवं विन्यस्य, ४ ऐंक्लींसौःत्रिपुरेशीचक्रेश्वरीश्री० इति विन्यस्य, एता गुप्त-योगिन्यः सर्वाशापूरके समुद्रा इत्यादिना समर्प्य द्रीमिति सर्वविद्राविणीमुद्रां प्रदर्शयेत् । इति द्वितीयावरणम् ॥

अथ तृतीयावरणन्यासः । ततः ४ सर्वसंक्षोभणचक्राय नमः । ४ अष्टदलचक्राय नमः । इति व्यापकं कृत्वा, ४ कं ५ अनङ्गकुसुमादेवीश्री० दक्षशङ्खे । ४ चं ५ अनङ्गमेखलादेवी० दक्षजानौ । ४ ट ५ अनङ्गमना देवी० दक्षोरौ । ४ तं ५ अनङ्गमदनातुरादेवी० दक्षगुल्फे । ४ पं ५ अनङ्गरेखादेवी० वामगुल्फे । ४ यं ४ अनङ्गवेगिनीदेवी० वामोरौ । ४ शं ४ अनङ्गांकुशादेवी० वामजानौ । ४ लक्षं अनङ्गमालिनीदेवी० वामशङ्खे । एवं विन्यस्य, ४ ह्रींक्लींसौः त्रिपुरसुन्दरीचक्रेश्वरीनित्याश्री० इति हृदये विन्यस्य, एता गुप्ततरयोगिन्यः सर्वसंक्षोभकारके चक्रे समुद्रा इत्यादिना समर्प्य क्लीमित्याकर्षिणीमुद्रां प्रदर्शयेत् । इति तृतीयावरणम् ॥

अथ चतुर्थावरणन्यासः । ततः ४ सर्वसौभाग्यदायकचतुर्दशारचक्राय नमः इति व्यापकं कृत्वा, ४ अं सर्वसंक्षोभिणीशक्तिश्री० दक्षभागशिरःपृष्ठे । ४ इं सर्वविद्राविणीशक्तिश्री० दक्षललाटे । ४ उं सर्वाकर्षिणी-शक्ति० दक्षगण्डस्थले । ४ ऋं सर्वाह्लादिनीशक्ति० दक्षांसे । ४ लृं सर्वसम्मोहिनीशक्ति० दक्षपार्श्वे । ४ एं सर्वस्तम्भिनीशक्ति० दक्षोरौ । ४ ऐं सर्वजृम्भिणीशक्ति० दक्षजङ्घायां । ४ ओं सर्ववशंकरीशक्ति० वामजङ्घायां । ४ औं सर्वरञ्जिनीशक्ति० वामोरौ । ४ हं सर्वोन्मादिनीशक्ति० वामपार्श्वे । ४ य सर्वार्थसाधनीशक्ति० वामांसे । ४ रं सर्वसपत्प्रपूरणीशक्ति० वामगण्डस्थले । ४ लं सर्वमन्त्रमयीशक्ति० वामललाटे । ४ वं सर्वद्वन्द्व-क्षयंकरीशक्ति० वामभागशिरःपृष्ठे । इति विन्यस्य, ४ हैं क्लीं हसौः श्रीत्रिपुरवासिनीचक्रेश्वरीनित्याश्री० । इति विन्यस्य, एताः सम्प्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्रा इत्यादिना समर्प्य ब्लूं इति सर्ववशंकरी मुद्रां प्रदर्शयेत् । इति चतुर्थावरणन्यासः ॥

अथ पञ्चमावरणन्यासः । ततः ४ सर्वार्थसाधकबहिर्दशारचक्राय नमः इति व्याप्य, ४ तं सर्वसिद्धि-प्रदा० दक्षनेत्रे । ४ थं सर्वसम्पत्प्रदा० नासामूले । ४ दं सर्वप्रियङ्करी० वामनेत्रे । ४ धं सर्वमङ्गलकारिणी० कुक्षिपूर्वे । ४ नं सर्वकामप्रदा० कुक्षिवायव्ये । ४ टं सर्वदुःखविमोचिनी० वामजानुनि । ४ ठं सर्वमृत्युप्रश-मनी० दक्षजानुनि । ४ डं सर्वविघ्ननिवारिणी० गुदे । ४ ढं सर्वाङ्गसुन्दरी० कुक्षिनैर्ऋते । ४ णं सर्वसौभाग्य-दायिनी० कुक्ष्याग्नेये । ४ हसैं हसक्लीं हसौः त्रिपुराश्रीचक्रेश्वरीश्री० इति हृदि विन्यस्य, एताः कुलकौलयोगिन्यः

सर्वार्थसाधके चक्रे समुद्रा इत्यादिना समर्प्य सः इति सर्वोन्मादिनीमुद्रां प्रदर्शयेत् । इति पञ्चमावरणन्यासः ॥

अथ षष्ठावरणन्यासः । ४ सर्वरक्षाकरान्तर्दशारचक्राय नमः इति व्यापकं कृत्वा, ४ चं सर्वज्ञादेवीश्री॰ दक्षनासिकायां । ४ छं सर्वशक्तिदेवीश्री॰ दक्षसृक्विणि । ४ जं सर्वैश्वर्यप्रदादेवी॰ दक्षस्तने । ४ झं सर्वज्ञानमयीदेवी॰ दक्षवृषणे । ४ ञं सर्वव्याधिविनाशिनीदेवी॰ सीवन्यां । ४ कं सर्वाधारस्वरूपादेवी॰ वामवृषणे । ४ खं सर्वपापहरादेवी॰ वामस्तेन । ४ गं सर्वानन्दमयीदेवी॰ वामसृक्विणि । ४ घं सर्वरक्षास्वरूपिणीदेवी॰ वामनासिकायां । ४ ङं सर्वेप्सितफलप्रदादेवी॰ नासाग्रे । ४ ह्रींक्लींब्लें त्रिपुरमालिनीचक्रेश्वरीनित्याश्री॰ इति हृदि । एता निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्रा इत्यादिना व्याप्य (समर्प्य) क्रोमिति सर्वमहांकुशामुद्रां प्रदर्शयेत् । इति षष्ठावरणन्यासः ॥

अथ सप्तमावरणन्यासः । ततः ४ सर्वरोगहराष्टारचक्राय नमः इति व्याप्य, ४ अं १६ ब्लूं वशिनीवाग्देवताश्री॰ दक्षचिबुके । ४ कं ५ कलह्रीं कामेश्वरीवाग्देवाताश्री॰ दक्षकण्ठे । ४ चं ५ नवलीं मोदिनीवाग्देवताश्री॰ दक्षहृदि । ४ टं ५ य्लूं विमलावाग्देवताश्री॰ नाभिदक्षिणे । ४ तं ५ ज्म्रीं अरुणावाग्देवताश्री॰ नाभिवामे । ४ पं ५ हसलवयूं जयिनीवाग्देवता॰ हृद्वामे । ४ यं ४ झमरयूं सर्वेश्वरीवाग्देवता॰ वामकण्ठे । ४ शं ४ क्षमरीं कौलिनीवाग्देवता॰ वामचिबुके । ४ ह्रींश्रींसौः त्रिपुरासिद्धाचक्रेश्वरीनित्याश्री॰ इति हृदये । एता रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादिना समर्प्य हसखफ्रें इति खेचरीमुद्रां प्रदर्शयेत् । इति सप्तमावरणन्यासः ॥

अथाष्टमावरणन्यासः । ततः ४ सर्वसिद्धिप्रदान्तरालचक्राय नमः इति व्याप्य, ४ द्रांद्रींक्लींब्लूंसः यांरांलांवांशां जं जृम्भणकामेश्वरकामेश्वरीबाणेभ्यो नमः हृदयाग्रे । ४ धांधां मोहनकामेश्वरकामेश्वरीधनुर्भ्यां नमः हृदयेशाने । ४ आंह्रीं वशीकरणकामेश्वरकामेश्वरीपाशाभ्यां नमः हृदयनैर्ऋते । ४ क्रोंक्रों स्तम्भनकामेश्वरकामेश्वरीअंकुशाभ्यां नमः हृदयवायव्ये । ४ अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मके जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मकरुद्रात्मकशक्तिश्रीकामेश्वरीदेवीश्री॰ हृदि त्रिकोणाग्रे । ४ सूर्यचक्रे जालन्धरपीठे षष्ठेशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्ण्वात्मकशक्तिश्रीवज्रेश्वरीदेवीश्री॰ हृदयदक्षिणे । ४ सोमचक्रे पूर्णगिरिगह्वरे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मकशक्तिश्रीभगमालिनीदेवीश्री॰ हृत्त्रिकोणवामभागे । हस्रैं हसकलरीं हस्रौः त्रिपुराम्बाचक्रेश्वरीनित्याश्री॰ इति हृदये विन्यस्य, एता अतिरहस्ययोगिन्यः सर्वसिद्धिमये चक्रे समुद्रा इत्यादिना समर्प्य हस्रौं इति सर्वबीजमुद्रां प्रदर्शयेत् । इति अष्टमावरणन्यासः ॥

ततो नवमावरणन्यासः । ततः ४ सर्वानन्दमयबैन्दवचक्राय नमः इति व्यापकं विन्यस्य, तारत्रयबालाश्रीविद्यामुच्चार्य ब्रह्मचक्रे श्रीमदुड्याणपीठे चर्यानन्दनाथात्मके तुरीयदशाधिष्ठायके ब्रह्मशक्त्यात्मकपरब्रह्मात्मकशक्तिश्रीमहात्रिपुरसुन्दरीदेवीश्री॰ इति मध्ये । ४ हसकलरडैं हसकलरडीं हसकलरडौः श्रीमहात्रिपुरभैरवीचक्रेश्वरीनित्याश्री॰ इति हृदये विन्यस्य, एषा परापररहस्ययोगिनी सर्वानन्दमये बैन्दवे चक्रे (सर्वचक्रेश्वरी—सर्वमन्त्रेश्वरी सर्वपीठेश्वरी सर्वविद्येश्वरी सर्ववागीश्वरी सर्वसिद्धीश्वरी सर्वजगदुपत्तिमातृका) सचक्रमुद्रा ससिद्धिका सायुधा सवाहना सशक्तिका सालङ्कारा सपरिवारा सर्वोपचारैः सम्पूजिता तुष्टा भवतु इति समर्प्य ऐं इति योनिमुद्रां प्रदर्शयेत् । इति नवमावरणन्यासः ॥ इति श्रीचक्रन्यासः । एवमेतावत्—करणाशक्तौ प्रागुक्तश्रीचक्रन्यासकवचं पठेत् । अयं तु संहारक्रमः ॥ तथा, बिन्दुचक्रादिचतुरस्रान्तरेखान्तं न्यसेदिति सृष्टिक्रमः ॥

अथ स्थितिश्रीचक्रन्यासः । स च त्रिद्याचक्रचक्रेश्वरीत्यङ्गत्रयात्मकः सम्प्रदायात् । तत्र प्राग्वत् करशोधनविद्यया करशुद्धिं विधाय आत्मरक्षाविद्ययात्मरक्षां कृत्वा, श्रीमहात्रिपुरसुन्दरीरूपमात्मानं ध्यात्वा

स्थितिन्यासं समाचरेत् । तत्रादौ विद्यान्यासः ।

मूर्ध्नि गुह्ये च हृदये नेत्रत्रितय एव च । कर्णयोर्युगले देवि मुखे च भुज एव च ॥
पृष्ठे जान्वोश्च नाभौ च मूलविद्यां न्यसेत् क्रमात् ।.... ....॥

इति कूटाक्षरभेदेन व्यस्ताव्यस्तां मूलविद्यां न्यसेत् । ४ वाग्भवकूटाय नमः मूर्ध्नि । ४ कामराजं गुह्ये । एवं शक्तिकूटं हृदये, वाग्भवं दक्षनेत्रे, कामराजं वामनेत्रे, शक्तिकूटं भालनेत्रे, वाग्भवं दक्षकर्णे, कामराजं वामकर्णे, शक्तिकूटं मुखे, वाग्भवं दक्षभुजे, कामराजं वामभुजे, शक्तिकूटं पृष्ठे, वाग्भवं दक्षजानौ, कामराजं वामजानौ, शक्तिकूटं नाभौ, ४ वाग्भवं (समस्तविद्यां) मूर्ध्नि, कामराज एवं गुह्ये एवं प्राग्वत् न्यसेत् । इति कूटन्यासः ॥

अथाक्षरन्यासः । तत्र श्रीविद्यायाः पञ्चदशाक्षराणि एकैकं बिन्द्वन्तं पञ्चदशसु स्थानेषु न्यसेत् । तद्यथा-प्रथमं मूर्ध्नि, द्वितीयं गुह्ये, तृतीयं हृदि, चतुर्थं दक्षनेत्रे, पञ्चमं वामनेत्रे, षष्ठं भालनेत्रे, सप्तमं दक्षकर्णे, अष्टमं वामकर्णे, नवमं मुखे, दशमं दक्षभुजे, एकादशं वामभुजे, द्वादशं पृष्ठे, त्रयोदशं दक्षजानुनि, चतुर्दशं वामजानुनि, पञ्चदशं नाभौ । इत्यक्षरन्यासः ॥ ततः "कण्ठस्थाने प्रविन्यसेन्नित्यामन्त्रांस्तु षोडश" । इति क्रमेण कण्ठे षोडशदलेषु षोडश नित्या न्यसेत् ॥

अथ बालाबीजत्रयेण नवयोनिन्यासं कुर्यात् ।

श्रोत्रयोश्चिबुके देवि शंखास्येषु दृशोर्नसि । अंसद्वये च हृदये विन्यसेत् करकुक्षिषु ॥
जान्वन्धुकुक्षिपादेषु पार्श्वयोर्हृदयाम्बुजे । स्तनद्वये कण्ठदेशे नवयोनीर्न्यसेत् क्रमात् ॥

इति नवयोनिन्यासः ॥

अथ शृङ्खलान्यासः । बालया शृङ्खलान्यासस्तु "शिखायां चिबुके वक्त्रे, वक्त्रे कण्ठे चिबुके, चिबुके हृदये कण्ठे, कण्ठे नाभौ तथा हृदि, हृदि लिङ्गे च नाभौ, च नाभौ (मूलाधारे स्वाधिष्ठाने, स्वाधिष्ठाने ऊर्वोः आधारे, आधारे जानुनोः ऊर्वोः ऊर्वोः) पादे च जानुनोः" । इति शृङ्खलान्यासः ॥ ततो वक्ष्यमाणं "ततः श्रीचक्रमारूढामिति ध्यात्वा" नवमुद्राः प्रदर्श्य अआंसौः नमः पादयोः । ऐंक्लींसौः नमः जङ्घयोः । ह्रींक्लींसौः नमः जान्वोः । हैं हक्लीं हसौः नमः ऊर्वोः । हसैं हसक्लीं हसौः नमः स्फिचो (गुदपार्श्वोः) । ह्रींक्लींब्लें नमः स्वाधिष्ठाने । ह्रींश्रींसौः नमः मूलाधारे । हस्रैं हसकलरीं हस्रौः नमः पूर्वन्यस्तविद्योपरि । हसकलरडैं हसकलरडीं हसकलरडौः नमः सर्वाङ्गे । इति नवचक्रेश्वरीविद्यान्यासः ॥

अथ नवचक्रन्यासः । त्रैलोक्यसम्मोहनचक्राय नमः अकुलपद्मे । (गुदमूलाधारमध्यस्थरक्तसहस्रदलकमलचक्रे) । सर्वाशापरिपूरकचक्राय नमः मूलाधारे । सर्वसंक्षोभणचक्राय नमः स्वाधिष्ठाने । सर्वसौभाग्यदायकचक्राय नमः मणिपूरके । सर्वार्थसाधकचक्राय नमः अनाहते । सर्वरक्षाकरचक्राय नमः विशुद्धे । सर्वरोगहरचक्राय नमः लम्बिकापद्मे । सर्वसिद्धिप्रदचक्राय नमः भ्रूमध्ये । सर्वानन्दमयचक्राय नमः ब्रह्मरन्ध्रे । एतेषु स्थानेषु प्रागुक्तनवचक्रेश्वरीर्न्यसेत ॥ इति स्थितिश्रीचक्रन्यासः ।

अथाष्टाष्टकन्यासः । ४ प्रयागक्षेत्रे वेसिनीपुर्यां कामरूपपीठे वटवृक्षे पद्ममुद्रायां व्योममण्डले मेरुसन्तानावल्यां आंक्षां मङ्गलाम्बायै नमः, अंक्षं मङ्गलनाथाय, आंक्षां ब्रह्माण्यै, अंक्षं असिताङ्गभैरवाय, कं ५ सर्वद्वीपनाथाय सर्वद्वीपनाथाम्बायै मम त्वगाधारचक्रे दिव्यक्रीडारतां पूजयामि घोरेऽघोरे अमोघे वरदे विच्चे नमः इत्याधारचक्रे विन्यस्य, परितोऽष्टदलेषु ४ क्षंक्षां अक्षोभ्यां नमः, क्षिंक्षीं रूक्षकर्णाभ्यां नमः, क्षुंक्षूं राक्षसाभ्यां नमः क्षृंक्षॄं क्षपणाभ्यां नमः, क्ष्लृंक्ष्लॄं क्षपाभ्यां नमः, क्षेंक्षैं पिङ्गलाक्षीभ्यां नमः, क्षोंक्षौं अक्षयाभ्यां नमः, क्षंक्षः क्षमाभ्यां नमः, इत्याधारे ॥

४ वाराणसीक्षेत्रे शौण्डिनीपुर्यां मलयगिरिपीठे श्लेष्मातकवृक्षे लिङ्गमुद्रायां वायुमण्डले महेन्द्रावल्यां इंलां चर्चिकाम्बायै नमः, इंलं चर्चिकनाथाय, ईंलां माहेश्वर्यै, इंलं रुरुभैरवाय, चं ५ सर्वद्वीपनाथाय सर्वद्वीपनाथाम्बायै मम रक्तनितम्बचक्रे दिव्यक्रीडारतां पूजयामि इति पद्मकर्णिकायां घोरेऽघोरे वरदे विच्चे नमः इति सर्वत्र, नितम्बचक्रे पद्मदलेषु ३ लंलां लीलाभ्यां नमः, लिलीं लोलाभ्यां नमः, लुंलूं—लुत्थाभ्यां नमः, लृंलॄं लृताभ्यां नमः, ल्लृंल्लॄं ल्लृताभ्यां नमः, लेंलैं लङ्केश्वराभ्यां नमः, लोंलौं लोलसाभ्यां नमः, लंलः विमलाभ्यां नमः, इति नितम्बे ॥

४ कौलापुरीक्षेत्रे कैवर्तिनीपुर्यां पूर्णगिरिपीठे उडम्बरवृक्षे सुरभिमुद्रायां वह्निमण्डले चन्द्रशिलातलावल्यां ऊंहां योगीशाम्बायै नमः, उंहं योगीशनाथाय, ऊंहां कौमार्यै उंहुं चण्डभैरवाय, टं ५ सर्वद्वीपेत्यादि मम मांसचक्रे नाभिस्थाने दिव्यक्रीडारतां पूजयामीति नाभिपद्मकर्णिकायां विन्यस्य, तद्दलेषु ३ हंहां हुताशनाभ्यां नमः, हिंहीं विशालाक्षीभ्यां नमः, हुंहूं वाडवामुखीभ्यां नमः हृंहॄं हर्षाभ्यां नमः, ह्लृंह्लॄं हारयाभ्यां नमः, हेंहैं महाक्रोधाभ्यां नमः, होंहौं क्रोधिनीभ्यां नमः, हंहः स्वरयाभ्यां नमः, इति नाभौ ॥

४ अट्टहासक्षेत्रे कुटिनीपुर्यां कुलान्तकपीठे अश्वत्थवृक्षे क्षोभिणीमुद्रायां सलिलमण्डले शांबरभेदावल्यां ऋंसां हरसिद्धाम्बायै नमः, ऋंसं हरसिद्धनाथाय, ऋंसां वैष्णव्यम्बायै, ऋंसं क्रोधभैरवनाथाय, तं ५ सर्वद्वीपेत्यादि मम स्नायुचक्रे हृदयस्थाने दिव्यक्रीडारतां पूजयामि इति हृदयचक्रकर्णिकायां विन्यस्य, तद्दलेषु ३ संसां संख्यापीठसिद्धाभ्यां नमः, सिंसीं तरलाभ्यां नमः, सुंसूं ताराभ्यां नमः, सृंसॄं हृष्टाभ्यां नमः, स्लृंस्लॄं हृल्लेखाभ्यां नमः, सेंसैं दशकन्दराभ्यां नमः, सोंसौं सारसाभ्यां नमः, संसः रससंग्राहिणीभ्यां नमः, इति हृदये ॥

४ जयन्तिकाक्षेत्रे गण्डकीपुर्यां चौहारपीठे विभीतकवृक्षे द्राविणीमुद्रायां पृथिवीमण्डले अम्बरयोगावल्यां लॄंषां भद्राम्बायै नमः, लृंषं भद्रनाथाय लॄंषां वाराह्यै, लृंषं उन्मत्तनाथाय, पं ५ सर्वद्वीपेत्यादि मम अस्थिचक्रस्थाने कण्ठे दिव्यक्रीडारतां पूजयामि इति कण्ठपद्मकर्णिकायां, तद्दलेषु षंषां तालजङ्घाभ्यां नमः, षिंषीं रक्ताक्षीभ्यां, षुंषूं विद्युज्जिह्वाभ्यां, षृंषॄं करङ्काभ्यां, ष्लृंष्लॄं मेघनादाभ्यां, षेंषैं प्रचण्डौघाभ्यां, षोंषौं कालकर्णाभ्यां, षंषः बलप्रदाभ्यां, इति कण्ठे ॥

४ चारित्रक्षेत्रे रजनीपुर्यां जालन्धरपीठे निम्बवृक्षे अंकुशमुद्रायां अग्निमण्डले कुलिशभेदावल्यां ऐंशां किलिकिलाम्बायै नमः, एंशं किलिकिलिनाथाय, ऐंशां इन्द्राण्यै, एंशं कपालिभैरवाय, यं ४ सर्वद्वीपेत्यादि मम मज्जस्थचक्रे मुखस्थाने दिव्यक्रीडारतां पूजयामि इति मुखपद्मकर्णिकायां, तद्दलेषु शंशां शम्पाभ्यां, शिंशी चम्पावतीभ्यां, शुंशूं प्रवायाभ्यां, शृंशॄं शूलसादिकाभ्यां, श्लृंश्लॄं पिचुवक्त्राभ्यां, शेंशैं पिशाचाक्षीभ्यां, शोंशौं पिशिताशनाभ्यां, शंशः लोलुपाभ्यां, इति मुखे ॥

४ एकाम्रक्षेत्रे शिल्पिनीपुर्यां उड्यानपीठे करञ्जवृक्षे लेलिहानमुद्रायां व्यापिकामण्डले रक्तवर्णावल्यां औंवां कालरात्र्यम्बायै नमः, ओंवं कालरात्रिनाथाय, औंवां चामुण्डायै, ओंवं भीषणभैरवनाथाय, शंषसंहं सर्वद्वीपेत्यादि मम शुक्रचक्रे नासापुटस्थाने दिव्यक्रीडारतां पूजयामीति नासापुटकर्णिकायां, तद्दलेषु वंवां वामनासाभ्यां, विंवीं वानराभ्यां, वुंवूं वासनाभ्यां, वृंवॄं विकटास्याभ्यां, व्लृंव्लॄं वायुवेगाभ्यां, वेंवैं वृहत्कलाभ्यां, वोंवौं विकनाभ्यां, वंवः विश्वरूपिणीभ्यां, इति नासिकायाम् ॥

४ देवीकोटक्षेत्रे सटीनापुर्यां देवीकोटपीठे कदम्बवृक्षे भेकिमुद्रायां शिवमण्डले लम्पटावल्यां अःयां विभीषकाम्बायै नमः, अंयं विभीषकनाथाय, अःयां महालक्ष्म्यै, अंयं संहारभैरवाय, लंक्षं सर्वद्वीपेत्यादि मम क्रोधललाटचक्रे दिव्यक्रीडारतां पूजयामीति ललाटपद्मकर्णिकायां, तद्दलेषु यंयां यमजिह्वाभ्यां, यिंयीं जयन्तीभ्यां, युंयूं दुर्जयाभ्यां, यृंयॄं यमान्तकाभ्यां, य्लृंय्लॄं विडालाभ्यां, येंयैं रेवतीभ्यां, योंयौं पूतनाभ्यां, यंयः विजयाभ्यां नमः, इति ललाटे ॥ "शान्तिके पौष्टिके चैव कुर्यादष्टाष्टकं बुधः" ॥ इत्ययं न्यासः काम्यः ॥

अथ वशिन्याद्यष्टकन्याञ्चक्रन्यासेऽवलोक्यः (पृ० ७२७)

शिरोललाटभ्रूमध्यकण्ठहृन्नाभिगुह्यके। आधारे व्यूहके चैव वशिन्याद्यष्टकं न्यसेत्॥

इति तथाक्रमं न्यसेदिति॥ अथ भूषणन्यासः। ४ अं शिरसि, आं भाले, इंईं भ्रूयुगे, उंऊं कर्णयुगे, ऋंॠं नेत्रयोः, लृं नासिकायां, लॄंएंऐं गण्डयोः, ओष्ठयोः, औंअं दन्तपङ्क्तौ, अः मुखे, कं चिबुके, खं गले, गं कण्ठे, घङं पार्श्वयोः, चं स्तनयुग्मे, छंजं दोर्मूलयोः, झंञं कुर्परयोः, टंठं पाण्योः, डं पाणिपृष्ठे, ढं नाभौ, णं गुह्ये, तंथं ऊर्वोः, दंधं जान्वोः, नंपं जङ्घयोः, फंबं स्फिचोः, भंमं पादतलयोः, यंरं पादाङ्गुष्ठयोः, लं कण्ठके, वं काञ्च्यां, शं ग्रैवेये, षं मुकुटे, सं हं कर्णकुण्डलयोः, ळं हृदये, क्षं गुह्याधः, त्रिनारादिनमोऽन्तः॥

अथ षडङ्गन्यासः। ४ ऐं वदवद वाग्वादिनि ऐं हृदयाय नमः, ४ क्लीं क्लिन्ने क्लेदिनि क्लेदय २ महाक्षोभं कुरु क्लीं शिरसे स्वाहा, ४ सौः मोक्षं कुरु २ ह्सौः शिखायै वषट्, पुनस्तैरेव कवचनेत्रास्त्रेषु न्यसेत्।

अथ श्रीविद्याबीजैस्तत्त्वचतुष्टयन्यासः। ४ वाग्भवद्वयमुच्चार्य आत्मतत्त्वाय नमः नाभेरापादान्तं। ४ कामराजद्वयमुच्चार्य विद्यातत्त्वाय नमः हृदो नाभिपर्यन्तं। ४ शक्तिद्वयमुच्चार्य शिवतत्त्वाय नमः शिरसो हृत्पर्यन्तं। ४ समस्तमुच्चार्य सर्वतत्त्वाय नमः सर्वाङ्गे व्यापकं न्यसेत्॥

अथामठन्यासः। अस्यामठन्यासस्य लक्ष्मीनारायण ऋषिः ककुप्छन्दः सर्वजनवशंकरी श्रीमहालक्ष्मीः देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं मम सर्वजनवश्यार्थे न्यासे विनियोगः। ऐं वागीश्वर्यै नमः केशान्ते, ह्रीं पार्वत्यै नमः भ्रूमध्ये, अं अर्कमण्डलाय नमः दक्षनेत्रे, मं वह्निमण्डलाय नमः वामनेत्रे, डं चन्द्रमण्डलाय नमः मुखे, मण्डलीकृत्य तृतीयनेत्रे, श्रीं श्रियै नमः जिह्वाग्रे, स्वां दन्तिन्यै नमः दक्षगण्डे, हां दन्तिन्यै नमः वामगण्डे, आं पाशाय नमः दक्षकर्णे, क्रों अंकुशाय नमः वामकर्णे, क्लीं कामदेवाय नमः चिबुके। एवमेकादशवारं कर्तव्यः। इति अमठन्यासः॥

अथोर्ध्वाम्नायन्यासक्रमः। आदौ महाषोढान्यासस्ततो मन्त्रन्यासः। ऊर्ध्वाम्नायमन्त्रास्तु—

चरणं नवनाथाश्च मूलविद्याश्च षोडश। आधारषट्कं देवेशि संविद्देव्य उदाहृताः॥

तथा—

पञ्चाम्बा नवनाथाश्च मूलविद्याश्च षोडश। षडाधारादिविद्याश्च चरणाद्याः क्रमादिह॥

चरणं विश्रान्तिचरणं शंभुचरणं चेति। अत्रोर्ध्वाम्नाये पञ्चाम्बा दिव्यौघाः, द्विधा नवनाथाः आकाशाख्यनवनाथाः आत्मानन्दादिनवनाथाश्चेति। तत्राकाशाख्याः सिद्धौघाः, परमात्मानन्दद्या मानवौघाः। ते च चरणगुरुपंक्तिमूलविद्याषोडाधारविद्याख्याः चत्वारो मन्त्रन्यासाः। चरणचतुष्टयीत्रयोविंशतिनाथषोडशमूलविद्याः षडाधारविद्याः पाराप्रासाददप्रणवाश्च(?)-इत्येकपञ्चाशदूर्ध्वाम्नायमन्त्राः॥

तत्र प्रथमं महाषोढान्यासः कुलप्रकाशतन्त्रे—

प्रपञ्चो भुवनं मूर्तिर्मन्त्रदैवतमातरः। महाषोढाह्वयो न्यासः सर्वन्यासोत्तमोत्तमः॥

तत्र प्रथमं शिरसि संघट्टमुद्रया ४ हसखफ्रें हसक्षमलवरयूं हंसः शिवः हसौः सोहं हसक्षमलवरयूं अमुकानन्दनाथनिजगुरुश्रीपादुकां पूजयामि, इति श्रीगुरुपादुकामन्त्रं ब्रह्मरन्ध्रे विन्यस्य ध्यायेत्।

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम्।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरे शिरसि हंसगं तदभिधानपूर्वं गुरुम्॥

इति ध्यात्वा, मानसैरुपचारैः सम्पूज्य षडङ्गन्यासं कुर्यात्। तदुक्तं यामले—

ईशतत्पुरुषाघोरवामसद्योभवात्मनः। पञ्चांगुलीषु विन्यस्य मूर्ध्नि वक्त्रेषु विन्यसेत्॥

पराप्रासादबीजेन षडङ्गान्येवमाचरेत् ।···· ···· ···· ···· ···· ····॥

अस्य श्रीपराप्रासादमन्त्रस्य परशंभुः ऋषिः, अव्यक्तागायत्री छन्दः, मन्त्रेश्वरी परा देवता, हसांस्हां बीजं हसींस्हीं शक्तिः हसूंस्हूं कीलकं श्रीपरादेवताप्रसादसिद्धयर्थे विनियोगः । शिरोमुखहृदगुह्यजानुपादेषु विन्यस्य, हसांस्हां हृदयाय नमः इत्यादि करषडङ्गन्यासं कृत्वा, ओंऐंह्रीं श्रीं हसौंस्हौंहौं ईशानाय नमः अगुष्ठयोः । ५ हें तत्पुरुषाय नमः तर्जन्योः । ५ हुं अघोराय नमः मध्यमयो । ५ हिं वामदेवाय नमः अनामिकयोः । ५ हं सद्योजाताय नमः कनिष्ठिकयोः । इति विन्यस्य, ५ हों ईशानाय नमः ऊर्ध्ववक्त्रे, मूर्ध्नि अंगुष्ठेन न्यस्येत् । ५ हैं तत्पुरुषाय नमः पूर्ववक्त्रे, मुखे तर्जन्या । ५ हुं अघोराय नमः दक्षिणवक्त्रे, कर्णप्रदेशे मध्यमया । ५ हिं वामदेवाय नमः उत्तरवक्त्रे, वामकर्णप्रदेशेऽनामिकया । ५ सद्योजाताय नमः पश्चिमवक्त्रे, कन्धरोपरि शिरः पृष्ठाधोभागे कनिष्ठया । इति पञ्चवक्त्रन्यासः ॥

अथ मूर्तिषडङ्गन्यासः । ५ हों ईशानाय हृदयाय नमः । ५ हें तत्पुरुषाय शिरसे स्वाहा । ५ हुं अघोराय शिखायै वषट् । ५ हिं वामदेवाय कवचाय हुं । ५ हं सद्योजाताय नेत्रत्रयाय वौषट् । ५ पञ्चवक्त्राय अस्त्राय फट् ॥

अस्य श्रीमहाषोढान्यासस्य परब्रह्म ऋषिः, जगती छन्दः, शिवशक्त्यात्मस्वरूपी सदाशिवो देवता, न्यासे विनियोगः । मूर्ध्नि वक्त्रे च हृदि ओं नम इति विन्यस्य, ततः पराप्रासादषड्दीर्घैः षडङ्गन्यासं कृत्वा ध्यायेत् ।

पञ्चवक्त्रं चतुर्बाहुं सर्वाभरणभूषितम् । चन्द्रसूर्यसहस्राभं शिवशक्त्यक्षरं भजे ॥
अन्तःषोढां महेशानि कुर्यादुक्तस्य वर्त्मना । ततः कुर्यान्मन्हान्यासं महाषोढाह्वयं परम् ॥
वक्ष्यमाणप्रकारेण देवताभावसिद्धये । यस्य कस्यापि नैवोक्तं तव स्नेहाद्वदाम्यहम् ॥

अथ प्रपञ्चन्यासः । ४ हसौः अं प्रपञ्चरूपायै श्रियै नमः स्हौः श्रींह्रींऐंओं । एवं बीजसम्पुटं सर्वत्र । आं द्वीपरूपायै मायायै । इं अब्धिरूपायै कमलायै । ईं गिरिरूपायै विष्णुवल्लभायै । उं पत्तनरूपायै पद्मधारिण्यै । ऊं पीठरूपायै समुद्रतनयायै । ऋं क्षेत्ररूपायै लोकधात्र्यै । ॠं वनरूपायै कमलवासिन्यै । लृं आश्रयरूपायै इन्दिरायै । ॡं गुहारूपायै मायायै । एं नदीरूपायै रमायै । ऐं चतुररूपायै पद्मायै । ओं उद्भिज्जरूपायै नारायणप्रियायै । औं जरायुजरूपायै राज्यलक्ष्म्यै । अं अण्डजरूपायै नारायण्यै । अः स्वेदजरूपायै सिद्धलक्ष्म्यै । कं लवरूपायै आर्यायै । खं त्रुटिरूपायै उमायै । गं कलारूपायै चण्डिकायै । घं काष्ठारूपायै दुर्गायै । ङं निमेषरूपायै । चं श्वासरूपायै अपर्णायै । छं घटिकारूपायै अम्बिकायै । जं मुहूर्तरूपायै सत्यै । झं प्रहररूपायै ईश्वर्यै । ञं दिवसरूपायै शांभव्यै । टं संध्यारूपायै ईशान्यै । ठं रात्रिरूपायै पार्वत्यै । डं तिथिरूपायै सर्वमङ्गलायै । ढं वाररूपायै । ढं वाररूपायै दाक्षायण्यै । ण नक्षत्ररूपायै हैमवत्यै । तं योगरूपायै महामायायै । थं करणरूपायै माहेश्वर्यै । दं पक्षरूपायै मृडान्यै । धं मासरूपायै रुद्राण्यै । नं राशिरूपायै शर्वाण्यै । पं ऋतुरूपायै परमेश्वर्यै । फं अयनरूपायै काल्यै । बं वत्सररूपायै कात्यायन्यै । भं युगरूपायै गौर्यै । मं प्रलयरूपायै भवान्यै । यं पृथिव्यप्तेजोवाय्वाकाशाख्यपञ्चभूतरूपायै ब्राह्म्यै । रं शब्दस्पर्शरूपरसगन्धतन्मात्ररूपायै वागीश्वर्यै । लं वाक्पाणिपादपायूपस्थाख्यपञ्चकर्मेन्द्रियरूपायै वाण्यै । वं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यपञ्चज्ञानेन्द्रियरूपायै वाक्प्रदायै नमः । शं प्राणापानव्यानोदानसमानाख्यपञ्चप्राणरूपायै गायत्र्यै । षं सत्त्वरजस्तम आख्यगुणत्रयरूपायै सावित्र्यै । सं मनोबुद्धयहंकारचित्ताख्यान्तःकरणचतुष्टयरूपायै सरस्वत्यै । हं जाग्रत्स्वप्नसुषुप्ततुरीयाख्यावस्थाचतुष्टयरूपायै शारदायै । ळं त्वगसृग्मांसमेदोस्थिमज्जाशुक्राख्यसप्तधातुरूपायै भारत्यै । ४ क्षं वातपित्तश्लेष्माख्यदोषत्रयरूपायै विद्यात्मिकायै पञ्चभूतव्यापिकाधीश्वर्यै नमः । इति प्रपञ्चादीनि मातृकास्थानेषु विन्यस्य, ४ आदिक्षान्तमुक्तसकलप्रपञ्चरूपायै पराम्बादेव्यै नमः इति व्यापकं कुर्यात् । इति प्रपञ्चन्यासः ॥

अथ भुवनन्यासः । ओं ऐं ह्रीं श्रीं ह्सौः अं आं इं अतललोकनिलयशतकोटिगुह्याद्ययोगिनीमूलदेवतायुताधारशक्त्यम्बादेव्यै नमः स्हौः श्रीं ह्रीं ऐं ओं पादयोः । एवं बीजसम्पुटं सर्वत्र । इं उं ऊं वितललोकनिलयशतकोटिगुह्यतमयोगिनीमूलदेवतायुतालिप्तपराशक्त्यम्बादेव्यै नमः गुल्फयोः । ऋं ॠं लृं सुतललोकनिलयशतकोटिगुह्यतमयोगिनीमूलदेवतायुताचिन्त्यपराशक्त्यम्बादेव्यै नमः जङ्घयोः । लॄं एं ऐं महातललोकनिलयशतकोटिमहागुह्ययोगिनीमूलदेवतायुतस्वारम्भशक्त्यम्बादेव्यै नमः जान्वोः । ओंऔं तलातललोकनिलयशतकोटिपरमगुह्ययोगिनीमूलदेवतायुतेच्छाशक्त्यम्बादेव्यै नमः ऊर्वोः । अंअः रसातललोकनिलयशतकोटिरहस्ययोगिनीमूलदेवतायुतज्ञानशक्त्यम्बादेव्यै नमः गुह्यके । कं ५ पाताललोकनिलयशतकोटिरहस्यतमयोगिनीमूलदेवतायुतक्रियाशक्त्यम्बादेव्यै नमः मूलाधारे । चं ५ भूर्लोकनिलयशतकोटि—अतिरहस्ययोगिनीमूलदेवतायुतडाकिनीशक्त्यम्बादेव्यै नमः स्वाधिष्ठाने । टं ५ भुवर्लोकनिलयशतकोटिपरमरहस्ययोगिनीमूलदेवतायुतराकिणीशक्त्यम्बादेव्यै नमः नाभिदेशे । तं ५ स्वर्लोकनिलयशतकोटिपरमरहस्ययोगिनीमूलदेवतायुतलाकिनीशक्त्यम्बादेव्यै नमः हृदये । पं ५ महर्लोकनिलयशतकोटिगुप्तयोगिनीमूलदेवतायुतकाकिनीशक्त्यम्बादेव्यै नमः कण्ठदेशे । यं ४ जनलोकनिलयशतकोटिगुप्ततरयोगिनीमूलदेवतायुतशाकिनीशक्त्यम्बादेव्यै नमः आज्ञायाम् । शं ४ तपोलोकनिलयशतकोटयतिगुप्तयोगिनीमूलदेवतायुतहाकिनीशक्त्यम्बादेव्यै नमः ललाटे । ळं क्षं सत्यलोकनिलयशतकोटिमहागुप्तयोगिनीमूलदेवतायुतयाकिनीशक्त्यम्बादेव्यै नमः ब्रह्मरन्ध्रे । ४ अं ५१ चतुर्दशभुवनाधिपायै श्रीपराम्बादेव्यै नमः । इति व्यापकं न्यसेत् । इति भुवनन्यासः ॥

अथ मूर्तिन्यासः । ४ ह्सौं अं केशवाक्षयाभ्यां नमः स्हौं श्रीं ह्रीं ऐं ओं ललाटे । एवं बीजसम्पुटं सर्वत्र । आं नारायणाद्याभ्यां दक्षमुखे । इं माधवेष्टदाभ्यां दक्षस्कन्धे । ईं गोविन्देशानाभ्यां दक्षकुक्षौ । उं विष्णूग्राभ्यां दक्षोरौ । ऊं मधुसूदनोर्ध्वनयनाभ्यां दक्षजानौ । ऋं त्रिविक्रमऋद्धिभ्यां दक्षजङ्घायां । ॠं वामनरूपिणीभ्यां दक्षपादे । लृं श्रीधरलुप्ताभ्यां वामपादे । लॄं हृषीकेशलूनदोषाभ्यां वामजङ्घायाम् । एं पद्मनाभैकनायिकाभ्यां वामजानौ । ऐं दामोदरैंकारिणीभ्यां वामोरौ । ओं वासुदेवौघवतीभ्यां वामकुक्षौ । औं सङ्कर्षणौर्वकामाभ्यां वामस्कन्धे । अं प्रद्युम्नाञ्जनप्रभाभ्यां वाममुखे । अः अनिरुद्धास्थिमालाधराभ्यां वाममस्तके । कं भं भवकरभद्राभ्यां दक्षपादे । खं बं शर्वखगबलाभ्यां वामपादे । गं फं रुद्रगरिमादिफलप्रदाभ्यां दक्षपार्श्वे । घ पं पशुपतिघर्मप्रशमनीभ्यां वामपार्श्वे । ङं नं उग्रपंक्तिनाशाभ्यां दक्षबाहौ । चं धं महादेवचन्द्रार्धधारिणीभ्यां वामबाहौ । छं दं भीमच्छन्दोमयीभ्यां कण्ठे । जं थं ईशानजगत्स्थानाभ्यां ऊर्ध्ववक्त्रे । झं तं तत्पुरुषप्रताराभ्यां पूर्ववक्त्रे । ञं णं अघोरज्ञानदाभ्यां दक्षास्ये । टं ढ सद्योजातटङ्कधराभ्यां पश्चिमास्ये । ठं डं वामदेवठङ्कारडामरीभ्यां वाममुखे । यं ब्रह्मयक्षिणीभ्यां मूलाधारे । रं प्रजापतिरञ्जनीभ्यां स्वाधिष्ठाने । लं वेधोलक्ष्मीभ्यां मणिपूरे । वं परमेष्ठिवज्रिणीभ्यां अनाहते । शं पितामहशक्तिधारिणीभ्यां विशुद्धे । षं विधातृषडाधारालयाभ्यां आज्ञायाम् । सं विरिञ्चिसर्वनायिकाभ्यां इन्दौ, हं सृष्टृहरिताननाभ्यां बिन्दौ, ळं चतुराननललिताभ्यां नादे, क्षं हिरण्यगर्भक्षमाभ्यां नादान्ते, ४ अं ५१ हरिहरब्रह्मत्रिमूर्त्यात्मिकायै श्रीपराम्बादेव्यै नमः इति व्यापकं न्यसेत् । इति मूर्तिन्यासः ॥

अथ मन्त्रन्यासः । प्रथमोक्तबीजसम्पुटं सर्वत्र । ओंऐंह्रींश्रींह्सौः अंआंइं एकलक्षकोटिभेदप्रणवाद्येकाक्षरात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै एककूटेश्वर्यम्बादेव्यै नमः स्हौः श्रींह्रींऐंओं मूलाधारे । ईंउंऊं द्विलक्षकोटिभेदहंसादिद्विकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै द्विकूटेश्वर्यम्बादेव्यै नमः लिङ्गे । ऋंॠंलृं त्रिलक्षकोटिभेदवह्न्यादित्रिकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै त्रिकूटेश्वर्यम्बादेव्यै नमः नाभौ । लॄंएंऐं चतुर्लक्षकोटिभेदचन्द्रादिचतुष्कूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै चतुष्कूटेश्वर्यम्बादेव्यै नमः हृदये । ओंऔंअंअः पञ्चलक्षकोटिभेदसूर्यादिपञ्चकूटात्मकाखिलमन्त्राधिदेवतायैसकलफलप्रदायै पञ्चकूटे-

श्वर्यम्बादेव्यै नमः कण्ठे । कंखंगं षड्लक्षकोटिभेदस्कन्द्यादिषट्कूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै षट्कूटेश्वर्यम्बादेव्यै नमः मुखे । घंङंचं सप्तलक्षकोटिभेदगणेशादिसप्तकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै सप्तकूटेश्वर्यम्बादेव्यै नमः नेत्रयोः । छंजंझं अष्टलक्षकोटिभेदवटुकाद्यष्टकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै अष्टकूटेश्वर्यम्बादेव्यै नमःआज्ञायाम् । ञंटंठं नवलक्षकोटिभेदब्रह्मादिनवकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै नवकूटेश्वर्यम्बादेव्यै नमः इन्दौ । डंढंणं दशलक्षकोटिभेदविष्ण्वादिदशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै दशकूटेश्वर्यम्बादेव्यै नमः बिन्दौ । तंथंदं एकादशलक्षकोटिभेदरुद्राद्येकादशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै एकादशकूटेश्वर्यम्बादेव्यै नमः कलायां । धंनंपं द्वादशलक्षकोटिभेदवाण्यादिद्वादशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै द्वादशकूटेश्वर्यम्बादेव्यै नमः उन्मन्याम् । फंबंभं त्रयोदशलक्षकोटिभेदलक्ष्म्यादित्रयोदशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै त्रयोदशकूटेश्वर्यम्बादेव्यै नमः शिरोवृत्ते । मंयंरं चतुर्दशलक्षकोटिभेदगौर्यादिचतुर्दशकूटात्मकाखिलमन्त्राधिदेवतायै चतुर्दशकूटेश्वर्यम्बादेव्यै नमः नादे । लंवंशं पञ्चदशलक्षकोटिभेददुर्गादिपञ्चदशकूटात्मकाखिलमन्त्राधिदेवता सकलफलप्रदायै पञ्चदशकूटेश्वर्यम्बादेव्यै नमः नादान्ते । षंसंहं षोडशलकोटिभेदत्रिपुरादिषोडशकूटात्मकाखिलमन्त्राधिदेवतायै सकलफलप्रदायै षोडशकूटेश्वर्यम्बादेव्यै नमः ब्रह्मरन्ध्रे । ४ अं ५१ सर्वमन्त्रात्मिकायै परम्बादेव्यै नमः इति व्यापकं न्यसेत् । इति मन्त्रन्यासः ॥

अथ दैवतन्यासः । ओंऐंह्रींश्रींहसौः अंआं सहस्रकोटियोगिनीकुलसेवितायै निवृत्त्यम्बादेव्यै नमः स्हौः श्रींह्रींऐंओं दक्षपादांगुष्ठे । एवं बीजसंपुटं सर्वत्र । इंईं सहस्रकोटियोगिनीकुलसेवितायै प्रतिष्ठाम्बादेव्यै नमः दक्षगुल्फे । उंऊं सहस्रकोटितपस्विनीकुलसेवितायै विद्याम्बादेव्यै नमः दक्षजङ्घायां । ऋंॠं सहस्रकोटिऋषिकुलसेवितायै शान्त्यम्बादेव्यै नमः दक्षजानौ । लृंलॄं सहस्रकोटिमुनिकुलसेवितायै । शान्त्यतीताम्बादेव्यै नमः दक्षोरौ । एंऐं सहस्रकोटिदेवकुलसेवितायै हृल्लेखाम्बादेव्यै नमः दक्षकट्यां । ओंऔं सहस्रकोटिराक्षसकुलसेवितायै गगनाम्बादेव्यै नमः दक्षपार्श्वे । अंअः सहस्रकोटिविद्याधरकुलसेवितायै रक्ताम्बादेव्यै नमः दक्षस्तने । कंखं सहस्रकोटिसिद्धकुलसेवितायै महोच्छुष्माम्बादेव्यै नमः दक्षकक्षे । गंघं सहस्रकोटिसाध्यकुलसेवितायै करालाम्बादेव्यै नमः दक्षकरे । ङंचं सहस्रकोटि अप्सरःकुलसेवितायै जयाम्बादेव्यै नमः दक्षस्कन्धे । छंजं सहस्रकोटिगन्धर्वकुलसेवितायै विजयाम्बादेव्यै नमः दक्षकर्णे । झंञं सहस्रकोटिगुह्यककुसेवितायै अजिताम्बादेव्यै नमः दक्षशिरसि । टंठं सहस्रकोटियक्षःकुलसेवितायै अपराजिताम्बादेव्यै नमः वामशिरसि । डंढं सहस्रकोटिकिन्नरकुलसेवितायै वामाम्बादेव्यै नमः वामकर्णे । णंतं सहस्रकोटिपन्नगकुलसेवितायै ज्येष्ठाम्बादेव्यै नमः वामस्कन्धे । थंदं सहस्रकोटिपितृकुलसेवितायै रौद्रचम्बादेव्यै नमः वामकरे । धंनं सहस्रकोटिगणेशकुलसेवितायै मायाम्बादेव्यै नमः वामकक्षे । पंफं सहस्रकोटिभैरवकुलसेवितायै कुण्डलिन्यम्बादेव्यै नमः वामहस्तने । बंभं सहस्रकोटिवटुककुलसेवितायै काल्यम्बादेव्यै नमः वामपार्श्वे । मंयं सहस्रकोटिक्षेत्रेशकुलसेवितायै कालरात्र्यम्बादेव्यै नमः वामकट्यां । रंलं सहस्रकोटिप्रमथकुलसेवितायै भगवत्यम्बादेव्यै नमः वामोरौ । वंशं सहस्रकोटिब्रह्मकुलसेवितायै सर्वैश्वर्यम्बादेव्यै नमः वामजानौ । षंसं सहस्रकोविष्णुकुलसेवितायै सर्वज्ञाम्बादेव्यै नमः वामजङ्घायां । हंलं सहस्रकोटिरुद्रकुलसेवितायै सर्वकर्त्र्यम्बादेव्यै नमः वामगुल्फे । क्षं सहस्रकोटिचराचरकुलसेवितायै शक्त्म्बादेव्यै नमः वामपादांगुष्ठे । ४ अं ५१ समस्तदेवतात्मिकायै श्रीपराम्बिकादेव्यै नमः इति सर्वाङ्गे व्यापकं न्यसेत् । इति दैवतन्यासः ॥

अथ मातृकान्यासः—ॐऐंश्रीं मू० कं ५ अनन्तकोटिभूचरीकुलसेवितायै आंक्षां मङ्गलाम्बादेव्यै आंक्षां ब्रह्माण्यम्बादेव्यै अनन्तकोटिभूतकुलसहिताय अंक्षं मङ्गलनाथाय अंक्षं असिताङ्गभैरवनाथाय नमः आधारे । त्रितारमूलं तु सर्वत्र । चं ५ अनन्तकोटिखेचरीकुलसेवितायै ईंलां चर्चिकाम्बादेव्यै ईंलां माहेश्वर्यम्बादेव्यै

अनन्तकोटिवेतालकुलसहिताय इंलं चर्चिकनाथाय (इंलं वेतालभैरवनाथाय) इंलं रुरुभैरवनाथाय नमः स्वाधिष्ठाने । टं ५ अनन्तकोटिपातालचरीकुलसेवितायै ऊंह्रां योगीश्वर्यम्बादेव्यै ऊंह्रां कौमार्यम्बादेव्यै नमः अनन्तकोटिपिशाचकुलसहिताय उंहं योगीश्वरनाथाय उंहं चण्डभैरवनाथाय नमः मणिपूरे । तं ५ अनन्तकोटि-दिक्चरीकुलसेवितायै ॠंसां हरसिद्धाम्बादेव्यै ॠंसां वैष्णव्यम्बादेव्यै अनन्तकोटचपस्मारकुलसहिताय ॠंसं हरसिद्धनाथाय ॠंसं क्रोधराजभैरवनाथाय नमः अनाहते । पं ५ अनन्तकोटिसहचरीकुलसेवितायै लॄंषां भट्टिन्यम्बादेव्यै लॄंषां वाराह्यम्बादेव्यै अनन्तकोटिब्रह्मराक्षसकुलसहिताय लॄंषं भट्टनाथाय लॄंषं उन्मत्तभैरव-नाथाय नमः विशुद्धे । यं ४ अनन्तकोटिगिरिचरीकुलसेवितायै ऐंशां किलिकिलाम्बादेव्यै ऐंशां इन्द्राण्यम्बादेव्यै अनन्तकोटिवटुककुलसहिताय एंशं किलकिलनाथाय एंशं कपालिभैरवनाथाय नमः आज्ञायां । शं ४ अनन्त-कोटिवनचरीकुलसेवितायै औंवां कालरात्र्यम्बादेव्यै औंवां चामुण्डाम्बादेव्यै अनन्तकोटिप्रेतकुलसहिताय ओंवं कालरात्रिनाथाय ओंवं भीषणभैरवनाथाय नमः ललाटे । लंक्षं अनन्तकोटिकुलचरीकुलसेवितायै अःलां भीषणाम्बादेव्यै अःलां महालक्ष्मबादेव्यै अनन्तकोटिशाकिनीकुलसहिताय अंलं भीषणनाथाय अंलं संहारभैरवाय नमः इति व्यापकं न्यसेत् । इति मातृकान्यासः । इति महाषोढान्यासः ॥

अथ मूलमन्त्रन्यासः—तत्रादौ विश्रान्तिचरणन्यासः । शिरसि संघट्टमुद्रां विधाय ॐऐंह्लींश्रीं हंसः शिवः हसौः सोऽहं तुरीयविद्यामुच्चार्यं सच्चिदानन्दज्योतिरहं, ओंऐंह्लींश्रीं हंसः शिवः हसौः सोहं तुर्यविद्यामुच्चार्य सच्चिदानन्दज्योतिरहमेव, ॐऐंह्लींश्रीं हंसः शिवः हसौः सोहं तुर्यविद्यामुच्चार्य सच्चिदानन्दज्योतिरहमेवास्मि । ततः क्षणं विश्राम्य तत्रैव प्रकाशचरणं न्यसेत् । ॐऐंह्लींश्रीं हंसः शिवः हसौः सोहं योऽहस्मि अहमस्मि ब्रह्माहमस्मि सोऽहं स्वच्छप्रकाशपरिपूर्णपरापरमहाप्रकाशपरिपूर्णानन्दनाथश्रीपादुकां पूजयामि । इति प्रकाशचरणन्यासः ॥

ततः स्वात्मानं सकलप्रपञ्चोत्तीर्णं संविदेकस्वभावं आनन्दमयं विचिन्त्य कृतकृत्यो निश्चितान्तरमः पञ्चाम्बान्यासं कुर्यात् । तत्र शिरसि संघट्टमुद्रया ४ ह्लींश्रीं श्रीआदिनाथव्योमातीताम्बाश्री० । ४ ह्लींश्रीं श्रीअनादिनाथव्योमेश्वर्यम्बाश्री० । ४ ह्लींश्रीं श्रीअनामयनाथव्योमगाम्बाश्री० । ४ ह्लींश्रीं श्रीअनन्तनाथव्यो-मचारिण्यम्बाश्री० । ४ ह्लींश्रीं श्रीचिदाभासनाथव्योमस्थाम्बाश्री० । इति पञ्चाम्बान्यासः ॥

अथ नवाकाशनाथन्यासः । शिरसि ४ हं उन्मनाकाशनाथश्री० । ४ सं समनाकाशनाथश्री० । ४ क्षं व्यापकाकाशनाथश्री० । ४ मं शक्त्याकाशनाथश्री० । ४ लं ध्वन्याकाशनाथश्री० । ४ वं ध्वनिमात्राकाश-नाथश्री० । ४ रं अनाहताकाशनाथश्री० । ४ यं इन्द्वाकाशनाथश्री० । ४ ऊं बिन्द्वाकाशनाथश्री० । इति संघट्ट-मुद्रां शिरसि न्यसेत् । इत्याकाशनाथन्यासः ॥

अथ पूज्यनवनाथन्यासः । अत्र नाथानुपूर्वकानन्दशब्दप्रयोगः— ४ परमात्मानन्दनाथश्री०, ४ शाम्भवा-नन्दनाथश्री०, ४ चिन्मुद्रानन्दनाथश्री०, ४ वाग्भवानन्दनाथश्री०, ४ लीलानन्दनाथश्री०, ४ संभ्रमानन्द-नाथश्री०, ४ चिदानन्दानन्दनाथश्री०, ४ प्रसन्नानन्दनाथश्री०, ४ विश्वानन्दनाथश्री० । अत्रोर्ध्वाम्नाये पञ्चाम्बा दिव्यौघाः । नवाकाशनाथाः सिद्धौघाः । परमात्मादिनाथा मानवौघाः । इति नवनाथन्यासः ॥

अथ स्वपारम्पर्यन्यासः—४ यज्ञेश्वरानन्दनाथश्री० । ४ संविदानन्दनाथश्री० । ४ स्वात्मानन्द-नाथश्री० । ४ चिदानन्दनाथश्री० । ४ संविदानन्दनाथश्री० । ४ (चिदानन्दनाथश्री० । ४ संविदानन्दनाथ श्री०) । ४ ब्रह्मानन्दनाथश्री० । ४ संविदानन्दनाथश्री० । ४ पूर्णानन्दनाथश्री० । ४ संविदानन्दनाथ श्री० । ततः स्वगुरुं शिरसि संघट्टमुद्रया स्वपारम्पर्यं विन्यस्य, स्वनाम (स्वगुरुकृतं) मूलाधारे न्यसेत् । इति गुरुपङ्क्तिन्यासः ॥

अथ षोडशमूलविद्यान्यासः । शिरसि (१) ॐऐंह्लींश्रीं स्वच्छप्रकाशपरिपूर्णपरापरमहासिद्धविद्याकुल-

योगिनीं ह्रीं कुलयोगिनीमूलविद्याश्रीपादुकां पूजयामि । (२) ४ हसौः स्वात्मानं बोधय २ ह्सौः प्रसादपराम्बामूलविद्याश्री० । (३) ऐंक्लीं क्लिन्ने क्लेदिनि महामदद्रवे क्लींक्लीं मोहय २ क्लीं नमः स्वाहा अतिरहस्ययोगिनीमूलविद्याश्री० । (४) ४ हंसः स्वच्छानन्दपरमहंसपरमात्मने स्वाहा हसौं हसौं शाम्भवीमूलविद्या श्री० । (५) ४ ह्रीं नित्यस्फुरत्ताचैतन्यानन्दमयि महाबिन्दुव्यापकमातृस्वरूपिणि ऐंह्रींश्रींईं हृल्लेखामूलविद्याश्री० । (६) ४ स्वच्छप्रकाशात्मिके ह्रीं कुलमहामालिनी ऐं कुलगर्भमातृके ह्रीं समयविमले श्रीं समयविमलामूलविद्याश्री० । (७) ४ हंसः नित्यप्रकाशात्मिके कुलकुण्डलिनि आज्ञासिद्धिमहाभैरवि आत्मानं बोधय २ अम्बे भगवति ह्रींहुं परबोधिनीमूलविद्याश्री० । (८) ४ ॐ मोक्षं कुरु कुलपञ्चाक्षरीमूलविद्याश्री० । (९) ४ लोपामुद्रापञ्चदशाक्षरीमुच्चार्य चैतन्यत्रिपुरामूलविद्याश्री० । (१०) ४ ऐं शुद्धसूक्ष्मनिराकारनिर्विकल्पपरब्रह्मस्वरूपिणि क्लीं परानन्दशक्ति सौः शाम्भवानन्दनाथानुत्तरकौलिनीमूलविद्याश्री० । (११) ४ हंसः सोऽहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा गुरूत्तमविमर्शिनीमूलविद्याश्री० । (१२) ४ अनामाख्याव्योमातीतनाथ—परापरव्योमेश्वर्यम्बानामाख्यामूलविद्याश्री० । (१३) ४ ऐंईंऔं संकेततारामूलविद्याश्री० । (१४) ४ ह्रीं भगवति विच्चे वाग्वादिनि क्लीं महाह्लदमहामातङ्गिनि ऐं क्लिन्ने ब्लूंस्त्रीं अनुत्तरवाग्वादिनीमूलविद्या श्री० । (१५) ४ हसौः हसखफ्रें हपकलरीं हसौः अनुत्तरशांकरीमूलविद्याश्री० । (१६) त्रयोदशाक्षरमूलतुरीयविद्यामुच्चार्य सर्वानन्दमये चक्रे बैन्दवे परब्रह्मस्वरूपिणी परामृतशक्तिः सर्वमन्त्रेश्वरी सर्वविद्येश्वरी सकलजगदुत्पत्तिमातृका सचक्रा सशक्तिः समुद्रा ससिद्धिः सायुधा सपरिवारा सर्वोपचारैः संपूजितास्तु शून्याशून्यविवर्जितशक्तिश्रीमहात्रिपुरसुन्दरीमूलविद्याश्री० । इति संघट्टमुद्रया शिरसि विन्यसेत् । इति षोडशमूलविद्यान्यासः ॥

अथ षडाधारविद्यान्यासः । ४ हंसः स्वच्छानन्दविभूत्यै स्वाहा मूलाधारविद्याश्री०, मूलाधारे । ४ सोहं परमहंसविभूत्यै स्वाहा स्वाधिष्ठानविद्याश्री०, स्वाधिष्ठाने । ४ हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा मणिपूरकविद्याश्री०, मणिपूरके । ४ हंसः सोहं स्वात्मानं बोधय २ परमात्मानन्दनाथ अनाहतविद्या श्री०, अनाहते । ४ सोहं परमात्मानं बोधय २ स्वात्मानन्दनाथ विशुद्धविद्याश्री०, विशुद्धौ । ४ हंसः सोहं स्वच्छानन्दचित्प्रकाशामृतहेतवे स्वाहा आज्ञाविद्याश्री०, आज्ञायां । इति विन्यस्य पुनः संघट्टमुद्रया शंभुचरणमात्रविन्यासः । ४ हंसः शिवः हसौंः सोहं योहमस्मि अहमस्मि ब्रह्माहमस्मि सोहं स्वच्छप्रकाशपरिपूर्णपरापरमहाप्रकाशपरिपूर्णानन्दनाथश्री० । इति ब्रह्मरन्ध्रे न्यसेत् । इति षडाधारविद्यान्यासः ॥ (इति चरणादिन्यासः ।)

ततो हसां हसीमित्यादिना करषडङ्गन्यासं विधाय पराप्रासादमन्त्रेण प्राणायामत्रयं कृत्वा दश मुद्राः प्रदर्शयेत् । तदुक्तं तत्रैव—

ततः संदर्शयेन्मुद्रादशकं परमेश्वरि । योनिं लिङ्गं च सुरभिं हेतिमुद्राचतुष्टयम् ॥
वनमालां नभोमुद्रां महामुद्रामिति क्रमात् ।···· ···· ···· ···· ···॥

इति । हेतिमुद्राः कपालज्ञानशूलपुस्तकाख्याः । नभोमुद्रा खेचरीमुद्रा । तथा संघट्टमुद्राया अपि लक्षणमुक्तं "शिवशक्त्यात्मनोर्योगे सैव संघट्टमुद्रिका" । शिवशक्त्यात्मनोर्दक्षिणवामयोरित्यर्थः । तयोश्चाङ्गीभूतयोर्वा हंसीभूतयोर्वा तत्त्वात्मनोर्वा संप्रदायभेदाद् यथागुरूपदेशं कार्यमिति । अथ ध्यानम्—

एवं न्यस्ततनुर्देवि ध्यायेद् देवमनन्यधीः । अमृतार्णवमध्योद्यत्स्वर्णद्वीपे मनोरमे ॥ १ ॥
कल्पवृक्षवनान्तःस्थे नवमाणिक्यमण्डपे । नवरत्नमयश्रीमत्सिंहासनगताम्बुजे ॥ २ ॥
त्रिकोणान्तः समासीनं चन्द्रसूर्यसमप्रभम् । अर्धाम्बिकासमायुक्तं प्रविभक्तविभूषणम् ॥ ३ ॥
कोटिकन्दर्पलावण्यं सदा षोडशवार्षिकम् । मन्दस्मितमुखाम्भोजं त्रिनेत्रं चन्द्रशेखरम् ॥ ४ ॥

दिव्याम्बरस्रगालेपं दिव्याभरणभूषितम् । पानपात्रं च चिमुन्द्रां त्रिशूलं पुस्तकं करैः ॥ ५ ॥
विद्यासंसिद्धि बिभ्राणं सदानन्दमुखेक्षणम् । महाषोढोदिताशेषदेवतागणसेवितम् ॥ ६ ॥
एवं चित्ताम्बुजे ध्यायेदर्धनारीश्वरं शिवम् पुंरूपं वा स्मरेद्देवि स्त्रीरूपं वा विचिन्तयेत् ॥ ७ ॥
अथवा निष्कलं ध्यायेत् सच्चिदानन्दलक्षणम् । सर्वतेजोमयं ध्यायेत्सचराचरविग्रहम् ॥ ८ ॥

इति । अत्र पुंरूपध्याने "त्रिकोणान्तः समासीनं चन्द्रकोटिसमप्रभ" मित्यादि शुभ्रवर्णत्व पुंभूषणादिकमूह्यम् । स्त्रीरूपध्याने "सूर्यकोटिसमप्रभ"मित्यादि रक्तवर्णत्वादिस्त्रीप्रत्ययान्तपदमूहनीयमिति । आयुधादिकं तु समानम् । इति ध्यात्वा मानसोपचारैराराध्य, पराप्रासादमन्त्रं जपित्वा यथाशक्ति चरणषोडशमूलविद्याषडाधारविद्याश्च जपेत् । ततः शिरसि गुरुं ध्यात्वा तत्पादुकाविद्यां च जपेत् । ततो जपं समर्प्य तदभेदेन स्वेष्टदेवतां मत्वा "बालार्कमण्डलाभासा" मित्यादि श्रीमहात्रिपुरसुन्दरीं ध्यात्वा मूलविद्यां यथाशक्ति जपित्वा जपं समर्प्य प्रणमेत् । तदुक्तं—

यथाशक्ति जपेन्मूलमन्त्रं श्रीपादुकामपि । मूर्ध्नि संचिन्तयेद्देवि श्रीगुरुं शिवरूपिणम् ॥

इति । महाषोढान्यासफलं तु प्रागुक्तं बोध्यम् । "ऊर्ध्वाम्नायप्रवेशश्च पराप्रासादचिन्तनम् । महाषोढाह्वयो न्यासो नाल्पस्य तपसः फलम्" इति ॥

अथ रक्तामृताब्धिमध्यस्थरत्नद्वीपे मदनोन्मादनं नाम पुष्पलताकुलं कूजत्कोकिलपिकवाचालविपिनगह्वरं जातीपुंनागपाटलोत्फुल्लाशेषसुमनोभिरलंकृत ह्रींकारमुखरभ्रमदभ्रमरकलकलाकुलं मलयपवननर्तितलताजालं नन्दनोद्यानं ध्यात्वा, तदन्तरुदितादित्यसंकाशं स्वर्णप्राकारपरिक्षिप्तरत्नसोपानमण्डितं रत्नतोरणद्वारदेशं कृष्णागुरुधूपोद्गारसुरभितककुभ सेवासमुत्सुकानेककोटिदेवतागणसेवितं दिव्यमण्डपं ध्यात्वा, तन्मध्ये समकालसमुदितसहस्रसवितृमण्डलसकाशं रत्नचतुस्तम्भसंराजितरक्तपटवितानवतीं कर्पूरशकलमध्यवर्तिकाप्रवर्तितदीपांकुराङ्कितकोणदेशां मणिमयीं वेदिकां ध्यात्वा, तन्मध्ये ४ अमृतार्णवासनाय नमः । ४ रत्नद्वीपाय नमः । मणिमण्डपस्य परितः प्रादक्षिण्येन—४ पुष्परागखण्डाय नमः । ४ वैडूर्यखण्डाय नमः । ४ विद्रुमखण्डाय नमः । ४ मौक्तिकखण्डाय० । ४ मरकतखण्डाय० । ४ वज्रखण्डाय० । ४ गोमेधखण्डाय० । ४ पद्मरागखण्डाय । ४ षड्ऋतुभ्यो० । ४ इन्द्रियाश्वेभ्यो० । ४ इन्द्रियार्थगजेभ्यो० । मण्डपस्य परितः प्रादक्षिण्येन—४ कालचक्रेश्वर्यै० । ४ मुद्राचक्रेश्वर्यै० । ४ मातृकाचक्रेश्वर्यै० । ४ देशचक्रेश्वर्यै० । ४ गरुचक्रेश्वर्यै० । ४ तत्त्वचक्रेश्वर्यै० । ४ ग्रहचक्रेश्वर्यै० । मध्ये ४ मूर्तिचक्रेश्वर्यै० । ४ करुणातोयपरिखायै० । ४ वज्रालंकृतस्वर्णप्राकाराय० । तत्पूर्वद्वारदक्षिणवामशाखयोः ४ गं गणपतये नमः । ४ क्षां क्षेत्रपालाय० । तदूर्ध्वोदुम्बरशाखयोः—४ सं सरस्वत्यै नमः । ४ दुं दुर्गायै नमः । तन्मध्ये ४ श्रीं श्रियै नमः । ४ दें देहल्यै नमः । ततो दक्षपादपुरःसरमन्तः प्रविश्य प्राकारस्याग्नेयादिकोणकेषु—ॐश्रींह्रींक्लींग्लौंगं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा । ऐंग्लौं नमो भगवति वार्तालि २ वाराहि २ वराहमुखि २ अन्धे अन्धिन्यै नमः रुन्धे रुन्धिन्यै नमः जम्भे जम्भिन्यै नमः मोहे मोहिन्यै नमः स्तम्भे स्तम्भिन्यै नमः सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरु २ शीघ्रं वश्यं कुरु २ ठःठःठःठः हुंफट् स्वाहा ग्लौंऐं ॥ उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥ ॐह्रींवां वटुकायापदुद्धारणाय कुरु २ वटुकाय ह्रीं । इति गणेशपञ्चमी—दुर्गावटुकानाग्नेयादिकोणचतुष्केषु पूजयेत् । तदन्तः ४ कदम्बवनाय नमः । तन्मध्ये ४ रत्नमण्डपाय नमः । तस्य पश्चिमादिवामावर्तेन ४ देशरूपिण्यै नमः । ४ कालरूपिण्यै नमः । ४ आकाशरूपिण्यै नमः । ४ शब्दरूपिण्यै नमः । मण्डपस्य वामदक्षिणशाखयोः ४ ह्रींश्रींह्रीं विरिगणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ॥ ४ ऐं क्लींसौः ॐ नमो भगवति श्रीमातङ्गेश्वरि सर्वजनमनोहारि सर्वदुष्टमृगवशंकरि सर्वसत्त्ववशंकरि सर्वलोकवशंकरि सर्वजनं मे वशमानय स्वाहा सौःक्लींऐं श्रींह्रींऐं इति शक्तिगणेशं मातङ्गीं च

संपूज्य, तन्मध्ये—हसखफ्रें लं लक्ष्मीभैरव्यै नमः। इति द्वारलक्ष्मीं संपूज्य, दें देहल्यै नमः। अपसर्पन्तु इति, पाशुपतास्त्रेण च देहल्यां पुष्पाणि निक्षिप्य, वामपादपुरःसरं देहलीमस्पृशन् अन्तःप्रविश्य, तद्द्वारदक्षवामशाखयोः ४ शं शंखनिधये नमः। ४ पं पद्मनिधये नमः। वायवीं दिशमारभ्य नैर्ऋत्यान्तद्वारमुन्मृज्य पङ्क्त्या समुपविष्टा वेणावतीर्गायन्तीः सरस्वात्यादि-गायिका यजेत्। ४ सं सरस्वत्यै नमः। ४ श्रीं श्रियै नमः। ४ दुं दुर्गायै नमः। ४ भं भद्रकाल्यै नमः। ४ स्वं स्वस्त्यै नमः। ४ स्वां स्वाहायै नमः। ४ शं शुभंकर्यै नमः। ४ गौं गौर्यै नमः। ४ लों लोकधात्र्यै नमः। ४ वां वागीश्वर्यै नमः। मण्डपान्तरभित्त्यां प्रागादिदशदिक्षु—४ लं इन्द्राय सुराधिपतये पीतवर्णाय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय योषिद्रूपधराय नमः। ४ रं अग्नये तेजोधिपतये पिङ्गलवर्णाय साङ्गायेत्यादि०। ४ टं यमाय प्रेताधिपतये कृष्णवर्णाय साङ्गाय०। ४ क्षं निर्ऋतये रक्षोधिपतये धूम्रवर्णाय०। ४ वं वरुणाय जलाधिपतये शुक्लवर्णाय०। ४ यं वायवे प्राणाधिपतये धूम्रव०। ४ सं सोमाय नक्षत्राधिपतये श्वेतवर्णाय०। ४ हौं ईशानाय विद्याधिपतये स्फटिकवर्णाय०। ४ आं ब्रह्मणे लोकाधिपतये पद्मवर्णाय०। ४ ह्रीं अनन्ताय नागाधिपतये श्यामवर्णायेत्यादि। ततो मण्डपस्योर्ध्वप्राग्दक्षिणोदीच्यपश्चिमद्वारेषु ४ हौं शान्त्यतीताकलाद्वारायै नमः। ४ हैं शान्ताकलाद्वारायै नमः। ४ हूं विद्याकलाद्वारायै नमः। ४ हीं निवृत्तिकलाद्वारायै नमः। ४ हां प्रतिष्ठाकलाद्वारायै नमः। ४ ईं नमस्त्रैलोक्यमोहिनि महामाये सकलपशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा, इति तिरस्करिणी सम्पूज्य,

मुक्तकेशीं विवसनां मदघूर्णितलोचनाम्। स्वयोनिदर्शनामुह्यत्पशुवर्गां स्मराम्यहम्॥

इति ध्यात्वा, तस्या दूतीश्चतुर्द्वारेषु प्रागादि द्वेद्वे शूलकपालधारिण्यौ श्यामवर्णे शक्ती पूजयेत्। ४ क्लीं सुन्दरीसुमुखीभ्यां नमः। ४ क्लीं विरूपाविमलाभ्यां नमः। ४ क्लीं अन्तरीविनोदिनाभ्यां नमः। ४ क्लीं पुरन्दरीपुष्पमर्दिनीभ्यां नमः। एवं भावनया मण्डपार्चनं विधाय, ४ ॐह्लींहौं नमः शिवाय महाशरभाय, ४ ॐह्लींहौं नमः शिवायै महाशरभ्यै, इति विघ्नशान्तये शरभद्वयमभ्यर्च्य, स्वपुरतश्चन्दनादिपीठे कुंकुमादिना श्रीयन्त्रराजं समुद्धृत्य, अथवा रत्नादिनिर्मितं यन्त्रं संस्थाप्य, नमः इत्यभ्यर्च्यर्घ्यादिस्थापनं कुर्यात्। श्रीचक्रात्मनोर्मध्ये वहन्नाडीहस्तेन मत्स्यमुद्रया मायाङ्कितभूबिम्बवृत्तत्रिकोणात्मकं मण्डलं विरच्य, सव्यांगुष्ठेनावष्टभ्य वामेन पुष्पाक्षतैर्बालया व्यस्ताव्यस्तक्रमेण सम्पूज्य, मध्येऽस्त्रप्रक्षालितमाधारं वाग्भवेन प्रतिष्ठाप्य रं वह्निमण्डलाय नमः इति सम्पूज्य, कामराजेन शंखं संस्थाप्य हं सूर्यमण्डलाय नमः, इति सम्पूज्य, गन्धादिकं निक्षिप्य तार्तीयेन शुद्धोदकेन पूरयित्वा, सं सोममण्डलाय नमः, इति संपूज्य गन्धादिकं निक्षिप्य हसौं वरुणदेव हसौं नमः, इति सप्तवारं जपित्वा तज्जलेन दक्षिणे भूबिम्बवृत्तषट्कोणत्रिकोणात्मकं मण्डलं विरच्य शङ्खमुद्रया दक्षकरेणावष्टभ्य व्यस्ताव्यस्तक्रमेण बालया षट्कोणं त्रिकोणं मध्यं च संपूज्य भूबिम्बे अग्नीशासुरवायव्यमध्ये दिक्षु च षडङ्गानि संपूज्य षडासनानि च संपूज्य, त्रिकोणेषु मध्ये पीठचतुष्टयं संपूज्यास्त्रप्रक्षालितमाधारं वाग्भवेन श्रीमहात्रिपुरसुन्दर्या अर्घ्याधारं स्थापयामि नमः इत्याधारं संस्थाप्य, ४ रांरीरूं धर्मप्रददशकलात्मने वह्निमण्डलाय श्रीमहात्रिपुरसुन्दर्या अर्घ्याधाराय नमः इति संपूज्य, तदुपरि प्रादक्षिण्येन—यं धूम्रार्चिषे नमः। रं ऊष्मायै नमः। लं ज्वलिन्यै नमः। वं ज्वालिन्यै नमः। शं विस्फुलिङ्गिन्यै नमः। षं सुश्रियै नमः। सं स्वरूपायै नमः। हं कपिलायै नमः। ळं हव्यवाहायै नमः। क्षं कव्यवाहायै नमः। इति दश वह्निकलाः सम्पूज्य, तदुपरि सौवर्णं राजतं ताम्रं विश्वामित्र(कपाल)मयं पात्रमस्त्रप्रक्षालितं सुधूपितं श्रीमहात्रिपुरसुन्दर्या अर्घ्यपात्रं स्थापयामि नमः इति संस्थाप्य, ४ हसक्षमलवरयऊं वसुप्रदद्वादशकलात्मने सूर्यमण्डलाय श्रीमहात्रिपुरसुन्दर्या अर्घ्यपात्राय नमः रमलवरयूं इति सम्पूज्य। तदुपरि प्रादक्षिण्येन—४ कंभं तपिन्यै नमः। ४ खंबं तापिन्यै०। ४ गंफं धूम्रायै०। ४ घंपं मरीच्यै०। ४ ङंनं ज्वालिन्यै०। ४ चंधं रुच्यै। ४ छंदं

सुषुम्नायै० । ४ जं थं भोगदायै० । ४ झं तं विश्वायै० । ४ ञं णं बोधिन्यै० । टं ढं धारिण्यै० । ४ ठं डं क्षमायै नमः । इति द्वादशकलाः सम्पूज्य, श्रीमहात्रिपुरसुन्दर्या अर्घ्यामृतं पूजयामि नमः मूलविद्याविलोममातृकयार्घ्यमापूर्य, कामराजेन द्वितीयं निक्षिप्यामृतेश्वरीविद्यया त्रिधावलोड्य, तत्रत्यदोषजालं वायुबीजेन संशोष्याग्निबीजेन संदह्य, अमृतबीजेनामृतीकृत्य, ४ सां सीं सूं समलवरयऊं सं कामप्रदषोडशकलात्मने चन्द्रमण्डलाय श्रीमहात्रिपुरसुन्दर्या अर्घ्यामृताय नमः, इति सम्पूज्य, तत्र प्रादक्षिण्येन ४ अं अमृतायै नमः । ४ आं मानदायै० । ४ इं पूषायै० । ४ ईं तुष्टयै० । ४ उं पुष्टयै० । ४ ऊं रत्यै । ४ ऋं धृत्यै० । ४ ॠं शशिन्यै० । ४ लृं चन्द्रिकायै० । ४ ॡं ज्योत्स्नायै० । ४ एं कान्त्यै० । ४ ऐं श्रियै० । ४ ओं प्रीत्यै० । ४ औं अङ्गदायै० । ४ अं पूर्णायै० । ४ अः पूर्णामृतायै० । इति षोडश कलाः सम्पूज्य, सर्वासां कलानां प्राणप्रतिष्ठामपि विधाय, तत्र क्रमत्रयमपि संभाव्य, तत्र चतुर्दिक्षु मध्ये च ग्लूं गगनरत्नाय नमः । स्लूं स्वर्गरत्नाय नमः । प्लूं पातालरत्नाय नमः । म्लूं मर्त्यरत्नाय नमः । न्लूं नागरत्नाय नमः । तन्मध्ये अकथादित्रिरेखं हळक्षगतकोणकं वर्णकदम्बकं विलिख्य, ऐं क्लीं सौः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय सां जूं २ सः अमृतेश्वर्यै स्वाहा, इत्यमृतेश्वरीं त्रिशो जप्त्वा, जातवेदसे गायत्रीं त्र्यम्बकं च जपेत् । ततः शां शीं शूं शैं शौं शः इति शुक्रशापविमोचिन्याभिमन्त्र्य पुनरमृतेश्वरीं स्मृत्वा,

ऐं अखण्डैकरसानन्दकरे वरसुधात्मनि । स्वच्छन्दस्फुरणार्थाय निधेह्यमृतरूपिणि ॥

हसक्षमलवरयऊं आनन्दभैरवाय वौषट्, सहक्षमलवरयीं सुधादेव्यै वौषट्, इत्यर्घ्यमध्ये आनन्दभैरवमिथुनं तद्बिन्दुभिरेव संतर्प्य,

ऐं क्लीं अकुलस्थामृताकारे सिद्धिज्ञानकरे परे । अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि ॥

पुनरानन्दभैरवमिथुनं संतर्प्य,

सौः तद्रूपेणैकरस्यं त्वं दत्त्वार्घ्ये तत्स्वरूपिणी । भूत्वा परामृताकारे मयि चित्स्फुरणं कुरु ॥

पुनरानन्दभैरवं संतर्प्य, मूलेन सप्तधाभिमन्त्र्यास्त्रेण संरक्ष्य कवचेनावगुण्ठ्यामृतबीजेनामृतीकृत्य धेनुमुद्रां प्रदर्शयेत् । एवमर्घ्यस्थापनं विधायान्यान्यपि पात्राणि यथासंख्यं संस्थाप्यार्घ्यजलेनात्मानं पूजोपकरणानि चाभ्युक्ष्य, ह्रींबीजेन संशोध्यात्मपूजां कुर्यात् । तद्यथा शिरःपीठे सौः शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहङ्कारबुद्धिमनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवाय्वग्निसलिलभूम्यात्मने श्रीयोगपीठाय नमः, इति सम्पूज्य स्वमूलाधारादिषडाधारेषु योगिनीन्यासमन्त्रोक्तरीत्याधारदेवतास्तदावृतीश्च सम्पूज्य, पुनस्तत्तेजस्त्रिपुष्करूपेण त्रिधा कृत्वा, ऐं स्वयम्भूलिङ्गाय नमः । ईं बाणलिङ्गाय नमः । ॐ इतरलिङ्गाय नमः । ऐं ईं औं परलिङ्गाय नमः । इत्याधारहृद्द्व्भ्रूमध्यमूर्धसु वह्निसूर्यसोमतत्समष्टिरूपतयानुसन्धाय, पुनस्तत्तेजो निष्कलीकृत्य,

"स्वरद्वयपुटान्तःस्थमनचक्रद्वयसंश्रयम् । तेजो दण्डमयं ध्यायेत् कुलाकुलनियोजनात्" इति क्रमेण संतर्प्य पूर्वोक्तपीठे सौः इति परां कलां विभाव्य, तां परां कलां "अकलङ्कशशाङ्काभा त्र्यक्षा चन्द्रकलावती । मुद्रापुस्तलसद्बाहुः पातु मां परमा कला ॥" इति सावयवां संचिन्त्य मानसोपचारैः सम्पूज्य, शिरोबिन्दोः परितः त्रिकोणपञ्चारवृत्तचतुर्दलपञ्चारचतुष्टयचतुरस्रात्मकं षट्त्रिंशत्तत्त्वात्मक (मण्डलं) विरच्य तदनुज्ञया रश्मिपूजां कुर्यात् । आदौ बाह्यचतुरस्रेऽष्टदिक्षु—अं असिताङ्गभैरवाय नमः । आं ब्राह्म्यै० । इं रुरुभैरवाय० । ईं माहेश्वर्यै० । उं चण्डभैरवाय० । ऊं कौमार्यै० । ऋं क्रोधभैरवाय० । ॠं वैष्णव्यै० । लृं उन्मत्तभैरवाय० । ॡं वाराह्यै० । एं कपालिभैरवाय० । ऐं इन्द्राण्यै० । ओं भीषणभैरवाय० । औं चामुण्डायै० । अं संहारभैरवाय० । अः महालक्ष्म्यै० । ततो बाह्यपञ्चारे—सौः पृथिवीतत्त्वश्रीपा० । एवं पराबीजादि सर्वत्र । अप्तत्त्व० । तेजस्तत्त्व० । वायुतत्त्व० । आकाशतत्त्व० । तदन्तरपञ्चारे गन्धरसरूपस्पर्शशब्दतत्त्व० । तदन्तरपञ्चारे—

उपस्थतत्त्व० । पायुतत्त्व० । पादतत्त्व० । पाणितत्त्व० । वाक्तत्त्व० । तदन्तरपञ्चारे—घ्राणतत्त्व० । जिह्वातत्त्व० । श्रोत्रतत्त्व० । चक्षुस्तत्त्व० । त्वक्तत्त्व० । तदन्तरचतुर्दले—मनस्तत्त्व० । बुद्धितत्त्व० । अहङ्कारतत्त्व० । प्रकृतितत्त्व० । तदन्तरवृत्ते० । पुरुषतत्त्व० । नियतितत्त्व० । रागतत्त्व० । कालतत्त्व० । विद्यातत्त्व० । मायातत्त्व० । तदन्तरपञ्चारे–शुद्धविद्यातत्त्व० । ईश्वरतत्त्व० । सदाशिवतत्त्व० । शक्तितत्त्व० । शिवतत्त्व० । तदन्तस्त्रिकोणे–ऐं सत्त्वगुणाय नमः । क्लीं रजोगुणाय० । सौः तमोगुणाय० । तद्रेखासु–ऐं इच्छाशक्तिश्री० । क्लीं ज्ञानशक्तिश्री० । सौः क्रियाशक्तिश्री० । सौः परशक्त्यम्बाश्री० । इति मध्ये यथाशक्ति मानसोपचारैः सन्तर्पयेत् । ततो "रागद्वेषपशून् हत्वा तर्पयेच्च रसामृतैः" इति द्वादशान्ते बिन्दुभिः संतर्प्य, पुनस्तन्निष्कलीकृत्य बिन्दुत्रयेण विभाव्य, शुक्लं त्रिशूलेन संयोज्य तद्विसर्गे लयं नयेत् । इत्यनुसन्धाय, प्रकाशविमर्शचरणाभ्यां सम्पूज्य, तदन्तरं तत्र "तत्त्वे विश्रामयेन्मुहु"रिति रीत्यात्मानं देवीरूपं विभाव्य मिश्रचरणविद्यया सम्पूज्य "चराचरमिदं विश्वं तदीयं वाचकं स्मरेदि"त्युक्तरीत्या जगत्सर्वं तत्र च लीनं विभाव्य, बहुशोऽभ्यस्यानन्दस्वरूपमात्मानं विभाव्य, ऐं आत्मतत्त्वाधिपतिः श्रीपरा तृप्यतु । ईं विद्यातत्त्वाधिपतिः श्रीपरा तृप्यतु । अः शिवतत्त्वाधिपतिः श्रीपरा तृप्यतु । सौः सर्वतत्त्वाधिपतिः श्रीपरा तृप्यतु । इति संतर्प्य, मूलाधारे त्रिकोणकुण्डं विभाव्य,

प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचम् । धर्माधर्मकलास्नेहपूर्णामग्नौ जुहोम्यहं स्वाहा ॥
धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा । सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा ॥

मूलाधारे सर्वभूतानि तृप्यन्तु । रोमकूपे चतुःषष्टियोगिन्यस्तृप्यन्तु । इति सन्तर्प्य तत्त्वचतुष्टयशोधनेन विगलितभवबन्धमात्मानं परमशिवात्मानमनुसन्धाय,

मायान्ततत्त्वे सदहं शिवोऽहं शक्त्यन्ततत्त्वे चिदहं शिवोऽहम् ।
शिवान्ततत्त्वे सुखदः शिवोऽहमतः परः पूर्णमनुत्तरोऽहम् ॥
देशिकवागुपदेशविनश्यद् देहमरुन्मयशून्यविकल्पः ।
अद्वयबोधविमर्शसुखः सन्नद्यः शिवोऽस्मि शिवोऽस्मि शिवोऽस्मि ॥

इत्यनुसन्धाय, विगलितखिलबन्धः परशिवभट्टारको भूत्वा जीवन्मुक्तः सुखी विश्रामयेत् । इति आत्मपूजा ॥

ततः पादुकास्मरणं कुर्यात् । ऐं पराश्री० । क्लीं अपराश्री० । सौः परापराश्री० । ४ ऐं अनङ्गनाथदेवश्री० अनङ्गनाथदेवीश्री० । क्लीं अवतरनाथश्री० अवतरनाथदेवीश्री० । सौः सिद्धनाथदेवश्री० सौः सिद्धनाथदेवीश्री० । इति समयपादुकाः सप्त ।

४ ऐं क्लीं सौः निजगुरुनाथसदाशिवनाथश्री० । ७ अमृतानन्दनाथसदाशिवश्री० । ७ नकुलीशनाथसदाशिवश्री० । ७ मृगपर्यङ्कनाथसदाशिवश्री० । ७ चन्द्रार्कनाथसदाशिवश्री० । ७ शंखपालनाथसदाशिवश्री० । ७ आदिनाथसदाशिवश्री० । इति सङ्केतपादुकाः सप्त ।

४ परप्रकाशानन्दनाथश्री० । ४ परशिवानन्दनाथश्री० । ४ परशक्त्यम्बाश्री० । ४ कौलेश्वरानन्दनाथश्री० । शुक्लदेव्यम्बाश्री० । ४ कुलेश्वरानन्दनाथश्री० । कामेश्वर्यम्बाश्री० । इति सप्त दिव्यौघाः ॥

४ भोगानन्दनाथश्री० । क्लिन्नानन्दनाथश्री० । ४ सहजानन्दनाथश्री० । ४ समयानन्दनाथश्री० । इति चत्वारः सिद्धौघाः ॥

४ गगनानन्दनाथश्री० । ४ विश्वानन्दनाथश्री० । ४ विमलानन्दनाथश्री० । ४ मदनानन्दनाथ० । ४ भुवनानन्दनाथ० । ४ लीलानन्दनाथ० । ४ स्वात्मानन्दनाथ० । ४ प्रियानन्दनाथ० । ४ सहजानन्दनाथ० । ४ स्वच्छन्दानन्दनाथ० । ४ प्रकाशानन्दनाथ० । ४ अमृतानन्दनाथ० । इति द्वादश मानवौघाः ॥

अथोर्ध्वाम्नायक्रमः । तत्र बालया षडङ्गं विधाय पात्रं संशोध्य सुधयात्मानं सानन्दीकृत्य संविद्देवतागणं स्मरेत् । "चरणं नवानाथाश्च मूलविद्याश्च षोडश । आधारषट्कं देवेशि संविद्देव्य उदाहृताः ॥ तत्रादौ चरण-विद्याः—४ ओं योऽहमस्मि सोऽहमस्मि अहमस्मि ब्रह्माहमस्मि ब्रह्म सोऽहं स्वच्छप्रकाशपरिपूर्णपरापरमहा-काशपरिपूर्णानन्दनाथश्री० । (४ अनादिनाथव्योमेश्वर्यम्बाश्री०) ४ कुलीशनाथव्योमव्यापिन्यम्बाश्री० । ४ अनामयनाथव्योमगाम्बाश्री । ४ अनन्तनाथव्योमचारिण्यम्बाश्री० । ४ चिदाभासानन्दनाथव्योमस्थम्बाश्री० । इति । दिव्यौघाः ॥

४ हं उन्मनाकाशानन्दनाथश्री० । ४ सं समनाकाशानन्दनाथश्री० । ४ क्षं व्यापकाकाशानन्दनाथ-श्री० । ४ मं शक्त्याकाशानन्दनाथश्री० । ४ लं ध्वन्याकाशानन्दनाथश्री० । ४ वं ध्वनिमात्राकाशानन्दनाथश्री० । ४ रं नादाकाशानन्दनाथश्री० । ४ यं बिन्द्वाकाशानन्दनाथश्री० । ४ ऊं व्यस्ताकाशानन्दनाथश्री० । ४ हं समस्ताकाशानन्दनाथश्री० । इति सिद्धौघाः ।

४ आत्मानन्दनाथश्री । ४ परमानन्दनाथश्री० । ४ शाम्भवानन्दनाथश्री० । ४ वाग्भवानन्दनाथश्री० । ४ नीलकण्ठानन्दनाथश्री० । ४ चिदानन्दानन्दनाथश्री० । ४ स्वच्छप्रकाशानन्दनाथश्री० । ४ निजप्रकाशा-नन्दनाथश्री० । ४ अमृतानन्दनाथश्री० । इति मानवौघाः ॥

(१ ह्लींश्रीं स्वच्छप्रकाशपरिपूर्णपरापरमहासिद्धविद्याकुलयोगिनीह्लींश्रींश्री० । इति कुलयोगिनीमूल-विद्या ॥

(२) हसौं स्वात्मानं बोधय बोधय हसौं श्री० । इति प्रासादपरा ॥ (३) ४ ऐंग्लूं क्लिन्ने क्लेदिनि महामदद्रवे क्लीं क्लेदय क्लांक्लीं मोहय २ क्लीं नमः स्वाहा श्री० । इत्यतिरहस्यविद्या ॥ (४) ४ हंसः स्वच्छानन्दपरमहंसपरमात्मने स्वाहा हसौं श्री० । इति शाम्भवीविद्या ॥ (५) ४ ह्लीं नित्यस्फुरत्ताचैतन्या-नन्दमयीमहाबिन्दुव्यापकमात्रस्वरूपिणि ह्लींऐंश्रींह्लींश्रींरा० । इति हृल्लेखाविद्या ॥ (६) ४ स्वच्छप्रकाशात्मिके ह्लीं कुलमहामालिनि कुलगर्भमातृके ऐं समयविमले श्री० । इति समयविमलामूलविद्या ॥ (७) ४ हंसः नित्य-प्रकाशात्मिके कुलकुण्डलिनि आज्ञासिद्धिमहाभैरवि आत्मानं बोधय बोधय अम्बे भगवति ह्लींहुंश्रीं । इति परबोधिनी मूलविद्या ॥ (८ ४ ॐ मोक्षं कुरु श्री० । इति कुलपञ्चाक्षरीविद्या ॥ (९) ४ नवमी लोपामुद्रा श्रीविद्या चैतन्यत्रिपुरसुन्दरीश्री० ॥ (१०) ४ ऐं शुद्धसूक्ष्मनिराकारनिर्विकल्पपरब्रह्मस्वरूपिणी क्लीं परमानन्द-शक्तिः सौः शाम्भवानन्दनाथश्री० । इत्यनुत्तरकौलिन ॥ (११) ४ हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा । इति गुरूत्तमविमर्शिनीमूलविद्या ॥ (१२) ४ अनामाख्यव्योमातीतनाथपरापरव्योमातीतव्योमेश्वर्यम्बा श्री० । इत्यनामामूलविद्या ॥ (१३) ४ ऐंईंऔंश्री०, इति संकेतसारविद्या ॥ (१४) ४ ह्लीं भगवति विच्चे वाग्वादिनीं क्लौंक्लीं महाह्लदमायामातङ्गिनि ऐं क्लिन्ने ब्लूंस्त्रींश्री० । इत्यनुत्तरवाग्वादिनीयम् ॥ (१५) ४ ह्लींश्रीं हसखफ्रें हसकलरीं सौः श्री० । इत्यनुत्तरशाङ्करी ॥ (१६) ४ ह्लींश्रीं हसकल-हसकहल-सकलह्लीं श्रीमहात्रिपुरसुन्दरि सर्वानन्दमये बैन्दवे चक्रे परब्रह्मस्वरूपिणी परमात्मशक्तिः सर्वमन्त्रेश्वरी सर्वविद्येश्वरी सर्वपीठेश्वरी सर्ववीरेश्वरी सर्वयोगीश्वरी सर्ववागीश्वरी सर्वसिद्धीश्वरी सकलजगदुत्पत्तिमातृका सचक्रा सदेवता समुद्रा ससिद्धिः सायुधा सवाहना सपरिवारा सशक्तिका सालङ्कारा सर्वोपचारैः संपूजिताऽस्तु श्री० । इति श्रीमहात्रिपुरसुन्दरी मूलविद्या ॥ एता विद्याः स्वशिरसि संस्मृत्य षडाधारविद्यास्तर्पयेत् । ४ सं सर्वानन्दविभूत्यै स्वाहा, मूलाधारे । ४ रं सोहं परमविभूत्यै स्वाहा, स्वाधिष्ठाने । ४ हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा, नाभौ । ४ हंसः स्वात्मानं बोधय बोधय परमानन्दनाथश्री०, अनाहते । ४ सोहं परमात्मानं बोधय बोधय स्वात्मानन्दनाथश्री०, विशुद्धौ । ४ ह्लींश्रीं हंसः सोहं स्वच्छानन्दचित्प्रकाशामृतहेतवे स्वाहा, आज्ञायां । ततश्चरणविद्यां द्वादशान्ते तर्पयेत् ।

अथ चरणविद्याः । ४ क० ह० स० ह्रीं हंसः शिवः ऐंह्रींश्रीं हसखफ्रें हसक्षमलवरयूं सहक्षमलवरयीं हंस हसौं शुक्लविद्यामहापीठशुक्लपुष्पशुक्लमण्डलमहापीठशुक्लचरुकमहापीठशुक्लमन्त्रमहापीठशुक्लदीपशुक्ल-मुद्रामहापीठशुक्लनतिशुक्लमहाप्रकाशात्मकपरमशिवश्रीपादुकां पूजयामि हसौं हंसः हसक्षमलवरयूं हंसः सोहं स्वच्छचिदानन्दपरमहंसपरमात्मने स्वाहा, ४ त्रिपुरसुन्दरीब्रह्मविद्याश्रित-अमुकशक्तियुक्तश्रीपरमेष्ठिगुरु-अमुकानन्दनाथमुकशक्तियुक्तश्रीपरमगुरु-अमुकानन्दनाथामुकशक्तियुक्तश्रीगुरु-अमुकानन्दनाथश्रीपादुकां पूजयामि नमः। इति शुक्लचरणम् ॥ ४ क० ह० स० ह्रीं सोहं शिवः ऐंह्रींश्रीं हसखफ्रें हसक्षमलवरयूं सहक्षमलवरयीं सोहं हंसः श्रीरक्तविद्यामहापीठरक्तपुष्परक्तमण्डलमहापीठरक्तचरुकरक्तमन्त्रमहापीठरक्तदीपरक्तमुद्रामहापीठरक्तनति-रक्तमहाविमर्शात्मकपरशक्त्यम्बाश्री० । ४ स्ह्रीं सोहं सहक्षमलवरयीं सहक्षमलवरयूं हसखफ्रें श्रींह्रींऐंऐंह्रींश्रीं हसक्षमलवरयूं सहक्षमलवरयीं हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा इंह्रीं त्रिपुरसुन्दरि ब्रह्मविद्या-श्रितामुकशक्तियुक्तपरमेष्ठिगुरु-अमुकानन्दनाथामुकशक्तियुक्तपरमगुरु-अमुकानन्दनाथामुकशक्तियुक्तश्रीगुरु—अमु-कानन्दनाथश्री० । इति रक्तचरणम् ॥ ४ क० ह० स० ह्रीं हंसः सोऽहं श्रींह्रींऐंऐंह्रींश्रीं हसखफ्रें हसक्षमलवरयूं सहक्षमलवरयीं हंसः सोहं हस्रौं सहरीं मिश्रविद्यामहापीठमिश्रपुष्पमिश्रमण्डलमहापीठमिश्रचरुकमिश्रमन्त्रमहा-पीठमिश्रदीपमिश्रमुद्रामहापीठमिश्रनतिमिश्रमहाप्रकाशविमर्शात्मकपरमशिवपरशक्त्यम्बाश्री० । स्ह्रींहस्रौं सोहं हंसः सहक्षमलवरयीं हसक्षमलवरयूं हसखफ्रें श्रींह्रींऐंऐं ह्रींश्रीं हसक्षमलवरयूं सहक्षमलवरयीं हंसः सोहं स्वच्छानन्दपरमहंसपरमात्मने स्वाहा इंह्रींश्रीं महात्रिपुरसुन्दरीब्रह्मविद्याश्रित—अमुकशक्तियुक्तपरमेष्ठिगुरु—अमुकानन्दनाथ—अमुकशक्तियुक्तपरमगुरु——अमुकानन्दनाथ—अमुकशक्तियुक्तश्रीगुरु——अमुकानन्दनाथश्रीपादुकां पूजयामि नमः । इति मिश्रचरणम् ॥ एवं सर्वं स्वशिरसि संघट्टमुद्रया विन्यस्य पीठपूजामारभेत् । ४ मण्डूकाय नमः । एवं ४ कालाग्निरुद्राय नमः । मूलप्रकृत्यै० । आधारशक्त्यै० । कूर्माय० । अनन्ताय० । वराहाय० । पृथिव्यै० । इत्यादि परतत्त्वान्तं न्यासोक्तरीत्या संपूज्य, ४ श्रीचक्रराजाय नमः । ४ तत्र समस्तप्रकटगुप्तगुप्त-तरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनीश्रीचक्रदेवताश्री० । इति पुष्पाञ्जलिं दत्त्वा, भूबिम्बवृत्तयोर्मध्ये वायव्यादीशानान्तं ४ मित्रेशनाथश्री० । ४ उड्डीशनाथश्री० । ४ षष्ठीशनाथश्री० । ४ चर्यानाथश्री० । इति युगनाथानभ्यर्च्य, चक्रस्येशानादिचतुष्कोणेषु—४ गां गणपतिनाथश्री० । ४ वां वटुकनाथश्री० । ४ क्षां क्षेत्रपालनाथश्री० । चतुरस्रे ४ योगिनीश्री० । ४ अंआंसौः त्रिपुरामृतार्णवासनश्री० । पद्म-द्वये—४ ऐंक्लींसौः त्रिपुरेश्वरीपोताम्बुजासनश्री० । चतुर्दशारे ४ ह्रींक्लींसौः त्रिपुरसुन्दरीदेव्यात्मासनश्री० । दशारद्वये—४ ह्रैं ह्क्लीं ह्सौः त्रिपुरवासिनीसर्वचक्रासनश्री० । अष्टारे—४ हसैं हसक्लीं हसौः त्रिपुराश्रीसर्व-मन्त्रासनश्री० । त्रिकोणे—४ ह्रींक्लींब्लें त्रिपुरमालिनीसाध्यसिद्धासनश्री० । एवं षडासनानि चतुरस्रे पद्मद्वये चतुर्दशारे दशारद्वये अष्टारे त्रिकोणे च क्रमेण संपूज्य, ४ ऐं कामरूपपीठश्री० । ४ क्लीं पूर्णगिरिपीठश्री० । ४ सौः जालन्धरपीठश्री० । ४ ऐंक्लींसौः उड्याणपीठश्री० । इति त्रिकोणाग्रदक्षवाममध्येषु संपूज्य, ४ ह्रां पृथिव्यधिपतिब्रह्मप्रेतपा० । ४ ह्रीं जलाधिपतिविष्णुप्रेतपा० । ४ हुं तेजोधिपतिरुद्रप्रेतपा० । ४ स्हीं वाय्व-धिपतीशानप्रेतपा० । ४ क्लीं आकाशाधिपतिसदाशिवप्रेतपा० । इति मध्यपीठस्याग्नेयादिपादचतुष्टये मध्ये च पञ्चप्रेतासनानि संपूज्य, ४ प्रसूनतूलिकापा० । ४ महापद्मवनपा० । ४ ह्रींश्रींसौः कामेश्वरकामेश्वरीपा० । ततो देव्या मूर्ति कामेश्वराङ्कोपविष्टां ध्यात्वा—

ध्यायेत्परशिवाङ्कस्थां पाशांकुशधनुःशरैः । भासमानचतुर्बाहुमरुणामरुणांशुकाम् ॥

इति ध्यात्वा, ऐंह्रींश्रीं "प्रकटाद्याश्च योगिन्या महावीराः परापराः । सांनिध्यं कुलयागेऽस्मिन् कुर्वन्त्वद्य शिवाज्ञया" ॥ इति देवीमूर्तौ पुष्पाञ्जलिं ध्यात्वा त्रिखण्डामुद्रां बद्ध्वा, ४ हसैं हक्लीं हसौः इति पञ्चकूटविद्यया द्वादशान्ततश्चैतन्यमयीं परां देवीं वहन्नासापुटाध्वना पुष्पाञ्जलावानीय,

एह्येहि देवदेवेशि त्रिपुरे देवपूजिते । परामृतमये शीघ्रं सांनिध्यं कुरु सिद्धिदे ॥
महापद्मवनान्तःस्थे कारणानन्दविग्रहे । सर्वंभूहिते मातरेह्येहि परमेश्वरि ॥

अस्मिन्मण्डले सान्निध्यं कुरु २ नमः । इति पूर्वसंकल्पिते देवीमूर्तौ चैतन्यमावाह्यावाहन–स्थापन–संनिधापन–संनिरोधनमुद्राः प्रदर्श्यावगुण्ठनमुद्रयावगुण्ठ्य, शिरसि धेनुमुद्रयामृतीकृत्य, देवाङ्गे षडङ्गमन्त्रैः सकलीकृत्य परमीकरणमुद्रया परमीकृत्य,

मूलमन्त्रेण दीपिन्या मालिन्याऽर्घ्योदकेन च । त्रिवारं प्रोक्षयेदेवं देवशुद्धिरितीरिता ॥

इति क्रमेण सम्प्रोक्ष्य ध्यायेत् । तद्यथा—

ततः श्रीचक्रमारूढां ध्यायेत्त्रिपुरसुन्दरीम् । ततः पद्मनिभां ध्यायेद्बालार्ककिरणारुणाम् ॥ १ ॥
जपाकुसुमसङ्काशां दाडिमीकुसुमप्रभाम् । पद्मरागप्रतीकाशां कुंकुमोदरसन्निभाम् ॥ २ ॥
स्फुरन्मुकुटमाणिक्यकिङ्किणीजालमण्डिताम् । कालालिकुलसंकाशकुटिलालकपल्लवाम् ॥ ३ ॥
प्रत्यग्रारुणसंकाशवदनाम्भोजमण्डलाम् । किञ्चिदर्धेन्दुकुटिलललाटमृदुपट्टिकाम् ॥ ४ ॥
पिनाकिधनुराकारभ्रूलतां परमेश्वरीम् । आनन्दमुदितोल्लोललीलान्दोलितलोचनाम् ॥ ५ ॥
स्फुरन्मयूखसंघातविलसद्धेमकुण्डलाम् । स्वगण्डमण्डलाभोगजितेन्द्वमृतमण्डलाम् ॥ ६ ॥
विश्वकर्माविनिर्माणसूत्रसुस्पष्टनासिकाम् । ताम्रविद्रुमबिम्बाभरक्तोष्ठीममृतोपमाम् ॥ ७ ॥
दाडिमीबीजवज्राभदन्तपंक्तिविराजिताम् । रत्नद्वी(दी)पसमुद्भासिजिह्वां मधुरभाषिणीम् ॥ ८ ॥
स्मितमाधुर्यविजितमाधुर्यरससागराम् । अनौपम्यगुणोपेतचिबुकोद्देशशोभिताम् ॥ ९ ॥
कम्बुग्रीवां महादेवीं मृणाललिलितैर्भुजैः । मणिकङ्कणकेयूरभूषणैः परिशोभिताम् ॥ १० ॥
रक्तोत्पलदलाकारसुकुमारकराम्बुजाम् । कराम्बुजनखज्योत्स्नाविराजितनभस्तलाम् ॥ ११ ॥
मुक्ताहारलतोपेतसमुन्नतपयोधराम् । पीनवृत्तोन्नतकुचां तनुमध्येन शोभिताम् ॥ १२ ॥
त्रिवलीवलनायुक्तमध्यदेशसुशोभिताम् । लावण्यसरिदावर्ताकारनाभिविभूषिताम् ॥ १३ ॥
अनर्घरत्नखचितकाञ्चीयुक्तनितम्बिनीम् । नितम्बबिम्बद्विरदरोमराजिवरांकुशाम् ॥ १४ ॥
कदलीललितस्तम्भसुकुमारोरुमीश्वरीम् । लावण्यकदलीतुल्यजङ्घायुगलमण्डिताम् ॥ १५ ॥
गूढगुल्फपदद्वन्द्वप्रपदाजितकच्छपाम् । नूपुरैर्विलसत्पादपङ्कजातिमनोहराम् ॥ १६ ॥
ब्रह्मविष्णुशिरोरत्ननिर्घृष्टचरणाम्बुजाम् । तनुदीर्घांगुलीभास्वन्नखचन्द्रविराजिताम् ॥ १७ ॥
शीतांशुशतसंकाशकान्तिसन्तानहासिनीम् । लौहित्यजितसिन्दूरजपादाडिमरागिणीम् ॥ १८ ॥
रक्तवस्त्रपरीधानां पाशांकुशकरोद्यताम् । रक्तपुष्पनिविष्टां तु रक्ताभरणभूषिताम् ॥ १९ ॥
चतुर्बाहुं त्रिनेत्रां च पञ्चबाणधनुर्धराम् । कर्पूरशकलोन्मिश्रताम्बूलापूरिताननाम् ॥ २० ॥
महामृगमदोद्दामकुंकुमारुणविग्रहाम् । सर्वशृङ्गारवेषाढ्यां सर्वाभरणभूषिताम् ॥ २१ ॥
जगदाह्लादजननीं जगद्रञ्जनकारिणीम् । जगदाकर्षणकरीं जगत्स्थापनरूपिणीम् ॥ २२ ॥
सर्वमन्त्रमयीं देवीं सर्वसौभाग्यसुन्दरीम् । सर्वलक्ष्मीमयीं नित्यां परमानन्दनन्दिताम् ॥ २३ ॥
महात्रिपुरमुद्रां तु स्मृत्वावाहनरूपता । विद्ययावाह्य सुभगे नमस्तारिणियुक्तया ॥ २४ ॥
पूर्वोक्तया साधकेन्द्रो महात्रिपुरसुन्दरीम् । चक्रमध्ये तु संचिन्त्य ततः पूजनमारभेत् ॥ २५ ॥

इति । ज्ञानार्णवे—

शृणु देवि प्रवक्ष्यामि यजनं चान्तरं महत् । मूलादिब्रह्मरन्ध्रान्तं बिसतन्तुतनीयसीम् ॥ १ ॥
उद्यत्सूर्यसहस्राभां विद्युत्कोटिसमप्रभाम् । चन्द्रकोटिप्रभाद्राभां त्रैलोक्यैकप्रभामयीम् ॥ २ ॥
अशेषजगदुत्पत्तिस्थितिसंहारकारिणीम् । ध्यायेन्मनो यदा देवि निश्चलं जायते तदा ॥ ३ ॥

सहजानन्दसंदोहमन्दिरं भवति क्षणात् । मनो निश्चलतां प्राप्तं शिवशक्तिप्रभावतः ॥ ४ ॥
समाधिर्जायते तत्र संज्ञाद्वयविजृम्भितः । स्वयं प्रज्ञातनामैको ह्यसम्प्रज्ञातनामधृक् ॥ ५ ॥
स्वयं प्रज्ञातभेदस्तु शिवाधिक्येन जायते । असम्प्रज्ञातसंज्ञस्तु शक्त्याधिक्येन वै भवेत् ॥ ६ ॥
स्वयं प्रज्ञातभेदस्तु तीव्रस्तीव्रतरो भवेत् । असम्प्रज्ञातभेदस्तु मन्दो मन्दतरस्तथा ॥ ७ ॥
हास्यरोदनरोमाञ्चकम्पस्वेदादिलक्षितः । तीव्रस्तीव्रतरो देवि समाधिरुपलक्षितः ॥ ८ ॥
शांभवेन तु वेधेन सुखीभूयान्निरन्तरम् । अन्तर्यागविधिं कृत्वा बहिर्यागं समारभेत् ॥ ९ ॥
एवं विन्यस्तदेहः सन् सर्वात्मा साधकोत्तमः । ध्यायेन्निरामयं वस्तु जगत्त्रयविमोहिनीम् ॥ १० ॥
अशेषव्यवहाराणां साधिनीं संविदं पराम् । उद्यत्सूर्यसहस्राभां दाडिमीकुसुमप्रभाम् ॥ ११ ॥
जपाकुसुमसंकाशां पद्मरागमणिप्रभाम् । स्फुरत्पद्मनिभां तप्तकाञ्चनाभां परेश्वरीम् ॥ १२ ॥
रक्तोत्पलदलाकारपादपल्लवराजिताम् । अनर्घरत्नखचितमञ्जीरचरणद्वयाम् ॥ १३ ॥
पादांगुलीयकस्वर्णतेजोराशिविराजिताम् । कदलीललितस्तम्भसुकुमारोरुमण्डलाम् ॥ १४ ॥
नितम्बबिम्बविलसद्रक्तवस्त्रपरिष्कृताम् । मेखलावज्रमाणिक्यकिङ्किणीनादविभ्रमाम् ॥ १५ ॥
अलक्ष्यमध्यमां निम्ननाभियुक्तोदरीं पराम् । रोमराजिलताभूतमहाकुचफलान्विताम् ॥ १६ ॥
सुवृत्तनिबिडोत्तुङ्गकुचमण्डलराजिताम् । नवरत्नप्रभाराजद्ग्रैवेयवरभूषणाम् ॥ १७ ॥
श्रुतिभूषामनोरम्यकपोलस्थलमञ्जरीम् । उद्यदादित्यसंकाशताटङ्कसुमुखप्रभाम् ॥ १८ ॥
पूर्णचन्द्रमुखीं पद्मवदनां मीनलोचनाम् । स्फुरन्मदनकोदण्डसुभ्रुवं पद्मलोचनाम् ॥ १९ ॥
ललाटपट्टसंराजद्रत्नाढ्यतिलकप्रभाम् । मुक्तामाणिक्यघटितमुकुटस्थलकिङ्किणीम् ॥ २० ॥
स्फुरच्चन्द्रकलाराजन्मुकुटां लोचनत्रयाम् । प्रवालवल्लीविलसद्बाहुवल्लीचतुष्टयाम् ॥ २१ ॥
इक्षुकोदण्डपुष्पेषुपाशांकुशचतुर्भुजाम् । सर्ववेदमयीमम्बां सर्वसौभाग्यसुन्दरीम् ॥ २२ ॥
सर्वतीर्थमयीं देवीं (सर्वकामप्रपूरणीम् । सर्वक्षेत्रमयीं दिव्यां सर्वदेवस्वरूपिणीम् ॥ २३ ॥
सर्वशास्त्रमयीं देवीं सर्वागमनमस्कृताम् । सर्वज्ञानमयीं देवीं) सर्वदानवसेविताम् ॥ २४ ॥
सर्वानन्दमयीं ज्ञानगह्वरां संविदं पराम् । एवं ध्यात्वा परामम्बां वह्नाडीपुटक्रमात् ॥ २५ ॥
आवाह्य चक्रमध्ये तु मुद्रया हि त्रिखण्डया । संस्थितां पूजयेत्तत्र श्रीपीठान्तर्निवासिनीम् ॥ २६ ॥
मुद्राः संदर्शयेत्तत्र तर्पणंस्तु त्रिधा यजेत् । लयाङ्गं कल्पयेत् देहे देव्यास्तु परमेश्वरि ॥ २७ ॥
गन्धपुष्पाक्षतादीनि देव्यै सम्यग निवेदयेत् । उपचारैः षोडशभिः सम्पूज्य परदेवताम् ॥ २८ ॥
तर्पणानि पुनर्दद्यात्त्रिवारं मूलविद्यया । ....॥

इति । ततो मूलविद्यान्ते श्रीमहात्रिपुरसुन्दरीनित्याश्रीपादुका पूजयामीति त्रिः पुष्पाञ्जलिं दत्त्वा तर्पयाम्यन्तं सन्तर्प्य, बालान्ते श्रीमहात्रिपुरसुन्दरि एतत्ते आसनं नमः। एवं स्वागतं नमः। एतत्ते पाद्यं नमः। एष तेऽर्घ्यः स्वाहा। एतत्ते आचमनीयं सुधा। एष ते मधुपर्कः सुधा। एतत्ते आचमनीयं सुधा। इति समर्प्य, द्रांद्रींक्लींब्लूंसः हसखफ्रें क्रोंहसौंऐं इति नवबीजैर्नव मुद्राः प्रदर्श्य, स्वर्णपादुके उपनीयोत्तरतः स्नानमण्डपमानीय, रत्नसिंहासने संस्थाप्याद्यादिचन्दनान्तान् उपचारारान् निवेद्य, केशप्रसाधनमभ्यङ्गं गन्धामलकोद्वर्तनमुष्णोदकस्नानं पञ्चगव्यस्नानं पञ्चामृतस्नानं समाप्याङ्गप्रोञ्छनं केशसंस्कारं चिकुरशोधनं कृत्वा, भगवति एतत्ते स्नानीयं नमः। ततः एतत्ते वस्त्रयुग्मं नमः। इति वस्त्रयुग्मं परिधाप्य, नीराजनादिमङ्गलाचारान् विधाय भूषणमण्डपे रत्नसिंहासने समुपवेश्य, मुकुटरत्नताटङ्कनासामौक्तिकग्रैवेयहारकेयूरकङ्कणांगुलीयकरत्नबन्धनमध्यबन्धनकाञ्चीकलापपादकटकनूपुरपादांगुलीयकादिनानाजातीयनानादेशीयविविधभूषणैर्भूषयित्वा, सर्वाङ्गे महामृगमदलेपनं कृत्वा, कण्ठे कह्लारमालां बद्ध्वा चक्षुषोर्दिव्याञ्जनं रक्षाञ्जनं भाले

आदर्शदर्शनं छत्रचामरे समर्प्य, पूजामण्डपमानीय, पुनः कामेश्वराङ्के समुपवेश्य सर्वोपचारैः सम्पूज्य यथोपचारं प्रथमादिभिः संतर्प्य, पुष्पाञ्जलिं दत्त्वा नैवेद्यताम्बूलान्तानि निवेद्य प्रार्थयेत् ॥

संविन्मये परे देवि परामृतरसप्रिये । अनुज्ञां देहि देवेशि परिवारार्चनाय मे ॥

इति पुष्पाञ्जलिपुरःसरमनुज्ञां प्राप्य श्रीचक्रात्मनोर्मध्ये त्रिकोणवृत्तचतुरस्रमण्डलं विलिख्य, तत्र तिथिमयीर्नित्याः पूजयेत् । प्रतिपत्प्रभृतिपूर्णिमापर्यन्तं कामेश्यादिनित्याः पूजयेत् । त्रिकोणमध्ये प्रधानदेवतात्वेन तत्तिथिनित्यां पूजयेत् । तद्रेखासु शेषाः पूज्याः, एवं शुक्लपक्षे । कृष्णपक्षे तु प्रतिपदादिदर्शान्तं चित्रादिकामेश्यन्तं पूजनीयम् । एता नित्याः प्रागेवोद्धृता ज्ञातव्याः । मध्ये श्रीविद्यामुच्चार्य श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि० । ततो मध्यबिन्दोरभितः अग्नीशासुरवायव्यमध्ये दिक्षु षडङ्गानि सम्पूज्य, मध्यत्रिकोणप्राक्त्रिकोणयोर्मध्ये देव्याः पृष्ठभागे त्रिपंक्त्या दिव्यौघसिद्धौघमानवौघान् सम्पूज्य, चरणत्रयविद्यया मानवौघान्ते स्वगुरुक्रमं सम्पूज्य, मध्यत्रिकोणरेखात्रये पञ्चपञ्च क्रमेण स्वरानुद्भाव्य, प्रागुक्तमन्त्रैः पञ्चदश नित्याः सम्पूज्य, विसर्गयुक्तमूलविद्यया मध्ये मूलदेवीं यष्ट्वा नवावरणपूजां कुर्यात् ।

तत्र भूबिम्बे प्रथमरेखायां पश्चिमादिदिक्षु वायव्यादिविदिक्षु च अणिमादिदशसिद्धिदेवता यजेत् । तत्रादौ ४ त्रैलोक्यमोहनचक्राय नमः । चतुरस्ररेखायै नमः । इति पुष्पं दत्त्वा । ४ अणिमासिद्धिदेवीश्री० । ४ लघिमासिद्धिदेवीश्री० । ४ महिमासिद्धिदेवीश्री० । ४ ईशित्वसिद्धिदेवीश्री० । ४ वशित्वसिद्धिदेवीश्री० । ४ प्राकाम्यसिद्धिश्री० । ४ भुक्तिसिद्धिश्री० । ४ इच्छासिद्धिश्री० । ४ रससिद्धिश्री० । ४ मोक्षसिद्धिश्री० । इति दशकं सम्पूज्य, चतुरस्रमध्यरेखायै नमः । इति पुष्पाञ्जलिं दत्त्वा, आं ब्रह्माणीश्री० । ईं माहेश्वरीश्री० । ऊं कौमारीश्री० । ॠं वैष्णवीश्री० । ॡं वाराहीश्री० । ऐं इन्द्राणीश्री० । औं चामुण्डाश्री० । अः महालक्ष्मीश्री० । एताः पश्चिमादिद्वारेषु वायव्यादिकोणेषु च पूजयेत् । ततश्चतुरस्रान्त्यरेखायै नमः । इति पुष्पाञ्जलिं दत्त्वा, ४ द्रां सर्वसंक्षोभिणीमुद्राशक्तिश्री० । ४ द्रीं सर्वविद्राविणी० । ४ क्लीं सर्वाकर्षिणी० । ४ ब्लूं सर्ववशङ्करी० । ४ सः सर्वोन्मादिनी० । ४ क्रों सर्वमहांकुशा० । ४ हसखफ्रें सर्वखेचरी० । ४ हसौं सर्वबीजमुद्रा० । ४ ऐं सर्वयोनिमुद्रा० । ४ ऐंक्लींसौः सर्वत्रिखण्डामुद्रा० । अंआंसौः त्रिपुराचक्रेश्वरीनित्याश्री० । एताः प्रकटयोगिन्यस्त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजितास्तुष्टा वरदाः सन्तु । इति पुष्पाञ्जलिं दत्त्वा द्रामिति सर्वसंक्षोभिणीमुद्रां दर्शयेत् । ततः श्रीपात्रस्थबिन्दुना बिन्दौ प्रधानदेवतां त्रिवारं संतर्प्य योनिमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्त्वा,

अभीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति समर्प्य द्वितीयावरणं पूजयेत् । अत्र तु त्रैलोक्यमोहनादिचक्रत्रये शङ्खोदकेन सर्वसौभाग्यदायकादिषट्चक्रे श्रीपात्रस्थजलेनाथवा शङ्खस्थवारिणैवेति सर्वत्र सम्प्रदायः । इति प्रथमावरणम् ॥

अथ द्वितीयावरणम् । ४ सर्वाशापूरकषोडशदलचक्राय नमः । इति पुष्पाञ्जलिं दत्त्वा पश्चिमादिवामावर्तेन पूजयेत् । ४ अं कामाकर्षिणीनित्याकलाश्री० । एवं ४ आं बुद्ध्याकर्षिणी० । ४ इं अहंकाराकर्षिणी० । ४ ईं शब्दाकर्षिणी० । ४ उं स्पर्शाकर्षिणी० । ४ ऊं रूपाकर्षिणी० । ४ ऋं रसाकर्षिणी० । ४ ॠं गन्धाकर्षिणी० । ४ लृं चित्ताकर्षिणी० । ॡं धैर्याकर्षिणी० । ४ ऐं स्मृत्याकर्षिणी० । ४ ऐं नामाकर्षिणी० । ४ ओं बीजाकर्षिणी० । ४ औं आत्माकर्षिणी० । ४ अं अमृताकर्षिणी० । ४ अः शरीराकर्षिणी० । ४ ऐंक्लींसौः त्रिपुरेश्वरीचक्रेश्वरीनित्याश्री० । एता गुप्तयोगिन्यः सर्वाशापूरके चक्रे समुद्रा इत्यादिना समर्प्य, द्रीमिति सर्वविद्राविणीं मुद्रां प्रदर्श्य "अभीष्टसिद्धिं मे देहीति द्वितीयावरणार्चनम्" इति पुष्पाञ्जलिं दद्यात् । इति द्वितीयावरणम् ॥

अथ तृतीयावरणम् । ४ सर्वसंक्षोभणाष्टदलचक्राय नमः । अनङ्गकुसुमाद्यास्तु पूर्वादिदिक्षु

अग्नेयादिविदिक्षु च पूजयेत् । ४ कं ५ अनङ्गकुसुमादेवीश्री० । ४ चं ५ अनङ्गमेखला० । ४ टं ५ अनङ्गमदना० । ४ तं ५ अनङ्गमदनातुरा० । ४ पं ५ अनङ्गरेखा० । ४ यं ४ अनङ्गवेगिनी० । ४ शं ४ अनङ्गांकुशा० । ४ ळं क्षं अनङ्गमालिनी० । ह्रींक्लींसौः त्रिपुरसुन्दरीचक्रेश्वरीनित्याश्री० । एता गुप्ततरयोगिन्यः सर्वसंक्षोभणे चक्रे समुद्रा इत्यादिना समर्प्य, क्लीमित्याकर्षिणीमुद्रां प्रदर्श्य, "अभीष्टसिद्धिं मे देहीत्यादि तृतीयावरणार्चनम्" इति पुष्पाञ्जलिं समर्पयेत् । इति तृतीयावरणम् ॥

अथ चतुर्थावरणम् । पश्चिमादिवामावर्तेन पूजयेत् । ४ सर्वसौभाग्यदायकचतुर्दशारचक्राय नमः । इति पुष्पाञ्जलिं दत्त्वा, ४ अं सर्वसंक्षोभिणीश्री० । ४ इं सर्वविद्राविणी० । ४ उं सर्वाकर्षिणी० । ४ ऋं सर्वाह्लादिनी० । ४ लृं सर्वसंमोहिनी० । ४ एं सर्वस्तम्भिनी० । ४ ऐं सर्वजृम्भिणी० । ४ ओं सर्ववशङ्करी० । ४ औं सर्वरञ्जिनी० । ४ हं सर्वोन्मादिनी० । ४ यं सर्वार्थसाधनी० । ४ रं सर्वसम्पत्प्रपूरणी० । ४ लं सर्वमन्त्रमयी० । ४ वं सर्वद्वन्द्वक्षयंकरी० । इति सम्पूज्य, ऐंह्लींश्रीं हैं हक्लीं हसौः त्रिपुरवासिनीचक्रेश्वरीनित्याश्री० । एताः सम्प्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्रा इत्यादिना समर्प्य, ब्लूं सर्ववशकरीमुद्रां प्रदर्श्य "अभीष्टसिद्धिं मे देहीत्यादि चतुर्थावरणार्चनम्" इति पुष्पाञ्जलिं समर्पयेत् । इति चतुर्थावरणम् ॥

अथ पञ्चमावरणम् । (बहिर्दशारचक्रे) पश्चिमादिवामावर्तेन पूजयेत् । तत्र ४ सर्वार्थसाधकबहिर्दशारचक्राय नमः । इति पुष्पं दत्त्वा, ४ तं सर्वसिद्धिप्रदादेवीश्री० । ४ थं सर्वसम्पत्प्रदा० । ४ दं सर्वप्रियङ्करी० । ४ धं सर्वमङ्गलकारिणी० । ४ नं सर्वकामप्रदा० । ४ टं सर्वदुःखविमोचिनी० । ४ ठं सर्वमृत्युप्रशमनी० । ४ डं सर्वविघ्नविनाशिनी० । ४ ढं सर्वाङ्गसुन्दरी० । ४ णं सर्वसौभाग्यदायिनी० । ४ हसैं हसक्लीं हसौः त्रिपुराश्री चक्रेश्वरीनित्याश्री० । एताः कुलकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्रा इत्यादिना समर्प्य, सः इति सर्वोन्मादिनीमुद्रां प्रदर्श्य "अभीष्टसिद्धिं मे देहीत्यादि पञ्चमावरणार्चनम्" इति पुष्पाञ्जलिं निवेदयेत् । इति पञ्चमावरणम् ॥

अथ षष्ठावरणम् । अन्तर्दशारचक्रे पश्चिमादिविलोमेन पूजयेत् । ४ सर्वरक्षाकरान्तर्दशाचक्राय नमः । इति पुष्पाञ्जलिं दत्त्वा, ४ चं सर्वज्ञादेवीश्री० । ४ छं सर्वशक्ति० । ४ जं सर्वैश्वर्यप्रदा० । ४ झं सर्वज्ञानमयी० । ४ ञं सर्वव्याधिविनाशिनी० । ४ कं सर्वाधारस्वरूपा० । ४ खं सर्वपापहरा० । ४ गं सर्वानन्दमयी० । ४ घं सर्वरक्षास्वरूपिणी० । ४ ङं सर्वेप्सितफलप्रदा० । ४ ह्रींक्लींब्लें त्रिपुरमालिनीचक्रेश्वरीनित्या० । एता निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्रा इत्यादिना समर्प्य, क्रों इत्यंकुशमुद्रां प्रदर्श्य "अभीष्टसिद्धिं मे देहीत्यादि तत्षष्ठावरणार्चनम्" इति पुष्पाञ्जलिं निवेदयेत् । इति षष्ठावरणम् ॥

अथ सप्तमावरणम् । अष्टारचक्रे प्रागादिवामावर्तेन वशिन्याद्याः पूजयेत् । तत्र ४ सर्वरोगहराष्टारचक्राय नमः । इति पुष्पाञ्जलिं दत्त्वा, ४ अं १६ ब्लूं वशिनीवाग्देवताश्री० । ४ कं ५ कलह्रीं कामेश्वरीवाग्देवताश्री० । ४ चं ५ नवलीं मोदिनीवाग्देवता० । ४ टं ५ य्लूं विमलावाग्देवताश्री० । ४ तं ५ जम्रीं अरुणावाग्देवताश्री० । ४ पं ५ हसलवयूं जयिनीवाग्देवता० । ४ यं ४ झमरयूं सर्वेश्वरीवाग्देवता० । ४ शं ४ क्षम्रीं कौलिनीवाग्देवता० । ह्लींश्रींसौः त्रिपुरासिद्धाचक्रेश्वरीनित्याश्री० । एता रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादिना समर्प्य, हसखफ्रें इति सर्वखेचरीमुद्रां प्रदर्श्य "अभीष्टसिद्धिं मे देहीत्यादि सप्तमावरणार्चनम्" इति पुष्पाञ्जलिं निवेदयेत् । इति सप्तमावरणम् ॥

अथाष्टमावरणम् । [1]त्रिकोणाग्रदक्षवामकोणेषु तद्बहिरन्तरालचक्रे । तत्र ४ सर्वसिद्धिप्रदान्तरालचक्राय

[1]अन्तस्त्रिकोणं बन्धूककुसुमारुणं ध्यात्वा तत्र रक्तवर्णा वराभयसुधापात्रकरा नवरत्नविभूषणाः स्वस्वायुधभूषितहस्तका यौवनोन्मत्तविग्रहा आयुधदेवता ध्यायेत् । त्रिकोणाग्रकोणे शुक्लां शुक्लाम्बरविभूषणां भिक्षु-

नमः। इति पुष्पाञ्जलिं दत्त्वा, द्रांद्रींक्लींब्लूंसः यांरांलांवांशां जं जृम्भणेभ्यः कामेश्वरकामेश्वरीवाणेभ्यो नमः। ४ द्रां ५ यां ५ धंथं संमोहनकामेश्वरकामेश्वरीधनुर्भ्यां नमः। ४ द्रां ५ यां ५ आंह्रीं वशीकरणकामेश्वरकामेश्वरीपाशाभ्यां नमः। ४ द्रां ५ यां ५ क्रोंह्रीं स्तम्भनकामेश्वरकामेश्वर्यंकुशाभ्यां नमः। ४ ऐं अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मके जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मकरुद्रात्मकशक्तिश्रीकामेश्वरीदेवी०। ४ क्लीं सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्ण्वात्मकशक्तिश्रीवज्रेश्वरीदेवीश्री०। ४ सौः सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मकशक्तिश्रीभगमालिनीदेवी०। ४ हस्रैं हसकलरीं हस्रौः त्रिपुराम्बाचक्रेश्वरीनित्याश्री०। एता अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्रा इत्यादिना समर्प्य, हसौं इति सर्वबीजमुद्रां प्रदर्श्य "अभीष्टसिद्धिं मे देहीत्यादि अष्टमावरणार्चनम्" इति निवेदयेत्। इत्याष्टमावरणम्॥

अथ नवमावरणम्। [१]ऐंक्लींसौः मूलं सर्वानन्दमयबैन्दवचक्राय नमः। इति पुष्पाञ्जलिं दत्त्वा, ब्रह्मचक्रे श्रीमदुड्याणपीठे चर्यानन्दनाथात्मके तुरीयदशाधिष्ठायके परब्रह्मात्मकशक्तिश्रीमहात्रिपुरसुन्दरीश्री०। ४ हसकलरडैं हसकलरडीं हसकलरडौः त्रिपुरभैरवीचक्रेश्वरीनित्याश्री०। एषा परापररहस्ययोगिनी सर्वानन्दमये बैन्दवे चक्रे सर्वचक्रेश्वरी सर्वमन्त्रेश्वरी सर्वपीठेश्वरी सर्वविद्येश्वरी सर्ववागीश्वरी सर्वसिद्धीश्वरी सर्वजगदुत्पत्तिकामातृका सचक्रा ससिद्धिः सायुधा सवाहना सशक्तिका सालङ्कारा सपरिवारा सर्वोपचारैः संपूजिता तुष्टा वरदास्तु इति समर्प्य, ऐं इति सर्वयोनिमुद्रां प्रदर्श्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्" इति निवेदयेत्। इति नवमावरणम्॥

४ ऐंक्लींसौः आंईंॐयांरांलांवांशां कामेश्वरीच्छाकामफलप्रदे सर्वसत्त्ववशंकरि जगत्क्षोभकरि हूँ ३ द्रांद्रींक्लींब्लूंसः हसौं क्लीं ऐं कामेश्वरीसमयदेवताश्री०। इति विद्यया देव्या मूलाधारे पुष्पाञ्जलिं समर्पयेत्। ४ ह्लीं सर्वकार्यसाधके वज्रेश्वरी वज्रपञ्जरमध्यगते ह्रीं क्लिन्ने ऐंक्रों नित्यमदद्रवे ह्रीं वज्रेश्वरीसमयदेवताश्री०। इति देव्या हृदि पुष्पांजलिं समर्पयेत्। ४ भगमालिनीविद्यामुच्चार्य भगमालासमयदेवता श्री०। इति बिन्दौ पुष्पांजलिः। ४ क्लीं भगवति ब्लूं नित्याकामेश्वरि स्त्रीं सर्वसत्त्ववशंकरि सःत्रिपुरभैरवि ऐं विच्चे त्रिपुरसुन्दरीसमयदेवता श्री०। इति शिरसि पुष्पांजलिः। ४ मूलविद्यया सप्तधा शिरसि संतर्प्य, ४ ऐंक्लींसौः श्रीविद्याषोडशाक्षरीमुच्चार्य सप्तदशीं कलां यष्ट्वा प्रागुक्तां कामकलां भावयेत्। "कलारूपमिदं देवि प्रोक्तमेतत् परात्परम्।" इत्युक्तरीत्या स्मृत्वा, वटुकयोगिनीगणपतिक्षेत्रपालेभ्यो बलीनुत्सृज्य सर्वभूतबलिं तन्मन्त्रेणोत्सृज्य, ततो नैवेद्यपात्रं साधारं सान्नं संस्थाप्य धूपदीपौ प्रदर्शयेत्, अस्त्रेण संप्रोक्ष्य गन्धादिभिरभ्यर्च्य धेनुमुद्रां प्रदर्श्य "ऐं जगध्वनिमन्त्रमातः स्वाहा" इति घण्टां संपूज्य वामकरे गृहीत्वा वादयन् नीचैर्धूपं समर्पयेत्।

वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

इति पठित्वा समर्पयेत्।

धनुःपुष्पबाणपुस्तकाक्षमालाधरां त्रिनेत्रां चन्द्रचूडां कामेश्वरीं ध्यायेत्। वामकोणे नीलवर्णां रक्तवस्त्राभरणामिक्षुचापपुष्पबाणवराभयकरां त्रिनेत्रां चन्द्रशेखरां वज्रेश्वरीं ध्यायेत्। दक्षिणकोणे हेमाभां पाशांकुशजपमालापुस्तककरां त्रिनेत्रां चन्द्रशेखरां भगमालिनीं ध्यायेत्। चक्रेश्वरीं त्रिपुराम्बामुद्यत् सूर्यसहस्राभां त्रिनेत्रां शशाङ्कमुकुटां रक्ताम्बरां रक्तालंकारभूषितां पीनोन्नतघनस्तनीं शोणितपिच्छिलमालाधरां पुस्तकाभयजपमालावरकरां ध्यायेत्।

[१]बिन्दुचक्रं परब्रह्मात्मकं ध्यात्वा, साध्यसिद्धासने स्वसमानकामेश्वरपराङ्के स्वस्तिकासनेनोपविष्टां प्रमुदितां श्रीललितां ध्यायेत्। अत्र सर्वावरणदेवता मूलदेव्यभिमुखोपविष्टाज्ञातव्याः। (सौ० र०)

सुप्रकाशो महादीपः सर्वत्र तिमिरापहः । सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥

इत्युच्चैर्दीपं समर्पयेत् । ततो नैवेद्यमस्त्रेण सम्प्रोक्ष्य, त्रिशूलमुद्रया संरक्ष्य, वाय्वादिबीजैः शोषणादिकं विधाय, सुरभिमुद्रयामृतीकृत्य, गन्धाद्यैरलंकृत्य महत्तरनैवेद्यं स्वाहान्तेन मूलेन समर्पयेत् ।

नैवेद्यं षड्रसोपेतं पञ्चभक्ष्यसमन्वितम् । सुधारसमहोदारं शिवेन सह गृह्यताम् ॥

इत्यंगुष्ठशिरसि कनिष्ठानामायोगात् । तत्र वामकरेण विकचोत्पलनिभां ग्रासमुद्रां प्रदर्श्य दक्षहस्तेन प्राणादिमुद्राः प्रदर्शयेत् । प्राणाय स्वाहा, इत्यादिना समर्प्य स्वगुरूक्तक्रमेण तत्त्वत्रयमन्त्रैः आत्मतत्त्वाधिपतिः श्रीकामेश्वरी तृप्यतु । एवं विद्यातत्त्वाधिपतिः, शिवतत्त्वाधिपतिः, सर्वतत्त्वाधिपतिः । ततः कामेश्वरस्तृप्यतु इत्यादि चतुस्तत्त्वैः संतर्प्य, ऐं परायै श्रीमहात्रिपुरसुन्दर्यै नैवेद्यं स्वाहा । क्लीं परायै० । सौः परायै० । इति नैवेद्य समर्प्य, "अमृतोपस्तरणमसि स्वाहा" इत्युक्त्वा प्राणादिमुद्राः प्रदर्श्य, प्राणाय स्वाहा इत्यादि पञ्चाहुतीर्निवेद्य, जवनिकामधः कृत्वा मूलमन्त्रं स्मरन् यावत् तृप्तिभोजनं तावदाकांक्षमाणः क्षणं विश्रमेत् । अत्र वटुकादिबलिर्नैवेद्यात् पूर्वमित्यस्मत्सम्प्रदायः । केचित्तु नैवेद्योत्तरं वदन्ति । तत्तु यथासम्प्रायं कार्यमिति । मध्ये पानीयमुत्तरापोशनं करशुद्ध्यादिमुखवाससमर्पणान्तं कुर्यात् । अत्र नैवेद्यसमर्पणानन्तरं नित्यहोमं कृत्वा बलितर्पणादि कुर्यात् । ततः कुलदीपं निवेदयेत् । शालिगोधूमादिपिष्टेन गुडेन सजीरकेण शालिद्वितीयेन सार्धं त्रिकोणाकारान् डमरुकरूपेण नव पञ्च त्रीन् वा विधाय घृतेन पाचयित्वा, ताम्रादिभाजनेऽष्टदलादि तत्संख्यया मण्डलं विधाय, अष्टदलं चेद्वशिन्याद्यष्टकं मध्ये देवीं यष्ट्वा, पञ्च चेत् कामेश्वर्यादि भैरवीर्यजेत् । त्रिकोणं चेद् गुणत्रयात्मिकां परेश्वरीं यजेत् । गुह्यमालिनीविद्यया फलपुष्पताम्बूलसुवर्णादीनि निक्षिपेत् । "ऐं महादीपतेजोवति अमोघाज्ञाप्रभामालिनी भगा" इयं गुह्यमालिनी ॥ ततो रत्नेश्वर्याभिमन्त्र्य पूजयित्वा दीपभाजनमुद्धृत्य सामयिकश्लोकद्वयं पठन् देव्युपरि नवधा पञ्चधा त्रिधा वा भ्रामयेत् ।

अन्तस्तेजो बहिस्तेज एकीकृत्य निरन्तरम् । अध ऊर्ध्वंक्रमेणैव कुलदीपं निवेदयेत् ॥
समस्तचक्रचक्रेशीयुते देवि नवात्मिके । आरात्रिकमिदं भद्रे गृहाण मम सिद्धये ॥

इत्याभ्यां श्लोकाभ्यां लवणनिम्बपत्रादिना दृष्टिमुत्तार्य चतुस्तत्पिण्डादिभिरपि । ततो मूलेन प्राणायामत्रयं कृत्वा, अस्याः—शिरसि आनन्दभैरवाय ऋषये नमः । मुखे पंक्तिच्छन्दसे नमः । हृदये श्रीत्रिपुरसुन्दर्यै देवतायै नमः । गुह्ये वाग्भवकूटबीजाय नमः । पादयोः शक्तिकूटशक्तये नमः । नाभौ कामराजकूटकीलकाय नमः । इति विन्यस्य मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः इति कृताञ्जलिरुक्त्वा, बालाबीजत्रयद्विरावृत्त्या पञ्चदशीकूटत्रयद्विरावृत्त्या महाषोडशीखण्डत्रयद्विरावृत्त्या च त्रिधा षडङ्गन्यासत्रयं विधाय, सर्वज्ञायै हृदयाय नमः इत्यादिमन्त्रैरपि षडङ्गन्यासं विधाय मूलविद्यान्यासान् कुर्यात् । ज्ञानार्णवे—"ततो न्यासादिकं कुर्यात् संनाहं नु शरीरके" । इत्यारभ्य "कुमार्या त्रिपुरेशान्याः षडङ्गानि च पूर्ववत्" । इत्यन्तमुक्त्वा,

अथ वक्ष्ये महेशानि श्रीविद्यान्यासमुत्तमम् । सम्पूर्णां चिन्तयेद्विद्यां ब्रह्मरन्ध्रेऽरुणप्रभाम् ॥ १ ॥
स्रवत्सुधाषोडशार्णां महासौभाग्यदां न्यसेत् । वामांसदेशे सौभाग्यदण्डिनीं भ्रामयेत् ततः ॥ २ ॥
रिपुजिह्वाग्रहां मुद्रां पादमूले प्रविन्यसेत् । त्रैलोक्यस्य त्वहं कर्ता ध्यात्वैवं तिलकं न्यसेत् ॥ ३ ॥
सम्पूर्णामेव वदने वेष्टनत्वेन विन्यसेत् । पुनः पूर्णां च वदने गलोर्ध्वे विन्यसेत् ततः ॥ ४ ॥
पुनः सम्पूर्णया देहे वेष्टनेन च विन्यसेत् । व्यापकान्ते योनिमुद्रां मुखे क्षिप्त्वाभिवन्द्य च ॥ ५ ॥
श्रीविद्यापूर्णरूपोऽयं न्यासः सौभाग्यवर्धनः । ब्रह्मरन्ध्रे क्षिपेद् देवि मणिबन्धे न्यसेत्ततः ॥ ६ ॥
ललाटेऽनामिकां कुर्यात्षोडशार्णां स्मरन् बुधः । त्रैलोक्यस्य तु कर्ताहमिति सम्यग् विभावयेत् ॥ ७ ॥
सम्मोहनाख्यो देवेशि न्यासोऽयं क्षोभकारकः । त्रैलोक्यमरुणं ध्यायन् श्रीविद्यां मनसि स्मरन् ॥ ८ ॥

पादयोर्जङ्घयोर्जान्वोः कट्योरन्धुनि मस्तके । नाभौ पार्श्वद्वये चैव स्तनयोरंसयोस्तथा ॥ ९ ॥
कर्णयोर्ब्रह्मरन्ध्रे च वदनेऽन्धुनि पार्वति । ततः कर्णप्रदेशे तु करवेष्टनयोः क्रमात् ॥ १० ॥
संहारोऽयं महान्यासो बीजैः षोडशभिः क्रमात् । श्रीविद्यायाः षोडशार्णैर्न्यासैर्विश्वेश्वरो भवेत् ॥ ११ ॥

इत्यादिरीत्या मन्त्रन्यासान् विधाय प्राग्वद् ध्यात्वा, प्रागुक्तकुरुकुल्लादिस्मरणपूर्वकं शतादिसंख्यया मूलविद्यां जप्त्वा गुह्यातिगुह्येति च निवेदयेत् । भूयोऽपि मुद्रानवकं प्रदर्श्य सहस्राक्षर्या पुष्पाञ्जलिं दत्त्वा स्तोत्रैः स्तुत्वा बहुशः प्राणायामादिभिः प्रार्थयेत् ॥

ततः श्रीचक्रं चतुराम्नायत्वेन विभाव्य तत्तदाम्नायविद्याभिर्व्यस्तसमस्तबालया वा पूजयेत् । तद्यथा—चतुरस्रषोडशाष्टदलमण्डलं सृष्ट्यात्मकं पूर्वाम्नायं विभाव्य, तदीश्वरीं रुद्रशक्तिं यजेत् । मन्वश्रं द्विदशारं स्थितिरूपं दक्षिणाम्नायं मत्वा तदीश्वरीं रुद्राणीं यजेत् । अष्टारं त्र्यस्रं संहाररूपं पश्चिमाम्नायं मत्वा तदीश्वरीं कुब्जिकां यजेत् । बिन्दुचक्रात्मकमनाख्यात्वेन विभाव्य उत्तराम्नायं मत्वा तदीश्वरीं कालसङ्कर्षिणीं यजेत् ।

ततश्च षड्दर्शनात्मकमनुसन्धाय तत्तन्मन्त्रैरर्चयेत् । भूगेहत्रयं बौद्धजैनचार्वाकदर्शनरूपं मत्वा तदीश्वरीं वज्रतारां यजेत् । "ओं तारे तुत्तारे तुरे स्वाहा" । इयं वज्रतारा ॥ षोडशाष्टदलं वैदिकदर्शनं मत्वा सचतुर्थपादां सशिखां गायत्रीं यजेत् । मन्वश्रं सौरदर्शनं विभाव्य सौराष्टाक्षरेण सूर्यं यजेत् । द्विदशारं वैष्णवदर्शनं मत्वा नारायणाष्टाक्षरेण विष्णुं यजेत् । अष्टारं शाक्तदर्शनं मत्वा बालया यजेत् । त्रिकोणं सान्तरालं शैवदर्शनमनुसंधाय "ह्रौं नमः शिवाय हसौं नमः" इत्यनेन शिवं यजेत् ॥

ततः श्रीचक्रं सिद्धान्तरूपं मत्वा तत्तत्सिद्धान्तविद्याभिरर्चयेत् । त्रैलोक्यमोहनचक्रं सृष्टिसृष्ट्यात्मकं मत्वा चार्वाकसिद्धान्तं यजेत् । चांचींचूं चमलवरयूं चार्वाकदर्शनाधिदेवतायै श्रीचण्डिकायै नमः ॥ सर्वाशापूरकचक्रं सृष्टिस्थित्यात्मकं मत्वा बौद्धसिद्धान्तमर्चयेत् । तद्यथा—४ नवसहकछलहरीं बौद्धदर्शनाधिदेवतायै तारायै नमः ॥ सर्वसंक्षोभणं चक्रं सृष्टिसंहारात्मकं मत्वा जैनसिद्धान्तमर्चयेत् । तद्यथा—आंज्रौंक्रौंछ्रींझ्रूंज्रौं जैनदर्शनाधिदेवतायै अर्हन्तायै नमः ॥ सर्वसौभाग्यदायकं चक्रं स्थितिसृष्ट्यात्मकं मत्वा सांख्यसिद्धान्तमर्चयेत् । ४ अइउऋलृ सांख्यदर्शनाधिदेवतायै श्रीमूलप्रकृत्यै नमः ॥ सर्वार्थसाधकं चक्रं स्थितिरूपं मत्वा प्राक् गायत्र्या वैदिकसिद्धान्तमर्चयेत् । "परो रजसेसावदोम्" इति चतुर्थः पादः ॥ सर्वरक्षाकरं चक्रं स्थितिसंहाररूपं मत्वा सौरसिद्धान्तमर्चयेत् । श्रींह्रींक्लीं ॐऐंह्लींश्रीं ॐक्लींह्रींश्रीं ॥ सर्वरोगहरं चक्रं संहारसृष्टिरूपं ध्यात्वा ॐनमो नारायणायेति वैष्णवसिद्धान्तं यजेत् ॥ सर्वसिद्धिप्रदं चक्रं संहारस्थित्यात्मकं शाक्तसिद्धान्तं बालया शक्तिदर्शनाधिदेवतायै श्रीत्रिपुरायै नमः इति यजेत् ॥ सर्वानन्दमयचक्रं संहारसंहृतिरूपं मत्वा शैवदर्शनं यजेत् । प्रासादपुटितषडक्षर्या शैवदर्शनाधिदेवतायै श्रीब्रह्मविद्यायै नमः ॥ बिन्दौ व्योम्नि महार्थनाख्याभासाचक्रे सर्वात्मनि शिवाद्वयमनुसन्धाय ज्ञानदर्शनं यजेत् । ४ हसखफ्रें महाचण्डयोगेश्वराय संविदद्वैतसमयाधिदेवतायै कालसंकर्षिण्यै नमः । इति प्रदक्षिणनमस्कारादिभिः परितोष्य, जानुभ्यामवनिं गत्वा स्वाभिमतं प्रार्थ्यं पञ्चमुद्राभिर्नुत्वा,

चतुरश्रं च मत्स्यं च मुद्गरं गोमुखं तथा । योनिमुद्रेति पञ्चैता गुरुदेवाभिवन्दने ॥

इति । ततः

रश्मिरूपा महादेव्या अत्र पूजितदेवताः । श्रीसुन्दर्यङ्गलीनास्ताः सन्तु सर्वसुखावहाः ॥

इति देव्यै पुष्पाञ्जलिं दत्त्वा, संहारमुद्रया

गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि । यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ॥

इति पुष्पं गृहीत्वाघ्राय ब्रह्मरन्ध्रं नीत्वा

तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वरि । यत्र ब्रह्मादयो देवाः सुरास्तिष्ठन्ति मे हृदि ॥

इति पुष्पं हृदयपर्यन्तं नीत्वा मुञ्चेदिति देवतां स्वहृद्युद्वास्य, प्राग्वत् पात्रोद्वासनमपि विधाय श्रीगुरुं प्रणमेत् । ततो ब्रह्मार्पणमन्त्रेण जलं भूमौ निक्षिप्य, ऐशान्यां दिशि नैवेद्यशेषं निर्माल्यपुष्पं निक्षिप्य "क्लीं नमः उच्छिष्टचण्डालि मातङ्गि सर्ववशङ्करि स्वाहा" इति तत्र जलमुत्क्षिप्य,

व्योमचक्रसमारूढे भुवनान्तरचारिणि । चरुकं देहि मे देवि प्रसादं कुरु सिद्धिदे ॥

इत्यनेन सचरुकं दीपं गृहीत्वा

देहस्थाखिलदेवता गजमुखाः क्षेत्रेश्वरा भैरवा
योगिन्यो वटुकाश्च यक्षपितरो वेतालकाश्चेटकाः ।
अन्ये दिक्षुचरास्तथैव खेचरा भूताः पिशाचा ग्रहा–
स्तृप्ताः स्युः कुलपुत्रकस्य पिबतः पानं सदीपं चरुम् ॥

इत्यनेन मूलमन्त्रमुच्चरन् तदात्मसात् कुर्यात् । ततो योगिनीयोगिभिर्वृतः किञ्चित्कालं नीत्वा मिश्र-चरणविद्यया स्वात्मानं सच्चिदानन्दमयं परामृश्य सुखीभूयात् इति श्रीविद्यापद्धतिः ॥

अथ सहस्राक्षर्यो लिख्यन्ते । तास्तु यामल–महार्णवोक्तभेदेन नानाविधाः सन्ति । तत्रादावुपस्थान-सहस्राक्षरी । ऐं नमो भगवति त्रिपुरसुन्दरि दुर्गतितारिणि क्षमरीं प्रीं कर २ विसर २ नृत्य २ वद २ वाग्वादिनि स्वाहा ह्लीं नमः क्लीं नमः श्रीप्लींक्लीं नमः सुरासुरवन्दिते सकलजनक्षोभिणि श्रींश्रींश्रीं कारिणि द्रांद्रां द्राविणि मोंमों मोहिनि स्तंस्तं स्तम्भिनि आंआं आकर्षिणि परमसुभगे नमः कमलवासिनि रस २ वरवर्तिनि ह्लां ३ करि ह्लीं ३ कारि ह्लां ३ कारिके कांकां काकिनि रांरां राकिणि डांडां डाकिनि हांहां हाकिनि ऐं शाङ्करि गन २ किश २ भ्रम २ वदवद सत्यसत्य उत २ मालिनि महामाये तत्त्वविग्रहे अरूपे अमले विमलेऽजिते अपराजिते मर्द २ हर २ संहर २ ॐह्लींऐं कुरु २ लेप २ किटि ॐजूंसः सौःक्लीं ऐंश्रीं नद २ नादबीजे त्रांत्रींत्रूंत्रैंत्रौंत्रः म्रांम्रींम्रूंम्रैंम्रौंम्रः य्रांय्रींय्रूंय्रैंय्रौंय्रः रींरींरूंरैंरौंरः ल्रांल्रींल्रूंल्रैंल्रौंल्रः व्रांव्रींव्रूंव्रैंव्रौंव्रः श्रांश्रींश्रूंश्रैंश्रौंश्रः ष्रांष्रींष्रूंष्रैंष्रौंष्रः स्रांस्रींस्रूंस्रैंस्रौंस्रः ह्लांह्लींह्लूंह्लैंह्लौंह्लः क्ष्रांक्ष्रींक्ष्रूंक्ष्रैंक्ष्रौंक्ष्रः गौरि रुद्रदयिते वज्रिणि वज्रनायिके कपालमालाधरे प्रेतासननिवासिनि सर्वतत्त्वावतारे अवतर २ गर्ज २ शोषय २ सर्वमन्त्रान् ग्रस २ सर्वदुष्टान् मर्द २ सर्वयन्त्रान् भञ्ज २ सर्वदुखं तपतप तापय तापय तारे तारिणि परविद्यां छिन्धि छिन्धि परकायं प्रविश २ वज्रिणि गोंगों गोचरि खेंखें खेचरि भूंभूं भूचरि हंसवाहे हस २ तिष्ठ २ बन्धय २ धारय धारय ऊ(तू)र्णामणि मोचय २ विमोचय २ विमोचनि पश्य २ हुंरावे मेरुमन्दरसंकाशे महाविद्येश्वरि वाचं नियच्छ आच्छादिनि सरस्वति महाश्वेते किणिविद्ये अर्ककोटिसहस्र-मालिनि पुरपुर द्रुम २ अनन्तक्षोभकारिणि रणे वज्रादिकर्तरि विद्याविनोदिनि त्वर २ त्वरिते वह २ क्रन्दय २ संक्रामय २ मदिरानन्दघूर्णिते कामेश्वरि गांगींगूंगैंगौंगः कन्दर्पमदविह्वले स्फुरद्योनिचक्रे भगवति भगमालिनि ईश्वरचक्रकपालडमरुकधारिणि महाभैरवि वसुधारे वसुमति धरिणिधरे वशय २ कर्मधारिणि कामेशि जिह्वया वद २ मनसा रम २ क्रन्द वस २ बिन्दुप्रिये ह्लूं ५ रद शारदशशांकनिकाशे शारदे विद्या-दानविशारदे क्लीं गणनायिके आनन्दमयविग्रहे गृहीतपूर्णकपाले ज्वलज्जिह्वे ह्लादिनि नित्यक्लिन्ने मदद्रवे स्वाहा सौंसौंक्षूं सरस्वत्यै नमः मदिरे मधुमति मदाभोगसुभगे भगमाले मुरु २ चुरु २ धुन २ स्फुर २ स्फोटय २ घण्टारवेण निरन्तरपरबलभेदिनि फ्रें कुब्जिकायै ह्लांह्लीं नजणङमे अघोरमुखि किणि २ विच्चे ऐंह्लींश्रींफ्रें-ह्लींहुंफट् सर्वज्ञे जम्भ २ जन्मजरामरणदारिद्र्यघातिनि सर्वसिद्धिनिधाने महाभयधारिणि ॐहंसः हुंफट् विद्येश्वरि ज्रांज्रींज्रूंज्रैंज्रौंज्रः ल्रींप्रींसौः स्रौंक्ष्रौं क्षुद्रविद्राविणि विद्रुतविद्रुमप्रभे क्ष्म्रीं ह्स्रौः चण्डि चण्डेश्वरि ब्रह्माण्डमालाधारिणि बन्धूकशोणाधरे त्रैलोक्यसत्ये नमः प्रसीद २ ऐंश्रींफ्रेंसौः ऐंह्लींश्रींश्रीमहात्रिपुरसुन्दरि

स्वाहा ॥ इति त्रिपुरसुन्दर्युपस्थानसहस्राक्षरी ॥ (त्रैपुरीविद्यापठितसिद्धा शुभदा साधकानाम् ।)

अथ प्रस्तारसहस्राक्षरी । तत्र—

मनुश्चन्द्रः कुबेरश्च लोपामुद्राथ मन्मथः । अगस्त्यो नन्दिसूर्यौ च इन्द्रः स्कन्दः शिवस्तथा ॥
क्रोधभट्टारको देव्या द्वादशैते उपासकाः । सर्वप्रस्तारसहिता सहस्रार्णाधुनोच्यते ॥
श्रीविद्याजपसंपत्त्यै सर्वकामफलाप्तये । ···· ···· ···· ····॥

सुरासुरवन्दितचरणारविन्दे जपाकुसुमनिभे योगिनीगणसेविते मधुमदमुदितमानस संध्यावर्णदुकूलवसने सततमुदितमहामदे माणिक्यकिरणारुणे मन्त्रपवित्रविग्रहे बिन्दुनादरूपिणि सच्चिन्मात्रस्वरूपे हसौं हसकलरीं हसौंः स्हौः क्लौ हसौः हसकएईलह्रीं हसकएईलह्रीं सहकएईलह्रीं नमो देवि आगच्छ संनिधिं कुरु २ सर्वतो मां रक्ष २ वर्धय २ नन्दय २ स्थापय २ प्रापय प्रापय सर्वकार्याणि मम साधय पोषय ह्स्रांह्स्रींह्स्रूं ह्स्रैं ह्स्रौंह्स्रः सकलहएईलऐंह्रीं हसकएईलह्रीं नमो भगवति भगरूपे पापापहारिणि राजानं मे वशमानय विपदो दलय स्त्रीराकर्षयाकर्षय क्लेदय २ मनांसि क्षोभय २ मादय २ उल्लासयोल्लासय सौभाग्यं मे संपादय संपादय सौन्दर्यं मे जनय फट् हसहरैं हसहरीं हसहरौं हसहरैं हसहरीं हसहरौं ४ कएईलह्रीं हसकलह्रीं नमः कल्याणकारिणि लाक्षाभरणप्रभारञ्जितशरीरे रक्ताम्बुजनिषण्णे पाशांकुशेक्षुचापकुसुमबाणधारिणि चतुर्भुजे चन्द्रशेखरे चतुरङ्गे चतुवर्गफलप्रदे दिव्यमालालंकृतदिव्यदेहे मम सकलसमीहितानि साधय साधय स्फारय २ स्थिरय २ हसकलरैं हसकलरीं हसकलरौं हसकलरैं हसकलरीं हसकलरौं ४ सहकलह्रीं सहकलरीं सहकलह्रीं नमो वरदे रेते सुरेते सत्ये नित्ये निरञ्जने जगत्क्षोभ (करेक्षोभ) कारिणि कमले कमनीयाङ्गे कलावति सुखानि मे परिपूरय राज्यं प्रयच्छ २ कीर्ति वितारय २ परसैन्यं स्तंभय २ भेदय २ मर्दय २ च्छेदय २ उत्सादयोत्सादय हसकलह्रैं हसकलह्रीं हसकलह्रौं सकलह्रैं सकलह्रीं सकलह्रौं ५ सहसकलह्रीं सकलह्रीं नमः परमेश्वरि परमात्मस्वरूपे करुणामृतवर्षिणि द्रांद्रींक्लींब्लूंसः मनोज्ञे मुशलायासे मणिकङ्कणपरिचित्रितकुण्डलिनि कोमलाङ्गे अंकुशेनाकर्षयाकर्षय पाशेन बन्धय २ चापेन मोहय मोहय बाणेन भिन्धि २ छिन्धि २ डांडींडूंडैंडौंडः सहकलरडैं सहकलरडीं सहकलरडौं सहकलरीं सहकलरीं सहकलह्रीं नमस्त्रिपुरे वादय २ त्रिपुरेश्वरि विघ्नेश्वरि वीरवन्दिते विद्याधरवीज्यमानचामरे विद्यादानविशारदे मदोदयाघूर्णनेत्रे त्रिनेत्रे श्रीत्रिपुरसुन्दरि डांडींडूंडैंडौंडः हसकलडैं हसकलडीं हसकलडौः हसकलडैं हसकलडीं हसकलडौः सकलह्रीं सकलह्रीं नमः त्रिपुरवासिनि त्रिपुराश्रि देवि प्रपद्ये संप्रपद्ये सदा प्रपद्ये शरणं प्रपद्ये शरण्ये शरणागतवत्सले मदने मदनदेहे सर्वजनहृदयहारिणि सर्वतत्त्वहृदयङ्गमे सर्वभूतवशंकरि मम सर्वभूतानि वशमानयानय कामान् पूरय २ कीर्तिं पादय २ दुरितं खण्डय २ क्लेशं नाशय २ शत्रून् त्रोटय २ बन्धं छेदय २ मोक्षं कुरु कुरु ऐंह्रींश्रीं हसकलरडरहैं हसकलरडरहीं हसकलरडरहौः सहकलरडरहैं सहकलरडरहीं सहकलरडरहौः हसकलह्रीं हसकलह्रीं हसकलह्रीं ॐनमस्त्रिपुरमालिनि चिन्तितार्थविद्याविधायिनि वित्तदे ब्रह्मविष्णुरुद्रशङ्करसदाशिवपूजिते सुपुज्ये मम मनोरथान् पूरय २ समुद्रादुत्तारय २ अरिष्टं भञ्जय २ राजनीतिं स्थापय २ दुष्कर्माणि कृन्त २ कृत्यां कर्तय २ ऐंह्रींश्रीं हसकलरडरहरैं, हसकलरडरहरीं, हसकलरडरहरौः हसकलरडरसहरीं ऐंह्रींश्रीं हसखफ्रें हसौः त्रिपुरसिद्धे त्रिपुरानन्दयोगेश्वरि कुलाकुलमहारूपे अरुणावृतमहारूपे हसक्षमलवरयीं सकलनृपवशङ्करि सर्वसंपत्तिकारिणि सर्वैश्वर्यप्रदे सर्वदुःखविदारिणि सर्वज्ञे हसकलरडसहरडैं, हसकलरडसहरडीं, हसकलरडसहरडौः, हसकलरडसरडौः, हसकलरडसरडीं हसकलरडसरडैं, कएईलह्रीं हसकहलह्रीं सर्वानन्दमये बिन्दुचक्रस्थे परब्रह्मस्वरूपिणि परमात्माशक्तिसर्वचक्रेश्वरि सर्वमन्त्रेश्वरि सर्वयोगीश्वरि सर्वजगदुत्पत्तिमातृके सर्वविद्यामयि महाभैरवि कवलीकृतसर्वतत्त्वात्मिके बिन्दुसर्वात्मिके महाश्रीत्रिपुरसुन्दरि नमः ऐंईंऔंः ॐऐंक्लींऐं ऐंह्रींश्रींऔं नमः शिवाय नमः शिवायै ॥ इति प्रस्तारसहस्राक्षरी ॥

अथावरणसहस्राक्षरी। ॐऐंह्लींश्रीं हंसः ॐ नमो भगवति अक्षोभ्ये रूक्षकर्णे राक्षसिपक्षत्रणे क्षपे पिङ्गलाक्षि अरुणे क्षये लीले लोले ललिते लूते लुलिते लम्बिके लङ्केश्वरि लासे विमले हुताशनि विशालाक्षि हूंकारे वडवामुखि महारवे महाक्रोडक्रोधिनि खरास्ये सर्वज्ञे तरले तारे दृष्टिहृष्टे खगकन्धरे सारसि रससंग्रहिणि तालजंघे करङ्किणि मेघनादे प्रचण्डोग्रे कालकर्णि चेलप्रदे चम्पे चम्पावति प्रचम्पे प्रलयान्तकि पितृवक्त्रे पिशाचाक्षि पिशुनि लोलुपे वानति वानरि वामविकृतास्ये वायुवेगे बृहत्कुक्षिविकृते धिश्वरूपिणि यमजिह्वे जये दुर्जये पुमन्तकि बिडालरेवति पूतने विजये अनन्ते क्रन्दिनि चण्डि रेकणि (सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्ववशंकरि) सर्वोन्मादिनि सर्वमहांकुशे खेचरि (खचक्रधारिणि) सर्वबीजरूपे महायोनिरूपे त्रिखण्डे, अनङ्गब्राह्मि अनङ्गमाहेश्वरि अनङ्गकौमारि अनङ्गवैष्णवि अनङ्गवाराहि अनङ्ग-इन्द्राणि अनङ्गचामुण्डे अनङ्गमहालक्ष्मि प्रकटयोगिनीशि चार्वाकदर्शनाङ्गि त्रैलोक्यमोहनचक्रस्वामिनि, कामाकर्षिणि (बुद्ध्याकर्षिणि अहङ्काराकर्षिणि शब्दाकर्षिणि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिणि आत्माकर्षिणि) अमृताकर्षिणि शरीराकर्षिणि गुप्तयोगिनीशि बौद्धदर्शनाङ्गि सर्वाशापूरकचक्रस्वामिनि, अनङ्गकुसुमे अनङ्गमेखले अनङ्गमदने अनङ्गमदनातुरे अनङ्गरेखे अनङ्गवेगिनि अनङ्गांकुशे अनङ्गमालिनि अतिगुप्तयोगिनीशि रौद्रदर्शनाङ्गि सर्वसंक्षोभणचक्रस्वामिनि पूर्वाम्नायेशि सृष्टिप्रदे, सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसम्मोहनि सर्वस्तम्भनि सर्वजृम्भिनि सर्ववशंकरि सर्वरञ्जनि सर्वोन्मादिनि सर्वार्थसाधनि सर्वसम्पत्प्रपूरणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयङ्करि सम्प्रदाययोगिनीशि सर्वदर्शनाङ्गि सर्वसौभाग्यदायकचक्रस्वामिनि, सर्वसिद्धिप्रदे सर्वसम्पत्प्रदे सर्वप्रियङ्करि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वदुःखविमोचनि सर्वमृत्युप्रशमनि सर्वविघ्ननिवारणि सर्वाङ्गसुन्दरि सर्वसौभाग्यदायिनि कुलकौलयोगिनीशि सर्वार्थसाधकचक्रस्वामिनि, सर्वज्ञे सर्वशक्ते सर्वैश्वर्यप्रदायिनि सर्वज्ञानमयि सर्वव्याधिविनाशिनि सर्वाधारस्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षास्वरूपे सर्वेप्सितफलप्रदे निगर्भयोगिनीशि सर्वरक्षाकरचक्रस्वामिनि दक्षिणाम्नायेशि स्थितिप्रदे, ब्लूं वशिनि कलह्रीं कामेशि न्ब्लूं मोदिनि य्लूं विमले ज्म्रीं अरुणे हसलवयूं जयिनि झमरयूं सर्वेश्वरि क्ष्म्रीं कौलिनि रहस्ययोगिनीशि शाक्तदर्शनाङ्गि सर्वरोगहरचक्रस्वामिनि, द्रां क्लिन्ने मोहनकामबाण द्रीं शोषणकामबाण क्लीं नित्य—संदीपनकामबाण ब्लूं मंद-संतापनकामबाण सः द्रवे उन्मादनकामबाण द्रांद्रीं-क्लींब्लूंसः जम्भिनि जम्भय २ मोहिनि मोहय २ आं आकर्षिणि आकर्षय २ स्तम्भिनि स्तम्भय २ ऐं कामेशि क्लीं वज्रेशि सौः भगमाले अतिरहस्ययोगिनीशि सर्वसिद्धिमयचक्रस्वामिनि, कामराजविद्यामहात्रिपुरसुन्दरी-मातः परापररहस्ययोगिनीशि सौगतदर्शनाङ्गि सर्वानन्दमयचक्रस्वामिनि पश्चिमाम्नायेशि अंआंसौः त्रिपुरे ऐंक्लींसौः त्रिपुरेश्वरि ह्रींक्लींसौः त्रिपुरसुन्दरि हैं हक्लींह्सौः त्रिपुरवासिनि हसैंहसक्लींहसौः त्रिपुराश्रि ह्रींक्लींब्लें त्रिपुरमालिनि ह्रींश्रींसौः त्रिपुरासिद्धे हस्रैं हसकलरीं हस्रौं त्रिपुराम्बे हसकलरडैं हसकलरडीं हसकलरडौः महात्रिपुरभैरवि अं कामेशि आं भगमाले इं नित्यक्लिन्ने ईं भीरुण्डे उं वह्निवासिनि ऊं महा-वज्रेश्वरि ऋं शिवदूति ॠं त्वरिते लृं कुलसुन्दरि ॡं नित्ये एं नीलपताके ऐं विजये ओं सर्वमङ्गले औं ज्वाला-मालिनि अं विचित्रे अः कामेश्वरि विद्यामालिनि अकुले कुलाकुलमहाकुले सर्वोत्तरपश्चार्थज्ञानप्रदे सर्वदर्शनाङ्गमयि सर्वदर्शनोत्तीर्णस्वरूपिणि सर्वाध्वशोधनि कालकालेशवर्णे नवाक्षरि बालविद्या षोडशाधिका च नवकूटद्वयं सहखफ्रें आनन्देश्वरि घोरकालिनि अम्बाश्रीपादुकां पूजयामि हंसः श्रींह्रींऐं॥ इत्यावृत्तिसहस्रार्णविद्या त्रैलोक्यपूजिता ॥ कुलार्णवे—

अथाभिधास्ये संक्षेपादन्त्ययागविधिक्रमम् । साधकानां च सिद्धानां दीक्षितानां शिवागमे ॥ १ ॥
दीक्षितास्त्रिविधाः प्रोक्ता उत्तमाधममध्यमाः । तत्रोत्तमस्य नान्त्येष्टिः सर्वोत्तीर्णात्स्वदर्शनात् ॥ २ ॥

अधमस्यापि नान्त्येष्टिर्मोचिका सामयं जगत् । पारिशेष्यादथान्त्येष्टिर्मध्यमस्येति नः स्थितिः ॥ ३ ॥
अथवा श्रद्धया कुर्यात्सर्वेषामुत्तमो गुरुः । स्वात्मशुद्ध्यर्थमेकत्र······ रुपयैव·········हि (?) ॥ ४ ॥
साक्षात्करन्ध्रमध्येन ब्रह्मरन्ध्रविनिर्गतः । उत्तमो मध्यमस्त्वास्यश्रोत्रनासादिमार्गतः ॥ ५ ॥
अधमः पायुलिङ्गाभ्यां केवलं नारकी हि सः । पैशाचलोकमाप्नोति पायुमार्गविनिर्गतः ॥ ६ ॥
आस्येन देवलोकस्थो नासया नरलोकभाक् । श्रोत्रेण पितृलोकः स्याद् देवलोकस्तु चक्षुषा ॥ ७ ॥
करन्ध्रेण शिवस्थानमिति लोकस्य निर्णयः । मृतानां कृपयान्त्येष्टिः कर्तव्या देशिकेन तु ॥ ८ ॥
परीक्ष्य कालं विधिवद् देशिको मृत्यहात्पुरा । सप्ताहे वाथ पञ्चाहे त्र्यहे वाथ कुशार्पणम् ॥ ९ ॥
विधाय गात्रमानीय भैरवान् योगिनीस्तथा । समभ्यर्च्य गुरुं पश्चादीशानं योगविष्टरे ॥ १० ॥
कृत्वा च प्रणतिं सम्यक् पुष्पाञ्जलिपुरःसरम् । इति विज्ञापयेद्दीनो जानुभ्यामवनीं गतः ॥ ११ ॥
देवदेव महादेव करुणालय शङ्कर । नित्यानन्द निराधार निराकुल निरञ्जन ॥ १२ ॥
आज्ञया तव देवेशि सिद्ध्यत्येव ममेप्सितम् । तथापि शिव सर्वज्ञ यानि दुश्चरितानि मे ॥ १३ ॥
प्रमादादथवा ज्ञानात्तानि सर्वाणि सर्वदा । क्षमस्व परमेशान दासोऽहं तव चाव्यय ॥ १४ ॥
इति विज्ञाप्य गुरवे दिव्यागमपुरःसरम् । स्वार्जितद्रव्यजातं यत्तत्सर्वं विनिवेदयेत् ॥ १५ ॥
त्वदाज्ञयार्जिता ह्येते त्वदर्थं विनियोजिताः । इत्युक्त्वा प्रणमेद् भूयो गुरुभक्तिपरायणः ॥ १६ ॥
गुरौ व्याप्ते प्रतिष्ठाप्य पादुकां तस्य पीठतः । समभ्यर्च्य यथान्यायं सर्वं तत्र समाचरेत् ॥ १७ ॥
पुत्रशिष्यादिभिः कार्यं कारयित्वा विचक्षणः । स्वयं कर्तुमशक्तश्चेत् सर्वदा तद्दिने पुनः ॥ १८ ॥
तत्प्रसादं महायत्नात् स्वीकर्तव्यं मनीषिभिः । अवशिष्टं तु यद्वस्तु चतुर्धा च विभज्य तत् ॥ १९ ॥
औरसाय स्वपुत्राय दद्याद्भागद्वयं पुनः । गोत्रिभ्य एकमेकं तु स्वस्यान्तेष्ट्यर्थमादिशेत् ॥ २० ॥
श्रीचक्रं पूजयेत्तावद्यावत् पञ्चत्वमाप्नुयात् । उत्क्रान्तिकाले तत्कर्णे जपेतद्गुरुपादुकाम् ॥ २१ ॥
चरणत्रयमन्त्रं च वदेच्चैवमथो गुरुः । तत्तत्समयनिष्ठानां तत्तन्मन्त्रं जपेद्गुरुः ॥ २२ ॥
यस्मिन् निष्ठा परा तस्य तत्कर्णे सर्वथा जपेत् । अनुसन्धानबाहुल्यात् तत्र चित्तलयो भवेत् ॥ २३ ॥
श्रीभूतिराजलब्धानि श्रीशम्भुवदनाम्बुजात् । वाक्यानि ब्रह्मविद्यायाः प्रणवैः पुटितानि च ॥ २४ ॥
अथोच्यते ब्रह्मविद्या सद्यः प्रत्ययकारिका । शिवः श्रीभूतिराजो यां सुविद्यां विन्यवेदयत् ॥ २५ ॥
सर्वेषामेव भूतानां मरणे समुपस्थिते । यया पठितयोत्क्रम्य जीवो याति निरञ्जनम् ॥ २६ ॥
या ज्ञानिनोऽपि सम्पूर्णकृत्यस्यापि श्रुता सती । प्राणविच्छेदजां मृत्युव्यथां सद्यो व्यपोहति ॥ २७ ॥
यामाकर्ण्य महामोहविवशोऽपि क्रमागतः । प्रबोधं वक्तृसांमुख्यमभ्येति रभसात् स्वयम् ॥ २८ ॥
तारो माया वेदकलो मातृतारो नवात्मकः । प्रतिवाक्यं यदाद्यन्ते योजिता परिपठ्यते ॥ २९ ॥

ॐ ह्रीं ह्रूं फ्रें हसक्षमलवरयूं इति निष्कलब्रह्मविद्या ।

एतां तु वक्ष्यमाणेषु आद्यन्ते विनियोजयेत् । ···· ···· ···· ····॥

ॐ ह्रीं ह्रूं फ्रें हसक्षमलवरयूं ।

परमपदात्त्वमिहागाः सनातनस्त्वं जहिहि देहान्तम् ।
पादांगुष्ठादि विभो निबन्धनं ह्युग्रम् । हसक्षमलवरयूं फ्रें ह्रूं ह्रीं ओं ॥ १ ॥
५ गुल्फान्ते जानुगतं जत्रुस्थं बन्धनं तथा मेढ्रे ।
जहिहि पुरमुग्रमध्यं हृत्पद्मात्त्वं समुत्तिष्ठ ५ ॥ २ ॥
५ हंस हयग्रीव विभो सदाशिवस्त्वं परोऽसि जीवाख्यः ।
रविसोमवह्निसंघट्टं बिन्दुं देवं हहह समुत्क्राम ५ ॥ ३ ॥

५ हंसमहामन्त्रमयः सनातनस्त्वं शुभाशुभोपेक्षी ।
मण्डलमध्यनिविष्टः शक्तिमहासेतुकारणमहार्थः ।
कमलोभयनिविष्टः प्रबोधमायाहि देवतादेव ५ ॥ ४ ॥
५ अज्ञानात्त्वं बद्धः प्रबोधितोत्तिष्ठ देवादे ५ ॥ ५ ॥
५ व्रज तालुमाह्वयान्तं ह्यौडुम्बरघट्टितं महाद्वारम् ।
प्राप्य प्रयाहि हंहो हंहो वा वामदेव पदम् ५ ॥ ६ ॥
५ ग्रन्थीश्वर परमात्मन् सान्त महातालुरन्ध्रमासाद्य ।
उत्क्राम हे देहेश्वर निरञ्जनं शिवपदं प्रयाह्याशु ५ ॥ ७ ॥
५ आक्रम्य मध्यमार्गं प्राणापानौ समाहृत्य ।
धर्माधर्मौ त्यक्त्वा नारायण प्रयाहि शान्तान्तम् ५ ॥ ८ ॥
५ हे ब्रह्मन् हे विष्णो हे रुद्र शिवोऽसि वासुदेवस्त्वम् ।
अग्नीषोम सनातन मृत्पिण्डं जहिहि हे महाकाश ५ ॥ ९ ॥
५ अंगुष्ठमात्रमलमावरणं जहिहि हे महासूक्ष्म ५ ॥ १० ॥
५ पुरुषस्त्वं प्रकृतिमयैर्बद्धोऽहङ्कारतन्तुना बन्धैः ।
अभवाभव नित्योदित परमात्मंस्त्यज सरागमध्वानम् ५ ॥ ११ ॥
५ ह्रींहूं-मन्त्रशरीरमविलम्बमाशु त्वमेहि देहान्तम् ५ ॥ १२ ॥
५ तदिदं गुणभूतमयं त्यज स्वं षाट्कोशिकं पिण्डम् ५ ॥ १३ ॥
५ मा देहं भूतमयं प्रगृह्यतां शाश्वतं महादेहम् ५ ॥ १४ ॥
५ मण्डलममलमनन्तं त्रिधा स्थितं गच्छ भित्त्वैतत् ५ ॥ १५ ॥

इति श्रीब्रह्मविद्या ।

ज्ञातं चेत्स्वयमेवासून् नियम्य प्रजपेत्तदा । अन्यथा शृणुयाद्वापि तदेकाग्रमना भवेत् ॥ १ ॥
निर्वाणविद्यानिरतो निर्वाणपदभाग्भवेत् । श्रुत्वैतस्मिंस्तथान्त्येष्टिकर्ता स शिवसंयुतः ॥ २ ॥
स्नात्वा सम्यगलंकृत्य नित्यकृत्यं यथाविधि । विधायामन्दसम्पूर्णः कृत्वा न्यासादिकं तनौ ॥ ३ ॥
अभिमन्त्र्य जलं पश्चात् पञ्चप्रणवैर्गुरूक्तितः । पिण्डं संशोधयेद्विद्वानथ वासरपञ्चके ॥ ४ ॥
अथवा दीपिनीमुक्त्वा ज्वालामालिन्यनन्तरम् । व्योमषष्ठखरार्धेन्दुहंसफडन्तको मनुः ॥ ५ ॥
मायाबीजान्तिकः प्रोक्तः शोधकः सर्वदेहिनाम् । आकृष्य स्थापयेत् प्रेतपिण्डे तु गुरुवाक्यतः ॥ ७ ॥

ॐह्रीं हसखफ्रें अं हसक्षमलवरयूं ऐं । दीपिनी, ज्वालामालिनी । हूंहंसः फट् ह्रीं हसक्षमलवरयूं हसखफ्रें ह्रीं ॐ । इति दीपिन्यादिविधिः ।

एवं विशोधिते देहे शक्तिचालनयोगतः । नेत्ररन्ध्रादिमार्गेण लोकोत्तरविनिर्मि(र्ग)तः ॥ ७ ॥
वियद्वह्निभृग्वारूढं बिन्दुमुच्चार्य मोक्षदे । चक्षुरादिपदान्ते तु प्रेतनाम तथोच्चरेत् ॥ ८ ॥
आवाहयामीत्यनेन सपञ्चप्रणवेण वै । ....॥

५ ह्रूंः मोक्षदे चक्षुराद्यवयववन्तमावाहयामि ५ ।

मन्त्रेणावाहयेत् प्रेतं सर्गादिभ्यो निराकुलम् । अमुष्येत्यादिमन्त्रेण प्रतिष्ठाप्य समीरणम् ॥ ९ ॥
अङ्गं संकल्पयेत् पश्चान्मायाषड्दीर्घजातिभिः । एकसूत्राभिसंवीतं प्रतिष्ठाप्य घटं पुनः ॥ १० ॥
अभ्यर्च्योक्तेन मार्गेण पिण्डं संस्थापयेत्ततः । आदाय पूजितां पक्ष्या (चाधो) वार्धानोमस्त्ररूपिणीम् ॥ ११ ॥

सर्वतीर्थमनुं स्मृत्वा तत्तोयैरभिषेचयेत् । भस्मस्नानं ततः कुर्यात् परमेष्ठिमनुं स्मरेत् ॥ १२ ॥
पिण्डं दक्षिणमूर्धानं न्यस्तं दर्भास्तरे पुनः । नववस्त्रस्रगालेपैरलंकृत्याथ भूषणैः ॥ १३ ॥
तस्मिन् पिण्डे न्यसेत् पश्चान्मन्त्रराजमशेषतः । अभ्यर्च्य क्रममुद्रास्य समाप्ति गुरुपादुकाम् ॥ १४ ॥
सम्यग्विमानं संकल्प्य संस्थाप्य तं विचक्षणः । ग्रामं प्रदक्षिणीकृत्य शङ्खभेर्यादिनिःस्वनैः ॥ १५ ॥
प्रेतस्थानं प्रविश्याथ दक्षिणोत्तरमायताम् । उपलिप्य समां भूमिं लाजाक्षततिलानपि ॥ १६ ॥
विकीर्य सर्षपान् प्रोक्ष्य विमानं तत्र विन्यसेत् । संस्थाप्य तत्र चित्याग्नि परिस्तीर्य विलोमतः ॥ १७ ॥
पात्राण्यासाद्य विधिवद् दक्षिणे विष्णुदेवतम् । प्रणीतापात्रमासाद्य सम्पूज्य कुसुमादिभिः ॥ १८ ॥
दर्भैराच्छादितं धीमान् वह्निकोणे प्रविन्यसेत् । दक्षभागे यजेद् देवं भैरवं मण्डले क्रमात् ॥ १९ ॥
पूर्वोक्तेन विधानेन कृत्वा जिह्वादिकल्पनाम् । तिलतण्डुलसंमिश्रं पायसं चरुकं पुनः ॥ २० ॥
मृत्युञ्जयेन संमन्त्र्य पञ्चश्लोकैर्विशेषतः । साज्येन चरुणा पश्चात् पञ्चरत्नैर्विशेषतः ॥ २१ ॥
ब्रह्माण्यां न्याससम्प्रोक्तैः स्वाहान्तैः सुसमाहितः । मूलविद्याद्वयं जप्त्वा प्रत्येकं सप्तसप्तकम् ॥ २२ ॥
हुनेत्क्रमात् सावरणं विलोमेन विधानतः । एवं विलोमतो होमान्न्यस्तमन्त्रान् गुरोस्तनौ ॥ २३ ॥
क्रमेण विलयं कुर्यात् सूक्ष्मपुर्यष्टकात्मनि । हुत्वा वाग्भवमन्त्रेण स्वाहान्तेन विचक्षणः ॥ २४ ॥
पुनश्च विद्यया हुत्वा ततस्तत्त्वलयात्मिकाम् । इष्टिं संन्यासिनां कुर्यात्क्रमेण व्याप्तिभाजनम् ॥ २५ ॥
ततस्तत्त्वानि सूक्ष्माणि विलोमेन विधानतः । तत्रार्धे शेषं संयोज्य सर्वमात्मनि योजयेत् ॥ २६ ॥
सूक्ष्मरूपेणात्मगतपुण्यपापे सदा ह्ययम् । नाशयेत्कर्म शिष्यस्य भयभक्षिणिहोमतः ॥ २७ ॥

५ खटंकसखवरयूं हुं फट् शिशोः खहुं पुण्यपापानां नाशयामि स्वाहा ५ ।

एवं स्थूलक्रमं हुत्वा सूक्ष्मलीनं विभावयेत् । विलोमेन क्रमेणैव सूक्ष्मं चापि परं तथा ॥ २८ ॥
एवं विभौ समायोज्यं शिष्यं क्षीणमलत्रम् । पूर्णाहुतिप्रयोगेण योजयेत्परमे पदे ॥ ३० ॥
शिवशक्त्यात्मके शुद्धे पुनरावृत्तिवर्जिते । संवित्सुखमये साक्षात् तत्त्वातीते निजे पदे ॥ ३१ ॥
इति संयोजिते साक्षाद् गुरुणा परमे पदे । संत्यज्य मलकालुष्यं शुभं वा चावकल्पके (?) ॥ ३२ ॥
आज्येन जुहुयात् पञ्चश्लोकैस्तत्त्वैरघोरतः । अनुलोमविधानेन प्रायश्चित्ताय चास्तिकः ॥ ३३ ॥
देहमानेन शिष्यस्य शयनं परिकल्पयेत् । बहिर्दक्षिणदिग्भागे कुलवृक्षसमुद्भवैः ॥ ३४ ॥
शंकुभिर्दक्षिणावर्तसमिद्भिर्वाथ पिञ्जलैः । दर्भैश्च शयनं कृत्वा त्रिगुणीकृत्य तन्तुना ॥ ३५ ॥
नवकृत्वो वेष्टयित्वा चन्दनागुरुपूर्वकैः । कृत्वा चितिं पुनः काष्ठैर्नववस्त्रेण वेष्टयेत् ॥ ३६ ॥
पद्मं त्रिकोणषट्कोणकर्णिकं साष्टपत्रकम् । सद्विरेखं विधायात्र पुष्पाणि विनिसार्य च ॥ ३७ ॥
प्रेतं दक्षिणमूर्धानं विन्यस्य जिह्मदृष्टिकः । रक्षां मन्त्रेण संकल्प्य ज्वालामालिनिविद्यया ॥ ३८ ॥
प्रज्वाल्याघोरमन्त्रेण तथा पाशुपतेन वा । यावद्भस्मीभवत्येतत् तावद्धोमो विधीयते ॥ ३९ ॥
प्राप्ता ये गोत्रिणस्तत्र सर्वत्र च समागताः । स्तोत्रं मन्त्रजपं कुर्युः प्रयुतायुतकर्मणा ॥ ४० ॥
विभाव्य क्रमतः प्रेतं भक्षितं योगिनीगणैः । विद्याद्वयजपं कुर्यान्निश्चलेनान्तरात्मना ॥ ४१ ॥
स्तुत्वा पश्चाद्यथाशास्त्रं स्वक्रमं सम्यगर्चयेत् । रक्षयेच्च चितावह्निं यावदस्थिसमुच्चयम् ॥ ४२ ॥
दिवसे सप्तमे वह्निं घृतेन पयसाथवा । निर्वाप्यास्थीनि पादाद्यं नवधा मस्तकावधि ॥ ४३ ॥
क्रमात् संगृह्य निःक्षिप्य पात्रे संवेष्ट्य वाससा । नवेन भस्म प्रक्षिप्य नद्यां तोयालयेऽपि वा ॥ ४४ ॥
देवमातृगृहे वाथ स्वगृहे वास्थिभाजनम् । खात्वा निधाय तस्योच्चैर्मेखलात्रयसंयुतम् ॥ ४५॥
पीठं संकल्प्य शिष्यो वा कनिष्ठोऽणुविधानवित् । त्रिसंध्यमर्चयेत् पीठे विधिद्गुरुमण्डलम् ॥ ४६ ॥
एकादशे दिने कृत्वा सायमुत्सवमास्तिकः । सम्यक्पात्रं प्रतिष्ठाप्य हेतुनापूर्य सादरम् ॥ ४७ ॥

स्वर्णरत्नादिकं तत्र विनिःक्षिप्य यथाबलम् । समयाचारसंपन्नं नित्यपूजापरायणम् ॥ ४८ ॥
योग्यं मान्त्रिकमानीयं सम्पूज्यास्मै निवेदयेत् । पर्वपूजां मृताहेऽपि प्रतिमासं समाचरेत् ॥ ४९ ॥
सम्पूर्णे वत्सरे कुर्यान्महोत्सवमतन्द्रितः । अस्थिभाजनमुद्धृत्य पश्चाद् देशिकपुङ्गवः ॥ ५० ॥
नद्यां समुद्रगामिन्यां निक्षिपेन्निखनेत् तु वा । नदीतीरेऽथवान्यत्र तत्र वृक्षान् प्ररोपयेत् ॥ ५१ ॥
अथवा प्रतिमां वापि कृत्वा शिल्पिभिरन्वितः । पादुकां वा शुभे देशे सुलग्ने सुमुहूर्तके ॥ ५२ ॥
पूर्वोक्तेन विधानेन संयोज्य परमे पदे । भावयेन्मनसा पश्चाद् शंभुत्वं तस्य चान्तिके ॥ ५३ ॥
ये केचित् पशुमार्गस्था गुप्ताचाराः कुलागमे । तेषामपि मृते कुर्याद्दर्भैः पञ्चाशता गुरुः ॥ ५४ ॥
विधाय कूर्चमावाह्य तत्र प्रेतं विधानतः । पूर्वोक्तेन विधानेन तत्र सर्वं समाचरेत् ॥ ५५ ॥
जोषयेदन्यशिष्याणामन्यथा कृपया गुरु । कुर्याद्वा तेन प्रतिमामन्त्येष्टिं कुलशासने ॥ ५६ ॥
सर्वलक्षणसम्पन्नं शालिपिष्टमयं शुभम् । देहं कृत्वा समावाह्य शिष्यात्मानं विधानतः ॥ ५७ ॥
तस्मिन् पिण्डे न्यसेत्पूर्वं मन्त्रं पूर्ववदेव तु । पश्चाद्विलोममार्गेण हुत्वा स्थूलक्रमं बुधः ॥ ५८ ॥
परे क्रमे निवेश्याथ पिण्डं पिष्टमयं ततः । स्रुचि निःक्षिप्य जुहुयात् स्रुवेणाच्छाद्य देशिकः ॥ ५९ ॥
पूर्णाहुतिप्रयोगेण प्राणाद्यैरेव पञ्चभिः । गुरुमुद्दिश्य कर्तव्या शिष्यैर्हुतिभिरेव वा ॥ ६० ॥
अन्त्येष्टिः सर्वदा कार्या मृतानाममृतेन तु । साक्षात् शाम्भवसिद्धानामन्ययोगो विधीयते ॥ ६१ ॥
तथापि कुर्यात्सिद्धार्थमात्मनः सर्वमास्तिकः । अथवा मनसा कुर्यादेकान्ते स्वयमास्तिकः ॥ ६२ ॥
मानसं परमुत्कृष्टं योगिनामपि न स्थितिः । तस्मात् सर्वप्रयत्नेन मानसं क्रममाचरेत् ॥ ६३ ॥

इत्यन्त्येष्टिविधिः ॥

श्रीनाथाङ्घ्रिसरोजकल्पकमहाशाख्येकनानाबिल-
श्रीमत्तन्त्रकदम्बकाकलनतो विद्यार्णवाख्यं परम् ।
विद्यारण्ययतिश्चकार सुमहत्तन्त्रं सतां प्रीतये
श्रीविद्यानगरेऽम्बदेवनृपतौ सन्नीतितः शासति ॥

इति श्रीमहामहोपाध्यायभगवत्पूज्यपादश्रीगोविन्दाचार्यशिष्य–श्रीभगवच्छंकराचार्यशिष्य–
श्रीविष्णुशर्माचार्यशिष्य–श्रीप्रगल्भाचार्यशिष्य–श्रीविद्यारण्ययतिविरचिते
श्रीविद्यार्णवाख्ये तन्त्रे षट्त्रिंशत्तमः श्वासः ॥ ३६ ॥

समाप्तोऽयं श्रीविद्यार्णवः । शुभमस्तु पाठकोपासकेभ्यः ।

श्रीकण्ठनाथाख्यहिमाद्रिशृङ्गस्रवत्सुतन्त्रामृतनिर्झराणाम् ।
वैधात्रसोपानपथावतारस्रोतोजुषां भूमिमुपागतानाम् ॥ १ ॥
पूर्वादिकाम्नायभिदा प्रसिद्धः संभेदभूतः खलु गौडपादः ।
वंशक्रमाच्छास्त्रमिदं तु तस्माच्छ्रीशङ्करस्वामिनमेत्य भेजे ॥ २ ॥
शिष्यैर्यदीयैः किल सम्प्रदायाः प्रचारिताः क्षेत्रमठादिकेषु ।
दृश्यन्त एवाद्य च तत्प्रशिष्यशिष्यो न्यबध्नाद् गुरुसाम्प्रदायम् ॥ ३ ॥
विद्यार्णवाभिख्यमिदं सुतन्त्रं विद्यारण्याख्य-यतिर्यतीन्द्रः ।
त्र्यङ्काङ्कभूसंमित (१९९३) वैक्रमाब्दे राजेश्वरश्रीहरिसिंहशिष्ट्या ॥ ४ ॥
श्रीरामचन्द्राधिकृतित्वनीतो कश्मीरदेशे हरभट्टशास्त्री ।
संपाद्य विद्वत्-शिवनाथसाह्यात् प्रकाशयद् ग्रन्थमिमं सपूर्णम् ॥ ५ ॥

हमारे प्रमुख प्रकाशन

मन्त्रमहोदधिः (मूल एवं हिन्दी अनुवाद)	400.00
मन्त्रमहोदधिः English I: 400.00, English II:	400.00
हिन्दी मन्त्र महार्णव (मूल एवं हिन्दी अनुवाद) देवी खण्डः 400.00 देवता खण्डः 400.00 मिश्र खण्डः	200.00
श्रीविद्यार्णवतन्त्रम् (मूलमात्र) पूर्वार्धम्: 250.00 उत्तरा० प्रथमः 250.00 उत्तरा० द्वितीयः	250.00
कुलार्णवतन्त्र (मूल एवं हिन्दी अनुवाद)	200.00
नारदपाञ्चरात्रम् (मूल एवं हिन्दी अनुवाद)	250.00
श्रीकृष्णयामलमहातन्त्रम् (मूलमात्र)	150.00
धनदारतिप्रिया तन्त्र (मूल एवं हिन्दी अनुवाद)	10.00
मातृकाभेद तन्त्र (मूल एवं संस्कृत टिप्पणी सहित)	25.00
त्रिपुरासार समुच्चय (नागभट्टकृत एवं गोविन्दाचार्य की संस्कृत टीका)	10.00
त्रिपुरातापियुपनिषद् एवं त्रिपुरोपनिषद्	5.00
हनुमद्वडवानल स्तोत्र, हनुमल्लाङ्गूलास्त्र स्तोत्र एवं हनुमान साठिका	5.00
शिवस्वरोदय (मूल एवं अंग्रेजी अनुवाद)	75.00
शनिस्तोत्रावलि	5.00
वामकेश्वरीमतम् (मूल एवं अंग्रेजी अनुवाद)	50.00
कौलज्ञाननिर्णय (मूल एवं अंग्रेजी अनुवाद)	100.00
डामरतन्त्र (मूल एवं अंग्रेजी अनुवाद)	75.00
कामरत्नतन्त्रम् (मूल एवं हिन्दी अनुवाद)	85.00
अद्भुत रामायण (महर्षि वाल्मीकि कृत)	50.00
Encyclopedia of Yoga	300.00
Dictionaries of Tantra Sastra	100.00
Encyclopedia of Indian Erotics	200.00
मनमोदक (बालोप्योगी हास्य प्रधान कहानियाँ) लेखक - महताब राय - संपादक - प्रेमचन्द	40.00

कृष्ण कुमार राय की महत्वपूर्ण कृतियाँ -
बीसवीं सदी के सर्वश्रेष्ठ कथाकार - प्रेमचन्द
(दुलर्भ संस्मरण, विचारोत्तेजक शोध लेख)
गल्प समुच्चय (प्रेमचन्द परम्परा की उत्कृष्ट कहानियाँ)
अलका (सामाजिक उपन्यास)
तरंग (गद्य-काव्य, रेखाचित्र इत्यादि)

प्रेस में

प्राच्य प्रकाशन
लमही (पोस्ट, वाया सारनाथ) वाराणसी-२२१००७